UNIVERSAL
LIBRARY

OU_192722

UNIVERSAL
LIBRARY

30—29-4-72—10,000

OSMANIA UNIVERSITY LIBRARY

Call No. S294.592 U65U Accession No. PG 3239

उपनिषद्भाष्यम् 1/01.2.P1

book should be returned on or before the date last marked below


1928.

POPULAR EDITION

Works of Shankaracharya

IN ORIGINAL SANSKRIT.

VOL. II, PART I



THE

UPANISHADBHASHYA



EDITED BY

Hari Raghunath Bhagavat, B.A.

2nd Edition

ASHTEKAR & Co.

POONA

1927

POPULAR EDITION OF THE

Works of Shri Shankaracharya.

In Original Sanskrit.

Vol. I. Gītābhāshya .. . .. Rs. 2-0
Vol. II. Upanishadbhāshya, *i.e.*, the principal ten Upanishads with Shankara's Com. Rs. 10-0
Vol. III. Brahmasūtrabhāshya .. .. Rs. 4-0
Vol. IV. Minor Works .. .. .. Rs. 4-0

R. Ashtekar & Co., Poona (India)

श्रीशंकराचार्यविरचितग्रंथसंग्रहः ।

द्वितीये संपुटे प्रथमो भागः ।

ॐ उपनिषद्भाष्यम्

रा. रा. हरि रघुनाथ भागवत

इत्यनेन गार्ग्यगोत्रजचित्तपावनब्राह्मणेन

पुण्यपत्तनस्थेन संशोधितम् ।

द्वितीयं संस्करणम् ।

पुण्यपत्तने

अष्टेकर कंपनी

इत्येतैः प्राकाश्यं नीतम् ।

शालिवाहनशकाब्दाः १८४९

Published by

H. R. BHAGAVAT, BHAGAVAT HOUSE, SADASHIVA PETH

POONA CITY

Printed at

THE BANGALORE PRESS, LAKE VIEW, MYSORE ROAD

BANGALORE CITY

उपनिषदनुक्रमणिका ।

	उपनिषत् ।			पृष्ठानि ।
१	ईशावास्योपनिषत्	..	..	१— ११
२	ऐतरेयोपनिषत	..	..	१२— ३५
३	काठकोपनिषत्	..	..	३६— ७७
४	केनोपनिषत्	..	..	७८— ११२
५	छांदोग्योपनिषत्	..	..	११३— ३३४
६	तैत्तिरीयोपनिषत्	..	..	३३५— ३९२
७	प्रश्नोपनिषत्	..	..	३९३—४२३
८	मांडूक्योपनिषत्	..	..	४२४— ४९७
९	मुंडकोपनिषत्	..	..	४९८— ६३१

॥ ॐ ॥

श्रीमच्छंकराचार्यविरचितभाष्ययुता

ईशावास्योपनिषत् ।

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

'ईशा वास्यं' इत्यादयो मंत्राः कर्मस्वविनियुक्ताः, तेषामकर्मशेषस्यात्मनो याथात्म्यप्रकाशकत्वात् । याथात्म्यं चात्मनः शुद्धत्वापापविद्धत्वैकत्वनित्यत्वाशरीरत्वसर्वगतत्वादि वक्ष्यमाणम् । तच्च कर्मणा विरुध्यते इति युक्त एवैषां कर्मसु अविनियोगः । न ह्येवंलक्षणमात्मनो याथात्म्यं उत्पाद्यं विकार्यं आप्यं संस्कार्यं वा कर्तृभोक्तृरूपं वा, येन कर्मशेषता स्यात्, सर्वासामुपनिषदां आत्मयाथात्म्यनिरूपणेनैवोपक्षयात्, गतानां मोक्षधर्माणां चैवंपरत्वात् । तस्मात् आत्मनः अनेकत्वकर्तृत्वभोक्तृत्वादि च अशुद्धत्वापापविद्धत्वादि चोपादाय लोकबुद्धिसिद्धं कर्माणि विहितानि ॥

यो हि कर्मफलेनार्थी दृष्टेन ब्रह्मवर्चसादिना अदृष्टेन स्वर्गादिना च द्विजातिरहं न काणत्वकुब्जत्वाद्यनधिकारप्रयोजकधर्मवान् इत्यात्मानं मन्यते सोऽधिक्रियते कर्मस्विति ह्यधिकारविदो वदन्ति । तस्मादेते मंत्रा आत्मनो याथात्म्यप्रकाशनेन आत्मविषयं स्वाभाविककर्मविज्ञानं निवर्तयन्त शोकमोहादिसंसारधर्मावच्छित्तिसाधनमात्मैकत्वादिविज्ञानमुत्पादयन्ति । इत्येवमुक्ताधिकार्यभिधेयसंबंधप्रयोजनान्मंत्रान संक्षेपतो व्याख्यास्यामः ॥

ईशा वास्यमिदꣳ सर्वं यत्किंच जगत्यां जगत् ।
तेन त्यक्तेन भुंजीथा मा गृधः कस्य स्विद्धनम् ॥ १ ॥

ईशा वास्यमिति । ईशा ईष्टे इतीट् तेनेशा । ईशिता परमेश्वरः परमात्मा सर्वस्य । स हि सर्वमीष्टे सर्वजंतूनामात्मा सन्प्रत्यगात्मतया । तेन स्वेन रूपेणात्मनेशा वास्यमाच्छादनीयम् । किम् इदं सर्वं यत्किंच यत्किंचिज्जगत्यां पृथिव्यां

जगत्तत्सर्वम् स्वेनात्मना । ईशेन प्रत्यगात्मतया अहमेवेदं सर्वमिति परमार्थसत्य-रूपेणानृतमिदं सर्वं चराचरमाच्छादनीयं परमात्मना । यथा चंदनागर्वादेरुद-कादिसंबंधजक्लेदादिजमौपाधिकं दौर्गंध्यं तत्स्वरूपनिघर्षणेनाच्छाद्यते स्वेन पार-मार्थिकेन गंधेन, तद्वदेव हि स्वात्मन्यध्यस्तं स्वाभाविकं कर्तृत्वभोक्तृत्वादिलक्षणं जगत् द्वैतरूपं जगत्यां पृथिव्यां, जगत्यामित्युपलक्षणार्थत्वात्सर्वमेव नामरूपकर्माख्यं विकारजातं, परमार्थसत्यात्मभावनया त्यक्तं स्यात । एवमीश्वरात्मभावनया युक्तस्य पुत्राद्येषणात्रयसंन्यास एवाधिकारो न कर्मसु । तेन त्यक्तेन त्यागेनेत्यर्थः । न हि त्यक्तो मृतः पुत्रो भृत्यो वा आत्मसंबंधिताया अभावादात्मानं पालयति अतः त्यागेनेत्यर्थमेवार्थः । भुंजीथाः पालयेथाः । एवं त्यक्तैषणस्त्वं मा गृधः, गृधि-माकांक्षां मा कार्षीर्धनविषयाम् । कस्यस्विद्धनं कस्यचित्परस्य स्वस्य वा धनं मा काक्षीरित्यर्थः । स्विदित्यनर्थको निपातः । अथवा, मा गृधः । कस्मात् ? कस्यस्विद्धनं इत्याक्षेपार्थो न कस्यचिद्धनमस्ति यत् गृध्येत । आत्मैवेदं सर्वमिती-श्वरभावनया सर्वं त्यक्तमत आत्मन एवेदं सर्वमात्मैव च सर्वम् । अतो मिथ्या-विषयां गृधिं मा कार्षीरित्यर्थः ॥ १ ॥

एवमात्मविदः पुत्राद्येषणात्रयसंन्यासेन आत्मज्ञाननिष्ठतया आत्मा रक्षि-तव्यः इत्येष वेदार्थः । अथेतरस्यानात्मज्ञतया आत्मग्रहणाशक्तस्येदमुपदिशति मंत्रः—

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥ २ ॥

कुर्वन्नेवेति । कुर्वन्नेव निर्वर्तयन्नेवेह कर्माण्यग्निहोत्रादीनि जिजीविषेज्जीवितु-मिच्छेच्छतं शतसंख्याकाः समाः संवत्सरान् । तावद्धि पुरुषस्य परमायुर्निरू-पितम् । तथा च प्राप्तानुवादेन यज्जिजीविषेच्छतं वर्षाणि तत्कुर्वन्नेव कर्माणीत्ये-तद्विधीयते । एवं एवंप्रकारेण त्वयि जिजीविषति नरे नरमात्राभिमानिनि इत एतस्मादग्निहोत्रादीनि कर्माणि कुर्वतो वर्तमानात्प्रकारादन्यथा प्रकारान्तरं नास्ति येन प्रकारेणाशुभं कर्म न लिप्यते, कर्मणा न लिप्यते इत्यर्थः । अतः शास्त्रविहितानि कर्माण्यग्निहोत्रादीनि कुर्वन्नेव जिजीविषेत ॥ कथं पुनरिदमवगम्यते, पूर्वेण मंत्रेण संन्यासिनो ज्ञाननिष्ठोक्ता, द्वितीयेन तदशक्तस्य कर्मनिष्ठेति, उच्यते– ज्ञानकर्म-णोर्विरोधं पर्वतवदकंप्यं यथोक्तं न स्मरसि किम् । इहाप्युक्तं, यो हि जिजीविषेत्स

कर्माणि कुर्वन्नेवेति । 'ईशा वास्यमिदं सर्वं' 'तेन त्यक्तेन भुंजीथा मा गृधः कस्य स्विद्धनं' इति च । 'न जीविते मरणे वा गृधि कुर्वातारण्यमियादिति पदं ततो न पुनरेयात्' इति संन्यासशासनात् । उभयोः फलभेदं च वक्ष्यति । 'इमौ द्वावेव पंथानौ अनुनिष्क्रान्ततरौ भवतः क्रियापथश्चैव पुरस्तात्संन्यासश्चोत्तरेण' तयोः संन्यासपथ एवातिरेचयति "न्यास एवात्यरेचयत्" इति च तैत्तिरीयके । "द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः । प्रवृत्तिलक्षणो धर्मो निवृत्तश्च विभावितः" इत्यादि पुत्राय विचार्य निश्चितमुक्तं व्यासेन वेदाचार्येण भगवता । विभागं चानयोर्दर्शयिष्यामः ॥ २ ॥

अथेदानीमविद्वन्निंदार्थोऽयं मंत्र आरभ्यते—

असुर्या नाम ते लोका अधेन तमसाऽऽवृताः ।
ताꣳस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥ ३ ॥

असुर्याः परमात्मभावमद्वयमपेक्ष्य देवादयोऽप्यसुरास्तेषां च स्वभूता लोका असुर्या नाम । नामशब्दोऽनर्थको निपातः । ते लोकाः कर्मफलानि लोक्यन्ते दृश्यन्ते भुज्यन्त इति जन्मानि । अंधेन अदर्शनात्मकेनाज्ञानेन तमसा आवृता आच्छादिताः तान्स्थावरान्तान्प्रेत्य त्यक्त्वेमं देहमभिगच्छन्ति यथाकर्म यथाश्रुतम् । ये के चात्महनः आत्मानं घ्नन्तीत्यात्महनः । के, ते जना येऽविद्वांसः । कथं ते आत्मानं नित्यं हिंसन्ति ? अविद्यादोषेण विद्यमानस्यात्मनस्तिरस्करणात् । विद्यमानस्यात्मनो यत्कार्यं फलं अजरामरत्वादिसंवेदनलक्षणं तद्धतस्येव तिरोभूतं भवतीति प्राकृता अविद्वांसो जना आत्महन उच्यन्ते । तेन त्वात्महननदोषेण संसरन्ति ते ॥ ३ ॥

यस्मात्मनो हननादविद्वांसः संसरन्ति, तद्विपर्ययेण विद्वांसो जना मुच्यन्तेऽनात्महनः, तत्कीदृशमात्मतत्त्वमित्युच्यते—

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥ ४ ॥

अनेजत् न एजत् । एजृ कंपने । कंपनं चलनं स्वावस्थाप्रच्युतिः तद्वर्जितं सर्वदैकरूपमित्यर्थः । तच्चैकं सर्वभूतेषु । मनसः संकल्पादिलक्षणाज्जवीयो जववत्तरम् । कथं विरुद्धमुच्यते—ध्रुवं निश्चलमिदं, मनसो जवीय, इति च । नैष दोषः, निरुपाध्युपाधिमत्त्वेनोपपत्तेः । तत्र निरुपाधिकेन स्वेन रूपेणोच्यतेऽनेज-

देकमिति । मनसोऽन्तःकरणस्य संकल्पविकल्पलक्षणस्योपाधेरनुवर्तनात् इह देहस्थस्य मनसो ब्रह्मलोकादिदूरगमनं संकल्पेन क्षणमात्राद्भवतीत्यतो मनसो जविष्ठत्वं लोके प्रसिद्धम । तस्मिन्मनसि ब्रह्मलोकादीन्द्रुतं गच्छति सति प्रथमप्राप्त इवात्मचैतन्याभासो गृह्यतेऽतो मनसो जवाय इत्याह । नैनद्देवा आप्नुवन्नादेवा-श्चक्षुरादीनीन्द्रियाण्येतत्प्रकृतमात्मतत्त्वं नाप्नुवन्न प्राप्तवन्त । तेभ्यो मनो जवीयो, मनोव्यापारव्यवहितत्वात् आभासमात्रमप्यात्मनो नैव देवानां विषयीभवति । यस्माज्जवनान्मनसोऽपि पूर्वमर्षत्पूर्वमेव गतम्, व्योमवद्व्यापित्वात । सर्वव्यापि तदात्मतत्त्वं सर्वसंसारधर्मवर्जितं स्वेन निरुपाधिकेन स्वरूपेणाविक्रियमेव सत् उपाधिकृताः सर्वाः संसारविक्रिया अनुभवतीवाविवेकिना मूढानामनेकमिव च प्रतिदेहं प्रत्यवभासत इत्येतदाह— तद्धावतो द्रुतं गच्छतोऽन्यानात्मविलक्षणान्मनोवागिन्द्रियप्रभृतीनत्येत्यतीत्य गच्छतीव । इवार्थं स्वयमेव दर्शयति तिष्ठदिति स्वयमविक्रियमेव सदित्यर्थः । तस्मिन्नात्मतत्त्वे सति नित्यचैतन्यस्वभावे, मातरिश्वा मातर्यन्तरिक्षे श्वयति गच्छतीति मातरिश्वा वायु सर्वप्राणवृत्तिक्रियात्मको यदाश्रयाणि कार्यकरणजातानि यस्मिन्नोतानि प्रोतानि च यत्सूत्रसंज्ञकं सर्वस्य जगतो विधारयितृ स मातरिश्वा, अपः कर्माणि प्राणिनां चेष्टालक्षणानि अन्न्यादित्यपर्जन्यादीनां ज्वलनदहनप्रकाशाभिवर्षणादिलक्षणानि, दधाति विभजतीत्यर्थः, धारयतीति वा 'भीषास्माद्वातः पवते' इत्यादिश्रुतिभ्यः । सर्वा हि कार्यकरणविक्रिया नित्यचैतन्यात्मस्वरूपे सर्वास्पदभूते सत्येव भवन्तीत्यर्थः ॥ ४ ॥

न मंत्राणां जामितास्तीति पूर्वमंत्रोक्तमप्यर्थं पुनराह-

तदेजति तन्नैजति तद्दूरे तद्वंतिके ।
तदंतरस्य सर्वस्य तदु सर्वस्यास्य बाह्यत ॥ ५ ॥

तदात्मतत्त्वं यत्प्रकृतं एजति चलति तदेव च नैजति स्वतो नैव चलति स्वतोऽचलमेव सच्चलतीवेत्यर्थः । किंच तत् दूरे वर्षकोटिशतैरप्यविदुषामप्राप्यत्वात् दूर इव । तत् उ अन्तिके समीपेऽत्यंतमेव विदुषां, आत्मत्वान्न केवलं दूरेऽन्तिके च । तदंतरभ्यंतरेऽस्य सर्वस्य, 'य आत्मा सर्वान्तर' इति श्रुतेः, अस्य सर्वस्य जगतो नामरूपक्रियात्मकस्य । तदु अपि सर्वस्यास्य बाह्यतो व्यापकत्वादाकाशवन्निरतिशयसूक्ष्मत्वादंतः । 'प्रज्ञानघन एव' इति च शासनान्निरंतरं च ॥ ५ ॥

यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति ।

सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥ ६ ॥

यः परिव्राट् मुमुक्षुः सर्वाणि भूतान्यव्यक्तादीनि स्थावरान्तान्यात्मन्येवानुपश्यत्यात्मव्यतिरिक्तानि न पश्यतीत्यर्थः । सर्वभूतेषु च तेष्वेव चात्मानं तेषामपि भूतानां स्वमात्मानमात्मत्वेन, यथास्य देहस्य कार्यकारणसंघातस्यात्माहं सर्वप्रत्ययसाक्षिभूतश्चैतयिता केवलो निर्गुणोऽनेनैव स्वरूपेणाव्यक्तादीनां स्थावरान्तानामहमेवास्मीति सर्वभूतेषु चात्मानं निर्विशेषं यस्त्वनुपश्यति, स ततस्तस्मादेव दर्शनान्न विजुगुप्सते विजुगुप्सां घृणां न करोति । प्राप्तस्यैवानुवादोऽयम् । सर्वा हि घृणाऽऽत्मनोऽन्यद्दुष्टं पश्यतो भवति, आत्मानमेवात्यंतविशुद्धं निरंतरं पश्यतो न घृणानिमित्तमर्थान्तरमस्तीति प्राप्तमेव । ततो न विजुगुप्सते इति ॥ ६ ॥

इममेवार्थमन्योऽपि मंत्र आह—

यस्मिन्सर्वाणि भूतानि आत्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥ ७ ॥

यस्मिन्सर्वाणि भूतानि । यस्मिन्काले यथोक्तात्मनि वा तान्येव भूतानि सर्वाणि परमार्थात्मदर्शनादात्मैवाभूदात्मैव संवृत्त परमार्थवस्तु विजानतः, तत्र तस्मिन्काले तत्रात्मनि वा को मोहः क शोकः । शोकश्च मोहश्च कामकर्मबीजमजानतो भवति, न त्वात्मैकत्वं विशुद्धं गगनोपमं पश्यत । को मोहः कः शोक इति शोकमोहयोरविद्याकार्ययोराक्षेपेणासंभवप्रदर्शनात्मकारणस्य संसारस्य अत्यंतमेवोच्छेद प्रदर्शितो भवति ॥ ७ ॥

योऽयमतींद्रियैर्मंत्रैरुक्त आत्मा स स्वेन रूपेण किलक्षण इत्याह अयं मंत्र —

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽ-
र्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥ ८ ॥

स पर्यगात्स यथोक्त आत्मा पर्यगात्पर्यगच्छत्समंतादगाद्गतवान् आकाशवद्व्यापीत्यर्थः । शुक्रं शुभ्रं ज्योतिष्मद्दीप्तिमानित्यर्थः । अकायमशरीरं लिंगशरीरवर्जित इत्यर्थः । अव्रणमक्षतम् । अस्नाविरं स्नावा शिरा यस्मिन्न विद्यन्ते इत्यस्नाविरम् । अव्रणमस्नाविरमित्येताभ्यां स्थूलशरीरप्रतिषेधः । शुद्धं निर्मलमविद्यामलरहितमिति कारणशरीरप्रतिषेधः । अपापविद्धं धर्माधर्मादिपापवर्जितम् । शुक्रमित्यादीनि वचांसि पुंलिंगत्वेन परिणेयानि, स पर्यगादित्युपक्रम्य कविर्मनीषीत्यादिना

पुंलिगत्वेनोपसंहारात् । कवि. क्रान्तदर्शी सर्वदृक् 'नान्योऽतोऽस्ति द्रष्टा' इत्यादिश्रुतेः । मनीषी मनस ईषिता सर्वज्ञ ईश्वर इत्यर्थः । परिभूः सर्वेषां पर्युपरि भवतीति परिभूः । स्वयंभूः स्वयमेव भवतीति येषामुपरि भवति यश्चोपरि भवति स सर्वः स्वयमेव भवतीति स्वयंभूः । स नित्यमुक्त ईश्वरो याथातथ्यतः सर्वज्ञत्वाद्यथातथाभावो याथातथ्यं तस्मात् यथाभूतकर्मफलसाधनतोऽर्थान्कर्तव्यपदार्थान्व्यदधाद्विहितवान्यथानुरूपं व्यभजदित्यर्थः । शाश्वतीभ्यो नित्याभ्यः समाभ्यः संवत्सराख्येभ्यः प्रजापतिभ्य इत्यर्थः ॥ ८ ॥

अत्राद्येन मंत्रेण सर्वैषणापरित्यागेन ज्ञाननिष्ठोक्ता प्रथमो वेदार्थः. 'ईशा वास्यमिदं सर्वं' 'मा गृधः कस्य स्विद्धनं' इति । अज्ञानां जिजीविषूणां ज्ञाननिष्ठासंभवे 'कुर्वन्नेवेह कर्माणि जिजीविषेत्' इति कर्मनिष्ठोक्ता द्वितीयो वेदार्थः । अनयोश्च निष्ठयोर्विभागो मंत्रद्वयप्रदर्शितयोर्बृहदारण्यकेऽपि प्रदर्शितः 'सोऽकामयत जाया मे स्यात' इत्यादिना अज्ञस्य कामिनः कर्माणीति । 'मन एवास्यात्मा वाग्जाया' इत्यादिवचनात् अज्ञत्वं कामित्वं च कर्मनिष्ठस्य निश्चितमवगम्यते । तथा च तत्फलं सप्तान्नसर्गस्तेष्वात्मभावेनात्मस्वरूपावस्थानम् । जायाद्येषणात्रयसंन्यासेन चात्मविदां कर्मनिष्ठाप्रातिकूल्येनात्मस्वरूपनिष्ठैव दर्शिता 'किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोकः' इत्यादिना । ये तु ज्ञाननिष्ठा. संन्यासिनस्तेभ्यः 'असुर्या नाम ते' इत्यादिना अविद्वन्निंदाद्वारेणात्मनो याथात्म्यं 'स पर्यगात्' इत्येतदंतैर्मंत्रैरुपदिष्टम् । ते ह्यत्राधिकृता न कामिन इति । तथा च श्वेताश्वतराणां मंत्रोपनिषदि 'अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्टं' इत्यादि विभज्योक्तम् । ये तु कामिनः कर्मनिष्ठाः कर्म कुर्वन्त एव जिजीविषवस्तेभ्य इदमुच्यते 'अंधं तमः' इत्यादि । कथं पुनरेवमवगम्यते न तु सर्वेषामित्युच्यते– अकामिनः साध्यसाधनभेदोपमर्देन 'यस्मिन्सर्वाणि भूतानि आत्मैवाभूद्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः' इति यदात्मैकत्वविज्ञानं, तन्न केनचित्कर्मणा ज्ञानान्तरेण वा ह्यमूढ. समुच्चिचीषति । इह तु समुच्चिचीषया अविद्वदादिनिंदा क्रियते । तत्र च यस्य येन समुच्चयः संभवति न्यायतः शास्त्रतो वा तदिहोच्यते । तद्वैवं वित्तं देवताविषयं ज्ञानं कर्मसंबधित्वेनोपन्यस्तं न परमात्मज्ञानं 'विद्यया देवलोकः' इति पृथक्फलश्रवणात् । तयोर्ज्ञानकर्मणोरिहैकैकानुष्ठाननिंदा

समुच्चिचीषया, न निदापरैवैकैकस्य, पृथक्फलश्रवणात् 'विद्यया तदारोहन्ति' 'विद्यया देवलोकः' 'न तत्र दक्षिणा यान्ति' 'कर्मणा पितृलोकः' इति नहि शास्त्रविहितं किंचिदकर्तव्यतामियात् । तत्र

अंधं तमः प्रविशन्ति ये अविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायां रताः ॥ ९ ॥

अंधं तमोऽदर्शनात्मकं तमः प्रविशन्ति । के ये अविद्यां विद्याया अन्या अविद्या ता कर्मेत्यर्थः कर्मणो विद्याविरोधित्वात् । तामविद्यामग्निहोत्रादिलक्षणामेव केवलामुपासते तत्परा सन्तोऽनुतिष्ठन्तीत्यभिप्रायः । ततस्तस्मादंधात्मकात्तमसो भूय इव बहुतरमेव ते तमः प्रविशन्ति । के, कर्म हित्वा ये उ ये तु विद्यायामेव देवताज्ञाने एव रता अभिरता ॥ ९ ॥

तत्र अवांतरफलभेदं विद्याकर्मणोः समुच्चयकारणमाह । अन्यथा फलवदफलवतोः संनिहितयोरंगांगितया जामितैव स्यादिति—

अन्यदेवाहुर्विद्यया अन्यदाहुरविद्यया ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १० ॥

अन्यत्पृथगेव विद्यया क्रियते फलमित्याहुर्वदन्ति 'विद्यया देवलोको' 'विद्यया तदारोहन्ति' इति श्रुतेः । अन्यदाहुरविद्यया कर्मणा क्रियते 'कर्मणा पितृलोकः' इति श्रुतेः । इत्येवं शुश्रुम श्रुतवन्तो वयं धीराणां धीमतां वचनम् । ये आचार्या नोऽस्मभ्यं तत्कर्म ज्ञानं च विचचक्षिरे व्याख्यातवन्तस्तेषामयमागमः पारंपर्यागत इत्यर्थः ॥ १० ॥

यत एवमतः—

विद्यां चाविद्यां च यस्तद्वेदोभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥ ११ ॥

विद्यां चाविद्यां च देवताज्ञानं कर्म चेत्यर्थः । यस्तदेतदुभयं सहैकेन पुरुषेणानुष्ठेयं वेद तस्यैवं समुच्चयकारिण एवैकपुरुषार्थसंबंधः क्रमेण स्यादित्युच्यते—अविद्यया कर्मणाग्निहोत्रादिना मृत्युं, स्वाभाविकं कर्म ज्ञानं च मृत्युशब्दवाच्यं, उभयं तीर्त्वातिक्रम्य विद्यया देवताज्ञानेनामृतं देवतात्मभावमश्नुते प्राप्नोति । तद्धयमृतमुच्यते यद्देवतात्मगमनम् ॥ ११ ॥

अधुना व्याकृताव्याकृतोपासनयोः समुच्चिचीषया प्रत्येकं निंदोच्यते—

अंधं तमः प्रविशन्ति येऽसंभूतिमुपासते ।
ततो भूय इव ते तमो य उ संभूत्यां रताः ॥ १२ ॥

अंधं तमः प्रविशन्ति येऽसंभूति संभवनं संभूति सा यस्य कार्यस्य सा संभूतिस्तस्या अन्या असंभूतिः प्रकृति कारणमविद्या अव्याकृताख्या तामसंभूतिमव्याकृताख्या प्रकृति कारणमविद्या कामकर्मबीजभूतामदर्शनात्मिकामुपासते ये ते तदनुरूपमेवांधं तमोऽदर्शनात्मकं प्रविशन्ति । ततस्तस्मादपि भूय बहुतरमिव तम ते प्रविशन्ति य उ संभूत्या कार्यब्रह्मणि हिरण्यगर्भाख्ये रता ॥ १२ ॥

अधुना उभयोरुपासनयो समुच्चयकारणमवयवफलभेदमाह—

अन्यदेवाहुः संभवादन्यदाहुरसंभवात् ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १३ ॥

अन्यदेव पृथगेवाहु. फलं संभवात्संभूते. कार्यब्रह्मोपासनादणिमाद्यैश्वर्यलक्षणं व्याख्यातवन्त इत्यर्थ. । तथा चान्यदाहुरसंभवादसंभूतेरव्याकृतादव्याकृतोपासनाद्यदुक्तं 'अंधं तम प्रविशन्ति' इति, प्रकृतिलय इति च पौराणिकैरुच्यते । इत्येवं शुश्रुम धीराणा वचनं ये नस्तद्विचचक्षिरे व्याकृताव्याकृतोपासनफलं व्याख्यातवन्त इत्यर्थ ॥ १३ ॥

यत एवमत. समुच्चय संभूत्यसंभूत्युपासनयोर्युक्त एवैकपुरुषार्थत्वाच्चेत्याह —

(अ)संभूतिं च विनाशं च यस्तद्वेदोभयं सह ।
विनाशेन मृत्युं तीर्त्वाऽसंभूत्याऽमृतमश्नुते ॥ १४ ॥

संभूतिं च विनाशं च यस्तद्वेदोभयं सह, विनाशेन विनाशो धर्मो यस्य कार्यस्य स तेन धर्मिणा अभेदेनोच्यते विनाश इति । तेन तदुपासनेनानैश्वर्यमधर्मकामादिदोषजातं च मृत्युं तीर्त्वा, हिरण्यगर्भोपासनेन ह्यणिमादिप्राप्ति फलं तेनानैश्वर्यादिमृत्युमतीत्य असंभूत्याऽव्याकृतोपासनयाऽमृतं प्रकृतिलयलक्षणमश्नुते । संभूतिं च विनाशं चेत्यत्रावर्णलोपेन निर्देशो द्रष्टव्य । प्रकृतिलयफलश्रुत्यनुरोधात् ॥ १४ ॥

मानुषदैवावित्तसाध्यं फलं शास्त्रलक्षणं प्रकृतिलयान्तम् । एतावती संसारगति. । अत. परं पूर्वोक्तं 'आत्मैवाभूद्विजानत ' इति सर्वात्मभाव एव सर्वैषणासंन्यासज्ञाननिष्ठाफलम् । एवं द्विप्रकार प्रवृत्तिनिवृत्तिलक्षणो वेदार्थोऽत्र प्रकाशितः । तत्र प्रवृत्तिलक्षणस्य वेदार्थस्य विधिप्रतिषेधलक्षणस्य कृत्स्नस्य प्रकाशने प्रवर्त्या-

न्तं ब्राह्मणमुपयुक्तम् । निवृत्तिलक्षणस्य वेदार्थस्य प्रकाशनेऽत ऊर्ध्वं बृहदारण्यकं उपयुक्तम् । तत्र निषेकादिश्मशानान्तं कर्म कुर्वञ्जिज्ञासुर्विषयो विद्यया सहापरब्रह्मविषयया, तदुक्तं 'विद्यां चाविद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते' इति । तत्र केन मार्गेणामृतत्वमश्नुत इत्युच्यते— 'तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मंडले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुष एतदुभयं सत्यं ब्रह्मोपासीनो यथोक्तकर्मकृच्च य सोऽन्तकाले प्राप्ते सत्यात्मानमात्मन प्राप्तिरं याचते—

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ १५ ॥

हिरण्मयेन पात्रेण हिरण्मयमिव हिरण्मयं ज्योतिर्मयमित्येतत् । तेन पात्रेणेवापिधानभूतेन सत्यस्य आदित्यमंडलस्थस्य ब्रह्मणोऽपिहितमाच्छादितं मुखं द्वारं तत्त्वं हे पूषन्नपावृण्वपसारय । सत्यधर्माय तव सत्यस्योपासनात्सत्यं धर्मो यस्य मम सोऽहं सत्यधर्मा तस्मै मह्यं अथवा यथाभूतस्य धर्मस्यानुष्ठात्रे दृष्टये तव सत्यात्मन उपलब्धये ॥ १५ ॥

पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन्समूह ।
तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि योऽसावसौ पुरुषः सोऽहमस्मि ॥ १६ ॥

हे पूषन । जगत पोषणात्पूषा रवि । तथैक एव ऋषति गच्छतीत्येकर्षिः हे एकर्षे । तथा सर्वस्य संयमनाद्यम हे यम । तथा रश्मीना प्राणानां रसानां च स्वीकरणात्सूर्य हे सूर्य । प्रजापतेरपत्यं प्राजापत्य हे प्राजापत्य । व्यूह विगमय रश्मीन्स्वान । समूह एकीकुरु उपसंहर तेजस्तापकं ज्योतिः । यत्ते तव रूपं कल्याणतमम-त्यंतशोभनं तत्ते तवात्मन. प्रसादात्पश्यामि । किंचाहं न तु त्वां मृत्यवद्याचे योऽसावादित्यमंडलस्थो व्याहृत्यवयव पुरुष. पुरुषाकारत्वात् . पूर्ण वानेन प्राणबुद्ध्यात्मना जगत्सर्वमस्मिंति पुरुष , पुरि शयनात्वा पुरुषः, सोऽहमस्मि भवामि ॥ १६ ॥

वायुरनिलममृतमथेदं भस्मान्तं शरीरम् ।
ॐ क्रतो स्मर कृतं स्मर क्रतो स्मर कृतं स्मर ॥ १७ ॥

अथेदानीं मम मरिष्यतो वायु. प्राणोऽध्यात्मपरिच्छेदं हित्वा अधिदैवतात्मानं सर्वात्मकमनिलममृतं सूत्रात्मानं प्रतिपद्यतामिति वाक्यशेषः । लिंगं चेदं ज्ञानकर्मसंस्कृतमुत्क्रामत्विति द्रष्टव्यं मार्गयाचनसामर्थ्यात् । अथेदं शरीरं

अग्नौ हुतं भस्मान्तं भूयात् । ओमिति यथोपासनमोप्रतीकात्मकत्वात्प्रतीकात्मकमन्याख्यं ब्रह्माभिदेनोच्यते । हे क्रतो संकल्पात्मक स्मर यन्मम स्मर्तव्यं तस्य कालोऽयं प्रत्युपस्थितः, अतः स्मरतावन्तं कालं भावितं कृतमग्ने स्मर यन्मया बाल्यप्रभृत्यनुष्ठितं कर्म तच्च स्मर । क्रतो स्मर कृतं स्मरेति पुनर्वचनमादरार्थम् ॥

पुनरन्येन मंत्रेण मार्गं याचते—

अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥ १८ ॥

इत्युपनिषत् ॥ ॐ पूर्णमदः इति शान्तिः ॥

अग्ने नयेति । हेऽग्ने नय गमय सुपथा शोभनेन मार्गेण । सुपथेति विशेषणं दक्षिणमार्गनिवृत्त्यर्थम् । निर्विण्णोऽहं दक्षिणेन मार्गेण गतागतलक्षणेन, अतो याचे त्वां पुनः पुनः गमनागमनवर्जितेन शोभनेन पथा नय । राये धनाय कर्मफलभोगायेत्यर्थः । अस्मान्यथोक्तधर्मफलविशिष्टान्विश्वानि सर्वाणि हे देव वयुनानि कर्माणि प्रज्ञानानि वा विद्वाञ्जानन् । किंच युयोधि वियोजय विनाशय अस्मदस्मत्तो जुहुराणं कुटिलं वंचनात्मकमेनः पापम् । ततो वयं विशुद्धाः सन्तः इष्टं प्राप्स्याम इत्यभिप्रायः । किंतु वयमिदानीं ते न शक्नुमः परिचर्यां कर्तुं, भूयिष्ठां बहुतरां ते तुभ्यं नमउक्तिं नमस्कारवचनं विधेम नमस्कारेण परिचरेमेत्यर्थः ॥

'अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते' 'विनाशेन मृत्युं तीर्त्वाऽसंभूत्याऽमृतमश्नुते' इति श्रुत्वा केचित्संशयं कुर्वन्ति । अतस्तन्निराकरणार्थं संक्षेपतो विचारणां करिष्यामः । तत्र तावत्किंनिमित्तः संशय इत्युच्यते— विद्याशब्देन मुख्या परमात्मविद्यैव कस्मान्न गृह्यते अमृतत्वं च ? ननु उक्तायाः परमात्मविद्यायाः कर्मणश्च विरोधात्समुच्चयानुपपत्तिः । सत्यम् । विरोधस्तु नावगम्यते विरोधाविरोधयोः शास्त्रप्रमाणकत्वात् । यथा अविद्यानुष्ठानं विद्योपासनं च शास्त्रप्रमाणकं तथा तद्विरोधाविरोधावपि । यथा च 'न हिंस्यात्सर्वभूतानि' इति शास्त्रादवगतं पुनः शास्त्रेणैव बाध्यते 'अध्वरे पशुं हिंस्यात्' इति । एवं विद्याविद्ययोरपि स्यात् । विद्याकर्मणोश्च समुच्चयः न 'दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता' इति श्रुतेः । 'विद्यां चाविद्यां च' इति वचनादविरोध इति चेन्न । हेतुस्वरूपफलविरोधात् । विद्याविद्याविरोधाविरोधयोर्विकल्पासं-

भवात्समुच्चयविधानादविरोध एवेति चेन्न । सहसंभवानुपपत्तेः । क्रमेणैकाश्रये स्यातां विद्याविद्ये इति चेन्न । विद्योत्पत्तौ अविद्यायां ह्यस्तत्वात्तदाश्रयेऽविद्यानुपपत्तेः । न ह्यग्निरुष्णः प्रकाशश्चेति विज्ञानोत्पत्तौ यस्मिन्नाश्रये तदुत्पन्नं तस्मिन्नेवाश्रये शीतोऽग्निरप्रकाशो वा इत्यविद्याया उत्पत्तिः । नापि संशयोऽज्ञानं वा । 'यस्मिन्सर्वाणि भूतानि आत्मैवाभूद्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः' इति शोकमोहाद्यसंभवश्रुतेः । अविद्यासंभवात्तदुपादानस्य कर्मणोऽप्यनुपपत्तिमत्त्वाच्च । 'अमृतमश्नुते' इत्यापेक्षिकममृतं, विद्याशब्देन परमात्मविद्याग्रहणे हिरण्मयेनेत्यादिना द्वारमार्गादियाचनमनुपपन्नं स्यात् । तस्मात् यथाव्याख्यात एव मंत्राणामर्थ इत्युपरम्यते ॥१८॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीशंकरभगवतः कृतौ वाजसनेयिसंहितोपनिषद्भाष्यं संपूर्णम् ॥

॥ ॐ ॥

ऐतरेयोपनिषत् ।

पारिसमाप्तं कर्म महापरब्रह्मविषयविज्ञानेन । सेषा कर्मणो ज्ञानसहितस्य परा गतिरुक्तविज्ञानद्वारेणोपसंहृता । ''एतत्सत्यं ब्रह्म प्राणाख्यम्'' ''एष एको देव'' ''एतस्यैव प्राणस्य सर्वे देवा विभूतयः'' ''एतस्य प्राणस्यात्मभावं गच्छन्देवता अप्येति'' इत्युक्तम् । सोऽयं देवताप्ययलक्षण पर पुरुषार्थ । एष मोक्षः । स चायं यथोक्तेन ज्ञानकर्मसमुच्चयसाधनेन प्राप्तव्यो नात परमस्तीत्येके प्रतिपन्नाः तान्निराचिकीर्षुरुत्तरं केवलात्मज्ञानविधानार्थ 'आत्मा वा इदं' इत्याद्याह ॥

कथं पुनरकर्मसंबंधिकेवलात्मविज्ञानविधानार्थ उत्तरो ग्रंथ इति गम्यते ? अन्यार्थानवगमात् । तथा च पूर्वोक्तानां देवतानामग्न्यादीना संसारित्वं दर्शयिष्यत्यशनायादिदोषवत्त्वेन 'तमशनापिपासाभ्यामन्ववार्जत' इत्यादिना । अशनायादिमत्त्वं संसार एव, परस्य तु ब्रह्मणोऽशनायाद्यत्ययश्रुते । भवत्येवं केवलात्मज्ञानं मोक्षसाधनं न त्वत्राकर्म्यैवाधिक्रियते, विशेषाश्रवणात । अकर्मिण आश्रम्यंतरस्यैहाश्रवणात । कर्म च बृहतीसहस्रलक्षणं प्रस्तुत्यानंतरमेवात्मज्ञानं प्रारभ्यते । तस्मात्कर्म्यैवाधिक्रियते ॥

न च कर्मासंबंध्यात्मविज्ञानं पूर्ववदंते उपसंहारात । यथा कर्मसंबंधिनः पुरुषस्य सूर्यात्मनः स्थावरजंगमादिसर्वप्राण्यात्मत्वमुक्तं ब्राह्मणेन मंत्रेण च 'सूर्य आत्मा' इत्यादिना, तथैव 'एष ब्रह्मैष इंद्र' इत्याद्युपक्रम्य सर्वप्राण्यात्मत्वम । 'यच्च स्थावरं सर्व तत्प्रज्ञानेत्रं' इत्युपसंहरिष्यति । तथा च संहितोपनिषदि– ''एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्ते'' इत्यादिना कर्मसंबंधित्वमुक्त्वा ''सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते'' इत्युपसंहरति । तथा तस्यैव 'योऽयमशरीरः प्रज्ञात्मा' इत्युक्तस्य 'यश्चासावादित्य एकमेव तदिति विद्यात्' इत्येकत्वमुक्तम । इहापि 'कोऽयमात्मा' इत्युपक्रम्य प्रज्ञात्मत्वमेव 'प्रज्ञानं ब्रह्म' इति दर्शयिष्यति । तस्मान्नाकर्मसंबंधि आत्मज्ञानम् ॥

* इयमैतरेयोपनिषदैतरेयब्राह्मणारण्यकाऽन्तर्गतद्वितीयारण्यकस्था चतुर्थपञ्चमषष्ठेत्यध्यायत्रिकरूपा । अस्या खट्पटक वर्तनेऽतोऽस्या आत्मषट्कमिति नाम्ना प्रसिद्धिः ।

पुनरुक्त्यानर्थक्यमिति चेन्न कथं "प्राणो वा अहमस्म्यृषे" इत्यादिब्राह्मणेन 'सूर्य आत्मा' इति च मंत्रेण निर्धारितस्यात्मनः "आत्मा वा इदम्" इत्यादिब्राह्मणेन 'कोऽयमात्मा' इति प्रश्नपूर्वकं पुनर्निर्धारणं पुनरुक्तमनर्थकमिति चेत्। न। तस्यैव धर्मांतरविशेषनिर्धारणार्थत्वान्न पुनरुक्तता-दोषः। कथम्, तस्यैव कर्मसंबंधिनो जगत्सृष्टिस्थितिसंहारादि धर्मविशेषनिर्धारणार्थत्वात् केवलोपास्त्यर्थत्वाद्वा। अथवा आत्मेत्यादिपरो ग्रंथसंदर्भ आत्मनः कर्मिणः कर्मणोऽन्यत्रोपासनाप्राप्तौ कर्मप्रस्तावेऽविहितत्वाद्वा केवलोऽप्यात्मोपास्य इत्येवमर्थः। भेदोभेदोपास्यत्वाद्वैक एवात्मा कर्मविषये भेददृष्टिभाक्। स एवाकर्मकालेऽभेदेनाप्युपास्य इत्येवमपुनरुक्तता॥ 'विद्या चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते' इति, 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः' इति च वाजिनाम्। न च वर्षशतात्परमायुर्मर्त्यानां, येन कर्मपरित्यागेनात्मानमुपासीत। दर्शितं च "तावन्ति पुरुषायुषोऽह्नां सहस्राणि भवन्ति" इति। वर्षशतं चायुः कर्मणैव व्याप्तम्। दर्शितश्च मंत्रः 'कुर्वन्नेवेह कर्माणि' इत्यादिः। तथा "यावज्जीवमग्निहोत्रं जुहोति" "यावज्जीवं दर्शपूर्णमासाभ्यां यजेत" इत्याद्याश्च। "तं यज्ञपात्रैर्दहन्ति" इति च। ऋणत्रयश्रुतेश्च॥

तत्र पारिव्राज्यादिशास्त्रं 'व्युत्थायाथ भिक्षाचर्यं चरन्ति' इति आत्मज्ञानस्तुतिपरोऽर्थवादोऽनधिकृताथों वा। न, परमार्थविज्ञाने फलादर्शने क्रियानुपपत्तेः। यदुक्तं कर्मिण एव चात्मज्ञानं कर्मसंबंधि च इत्यादि तन्न। परं ह्याप्तकामं सर्वसंसारदोषवर्जितं ब्रह्माहमस्मीत्यात्मत्वेन विज्ञाने, कृतेन कर्तव्येन वा प्रयोजनमात्मनोऽपश्यतः फलादर्शने क्रिया नोपपद्यते। फलादर्शनेऽपि नियुक्तत्वात्करोतीति चेत्। न, नियोगाविषयात्मदर्शनात् इष्टयोगमनिष्टवियोगं वात्मनः प्रयोजनं पश्यंस्तदुपायार्थी यो भवति स नियोगस्य विषयो दृष्टो लोके, नतु तद्विपरीतनियोगाविषयब्रह्मात्मत्वदर्शी। ब्रह्मात्मत्वदर्शेऽपि संश्चेन्नियुज्येत नियोगाविषयोऽपि सन्न कश्चिन्न नियुक्त इति सर्वं कर्म सर्वेण सर्वदा कर्तव्यं प्राप्नोति। तच्चानिष्टम्। न च स नियोक्तुं शक्यते केनचित्। आम्नायस्यापि तत्प्रभवत्वात्। न हि स्वविज्ञानोत्थेन वचसा स्वयं नियुज्यते। नापि बहुवित्स्वाम्यविवेकिना भृत्येन। आम्नायस्यानित्यत्वे सति स्वातंत्र्यात्सर्वान्प्रति नियोक्तृत्वसामर्थ्य

इति चेत् । न, उक्तदोषात् । तथापि सर्वेण सर्वदा सर्वमविशिष्टं कर्म कर्तव्यं इत्युक्तो दोषोऽप्यपरिहार्य एव । तदपि शास्त्रेणैव विधीयते इति चेत् । यथा कर्मकर्तव्यता शास्त्रेण कृता तथा तदप्यात्मज्ञानं तस्यैव कर्मिणः शास्त्रेण विधीयेत इति चेत् । न, विरुद्धार्थबोधकत्वानुपपत्तेः । न ह्येकस्मिन्कृताकृतसंबंधित्वं तद्विपरीतत्वं च बोधयितुं शक्यम् । शीतोष्णतामिवाग्नेः । न चेष्टयोगचिकीर्षा आत्मनोऽनिष्टवियोगचिकीर्षा च शास्त्रकृता, सर्वप्राणिनां तद्दर्शनात् । शास्त्रकृतं चेत्तदुभयं गोपालादीनां न दृश्येत अशास्त्रज्ञत्वात्तेषाम् । यद्धि स्वतोऽप्राप्तं, तच्छास्त्रेण बोधयितव्यम् । तच्चेत्कृतकर्तव्यताविरोध्यात्मज्ञानं शास्त्रेण कृतं, कथं तद्विरुद्धां कर्तव्यतां पुनरुत्पादयेच्छीततामिवाग्नौ तम इव च भानौ । न बोधयत्येवेति चेत् । न, 'स म आत्मेति विद्यात्प्रज्ञानं ब्रह्म' इति चोपसंहारात् । 'तदात्मानमेवावेत्' 'तत्त्वमसि' इत्येवमादिवाक्यानां तत्परत्वात् । उत्पन्नस्य च ब्रह्मात्मविज्ञानस्यावाध्यमानत्वान्नानुत्पन्नं भ्रान्तं वेति शक्यं वक्तुम् ॥

त्यागेऽपि प्रयोजनाभावस्य तुल्यत्वमिति चेत् "नाकृतेनेह कश्चन" इति स्मृतेः, य आहुर्विदित्वा ब्रह्म व्युत्थानमेव कुर्यादिति, तेषामप्येष समानो दोषः प्रयोजनाभावे इति चेत् । न, अक्रियामात्रत्वात् व्युत्थानस्य । अविद्यानिमित्तो हि प्रयोजनस्य भावो न वस्तुधर्मः । सर्वप्राणिनां तद्दर्शनात्, प्रयोजनतृष्णया च प्रेर्यमाणस्य वाङ्मनःकायैः प्रवृत्तिदर्शनात्, 'सोऽकामयत जाया मे स्यात्' इत्यादिना पुत्रवित्तादि पांक्तलक्षणं काम्यमेवेति "उभे ह्येते साध्यसाधनलक्षणे एषणे एव" इति वाजसनेयिब्राह्मणेऽवधारणात् ॥ अविद्याकामदोषनिमित्ताया वाङ्मनःकायप्रवृत्तेः पांक्तलक्षणाया विदुषोऽविद्यादिदोषाभावादनुपपत्तेः क्रियाभावमात्रं व्युत्थानं, न तु यागादिवदनुष्ठेयरूपं भावात्मकम् । तच्च विद्यावत्पुरुषधर्म इति न प्रयोजनमन्वेष्टव्यम् । न हि तमसि प्रविष्टस्योदित आलोके यद्गर्तपंककंटकाद्यपतनं तत्किप्रयोजनमिति प्रश्नार्हम् । व्युत्थानं तर्ह्यर्थप्राप्तत्वान्न चोदनार्हमिति । गार्हस्थ्ये चेत्परं ब्रह्मविज्ञानं जातं तत्रैवास्त्वकुर्वत आसनं न । ततोऽन्यत्र गमनमिति चेत् । न । कामप्रयुक्तत्वाद्गार्हस्थ्यस्य । 'एतावान्व कामः' इति 'उभे ह्येते एषणे एव' इत्यवधारणात् । कामनिमित्तपुत्रवित्तादिसंबंधनियमाभावमात्रं, न हि ततोऽन्यत्र गमनं व्युत्थानमुच्यते । अतो न गार्हस्थ्य एवाकुर्वत आसनमुत्पन्नविद्यस्य । एतेन गुरुशुश्रूषातपसोरारण्यप्रतिपत्तिर्विदुषः सिद्धा ॥

अत्र केचित् गृहस्था भिक्षाटनादिभयात्परिभवाच्च त्रस्यमानाः सूक्ष्मदृष्टितां दर्शयन्त उत्तरमाहुः । भिक्षोरपि भिक्षाटनादिनियमदर्शनाद्देहधारणमात्रार्थिनो गृहस्थस्यापि साध्यसाधनषणोभयविनिर्मुक्तस्य देहमात्रधारणार्थमशनाच्छादनमात्रमुपर्जीवतो गृह एवास्त्वासनमिति । न, स्वगृहविशेषपरिग्रहनियमस्य कामप्रयुक्तत्वादित्युक्तोत्तरमेतत् । स्वगृहविशेषपरिग्रहाभावे च शरीरधारणमात्रप्रयुक्ताशनाच्छादनार्थिनः स्वपरिग्रहविशेषभावेऽर्थाद्भिक्षुकत्वमेव । शरीरधारणार्थायां भिक्षाटनादिप्रवृत्तौ यथा नियमो भिक्षोः शौचादौ च, तथा गृहिणोऽपि विदुषोऽकामिनोऽस्तु नित्यकर्मसु नियमेन प्रवृत्तिर्यावज्जीवादिश्रुतिनियुक्तत्वात् प्रत्यवायपरिहारायेति । एताभ्यियोगाविषयत्वेन विदुषः प्रयुक्तमशक्यनियोज्यत्वाच्चेति ॥ यावज्जीवादिनित्यचोदनानर्थक्यमिति चेत् । न, अविदुषि विषयत्वेनार्थवत्त्वात् । यत्तु भिक्षोः शरीरधारणमात्रप्रवृत्तस्य प्रवृत्तेर्नियतत्वं तत्प्रवृत्तेर्न प्रयोजकम् । आचमनप्रवृत्तस्य पिपासापगमवन्नान्यप्रयोजनार्थत्वमवगम्यते । न च अग्निहोत्रादीनां तदुदर्थप्राप्तप्रवृत्तिनियतत्वोपपत्तिः ॥ अर्थप्राप्तप्रवृत्तिनियमोऽपि प्रयोजनाभावेऽनुपपन्न एवेति चेत् । न, तन्नियमस्य पूर्वप्रवृत्तिसिद्धत्वात्तदतिक्रमे यत्नगौरवादर्थप्राप्तस्य व्युत्थानस्य पुनर्वचनादिदुषः कर्तव्यत्वोपपत्तेः । अविदुषापि मुमुक्षुणा पारिव्राज्यं कर्तव्यमेव । तथा च 'शान्तो दान्तः' इत्यादिवचनं प्रमाणम् । शमदमादीनां चात्मदर्शनसाधनानामन्याश्रमेष्वनुपपत्तेः । 'अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्टम्' इति च श्वेताश्वतरे विज्ञायते । 'न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः' इति च कैवल्यश्रुतिः । "ज्ञात्वा नैष्कर्म्यमाचरेत्" इति च स्मृतेः । "ब्रह्माश्रमपदे वसेत्" इति च ब्रह्मचर्यादिविद्यासाधनानां च साकल्येनात्याश्रममप्रूपपत्तेर्गार्हस्थ्येऽसंभवात् । न चासंपन्नं साधनं कस्यचिदर्थस्य साधनायालम् । यद्विज्ञानोपयोगानि च गार्हस्थ्याश्रमकर्माणि तेषां परमफलमुपसंहृतं देवताप्ययलक्षणं संसारविषयमेव ॥

यदि कर्मिण एव परमात्मविज्ञानमभविष्यत् संसारविषयस्यैव फलस्योपसंहारो नोपापत्स्यत । अंगफलं तदिति चेन्न । तद्विरोध्यात्मवस्तुविषयत्वादात्मविद्यायाः । निराकृतसर्वनामरूपकर्मपरमार्थात्मवस्तुविषयं आत्मज्ञानममृतत्वसाधनम् । गुणफलसंबंधे हि निराकृतसर्वविशेषात्मवस्तुविषयत्वं ज्ञानस्य न प्राप्नोति; तच्चानिष्टं, 'यत्र त्वस्य सर्वमात्मैवाभूत्' इत्यधिकृत्य क्रियाकारक-

फलादिसर्वव्यवहारनिराकरणाद्विदुषः । तद्विपरीतस्याविदुषो 'यत्र हि द्वैतमिव' इत्युक्त्वा क्रियाकारकफलरूपस्यैव संसारस्य दर्शितत्वाच्च वाजसनेयिब्राह्मणे । तथेहापि देवताप्ययं संसारविषयं यत्फलमशनायादिमद्वस्त्वात्मकं तत्फलमुपसंहृत्य केवलं सर्वात्मकवस्तुविषयं ज्ञानममृतत्वाय वक्ष्यामीति प्रवर्तते ॥

ऋणप्रतिबंधश्चाविदुष एव मनुष्यपितृदेवलोकप्राप्ति प्रति, न विदुषः । 'सोऽयं मनुष्यलोकः पुत्रेणैव' इत्यादिलोकत्रयसाधननियमश्रुते विदुषश्च ऋणप्रतिबंधाभावो दर्शित आत्मलोकार्थिनः 'किं प्रजया करिष्यामः' इत्यादिना । तथा 'एतद्ध स्म वै तद्विद्वांस आहुरृषय काक्षीवेया' इत्यादि । 'एतद्ध स्म वै तत्पूर्वे विद्वांसोऽग्निहोत्रं न जुहवांचक्रु' इति च कौषीतकिनाम् ॥ अविदुषस्तर्हि ऋणानपाकरणे पारिव्राज्यानुपपत्तिरिति चेत् । न । प्राग्गार्हस्थ्यप्रतिपत्तेर्ऋणित्वासंभवादधिकारानारूढोऽप्यृणी चेत्स्यात् सर्वस्य ऋणित्वमित्यनिष्टं प्रसज्येत । प्रतिपन्नगार्हस्थ्यस्यापि 'गृहाद्वनी भूत्वा प्रव्रजेद्यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा' इत्यात्मदर्शनोपायसाधनत्वेनेष्यते एव पारिव्राज्यम् । यावज्जीवादिश्रुतीनां विद्वदमुमुक्षुविषये कृतार्थता । छांदोग्ये च केषांचिद् द्वादशरात्रमग्निहोत्रं हुत्वा तत ऊर्ध्वं परित्याग श्रूयते ॥

यत्त्वनधिकृतानां पारिव्राज्यमिति, तन्न । तेषां पृथगेव 'उत्सन्नाग्निरनग्निको वा' इत्यादिश्रवणात् सर्वस्मृतिषु चाविशेषेणाश्रमविकल्पः प्रसिद्धः समुच्चयश्च ॥ यत्तु विदुषोऽर्थप्राप्तं व्युत्थानमित्यशास्त्रार्थत्वे, गृहे वने वा तिष्ठतो न विशेष इति, तदसत् । व्युत्थानस्यैवार्थप्राप्तत्वान्नान्यत्रावस्थानं स्यात् । अन्यत्रावस्थानस्य कामकर्मप्रयुक्तत्वं ह्यवोचाम, तदभावमात्रं व्युत्थानमिति च । यथाकामित्वं तु विदुषोऽत्यंतमप्राप्तं अत्यंतमूढविषयत्वेनावगमात् । तथा शास्त्रचोदितमपि कर्म आत्मविदोऽप्राप्तं गुरुभारतयावगम्यते, किमुतात्यंताविवेकनिमित्तं यथाकामित्वम् । नहि उन्मादतिमिरदृष्ट्युपलब्धं वस्तु तदपगमेऽपि तथैव स्यात् उन्मादतिमिरदृष्टिनिमित्तत्वादेव तस्य । तस्मात् आत्मविदो व्युत्थानव्यतिरेकेण न यथाकामित्वं न चान्यत्कर्तव्यमित्येतत्सिद्धम् ॥

यत्तु — 'विद्यां चाविद्यां च यस्तद्वेदोभयं सह' इति न विद्यावतो विद्यया सहाविद्यापि वर्तते इत्ययमर्थः । कस्तर्हि ? एकस्मिन्पुरुषे एते एकदैव न सह संबध्येयातामित्यर्थः । यथा शुक्तिकायां रजतशुक्तिकाज्ञाने एकस्य पुरुषस्य ।

'दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता' इति हि काठके । तस्मान्न विद्यायां सत्यामविद्यासंभवोऽस्ति । "तपसा ब्रह्म विजिज्ञासस्व" इत्यादिश्रुतेः, तपआदिविद्योत्पत्तिसाधनं गुरूपासनादि च कर्म अविद्यात्मकत्वादविद्योच्यते तेन विद्यामुत्पाद्य मृत्युं काममीततरति । ततो निष्कामस्त्यक्तैषणो ब्रह्मविद्यया अमृतत्वमश्नुते इत्येतमर्थं दर्शयन्नाह– 'अविद्यया मृत्युं तीर्त्वा विद्यया अमृतमश्नुते' इति । यत्तु पुरुषायुः सर्वं कर्मैणैव व्याप्तं 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः' इति तदविद्वद्विषयत्वेन परिहृतमितरथाऽसंभवात् । यत्तु वक्ष्यमाणमपि पूर्वोक्तनुत्यत्वात्कर्मणाऽविरुद्धमात्मज्ञानमिति, तत्सविशेषनिर्विशेषात्मतया प्रत्युक्तं, उत्तरत्र व्याख्याने च दर्शयिष्यामः । अतः केवलनिष्क्रियब्रह्मात्मैकत्वविद्याप्रदर्शनार्थ उत्तरो ग्रंथ आरभ्यते ॥

वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरावीर्म एधि वेदस्य म आणीस्थ श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रान्त्संदधाम्यृतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवत्ववतु मामवतु वक्तारमवतु वक्तारम् । ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ आत्मा वा इदमेक एवाग्र आसीत ।
नान्यत्किंचन मिषत् । स ईक्षत लोकान्नु सृजा इति ॥१॥

आत्मेति । आत्मा आप्नोतेरत्तेरतंतर्वा परः सर्वज्ञः सर्वशक्तिरशनायादिसर्वसंसारधर्मवर्जितो नित्यशुद्धबुद्धमुक्तस्वभावोऽजोऽजरोऽमरोऽमृतोऽभयोऽद्वयो वै । इदं यदुक्तं नामरूपकर्मभेदाभिन्नं जगदात्मैवैकोऽग्रे जगत. सृष्टेः प्रागासीत । किनेदानीं स एवैकः । न । कथं तर्ह्यासीदित्युच्यते ? यद्यपीदानीं स एवैकस्तथाप्यस्ति विशेषः । प्रागुत्पत्तेः अव्याकृतनामरूपभेदमात्मभूतमात्मैकशब्दप्रत्ययगोचरं जगदिदानीं व्याकृतनामरूपभेदत्वादेनकशब्दप्रत्ययगोचरमात्मैकशब्दप्रत्ययगोचरं चेति विशेषः । यथा सलिलात्पृथक्फेननामरूपव्याकरणात्प्राक्सलिलैकशब्दप्रत्ययगोचरमेव फेनं, यदा सलिलात्पृथङ्नामरूपभेदेन व्याकृतं भवति तदा सलिलं फेनं चेत्यनेकशब्दप्रत्ययभाक्सलिलमेवेति चैकशब्दप्रत्ययभाक्च फेनं भवति तद्वत् । नान्यत्किंचन न किंचिदपि मिषन्निमिषद्व्यापारवदितरद्वा । यथा सांख्यानामनात्मपक्षपाति स्वतंत्रं प्रधानं, यथा च काणादानामणवो, न तद्वदिहान्यदात्मनः

किंचिदपि वस्तु विद्यते । किं तर्हि आत्मैवैक आसीदित्यभिप्रायः । स सर्वज्ञस्वाभाव्यात् आत्मा एक एव सन्नीक्षत लोकान्नु सृजा इति । ननु प्रागुत्पत्तेरकार्यकरणत्वान्कथमीक्षितवान् । नायं दोषः, सर्वज्ञस्वाभाव्यात् । तथा च मंत्रवर्णः—"अपाणिपादो जवनो ग्रहीता" इत्यादि । केनाभिप्रायेणेत्याह—लोकानंभ प्रभृतीन्प्राणिकर्मफलोपभोगस्थानभूतान्नु सृजे सृजेऽहमिति ॥

स इमाँल्लोकानसृजत । अंभो मरीचीर्मरमापोऽम्भ परेण दिवं द्यौः प्रतिष्ठाऽन्तरिक्षं मरीचयः । पृथिवी मरो या अधस्तात्ता आपः ॥२॥

एवमीक्षित्वा आलोच्य स आत्मेमाँल्लोकानसृजत सृष्टवान् ; यथेह बुद्धिमांस्तक्षादिरेवंप्रकारान्प्रासादादीन्सृजे इतीक्षित्वेक्षानंतरं प्रासादादीन्सृजति तद्वत् ॥ ननु सोपादानस्तक्षादि प्रासादादीन्सृजतीति युक्तं निरुपादानस्त्वात्मा कथं लोकान्सृजतीति । नैष दोषः । सलिलफेनस्थानीये आत्मभूते नामरूपे अव्याकृते आत्मैकशब्दवाच्ये व्याकृतफेनस्थानीयस्य जगतः उपादानभूते संभवतः । तस्मात् आत्मभूतनामरूपोपादानभूतः सन्सर्वज्ञो जगन्निर्मिमीते इत्यविरुद्धम् । अथवा यथा विज्ञानवान्मायावी निरुपादान आत्मानमेव आत्मांतरत्वेनाकाशेन गच्छन्तमिव निर्मिमीते, तथा सर्वज्ञो देवः सर्वशक्तिर्महामाय आत्मानमेवात्मान्तरत्वेन जगद्रूपेण निर्मिमीते इति युक्ततरम् । एवं च सति कार्यकारणोभयास्तद्वाद्यादिपक्षाश्च न प्रसज्यन्ते मुनिराकृताश्च भवन्ति ॥ कान्लोकानसृजतेत्याह अंभो मरीचीर्मरमाप इति । आकाशादिक्रमेण अंडमुत्पाद्यांभःप्रभृतीँल्लोकानसृजत । तत्रांभःप्रभृतीन्स्वयमेव व्याचष्टे श्रुतिः । अदस्तदंभःशब्दवाच्यो लोकः, परेण दिवं द्युलोकात्परेण परस्तात्सोऽम्भःशब्दवाच्यः, अंभोभरणात् । द्यौः प्रतिष्ठाश्रयस्तस्यांभसो लोकस्य । द्युलोकादधस्तादंतरिक्षं यत्तन्मरीचयः । एकोऽप्यनेकस्थानभेदत्वाद्बहुवचनभाङ्मरीचय इति । मरीचिभिर्वा रश्मिभिः संबधात् । पृथिवी मरो, म्रियन्तेऽस्मिन् भूतानीति । या अधस्तात् पृथिव्यास्ता आप उच्यन्ते आप्नोतेः, लोकाः । यद्यपि पंचभूतात्मकत्वं लोकानां तथाप्यब्बाहुल्यादज्ञानामाभिरेवाभो मरीचीर्मरमाप इत्युच्यन्ते ॥

स ईक्षतेमे नु लोका लोकपालान्नु सृजा इति ।
सोऽद्भ्य एव पुरुषं समुद्धृत्यामूर्छयत् ॥३॥

सर्वप्राणिकर्मफलोपादानाधिष्ठानभूतांश्चतुरो लोकान्सृष्ट्वा स ईश्वरः पुनरे-

वेक्षत । इमे नु त्वंभःप्रभृतयो मया सृष्टा लोकाः परिपालयितृवर्जिता विनश्येयुः । तस्मादेषां रक्षणार्थं लोकपालाल्लोकानां पालयितॄन्नु सृजे सृजेऽहमिति । एवमीक्षित्वा सोद्वृत्य एवाप्रधानेऽभ्य एव पंचभूतेभ्यो, येभ्योऽभ प्रभृतीन्सृष्टवांस्तेभ्य एव त्यर्थः । पुरुषं पुरुषाकारं शिरःपाण्यादिमन्तं समुद्धृत्य अद्धृत्य समुपादाय मृत्पिण्डमिव कुलालैः पृथिव्या, अमूर्छयन्मूर्छितवान्संपिडितवान्स्वावयवसंयोजनेनेत्यर्थ ॥

तमभ्यतपत्तस्याभितप्तस्य मुखं निरभिद्यत यथांडम् । मुखाद्वाग्वाचोऽग्निर्नासिके निरभिद्येतां नासिकाभ्यां प्राणः प्राणाद्वायुरक्षिणी निरभिद्येतामक्षिभ्यां चक्षुश्चक्षुष आदित्यः कर्णौ निरभिद्येतां कर्णाभ्यां श्रोत्रं श्रोत्राद्दिशस्त्वङ्निरभिद्यत त्वचो लोमानि लोमभ्य ओषधिवनस्पतयो हृदयं निरभिद्यत हृदयान्मनो मनसश्चंद्रमा नाभिर्निरभिद्यत नाभ्या अपानोऽपानान्मृत्युः शिश्नं निरभिद्यत शिश्नाद्रेतो रेतस आपः ॥४॥

इत्यैतरेयोपनिषदि प्रथमः खंडः ॥१॥

तं पिंडं पुरुषविधमुद्दिश्याभ्यतपत् तदभिध्यानं संकल्पं कृतवानित्यर्थः । 'यस्य ज्ञानमयं तपः' इत्यादिश्रुतेः । तस्याभितप्तस्येश्वरसंकल्पेन तपसाभितप्तस्य पिंडस्य मुखं निरभिद्यत मुखाकारं सुषिरमजायत । यथा पक्षिणोऽंडं निर्भिद्यते एवम् । तस्मान्निर्भिण्णान्मुखाद्वाक्करणमिंद्रियं निरवर्तत तदधिष्ठाताग्निस्ततो वाचो लोकपालः । तथा नासिके निरभिद्येताम् । नासिकाभ्यां प्राणः प्राणाद्वायुः इति सर्वत्राधिष्ठानं करणं देवता च त्रयं क्रमेण निर्भिण्णमिति । अक्षिणी कर्णौ त्वक् हृदयमंतःकरणाधिष्ठानं मनोऽतःकरणं, नाभिः सर्वप्राणबंधनस्थानम् । अपानसंयुक्तत्वादपान इति पाय्विंद्रियमुच्यते । तस्मात् तस्याधिष्ठात्री देवता मृत्युः यथाऽन्यत्र । तथा शिश्नं निरभिद्यत प्रजननेंद्रियस्थानमिंद्रियं रेतो रेतोविसर्गार्थत्वात्सह रेतसोच्यते रेतस आप इति ॥

ता एता देवताः सृष्टा अस्मिन्महत्यर्णवे प्रापतंस्तमशनापिपासाभ्यामन्ववार्जत् । ता एनमब्रुवन्नायतनं नः प्रजानीहि यस्मिन्प्रतिष्ठिता अन्नमदामेति ॥१॥

ता एता अग्न्यादयो देवता लोकपालत्वेन संकल्प्य सृष्टा ईश्वरेणास्मिन्संसारार्णवे संसारसमुद्रे महत्यविद्याकामकर्मप्रभवदुःखोदके तीव्ररोगजरामृत्युमहाग्राहेऽनादावनंतेऽपारे निरालंबे विषयेंद्रियजनितसुखलवलक्षणविश्रामे पंचेंद्रियार्थ-

तृष्मारुतविक्षोभोत्थितानर्थशतमहोर्मौ महारौरवाद्यनेकनिरयगतहाहेत्यादिकूजिताक्रोशनोद्भूतमहारवे सत्यार्जवदानदयाहिंसाशमदमधृत्याद्यात्मगुणपाथेयपूर्णज्ञानोडुपे सत्संगमसर्वत्यागमार्गे मोक्षनगरे एतस्मिन्महत्यर्णवे प्रापतन्पतितवत्यः । तस्मात् अग्न्यादिदेवताप्ययलक्षणापि या गतिर्व्याख्याता ज्ञानकर्मसमुच्चयानुष्ठानफलभूता सापि नालं संसारदुःखोपशमाय इत्ययं विवक्षितोऽर्थोऽत्र । यत एवं तस्मादेवं विदित्वा परं ब्रह्म आत्मात्मनः सर्वभूतानां च यो वक्ष्यमाणविशेषणः प्रकृतश्च जगदुत्पत्तिस्थितिसंहारहेतुत्वेन, स सर्वसंसारदुःखोपशमनाय वेदितव्यः । तस्मात् "एष पंथा एतत्कर्मैतद्ब्रह्मैतत्सत्यं' यदेतत्परब्रह्मात्मज्ञानं "नान्यः पंथा विद्यतेऽयनाय" इति मंत्रवर्णात् । तं स्थानकरणदेवतोत्पत्तिबीजभूतं पुरुषं प्रथमोत्पादितं पिंडमात्मानमशनापिपासाभ्यामन्ववाजिदनुगमितवान्संयोजितवानित्यर्थः । तस्य कारणभूतस्याशनादिदोषवत्त्वात्तत्कार्यभूतानामपि देवतानामशनादिमत्त्वम् । तास्ततोऽशनापिपासाभ्यां पाड्यमाना एनं पितामहं स्रष्टारमब्रुवन्नुक्तवत्यः । आयतनमधिष्ठानं नोऽस्मभ्यं प्रजानाहि विधत्स्व, यस्मिन्नायतने प्रतिष्ठिताः समर्था. स्मोऽन्नमदाम भक्षयाम इति ॥

ताभ्यो गामानयत्ता अब्रुवन्न वै नोऽयमलमिति ॥
ताभ्योऽश्वमानयत्ता अब्रुवन्न वै नोऽयमलमिति ॥२॥

एवमुक्त ईश्वरस्ताभ्यो देवताभ्यो गां गवाकृतिविशिष्टं पिंडं ताभ्य एवाद्भ्यः पूर्ववत्पिंडं समुद्धृत्य मृच्छयित्वाऽऽनयद्दर्शितवान् । ताः पुनर्गवाकृतिं दृष्ट्वाब्रुवन् । न वै नोऽस्मदर्थमधिष्ठानायान्नमतुमर्थं पिंडोऽलं न वै । अलं पर्याप्तोऽतुं न योग्य इत्यर्थः । गवि प्रत्याख्याते ताभ्योऽश्वमानयता अब्रुवन्न वै नोऽयमलमिति पूर्ववत् ॥

ताभ्यः पुरुषमानयत्ता अब्रुवन्सुकृतं बतेति पुरुषो वाव सुकृतम् ॥
सा अब्रवीद्यथायतनं प्रविशतेति ॥३॥

सर्वप्रत्याख्याने ताभ्यः पुरुषमानयत्स्वयोनिभूतम् । ताः स्वयोनिं पुरुषं दृष्ट्वा आखिन्ना सत्य सुकृतं शोभनं कृतमिदमधिष्ठानं बतेत्यब्रुवन । तस्मात्पुरुषो वाव पुरुष एव सुकृतं सर्वपुण्यकर्महेतुत्वात । स्वयं वा स्वेनैवात्मना स्वमायाभिः कृतत्वात्सुकृतमित्युच्यते । ता देवता ईश्वरोऽब्रवीदिष्टमासामिदमधिष्ठानमिति मत्वा, सर्वे हि स्वयोनिषु रमन्ते, अतो यथायतनं यस्य यद्वदनादिक्रियायोग्यमायतनं तत्प्रविशतेति ॥

अग्निर्वाग्भूत्वा मुखं प्राविशद्वायुः प्राणो भूत्वा नासिके प्राविशदादित्यश्चक्षुर्भूत्वाक्षिणी प्राविशद्दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्नोषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशंश्चंद्रमा मनो भूत्वा हृदयं प्राविशन्मृत्युरपानो भूत्वा नाभिं प्राविशदापो रेतो भूत्वा शिश्नं प्राविशन् ॥४॥

तथास्त्वित्यनुज्ञां प्रतिलभ्येश्वरस्य नगर्यामिव बलाधिकृतादयः अग्निर्वागभिमानी वागेव भूत्वा स्वां योनिं मुखं प्राविशत्तथोक्तार्थमन्यत । वायुर्नासिके आदित्योऽक्षिणी दिश कर्णौ ओषधिवनस्पतयस्त्वचं चंद्रमा हृदयं मृत्युर्नाभिमापः शिश्नं प्राविशन् ॥

तमशनापिपासे अब्रूतामावाभ्यामभिप्रजानीहीति । ते अब्रवीदेतास्वेव वां देवतास्वाभजाम्येतासु भागिन्यौ करोमीति । तस्माद्यस्यै कस्यै च देवतायै हविर्गृह्यते भागिन्यावेवास्यामशनापिपासे भवतः ॥५॥

इत्यैतरेयोपनिषदि द्वितीयः खंडः ॥२॥

एवं लब्धाधिष्ठानासु देवतासु निरधिष्ठाने सत्यौ अशनापिपासे तमीश्वरमब्रूतामुक्तवत्यौ आवाभ्यामधिष्ठानमभिप्रजानीहि चिन्तय विधत्स्वेत्यर्थः । स ईश्वर एवमुक्तस्ते अशनापिपासे अब्रवीत् । न हि युवयोर्भावरूपत्वाच्चेतनावद्रूपत्वनाश्रित्यान्नातृत्वं संभवति । तस्मादेतास्वेवान्यासु वा युवा देवतास्वध्यात्माधिदेवतास्वाभजामि व्रीहियवविभागेनानुगृह्णामि । एतासु भागिन्यौ यद्देवत्यौ यो भागो हविरादिलक्षण स्यात्तस्यास्तेनैव भागेन भागिन्यौ भागवत्यौ वां करोमीति । सृष्ट्वादौ ईश्वर एवं व्यदधाद्यस्मात्तस्मादिदानीमपि यस्यै कस्यै च देवतायै देवताया अर्थाय हविर्गृह्यते चरुपुरोडाशादिलक्षणं भागिन्यावेव भागवत्यावेवास्यां देवतायामशनापिपासे भवतः ॥

स ईक्षतेमे नु लोकाश्च लोकपालाश्चान्नमेभ्यः सृजा इति ॥१॥

स एवमीश्वर ईक्षत । कथं इमे नु लोकाश्च लोकपालाश्च मया सृष्टा अशनायापिपासाभ्यां च संयोजिताः । अतो नैषां स्थितिरन्नमंतरेण तस्मादन्नमेभ्यो लोकपालेभ्यः सृजै सृजे इति । एवं हि लोके ईश्वराणामनुग्रहे निग्रहे च स्वातंत्र्यं दृष्टं स्वेषु । तद्वन्महेश्वरस्यापि सर्वेश्वरत्वात्सर्वान्प्रति निग्रहेऽनुग्रहे च स्वातंत्र्यमेव ॥

सोऽपोऽभ्यतपत्ताभ्योऽभितप्ताभ्यो मूर्तिरजायत ॥
या वै सा मूर्तिरजायतान्नं वै तत् ॥२॥

स ईश्वरोऽन्नं सिसृक्षुस्ता एव पूर्वोक्ता अप उदिक्ष्याभ्यतपत्। ताभ्योऽभितप्ताभ्य उपादानभूताभ्यो मूर्तिर्घनरूपं धारणसमर्थं चराचरलक्षणमजायतोत्पन्नम् अन्नं वै तन्मूर्तिरूपं या वै सा मूर्तिरजायत ॥

तदेनत्सृष्टं पराङत्यजिघांसत्तद्वाचाऽजिघृक्षत्तन्नाशक्नोद्वाचा ग्रहीतुम् ॥ स यद्ध्येनद्वाचाऽग्रहैष्यदभिव्याहृत्य हैवान्नमत्रप्स्यत् ॥३॥ तत्प्राणेनाजिघृक्षत्तन्नाशक्नोत्प्राणेन ग्रहीतुं स यद्ध्येनत्प्राणेनाग्रहैष्यदभिप्राण्य हैवान्नमत्रप्स्यत् ॥४॥ तच्चक्षुषाजिघृक्षत्तन्नाशक्नोच्चक्षुषा ग्रहीतुं स यद्ध्येनच्चक्षुषाग्रहैष्यत् दृष्ट्वा हैवान्नमत्रप्स्यत् ॥५॥ तच्छ्रोत्रेणाजिघृक्षत्तन्नाशक्नोच्छ्रोत्रेण ग्रहीतुं स यद्ध्येनच्छ्रोत्रेणाग्रहैष्यच्छ्रुत्वा हैवान्नमत्रप्स्यत् ॥६॥ तत्त्वचाजिघृक्षत्तन्नाशक्नोत्त्वचा ग्रहीतुं स यद्ध्येनत्त्वचाग्रहैष्यस्पृष्ट्वा हैवान्नमत्रप्स्यत् ॥ ७ ॥ तन्मनसाजिघृक्षत्तन्नाशक्नोन्मनसा ग्रहीतुं स यद्ध्येनन्मनसाग्रहैष्यद्ध्यात्वा हैवान्नमत्रप्स्यत् ॥८॥ नच्छिश्नेनाजिघृक्षत्तन्नाशक्नोच्छिश्नेन ग्रहीतुं स यद्ध्येनच्छिश्नेनाग्रहैष्यद्विसृज्य हैवान्नमत्रप्स्यत् ॥९॥ तदपानेनाजिघृक्षत्तदावयत् सैषोऽन्नस्य ग्रहो यद्वायुरन्नायुर्वा एष यद्वायु. ॥१०॥

तदेनदन्नं लोकलोकपालानामर्थेऽभिमुखे सृष्टं सत् यथा मूषकादिर्मार्जारादिगोचरं सन्मम मृत्युरन्नाद इति मत्वा परागंचतीति पराङ् पराक् सत् अत्तृनर्तात्याजिघांसदतिगन्तुमैच्छत् पलायितुं प्रारभतेत्यर्थः । तदन्नाभिप्रायं मत्वा स लोकलोकपालसंघातः कार्यकरणलक्षणः पिंडः प्रथमजत्वात् अन्यांश्चान्नादानपर्यंस्तदन्नं वाचा वदनव्यापारेणाजिघृक्षदग्रहीतुमैच्छत् । तदन्नं नाशक्नोन्न समर्थोऽभवद्वाचा वदनक्रियया ग्रहीतुमुपादातुम् । स प्रथमजः शरीरी यद्यदि हैनद्वाचाऽग्रहैष्यद्गृहीतवान्स्यादन्नं सर्वोऽपि लोकस्तत्कार्यभूतत्वादभिव्याहृत्य हैवान्नमत्रप्स्यत्तृप्तोऽभविष्यत् । न चैतदस्ति अतो नाशक्नोद्वाचा ग्रहीतुमित्यवगच्छामः पूर्वजोऽपि । समानमुत्तरम् । तत्प्राणेन तच्चक्षुषा तच्छ्रोत्रेण तत्त्वचा तन्मनसा तच्छिश्नेन तेन तेन करणव्यापारेणान्नं ग्रहीतुमशक्नुवन्पश्चादपानेन वायुना मुखच्छिद्रेण तदन्नमजिघृक्षत् तदावयत्तदन्नमेवं जग्राहाशितवान् । तेन स एषोऽपानवायुरन्नस्य ग्रहोऽन्नग्राहक इत्येतत् । यद्वायुर्यो वायुरन्नायुरन्नबंधनोऽन्नजीवनो वै प्रसिद्धः स एष यो वायुः ॥

स ईक्षत कथं न्विदं मदृते स्यादिति स ईक्षत कतरेण प्रपद्या इति ॥

स ईक्षत यदि वाचाभिव्याहृतं यदि प्राणेनाभिप्राणितं यदि चक्षुषा दृष्टं यदि श्रोत्रेण श्रुतं यदि त्वचा स्पृष्टं यदि मनसा ध्यातं यद्यपानेनाभ्यपानितं यदि शिश्नेन विसृष्टमथ कोऽहमिति ॥११॥

स एवं लोकलोकपालसंघातास्थितिमन्नानिमित्तां कृत्वा पुरपौरतत्पालयितृस्थितिसमां स्वामीव ईक्षत । कथं नु केन प्रकारेणेति वितर्कयन्निदं मदते मामंतरेण पुरस्वामिनम् । यदिदं कार्यकरणसंघातकार्यं वक्ष्यमाणं कथं नु खलु मामंतरेण स्यात्परार्थं सत । यदि वाचाभिव्याहृतमित्यादि केवलमेव वाग्व्यवहरणादि, तन्निरर्थकं न कैश्चन भवेद्वल्लिस्तुत्यादिवत । पौरवंद्यादिभिः प्रयुज्यमानं स्वाम्यर्थं सत्तत्स्वामिनमंतरेणासत्येव स्वामिनि, तद्वत् । तस्मान्मया परेण स्वामिनाधिष्ठात्रा कृताकृतफलसाक्षिभूतेन भोक्त्रा भवितव्यं पुरस्येव राज्ञा । यदि नामैतत्संहतकार्यस्य परार्थत्वं, परार्थिनं मां चेतनमंतरेण भवेत्पुरपौरकार्यमिव तत्स्वामिनम् । अथ कोऽहं किंस्वरूपः कस्य वा स्वामी ? यद्यहं कार्यकरणसंघातमनुप्रविश्य वागाद्यभिव्याहृतादिफलं नोपलभेय राजेव पुरमाविश्याधिकृतपुरुषकृताकृतादिलक्षणं, न कश्चिन्नामायं सन्नेवंरूपश्चेत्यधिगच्छेद्विचारयेत । विपर्यये तु योऽयं वागाद्यभिव्याहृतादादर्मति वेद, स सन्वेदनरूपश्चेत्यधिगन्तव्योऽहं स्यां, यदर्थमिदं संहतानां वागादीनामभिव्याहृतादि । यथा स्तंभकुड्यादीनां प्रासादादिसंहतानां स्वावयवैरसंहतपरार्थत्वं तद्वदिति । एवमाक्षित्वात्कतरेण प्रपद्या इति । प्रपदं च मूर्धा चास्य संघातस्य प्रवेशमार्गो, अनयोः कतरेण मार्गेणेदं कार्यकरणसंघातलक्षणं पुरं प्रपद्य प्रपद्येयेति ॥

स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत ॥ सैषा विदृतिर्नाम द्वास्तदेतन्नांदनं तस्य त्रय आवसथास्त्रयः स्वप्ना अयमावसथोऽयमावसथोऽयमावसथ इति ॥१२॥

एवमाक्षित्वा न तावन्मद्भृत्यस्य प्राणस्य मम सर्वार्थाधिकृतस्य प्रवेशमार्गेण प्रपदाभ्यामधः प्रपद्ये । किं तर्हि, पारिशेष्यादस्य मूर्धानं विदार्य प्रपद्ये इति लोक इवेक्षितकारी स स्रष्टेश्वर एतमेव मूर्धसीमानं केशविभागावसानं विदार्य च्छिद्रं कृत्वैतया द्वारा मार्गेणेमं लोकं कार्यकरणसंघातं प्रापद्यत प्रविवेश । सेयं हि प्रसिद्धा द्वा मूर्ध्नि तैलादिधारणकाले अंतस्तद्रसादिसंवेदनात् । सैषा विदृतिर्विदारितत्वाद्विदृतिर्नाम प्रसिद्धा द्वाः । इतराणि तु श्रोत्रादिद्वाराणि भृत्यादिस्थानी-

यसाधारणमार्गत्वान्न समृद्धानि नानंदहेतूनि । इदं तु द्वारं परमेश्वरस्यैव केवलस्येति । तेदतन्नांदनं नंदनमेव, नांदनमिति दैर्घ्यं छांदसम । नंदत्यनेन द्वारेण गत्वा परमस्मिन्ब्रह्मणीति । तस्यैव सृष्ट्वा प्रविष्टस्य जीवेनात्मना राज्ञ इव पुरं त्रय आवसथा । जागरितकाले इंद्रियस्थानं दक्षिणं चक्षुः, स्वप्नकालेऽन्तर्मन , सुषुप्तिकाले हृदयाकाश इत्येते वक्ष्यमाणा वा त्रय आवसथाः पितृशरीरं मातृगर्भाशयः स्वं च शरीरमिति । त्रयः स्वप्ना जाग्रत्स्वप्नसुषुप्त्याख्या । ननु जागरितं प्रबोधरूपत्वान्न स्वप्नः । नैवं, स्वप्न एव, कथं, परमार्थस्वात्मप्रबोधाभावात्स्वप्नवदसद्वस्तुदर्शनाच्च । अयमेवावसथश्चक्षुर्दक्षिणं प्रथम । मनोऽन्तरं द्वितीयः । हृदयाकाशः तृतीयः । अयमावसथ इत्युक्तानुकीर्तनमेव । तेषु त्र्ययमावसथेषु पर्यायेणात्मभावेन वर्तमानोऽविद्यया दीर्घकालं गाढं प्रसुप्त स्वाभाविक्या न प्रबुध्यतेऽनेकशतसहस्रानर्थसंनिपातजदुःखमुद्ररादिभिघातानुभवैरपि ॥

स जातो भूतान्यभिव्यैरख्यत्किमिहान्यं वावदिषदिति ।
स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्शमितीदꣳ ३ ॥१३॥

तस्मादिदंद्रो नामेदंद्रो ह वै नाम तमिदंद्रं सन्तमिंद्र इत्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः परोक्षप्रिया इव हि देवाः ॥१४॥

इत्यैतरेयोपनिषदि तृतीयः खंड ॥३॥

स जातः शरीरं प्राविशो जीवात्मना भूतान्यभिव्यैरख्यत्प्राकरोत । स कदाचित्परमकारुणिकनाचार्येणात्मज्ञानप्रबोधकृच्छ्रछिदकाया वेदान्तमहाभेर्या तत्कर्णमूले ताड्यमानायामेतमेव सृष्ट्यादिकर्तृत्वेन प्रकृतं पुरुषं पुरि शयानमात्मानं ब्रह्म बृहत्तमं तकारेणैकेन लुप्तेन ततमं व्याप्ततमं परिपूर्णमाकाशवत्प्रत्यबुध्यतापश्यत । कथम् । इदं ब्रह्म ममात्मनः स्वरूपमदर्शं दृष्टवानस्मि । अहो इति विचारणार्था प्लुति प्रवेम ॥

यस्मादिदमित्येव यत्साक्षादपरोक्षाद्ब्रह्म सर्वान्तरमपश्यत् न परोक्षेण तस्मादिदं पश्यतीतींदंद्रो नाम परमात्मा । इदंद्रो ह वै नाम प्रसिद्धो लोक ईश्वर । तमेवमिदंद्रं सन्तमिंद्र इति परोक्षेण परोक्षाभिधानेनाचक्षते ब्रह्मविदः संव्यवहारार्थं पूज्यतमत्वात्प्रत्यक्षनामग्रहणभयात् । तथा हि परोक्षप्रियाः परोक्षनामग्रहणप्रिया इव एव हि यस्माद्देवाः । किमुत सर्वदेवानामपि देवो महेश्वरः । द्विर्वचनं प्रकृताध्यायपरिसमाप्त्यर्थम् ॥

अथ द्वितीयोऽध्यायः ।

अस्मिंश्चतुर्थेऽध्याय एष वाक्यार्थो जगदुत्पत्तिस्थितिप्रलयकृदसंसारी सर्वज्ञः सर्वशक्तिः सर्वविन्सर्वमिदं जगत्स्वतोऽन्यद्वस्त्वंतरमनुपादायैव आकाशादिक्रमेण सृष्ट्वा स्वात्मबोधनार्थं सर्वाणि च प्राणादिमच्छरीराणि स्वयं प्रविवेश प्रविश्य च स्वमात्मानं यथाभूतमिदं ब्रह्मास्मीति साक्षात्प्रत्यबुध्यत । तस्मात्स्य एव सर्वशरीरेष्वेक एवात्मा नान्य इति । अन्योऽपि 'स य आत्मा ब्रह्मास्मीत्येवं विद्यात' इति 'आत्मा वा इदमेक एवाग्र आसीत' इति 'ब्रह्म ततमं' इति चोक्तम । अन्यत्र च सर्वगतस्य सर्वात्मनो बालाग्रमात्रमप्यप्रविष्टं नास्तीति कथं सीमान विदार्य प्रापद्यत पिपीलिकेव सुषिरम् । नन्वल्पमिदं चोद्यं, बहु चात्र चोदयितव्यम् । अकरण मन्नीक्षत । अनुपादाय किंचिल्लोकानसृजत । अद्भ्यः पुरुषं समुद्धृत्यामूर्छयत । तस्याभिध्यानान्मुखादि निर्भिन्नं मुखादिभ्यश्चान्यादयो लोकपालास्तेषां चाशनायापिपासादिसंयोजनं तदायतनप्रार्थनं तदर्थं गवादिप्रदर्शनं तेषां च यथायतनप्रवेशनं सृष्टस्यान्नस्य पलायनं वागादिभिस्तज्जिघृक्षा । इत्येतत्सर्वं सीमाविदारणप्रवेशसममेव ॥ अस्तु तर्हि सर्वमेवेदमनुपपन्नम । न । अत्रात्मावबोधमात्रस्य विवक्षितत्वात्सर्वोऽयमर्थवाद इत्यदोष । मायाविवद्वा, महामायावी देवः सर्वज्ञः सर्वशक्तिः सर्वमेतच्चकार सुखावबोधनप्रतिपत्त्यर्थं लोकवदाख्यायिकादिप्रपंच इति युक्ततर पक्ष. । न हि सृष्ट्याख्यायिकादिपरिज्ञानात्किंचित्फलमिष्यते । ऐकात्म्यस्वरूपपरिज्ञानात्तु अमृतत्वं फलं सर्वोपनिषत्प्रसिद्धम । स्मृतिषु च गीतासु "समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरं" इत्यादिना ॥ ननु त्रय आत्मानो, भोक्ता कर्ता संसारी जीव एक सर्वलोकशास्त्रप्रसिद्धः । अनेकप्राणिकर्मफलोपभोगयोग्यानेकाधिष्ठानवल्लोकदेहनिर्माणेन लिंगेन यथाशास्त्रप्रदर्शितेन पुरप्रासादादिनिर्माणलिंगेन तद्विषयकौशलज्ञानवांस्तत्कर्ता तक्षादिरिवेश्वरः सर्वज्ञो जगतः कर्ता द्वितीयश्चेतन आत्मा अवगम्यते । 'यतो वाचो निवर्तते' 'नेति नेति' इत्यादि शास्त्रप्रसिद्ध औपनिषदः पुरुषस्तृतीयः । एवमेते त्रय आत्मानोऽन्योन्यविलक्षणाः । तत्र कथमेक एव आत्मा अद्वितीयः असंसारीति ज्ञातुं शक्यते । तत्र जीव एव तावत्कथं ज्ञायते । नन्वेवं ज्ञायते श्रोता मन्ता द्रष्टा आदेष्टा आघोष्टा विज्ञाता प्रज्ञातेति । ननु विप्रतिषिद्धं ज्ञायते यः श्रवणादिकर्तृत्वेनामतो मन्ताऽविज्ञातो विज्ञातेति च । तथा 'न मते-

र्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीयाः' इत्यादि च । सत्यं विप्रतिषिद्धं, यदि प्रत्यक्षेण ज्ञायेत सुखादिवत् । प्रत्यक्षज्ञानं च निवार्यते 'न मतेर्मन्तारं' इत्यादिना । ज्ञायते तु श्रवणादिलिंगेन, तत्र कुतो विप्रतिषेधः? ननु श्रवणादिलिंगेनापि कथं ज्ञायते यावता यदा शृणोत्यात्मा श्रोतव्यं शब्दं, तदा तस्य श्रवणक्रियैव वर्तमानत्वान्मननविज्ञानक्रिये न संभवतः आत्मनि परत्र वा । तथान्यत्रापि मननादिक्रियासु श्रवणादिक्रियाश्च स्वविषयेष्वेव । न हि मन्तव्यादन्यत्र मन्तुर्मननक्रिया संभवति । ननु मनसा सर्वमेव मन्तव्यम् । सत्यमेवं तथापि सर्वमपि मन्तव्यं मन्तारमंतरेण न मन्तुं शक्यम । यद्येवं किं स्यात? इदमत्र स्यात सर्वस्य योऽयं मन्ता स मन्तैवेति न स मन्तव्यः स्यात । न चैष द्वितीयो मन्तुर्मन्ताऽस्ति यदा स आत्मनैव मन्तव्यः तदा येन च मन्तव्य आत्मा आत्मना, यश्च मन्तव्य आत्मा, तौ द्वौ प्रसज्येयाताम । एक एवात्मा द्विधा मन्तृमन्तव्यत्वेन दिशकलीभवेद्वंशादिवदुभयथाप्यनुपपत्तिरेव । यथा प्रदीपयोः प्रकाश्यप्रकाशकत्वानुपपत्तिः समत्वात्तद्वत् । न च मन्तुर्मन्तव्ये मननव्यापारशून्यः कालोऽस्त्यात्ममननाय । यद्यपि लिंगेनात्मानं मनुते मन्ता, तदापि पूर्ववदेव लिंगेन मन्तव्य आत्मा, यश्च तस्य मन्ता, तौ द्वौ प्रसज्येयाताम् । एक एव वा द्विधेति पूर्वोक्तदोषः । न प्रत्यक्षेण नाप्यनुमानेन ज्ञायते चेत कथमुच्यते 'स म आत्मेति विद्यात्' इति । कथं वा श्रोता मन्तेत्यादि ॥ ननु श्रोतृत्वादिधर्मवानात्मा, अश्रोतृत्वादि च प्रसिद्धमात्मनः, किमत्र विषमं पश्यसि । यद्यपि तव न विषमं तथापि मम तु विषमं प्रतिभाति । कथम् । यदासौ श्रोता तदा न मन्ता यदा मन्ता तदा न श्रोता । तत्रैवं सति, पक्षे श्रोता मन्ता, पक्षे न श्रोता नापि मन्ता । तथान्यत्रापि च । यदेवं, तदा श्रोतृत्वादिधर्मवानात्मा अश्रोतृत्वादिधर्मवान्वेति संशयस्थाने कथं तव न वैषम्यम् । यदा देवदत्तो गच्छति तदा न स्थाता गन्तैव । यदा तिष्ठति तदा न गन्ता स्थातैव । तदा अस्य पक्ष एव गन्तृत्वं स्थातृत्वं च, न नित्यं गन्तृत्वं स्थातृत्वं वा, तद्वत् । तथैवात्र काणादादयः पश्यन्ति । पक्षप्राप्तेनैव श्रोतृत्वादिना आत्मोच्यते श्रोता मन्तेत्यादिवचनात् । संयोगजत्वमयौगपद्यं च ज्ञानस्य ह्याचक्षते । दर्शयंति चान्यत्रमना अभूवं नादर्शमित्यादि युगपज्ज्ञानानुपपत्तिर्मनसो लिंगमिति च न्याय्यम् । भवत्वेवं किं तव नष्टं यद्येवं स्यात् अस्त्वेवं तवेष्टं चेत् । श्रुत्यर्थस्तु

न संभवति । किं न श्रोता मन्तेत्यादिश्रुत्यर्थः । न, न श्रोता न मन्तेत्यादिवचनात् । ननु पाक्षिकत्वेन प्रत्युक्तं त्वया । न नित्यमेव श्रोतृत्वाद्यभ्युपगमात् । 'न हि श्रोतुः श्रुतेर्विपरिलोपो विद्यते' इत्यादिश्रुतेः । एवं तर्हि नित्यमेव श्रोतृत्वाद्यभ्युपगमे, प्रत्यक्षविरुद्धा युगपज्ज्ञानोत्पत्तिरज्ञानाभावश्चात्मनः कल्पित स्यात् । तच्चानिष्टमिति । नोभयदोषोपपत्तिः, आत्मन श्रुत्यादिश्रोतृत्वादिधर्मवत्त्वश्रुतेः । अनित्यनां मूर्तीनां च चक्षुरादीनां दृष्ट्याद्यनित्यमेव संयोगविर्योग. धर्मिणाम् । यथाग्नेः ज्वलनं तृणादिसंयोगजत्वान्नद्वत् । न तु नित्यस्यामर्तस्यासंयोगविभागधर्मिण संयोगजदृष्ट्याद्यनित्यधर्मवत्त्वं संभवति । तथा च श्रुतिः 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' इत्याद्या । एवं तर्हि द्वे दृष्टी चक्षुषोऽनित्या दृष्टिर्नित्या चात्मनः । तथा च द्वे श्रुती श्रोत्रस्यानित्या नित्या चात्मस्वरूपस्य । तथा द्वे मती विज्ञाती बाह्याबाह्ये । एवं द्वयेव चेयं श्रुतिरुपपन्ना भवति 'दृष्टेर्द्रष्टा श्रुतेः श्रोता' इत्याद्या । लोकेऽपि प्रसिद्धं चक्षुषस्तिमिरागमापाययोर्नष्टा दृष्टिर्जाता दृष्टिरिति चक्षुर्दृष्टेरनित्यत्वम् । तथा च श्रुतिमत्यादीनामात्मदृष्ट्यादीना च नित्यत्वं प्रसिद्धमेव लोके । वदति हि उदधृतचक्षुः स्वप्नेऽद्य मया भ्राता दृष्ट इति । तथावगतबाधिर्यः स्वप्ने श्रुतो मंत्रोऽद्येत्यादि । यदि चक्षुःसंयोगजैवात्मनो नित्या दृष्टिस्तन्नाशे नश्येत तदोद्धृतचक्षुः स्वप्ने नोलपीतादि न पश्येत् । 'न हि द्रष्टुर्दृष्टेः' इत्याद्या च श्रुतिरनुपपन्ना स्यात्, 'तच्चक्षुः पुरुषे येन स्वप्ने पश्यति,' इत्याद्या च श्रुतिरनुपपन्ना स्यात् । नित्या आत्मनो दृष्टिर्बाह्यानित्यदृष्टेर्ग्राहिका । बाह्यदृष्टेश्चोपजनापायाद्यनित्यधर्मवत्त्वान्नदग्राहिकाया आत्मदृष्टेस्तद्वदवभासत्वमनित्यत्वादि भ्रान्तिनिमित्तं लोकस्येति युक्तम् । यथा भ्रमणादिधर्मवदलातादिवस्तुविषयदृष्टिरपि भ्रमतीव तद्वत् । तथा च श्रुतिः 'ध्यायतीव लेलायतीव' इति । तस्मादात्मदृष्टेर्नित्यत्वान्न यौगपद्यमयौगपद्यं वास्ति ॥ बाह्यानित्यदृष्ट्युपाधिवशात्तु लोकस्य तार्किकाणां चागमसंप्रदायवर्जितत्वात् अनित्या आत्मनो दृष्टिरिति भ्रान्तिरुपपन्नैव । जीवेश्वरपरमात्मभेदकल्पना चैतन्निमित्तैव । तथाच अस्ति नास्तीत्याद्याश्च यावन्तो वाङ्मनसयोर्भेदा यत्रैकं भवन्ति, तद्विषयाया नित्याया दृष्टेर्निर्विशेषायाः ॥ अस्ति नास्ति, एकं नाना, गुणवदगुणं, जानाति न जानाति, क्रियावदक्रियं, फलवदफलं, सबीजं निर्बीजं, सुखं दुःखं, मध्यममध्यं, शून्यमशून्यं, परोऽहमन्य इति वा सर्ववाक्प्रत्ययागोचरे स्वरूपे यो विकल्पयितुमिच्छति, स नूनं खर्मापि चर्मवद्वेष्टयितुमिच्छति, सोपानमिव च पद्भ्यामारोढुं,

जले खे च मीनानां वयसां च पदं दिदृक्षते 'नेति नेति' 'यतो वाचो निवर्तन्ते' इत्यादिश्रुतिभ्यः । "को अद्धा वेद" इत्यादिमंत्रवर्णात् ॥

कथं तर्हि तस्य स म आत्मेति वेदनं, ब्रूहि केन प्रकारेण तमहं स म आत्मेति विद्याम् । अत्राख्यायिकामाचक्षते । कश्चित्किल मनुष्यो मुग्ध कैश्चिदुक्त कस्मिंश्चिदपराधे सति धिक्त्वां नासि मनुष्य इति । स मुग्धतया आत्मनो मनुष्यत्वं प्रत्याययितुं कंचिदुपेत्याह ब्रवातु भवान्कोऽहमस्मीति । स तस्य मुग्धतां ज्ञात्वाह, क्रमेण बोधयिष्यामीति । स्थावराद्यात्मभावमपोह्य न त्वममनुष्य इत्युक्त्वोपरराम । स तं मुग्ध प्रत्याह । भवान्मा बोधयितुं प्रवृत्तस्तूष्णी बभूव किं न बोधयतीति । तादृगेव तद्भवतो वचनम् । नास्यमनुष्य इत्युक्तेऽपि मनुष्यत्वमात्मनो न प्रतिपद्यते यः, स कथं मनुष्योऽस्मीत्युक्तोऽपि मनुष्यत्वमात्मनः प्रतिपद्येत ॥

तस्माद्यथाशास्त्रोपदेश एवात्मावबोधविधिर्नान्यः । न ह्यग्नेर्दाह्यं तृणाद्यन्येन केनचिद्दग्धुं शक्यम् । अत एव शास्त्रमात्मस्वरूपं बोधयितुं प्रवृत्तं सदमनुष्यत्वप्रतिषेधेनैव 'नेति नेति' इत्युक्त्वोपरराम । तथा 'अनंतरमबाह्यं' 'अयमात्मा ब्रह्म' 'सर्वानुभ' इत्यनुशासनम् । 'तत्त्वमसि' 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत' इत्येवमाद्यपि च । यावदयमेव यथोक्तममात्मानं न वेत्ति तावदयं बाह्यानित्यदृष्टिलक्षणमुपाधिमात्मत्वेनोपेत्य अविद्यया उपाधिधर्मानात्मनो मन्यमानो ब्रह्मादिस्तंबपर्यंतेषु देवतिर्यङ्नरस्थानेषु पुन पुनरावर्तमानोऽविद्याकामकर्मवशात्संसरति । स एवं संसरन्नुपात्तेदेहेंद्रियसंघातं त्यजति । त्यक्त्वान्यमुपादत्ते । पुन पुनरेवमेव नदीस्रोतोवज्जन्ममरणप्रबंधाविच्छेदेन वर्तमान काभि अवस्थाभिर्वर्तते इत्येतमर्थं दर्शयन्त्याह श्रुतिर्वैराग्यहेतोः—

पुरुषे ह वा अयमादितो गर्भो भवति यदेतद्रेत. तदेतत्सर्वेभ्योंऽगेभ्यस्तेजः संभूतमात्मन्येवात्मानं बिभर्ति तद्यदा स्त्रियां सिंचत्यथैनज्जनयति तदस्य प्रथमं जन्म ॥१॥

अयमेवाविद्याकामकर्माभिमानवान् यज्ञादिकर्म कृत्वाऽस्माल्लोकात् धूमादिक्रमेण चंद्रमसं प्राप्य क्षीणकर्मा वृष्ट्यादिक्रमेणेमं लोकं प्राप्य अन्नभूतः पुरुषाग्नौ हुतः । तस्मिन्पुरुषे ह वै अय संसारी रसादिक्रमेण आदितः प्रथमतो रेतोरूपेण गर्भो भवतीत्येतदाह यदेतत्पुरुषे रेतस्तेन रूपेणेति । तच्चैतद्रेतोऽन्नम-

यस्य पिंडस्य सर्वेभ्योऽङ्गेभ्योऽवयवेभ्यो रसादिलक्षणेभ्यस्तेजः साररूपं शरीरस्य संभूतं परिनिष्पन्नं तत्पुरुषस्यात्मभूतत्वादात्मा, तमात्मानं रेतोरूपेण गर्भीभूतमात्मन्येव स्वशरीर एवात्मानं बिभर्ति धारयति । तद्रेतो यदा यस्मिन्काले भार्यर्तुमती तस्या योषाग्नौ स्त्रियां सिञ्चत्युपगच्छन् अथ तदेनदेतद्रेत आत्मनो गर्भभूतं जनयति पिता । तदस्य पुरुषस्य स्थानान्निर्गमनं रेतःसेककाले रेतोरूपेणास्य संसारिण प्रथमं जन्म प्रथमावस्थाभिव्यक्तिः । तदेतदुक्तं पुरस्तात असावात्माऽमुमात्मानमित्यादिना ॥

तत्स्त्रियः आत्मभूयं गच्छति यथा स्वमंगं तथा । तस्मादेनां न हिनस्ति सास्यैतमात्मानमत्र गतं भावयति ॥२॥

तद्रेतो यस्या स्त्रियां सिक्तं सत्तस्या आत्मभूयमात्मात्मव्यतिरेकतां यथा पितुरेवं गच्छति प्राप्नोति यथा स्वमंगं स्तनादि तथा तद्वदेव । तस्माद्रेतोरेनां मातरं स गर्भो न हिनस्ति पिटकादिवत् । यस्मात्स्तनादिस्वांगवदात्मभूयं गतं तस्मान्न हिनस्ति न बाधते इत्यर्थः । सा अंतर्वत्न्येतमस्य भर्तुरात्मानमत्रात्मन उदरे गतं प्रविष्टं बुद्ध्वा भावयति वर्धयति परिपालयति गर्भविरुद्धाशनादिपरिहारमनुकूलाशनाद्युपयोगं च कुर्वती ॥

सा भावयित्री भावयितव्या भवति तं स्त्री गर्भं बिभर्ति सोऽग्र एव कुमारं जन्मनोऽग्रेऽधिभावयति । स यत्कुमारं जन्मनोऽग्रेऽधिभावयत्यात्मानमेव तद्भावयत्येषां लोकानां संतत्या एवं संतता ह्यमे लोकास्तदस्य द्वितीयं जन्म ॥३॥

सा भावयित्री वर्धयित्री भर्तुरात्मनो गर्भभूतस्य भावयितव्या वर्धयितव्या रक्षायितव्या च भर्त्री भवति । न ह्युपकारप्रत्युपकारसंबंधेन लोके कस्यचित्केनचित्संबंध उपपद्यते । तं गर्भं स्त्री यथोक्तेन गर्भधारणविधानेन बिभर्ति धारयत्यग्रे प्राग्जन्मनः । स पिता अग्रे एव पूर्वमेव जातमात्रं कुमारं जन्मनोऽध्यूर्ध्वं जन्मनो जातं कुमारं जातकर्मादिना पिता भावयति स पिता यद्यस्मात्कुमारं जन्मनोऽध्यूर्ध्वमग्रे जातमात्रमेव जातकर्मादिना यद्भावयति तदात्मानमेव भावयति, पितुरात्मैव हि पुत्ररूपेण जायते । तथा ह्युक्तं "पतिर्जायां प्रविशति" इत्यादि । तत्किमर्थमात्मानं पुत्ररूपेण जनयित्वा भावयतीति । उच्यते— एषां लोकानां संतत्यै अविच्छेदायेत्यर्थः । विच्छिद्येरन्हीमे लोकाः पुत्रोत्पादनादि यदि

न कुर्युः । एवं पुत्रोत्पादनादिकर्माविच्छेदेनैव संततः प्रबंधरूपेण वर्तन्ते हि यस्मादिमे लोकास्तस्मात्तदविच्छेदाय तत्कर्तव्यं न मोक्षायेत्यर्थः । तदस्य संसारिणः कुमाररूपेण मातुरुदर्याद्विर्गमनं तद्रेतोरूपोपेक्षया द्वितीयं जन्म द्वितीयावस्थाभिव्यक्तिः ॥

सोऽस्यायमात्मा पुण्येभ्य. कर्मभ्य प्रतिधीयते । अथास्यायमितर आत्मा कृतकृत्यो वयोगतः प्रैति स इतः प्रयन्नेव पुनर्जायते तदस्य तृतीयं जन्म ॥४॥

अस्य पितु सोऽयं पुत्रात्मा पुण्येभ्यः शास्त्रोक्तेभ्यः कर्मभ्यः कर्मनिष्पादनार्थं प्रतिधीयते पितुः स्थाने पित्रा यत्कर्तव्यं तत्करणाय प्रतिनिधीयते इत्यर्थ. । तथा च संप्रत्तिविद्यायां वाजसनेयके— "पित्राऽनुशिष्टोऽहं ब्रह्माहं यज्ञ इत्यादि प्रतिपद्यते" इति । अथानंतरं पुत्रे निवेश्यात्मनो भारं अस्य पुत्रस्येतरोऽयं यः पित्रात्मा कृतकृत्य , कर्तव्यादृणत्रयादिमुक्तः कृतकर्तव्य इत्यर्थः, वयोगतो गतवया जीर्ण. सन्प्रैति म्रियते । स इतोऽस्मात्प्रयन्नेव शरीरं पारित्यजन्नेव तृणजलूकावत् देहान्तरमुपाददान. कर्मचितं, पुनर्जायते । तदस्य मृत्वा प्रतिपत्तव्यं यत्तत्तृतीयं जन्म । ननु संसरत. पितुः सकाशाद्रेतोरूपेण प्रथमं जन्म । तस्यैव कुमाररूपेण मातुर्द्वितीयं जन्मोक्तम् । तस्यैव तृतीये जन्मनि वक्तव्ये प्रेतस्य पितुर्यज्जन्म तत्तृतीयमिति कथमुच्यते? नैष दोषः । पितापुत्रयोरैकात्म्यस्य विवक्षितत्वात् । सोऽपि पुत्रः स्वपुत्रे भारं निधायेतः प्रयन्नेव पुनर्जायते यथा पिता । तदन्यत्रोक्तमितरत्रापयुक्तमेव भवतीति मन्यते श्रुतिः । पितापुत्रयोरैकात्म्यत्वात् ॥

तदुक्तमृषिणा—गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा । शतं मा पुर आयसीररक्षन्नधः श्येनो जवसा निरदीयमिति गर्भ एवैतच्छयानो वामदेव एवमुवाच ॥५॥

एवं संसरन्नवस्थाभिव्यक्तित्रयेण जन्ममरणप्रबंधारूढः सर्वो लोकः संसारसमुद्रे निपतितः कथंचिद्यदा श्रुत्युक्तमात्मानं विजानाति यस्यां कस्यांचिदवस्थायां तदैव मुक्तसर्वसंसारबंधनः कृतकृत्यो भवतीत्येतदस्तु, तदृषिणा मंत्रेणाप्युक्तमित्याह— गर्भे नु मातुर्गर्भाशय एव सन् । नविति वितर्के । अनेकजन्मान्तरभावनापरिपाकवशादेषां देवानां वागग्न्यादीनां जनिमानि जन्मानि विश्वा

विश्वानि सर्वाण्यन्वेवदमहमहो अनुबुद्धवानस्मीत्यर्थः । शतमनेका वह्वयो मा मां पुर आयसी आयस्यो लोहमय्य इवाभेद्यानि शरीराणीत्यभिप्राय. । अरक्षन्नक्षितवत्य संसारपाशनिर्गमनादधः । अथ श्येन इव जालं भित्वा जवसा आत्मज्ञानकृतसामर्थ्येन निरदीयं निर्गतोऽस्मि । अहो गर्भ एव शयानो वामदेव ऋषिरेवं उवाचैतत् ॥

स एवं विद्वानस्माच्छरीरभेदादूर्ध्व उत्क्रम्यामुष्मिन्त्स्वर्गे लोके सर्वान्कामानाप्त्वाऽमृतः समभवत्समभवत् ॥६॥ इति चतुर्थः खंडः ॥४॥

इत्यैतरेयोपनिषदि द्वितीयोऽध्यायः ॥२॥

स वामदेव ऋषिर्यथोक्तमात्मानमेवं विद्वानस्माच्छरीरभेदाच्छरीरस्य अविद्यापरिकल्पितस्य आयसवदनिर्भेद्यस्य जननमरणाद्यनेकानर्थशताविष्टशरीरप्रबंधस्य परमात्मज्ञानामृतोपयोगजनितवीर्यकृतभेदाच्छरीरोत्पत्तिबीजाविद्यादिनिमित्तोपमर्दहेतो. शरीरविनाशादित्यर्थः । ऊर्ध्व परमात्मभूतः सन्नधोभावात्संसारात उत्क्रम्य ज्ञानावद्योतितामलसर्वात्मभावमापन्नः सन्नमुष्मिन्यथोक्तेऽजरेऽमरेऽमृतेऽभये सर्वज्ञेऽपूर्वेऽनपरेऽनंतरेऽबाह्ये प्रज्ञानामृतैकरसे स्वर्गे लोके स्वास्मिन्नात्मनि स्वे स्वरूपेऽमृतः समभवदात्मज्ञानेन पूर्वमाप्तकामतया जीवन्नेव सर्वान्कामानाप्त्वेत्यर्थः । द्विर्वचनं सफलस्य सोदाहरणस्यात्मज्ञानस्य परिसमाप्तिप्रदर्शनार्थम् ॥

इति श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ ऐतरेयोपनिषद्भाष्ये द्वितीयोऽध्याय. ॥२॥

अथ तृतीयोऽध्यायः ।

कोऽयमात्मेति वयमुपास्महे कतर स. आत्मा येन वा पश्यति येन वा शृणोति येन वा गंधानाजिघ्रति येन वा वाचं व्याकरोति येन वा स्वादु चास्वादु च विजानाति ।

ब्रह्मविद्यासाधनकृतसर्वात्मभावफलावाप्ति वामदेवाद्याचार्यपरंपरया श्रुत्यावद्योत्यमानां ब्रह्मवित्परिषद्यत्यंतप्रसिद्धामुपलभमाना मुमुक्षवो ब्राह्मणा अधुनातना ब्रह्म जिज्ञासवोऽनित्यात्साध्यसाधनलक्षणात्संसारात् आर्जवभावाद्याविवृत्सवो विचारयन्तोऽन्योन्यं पृच्छन्ति । कथं–

यमात्मानमयमात्मेति साक्षाद्वयमुपास्महे क स आत्मेति, यं चात्मानं अयमात्मेति साक्षादुपासीनो वामदेवोऽमृत समभवत्तमेव वयमप्युपास्महे को नु खलु स आत्मेति, एवं जिज्ञासापूर्वमन्योन्यं पृच्छतामतिक्रान्तविशेषविषयश्रुति-संस्कारजनिता स्मृतिरजायत, तं "पप्रदाभ्या प्रापद्यत ब्रह्मेमं पुरुषम्" 'स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत एतमेव पुरुषम्' अत्र द्वे ब्रह्मणा इतरेतर-प्रातिकूल्येन प्रतिपन्ने इति । ते चास्य पिण्डस्यात्मभूते । तयोरन्यतर आत्मोपास्यो भवितुमर्हति । योऽत्रोपास्यः कतर स आत्मेति विशेषनिर्धारणार्थं पुनरन्योन्यं पप्रच्छुर्विचारयन्त । पुनस्तेषां विचारयतां विशेषविचारणास्पदविषया मतिरभूत । कथं, द्वे वस्तुनी अस्मिन्पिण्ड उपलभ्येते, अनेकभेदभिन्नेन करणेन येनोपलभते, यश्चैक उपलभते, करणान्तरोपलब्धविषयस्मृतिप्रतिसंधानात । तत्र न तावद्येनोपलभते स आत्मा भवितुमर्हति । केन पुनरुपलभत इति उच्यते, येन वा चक्षुर्भूतेन रूपं पश्यति, येन वा शृणोति श्रोत्रभूतेन शब्दं, येन वा घ्राणभूतेन गंधानाजिघ्रति, येन वा वाक्करणभूतेन वाचं नामात्मिका व्याकरोति गौरश्व इत्येवमाद्यां साध्वसाधिति च, येन वा जिह्वाभूतेन स्वादु चास्वादु च विजानातीति ॥

यदेतद्धृदयं मनश्चैतत् । संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूति स्मृतिः संकल्पः क्रतुरसु कामो वश इति । सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति ॥

किं पुनस्तदेवैकमनेकधा भिन्नं करणमिति, उच्यते—यदुक्तं पुरस्तात्प्रजानां रेतो हृदयं हृदयस्य रेतो मनो, मनसा सृष्टा आपश्च वरुणश्च हृदयान्मनो मनसः चंद्रमा तदेवैतद्धृदयं मनश्च, एकमेव तदनेकधा । एतेनांत करणेनैकेन चक्षुर्भूतेन रूपं पश्यति, श्रोत्रभूतेन शृणोति, घ्राणभूतेन जिघ्रति, वाग्भूतेन वदति, जिह्वाभूतेन रसयति, स्वेनैव विकल्पनारूपेण मनसा संकल्पयति, हृदयरूपेणाध्यवस्यति । तस्मात्सर्वकरणविषयव्यापारकमेकमिदं करणं सर्वोपलब्ध्यर्थमुपलब्धुः । तथा च कौषीतकिना 'प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोति प्रज्ञया चक्षुः समारुह्य चक्षुषा सर्वाणि रूपाण्याप्नोति' इत्यादि । वाजसनेयके च—"मनसा ह्येव पश्यति मनसा शृणोति हृदयेन हि रूपाणि जानाति" इत्यादि । तस्मात् हृदयमनोवाच्यस्य सर्वोपलब्धिकरणत्वं प्रसिद्धम् । तदात्मकश्च प्राणो "यो वै प्राणः सा प्रज्ञा या व प्रज्ञा स प्राण " इति हि ब्राह्मणम् । करणसंहतिरूपश्च प्राण इत्यवो-

चाम प्राणसंवादादौ । तस्माद्यत्पद्भ्या प्रापद्यत तद्ब्रह्म तदुपलब्धुरुपलब्धिकरणत्वेन गुणभूतत्वान्नैव तद्वस्तु ब्रह्मोपास्यात्मा भवितुमर्हति । पारिशेष्याद्यस्योपलब्धुरुपलब्ध्यर्था एतस्य हृदयस्य मनोरूपस्य करणस्य वृत्तयो वक्ष्यमाणाः, स उपलब्धोपास्य आत्मा नोऽस्माकं भवितुमर्हतीति निश्चयं कृतवन्तः । तदंतःकरणोपाधिस्थस्योपलब्धु. प्रज्ञानरूपस्य ब्रह्मण उपलब्ध्यर्था या अंतःकरणवृत्तयो बाह्यान्तर्वर्तिविषयविषयास्ता इमा उच्यन्ते संज्ञान संज्ञप्तिश्चेतनभावः, आज्ञानमाज्ञप्तिरीश्वरभावः, विज्ञानं कलादिपरिज्ञानं, प्रज्ञानं प्रज्ञप्तिः प्रज्ञता, मेधा ग्रंथधारणसामर्थ्यं, दृष्टिरिंद्रियद्वारा सर्वविषयोपलब्धि , धृतिर्धारणमवसन्नानां शरीरेंद्रियाणा ययोत्तंभनं भवति धृत्या शरीरमुद्वहन्तीति हि वदन्ति । मतिर्मननं, मनीषा तत्र स्वातंत्र्यं, जूतिश्चेतसो रुजादिदु.खित्वभाव., स्मृतिः स्मरणं, संकल्पः शुक्लकृष्णादिभावेन संकल्पनं रूपादीना, क्रतुरध्यवसाय , अस्मु प्राणनादिर्जीवनक्रियानिमित्ता वृत्तिः, कामोऽसंनिहितविषयाकांक्षा तृष्णा, वशः स्त्रीव्यतिकराद्यभिलाषः, इत्येवमाद्या अंत करणवृत्तय प्रज्ञप्तिमात्रस्योपलब्धुरुपलब्ध्यर्थत्वाच्छुद्धप्रज्ञानरूपस्य ब्रह्मण उपाधिभूतास्तदुपाधिर्जानतगुणनामधेयानि संज्ञानादीनि सर्वाण्येव एतानि प्रज्ञप्तिमात्रस्य प्रज्ञानस्य नामधेयानि भवन्ति न स्वतः साक्षात । तथा चोक्तं 'प्राणश्चेव प्राणो नाम भवति' इत्यादि ॥

एष ब्रह्मैष इंद्र एष प्रजापतिरेते सर्वे देवा इमानि च पंच महाभूतानि पृथिवी वायुराकाश आपो ज्योतींषीत्येतानीमानि च क्षुद्रमिश्राणीव । बीजानीतराणि चेतराणि चांडजानि च जारुजानि च स्वेदजानि चोद्भिजानि चाश्वा गावः पुरुषा हस्तिनो यत्किंचेदं प्राणि जंगमं च पतत्रि च यच्च स्थावरं सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म ॥३॥

स एष प्रज्ञानरूप आत्मा ब्रह्मापरं सर्वशरीरस्थः प्राण· प्रज्ञात्मा अंत करणोपाधिष्वनुप्रविष्टो जलभेदगतसूर्यप्रतिबिंववद्धिरण्यगर्भ. प्राणः प्रज्ञात्मा । एषैव इंद्रो गुणोद्वराजो वा । एष प्रजापतिर्यः प्रथमजः शरीरी । यतो मुखादिनिर्भेदद्वारेणाग्न्यादयो लोकपाला जाताः स प्रजापतिरेष एव । येऽप्येतेऽग्न्यादयः सर्वे देवा एष एव । इमानि च सर्वशरीरोपादानभूतानि पंच पृथिव्यादीनि महाभूतान्यन्नान्नादत्वलक्षणान्येतानि । किंचेमानि च क्षुद्रमिश्राणि क्षुद्रैरल्पकैर्मिश्राणि, इव-

शब्दोऽनर्थकः, सर्पादीनि बीजानि कारणानीतराणि चेतराणि च द्वैराश्येन निर्दिश्यमानानि । कानि तानि उच्यन्ते । अंडजानि पक्ष्यादीनि, जारुजानि जरायुजानि मनुष्यादीनि, स्वेदजानि यूकादीनि, उद्भिज्जानि वृक्षादीनि । अश्वा गाव पुरुषा हस्तिनोऽन्यच्च यत्किंचेदं प्राणिजातम् । किं तत् । जंगमं यच्चलति पद्भ्यां गच्छति, यच्च पतत्रि आकाशेन पतनशीलं, यच्च स्थावरमचलं, सर्वं तदशेषतः प्रज्ञानेत्रं, प्रज्ञप्तिः प्रज्ञा तच्च ब्रह्मैव, नीयतेऽनेनेति नेत्रं, प्रज्ञा नेत्रं यस्य तदिदं प्रज्ञानेत्रम् । प्रज्ञाने ब्रह्मण्युत्पत्तिस्थितिलयकालेषु प्रतिष्ठितं प्रज्ञाश्रयमित्यर्थः । प्रज्ञानेत्रो लोकः पूर्ववत् । प्रज्ञाचक्षुर्वा सर्व एव लोकः । प्रज्ञा प्रतिष्ठा सर्वस्य जगतः । तस्मात्प्रज्ञानं ब्रह्म । तदेतत्प्रत्यस्तमितसर्वोपाधिविशेषं सन्निरंजनं निर्मलं निष्क्रियं शान्तमेकमद्वयं नेतिनेतीतिसर्वविशेषापोहसंवेद्यं सर्वशब्दप्रत्ययागोचरं तदत्यंतविशुद्धप्रज्ञोपाधिसंबंधेन सर्वज्ञमीश्वरं सर्वमाधारणाव्याकृतजगद्बीजप्रवर्तकं नियंतृत्वादंतर्यामिसंज्ञं भवति । तदेव व्याकृतजगद्बीजभूतबुद्ध्यात्माभिमानलक्षणं हिरण्यगर्भसंज्ञं भवति । तदेवांतरंडोद्भूतप्रथमशरीरोपाधिमद्विराट्प्रजापतिसंज्ञं भवति । तदुद्भूतान्याद्युपाधिमद्देवतासंज्ञं भवति । तथा विशेषशरीरोपाधिष्वपि ब्रह्मादिस्तंबपर्यन्तेषु तत्तन्नामरूपलाभो ब्रह्मणः । तदेवैकं सर्वोपाधिभेदभिन्नं सर्वैः प्राणिभिस्तार्किकैश्च सर्वप्रकारेण ज्ञायते विकल्प्यते चानेकधा । "एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम् । इंद्रमेकेऽपरे प्राणमपरे ब्रह्म शाश्वतम्" इत्यादिस्मृति ॥

स एतेन प्रज्ञेनात्मनाऽस्माल्लोकादुत्क्रम्यामुष्मिन्स्वर्गे लोके सर्वान् कामानाप्त्वाऽमृतः समभवत्समभवत् ॥४॥ इति पंचमः खंडः ॥५॥

इत्यैतरेये द्वितीयारण्यके षष्ठोऽध्यायः ॥६॥

स वामदेवोऽन्यो वैवं यथोक्तं ब्रह्म वेद प्रज्ञेनात्मना, येनैव प्रज्ञेनात्मना पूर्वे विद्वांसोऽमृता अभूवंस्तथायमपि विद्वानेतेनैव प्रज्ञेनात्मनाऽस्माल्लोकादुत्क्रम्य इत्यादि व्याख्यातम् । अस्माल्लोकादुत्क्रम्यामुष्मिन्स्वर्गे लोके सर्वान्कामानाप्त्वा अमृतः समभवत्समभवदित्योमिति ॥

ॐ वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरावीर्म एधि वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रा-

न्संदधाम्यृतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तदुक्तारमवत्ववतु मामवतु वक्तारमवतु वक्तारम् । ॐ शान्तिः शान्तिः शान्तिः । इति षष्ठः खंडः ॥६॥

इत्यैतरेये द्वितीयारण्यके सप्तमोऽध्यायः ॥७॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीशंकरभगवतः कृतौ बह्वृचब्राह्मणोपनिषद्भाष्यं समाप्तम् ॥

॥ ॐ ॥

श्रीमच्छंकराचार्यविरचितभाष्ययुता

काठकोपनिषत् ।

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ॥ तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ नमो भगवते वैवस्वताय मृत्यवे ब्रह्मविद्याचार्याय शचिकेतसे च ॥

अथ काठकोपनिषद्व्याख्याना मुखार्थप्रबोधनार्थमल्पग्रंथा वृत्तिरारभ्यते । सदेः धातोर्विशरणगत्यवसादनार्थस्योपनिपूर्वस्य क्विप्प्रत्ययांतस्य रूपमिदमुपनिषदिति । उपनिषच्छब्देन च व्याचिख्यासितग्रंथप्रतिपाद्यवेद्यवस्तुविषया विद्योच्यते । केन पुनरर्थयोगेनोपनिषच्छब्देन विद्योच्यत इत्युच्यते । ये मुमुक्षवो दृष्टानुश्रविकविषयवितृष्णाः सन्तः उपनिषच्छब्दवाच्यां वक्ष्यमाणलक्षणां विद्यामुपसद्योपगम्य तन्निष्ठतया निश्चयेन शीलयन्ति तेषामविद्यादेः संसारबीजस्य विशरणाद्विसनाद्विनाशनात् इत्यनेनार्थयोगेन विद्योपनिषदित्युच्यते । तथा च वक्ष्यति 'निचाय्य तं मृत्युमुखात्प्रमुच्यते' [३.१५] इति । पूर्वोक्तविशेषणान्वा मुमुक्षून् परं ब्रह्म गमयतीति च ब्रह्मगमयितृत्वेन योगाद्ब्रह्मविद्योपनिषत् । तथा च वक्ष्यति 'ब्रह्म प्राप्तो विरजोऽभूद्विमृत्युः' [६.१८] इति । लोकादिर्ब्रह्मजज्ञो योऽग्निः. तद्विषयाया विद्याया द्वितीयेन वरेण प्रार्थ्यमानायाः. स्वर्गलोकफलप्राप्तिहेतुत्वेन गर्भवासजन्मजरायुपद्रवबृंदस्य लोकान्तरे पौनःपुन्येन प्रवृत्तस्यावसादयितृत्वेन शैथिल्यापादनेन धात्वर्थयोगादग्निविद्याप्युपनिषदित्युच्यते । तथा च वक्ष्यति 'स्वर्गलोका अमृतत्वं भजन्ते' [१.१३] इत्यादि । ननु चोपनिषच्छब्देनाध्येतारो ग्रंथमप्यभिलषन्ति । उपनिषदमधीमहे उपनिषदमध्यापयाम इति च । नैष दोषः, अविद्यादिसंसारहेतुविशरणादेः सदिधात्वर्थस्य ग्रंथमात्रेऽसंभवाद्विद्याया च संभवात् ग्रंथस्यापि तादर्थ्येन तच्छब्दत्वोपपत्तेः आयुर्वै घृतमित्यादिवत् । तस्माद्विद्याया मुख्यया वृत्त्योपनिषच्छब्दो वर्तते, ग्रंथे तु भक्त्येति । एवमुपनिषन्निर्वचनेनैव विशिष्टोऽधिकारी विद्यायामुक्तः । विषयश्च विशिष्ट उक्तो विद्यायाः परं ब्रह्म

प्रत्यगात्मभूतम् । प्रयोजनं चास्या उपनिषद आत्यन्तिकी संसारनिवृत्तिर्ब्रह्मप्राप्तिलक्षणा । संबंधश्चैवंभूतप्रयोजनेनोक्तः । अतो यथोक्ताधिकारिविषयप्रयोजनसंबंधाया विद्यायाः करतलन्यस्तामलकवत्प्रकाशकत्वेन विशिष्टाधिकारिविषयप्रयोजनसंबंधा एता वल्ल्यो भवन्तीति । अतस्ता यथाप्रतिभानं व्याचक्ष्महे ॥

ॐ उशन्ह वै वाजश्रवसः सर्ववेदसं ददौ ।
तस्य ह नचिकेता नाम पुत्र आस ॥१॥

तत्राख्यायिका विद्यास्तुत्यर्था । उशन्कामयमानो, ह वै इति वृत्तार्थस्मरणार्थौ निपातौ । वाजमन्नं तद्दानादिनिमित्तं श्रवो यशो यस्य स वाजश्रवा, रूढितो वा, तस्यापत्यं वाजश्रवसः । स किल विश्वजिता सर्वमेधेनेजे तत्फलं कामयमानः । तस्मिन्क्रतौ सर्ववेदसं सर्वस्वं धनं ददौ दत्तवान । तस्य यजमानस्य ह नचिकेता नाम पुत्रः किलास बभूव ॥

तꣳ ह कुमारꣳ सन्तं दक्षिणासु नीयमानासु श्रद्धाविवेश सोऽमन्यत ॥२॥

तं ह नचिकेतसं कुमारं प्रथमवयसं सन्तमप्राप्तप्रजननशक्तिं बालमेव श्रद्धास्तिक्यबुद्धिः पितुर्हितकामप्रयुक्ताविवेश प्रविष्टवती । कस्मिन्काल इत्याह— ऋत्विग्भ्यः सदस्येभ्यश्च दक्षिणासु नीयमानासु विभागेनोपनीयमानासु दक्षिणार्थासु गोषु, स आविष्टश्रद्धो नचिकेता अमन्यत ॥

पीतोदका जग्धतृणा दुग्धदोहा निरिंद्रियाः ।
अनंदा नाम ते लोकास्तान्स गच्छति ता ददत् ॥३॥

कथमित्युच्यते–पीतोदका इत्यादिना दक्षिणार्था गावो विशेष्यन्ते । पीतमुदकं याभिस्ता पीतोदकाः । जग्धं भक्षितं तृणं याभिस्ता जग्धतृणाः । दुग्धो दोह क्षीराख्यो यासां ता दुग्धदोहाः । निरिंद्रिया प्रजननासमर्था जीर्णा निष्फला गाव इत्यर्थः । यास्ता एवंभूता गा ऋत्विग्भ्यो दक्षिणाबुद्धया ददत्प्रयच्छन्ननंदा अनानंदा असुखा नामैतेषु ते लोकास्तान्स यजमानो गच्छति ॥

स होवाच पितरं तत कस्मै मां दास्यसीति ।
द्वितीयं तृतीयं तꣳ होवाच मृत्यवे त्वा ददामीति ॥४॥

तदेवं क्रत्वसंपत्तिनिमित्तं पितुरनिष्टं फलं मया पुत्रेण सता निवारणीयमात्मप्रदानेनापि क्रतुसंपत्तिं कृत्वा इत्येवं मन्यमानः पितरमुपगम्य स होवाच पितरं–हे तत तात कस्मै ऋत्विग्विशेषाय दक्षिणार्थं मां दास्यसीति प्रयच्छ-

सीत्येतत् । एवमुक्तेन पित्रोपेक्ष्यमाणोऽपि द्वितीयं तृतीयमायुवाच कस्मै मा दास्यसि कस्मै मां दास्यसीति । नायं कुमारस्वभाव इति क्रुद्ध सन्पिता तं ह पुत्रं किलोवाच मृत्यवे वैवस्वताय त्वा त्वा ददामीति ॥

बहूनामेमि प्रथमो बहूनामेमि मध्यमः ॥
किꣳस्विद्यमस्य कर्तव्यं यन्मयाद्य करिष्यति ॥५॥

स एवमुक्तः पुत्र एकान्ते परिदेवयाचकार । कथमित्युच्यते— बहूना शिष्याणा पुत्राणां वा एमि गच्छामि प्रथमः सन्मुख्यया शिष्यादिवृत्त्येत्यर्थः । मध्यमानां च बहूनां मध्यमो मध्यमयैव वृत्त्यैमि । नाधमया कदाचिदपि । तेमवं विशिष्टगुणमपि पुत्रं मां 'मृत्यवे त्वा ददामि' इत्युक्तवान्पिता । स किस्विद्यमस्य कर्तव्यं प्रयोजनं मया प्रदत्तेन करिष्यति यत्कर्तव्यमद्य ? नूनं प्रयोजनमनपेक्ष्यैव क्रोधवशादुक्तवान्पिता । तथापि तत्पितुर्वचो मृषा मा भूदिति ॥

एवं मत्वा परिदेवनापूर्वकमाह पितरं शोकाविष्टं किंवा मयोक्तमिति—

अनुपश्य यथा पूर्वे प्रतिपश्य तथाऽपरे ।
सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः ॥ ६ ॥

अनुपश्यालोचय विभावयानुक्रमेण यथा येन प्रकारेण वृत्ताः पूर्वेऽतिक्रान्ताः पितृपितामहादयस्तव । तान्दृष्ट्वा च तेषा वृत्तमास्थातुमर्हसि । वर्तमानाश्चापरे साधवो यथा वर्तते तांश्च तथा प्रतिपश्यालोचय । न च तेषां मृषाकरणं वृत्तं वर्तमानं वास्ति । तद्विपरीतमसता च वृत्तं मृषाकरणम् । न च मृषाभूतं कृत्वा कश्चिदजरामरो भवति । यत सस्यमिव मर्त्यो मनुष्य पच्यते जीर्णो म्रियते, मृत्वा च सस्यमिवाजायते आविर्भवति पुनः । एवमनित्ये जीवलोके मृषाकरणेन पालयात्मनः सत्यम् । प्रेषय मा यमायेत्यभिप्रायः ॥

वैश्वानरः प्रविशति अतिथिर्ब्राह्मणो गृहान् ।
तस्यैताꣳ शान्तिं कुर्वन्ति हर वैवस्वतोदकम् ॥७॥

स एवमुक्तः पितात्मनः सत्यतायै प्रेषयामास । स च यमभवनं गत्वा तिस्रो रात्रीरुवास यमे प्रोषिते । प्रोष्यागतं यममात्या भार्या वा ऊचुर्बोधयन्तो वैश्वानरोऽग्निरेव साक्षात्प्रविशत्यतिथिः सन्ब्राह्मणो गृहान्दहन्निव । तस्य दाहं शमयन्त इवाग्नेरेतां पाद्यासनादिदानलक्षणां शान्तिं कुर्वन्ति सन्तोऽतिथेर्यतः, अतो हराहर हे वैवस्वतोदकं नाचिकेतसे पाद्यार्थम् ॥

यतश्चाकरणे प्रत्यवायः श्रूयते—

आशाप्रतीक्षे संगतꣳसूनृतां चेष्टापूर्ते पुत्रपशूꣳश्च सर्वान् ।
एतत् वृंक्ते पुरुषस्याल्पमेधसो यस्यानश्नन्वसति ब्राह्मणो गृहे ॥८॥

आशाप्रतीक्षे अनिर्ज्ञातप्राप्येष्टार्थप्रार्थना आशा, निर्ज्ञातप्राप्यार्थप्रतीक्षणं प्रतीक्षा, ते आशाप्रतीक्षे । संगतं तत्संयोगजं फलं, सूनृतां च सूनृता हि प्रिया वाक्तन्निमित्तजं च । इष्टापूर्ते इष्टं यागजं फलं, पूर्तमारामादि क्रियाजं फलम् । पुत्रपशूंश्च पुत्रांश्च पशूंश्च सर्वान एतत्सर्वं यथोक्तं वृंक्ते वर्जयति विनाशयतीत्येतत, पुरुषस्याल्पमेधसोऽल्पप्रज्ञस्य । यस्यानश्नन्भुंजानो ब्राह्मणो गृहे वसति । तस्मादनुपेक्षणीय सर्वावस्थास्वप्यतिथिरित्यर्थ ॥

तिस्रो रात्रीर्यदवात्सीर्गृहे मेऽनश्नन्ब्रह्मन्नतिथिर्नमस्य ।
नमस्तेऽस्तु ब्रह्मन्स्वस्ति मेऽस्तु तस्मात्प्रति त्रीन्वरान्वृणीष्व ॥९॥

एवमुक्तो मृत्युरुवाच नचिकेतसमुपगम्य पूजापुरस्सरम् । तिस्रो रात्रीर्यद्यस्मादवात्सीरुषितवानसि गृहे मे ममानश्नन्हे ब्रह्मन्नतिथि सन्नमस्यो नमस्कारार्हश्च, तस्मान्नमस्ते तुभ्यमस्तु भवतु । हे ब्रह्मन्स्वस्ति भद्रं मेऽस्तु । तस्माद्व्रतोऽनशनेन मदगृहवासनिमित्ताद्दोषात । तत्प्राप्त्युपशमेन यद्यपि भवदनुग्रहेण सर्वं मम स्वस्ति स्यात्तथापि त्वदधिकसंप्रसादनार्थमनशनेनोपितामेकैकां रात्रि प्रति त्रीन्वरान्वृणीष्वाभिप्रेतार्थविशेषान्प्रार्थयस्व मत्तः ॥

शान्तसंकल्प सुमना यथा स्याद्वीतमन्युर्गौतमो माभि मृत्यो ।
त्वत्प्रसृष्टं माभिवदेत्प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे ॥१०॥

नचिकेतास्त्वाह—यदि दित्सुर्वरान् शान्तसंकल्प उपशान्त संकल्पो यस्य मा प्रति, यमं प्राप्य किनु करिष्यति मम पुत्र इति, स शान्तसंकल्पः सुमनाः प्रसन्नमनाश्च यथा स्याद्वीतमन्युर्विगतरोषश्च गौतमो मम पिता माऽभि मां प्रति हे मृत्यो, किंच त्वत्प्रसृष्टं त्वया विनिर्मुक्तं प्रेषितं गृहं प्रति मामभिवदेत्प्रतीतो लब्धस्मृतिः, स एवायं पुत्रो ममागत इत्येवं प्रत्यभिजानन्नित्यर्थ । एतत्प्रयोजनं त्रयाणां वराणां प्रथममाद्यं वरं वृणे प्रार्थये यत्पितुः परितोषणम् ॥

यथा पुरस्ताद्भविता प्रतीत औद्दालकिरारुणिर्मत्प्रसृष्टः ।
सुखꣳ रात्रीः शयिता वीतमन्युस्त्वां ददृशिवान्मृत्युमुखात्प्रमुक्तम् ॥११॥

मृत्युरुवाच—यथा बुद्धिस्त्वयि पुरस्तात्पूर्वमासीत्स्नेहसमन्विता पितुस्तव

भविता प्रीतिसमन्वितस्तव पिता तथैव प्रतीत. प्रतीतवान्मन औद्दालकि उद्दालक एवौद्दालकि , अरुणस्यापत्यमारुणिर्व्यामुष्यायणो वा मत्प्रसृष्टो मयाऽनुज्ञातः सन्नुत्तरा अपि रात्री· सुखं प्रसन्नमना. शयिता स्वप्ता वीतमन्युर्विगतमन्युश्च भविता स्याच्चा पुत्रं दृष्टशिवान्दृष्टवान्सन्मृत्युमुखान्मृत्युगोचरात्प्रमुक्तं सन्तम् ॥

स्वर्गे लोके न भयं किंचनास्ति न तत्र त्वं न जरया बिभेति ।
उभे तीर्त्वाऽशनायापिपासे शोकातिगो मोदते स्वर्गलोके ॥१२॥

नचिकेता उवाच—स्वर्गे लोके रोगादिनिमित्तं भयं किंचन किंचिदपि नास्ति । न च तत्र त्वं मृत्यो सहसा प्रभवसि, अतो जरया युक्त इह लोकवत्त्वत्तो न बिभेति कश्चित्तत्र । किंचोभे अशनायापिपासे तीर्त्वाऽतिक्रम्य शोकमतीत्य गच्छतीति शोकातिगः सन्मानसेन दुःखेन वर्जितो मोदते हृष्यति स्वर्गलोके दिव्ये ॥

स त्वमग्निꣳ स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तꣳ श्रद्दधानाय मह्यम् ।
स्वर्गलोका अमृतत्वं भजन्त एतद् द्वितीयेन वृणे वरेण ॥१३॥

एवंगुणविशिष्टस्य स्वर्गलोकस्य प्राप्तिसाधनभूतं स्वर्ग्यं अग्निं स त्वं मृत्युरध्येषि स्मरसि जानासीत्यर्थ । हे मृत्यो यतस्तं प्रब्रूहि कथय श्रद्दधानाय श्रद्धावते मह्यं स्वर्गार्थिने । येनाग्निना चितेन स्वर्गलोकः स्वर्गो लोको येषां ते स्वर्गलोका यजमाना अमृतत्वममरणतां देवत्वं भजन्ते प्राप्नुवन्ति तदेतदग्निविज्ञानं द्वितीयेन वरेण वृणे ॥

प्र ते ब्रवीमि तदु मे निबोध स्वर्ग्यमग्निं नचिकेतः प्रजानन् ।
अनंतलोकाप्तिमथो प्रतिष्ठां विद्धि त्वमेतं निहितं गुहायाम् ॥१४॥

मृत्योः प्रतिज्ञा इयं—प्र ते तुभ्यं प्रब्रवीमि । यत्त्वया प्रार्थितं तदु मे मम वचसो निबोध बुध्यस्वैकाग्रमना· सन स्वर्ग्यं स्वर्गाय हितं स्वर्गसाधनमग्निं हे नचिकेतः प्रजानन्विज्ञातवान्सन्नहं इत्यर्थ । प्रब्रवीमि तन्निबोधेति च शिष्यबुद्धिसमाधानार्थं वचनम् । अधुनाग्निं स्तौति— अनंतं लोकाप्तिं स्वर्गलोकफलप्राप्तिसाधनमित्येतत् । अथो अपि प्रतिष्ठामाश्रयं जगतो विराड्रूपेण तमेतमग्निं मयोच्यमानं विद्धि विजानीहि त्वं निहितं स्थितं गुहायां विदुषां बुद्धौ निविष्टमित्यर्थः ॥

लोकादिमग्निं तमुवाच तस्मै या इष्टका यावतीर्वा यथा वा ।
स चापि तत्प्रत्यवदद्यथोक्तमथास्य मृत्युः पुनरेवाह तुष्टः ॥१५॥

इदं श्रुतेर्वचनम् । लोकादि लोकानामादि प्रथमशरीरित्वादग्निं तं प्रकृतं नाचिकेतसा प्रार्थितमुवाचोक्तवान्मृत्युस्तस्मै नाचिकेतसे । किंच या इष्टकाश्चितव्याः स्वरूपेण, यावतीर्वा संख्यया, यथा वा चीयतेऽग्निर्येन प्रकारेण सर्वमेतदुक्तवानित्यर्थः । स चापि नाचिकेतास्तन्मृत्युनोक्तं प्रत्यवदत यथावत्प्रत्ययेनावदत्प्रत्युच्चारितवान । अथ अस्य प्रत्युच्चारणेन तुष्टः सन्मृत्युः पुनरेवाह वरत्रयव्यतिरेकेणान्यं वरं दित्सु ॥

तमब्रवीत्प्रीयमाणो महात्मा वरं तवेहाद्य ददामि भूयः ।
तवैव नाम्ना भवितायमग्निः सृंकां चेमामनेकरूपां गृहाण ॥१६॥

कथं, तं नाचिकेतसमब्रवीत्प्रीयमाणः शिष्यस्य योग्यता पश्यन्प्रीयमाणः प्रीतिमनुभवन्महात्माऽक्षुद्रबुद्धिर्वरं तव चतुर्थमिह प्रीतिनिमित्तमद्यदानीं ददामि भूयः पुनः प्रयच्छामि । तवैव नाचिकेतसो नाम्नाऽभिधानेन प्रसिद्धो भविता मयोच्यमानोऽयमग्निः । किंच सृंका शब्दवता रत्नमयी मालामिमामनेकरूपां विचित्रां गृहाण स्वीकुरु । यद्वा, सृंकामकुत्सितां गतिं कर्ममयीं गृहाण । अन्यदपि कर्मविज्ञानमनेकफलहेतुत्वात्स्वीकुर्वित्यर्थः ॥ पुनरपि कर्मस्तुतिमेवाह—

त्रिणाचिकेतस्त्रिभिरेत्य संधिं त्रिकर्मकृत्तरति जन्ममृत्यू ।
ब्रह्मजज्ञं देवमीड्यं विदित्वा निचाय्येमां शान्तिमत्यंतमेति ॥१७॥

त्रिणाचिकेतः त्रिःकृत्वो नाचिकेतोऽग्निश्चितो येन स त्रिणाचिकेतस्तद्विज्ञानतदध्ययनतदनुष्ठानवान्वा । त्रिभिर्मातृपित्राचार्यैरेत्य प्राप्य संधिं संधानं संबंधं मात्राद्यनुशासनं यथावत्प्राप्येत्येतत् । तद्धि प्रामाण्यकारणं श्रुत्यंतरादवगम्यते 'यथा मातृमान्पितृमान्' इत्यादेः । वेदस्मृतिशिष्टैर्वा प्रत्यक्षानुमानागमैर्वा । तेभ्यो हि विशुद्धिः प्रत्यक्षा । त्रिकर्मकृत इज्याध्ययनदानानां कर्ता तरति अतिक्रामति जन्ममृत्यू । किंच ब्रह्मजज्ञं ब्रह्मणो हिरण्यगर्भाज्जातो ब्रह्मजः, ब्रह्मजश्चासौ ज्ञश्चेति ब्रह्मजज्ञः सर्वज्ञो ह्यसौ । तं देवं द्योतनाज्ज्ञानादिगुणवन्तमीड्यं स्तुत्यं विदित्वा शास्त्रतो, निचाय्य दृष्ट्वा चात्मभावेनेमां स्वबुद्धिप्रत्यक्षां शान्तिमुपरतिमत्यंतमत्यंतिकीमेति । वैराजं पदं ज्ञानकर्मसमुच्चयानुष्ठानेन प्राप्नोतीत्यर्थः ॥ इदानीमग्निविज्ञानचयनफलमुपसंहरति प्रकरणं च—

त्रिणाचिकेतस्त्रयमेतद्विदित्वा य एवं विद्वाꣳश्चिनुते नाचिकेतम् ।
स मृत्युपाशान्पुरतः प्रणोद्य शोकातिगो मोदते स्वर्गलोके ॥१८॥

त्रिणाचिकेतस्त्रयं यथोक्तं 'या इष्टका यावतीर्वा यथा वा' इत्येतद्विदित्वा अवगम्य यश्चैवमात्मरूपेणाग्नि विद्वाग्निनुते निर्वर्तयति नाचिकेतमग्नि क्रतुं, स मृत्युपाशानधर्मज्ञानरागद्वेषादिलक्षणान्पुरतोऽग्रतः पूर्वमेव शरीरपातादित्यर्थः प्रणोद्यापहाय शोकातिगो मानमदं खैर्वर्जित इत्येतन मोदते स्वर्गलोके वैराजे विराडात्मस्वरूपप्रतिपत्त्या ॥

एष तेऽग्निर्नचिकेत स्वर्ग्यो यमवृणीथा द्वितीयेन वरेण ।
एतमग्निं तवैव प्रवक्ष्यन्ति जनासस्तृतीयं वरं नचिकेतो वृणीष्व ॥१९॥

एष ते तुभ्यमग्निर्वरो हे नाचिकेतः, स्वर्ग्यः स्वर्गसाधनो यमग्नि वरं अवृणीथाः प्रार्थितवानसि द्वितीयेन वरेण, सोऽग्निर्वरो दत्त इत्युक्तोपसंहार । किंचैतमग्नि तवैव नाम्ना प्रवक्ष्यन्ति जनासो जना इत्येतत् । एष वरो दत्तो मया चतुर्थस्तुष्टेन । तृतीयं वरं नाचिकेतो वृणीष्व । तस्मिन्ह्यदत्ते ऋणवानेवाहमित्यभिप्रायः ॥

एतावद्धयतिक्रान्तेन विधिप्रतिषेधार्थेन मंत्रब्राह्मणेनावगन्तव्यं यद्वरद्वयसूचितं वस्तु नात्मतत्त्वविषयया याथात्म्यविज्ञानम् । अतो विधिप्रतिषेधार्थविषयस्य आत्मनि क्रियाकारकफलाध्यारोपणलक्षणस्य स्वाभाविकस्याज्ञानस्य संसारबीजस्य निवृत्त्यर्थं तद्विपरीतब्रह्मात्मैकत्वविज्ञानं क्रियाकारकफलाध्यारोपणलक्षणशून्यं आत्यंतिकनि श्रेयसप्रयोजनं वक्तव्यमित्युत्तरो ग्रंथ आरभ्यते । तमेतमर्थं द्वितीयवरप्राप्त्याऽप्यकृतार्थत्वं तृतीयवरगोचरमात्मज्ञानमंतरेण इत्याख्यायिकया प्रपंचयति—

येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके ।
एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः ॥२०॥

यतः पूर्वस्मात्कर्मगोचरात्साध्यसाधनलक्षणादनित्यादुपरक्तस्यात्मज्ञानेऽधिकार इति तन्निदर्शं पुत्रान्पौत्रान्वृणीष्वेत्यादिना प्रलोभनं क्रियते । नाचिकेता उवाच 'तृतीयं वरं नाचिकेतो वृणीष्व' इत्युक्तः सन्—येयं विचिकित्सा संशयः प्रेते मृते मनुष्ये, अस्तीत्येकेऽस्ति शरीरेंद्रियमनोबुद्धिव्यतिरिक्तो देहान्तरसंबंध्यात्मेत्येके मन्यन्ते, नायमस्तीति चैके, नायमेवंविधोऽस्तीति चैके । अतश्चास्माकं न प्रत्यक्षेण नापि वानुमानेन निर्णयविज्ञानम् । एतद्विज्ञानार्थानो हि परः पुरुषार्थ इत्यत एतद्विद्यां विजानीयामहमनुशिष्टो ज्ञापितस्त्वया । वराणामेष वरस्तृतीयोऽवशिष्टः ॥

किमयमेकान्ततो निःश्रेयससाधनात्मज्ञानार्हो न वा इत्येतत्परीक्षणार्थमाह—

देवैरत्रापि विचिकित्सितं पुरा न हि सुविज्ञेयमणुरेष धर्मः ।
अन्यं वरं नचिकेतो वृणीष्व मा मोपरोत्सीरति मा सृजैनम् ॥२१॥

देवैरप्यत्र एतस्मिन्वस्तुनि विचिकित्सितं संशयितं पुरा पूर्वम् । न हि सुविज्ञेयं सुष्ठु ज्ञेयं, असकृन श्रुतमपि प्राकृतैर्जनैः यतोऽणुः सूक्ष्म एष आत्माख्यो धर्मः । अतोऽन्यमसंदिग्धफलं वरं नचिकेतो वृणीष्व, मा मोपरोत्सीरुपरोधं मा कार्षीः अधमर्णमिवोत्तमर्णः । अतिसृज विमुंचैनं वरं मा मां प्रति ॥ एवमुक्तो नचिकेता आह—

देवैरत्रापि विचिकित्सितं किल त्वं च मृत्यो यन्न सुज्ञेयमात्थ ।
वक्ता चास्य त्वादृगन्यो न लभ्यो नान्यो वरस्तुल्य एतस्य कश्चित् ॥२२॥

देवैरत्राप्येतस्मिन्वस्तुनि विचिकित्सितं किलेति भवत एव नः श्रुतम् । त्वं च मृत्यो यद्यस्मान्न सुज्ञेयमात्मतत्त्वमात्थ कथयसि । अतः पंडितैरप्यवदनीयत्वाद्वक्ता चास्य धर्मस्य त्वादृक्त्वत्तुल्योऽन्य पंडितश्च न लभ्योऽन्विष्यमाणोऽपि । अयं तु वरो निःश्रेयसप्राप्तिहेतुः । अतो नान्यो वरस्तुल्य सदृशोऽस्त्येतस्य कश्चिदपि, अनित्यफलत्वादन्यस्य सर्वस्यैवेत्यभिप्रायः ॥ एवमुक्तोऽपि पुनः प्रलोभयन्नुवाच मृत्युः—

शतायुषः पुत्रपौत्रान्वृणीष्व बहून्पशून्हस्तिहिरण्यमश्वान् ।
भूमेर्महदायतनं वृणीष्व स्वयं च जीव शरदो यावदिच्छसि ॥२३॥

शतायुषः शतं वर्षाण्यायुर्येषां तान शतायुषः पुत्रपौत्रान्वृणीष्व । किंच गवादिलक्षणान्बहून्पशून्, हस्तिहिरण्यं हस्तां च हिरण्यं च हस्तिहिरण्यं, अश्वांश्च । किंच भूमेः पृथिव्या महद्विस्तीर्णमायतनमाश्रयं मंडलं साम्राज्यं वृणीष्व । किंच सर्वमप्येतदनर्थकं स्वयं चेदल्पायुरित्यत आह— स्वयं च त्वं जीव धारय शरीरं समग्रेंद्रियकलापं शरदो वर्षाणि यावदिच्छसि जीवितुम् ॥

एतत्तुल्यं यदि मन्यसे वरं वृणीष्व वित्तं चिरजीविकां च ।
महाभूमौ नचिकेतस्त्वमेधि कामानां त्वा कामभाजं करोमि ॥२४॥

एतत्तुल्यमेतेन यथोपदिष्टेन सदृशमन्यमपि यदि मन्यसे वरं तमपि वृणीष्व । किंच वित्तं प्रभूतं हिरण्यरत्नादि चिरजीविका च सह वित्तेन वृणीष्वेत्येतत् । किं बहुना, महाभूमौ महत्यां भूमौ राजा नचिकेतस्त्वमेधि भव । किंचान्यत् कामाना दिव्यानां मानुषाणां च त्वा त्वां कामभाजं कामभागिनं कामार्हं करोमि, सत्यसंकल्पो ह्यहं देवः ॥

ये ये कामा दुर्लभा मर्त्यलोके सर्वान्कामाꣳश्छंदतः प्रार्थयस्व ।
इमा रामाः सरथाः सतूर्या न हीदृशा लंभनीया मनुष्यैः ।
आभिर्मत्प्रत्ताभि परिचारयस्व नचिकेतो मरणं मानुप्राक्षीः ॥२५॥

ये ये कामाः प्रार्थनीया दुर्लभाश्च मर्त्यलोके सर्वास्तान्कामाꣳश्छंदत इच्छातः प्रार्थयस्व । किंचेमा दिव्या अप्सरसो, रमयन्ति पुरुषानिति रामाः, सह रथैर्वर्तन्त इति सरथा, सतूर्याः सवादित्रा, ताश्च न हि लंभनीयाः प्रापणीया ईदृशा एवंविधा मनुष्यैर्मर्त्यैरस्मदादिप्रसादमंतरेण । आभिर्मत्प्रत्ताभिर्मया प्रदत्ताभिः परिचारिणीभिः परिचारयस्वात्मानं, पादप्रक्षालनादिशुश्रूषां कारयात्मन इत्यर्थः । नचिकेतो, मरणं मरणसंबद्धं प्रश्नं प्रेतेऽस्ति नास्तीति काकदंतपरीक्षारूपं मानुप्राक्षीः मैवं प्रष्टुमर्हसि ॥

एवं प्रलोभ्यमानोऽपि नचिकेता महाहृदवदक्षोभ्य आह—

श्वोभावा मर्त्यस्य यदंतकैतत्सर्वेंद्रियाणां जरयन्ति तेजः ।
अपि सर्वं जीवितमल्पमेव तवैव वाहास्तव नृत्यगीते ॥२६॥

श्वो भविष्यन्ति न भविष्यन्ति वेति संदिह्यमान एव येषां भावो भवनं त्वयोपन्यस्ताना भोगाना ते श्वोभावाः । किंच मर्त्यस्य मनुष्यस्यान्तक हे मृत्यो, यदेतत्सर्वेंद्रियाणां तेजस्तज्जरयन्त्यपक्षयन्ति अप्सरःप्रभृतयो भोगा अनर्थायैवैते धर्मवीर्यप्रज्ञातेजोयश प्रभृतीना क्षपयितृत्वात् । या चापि दीर्घजीविका त्वं दित्सासि तत्रापि शृणु । सर्वं यद्ब्रह्मणोऽपि जीवितमायुरल्पमेव, किमुतास्मदादिदीर्घजीविका । अतस्तवैव तिष्ठन्तु वाहा रथादयस्तथा तव नृत्यगीते च ॥

न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वित्तमद्राक्ष्म चेत्त्वा ।
जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयः स एव ॥२७॥

किंच न प्रभूतेन वित्तेन तर्पणीयो मनुष्यः । न हि लोके वित्तलाभः कस्यचित्तृप्तिकरो दृष्टः । यदि नामास्माकं वित्ततृष्णा स्याल्लप्स्यामहे प्राप्स्यामहे वित्तमद्राक्ष्म दृष्टवन्तो वयं चेत्त्वा त्वाम् । जीवितमपि तथैव, जीविष्यामो यावद्याम्ये पदे त्वमीशिष्यसीशिष्यसे प्रभुः स्याः । कथं हि मर्त्यस्त्वया समेत्याल्पधनायुर्भवेत् । वरस्तु मे वरणीय स एव यदात्मविज्ञानम् ॥

अजीर्यताममृतानामुपेत्य जीर्यन्मर्त्यः क्वधःस्थः प्रजानन् ।
अभिध्यायन्वर्णरतिप्रमोदानतिदीर्घे जीविते को रमेत ॥२८॥

यतश्च अजीर्यतां वयोहानिमप्राप्नुवतामसृतानां सकाशमुपेत्योपगम्यात्मन उत्कृष्टं प्रयोजनान्तरं प्राप्तव्यं तेभ्य प्रजानन्नुपलभमान स्वयं तु जीर्यन्मर्त्यो जरामरणवान्क्वधःस्थ कु पृथिवां अधश्चासावान्तरिक्षादिलोकापेक्षया तस्यां तिष्ठतीति क्वधःस्थः सन्कथमेवमविवेकिभिः प्रार्थनीयं पुत्रवित्तायस्थिरं वर्णाते । 'क्व तदाम्थ·' इति वा पाठान्तरम् । अस्मिन्पक्षे चैवमक्षरयोजना—तेषु पुत्रादिष्वास्था स्थिति. तात्पर्येण वर्तनं यस्य स तदास्थ., ततोऽधिकतरं पुरुषार्थं दुष्प्रापमपि प्रापिपयिषुः क्व तदास्थो भवत्? न कश्चित्तदसारज्ञस्तदर्था स्यादित्यर्थः । सर्वो ह्युपर्युपर्येव बुभूषति श्लोकस्तस्मान्न पुत्रवित्तादिलाभे. प्रलोभ्योऽहम । किचाप्सर प्रमुखान्वर्णरतिप्रमोदाननवस्थितरूपतयाभिध्यायन्निरूपयन्यथावदतिदीर्घे जीविते को विवेकी रमेत ॥

यस्मिन्निदं विचिकित्सन्ति मृत्यो यत्सांपराये महति ब्रूहि नस्तत् ।
योऽयं वरो गूढमनुप्रविष्टो नान्यं तस्मान्नचिकेता वृणीते ॥२९॥

इति काठकोपनिषदि प्रथमाध्याये प्रथमा वल्ली ॥

अतो विहायानित्यैः कामै प्रलोभनं यन्मया प्रार्थितं यस्मिन्प्रेते इदं विचिकित्सनं विचिकित्सन्त्यस्ति नास्तीत्येवंप्रकारं, हे मृत्यो, सापराये परलोकविषये महति महत्प्रयोजननिमित्ते आत्मनो निर्णयविज्ञानं यत्तत ब्रूहि कथय नोऽस्मभ्यम् । किं बहुना । योऽयं प्रकृत आत्मविषयो वरो गूढं गहनं दुर्विवेचनं प्राप्तोऽनुप्रविष्ट·, तस्माद्वरादन्यमविवेकिभि· प्रार्थनीयमनित्यविषयं वरं नचिकेता न वृणीते मनसार्पाति श्रुतेर्वचनमिति ॥

अथ द्वितीया वल्ली ।

परीक्ष्य शिष्यं विद्यायोग्यता चावगम्याह—

अन्यच्छ्रेयोऽन्यदुतैव प्रेयस्ते उभे नानार्थे पुरुषꣳ सिनीतः ।
तयोः श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते ॥१॥

अन्यत्पृथगेव श्रेयो निःश्रेयसं तथान्यदुतैव अपि च प्रेयः प्रियतरमपि ते प्रेयःश्रेयसी उभे नानार्थे भिन्नप्रयोजने सती पुरुषमधिकृतं वर्णाश्रमादिविशिष्टं सिनीतो बध्नीतः ताभ्यां विद्याविद्याभ्यामात्मकर्तव्यतया प्रयुज्यते सर्वः पुरुषः ।

श्रेय प्रेयसोर्ह्यभ्युदयामृतत्वार्थौ पुरुषः प्रवर्तते । अत. श्रेय·प्रेयःप्रयोजनकर्तव्यतया ताभ्या बद्ध इत्युच्यते सर्वः पुरुष· । ते यद्यप्येकैकपुरुषार्थसंबंधिनौ विद्याविद्यारूपत्वाद्विरुद्धे इत्यन्यतरापरित्यागेनैकेन पुरुषेण सहानुष्ठातुमशक्यत्वात्तयोर्हित्वा अविद्यारूपं प्रेयः, श्रेय एव केवलमाददानस्योपादानं कुर्वत· साधु शोभनं शिवं भवति । यस्त्वदूरदर्शी विमूढो हीयते वियुज्यतेऽर्थात्पुरुषार्थात्पारमार्थिकात्प्रयोजनान्नित्यात्प्रच्यवते इत्यर्थ । कोऽसौ य उ प्रेयो वृणीते उपादत्ते इत्येतत ॥

श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ संपरीत्य विविनक्ति धीर. ।
श्रेयो हि धीरोऽभि प्रेयसो वृणीते प्रेयो मंदो योगक्षेमात् वृणीते ॥२॥

यद्युभे अपि कर्तु स्वायत्ते पुरुषेण, किमर्थ प्रेय एवाऽऽदत्ते बाहुल्येन लोक इत्युच्यते– सत्यं स्वायत्ते, तथापि साधनत फलतश्च मंदबुद्धीनां दुर्विवेकरूपे सती व्यामिश्रीभूते इव मनुष्यं पुरुषं एतः प्राप्नुत श्रेयश्च प्रेयश्च । अतो हंस इवाम्भस पय , तौ श्रेय प्रेय पदार्थौ संपरीत्य सम्यक्परिगम्य मनसालोच्य गुरुलाघवं विविनक्ति पृथक्करोति धीरो धीमान । विविच्य च श्रेयो हि श्रेय एवाभिवृणीते प्रेयसोऽभ्यर्हितत्वात् श्रेयस । कोऽसौ धीर. । यस्तु मंदोऽल्पबुद्धिः स सदसद्विवेकासामर्थ्यात् योगक्षेमायोगक्षेमनिमित्तं शरीरायुपचयरक्षणनिमित्तमित्येतत् प्रेय पशुपुत्रादिलक्षणं वृणीते ॥

स त्वं प्रियान्प्रियरूपाश्च कामानभिध्यायन्नचिकेतोऽत्यस्राक्षीः।
नैतां सृंकां वित्तमयीमवाप्तो यस्यां मज्जन्ति बहवो मनुष्या ॥३॥

स त्वं पुन पुन मया प्रलोभ्यमानोऽपि प्रियान्पुत्रादीन्प्रियरूपाश्चाप्सर.-प्रभृतिलक्षणान्कामानभिध्यायंश्चिंतयंस्तेषामनित्यत्वासारत्वादिदोषान् हे नचिकेतोऽत्यस्राक्षीरतिसृष्टवान्परित्यक्तवानस्यहो बुद्धिमत्ता तव । नैतामवाप्तवानसि सृंकां सृति कुत्सितां मूढजनप्रवृत्ता वित्तमयी धनप्रायाम् । यस्यां सृतौ मज्जन्ति सीदन्ति बहवोऽनेके मूढा मनुष्या. ॥

दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता ।
विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवोऽलोलुपन्त ॥४॥

'तयो. श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते' इत्युक्तं तत्कस्मात् ? यतो दूरं दूरेण महताऽन्तरेणैते विपरीते अन्योन्यव्यावृत्तरूपे विवेकाविवेकात्मकत्वात्तमःप्रकाशाविव विषूची विप्रकृष्टौ नानागती भिन्नफले

संसारमोक्षहेतुत्वेनेत्येतत् । के ते इत्युच्यते— या चाविद्या प्रेयोविषया विद्येति च श्रेयोविषया ज्ञाता निर्ज्ञातावगता पंडितैः तत्र विद्यार्थिनसि विद्यार्थिनं नचिकेतसं त्वामहं मन्ये । कस्मात् यस्मादविद्वद्बुद्धिप्रलोभिनः कामा अप्सरःप्रभृतयो बहवोऽपि त्वा त्वां नालोलुपन्त न विच्छेदं कृतवन्त. श्रेयोमार्गात् आत्मोपभोगाभिवाञ्छासंपादनेन । अतो विद्यार्थिनं श्रेयोभाजनं मन्ये इत्यभिप्रायः ॥

अविद्यायामंतरे वर्तमाना. स्वयं धीराः पंडितंमन्यमानाः ।
दंद्रम्यमाणा परियन्ति मूढा अंधेनैव नीयमाना यथांधाः ॥५॥

ये तु संसारभाजो जना अविद्यायामंतरे मध्ये घनीभूते इव तमसि वर्तमाना वेष्ठ्यमानाः पुत्रपश्वादितृष्णापाशशतै·, स्वयं धीरा· प्रज्ञावन्तः पंडिताः शास्त्रकुशलाश्चेति मन्यमानास्ते दंद्रम्यमाणा अत्यर्थं कुटिलामनेकरूपां गति गच्छन्तो जरामरणरोगादिदुःखैः परियन्ति परिगच्छन्ति मूढा अविवेकिनः अंधेनैव दृष्टिविहीनेनैव नीयमाना विषमे पथि यथा बहवोऽन्धा महान्तमनर्थं ऋच्छन्ति तद्वत ॥

न सांपराय प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम् ।
अयं लोको नास्ति पर इति मानी पुन· पुनर्वशमापद्यते मे ॥६॥

अत एव मूढत्वान्न सापरायः प्रतिभाति । संपेरयते इति संपरायः परलोकस्तत्प्राप्तिप्रयोजनः साधनविशेषः शास्त्रीय· सापराय· स च बालमविवेकिनं प्रति न प्रतिभाति न प्रकाशते नोपतिष्ठते इत्येतत । प्रमाद्यन्तं प्रमादं कुर्वन्तं पुत्रपश्वादिप्रयोजनेष्वासक्तमनसं तथा वित्तमोहेन वित्तनिमित्तेनाविवेकेन मूढं तमसाच्छन्नम् । स त्वयमेव लोको योऽयं दृश्यमानः स्त्र्यन्नपानादिविशिष्टो नास्ति परोऽदृष्टो लोक इत्येवं मननशीलो मानी पुनः पुनर्जनित्वा वशं मेऽधीनतामापद्यते मृत्योर्मम जननमरणादिलक्षणदुःखप्रबंधारूढ एव भवतीत्यर्थ. । प्रायेण ह्येवंविध एव लोकः ॥

श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः ।
आश्चर्यो वक्ता कुशलोऽस्य लब्धाऽऽश्चर्यो ज्ञाता कुशलानुशिष्टः ॥७॥

यस्तु श्रेयोर्थी सहस्रेषु कश्चिदेवात्मविद्भवति त्वद्विधो यस्माच्छ्रवणायापि श्रवणार्थ श्रोतुमपि यो न लभ्य आत्मा बहुभिरनेकैः शृण्वन्तोऽपि बहवोऽनेकेऽन्ये परमात्मानं न विद्युर्न विदन्त्यभागिनोऽसंस्कृतात्मानो न विजानीयुः । किंच

अस्य वक्ताप्याश्चर्योऽद्भुतवदेवानेकेषु कश्चिदेव भवति । तथा श्रुत्वाप्यस्यात्मनः कुशलो निपुण एवानेकेषु लब्धा कश्चिदेव भवति । यस्मादाश्चर्यो ज्ञाता कश्चिदेव कुशलानुशिष्टः कुशलेन निपुणेनाचार्येणानुशिष्टः सन् ॥

न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिंत्यमानः ।
अनन्यप्रोक्ते गतिरत्र नास्ति अणीयान्ह्यतर्क्यमणुप्रमाणात् ॥८॥

कस्मात् ? नहि नरेण मनुष्येणावरेण प्रोक्तोऽवरेण हीनेन प्रकृतबुद्धिनेत्येतदुक्तं एष आत्मा यं त्वं मा पृच्छसि । न हि सुष्ठु सम्यग्विज्ञेयो विज्ञातुं शक्यो यस्माद्बहुधाऽस्ति नास्ति कर्ताऽकर्ता शुद्धोऽशुद्ध इत्याद्यनेकधा चिन्त्यमानो वादिभिः । कथं पुनः सुविज्ञेय इत्युच्यते—अनन्यप्रोक्तेऽनन्येनापृथग्दर्शिनाचार्येण प्रतिपाद्यब्रह्मात्मभूतेन प्रोक्ते उक्ते आत्मनि गतिरनेकधास्तिनास्तीत्यादिलक्षणा चिंता गतिरत्रास्मिन्नात्मनि नास्ति न विद्यते सर्वविकल्पगतिप्रत्यस्तमितत्वादात्मनः । अथवा स्वात्मभूतेऽनन्यस्मिन्नात्मनि प्रोक्तेऽनन्यप्रोक्ते गतिरत्रान्यावगतिर्नास्ति ज्ञेयस्यान्यस्याभावात । ज्ञानस्य ह्येषा परा निष्ठा यदात्मैकत्वविज्ञानम् । अतोऽवगंतव्याभावान्न गतिरत्रावशिष्यते, संसारगतिर्वात्र नास्त्यनन्ये आत्मनि प्रोक्ते नातरीयकत्वात्तद्विज्ञानफलस्य मोक्षस्य । अथवा प्रोच्यमानब्रह्मात्मभूतेनाचार्येण अनन्यतया प्रोक्त आत्मन्यगतिरनवबोधोऽपरिज्ञानमत्र नास्ति । भवत्येवावगतिस्तद्विषया श्रोतुस्तदन्योऽहमित्याचार्यस्येवेत्यर्थः । एवं सुविज्ञेय आत्मागमवताचार्येणानन्यतया प्रोक्तः । इतरथा ह्यणीयानणुतरोऽणुप्रमाणादपि संपद्यते आत्मा । अतर्क्यमतर्क्यं स्वबुद्ध्यभ्यूहेन केवलेन तर्केण । तर्क्यमाणे अणुपरिमाणे केनाचित्स्थापित आत्मनि ततो अणुतरमन्योऽभ्यूहति, ततोऽप्यन्यो अणुतरं, इति न हि तर्कस्य निष्ठा क्वचिद्विद्यते ॥

नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ ।
यां त्वमापः सत्यधृतिर्बतासि त्वादृङ्नो भूयान्नचिकेतः प्रष्टा ॥९॥

अतोऽनन्यप्रोक्त आत्मन्युत्पन्ना येयमागमप्रतिपाद्यात्ममतिः नैषा तर्केण स्वबुद्ध्याभ्यूहमात्रेण आपनेया न प्रापणीयेत्यर्थः । नापनेतव्या वा, न हातव्या । तार्किको ह्यनागमज्ञः स्वबुद्धिपरिकल्पितं यत्किंचिदेव कल्पयति । अत एव च येयमागमप्रभूता मतिः तार्किकादन्येनैवागमाभिज्ञेनाचार्येणैव प्रोक्ता सती सुज्ञानाय भवति हे प्रेष्ठ प्रियतम । का पुनः सा तर्कागम्या मतिरित्युच्यते । यां त्वं

मति मद्दरप्रदानेनाप· प्राप्तवानसि । सत्या अवितथाविषया धृतिर्यस्य तव स त्वं सत्यधृति । वतार्सात्यनुकंपयत्राह मृत्युर्नचिकेतसं वक्ष्यमाणविज्ञानस्तुतये । त्वादृक्त्वत्तुल्यो नोऽस्मभ्यं भूयाद्भवताद्भवत्वन्यः पुत्र शिष्यो वा प्रष्टा । कीदृक ? यादृक्त्वं हे नचिकेत प्रष्टा ॥

जानाम्यहꣳ शेवधिरित्यनित्यं न ह्यध्रुवै· प्राप्यते हि ध्रुवं तत् ।
ततो मया नाचिकेतश्चितोऽग्निरनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यम् ॥१०॥

पुनरपि तुष्ट आह— जानाम्यहं शेवधिर्निधि कर्मफललक्षणो निधिरिव प्राप्यते इति । अमावानित्यमनित्य इति जानामि । न हि यस्मादनित्यैरध्रुवैर्यन्नित्यं ध्रुवं तत्प्राप्यते परमात्मास्यः शेवधिः । यस्त्वनित्यसुखात्मकः शेवधि स एव अनित्यैर्द्रव्यै प्राप्यते हि यत , ततस्तस्मान्मया जानतापि नित्यमनित्यसाधनै· प्राप्यत इति नाचिकेताश्चितोऽग्निरनित्यैर्द्रव्यै पश्वादिभि स्वर्गसुखसाधनभूतोऽग्निः निर्वार्तित इत्यर्थ । तेनाहमधिकारापन्नो नित्यं याग्यं स्थानं स्वर्गाख्यं नित्यं आपेक्षिकं प्राप्तवानस्मि ॥

कामस्याप्तिं जगतः प्रतिष्ठां क्रतोरनंत्यमभयस्य पारम् ।
स्तोममहदुरुगायं प्रतिष्ठां दृष्ट्वा धृत्या धीरो नाचिकेतोऽत्यस्राक्षी ॥११॥

त्वं तु कामस्याप्तिं समाप्तिं, अत्रैव हि सर्वे कामाः पर्यवसाना·, जगतः साध्यात्माधिभूताधिदैवादे प्रतिष्ठामाश्रयं सर्वात्मकत्वात , क्रतो उपासनायाः फलं हैरण्यगर्भं पदं अनंत्यमानंत्यम् । अभयस्य च पारं परां निष्ठाम् । स्तोमं स्तुत्यं महदणिमाद्यैश्वर्याद्यनेकगुणसंहतं, स्तोमं च तन्महच्च निरतिशयत्वात्स्तोममहत् । उरुगायं विस्तीर्णा गतिम् । प्रतिष्ठा स्थितिमात्मनोऽनुत्तमामपि दृष्ट्वा धृत्या धैर्येण धीरो धीमान्नचिकेतोऽत्यस्राक्षीः परमेवाकाक्षन्नतिसृष्टवानसि सर्वमेतत्संसारभोग-जातम । अहो वतानुत्तमगुणोऽसि ॥

तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् ।
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ॥ १२ ॥

यं त्वं ज्ञातुमिच्छस्यात्मानं तं दुर्दर्शं दु खेन दर्शनमस्येति दुर्दर्शोऽतिसूक्ष्म-त्वात तं गूढं गहनं, अनुप्रविष्टं प्राकृतविषयविकारविज्ञानै· प्रच्छन्नमित्येतत् । गुहाहितं गुहाया बुद्धौ स्थितं तत्रोपलभ्यमानत्वात् । गह्वरेष्ठं गह्वरे विषमेऽनेकानर्थ-संकटे तिष्ठतीति गह्वरेष्ठम् । यत एवं गूढमनुप्रविष्टो गुहाहितश्चातो गह्वरेष्ठः अतो

दुर्दर्शं । तं पुराणं पुरातनमध्यात्मयोगाधिगमेन विषयेभ्यः प्रतिसंहृत्य चेतस आत्मनि समाधानमध्यात्मयोगस्तस्याधिगमस्तेन मत्वा देवमात्मानं धीरो हर्षशोकौ आत्मन उत्कर्षापकर्षयोरभावाज्जहाति ॥

एतच्छ्रुत्वा संपरिगृह्य मर्त्यः प्रवृह्य धर्म्यमणुमेतमाप्य ।

स मोदते मोदनीयꣳ हि लब्ध्वा विवृतꣳ सद्म नचिकेतसं मन्ये ॥ १३ ॥

किंच, एतदात्मतत्त्वं यदहं वक्ष्यामि तच्छ्रुत्वाचार्यप्रसादात्सम्यगात्मभावेन परिगृह्योपादाय मर्त्यो मरणधर्मा धर्मादनपेतं धर्म्यं प्रवृह्योद्यम्य पृथक्कृत्य शरीरादेरणुं सूक्ष्ममेतमात्मानमाप्य प्राप्य स मर्त्यो विद्वान्मोदते मोदनीयं हि हर्षणीयमात्मानं लब्ध्वा । तदेतदेवंविधं ब्रह्म सद्म भवनं नचिकेतसं त्वा प्रत्यपावृतद्वारं विवृतमभिमुखीभूतं मन्ये, मोक्षार्हं त्वां मन्य इत्यभिप्रायः ॥

अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् ।

अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वद ॥ १४ ॥

एतत् श्रुत्वा नचिकेता पुनराह– यद्यहं योग्य, प्रसन्नश्चासि भगवन्मा प्रति, अन्यत्र धर्माच्छास्त्रीयाद्धर्मानुष्ठानात्तत्फलात्तत्कारकेभ्यश्च पृथग्भूतमित्यर्थः । तथान्यत्राधर्माद्विहिताकरणरूपात्पापात् , तथान्यत्रास्मात्कृताकृतात् । कृतं कार्यमकृतं कारणमस्मादन्यत्र । किंचान्यत्र भूताच्चातिक्रान्तात्कालाद्भव्याच्च भविष्यतश्च तथा वर्तमानात । कालत्रयेण यन्न परिच्छिद्यते इत्यर्थः । यदीदृशं वस्तु सर्वव्यवहारगोचरातीतं पश्यसि जानासि तद्वद मह्यम् ॥

सर्वे वेदा यत्पदमामनन्ति तपाꣳसि सर्वाणि च यद्वदन्ति ।

यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् ॥ १५ ॥

इत्येवं पृष्टवते मृत्युरुवाच पृष्टं वस्तु विशेषणान्तरं च विवक्षन– सर्वे वेदा यत्पदं पदनीयं गमनीयमविभागेनाविरोधेनामनन्ति प्रतिपादयन्ति, तपांसि सर्वाणि च यद्वदन्ति यत्प्राप्त्यर्थानीत्यर्थः । यदिच्छन्तो ब्रह्मचर्यं गुरुकुलवासलक्षणमन्यद्वा ब्रह्मप्राप्त्यर्थं चरन्ति, तत्ते तुभ्यं पदं यज्ज्ञातुमिच्छसि संग्रहेण संक्षेपतो ब्रवीमि, ॐ इत्येतत् । तदेतत्पदं यत् बुभुत्सितं त्वया यदेतदोमित्योंशब्दवाच्यमोंशब्दप्रतीकं च ॥

एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम् ।

एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥१६॥

अत एतद्धयेवाक्षरं ब्रह्मापरं एतद्धयेवाक्षरं परं च । तयोर्हि प्रतीकमेतदक्षरम् । एतद्धयेवाक्षरं ज्ञात्वोपास्य ब्रह्मेति, यो यदिच्छति परमपरं वा तस्य तद्भवति । परं चेज्ज्ञातव्यं अपरं चेत्प्राप्तव्यम् ॥

एतद्ध्यालंबनꣳ श्रेष्ठमेतदालंबनं परम् ।
एतदालंबनं ज्ञात्वा ब्रह्मलोके महीयते ॥१७॥

यत एवमत एव एतदालंबनं ब्रह्मप्राप्त्यालंबनानां श्रेष्ठं प्रशस्यतमम् । एतदालंबनं परमपरं च परापरब्रह्मविषयत्वात् । एतदालंबनं ज्ञात्वा ब्रह्मलोके महीयते । परस्मिन्ब्रह्मण्यपरस्मिंश्च ब्रह्मभूतो ब्रह्मवदुपास्यो भवतीत्यर्थः ॥

'अन्यत्र धर्मात्' [२.१४] इत्यादिना पृष्टस्यात्मनोऽशेषविशेषरहितस्यालंबनत्वेन प्रतीकत्वेन चोंकारो निर्दिष्ट । अपरस्य च ब्रह्मणो मंदमध्यमप्रतिपत्तृन्प्रति ॥ अथेदानीं तस्योंकारालंबनस्यात्मनः साक्षात्स्वरूपनिर्दिधारयिषयेदमुच्यते –

न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित ।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥१८॥

न जायते नोत्पद्यते म्रियते वा न म्रियते चोत्पत्तिमतो वस्तुनोऽनित्यस्यानेका विक्रियास्तासामाद्यंते जन्मविनाशलक्षणे विक्रिये इहात्मनि प्रतिषिध्येते प्रथमं सर्वविक्रियाप्रतिषेधार्थं न जायते म्रियते वेति । विपश्चिन्मेधावी, अविपरिलुप्तचैतन्यस्वभावात् । किंच नायमात्मा कुतश्चित्कारणान्तराद्बभूव न प्रभूतः । अस्माच्चात्मनो न बभूव कश्चिदर्थान्तरभूतः । अतोऽयमात्माऽजो नित्यः शाश्वतो अपक्षयविवर्जितः । यो ह्यशाश्वतः सोऽपक्षीयते, अयं तु शाश्वतोऽत एव पुराणः पुरापि नव एवेति । यो ह्यवयवोपचयद्वारेणाभिनिर्वर्त्यते स इदानीं नवो यथा अंकुरादिस्तद्विपरीतस्त्वात्मा पुराणो वृद्धिविवर्जित इत्यर्थः । यत एवमतो न हन्यते न हिंस्यते हन्यमाने शस्त्रादिभिः शरीरे । तत्स्थोऽप्याकाशवदेव ॥

हन्ता चेन्मन्यते हन्तुꣳ हतश्चेन्मन्यते हतम् ।
उभौ तौ न विजानीतो नायꣳ हन्ति न हन्यते ॥ १९ ॥

एवंभूतमप्यात्मानं शरीरमात्रात्मदृष्टिर्हन्ता चेद्यदि मन्यते चिन्तयति हन्तुं हनिष्याम्येनमिति योऽप्यन्यो हतः सोऽपि चेन्मन्यते हतमात्मानं हतोऽहमिति उभावपि तौ न विजानीतः स्वमात्मानं, यतो नायं हन्ति अविक्रियत्वादात्मनः तथा न हन्यत आकाशवदविक्रियत्वादेव । अतोऽनात्मज्ञविषय एव धर्माधर्मा-

विलक्षणः संसारो न आत्मज्ञस्य श्रुतिप्रामाण्यान्न्यायाच्च धर्माधर्माद्यनुपपत्तेः ॥

अणोरणीयान्महतो महीयानात्मास्य जन्तोर्निहितो गुहायाम् ।
तमक्रतुः पश्यति वीतशोको धातुप्रसादान्महिमानमात्मन ॥२०॥

कथं पुनरात्मानं जानातीत्युच्यते अणो सूक्ष्मादणीयाञ्श्यामाकादेरणुतरः । महतो महत्परिमाणान्महीयान्महत्तर पृथिव्यादे । अणु महद्वा यदस्ति लोके वस्तु तत्तेनैवात्मना नित्येनात्मवत्संभवति । तदात्मना विनिर्मुक्तमसत्संपद्यते । तस्मात असावेवात्माणोरणीयान्महतो महीयान्सर्वनामरूपवस्तूपाधिकत्वात । स चात्मास्य जन्तोर्ब्रह्मादिस्तंबपर्यंतस्य प्राणिजातस्य गुहाया हृदये निहित आत्मभूतः स्थित इत्यर्थ । तमात्मानं दर्शनश्रवणमननविज्ञानलिंगमक्रतुरकामो, दृष्टादृष्टबाह्यविषयोपरतबुद्धिरित्यर्थः । यदा चैवं तदा मनआदीनि करणानि धातवः शरीरस्य धारणात्प्रसादन्तोल्लेपा धातूना प्रसादादात्मनो महिमानं कर्मनिमित्तबुद्धिक्षयरहितं पश्यत्यथमहमस्मीति, साक्षाद्विजानाति । ततो वीतशोको भवति ॥

अन्यथा दुर्विज्ञेयोऽयमात्मा कामिभिः प्राकृतपुरुषैः, यस्मात

आसीनो दूरं व्रजति शयानो याति सर्वतः ।
कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति ॥२१॥

आसीनोऽवस्थितोऽचल एव सन्दूरं व्रजति शयानो याति सर्वतः, एवं असावात्मा देवो मदामदः कामदोऽमदश्च सहर्षोऽहर्षश्च विरुद्धधर्मवानतोऽशक्यत्वाज्ज्ञातुं कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति । अस्मदादेरेव सूक्ष्मबुद्धेः पंडितस्य विज्ञेयोऽयमात्मा स्थितिगतिनित्यानित्यादिविरुद्धानेकधर्मोपाधित्वाद्विरुद्धधर्मवान विश्वरूप इव चिंतामणिवत्कस्यचिदेवभासते । अतो दुर्विज्ञेयत्वं दर्शयति कस्तं मदन्यो ज्ञातुमर्हतीति । करणानामुपशमः शयनं करणजनितस्यैकदेशविज्ञानस्योपशम शयानस्य भवति । यदा चैवं केवलसामान्यविज्ञानत्वात्सर्वतो यातीव यदा विशेषविज्ञानस्थः स्वेन रूपेण स्थित एव सन्मनआदिगतिषु तदुपाधिकत्वान दूरं व्रजतीव । स चेहैव वर्तते ॥

अशरीरꣳ शरीरेष्वनवस्थेष्ववस्थितम् ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥२२॥

तद्विज्ञानाच्च शोकाक्षय इत्यपि दर्शयति— अशरीरः स्वेन रूपेणाकाशकल्प आत्मा तमशरीरं शरीरेषु देवपितृमनुष्यादिशरीरेष्वनवस्थेष्ववस्थितिरहितेषु अ-

नित्येष्ववस्थितं नित्यमविकृतमित्येतत् । महान्तं, महत्त्वेऽपि [illegible] विभुं व्यापिनमात्मानम् । आत्मग्रहणं स्वतोऽनन्यत्वप्रदर्शनार्थम् । आत्मशब्दः प्रत्यगात्मविषय एव मुख्यस्तमीदृशमात्मानं मत्वायमहमिति, धीरो धीमान्न शोचति । न ह्येवंविधस्यात्मविद शोकोपपत्तिः ॥

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥२३॥

यद्यपि दुर्विज्ञेयोऽयमात्मा तथाप्युपायेन सुविज्ञेय एवेत्याह नायमात्मा प्रवचनेनानेकवेदव्याकरणेन लभ्यो ज्ञेयो, नापि मेधया ग्रंथार्थधारणशक्त्या, न बहुना श्रुतेन केवलेन । केन तर्हि लभ्य इत्युच्यते—यमेव स्वात्मानमेष साधको वृणुते प्रार्थयते तेनैवात्मना वरित्रा स्वयमात्मा लभ्यो ज्ञायते इत्येतत् । निष्कामश्चात्मानमेव प्रार्थयते, आत्मनैवात्मा लभ्यत इत्यर्थः । कथं लभ्यत इत्युच्यते—तस्यात्मकामस्यैष आत्मा विवृणुते प्रकाशयति पारमार्थिकीं तनूं स्वां स्वकीयां स्वयाथात्म्यमित्यर्थः ॥

नाविरतो दुश्चरितान्नाशान्तो नासमाहितः ।
नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् ॥२४॥

किंचान्यत् । न दुश्चरितात्प्रतिषिद्धात् श्रुतिस्मृत्यविहितात्पापकर्मणोऽविरतोऽनुपरतः । नापीन्द्रियलौल्यादशान्तोऽनुपरतः । नाप्यसमाहितोऽनेकाग्रमना विक्षिप्तचित्तः । समाहितचित्तोऽपि सन्नसमाधानफलार्थित्वान्नाप्यशान्तमानसो व्यावृत्तचित्तो वा । प्रज्ञानेन ब्रह्मविज्ञानेनैनं प्रकृतमात्मानमाप्नुयात् । यस्तु दुश्चरितादविरतः इंद्रियलौल्याच्च, समाहितचित्तः समाधानफलादप्युपशान्तमानसश्चाचार्यवान्, प्रज्ञानेन यथोक्तमात्मानं प्राप्नोतीत्यर्थः ॥

यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः ।
मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ॥२५॥
इति प्रथमाध्याये द्वितीया वल्ली ॥

यस्त्वेवंभूतो यस्यात्मनो ब्रह्म च क्षत्रं च ब्रह्मक्षत्रे सर्वधर्मविधारके अपि सर्वत्राणभूते उभे ओदनोऽशनं भवतः स्याताम् । सर्वहरोऽपि मृत्युर्यस्योपसेचनमिवौदनस्य, अशनत्वेऽप्यपर्याप्तः, तं प्राकृतबुद्धिर्यथोक्तसाधनरहितः सन्क इत्था इत्थमेव यथोक्तसाधनवानित्येतदर्थः । वेद विजानाति यत्र स आत्मेति ॥

तृतीया वल्ली ।

ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे ।
छायातपौ ब्रह्मविदो वदन्ति पंचाग्नयो ये च त्रिणाचिकेता ॥१॥

ऋतं पिबन्तावित्यस्या वल्ल्याः संबंध । विद्याविद्ये नाना विरुद्धफले इत्युपन्यस्ते, न तु सफले ते यथावन्निर्णीते । तन्निर्णयार्था रथरूपककल्पना, तथा च प्रतिपत्तिसौकर्यम् । एवं च प्राप्तृप्राप्यगन्तृगन्तव्याविवेकार्थरथरूपकद्वारा द्वावात्मानावुपन्यस्येते— ऋतं सत्यमवश्यंभावित्वात्कर्मफलं पिबन्तौ । एकस्तत्र कर्मफलं पिबति भुंक्ते नेतरस्तथापि पातृसंबंधात्पिबन्तावित्युच्यते च्छत्रिन्यायेन । सुकृतस्य स्वयंकृतस्य कर्मण ऋतमिति पूर्वेण संबंध । लोकेऽस्मिञ्शरीरे । गुहा गुहाया बुद्धौ प्रविष्टौ । परमे बाह्यपुरुषाकाशसंस्थानापेक्षया परमम् । परार्धे परस्य ब्रह्मणोऽर्धे स्थाने परार्धे हार्दाकाशम । तस्मिन्हि परं ब्रह्मोपलभ्यते । ततस्तस्मिन्परमे परार्धे हार्दाकाशे प्रविष्टावित्यर्थ । तौ च च्छायातपाविव विलक्षणौ संसारित्वासंसारित्वेन ब्रह्मविदो वदन्ति कथयन्ति । न केवलमकर्मिण एव वदन्ति । पंचाग्नयो गृहस्था. । ये च त्रिणाचिकेता., त्रि.कृत्वो नाचिकेतोऽग्निः चितो यैस्ते त्रिणाचिकेता. ॥

यः सेतुरीजानानामक्षरं ब्रह्म यत्परम् ।
अभयं तितीर्षतां पारं नाचिकेतꣳ शकेमहि ॥२॥

य. सेतुः सेतुरिव सेतुरीजानानां यजमानानां कर्मिणा दुःखसंतरणार्थत्वात । नाचिकेतं नाचिकेतोऽग्निस्तं, वयं ज्ञातुं चेतुं च शकेमहि शक्नुवन्तः । किंच यच्चाभयं भयशून्यं संसारस्य पारं तितीर्षता तर्तुमिच्छता ब्रह्मविदां यत्परमाश्रयमक्षरमात्माख्यं ब्रह्म, तच्च ज्ञातुं शकेमहि । परापरे ब्रह्मणी कर्मिब्रह्मविदाश्रये वेदितव्ये इति वाक्यार्थ. । एतयोरेव ह्युपन्यासः कृत 'ऋतं पिबन्तौ' [३.१] इति ॥

आत्मानꣳ रथिनं विद्धि शरीरꣳ रथमेव तु ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥३॥

तत्र यः उपाधिकृत. संसारी विद्याविद्ययोरधिकृतो मोक्षगमनाय संसारगमनाय च, तस्य तदुभयगमने साधनो रथः कल्प्यते । तत्र आत्मानमृतपं संसारिणं रथिनं रथस्वामिनं विद्धि जानीहि । शरीरं रथमेव तु रथबद्धहयस्थानीयैरिंद्रियैराकृष्यमाणत्वाच्छरीरस्य । बुद्धिं तु अध्यवसायलक्षणां सारथिं विद्धि, बुद्धि-

नेतृप्रधानत्वाच्छरीरस्य सारथिनेतृप्रधान इव रथः। सर्वं हि देहगतं कार्यं बुद्धिकर्तव्यमेव प्रायेण। मनः संकल्पविकल्पादिलक्षणं प्रग्रहं रशनां विद्धि। मनसा हि प्रगृहीतानि श्रोत्रादीनि करणानि प्रवर्तन्ते रशनयेवाश्वाः ॥

इंद्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।
आत्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥४॥

इंद्रियाणि चक्षुरादीनि हयानाहुः रथकल्पनाकुशलाः, शरीरस्याकर्षणसामान्यात्। तेष्वेंद्रियेषु हयत्वेन परिकल्पितेषु गोचरान्मार्गान् रूपादीन्विषयान् विद्धि। आत्मेंद्रियमनोयुक्तं शरीरेंद्रियमनोभिः सहितं संयुक्तमात्मानं भोक्तेति संसारीत्याहुर्मनीषिणो विवेकिनः। न हि केवलस्यात्मनो भोक्तृत्वमस्ति, बुद्ध्याद्युपाधिकृतमेव तस्य भोक्तृत्वम्। तथा च श्रुत्यंतरं केवलस्याभोक्तृत्वमेव दर्शयति 'ध्यायतीव लेलायतीव' इत्यादि। एवं च सति वक्ष्यमाणरथकल्पनया वैष्णवस्य पदस्यात्मतया प्रतिपत्तिरुपपद्यते, नान्यथा स्वभावानतिक्रमात ॥

यस्त्वविज्ञानवान्भवत्ययुक्तेन मनसा सदा।
तस्येंद्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥५॥

तत्रैवं सति यस्तु अविज्ञानवान् यस्य बुद्ध्याख्यः सारथिरविज्ञानोऽनिपुणो अविवेकी प्रवृत्तश्च निवृत्तश्च भवति, यथेतरो रथचर्यायामयुक्तेनाप्रगृहीतेनासमाहितेन मनसा प्रग्रहस्थानीयेन सदा युक्तो भवति, तस्याकुशलबुद्धिसारथेरिंद्रियाण्यश्वस्थानीयान्यवश्यान्यशक्यनिवारणानि दुष्टाश्वा अदान्ताश्वा इवेतरसारथेर्भवन्ति ॥

यस्तु विज्ञानवान्भवति युक्तेन मनसा सदा।
तस्येंद्रियाणि वश्यानि सदश्वा इव सारथेः ॥६॥

यस्तु पुनः पूर्वोक्तविपरीतसारथिर्भवति विज्ञानवान्प्रगृहीतमनाः समाहितचित्तः सदा, तस्याश्वस्थानीयानींद्रियाणि प्रवर्तयितुं निवर्तयितुं वा शक्यानि वश्यानि दान्ताः सदश्वा इवेतरसारथेः ॥

यस्त्वविज्ञानवान्भवत्यमनस्कः सदाऽशुचिः।
न स तत्पदमाप्नोति संसारं चाधिगच्छति ॥७॥

तस्य पूर्वोक्तस्याविज्ञानवतः इदं फलमाह—यस्त्वविज्ञानवान्भवति। अमनस्कोऽप्रगृहीतमनस्कः स तत एवाशुचिः सदैव। न स रथी तत्पूर्वोक्तमक्षरं यत्परं

पदमाप्नोति तेन सारथिना । न केवलं तन्नाप्नोति, संसारं च जन्ममरणलक्षणं अधिगच्छति ॥

यस्तु विज्ञानवान्भवति समनस्क सदा शुचिः ।
स तु तत्पदमाप्नोति यस्माद्भूयो न जायते ॥८॥

यस्तु द्वितीयो विज्ञानवान्विज्ञानवत्सारथ्युपेतो रथी विद्वानित्येतत् । युक्तमनाः समनस्क स तत एव सदा शुचि, स तु तत्पदमाप्नोति यस्मादाप्तात्पदादप्रच्युतः सन्भूय पुनर्न जायते संसारे ॥

विज्ञानसारथिर्यस्तु मन प्रग्रहवान्नर ।
सोऽध्वन पारमाप्नोति तद्विष्णोः परमं पदम् ॥९॥

कि तत्पदमित्याह — विज्ञानसारथिर्यस्तु यो विवेकबुद्धिसारथिः पूर्वोक्तो मन प्रग्रहवान्प्रगृहीतमनाः समाहितचित्त सञ्शुचिर्नरो विद्वान्सोऽध्वन संसारगतेः पारं परमेव अधिगन्तव्यमित्येतत् आप्नोति, मुच्यते सर्वसंसारबंधनै । तद्विष्णोर्व्यापनशीलस्य ब्रह्मण परमात्मनो वासुदेवाख्यस्य परमं प्रकृष्टं पदं स्थानं, सतत्त्वं इत्येतद्यदसौ आप्नोति विद्वान ॥

अधुना यत्पदं गन्तव्यं तस्य इंद्रियाणि स्थूलान्यारभ्य सूक्ष्मतारतम्यक्रमेण प्रत्यगात्मतया अधिगमः कर्तव्य इत्येवमर्थमिदमारभ्यते—

इंद्रियेभ्य परा ह्यर्था अर्थेभ्यश्च परं मन ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥१०॥

स्थूलानि तावदिंद्रियाणि, तानि यैरर्थैरात्मप्रकाशनायारब्धानि तेभ्य इंद्रियेभ्य स्वकार्येभ्यस्ते परा ह्यर्था सूक्ष्मा महान्तश्च प्रत्यगात्मभूताश्च । तेभ्योऽर्थेभ्यश्च परं सूक्ष्मतरं महत्प्रत्यगात्मभूतं च मनः । मन शब्दवाच्यं मनस आरंभकं भूतसूक्ष्मं संकल्पविकल्पाद्यारंभकत्वात । मनसोऽपि परा सूक्ष्मतरा महत्तरा प्रत्यगात्मभूता च बुद्धि, बुद्धिशब्दवाच्यमध्यवसायाद्यारंभकं भूतसूक्ष्मम् । बुद्धेरात्मा सर्वप्राणिबुद्धीना 'प्रत्यगात्मभूतत्वादात्मा महान्सर्वमहत्त्वादव्यक्ताद्यत्प्रथमं जातं हैरण्यगर्भं तत्त्वं बोधाबोधात्मकं महानात्मा बुद्धे पर इत्युच्यते ॥

महतः परमव्यक्तमव्यक्तात्पुरुषः परः ।
पुरुषान्न परं किंचित्सा काष्ठा सा परा गति ॥११॥

महतोऽपि परं सूक्ष्मतरं प्रत्यगात्मभूतं सर्वमहत्तरं च अव्यक्तं सर्वस्य जगतो बीजभूतमव्याकृतनामरूपं सत्त्वं सर्वकार्यकारणशक्तिसमाहाररूपं अव्यक्तं अव्याकृताकाशादिनामवाच्यं परमात्मन्योतप्रोतभावेन समाश्रितं वटकणिकायामिव वटवृक्षशक्तिः । तस्मादव्यक्तात्परः सूक्ष्मतरः सर्वकारणकारणत्वात्प्रत्यगात्मत्वाच्च महान्, अत एव पुरुष सर्वपूरणात् । ततोऽन्यस्य परस्य प्रसंगं निवारयन्नाह पुरुषान्न परं किंचिदिति । यस्मान्नास्ति पुरुषाच्चिन्मात्रघनात्परं किंचिदपि वस्त्वंतरं, तस्मात्सूक्ष्मत्वमहत्त्वप्रत्यगात्मत्वाना सा काष्ठा निष्ठा पर्यवसानम् । अत्र हीन्द्रियेभ्य आरभ्य सूक्ष्मत्वादि परिसमाप्तम् । अत एव च गन्तृणा सर्वगतिमतां संसारिणां सा परा प्रकृष्टा गति । "यद्गत्वा न निवर्तन्ते" इति स्मृते ॥

एष सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते ।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥१२॥

ननु गतिश्चेदागत्यापि भवितव्यं कथं "यस्माद्भूयो न जायते" इति । नैष दोषः । सर्वस्य प्रत्यगात्मत्वादवगतिरेव गतिरित्युपचर्यते । प्रत्यगात्मत्वं च दर्शितमिन्द्रियमनोबुद्धिपरत्वेन । यो हि गन्ता सोऽयमप्रत्यग्रूप गच्छत्यनात्मभूतं न विदति स्वरूपेण । तथा च श्रुति — "अनवगा अवमु पारयिष्णव" इत्याद्या । तथा च दर्शयति प्रत्यगात्मत्वं सर्वस्य । एष पुरुषः सर्वेषु ब्रह्मादिस्तंबपर्यंतेषु भूतेषु गूढः संवृतो दर्शनश्रवणादिकर्मा अविद्यामायाच्छन्नोऽत एव आत्मा न प्रकाशत आत्मत्वेन कस्यचित । अहो अतिगंभीरा दुरवगाह्या विचित्रा चेयं माया, यदयं सर्वो जन्तुः परमार्थत परमार्थसत्त्वोऽप्येवं बोध्यमानोऽहं परमात्मेति न गृह्णाति, अनात्मानं देहेंद्रियादिसंघातमात्मनो दृश्यमानमपि घटादिवदात्मत्वेनाहमसुष्य पुत्र इत्यनुच्यमानोऽपि गृह्णाति । नूनं परस्यैव मायया मोमुह्यमानः सर्वो लोको बंभ्रमीति । तथा च स्मरणं 'नाहं प्रकाशः सर्वस्य योगमायासमावृत" इत्यादि । ननु विरुद्धमिदमुच्यते 'मत्वा धीरो न शोचति' [२.२२] 'न प्रकाशते' इति च । नैतदेवम । असंस्कृतबुद्धेरविज्ञेयत्वान्न प्रकाशत इत्युक्तम् । दृश्यते तु संस्कृतयाऽग्र्यया अग्रमिवाग्र्या तया, एकाग्रतयोपेतयेत्येतत् सूक्ष्मया सूक्ष्मवस्तुनिरूपणपरया । कै. । सूक्ष्मदर्शिभिः इंद्रियेभ्यः परा ह्यर्थाः [३.१०] इत्यादिप्रकारेण सूक्ष्मतापारंपर्यदर्शनेन परं सूक्ष्मं द्रष्टुं शीलं येषां ते सूक्ष्मदर्शिनस्तैः सूक्ष्मदर्शिभिः पंडितैरित्येतत् ।

यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि ।
ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि ॥१३॥

तत्प्रतिपत्त्युपायमाह—यच्छेदिति यच्छेदुपसंहरेत्प्राज्ञो विवेकी । किं? वाग्वाचम् । वागत्रोपलक्षणार्था सर्वेषामिंद्रियाणाम । क्व? मनसी मनसि । छादसं दैर्घ्यम् । तच्च मनो यच्छेज्ज्ञाने प्रकाशस्वरूपे बुद्धावात्मनि । बुद्धिर्हि मनआदिकरणान्याप्रोतीत्यात्मा प्रत्यक्च तेषाम् । ज्ञानं बुद्धिमात्मनि महति प्रथमजे नियच्छेत् । प्रथमजवत्त्वच्छम्बभावकमात्मनो विज्ञानमापादयेदित्यर्थ. । तं च महान्तमात्मानं यच्छेच्छान्ते सर्वविशेषप्रत्यस्तमितरूपेऽविक्रिये सर्वान्तरे सर्वबुद्धिप्रत्ययसाक्षिणि मुख्य आत्मनि ॥

उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत ।
क्षुरस्य धारा निशिता दुरत्यया दुर्ग पथस्तत्कवयो वदन्ति ॥१४॥

एवं पुरुष आत्मनि सर्व प्रविलाप्य नामरूपकर्मत्रयं यन्मिथ्याज्ञानविजृंभितं क्रियाकारकफललक्षणं स्वात्मयाथात्म्यज्ञानेन मरीच्युदकरज्जुसर्पगगनमलानीव मरीचिरज्जुगगनस्वरूपदर्शनेनैव स्वस्थः प्रशान्त कृतकृत्यो भवति यतः, अतस्तद्दर्शनार्थमनाद्यविद्याप्रसुप्ता उत्तिष्ठत हे जन्तव , आत्मज्ञानाभिमुखा भवत, जाग्रताज्ञाननिद्राया घोररूपाया· सर्वानर्थबीजभूताया. क्षयं कुरुत । कथम् । प्राप्योपगम्य वरान्प्रकृष्टानाचार्यास्तत्त्वविद , तदुपदिष्टं सर्वान्तरमात्मानमहमस्मीति निबोधतावगच्छत । न ह्युपेक्षितव्यमिति श्रुतिरनुकंपयाह मातृवत् अतिसूक्ष्मबुद्धिविषयत्वाज्ज्ञेयस्य । किमिव सूक्ष्मबुद्धिरित्युच्यते । क्षुरस्य धारा अग्रं निशिता तीक्ष्णीकृता दुरत्यया दुःखेनात्ययो यस्या· सा दुरत्यया । यथा सा पद्ध्या दुर्गमनीया तथा दुर्ग दु.संपाद्यमित्येतत् पथ. पंथानं तत्तं ज्ञानलक्षणं मार्ग कवयो मेधाविनो वदन्ति । ज्ञेयस्य अतिसूक्ष्मत्वात्तद्विषयस्य ज्ञानमार्गस्य दु.संपाद्यत्वं वदन्तीत्यभिप्रायः ॥

तत्कथमतिसूक्ष्मत्वं ज्ञेयस्येत्युच्यते । स्थूला तावदियं मेदिनी शब्दस्पर्शरूपरसगंधोपचिता सेंद्रियविषयभूता तथा शरीरम् । तत्रैकैकगुणापकर्षेण गंधादीनां सूक्ष्मत्वमहत्त्वविशुद्धत्वनित्यत्वादितारतम्यं दृष्टमवादिषु यावदाकाशमिति । ते गंधादयः सर्व एव स्थूलत्वाद्विकाराः शब्दान्ता यत्र न सन्ति, किमु तस्य सूक्ष्मत्वादिनिरतिशयत्वं वक्तव्यमित्येतद्दर्शयति श्रुति.—

अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगंधवच्च यत् ।
अनाद्यनंतं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यते ॥१५॥

अशब्दमस्पर्शमरूपमरसमगंधवच्च यत् एतदाख्यातं ब्रह्म अव्ययं, यद्धि शब्दादिमत्तद्व्येतादं त्वशब्दादिमत्त्वादव्ययं न व्येति न क्षीयते, अत एव च नित्यं, यद्धि व्येति तदनित्यमिदं तु न व्येत्यतो नित्यम् । इतश्च नित्यमनाद्यविद्यमान आदिः कारणमस्य तदिदमनादि । यद्धयादिमत्तत्कार्यत्वादनित्यं कारणे प्रलीयते यथा पृथिव्यादि । इदं तु सर्वकारणत्वादकार्यमकार्यत्वान्नित्यं, न तस्य कारणमस्ति यस्मिन्प्रलीयेत । तथाऽनंतमाविद्यमानोऽन्त कार्यमस्य तदनंतम् । यथा कदल्यादे फलादिकार्योत्पादनेनाप्यनित्यत्वं दृष्टं, न च तथाप्यंतवत्त्वं ब्रह्मणोतोऽपि नित्यम् । महतो महत्तत्त्वात बुद्धयाख्यात्परं विलक्षणं नित्यविज्ञप्तिस्वरूपत्वात सर्वसाक्षि हि सर्वभूतात्मत्वाद्ब्रह्म । उक्तं हि 'एष सर्वेषु भूतेषु' [३ १२] इत्यादि । ध्रुवं च कूटस्थं नित्यं न पृथिव्यादिवदौपाधिकं नित्यत्वम । तदेवंभूतं ब्रह्मात्मानं निचाय्यावगम्य तमात्मानं मृत्युमुखान्मृत्युगोचरादविद्याकामकर्मलक्षणात्प्रमुच्यते वियुज्यते ॥

नाचिकेतमुपाख्यानं मृत्युप्रोक्तं सनातनम् ।
उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयते ॥१६॥

प्रस्तुतविज्ञानस्तुत्यर्थमाह श्रुति — नाचिकेतं नाचिकेतसा प्राप्तं नाचिकेतं मृत्युना प्रोक्तं मृत्युप्रोक्तमिदमाख्यानमुपाख्यानं वल्लीत्रयलक्षणं सनातनं चिरंतनं वैदिकत्वादुक्त्वा ब्राह्मणेभ्यः श्रुत्वा चाचार्येभ्यो मेधावी ब्रह्मैव लोको ब्रह्मलोकस्तस्मिन्ब्रह्मलोके महीयत आत्मभूत उपास्यो भवतीत्यभिप्रायः ॥

य इमं परमं गुह्यं श्रावयेत् ब्रह्मसंसदि । प्रयत श्राद्धकाले वा तदानंत्याय कल्पते तदानंत्याय कल्पत इति ॥१७॥

इति तृतीया वल्ली ॥

यः कश्चिदिमं ग्रंथं परमं प्रकृष्टं गुह्यं गोप्यं श्रावयेत ग्रंथतोऽर्थतश्च ब्राह्मणानां संसदि ब्रह्मसंसदि प्रयत शुचिर्भूत्वा श्राद्धकाले वा श्रावयेत् भुंजानान तच्छ्राद्धमस्यानंत्यायानंतफलाय कल्पते संपद्यते । द्विर्वचनमध्यायपरिसमाप्त्यर्थम् ॥

इति काठकोपनिषदि प्रथमोऽध्यायः समाप्तः ॥१॥

अथ द्वितीयोऽध्यायः ।

'एष सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते दृश्यते त्वग्र्यया बुद्धया' [३.१२] इत्युक्तम् । क पुन प्रतिबंधोऽग्र्याया बुद्धेर्येन तदभावादात्मा न दृश्यत इति तददर्शनकारणप्रदर्शनार्था वल्ली आरभ्यते । विज्ञाते हि श्रेय प्रतिबंधकारणे तदपनयनाय यत्न आरब्धुं शक्यते नान्यथेति—

परांचि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन् ।
कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ॥१॥

परांचि परागंचन्ति गच्छन्तीति, खानि तदुपलक्षितानि श्रोत्रादीनींद्रियाणि खानीत्युच्यन्ते । तानि परान्येव शब्दादिविषयप्रकाशनाय प्रवर्तन्ते । यस्मात एवंस्वभावकानि तानि व्यतृणद्धिंसितवान्हननं कृतवानित्यर्थ । कोऽसौ । स्वयंभू परमेश्वर स्वयमेव स्वतंत्रो भवति सर्वदा न परतंत्र इति । तस्मात पराङ् पराग्र्यानन्नात्मभूताञ्शब्दादीन्पश्यत्युपलभते उपलब्धा नान्तरात्मन्नान्तरात्मानमित्यर्थ । एवंस्वभावेऽपि सति लोकस्य कश्चिन्नित्या प्रतिस्रोत प्रवर्तनमिव धीरो धीमान विवेकी प्रत्यगात्मानं प्रत्यक्चासावात्मा चेति प्रत्यगात्मा । प्रतीच्येवात्मशब्दो रूढो लोके नान्यत्र । व्युत्पत्तिपक्षेऽपि तत्रैवात्मशब्दो वर्तते । "यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह । यच्चास्य संततो भावस्तस्मादात्मेति कीर्त्यते" इत्यात्मशब्दव्युत्पत्तिस्मरणात् । तं प्रत्यगात्मानं स्वं स्वभावमैक्षदपश्यत्पश्यतीत्यर्थः । छंदसि कालान्नयमात् । कथं पश्यतीत्युच्यते— आवृत्तचक्षुरावृत्तं व्यावृत्तं चक्षु श्रोत्रादिकमिंद्रियजातमशेषविषयाद्यस्य स आवृत्तचक्षुः । स एवं संस्कृत प्रत्यगात्मानं पश्यति । न हि बाह्यविषयालोचनपरत्वं प्रत्यगात्मेक्षणं चैकस्य संभवति । किमर्थ पुनरित्थं महता प्रयासेन स्वभावप्रवृत्तिनिरोधं कृत्वा धीर प्रत्यगात्मानं पश्यतीत्युच्यते—अमृतत्वममरणधर्मत्वं नित्यस्वभावतामिच्छन्नात्मन इत्यर्थः ॥

पराचः कामाननुयन्ति बालास्ते मृत्योर्यन्ति विततस्य पाशम् ।
अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयन्ते ॥२॥

यत्तावत्स्वाभाविकं परागेवानात्मदर्शनं तदात्मदर्शनस्य प्रतिबंधकारणमविद्या तत्प्रतिकूलत्वाद्या च परागेवाविद्योपप्रदर्शितेषु दृष्टादृष्टेषु भोगेषु तृष्णा ताभ्यामविद्यातृष्णाभ्यां प्रतिरुद्धात्मदर्शन. पराचो बहिर्गतानेव कामान्काम्यान्विषयाननुयन्ति अनुगच्छन्ति बाला अल्पप्रज्ञा', ते तेन कारणेन मृत्योरविद्याकामकर्मसमु-

दायस्य यन्ति गच्छन्ति वितनस्य विस्तीर्णस्य सर्वतो व्याप्तस्य पाशं, पाश्यते बध्यते येन तं पाशं देहेन्द्रियादिसंयोगवियोगलक्षणम् । अनवरतं जन्ममरणजरारोगाद्यनेकानर्थव्रातं प्रतिपद्यन्त इत्यर्थः । यत एवमथ तस्माद्धीरा विवेकिनः प्रत्यगात्मस्वरूपावस्थानलक्षणममृतत्वं ध्रुवं विदित्वा । देवाद्यमृतत्वं त्वध्रुवं इदं तु प्रत्यगात्मस्वरूपावस्थानलक्षणं ध्रुवं 'न कर्मणा वर्धते नो कनीयान्' इति श्रुतेः । तदेवंभूतं कूटस्थमविचाल्यममृतत्वं विदित्वा अध्रुवेषु सर्वपदार्थेष्वनित्येषु निर्धार्य ब्राह्मणा इह संसारेऽनर्थप्राये न प्रार्थयन्ते किंचिदपि प्रत्यगात्मदर्शनप्रतिकूलत्वात् । पुत्रवित्तलोकैषणाभ्यो व्युत्तिष्ठन्त्येवेत्यर्थः ॥

येन रूपं रसं गंधं शब्दान्स्पर्शांश्च मैथुनान् ।
एतेनैव विजानाति किमत्र परिशिष्यते । एतद्वै तत् ॥३॥

यद्धिजानाति किंचिदन्यत्प्रार्थयन्ते ब्राह्मणा, कथं तदधिगम इति उच्यते— येन विज्ञानस्वभावेनात्मना रूपं रसं गंधं शब्दान्स्पर्शांश्च मैथुनान्मैथुननिमित्तान्सुखप्रत्ययान्विजानाति विस्पष्टं जानाति सर्वो लोकः । ननु नैवं प्रसिद्धिर्लोकस्यात्मना देहादिविलक्षणेनाहं विजानामीति । देहादिसंघातोऽहं विजानामीति तु सर्वो लोकोऽवगच्छति । न त्वेवम् । देहादिसंघातस्यापि शब्दादिस्वरूपत्वाविशेषादिज्ञेयत्वाविशेषाच्च न युक्तं विज्ञातृत्वम् । यदि हि देहादिसंघातो रूपाद्यात्मकः सन्रूपादीन्विजानीयात् तर्हि बाह्या अपि रूपादयोऽन्योन्यं स्वं स्वं रूपं च विजानीयुः । न चैतदस्ति । तस्माद्देहादिलक्षणाश्च रूपादीनेतेनैव देहादिव्यतिरिक्तेनैव विज्ञानस्वभावेनात्मना विजानाति लोकः । यथा येन लोहो दहति सोऽग्निरिति तद्वत् । आत्मनोऽविज्ञेयं किमत्रास्मिंल्लोके परिशिष्यते न किंचित्परिशिष्यते । सर्वमेव त्वात्मना विज्ञेयम् । यस्यात्मनोऽविज्ञेयं न किंचित्परिशिष्यते स आत्मा सर्वज्ञः । एतद्वै तत् । किं तद्यन्नचिकेतसा पृष्टं देवादिभिरपि विचिकित्सितं धर्मादिभ्योऽन्यद्विकृतेः परमं पदं यस्मात्परं नास्ति तद्वै एतदधिगतमित्यर्थः ॥

स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥४॥

अतिसूक्ष्मत्वात् दुर्विज्ञेयमिति मत्वैतमेवार्थं पुनः पुनराह— स्वप्नान्तं स्वप्नमध्यं स्वप्नविज्ञेयमित्येतत् । तथा जागरितान्तं जागरितमध्यं जागरितविज्ञेयं च । उभौ स्वप्नजागरितान्तौ येनात्मनानुपश्यति लोक इति सर्वं पूर्ववत् । तं महान्तं

विभुमात्मानं मत्वावगम्यात्मभावेन साक्षादहमस्मि परमात्मेति धीरो न शोचति ।

य इमं मध्वदं वेद आत्मानं जीवमंतिकात् ।
ईशानं भूतभव्यस्य न ततो विजुगुप्सते । एतद्वै तत् ॥५॥

किंच यः कश्चिदिमं मध्वदं कर्मफलभुजं जीवं प्राणादिकलापस्य धारयितारं आत्मानं वेद विजानात्यंतिकादंतिके समीपे ईशानमीशितारं भूतभव्यस्य कालत्रयस्य, ततस्तद्विज्ञानादूर्ध्वमात्मानं न विजुगुप्सते न गोपायितुमिच्छत्यभयप्राप्तत्वात् । यावद्धि भयमध्यस्थोऽनित्यमात्मानं मन्यते तावद्गोपायितुमिच्छत्यात्मनः । यदा तु नित्यमद्वैतमात्मानं विजानाति तदा कः किं कुतो वा गोपायितुमिच्छेत । एतद्वै तदिति पूर्ववत् ॥

य पूर्वं तपसो जातमद्भ्य पूर्वमजायत ।
गुहां प्रविश्य तिष्ठन्तं यो भूतेभिर्व्यपश्यत । एतद्वै तत् ॥६॥

यः प्रत्यगात्मेश्वरभावेन निर्दिष्ट स सर्वात्मेत्येतदृर्शयति— यः कश्चिन्मुमुक्षुः पूर्वं प्रथमं तपसो ज्ञानादिलक्षणाद्ब्रह्मण इत्येतत जातमुत्पन्नं हिरण्यगर्भम् । किमपेक्ष्य पूर्वमित्याह– अद्भ्य पूर्वमप्सहितेभ्यः पंचभूतेभ्यो न केवलाभ्योऽद्भ्य इत्यभिप्रायः । अजायत उत्पन्नो यस्तं प्रथमजं देवादिशरीराण्युत्पाद्य सर्वप्राणिगुहां हृदयाकाशं प्रविश्य तिष्ठन्तं शब्दादीनुपलभमानं भूतेभिर्भूतैः कार्यकरणलक्षणैः सह तिष्ठन्तं यो व्यपश्यत यः पश्यतीत्येतत । य एवं पश्यति स एतदेव पश्यति यत्तत्प्रकृतं ब्रह्म ॥

या प्राणेन संभवत्यदितिर्देवतामयी ।
गुहां प्रविश्य तिष्ठन्तीं या भूतेभिर्व्यजायत । एतद्वै तत् ॥७॥

किंच— या सर्वदेवतामयी सर्वदेवतात्मिका प्राणेन हिरण्यगर्भरूपेण परस्माद्ब्रह्मणः संभवति शब्दादीनामदनाददितिस्तां पूर्ववद्गुहां प्रविश्य तिष्ठन्तीमदितिम् । तामेव विशिनष्टि— या भूतेभिर्भूतैः समन्विता व्यजायत उत्पन्नेत्येतत् ॥

अरण्योर्निहितो जातवेदा गर्भ इव सुभृतो गर्भिणीभिः ।
दिवे दिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः । एतद्वै तत् ॥८॥

किंच— योऽधियज्ञ उत्तराधरारण्योर्निहितः स्थितो जातवेदा अग्निः पुनः सर्वहविषां भोक्ता अध्यात्मं च योगिभिः गर्भ इव गर्भिणीभिरंतर्वत्नीभिरगर्हितान्नभोजनादिना यथा गर्भः सुभृतः सुष्ठु सम्यग्भृतो लोके, इवेत्थमेवर्त्विग्भिर्योगि-

भिश्च मुभृत इत्येतत्। किंच दिवे दिवेऽहन्यहनीज्य· स्तुत्यो वंद्यश्च कर्मिभिर्योगि-भिश्चाध्वरे हृदये च जागृवद्भिर्जागरणशीलैरप्रमत्तैरित्येतत्। हविष्मद्भिराज्यादि-मद्भिर्ध्यानभावनावद्भिश्च, मनुष्येभिर्मनुष्यैरग्निरेतद्वै तत्तदेव प्रकृतं ब्रह्म ॥

यतश्चोदेति सूर्योऽस्तं यत्र च गच्छति ।
तं देवा सर्वेऽर्पितास्तदु नात्येति कश्चन । एतद्वै तत् ॥९॥

किंच— यतश्च यस्मात्प्राणादुदेत्युन्मिषति सूर्योऽस्तं निम्लोचनं यत्र यस्मिन्नेव च प्राणेऽहन्यहनि गच्छति, तं प्राणमात्मानं देवाः, सर्वे अग्न्यादयोऽधिदैवं वागादयश्चाध्यात्मं सर्वे विश्वेऽरा इव रथनाभावर्पिताः संप्रवेशिता स्थितिकाले। सोऽपि ब्रह्मैव। तदेतत्सर्वात्मकं ब्रह्म। तदु नात्येति नातीत्य तदात्मकतां तदन्यत्वं गच्छति कश्चन कश्चिदपि एतद्वै तत् ॥

यदेवेह तदमुत्र यदमुत्र तदन्विह ।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥१०॥

यत् ब्रह्मादिस्थावरान्तेषु वर्तमानं तत्तदुपाधित्वादब्रह्मवदवभासमानं संसार्यन्यत्परस्मात् ब्रह्मण इति मा भूत्कस्यचिदाशंकेतादमाह— यदेवेह कार्यकारणोपाधिसमन्वितं संसारधर्मवदवभासमानमविवेकिना तदेव स्वात्मस्थममुत्र नित्यविज्ञानघनस्वभावं सर्वसंसारधर्मवर्जितं ब्रह्म। यच्चामुत्रामुष्मिन्नात्मनि स्थितं तदन्विह तदेवेह नामरूपकार्यकरणोपाधिमनु विभाव्यमानं नान्यत्। तत्रैवं सत्युपाधिस्वभावभेददृष्टिलक्षणया अविद्यया मोहित सन्य इह ब्रह्मण्यनानाभूते परस्मादन्योऽहं मनोऽन्यत्परं ब्रह्मेति नानेव भिन्नमिव पश्यत्युपलभते, स मृत्योर्मरणान्मृत्युं मरणं पुनः पुनर्जननमरणभावमाप्नोति प्रतिपद्यते। तस्मात्तथा न पश्येत्। विज्ञानैकरसं नैरंतर्येणाकाशवत्परिपूर्णं ब्रह्मैवाहमस्मीति पश्येदिति वाक्यार्थः ॥

मनसैवेदमाप्तव्यं नेह नानास्ति किंचन ।
मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति ॥११॥

प्रागेकत्वविज्ञानाचार्यागमसंस्कृतेन मनसैवेदं ब्रह्मैकरसमाप्तव्यमात्मैव नान्यदस्तीति। आप्ते च नानात्वप्रत्युपस्थापिकाया अविद्याया निवृत्तत्वादिह ब्रह्मणि नाना नास्ति किंचनाणुमात्रमपि। यस्तु पुनरविद्यातिमिरदृष्टि न मुंचति इह ब्रह्मणि नानेव पश्यति, स मृत्योर्मृत्युं गच्छत्येव स्वल्पमपि भेदमध्यारोपयन्नित्यर्थः ॥ पुनरपि तदेव प्रकृतं ब्रह्माह—

अंगुष्ठमात्र पुरुषो मध्य आत्मनि तिष्ठति ।
ईशानं भूतभव्यस्य न ततो विजुगुप्सते । एतद्वै तत् ॥१२॥

अंगुष्ठमात्रोऽंगुष्ठपरिमाण अंगुष्ठपरिमाणं हृदयपुंडरीकं तच्छिद्रवर्त्यंतःकरणोपाधिरंगुष्ठमात्रोऽङ्गुष्ठमात्रवंशपर्वमध्यवर्त्यंबरवत् । पुरुष पूर्णमनेन सर्वमिति । मध्य आत्मनि शरीरे तिष्ठति यस्तमात्मानमीशानं भूतभव्यस्य विदित्वा न तत इत्यादि पूर्ववत् ॥

अंगुष्ठमात्र पुरुषो ज्योतिरिवाधूमकः ।
ईशानो भूतभव्यस्य स एवाद्य स उ श्वः । एतद्वै तत् ॥१३॥

किंच अंगुष्ठमात्र पुरुषो ज्योतिरिवाधूमक , अधूमकमिति युक्तं ज्योतिष्परत्वात् । यस्त्वेवं लक्षितो योगिभिर्हृदय ईशानो भूतभव्यस्य स एव नित्य कूटस्थोऽद्येदानी प्राणिषु वर्तमान स उ श्वोऽपि वर्तिष्यते, नान्यस्तत्समोऽन्यश्च जनिष्यत इत्यर्थ । अनेन 'नायमस्तीति चैके' [१.२०] इत्ययं पक्षो न्यायतोऽप्राप्तोऽपि स्ववचनेन श्रुत्या प्रत्युक्तस्तथा क्षणभंगवादश्च ॥

यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति ।
एवं धर्मान्पृथक्पश्यंस्तानेवानुविधावति ॥१४॥

पुनरपि भेददर्शनापवादं ब्रह्मण आह— यथोदकं दुर्गे दुर्गमे देश उच्छ्रिते वृष्टं सिक्तं पर्वतेषु पर्ववत्सु निम्नप्रदेशेषु विधावति विकीर्णं सद्विनश्यति, एवं धर्मानात्मनोऽभिज्ञान्पृथक्पश्यन्पृथगेव प्रतिशरीरं पश्यंस्तानेव शरीरभेदानुवर्तिनोऽनुविधावति । शरीरभेदमेव पृथक्पुन पुन प्रतिपद्यत इत्यर्थः ॥

यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति ।
एवं मुनेर्विजानत आत्मा भवति गौतम ॥१५॥

अस्य पुनर्विद्यावतो विध्वस्तोपाधिकृतभेददर्शनस्य विशुद्धविज्ञानघनैकरसमद्वयमात्मानं पश्यतो विजानतो मुनेर्मननशीलस्यात्मस्वरूपं कथं संभवतीत्युच्यते यथोदकं शुद्धे प्रसन्ने शुद्धं प्रसन्नमासिक्तं प्रक्षिप्तमेकरसमेव नान्यथा तादृगेव भवति आत्मापीत्येवमेव भवत्येकत्वं विजानतो मुनेर्मननशीलस्य हे गौतम । तस्मात्कुतार्किकभेददृष्टि नास्तिककुदृष्टि च हित्वा मातृपितृसहस्रेभ्योऽपि हितैषिणा वेदेनोपदिष्टमात्मैकत्वदर्शनं शान्तदर्पैरादरणीयमित्यर्थ. ॥

इति चतुर्थी वल्ली ॥

पुनरपि प्रकारान्तरेण ब्रह्मतत्त्वनिर्धारणार्थोऽयमारंभो दुर्विज्ञेयत्वात् ब्रह्मणः—

पुरमेकादशद्वारमजस्यावक्रचेतसः ।
अनुष्ठाय न शोचति विमुक्तश्च विमुच्यते । एतद्वै तत् ॥१॥

पुरं पुरुषमिव पुरम । द्वारद्वारपालाधिष्ठात्रादिनैकपुरोपकरणसंपत्तिदर्शनाच्छरीरं पुरम् । पुरं च शोपाकरणं स्वात्मनाऽसंहतस्वतंत्रस्वाम्यर्थं दृष्टम् । तथेदं पुरसामान्यादनेकोपकरणसंहतं शरीरं स्वात्मनाऽसंहतराजस्थानीयस्वाम्यर्थं भवितुमर्हति । तच्चेदं शरीराख्यं पुरमेकादशद्वारं एकादश द्वाराण्यस्य सप्त शीर्षण्यानि, नाभ्या सहार्वाचि त्रीणि, शिरस्येकं, तैरेकादशद्वारं पुरम् । कस्य ? अजस्य जन्मादिविक्रियारहितस्यात्मनो राजस्थानीयस्य पुरधर्मविलक्षणस्य । अवक्रचेतसोऽवक्रमकुटिलमादित्यप्रकाशवच्चित्यमेवावस्थितमेकरूपं चेतो विज्ञानमस्येत्यवक्रचेतास्तस्यावक्रचेतसो राजस्थानीयस्य ब्रह्मणः । यस्येदं पुरं तं परमेश्वरं पुरस्वामिनमनुष्ठाय ध्यात्वा । ध्यानं हि तस्यानुष्ठानं सम्यग्विज्ञानपूर्वकम । तं सर्वैषणाविनिर्मुक्त सन्यस्तं सर्वभूतस्थं ध्यात्वा न शोचति । तद्विज्ञानादभयप्राप्तेः शोकावसराभावात्कृतो भयेश्च । इहैवाविद्याकृतकामकर्मबंधनैर्विमुक्तो भवति । विमुक्तश्च सन्विमुच्यते पुनः शरीरं न गृह्णातीत्यर्थ ॥

हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥२॥

स तु नैकशरीरपुरवर्त्येवात्मा किं तर्हि सर्वपुरवर्ती । कथम्— हंसो हन्ति गच्छतीति । शुचिषच्छुचौ दिव्यादित्यात्मना सीदतीति । वसुर्वासयति सर्वानिति । वाय्वात्मनांतरिक्षे सीदतीत्यंतरिक्षसत् । होताऽग्निः, "अग्निर्वै होता" इति श्रुतेः । वेद्यां पृथिव्यां सीदतीति वेदिषत् । "इयं वेदिः परोऽन्तः पृथिव्याः" इत्यादिमंत्रवर्णात् । अतिथि सोमः सन्दुरोणे कलशे सीदतीति दुरोणसत् । ब्राह्मणोऽतिथिरूपेण वा दुरोणेषु गृहेषु सीदतीति । नृषन्नृषु मनुष्येषु सीदतीति । वरसद्वरेषु देवेषु सीदतीति । ऋतसत् ऋतं सत्यं यज्ञो वा तस्मिन्सीदतीति । व्योमसद्व्योम्याकाशे सीदतीति । अब्जा अप्सु शंखशुक्तिमकरादिरूपेण जायत इति । गोजा गवि पृथिव्यां व्रीहियवादिरूपेण जायत इति । ऋतजा यज्ञांगरूपेण जायत इति । अद्रिजाः पर्वतेभ्यो नद्यादिरूपेण जायत इति । सर्वात्मापि सन्नृत मवितथस्वभाव एव । बृहन्महान्सर्वकारणत्वात् । यदाप्यादित्य एव मंत्रेणोच्यत

तदाप्यात्मस्वरूपत्वमादित्यस्यार्गाकृतत्वाद्ब्रह्मणो व्याख्यानेऽप्यविरोध । सर्वव्याप्येक एवात्मा जगतो नात्मभेद इति मंत्रार्थ ॥

ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति ।
मध्ये वामनमासीनं विश्वे देवा उपासते ॥३॥

आत्मनः स्वरूपाधिगमे लिंगमुच्यते—ऊर्ध्वं हृदयात्प्राणं प्राणवृत्ति वायुमुन्नयत्यूर्ध्वं गमयति । तथाऽपानं प्रत्यगधोऽस्यति क्षिपति यः इति वाक्यशेषः । तं मध्ये हृदयपुंडरीकाकाश आसीनं बुद्धावभिव्यक्तविज्ञानप्रकाशनं वामनं वननीयं संभजनीयं विश्वे सर्वे देवाश्चक्षुरादय. प्राणा रूपादिविज्ञानं बलिमुपाहरन्तो विश इव राजानमुपासते तादर्थ्येनानुपरतव्यापारा भवन्तीत्यर्थ. । यदर्था यत्प्रयुक्ताश्च सर्वे वायुकरणव्यापारा , सोऽन्य सिद्ध इति वाक्यार्थ ॥

अस्य विस्रंसमानस्य शरीरस्थस्य देहिन ।
देहाद्विमुच्यमानस्य किमत्र परिशिष्यते । एतद्वै तत् ॥४॥

किंच अस्य शरीरस्थस्यात्मनो विस्रसमानस्य भ्रंशमानस्य देहिनो देहवत । विस्रंसनशब्दार्थमाह– देहाद्विमुच्यमानस्येति । किमत्र परिशिष्यते प्राणादिकलापे न किंचन परिशिष्यते अत्र देहे पुरस्वामिविद्रवण इव पुरवासिना यस्यात्मनोऽपगमे क्षणमात्रात्कार्यकरणकलापरूपं सर्वमिदं हतबलं विध्वस्तं भवति विनष्टं भवति सोऽन्य सिद्ध आत्मा ॥

न प्राणेन नापानेन मर्त्यो जीवति कश्चन ।
इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ ॥५॥

स्यान्मतं प्राणापानाद्यपगमादेवेद विध्वस्तं भवति न तु तद्व्यतिरिक्तात्मापगमात्प्राणादिभिरेवेह मर्त्यो जीवतीति । नैतदस्ति । न प्राणेन नापानेन चक्षुरादिना वा मर्त्यो मनुष्यो देहवान्कश्चन जीवति न कोऽपि जीवति । न ह्येषां परार्थानां संहत्यकारित्वाज्जीवनहेतुत्वमुपपद्यते । स्वार्थेनासंहतेन परेण केनचिदप्रयुक्तं संहतानामवस्थानं न दृष्टं यथा गृहादीनां लोके, तथा प्राणादीनामपि संहतत्वाद्धवितुमर्हति । अत इतरेण तु इतरेणैव संहतप्राणादिविलक्षणेन तु सर्वे संहताः सन्तो जीवन्ति प्राणान्धारयन्ति । यस्मिन्संहर्तावलक्षण आत्मनि सति परस्मिन्नेतौ प्राणापानौ चक्षुरादिभिः संहतावुपाश्रितौ, यस्यासंहतस्यार्थे प्राणापानादिः सर्व व्यापारं कुर्वन्वर्तते संहतः सन्स ततोऽन्य सिद्ध इत्यभिप्रायः ॥

हंत त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम्।
यथा च मरणं प्राप्य आत्मा भवति गौतम ॥६॥

हंतेदानीं पुनरपि ते तुभ्यमिदं गुह्यं गोप्यं ब्रह्म सनातनं चिरंतनं प्रवक्ष्यामि। यद्विज्ञानात्सर्वसंसारोपरमो भवति, अविज्ञानाच्च यस्य मरणं प्राप्य यथा चात्मा भवति यथात्मा संसरति तथा शृणु हे गौतम ॥

योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः।
स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम् ॥७॥

योनिं योनिद्वारं शुक्रबीजसमन्विताः सन्तोऽन्ये केचिदविद्यावन्तो मूढा प्रपद्यन्ते शरीरत्वाय शरीरग्रहणार्थं देहिनो देहवन्तः, योनिं प्रविशन्तीत्यर्थः। स्थाणुं वृक्षादिस्थावरभावमन्येऽत्यंताधमा मरणं प्राप्यानुसंयन्त्यनुगच्छन्ति। यथाकर्म यद्यस्य कर्म तद्यथाकर्म यैर्यादृशं कर्मेह जन्मनि कृतं तद्वशेनेत्येतत्। तथा च यथाश्रुतं यादृशं च विज्ञानमुपार्जितं तदनुरूपमेव शरीरं प्रतिपद्यन्त इत्यर्थः। "यथाप्रज्ञं हि संभवाः" इति श्रुत्यंतरात् ॥

य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः।
तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते।
तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन। एतद्वै तत् ॥८॥

यत्प्रतिज्ञातं गुह्यं ब्रह्म प्रवक्ष्यामीति तदाह— य एष सुप्तेषु प्राणादिषु जागर्ति न स्वपिति। कथम्। कामं कामं तं तमभिप्रेतं स्वस्यार्थमविद्यया निर्मिमाणो निष्पादयञ्जागर्ति पुरुषो यः, तदेव शुक्रं शुभ्रं शुद्धं तद्ब्रह्म नान्यद्गुह्यं ब्रह्मास्ति। तदेवामृतमविनाश्युच्यते सर्वशास्त्रेषु। किंच पृथिव्यादयो लोकास्तस्मिन्नेव सर्वे ब्रह्मणि श्रिता आश्रिता सर्वलोककारणत्वात्तस्य। तदु नात्येति कश्चनेत्यादि पूर्ववदेव ॥

अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥९॥

अनेकतार्किककुबुद्धिविचालितान्तःकरणानां प्रमाणोपपन्नमप्यात्मैकत्वविज्ञानमसकृदुच्यमानमप्यनृजुबुद्धीनां ब्राह्मणानां चेतसि नाधीयत इति तत्प्रतिपादनादरवतां पुनः पुनराह श्रुतिः— अग्निर्यथैक एव प्रकाशात्मा सन्भुवनं भवन्यस्मिन्भूतानीति भुवनमयं लोकस्तमिमं प्रविष्टोऽनुप्रविष्टः, रूपं रूपं प्रति दार्वादिदाह्यभेदं प्रतीत्यर्थः, प्रतिरूपस्तत्र तत्र प्रतिरूपवान्दाह्यभेदेन बहुविधो बभूव।

एक एव तथा सर्वभूतान्तरात्मा रूपं रूपं सर्वेषा भूतानामभ्यतर आत्माऽतिसूक्ष्मत्वाद्दार्वादिष्विव सर्वदेहं प्रति प्रविष्टत्वात्प्रतिरूपो बभूव बहिश्च स्वेनाविकृतेन रूपेणाकाशवत ॥

वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥१०॥

तथाऽन्यो दृष्टान्त·—वायुर्यथैक इत्यादि । प्राणात्मना देहेष्वनुप्रविष्टो, रूपं रूपं प्रतिरूपो बभूवेत्यादि समानम ॥

सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः ।
एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्य ॥११॥

एकस्य सर्वात्मत्वं संसारदुःखित्वं परस्यैव स्यादिति प्राप्ते इदमुच्यते—सूर्यो यथा चक्षुष आलोकेनोपकारं कुर्वन्मत्रपुरीषाद्यशुचिप्रकाशनेन तद्दर्शिनः सर्वलोकस्य चक्षुरपि सन्न लिप्यते चाक्षुषैरशुच्यादिदर्शननिमित्तैराध्यात्मिकैः पापदोषैर्बाह्यैश्चाशुच्यादिसंसर्गदोषैः एक सन् तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्य· । लोको ह्यविद्यया स्वात्मन्यध्यस्तया कामकर्मोद्भवं दुःखमनुभवति । न तु सा परमार्थत स्वात्मनि । यथा रज्जुशुक्तिकोपरगगनेषु सर्परजतोदकमलानि न रज्ज्वादीना स्वतो दोषरूपाणि सन्ति, ससर्गीणि विपरीतबुद्धयध्यासनिमित्तान्तद्दोषबद्धिभाव्यन्ते । न तद्दोषैस्तेषा लेपो विपरीतबुद्धयध्यासबाह्या हि ते । तथात्मान सर्वो लोक क्रियाकारकफलात्मकं विज्ञानं सर्पादिस्थानीयं विपरीतमध्यस्य तन्निमित्तं जन्ममरणादिदुःखमनुभवति, न त्वात्मा सर्वलोकात्मापि सन्विपरीताध्यारोपनिमित्तेन लिप्यते लोकदुःखेन । कुत बाह्य· रज्ज्वादिवदेव विपरीतबुद्धयध्यासबाह्यो हि स इति ॥

एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा य करोति ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥१२॥

किंच स हि परमेश्वर सर्वगत स्वतंत्र एको न तत्समोऽभ्यधिको वान्यो अस्ति । वशी सर्व ह्यस्य जगद्वशे वर्तते । कुत ? सर्वभूतान्तरात्मा । यत एकमेव सदेकरसमात्मान विशुद्धविज्ञानरूपं नामरूपाद्यशुद्धोपाधिभेदवशेन बहुधा अनेकप्रकारं य· करोति स्वात्मसत्तामात्रेणाचिन्त्यशक्तित्वात् तमात्मस्थं स्वशरीरहृदयाकाशे बुद्धौ चैतन्याकारेणाभिव्यक्तमित्येतत् । न हि शरीरस्याधारत्वमा-

त्मन । आकाशवदमूर्तत्वात् । आदर्शस्थं मुखमिति यद्वत् । तमेतमीश्वरमात्मानं ये निवृत्तबाह्यवृत्तयोऽनुपश्यन्ति आचार्यागमोपदेशमनु साक्षादनुभवन्ति धीरा विवेकिनः तेषां परमेश्वरभूतानां शाश्वतं नित्यं सुखमात्मानंदलक्षणं भवति, नेतरेषां बाह्यासक्तबुद्धीनामविवेकिनां स्वात्मभूतमपि अविद्याव्यवधानात् ॥

नित्योऽनित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ॥१३॥

किंच नित्योऽविनाश्यनित्यानां विनाशिनाम् । चेतनश्चेतनानां चेतयितॄणां ब्रह्मादीनां प्राणिनां अग्निर्निमित्तमिव दाहकत्वमनन्नानामुदकार्दानामात्मचैतन्यनिर्निमित्तमेव चेतयितृत्वमन्येषाम् । किंच स सर्वज्ञ सर्वेश्वर कामिना संसारिणा कर्मानुरूपं कामान्कर्मफलानि स्वानुग्रहनिमित्तांश्च कामान्य एको बहूनामनेकेषामनायासेन विदधाति प्रयच्छतीत्येतत् । तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिरुपरतिः शाश्वती नित्या स्वात्मभूतैव स्यान्नेतरेषामनेवंविधानाम् ॥

तदेतदिति मन्यन्तेऽनिर्देश्यं परमं सुखम् ।
कथं नु तद्विजानीयां किमु भाति विभाति वा ॥१४॥

यत्तदात्मविज्ञानसुखमनिर्देश्यं निर्देष्टुमशक्यं परमं प्रकृष्टं प्राकृतपुरुषबाह्यज्ञानसंयोरगोचरमपि सन्निवृत्तैषणा ये ब्राह्मणास्ते एतत्प्रत्यक्षमेवेति मन्यन्ते, कथं नु केन प्रकारेण तत्सुखमहं विजानीयाम् । इदमित्यात्मबुद्धिविषयमापादयेयं यथा निवृत्तैषणा यतय । किमु तद्भाति दीप्यते प्रकाशात्मकं तद्यतोऽस्मद्बुद्धिगोचरत्वेन विभाति विस्पष्टं दृश्यते किंवा नेति ॥

न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥१५॥

अत्रोत्तरमिदं भाति च विभाति चेति । कथम् ? न तत्र तस्मिन्स्वात्मभूते ब्रह्मणि सर्वावभासकोऽपि सूर्यो भाति तद्ब्रह्म न प्रकाशयतीत्यर्थः । तथा न चंद्रतारकं, नेमा विद्युतो भान्ति, कुतोऽयमस्मद्दृष्टिगोचरोऽग्निः । किं बहुना, यदिदमादिकं सर्वं भाति तत्तमेव परमेश्वरं भान्तं दीप्यमानमनुभात्यनुदीप्यते । तथा जलोल्मुकादि अग्निसंयोगादग्निः दहन्तमनु दहति न स्वतस्तद्वत् । तस्यैव भासा दीप्त्या सर्वमिदं सूर्यादि विभाति । यत एवं तदेव ब्रह्म भाति च विभाति च । कार्यगतेन विविधेन भासा तस्य ब्रह्मणो भारूपत्वं स्वतोऽवगम्यते । नहि

स्वतोऽविद्यमानं भासनमन्यस्य कर्तुं शक्तम । घटादीनामन्यावभासकत्वादर्शनाद्रूपाणां चादित्यादीनां तद्दर्शनात् ॥

इति पंचमी वल्ली ॥

तूलावधारणेनैव मूलावधारणं वृक्षस्य यथा क्रियते लोके, एवं संसारकार्यवृक्षावधारणेन तन्मूलस्य ब्रह्मण स्वरूपावधारयितव्येयं षष्ठी वल्ली आरभ्यते—

ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थ. सनातन ॥
तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते ।
तस्मिँल्लोकाः श्रिता सर्वे तदु नात्येति कश्चन । एतद्वै तत् ॥

ऊर्ध्वमूल ऊर्ध्वं मूलं यतस्निष्णो परमं पदमस्येति सोऽयमव्यक्तादिस्थावरान्तः संसारवृक्ष ऊर्ध्वमूल । वृक्षश्च वध्नात् । अविच्छिन्नजन्मजरामरणशोकाद्यनेकानर्थात्मक प्रतिक्षणमन्यथात्वभावो मायामरीच्युदकगंधर्वनगरादिवत दृष्टनष्टस्वरूपत्वादवसाने च वृक्षवदभावात्मक कदलीस्तंभवच्च सारोऽनेकशतपाखंडबुद्धिविकल्पास्पद तत्त्वविजिज्ञासुभिरनिर्धारितेदंतत्त्वो वेदान्तनिर्धारितपरब्रह्ममूलसार अविद्याकामकर्माव्यक्तबीजप्रभव अपरब्रह्मविज्ञानक्रियाशक्तिद्वयात्मकहिरण्यगर्भांकुर सर्वप्राणिलिंगभेदस्कंध तत्तत्तृष्णाजलासेकोद्भूतदर्पो बुद्धादिद्वारावपत्रप्रवालांकुर श्रुतिस्मृतिन्यायविद्योपदेशपलाशो यज्ञदानतपआद्यनेकक्रियासुपुष्प सुखदुःखवेदनानेकरसः प्राण्युपजीव्यानंतफल तत्तृष्णासलिलावसेकप्ररूढजटिलीकृतदृढबद्धमूल सत्यनामादिसप्तलोकब्रह्मादिभूतपक्षिकृतनीड प्राणिसुखदुःखोद्भूतहर्षशोकजातनृत्यगातवादित्रस्फोटितहसितारुष्टरुदितहाहामुंचमुंचेत्याद्यनेकशब्दकृततुमुलीभूतमहारवो वेदान्तविहितब्रह्मात्मदर्शनासंगशस्त्रकृतोच्छेद एष संसारवृक्षोऽश्वत्थोऽश्वत्थवत्कामकर्मवतिरितनित्यप्रचलितस्वभाव । स्वर्गनरकतिर्यक्प्रेतादिभि शाखाभिरवाक्शाख । सनातनोऽनादित्वाच्चिरं प्रवृत्त । यदस्य संसारवृक्षस्य मूलं तदेव शुक्रं शुभ्रं शुद्धं ज्योतिरमचैतन्यात्मज्योतिःस्वभावं तदेव ब्रह्म सर्वमहत्त्वात् । तदेवामृतमविनाशस्वभावमुच्यते कथ्यते सत्यत्वात् । वाचारंभणं विकारो नामधेयमनृतमन्यदतो मर्त्यम् । तस्मिन्परमार्थसत्ये ब्रह्मणि लोका गंधर्वनगरमरीच्युदकमायासमा परमार्थदर्शनाभावावगमना श्रिता आश्रिताः सर्वे समस्ता उत्पत्तिस्थितिलयेषु । तदु तद्ब्रह्म नात्येति नातिवर्तते मृदादिकमिव घटादिकार्य कश्चन कश्चिदपि विकारः । एतद्वै तत् ॥

यदिदं किंच जगत्सर्वं प्राण एजति निःसृतम्।
महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति ॥२॥

यद्विज्ञानादमृता भवन्तीत्युच्यते, जगतो मूलं तदेव नास्ति ब्रह्म असत एवेदं निःसृतमिति तन्न। यदिदं किंच यत्किंचेदं जगत्सर्वं प्राणे परस्मिन्ब्रह्मणि सत्येजति कंपते, तत एव निःसृतं निर्गतं सत्प्रचलति नियमेन चेष्टते। यदेवं जगदुत्पत्त्यादिकारणं ब्रह्म तन्महद्भयम। महच्च तद्भयं च बिभेत्यस्मादिति महद्भयम। वज्रमुद्यतमुद्यतमिव वज्रम। यथा वज्रोद्यतकरं स्वामिनमभिमुखीभूतं दृष्ट्वा भृत्या नियमेन तच्छासने वर्तन्ते, तथेदं चंद्रादित्यग्रहनक्षत्रतारकादिलक्षणं जगत्सेश्वरं नियमेन क्षणमप्यविश्रान्तं वर्तत इत्युक्तं भवति। य एतद्विदुः स्वात्मप्रवृत्तिसाक्षिभूतमेकं ब्रह्मामृता अमरणधर्माणस्ते भवन्ति॥

भयादस्याग्निस्तपति भयात्तपति सूर्यः।
भयादिंद्रश्च वायुश्च मृत्युर्धावति पंचमः ॥३॥

कथं तद्भयाज्जगद्वर्तत इत्याह— भयाद्ब्रह्मात्मास्य परमेश्वरस्याग्निस्तपति, भयात्तपति सूर्यो, भयादिंद्रश्च वायुश्च मृत्युर्धावति पंचम। न ह्यीश्वराणां लोकपालानां समर्थानां सतां नियन्तृ चेद्ब्रह्मोद्यतकरवन्न स्यात्स्वामिभयभीतानामिव भृत्यानां नियता प्रवृत्तिरुपपद्यते॥

इह चेदशकद्बोद्धुं प्राक्शरीरस्य विस्रसः।
ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते ॥४॥

तच्चेह जीवन्नेव हेयहेयशकच्छक्नोति शक्त सन जानात्येतद्भयकारणं ब्रह्म बोद्धुमवगन्तुं प्राक्पूर्वं शरीरस्य विस्रसोऽवस्रंसनात्पतनान्मंसारबंधनाद्विमुच्यते। न चेदशकद्बोद्धुं, ततोऽनवबोधात्सर्गेषु, सृज्यन्ते येषु स्रष्टव्या प्राणिन इति सर्गाः पृथिव्यादयो लोकास्तेषु सर्गेषु लोकेषु शरीरत्वाय शरीरभावाय कल्पते समर्थो भवति शरीरं गृह्णातीत्यर्थः॥ तस्माच्छरीरविस्रंसनात्प्रागात्मावबोधाय यत्न आस्थेयः॥ यस्मादृहेवात्मनो दर्शनमादर्शस्थस्येव मुखस्य स्पष्टमुपपद्यते न लोकान्तरेषु ब्रह्मलोकादन्यत्र स च दुष्प्रापः। कथमित्युच्यते—

यथादर्शे तथात्मनि यथा स्वप्ने तथा पितृलोके।
यथाप्सु परीव ददृशे तथा गंधर्वलोके छायातपयोरिव ब्रह्मलोके ॥५॥

यथादर्शे प्रतिबिंबभूतमात्मानं पश्यति लोकोऽत्यंतविविक्तं, तथेहात्मनि

स्वबुद्धावादर्शवन्निर्मलाभूताया विविक्तमात्मनो दर्शनं भवतीत्यर्थः । यथा स्वप्ने अविविक्तं जाग्रद्वासनोद्भूतं, तथा पितृलोकेऽविविक्तमेव दर्शनमात्मनः कर्मफलोपभोगासक्तत्वात् । यथा चास्वविविक्तावयवमात्मरूपं परीव दृश्ये परिदृश्यत इव, तथा गंधर्वलोकेऽविविक्तमेव दर्शनमात्मनः । एवं च लोकान्तरेष्वपि शास्त्रप्रामाण्यादवगम्यते । छायातपयोरिवात्यंताविविक्तं ब्रह्मलोक एवैकस्मिन् । स च दुष्प्रापोऽत्यंतविशिष्टकर्मज्ञानसाध्यत्वात् । तस्मादात्मदर्शनायैव यत्न कर्तव्य इत्यभिप्राय ॥

इंद्रियाणां पृथग्भावमुदयास्तमयौ च तत् ।
पृथगुत्पद्यमानानां मत्वा धीरो न शोचति ॥६॥

कथमसौ बोद्धव्य किं वा तदवबोधे प्रयोजनमित्युच्यते— इंद्रियाणां श्रोत्रादीना स्वस्वविषयग्रहणप्रयोजनेन स्वकारणेभ्य आकाशादिभ्य पृथगुत्पद्यमानानामत्यंतविशुद्धात्मैकबलाच्चिन्मात्रात्मस्वरूपात्पृथग्भावं स्वभावविलक्षणात्मकता, तथा तेषामेवेंद्रियाणामुदयास्तमयौ चोत्पत्तिप्रलयौ जाग्रत्स्वप्नावस्थापेक्षया नात्मनस्तौ इति मत्वा ज्ञात्वा विवेकतो धीरो धीमान्न शोचति । आत्मनो नित्यैकस्वभावत्वाव्यभिचाराच्छोककारणत्वानुपपत्तेः । तथा च श्रुत्यंतरं 'तरति शोकमात्मवित्' इति ॥

इंद्रियेभ्यः परं मनो मनस सत्त्वमुत्तमम् ।
सत्त्वादधि महानात्मा महतोऽव्यक्तमुत्तमम् ॥७॥

यस्मादात्मन इंद्रियाणा पृथग्भाव उक्तो नासौ बहिर्विगन्तव्यो यस्मात्प्रत्यगात्मा स सर्वस्य, तत्कथमित्युच्यते— इंद्रियेभ्य परं मन इत्यादि । अर्थानामिहेंद्रियसमानजातीयत्वादिंद्रियग्रहणेनैव ग्रहणम् । पूर्ववदन्यत् । सत्त्वशब्दात् बुद्धिरिह ॥

अव्यक्तात्तु पर पुरुषो व्यापकोऽलिंग एव च ।
यं ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति ॥८॥

अव्यक्तात्तु पर पुरुषो व्यापको, व्यापकस्याप्याकाशादे सर्वस्य कारणत्वात् अलिंगो लिंग्यते गम्यते येन तल्लिंगं बुद्ध्यादि, तदविद्यमानं यस्य सोऽयमलिंग एव च । सर्वसंसारधर्मवर्जित इत्येतत् । यं ज्ञात्वाचार्यत शास्त्रतश्च मुच्यते जन्तुः अविद्यादिहृदयग्रंथिभिर्जीवन्नेव, पतितेऽपि शरीरेऽमृतत्वं च गच्छति । सोऽलिंगः परोऽव्यक्तात्पुरुष इति पूर्वेणैव संबंध. ॥

न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् ।
हृदा मनीषा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति ॥९॥

कथं तर्हि तस्यात्मनोऽग्रहणं दर्शनमुपपद्यत इत्युच्यत—न संदृशे संदर्शनविषये न तिष्ठति प्रत्यगात्मनोऽस्य रूपम् । अतो न चक्षुषा सर्वेंद्रियेण, चक्षुर्ग्रहणस्योपलक्षणार्थत्वात्, पश्यति नोपलभते कश्चन कश्चिदप्येन प्रकृतमात्मानम् । कथं तर्हि तं पश्येदित्युच्यते—हृदा हृन्मयया बुद्ध्या । मनीषा मनस संकल्पादिरूपस्येष्टे नियन्तृत्वेनेति मनीषा तया मनोऽविकल्पयित्र्या बुद्धया । मनसा मननरूपेण सम्यग्दर्शनेन अभिक्लृप्तोऽभिसमर्थितोऽभिप्रकाशित इत्येतत् । आत्मा ज्ञातुं शक्य इति वाक्यशेष । तमात्मानं ब्रह्मैतद्ये विदुरमृतास्ते भवन्ति ॥

यदा पंचावतिष्ठन्ते ज्ञानानि मनसा सह ।
बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम् ॥१०॥

सा हृन्मनीषा कथं प्राप्यत इति तदर्थो योग उच्यते—यदा यस्मिन्काले स्वविषयेभ्यो निर्वर्तितान्यात्मन्येव पंच ज्ञानानि । ज्ञानार्थत्वाच्छ्रोत्रादीनींद्रियाणि ज्ञानान्युच्यन्ते । अवतिष्ठन्ते सह मनसा यदनुगतानि, तन संकल्पादिव्यापृत्तेर्नांतःकरणेन । बुद्धिश्चाध्यवसायलक्षणा न विचेष्टति स्वव्यापारेषु न व्यापियते, तामाहु परमां गतिम् ॥

तां योगमिति मन्यन्ते स्थिरामिंद्रियधारणाम् ।
अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ ॥११॥

तामीदृशीं तदवस्थां योगमित मन्यन्ते वियोगमेव सन्तम् । सर्वानर्थसंयोगवियोगलक्षणा हीयमवस्था योगिन । एतस्यां ह्यवस्थायामविद्याध्यारोपणवर्जितस्वरूपप्रतिष्ठ आत्मा । स्थिरामिंद्रियधारणां स्थिरामचलामिंद्रियधारणां बाह्यात करणानां धारणामित्यर्थ । अप्रमत्त प्रमादवर्जित समाधानं प्रति नित्यं यत्नवांस्तदा तस्मिन्काले, यदैव प्रवृत्तयोगो भवतीति सामर्थ्यादवगम्यते । न हि बुद्ध्यादिचेष्टाभावे प्रमादसंभवोऽस्ति । तस्मात्प्रागेव बुद्ध्यादिचेष्टापरमादप्रमादौ विधीयते । अथवा यदैवेंद्रियाणा स्थिरा धारणा, तदानामेव निरंकुशमप्रमत्तत्वमित्यतोऽभिधीयतेऽप्रमत्तस्तदा भवतीति । कुत । योगो हि यस्मात्प्रभवाप्ययौ उपजनापायधर्मक इत्यर्थ । अतोऽपायपरिहारायाप्रमाद कर्तव्य इत्यभिप्राय ॥

नैवा वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा ।
अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते ॥१२॥

बुद्ध्यादिचेष्टाविषयं चेन् ब्रह्मेदं तदिति विशेषतो गृह्येत, बुद्ध्याद्युपरमे च ग्रहणकारणाभावादनुपलभ्यमान नास्त्येव ब्रह्म । यद्धि करणगोचरं तदस्तीति प्रसिद्धं लोके विपरीत चासदिति । उतश्चानर्थको योगोऽनुपलभ्यमानत्वाद्वा नास्त्यात्युपलब्धव्यं ब्रह्मेत्येवं प्राप्त इदमुच्यते । सत्यम । नैव वाचा न मनसा न चक्षुषा नान्यैरपीन्द्रियै प्राप्तुं शक्यत इत्यर्थ । तथापि सर्वविशेषरहितोऽपि जगतो मूलमित्यवगतत्वादस्त्येव, कार्यप्रविलापनस्यास्तित्वनिष्ठत्वात । तथा हीदं कार्य सूक्ष्मतारतम्यपारंपर्येणानुगम्यमानं सद्बुद्धिनिष्ठामेवावगमयति । यदापि विषय-प्रविलापेन प्रविलाप्यमाना बुद्धि तदापि सा सत्प्रत्ययगर्भैव विलीयते । बुद्धिर्हि न प्रमाणं सदसतोर्याथात्म्यावगमे । मूलं चेज्जगतो न स्यात् अगदन्वित-मेवेदं कार्यमसदसदित्येव गृह्येत, न त्वेतदस्ति, सत्सदित्येव तु गृह्यते, यथा मृदादिकार्य घटादि मृदाद्यन्वितम । तस्माज्जगतो मूलमात्मास्तीत्येवोपलब्धव्य । कस्मात । अस्तीति ब्रुवतोऽस्तित्ववादिन आगमार्थानुसारिण श्रद्दधानादन्यत्र नास्तिकवादिनि नास्ति जगतो मूलमात्मा निरन्वयमेवेदं कार्यमभावान्तं प्रवि-लीयत इति मन्यमाने विपरीतदर्शिनि, कथं तद्ब्रह्म तत्त्वत उपलभ्यते, न कथं-चनोपलभ्यत इत्यर्थ ॥

अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयो ।
अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति ॥१३॥

तस्मादेषोऽयमसदादिपक्षमासुरं अस्तीत्येवात्मोपलब्धव्य सत्कार्यबुद्ध्याद्युपा-धिभि । यदा तु तद्रहितोऽविक्रिय आत्मा कार्य च कारणव्यतिरेकेण नास्ति 'वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं' इति श्रुते, तदा तस्य निरु-पाधिकस्यालिंगस्य सदसदादिप्रत्ययविषयत्ववर्जितस्यात्मनस्तत्त्वभावो भवति । तेन च रूपेणात्मोपलब्धव्य इत्यनुवर्तते । तत्राप्युभयो सोपाधिकनिरुपाधिकयो-रस्तित्वतत्त्वभावयो —निर्धारणार्था षष्ठी—पूर्वमस्तीत्येवोपलब्धस्यात्मन सत्का-र्योपाधिकृतास्तित्वप्रत्ययेनोपलब्धस्येत्यर्थ । पश्चात्प्रत्यस्तमितसर्वोपाधिरूप आत्म-नस्तत्त्वभावो विदिताविदिताभ्यामन्योऽद्वयस्वभावो 'नेति नेति' 'अस्थूलमन-ण्वहस्वं' 'अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने' इत्यादिश्रुतिनिर्दिष्ट प्रसीदत्यभिमुखी-भवति । आत्मप्रकाशनाय पूर्वमस्तीत्युपलब्धवत इत्येतत् ॥

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥१४॥

एवं परमार्थात्मदर्शिनो यदा यस्मिन्काले सर्वे कामाः कामयितव्यस्यान्यस्याभावात्प्रमुच्यन्ते विशीर्यन्ते, येऽस्य प्राक्प्रतिबोधाद्विदुषो हृदि बुद्धौ श्रिता आश्रिताः । बुद्धिर्हि कामानामाश्रयो नात्मा 'कामः संकल्पः' इत्यादिश्रुत्यंतराच्च । अथ तदा मर्त्य प्राक्प्रबोधादासीत्स प्रबोधोत्तरकालमविद्याकामकर्मलक्षणस्य मृत्योर्विनाशादमृतो भवति, गमनप्रयोजकस्य मृत्योर्विनाशाद्गमनानुपपत्तेः । अत्रैव प्रदीपनिर्वाणवत्सर्वबंधनोपशमात् ब्रह्म समश्नुते ब्रह्मैव भवतीत्यर्थः ॥

यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रंथयः ।
अथ मर्त्योऽमृतो भवत्येतावद्ध्यनुशासनम् ॥१५॥

कदा पुनः कामानां मूलतो विनाश इत्युच्यते— यदा सर्वे प्रभिद्यन्ते भेदमुपयान्ति विनश्यन्ति हृदयस्य बुद्धेरिह जीवत एव ग्रंथयो ग्रंथिवत् दृढबंधनरूपा अविद्याप्रत्यया इत्यर्थः । अहमिदं शरीरं ममेदं धनं सुखी दुःखी चाहमित्येवमादिलक्षणास्तद्विपरीतब्रह्मात्मप्रत्ययोपजननात् ब्रह्मैवाहमस्म्यसंसारीति विनष्टाविद्याग्रंथिषु तन्निमित्ता कामा मूलतो विनश्यन्ति । अथ मर्त्योऽमृतो भवत्येतावद्ध्येतावदेवैतावन्मात्रं नाधिकमस्तीत्याशंका कर्तव्या । अनुशासनमनुशिष्टिरुपदेशः सर्ववेदान्तानामिति वाक्यशेषः ॥

शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ॥१६॥

निरस्ताशेषविशेषव्यापिब्रह्मात्मप्रतिपत्त्या प्राभिन्नसमस्ताविद्यादिग्रंथेर्जीवत एव ब्रह्मभूतस्य विदुषो न गतिर्विद्यते 'अत्र ब्रह्म समश्नुते' इत्युक्तत्वात् 'न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येति' इति श्रुत्यंतराच्च । ये पुनर्मदब्रह्मविदो विद्यान्तरशीलिनश्च ब्रह्मलोकभाजो ये च तद्विपरीताः संसारभाजः, तेषामेष गतिविशेष उच्यते प्रकृतोत्कृष्टब्रह्मविद्याफलस्तुतये । किंचान्यदग्निविद्या पृष्टा प्रत्युक्ता च । तस्याश्च फलप्राप्तिप्रकारो वक्तव्य इति मंत्रारंभः । तत्र—शतं च शतसंख्याका एका च सुषुम्ना नाम पुरुषस्य हृदयाद्विनिःसृता नाड्यः शिराः, तासां मध्ये मूर्धानं भित्त्वाऽभिनिःसृता निर्गता एका सुषुम्ना नाम । तयोदन्तकाले हृदय आत्मानं वशीकृत्य योजयेत् । तया नाड्योर्ध्वमुपर्यायन्गच्छन्नादित्यद्वारेणामृतत्वममरण-

धर्मत्वमापेक्षिकम—"आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते" इति स्मृते— ब्रह्मणा वा सह कालान्तरेण मुख्यममृतत्वमेति भुक्त्वा भोगाननुपमान्ब्रह्मलोकगतान् । विद्वदनानाविधगतयोऽन्या नाड्य उत्क्रमणे भवन्ति संसारप्रतिपत्त्यर्था एव भवन्तीत्यर्थः ॥

अंगुष्ठमात्र पुरुषोऽन्तरात्मा सदा जनानां हृदये संनिविष्टः ॥
तं स्वाच्छरीरात्प्रवृहेन्मुंजादिवेषीकां धैर्येण ।
तं विद्याच्छुक्रममृतं तं विद्याच्छुक्रममृतमिति ॥१७॥

इदानीं सर्ववक्तव्यार्थोपसंहारार्थमाह— अंगुष्ठमात्र पुरुषोऽन्तरात्मा सदा जनानां संवेधिनि हृदये संनिविष्टो यथाव्याख्यातः, तं स्वादात्मायाच्छरीरात्प्रवृहेदुद्यच्छेन्निष्कर्षेत्पृथक्कुर्यादित्यर्थः । किमिवेत्युच्यते— मुंजादिवेषीकामंतर्त्वां धैर्येणाप्रमादेन । तं शरीरान्निष्कृष्टं चिन्मात्रं विद्याद्विजानीयाच्छुक्रं शुद्धममृतं यथोक्तं ब्रह्मेति । द्विर्वचनमुपनिषत्परिसमाप्त्यर्थमादरार्थं च ॥

मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिं च कृत्स्नम् ।
ब्रह्म प्राप्तो विरजोऽभूद्विमृत्युरन्योऽप्येवं यो विदध्यात्ममेव ॥१८॥

विद्यास्तुत्यर्थोऽयमाख्यायिकार्थोपसंहारोऽधुनोच्यते— मृत्युप्रोक्तां एतां यथोक्तां ब्रह्मविद्यां योगविधिं च कृत्स्नं समस्तं सोपकरणं सफलमित्येतत् । नचिकेतोऽथ वरप्रदानान्मृत्योर्लब्ध्वा प्राप्येत्यर्थः । किं? ब्रह्म प्राप्तोऽभून्मुक्तोऽभवदित्यर्थः । कथम्? विद्याप्राप्त्या विरजो विगतधर्माधर्मो विमृत्युर्विगतकामाविद्यश्च सम्पूर्वमित्यर्थः । न केवलं नचिकेता एवान्योऽपि य एव नचिकेतोवदात्मविदध्यात्ममेव निरुपचरितं प्रत्यक्स्वरूपं प्राप्य तत्त्वमेवेत्यभिप्रायः । नान्यद्रूपमप्रत्यग्रूपम् । तदेवमध्यात्ममेवमुक्तप्रकारेण वेद विजानातीत्येवंवित्सोऽपि विरजा सन्ब्रह्म प्राप्य विमृत्युर्भवतीति वाक्यशेषः ॥

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ॥ तेजस्वि
नावधीतमस्तु मा विद्विषावहै ॥१९॥ ॐ शान्तिः शान्तिः शान्तिः ॥

इति काठकोपनिषदि द्वितीयाध्याये तृतीया वल्ली ॥

शिष्याचार्ययोः प्रमादकृतान्यायेन विद्याग्रहणप्रतिपादनानिमित्तदोषप्रशमनार्थेयं शान्तिरुच्यते— सह नावावामवतु पालयतु विद्यास्वरूपप्रकाशनेन । कः? स एव परमेश्वर उपनिषत्प्रकाशितः । किंच सह नौ भुनक्तु तत्फलप्रकाशनेन नौ

पालयतु । सहवीर्यं विद्याकृतं वीर्यं सामर्थ्यं करवावहै निष्पादयावहै । किंच तेजस्वि नौ तेजस्वि नावावयोर्यदधीतं तत्स्वधीतमस्तु । अथवा तेजस्वि नावावाभ्यां यदधीतं तदतीव तेजस्वि वीर्यवदस्त्वित्यर्थः । मा विद्विषावहै शिष्याचार्यावन्योन्यं प्रमादकृतान्यायाध्ययनाध्यापनदोषनिमित्तं द्वेषं मा करवावहै इत्यर्थः । शान्तिः शान्तिः शान्तिरिति त्रिर्वचनं सर्वदोषोपशमनार्थमिति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपाद-शिष्यस्य श्रीशंकरभगवतः कृतौ कठोपनिषद्भाष्यं समाप्तम् ॥

॥ ॐ ॥

श्रीमच्छंकराचार्यविरचितेन पदभाष्येन युता

केनोपनिषत् ।

ॐ सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥ ॐ शान्ति शान्ति शान्ति ॥ ॐ आप्यायन्तु ममांगानि वाक्प्राणश्चक्षु श्रोत्रमथो बलमिंद्रियाणि च सर्वाणि सर्वं ब्रह्मौपनिषदं माहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ॥ ॐ शान्ति शान्ति शान्ति ॥

केनेषितमित्याद्योपनिषत्परब्रह्मविषया वक्तव्येति नवमस्याध्यायस्यारंभ । प्रागेतस्मात्कर्माण्यशेषत परिसमापितानि, समस्तकर्माश्रयभूतस्य च प्राणस्योपासनान्युक्तानि, कर्मांगसामविषयाणि च । अनंतरं च गायत्रसामविषयं दर्शनं वंशान्तमुक्तं कार्यम । सर्वमेतद्यथोक्तं कर्म च ज्ञानं च सम्यगनुष्ठितं निष्कामस्य मुमुक्षो सत्त्वशुद्ध्यर्थं भवति । सकामस्य तु ज्ञानरहितस्य केवलानि श्रौतानि स्मार्तानि च कर्माणि दक्षिणमार्गप्रतिपत्तये पुनरावृत्तये च भवन्ति । स्वाभाविक्या त्वशास्त्रीयया प्रवृत्त्या पश्वादिस्थावरान्ताधोगति स्यात । "अथैतयो पथोर्न कतरेणचन तानामानि क्षुद्राण्यसकृदावर्तानि भूतानि भवन्ति । जायस्व म्रियस्वेत्येतत्तृतीयं स्थानम ।" इति श्रुते , "प्रजा ह तिस्रो अत्यायमायु" इति मंत्रवर्णात् । विशुद्धसत्त्वस्य तु निष्कामस्यैव बाह्यादनित्यात्साध्यसाधनसंबंधादिह कृतात्पर्वकृताद्वा संस्कारविशेषोद्भवाद्विरक्तस्य प्रत्यगात्मविषया जिज्ञासा प्रवर्तते । तदेतद्वस्तु प्रश्नप्रतिवचनलक्षणया श्रुत्या प्रदर्श्यते केनेषितमित्याद्यया । काठके चोक्तम–'पराचि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङपश्यति नान्तरात्मन । कश्चिद्धीर प्रत्यगात्मनमैक्षदावृत्तचक्षुरमृतत्वमिच्छन' इत्यादि । 'परीक्ष्य लोकान्कर्मचित्तान्ब्राह्मणो निर्वेदमायान्नास्त्यकृत कृतेन । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणि श्रोत्रियं ब्रह्मनिष्ठम्' इत्याद्याथर्वणे च । एवं विरक्तस्य प्रत्यगात्मविषयं विज्ञान श्रोतु मन्तुं विज्ञातुं च सामर्थ्यमुपपद्यते नान्यथा । एतस्माच्च प्रत्यगात्मब्रह्मविज्ञानात्संसारबीजमज्ञानं कामकर्मप्रवृत्तिकारणमशेषतो निवर्तते,

'तत्र को मोह कः शोक एकत्वमनुपश्यत.' इति मंत्रवर्णात् 'तरति शोकमात्मवित्' 'भिद्यते हृदयग्रंथिश्छिद्यन्ते सर्वसंशया. । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे' इत्यादिश्रुतिभ्यश्च । कर्मसहितादपि ज्ञानादेतत्सिध्यतीति चेन्न । वाजसनेयके तस्यान्यकारणत्ववचनात् । 'जाया मे स्यात्' इति प्रस्तुत्य 'पुत्रेणायं लोको जय्यो नान्येन कर्मणा । कर्मणा पितृलोको विद्यया देवलोक.' इत्यात्मनोऽन्यस्य लोकत्रयस्य कारणत्वमुक्तं वाजसनेयके । तत्रैव च पारिव्राज्यविधाने हेतुरुक्त· । 'कि प्रजया करिष्यामो येषा नोऽयमात्मायं लोक ' इति । तत्रायं हेत्वर्थ. । प्रजाकर्मतत्संयुक्तविद्याभिर्मनुष्यपितृदेवलोकत्रयसाधनैरनात्मलोकप्रतिपत्तिकारणै कि करिष्याम· । न चास्माकं लोकत्रयमनित्यं साधनसाध्यमिष्टं, येषामस्माकं स्वाभाविकोऽजोऽजरोऽमृतोऽभयो न वर्धते कर्मणा नो कर्तीयान्नित्यश्च लोक इष्ट । स च नित्यत्वान्नाविद्यानिर्वृत्तिव्यतिरेकेणान्यसाधननिष्पाद्य । तस्मात्प्रत्यगात्मब्रह्मविज्ञानपर्वक सर्वेषणासंन्यास एव कर्तव्य इति । कर्मसहभावित्वविरोधाच्च प्रत्यगात्मब्रह्मविज्ञानस्य । न हि उपात्तकारकफलभेदविज्ञानेन कर्मणा प्रत्यस्तमितसर्वभेददर्शनस्य प्रत्यगात्मब्रह्मविषयस्य सहभावित्वमुपपद्यते, वस्तुप्राधान्ये सत्यपुरुषतंत्रत्वाद्ब्रह्मविज्ञानस्य । तस्मात दृष्टादृष्टेभ्यो बाह्यसाधनसाध्येभ्यो विरक्तस्य प्रत्यगात्मविषया ब्रह्मजिज्ञासेयं केनेषितमित्यादिश्रुत्या प्रदर्श्यते । शिष्याचार्यप्रश्नप्रतिवचनरूपेण कथन तु सूक्ष्मवस्तुविषयत्वात्सुखप्रतिपत्तिकारणं भवति । केवलतर्कागम्यत्व च दर्शित भवति । 'नैषा तर्केण मतिरापनेया' इति श्रुतेश्च । 'आचार्यवान्पुरुषो वेद' ''आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापदिति'' ''तद्विद्धि प्रणिपातेन'' इत्यादिश्रुतिस्मृतिन्यायाच्च, कश्चिद्वृत्तं ब्रह्मनिष्ठ विधिवदुपेत्य प्रत्यगात्मविषयादन्यत्र शरणमपश्यन्नभयं नित्यं शिवमचलमिच्छन्पप्रच्छेति कथ्यते—

ॐ केनेषितं पतति प्रेषितं मनः केन प्राण प्रथम प्रैति युक्त· ।
केनेषितां वाचमिमां वदन्ति चक्षु श्रोत्र क उ देवो युनक्ति ॥१॥

केनेषितमित्यादि । केनेषितं केन कर्त्रेषितमिष्टमभिप्रेत सन्मन. पतति गच्छति स्वविषयं प्रतीति संबध्यते । इषेराभीक्ष्ण्यार्थस्य गत्यर्थस्य चेहासंभवादिच्छार्थस्यैवैतद्रूपामिति गम्यते । इषितमितीष्टप्रयोगस्तु च्छान्दसस्तस्यैव प्रपूर्वस्य नियोगार्थे प्रेषितमित्येतत् । तत्र प्रेषितमित्येवोक्ते प्रेषयितृप्रेषणविशेषाविषयाकांक्षा

स्यात केन प्रेषयितृविशेषेण, कादृशं वा प्रेषणमिति । इषितमिति तु विशेषणे सति तदुभय निवर्तते, कस्येच्छामात्रेण प्रेषितमित्यर्थविशेषानिर्धारणात् । यद्येषोऽर्थोऽभिप्रेत स्यात्केनेषितमित्येतावतैव सिद्धत्वात्प्रेषितमिति न वक्तव्यम् । अपि च शब्दाधिक्यादर्थाधिक्य युक्तमिताच्छया कर्मणा वाचा, वा केन प्रेषितमित्यर्थविशेषोऽवगन्तुं युक्त । न, प्रश्नसामर्थ्यात्, देहादिसंघातादनित्यात्कर्मकार्याद्विरक्तोऽतोन्यत्कूटस्थं नित्यं वस्तु बुभुत्समान पृच्छतीति सामर्थ्यादुपपद्यते । इतरथेच्छावाक्कर्माभिदेहादिसंघातस्य प्रेरयितृत्व प्रसिद्धमिति प्रश्नोऽनर्थक एव स्यात् । एवमपि प्रेषितशब्दस्यार्थो न प्रदर्शित एव । न, संशयवतोऽयं प्रश्न इति प्रेषितशब्दस्यार्थविशेष उपपद्यते । किं यथाप्रसिद्धमेव कार्यकरणसंघातस्य प्रेषयितृत्वं, किंवा संघातव्यतिरिक्तस्य स्वतंत्रस्येच्छामात्रेणैव मनआदिप्रेषयितृत्वमित्यस्यार्थस्य प्रदर्शनार्थं केनेषितं पतति प्रेषितं मन इति विशेषणद्वयमुपपद्यते । ननु स्वतंत्रं मन स्वविषये स्वयं पततीति प्रसिद्धम । तत्र कथं प्रश्न उपपद्यत इति, उच्यते । यदि स्वतंत्रं मनः प्रवृत्तिनिवृत्तिविषये स्यात्तर्हि सर्वस्यानिष्टचिंतनं न स्यादनर्थं च जानन्संकल्पयति । अत्युग्रदुःखे च कार्ये वार्यमाणमपि प्रवर्तत एव मनः । तस्माद्युक्त एव केनेषितमित्यादिप्रश्न । केन प्राणो युक्तो नियुक्त प्रेरित सन्पतति गच्छति स्वव्यापारं प्रति । प्रथम इति प्राणविशेषण स्यात्तत्पूर्वकत्वान्मनोवृत्तीनाम् । केनेषिता वाचांमम। शब्दलक्षणां वदन्ति लौकिका: । तथा चक्षु श्रोत्र च स्वे स्व विषये क उ देवो द्योतनवान्युनक्ति नियुंक्ते प्रेरयति ॥

श्रोत्रस्य श्रोत्र मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणः ।
चक्षुषश्चक्षुरतिमुच्य धीरा प्रेत्यास्माल्लोकादमृता भवन्ति ॥२॥

एवं पृष्टवते यास्याह गुरुः शृणु त्वं यत्पृच्छसि मनआदिकरणजातस्य को देवः स्वविषयं प्रति प्रेरयिता कथं वा प्रेरयतीति । श्रोत्रस्य श्रोत्रं श्रूयतेऽनेनेति श्रोत्रं, शब्दस्य श्रवणं प्रति करणं शब्दाभिव्यंजकं श्रोत्रमिंद्रियं तस्य श्रोत्रं स यस्त्वया पृष्टश्चक्षु श्रोत्रं क उ देवो युनक्तीति । असावेवंविशिष्टः श्रोत्रादीनि नियुक्त इति वक्तव्ये, नन्वेतदननुरूपं प्रतिवचनं श्रोत्रस्य श्रोत्रमिति । नैष दोषः तस्यान्यथाविशेषानवगमात् । यदि हि श्रोत्रादिव्यापारव्यतिरिक्तेन स्वव्यापारेण विशिष्ट श्रोत्रादिनियोक्तावगम्येत दात्रादिप्रयोक्तृवत्तदेदमननुरूपं प्रतिवचनं

स्यात् । न त्विह श्रोत्रादीनां प्रयोक्ता स्वव्यापाराविशिष्टो लिङ्गादिवदधिगम्यते । श्रोत्रादीनामेव तु संहतानां व्यापारेणालोचनसंकल्पाध्यवसायलक्षणेन फलावसानलिङ्गेनावगम्यते, अस्ति हि श्रोत्रादिभिरसंहतैः, यत्प्रयोजनप्रयुक्त श्रोत्रादिकलापो गृहादिवदिति संहताना परार्थत्वादवगम्यते श्रोत्रादीनां प्रयोक्ता । तस्मादनुरूपमेवेदं प्रतिवचनं श्रोत्रस्य श्रोत्रमित्यादि । क· पुनरत्र पदार्थः श्रोत्रस्य श्रोत्रमित्यादेः? नन्वत्र श्रोत्रस्य श्रोत्रान्तरेणार्थ., यथा प्रकाशस्य प्रकाशान्तरेण नैष दोष· अयमत्र पदार्थः । श्रोत्रं तावत्स्वविषयव्यंजनसमर्थं दृष्टम् । तच्च स्वविषयव्यंजनसामर्थ्यं श्रोत्रस्य चैतन्ये ह्यात्मज्योतिषि नित्येऽसंहते सर्वान्तरे सति भवति नासतीति । अत· श्रोत्रस्य श्रोत्रमित्याद्युपपद्यते । तथा च श्रुत्यंतराणि—'आत्मनेवायं ज्योतिषास्ते' 'तस्य भासा सर्वमिदं विभाति' 'येन सूर्यस्तपति तेजसेद्ध' इत्यादीनि । "यदादित्यगतं तेजो जगद्भासयतेऽखिलम्" "क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत" इत्यादि गीतासु । काठके च—'नित्योऽनित्यानां चेतनश्चेतनानाम्' इति । श्रोत्रादेश्च सर्वस्यात्मभूतं चैतन्यमिति प्रसिद्धं तदिह निवर्त्यते । अस्ति किमपि विद्वद्बुद्धिगम्यं सर्वान्तरतमं कूटस्थमजमजरममृतमभयं श्रोत्रादेरपि श्रोत्रादि तत्सामर्थ्यनिमित्तमिति प्रतिवचनं शब्दार्थश्चोपपद्यत एव । तथा मनसोऽन्तःकरणस्य मन । न ह्यंतःकरणमंतरेण चैतन्यज्योतिषा दर्शितं स्वविषयसंकल्पाध्यवसायादिसमर्थं स्यात् । तस्मान्मनसोऽपि मन इति । इह बुद्धिमनसी एकीकृत्य निर्देशो मनस इति । यद्वाचो ह वाचं, यच्छब्दो यस्मादर्थे श्रोत्रादिभिः सर्वैः सबध्यते । यस्माच्छ्रोत्रस्य श्रोत्रं यस्मान्मनसो मन इत्येवम् । वाचो ह वाचमिति द्वितीया प्रथमात्वेन विपरिणम्यते प्राणस्य प्राण इति दर्शनात् । वाचो ह वाचमित्येतदनुरोधेन प्राणस्य प्राणमिति कस्मात् द्वितीयैव न क्रियते । न । बहूनामनुरोधस्य युक्तत्वाद्वाचामित्यस्य वागित्येतावदुक्तव्यं स उ प्राणस्य प्राण इति शब्दद्वयानुरोधेन । एवं हि बहूनामनुरोधो युक्तः कृतः स्यात् । पृष्टं च वस्तु प्रथमयैव निर्देष्टुं युक्तम् । स यस्त्वया पृष्टः प्राणस्य प्राणाख्यवृत्तिविशेषस्य प्राणस्तत्कृतं हि प्राणस्य प्राणनसामर्थ्यम् । न ह्यात्मनोऽनधिष्ठितस्य प्राणनमुपपद्यते । 'को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनंदो न स्यात्' 'ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति' इत्यादिश्रुतिभ्यः । इहापि च वक्ष्यते— 'येन प्राणः प्रणीयते तदेव ब्रह्म त्वं विद्धि' [१.९] इति । श्रोत्रादीद्रियप्रस्तावे घ्राणस्येव प्राणस्य नतु युक्त ग्रहणम् । सत्यमेवं, प्राणग्रहणेनैव तु घ्राणस्य ग्रहणं कृतमेव मन्यते श्रुतिः । सर्वस्यैव करणकलापस्य

यदर्थप्रयुक्ता प्रवृत्तिस्तद्ब्रह्मेति प्रकरणार्थो विवक्षितः । तथा चक्षुषश्चक्षु रूपप्रकाशकस्य चक्षुषो यद्रूपग्रहणसामर्थ्यं तदात्मचैतन्याधिष्ठितस्यैव । अतः चक्षुषश्चक्षुः । प्रष्टुः प्रष्टस्यार्थस्य ज्ञातुमिष्टत्वाच्छ्रोत्रादेः श्रोत्रादिलक्षणं यथोक्तं ब्रह्म 'ज्ञात्वा' इत्यध्याह्रियते, अमृता भवन्तीति फलश्रुतेश्च । ज्ञानाद्ध्यमृतत्वं प्राप्यते । ज्ञात्वा अतिमुच्य इति सामर्थ्याच्छ्रोत्रादिकरणकलापमुज्ज्ञित्वा श्रोत्रादौ ह्यात्मभावं कृत्वा तदुपाधि. संस्तदात्मना जायते म्रियते संसरति च । अतः श्रोत्रादेः श्रोत्रादिलक्षणं ब्रह्मात्मेति विदित्वाऽतिमुच्य श्रोत्राद्यात्मभावं परित्यज्य, ये श्रोत्राद्यात्मभावं परित्यजन्ति ते धीरा धीमन्त. । नहि विशिष्टधीमत्त्वमंतरेण श्रोत्राद्यात्मभाव· शक्यः परित्यक्तुम् । प्रेत्य व्यावृत्यास्माल्लोकात्पुत्रामित्रकलत्रबंधुषु ममाहंभावसंव्यवहारलक्षणात्त्यक्तसर्वैषणा भूत्वेत्यर्थ । अमृता अमरणधर्माणो भवन्ति । 'न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः' 'परांचि खानि व्यतृणत आवृत्तचक्षुरमृतत्वमिच्छन' 'यदा सर्वे प्रमुच्यन्ते. .अत्र ब्रह्म समश्नुते' इत्यादिश्रुतिभ्य. । अथवाऽतिमुच्येत्यनेनैवैषणात्यागस्य सिद्धत्वादस्माल्लोकात्प्रेत्यास्माच्छरीरात्प्रेत्य मृत्वेत्यर्थ·॥

न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः।
न विद्मो न विजानीमो यथैतदनुशिष्यात् ॥३॥

यस्माच्छ्रोत्रादेरपि श्रोत्राद्यात्मभूतं ब्रह्म अतो न तत्र तस्मिन्ब्रह्मणि चक्षुर्गच्छति स्वात्मनि गमनागंभवात् । तथा न वाग्गच्छति । वाचा हि शब्द उच्चार्यमाणोऽभिधेयं प्रकाशयति यदा, तदाभिधेयं प्रति वाग्गच्छतीत्युच्यते । तस्य च शब्दस्य तच्छब्दवर्तकस्य च करणस्यात्मा ब्रह्म । अतो न वाग्गच्छति । यथाग्निर्दाहक· प्रकाशकश्चापि सन्न ह्यात्मानं प्रकाशयति दहति वा तद्वत् । नो मनो मनश्चान्यस्य संकल्पयित्रध्यवसायितृ च सन्नात्मानं संकल्पयत्यध्यवस्यति च, तस्यापि ब्रह्मात्मेति । इंद्रियमनोभ्या हि वस्तुनो विज्ञानं, तदागोचरत्वान्न विद्मस्तद्ब्रह्मेदृशमिति । अतो न विजानीमो यथा येन प्रकारेणैतद्ब्रह्मानुशिष्यादुपदिशेच्छिष्याय्येत्यभिप्रायः । यद्धि करणगोचरं, तदन्यस्मा उपदेष्टुं शक्यं जातिगुणक्रियाविशेषणैं. । न तज्जात्यादिविशेषणवद्ब्रह्म । तस्माद्विषमं शिष्यानुपदेशेन प्रत्याययितुं इति उपदेशे तदर्थग्रहणे च यत्नातिशयकर्तव्यता दर्शयति– न विद्म इत्यादि ॥

अन्यदेव तद्विदितादथो अविदितादधि ।
इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे ॥४॥

अत्यंतमेवोपदेशप्रकारप्रत्याख्याने प्राप्ते तदपवादोऽयमुच्यते । सत्यमेवं प्रत्यक्षादिभिः प्रमाणैर्न परः प्रत्याययितुं शक्य, आगमेन तु शक्यत एव प्रत्यायायितुं इति तदुपदेशार्थमागममाह—अन्यदेव तद्विदितादथो अविदितादधीति । अन्यदेव पृथगेव तद्यत्प्रकृतं श्रोत्रादीना श्रोत्रादात्युक्तमविषयं च तेषाम् । तद्विदितादन्यदेव हि । विदितं नाम यद्विदिक्रियायातिशयेनाप्तं विदिक्रियाकर्मभूतं, क्वचित्किंचित्कस्यचिद्विदितं स्यादिति सर्वमेव व्याकृतं विदितमेव, तस्मादन्यदेवेत्यर्थ । अविदितमजातं तद्धीति प्राप्ते आह—अथो, अविदितादविदितविषरीतादव्याकृतादविद्यालक्षणाद्व्याकृतबीजात् । अधात्युपर्यर्थे लक्षणयान्यदित्यर्थ । यद्धि यस्मादध्युपरि भवति तत्तस्मादन्यदिति प्रसिद्धं, यद्विदितं तदल्पं सत्यं दुःखात्मकं चेति हेयम । तस्माद्विदितादन्यद्ब्रह्मेत्युक्ते त्वहेयत्वमुक्तं स्यात । तथाऽविदितादधीत्युक्तेऽनुपादेयत्वमुक्तं स्यात । कार्यार्थं हि कारणमन्यदन्येनोपाधीयतेऽतश्च न वेदितुरन्यस्मै प्रयोजनायान्यदुपादेयं भवतीत्येवं विदिताविदिताभ्यामन्यदिति हेयोपादेयप्रतिषेधेन स्वात्मनोऽनन्यत्वात ब्रह्मविषया जिज्ञासा शिष्यस्य निवर्तिता स्यात । न ह्यन्यस्य स्वात्मनो विदिताविदिताभ्यामन्यत्वं वस्तुन संभवतीत्यात्मा ब्रह्मेत्येष वाक्यार्थः । 'अयमात्मा ब्रह्म' य आत्माऽपहतपाप्मा' 'यत्साक्षादपरोक्षाद्ब्रह्म' 'य आत्मा सर्वान्तर ' इत्यादि श्रुत्यंतरेभ्यश्च । इत्येवं सर्वात्मनः सर्वविशेषरहितस्य चिन्मात्रज्योतिषो ब्रह्मत्वप्रतिपादकस्य वाक्यार्थस्याचार्योपदेशपरंपरया प्राप्तत्वमाह— इति शुश्रुमेत्यादि । ब्रह्म चैवमाचार्योपदेशपरंपरयैवाधिगन्तव्यं न तर्कतः प्रवचनमेधाबहुश्रुततपोयज्ञादिभ्यश्चेत्येवं शुश्रुम श्रुतवन्तो वयं पूर्वेषामाचार्याणा वचनम । य आचार्या नोऽस्मभ्य तत ब्रह्म व्याचचक्षिरे व्याख्यातवन्तो विस्पष्टं कथितवन्तस्तेषामित्यर्थ ॥

यद्वाचाऽनभ्युदितं येन वागभ्युद्यते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥५॥

'अन्यदेव तद्विदितादथो अविदितादधि' इत्यनेन वाक्येनात्मा ब्रह्मेति प्रतिपादिते श्रोतुराशंका जाता तत्कथं वात्मा ब्रह्म । आत्मा हि नामाधिकृतः कर्मण्युपासने च संसारी कर्मोपासनं वा साधनमनुष्ठाय ब्रह्मादिदेवान्स्वर्गं वा प्राप्तुमिच्छति । तत्तस्मादन्य उपास्यो विष्णुर्गणेश्वर इंद्रः प्राणो वा ब्रह्म भवितुमर्हति न त्वात्मा लोकप्रत्ययविरोधात् । यथान्ये तार्किका ईश्वरादन्य आत्मेत्याचक्षते

तथा कर्मिण. अमुं यजामुं यज इत्यन्या एव देवता उपासते । तस्मादयुक्तं यद्विदितमुपास्यं तद्ब्रह्म भवेत्तदोऽन्य उपासक इति । तामेतामाशंका शिष्यलिंगेनोपलक्ष्य तद्वाक्यायाह- मैवं शंकिष्ठाः । यच्चैतन्यमात्रसत्ताकं वाचा-- । वागिति जिह्वामूलादिष्वष्टसु स्थानेषु विपक्तमाग्नेयं वर्णानामभिव्यंजकं करणं, वर्णाश्चार्थसंकेतपरिच्छिन्ना एतावन्त एवंक्रमप्रयुक्ता इत्येवं तदभिव्यंग्यशब्द. पदं वागित्युच्यते. "अकारो वै सर्वा वाक्सैषास्य स्पर्शान्तस्थोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति" इति श्रुतेः । मितममितं स्वर. सत्यानृते एव विकारो यस्यास्तया वाचा पदत्वेन परिच्छिन्नया करणगुणवत्या-- । अनभ्युदितमप्रकाशितमनभ्युक्तम । येन ब्रह्मणा विवक्षितेऽर्थे सकरणा वागभ्युद्यते चैतन्यज्योतिषा प्रकाश्यते प्रयुज्यत इत्येतत् । यत् 'वाचो ह वाक' इत्युक्तं वदन्वाक । 'यो वाचमंतरो यमयति' इत्यादि च वाजसनेयके । "या वाक्पुरुषेषु सा घोषेषु प्रतिष्ठिता कश्चित्तां वेद ब्राह्मणः इति प्रश्नमुत्थाप्य प्रतिवचनमुक्तम्, "सा वाग्यया स्वप्ने भाषते" इति । सा हि वक्तुर्वक्तिनित्या वाक्चैतन्यज्योति स्वरूपा 'न हि वक्तुर्वक्तेर्विपरिलोपो विद्यते' इति श्रुतेः । तदेवात्मस्वरूपं ब्रह्म निरतिशयं भूमाख्यं बृहत्त्वाद्ब्रह्मेति विद्धि विजानीहि त्वं यैर्वाणा उपाधिभि 'वाचो ह वाक्चक्षुषश्चक्षु श्रोत्रस्य श्रोत्रं मनसो मन' 'कर्ता भोक्ता विज्ञाता नियन्ता प्रशासिता' 'विज्ञानमानंदं ब्रह्म' इत्येवमादय संव्यवहारा असंव्यवहार्ये निर्विशेषे परे साम्ये ब्रह्मणि प्रवर्तन्ते, तान्व्युदस्यात्मानमेव निर्विशेषं ब्रह्म विद्धीत्येवशब्दार्थः । नेदं ब्रह्म यदिदमित्युपाधिभेदविशिष्टमनात्मेश्वरायुपासते तायायिनः । तदेव ब्रह्म त्वं विद्धीत्युक्तेऽपि नेदं ब्रह्मेत्यनात्मनोऽब्रह्मत्वं पुनरुच्यते नियमार्थमन्यब्रह्मबुद्धिपरिसंख्यानार्थं वा ॥

यन्मनसा न मनुते येनाहुर्मनो मतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥६॥

यन्मनसा न मनुते । मन इत्यंतःकरणं बुद्धिमनसोरेकत्वेन गृह्यते । मनुतेऽनेनेति मनः सर्वकरणसाधारणं सर्वविषयव्यापकत्वात् 'कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' इति श्रुतेः कामादिवृत्तिमन्मनः तेन मनसा यच्चैतन्यज्योतिर्मनसोऽवभासकं न मनुते न संकल्पयति नापि निश्चिनोति मनसोऽवभासकत्वेन नियन्तृत्वात् । सर्वविषयं प्रति प्रत्यगेवेति स्वात्मनि न प्रवर्ततेऽन्तःकरणम् । अंतस्थेन हि चैतन्यज्योतिषावभासितस्य

मनसो मननसामर्थ्यं, तेन सवृत्तिकं मनो येन ब्रह्मणा मत विषयीकृतं व्याप्तमाहुः कथयन्ति ब्रह्मविदः । तस्मात्तदेव मनस आत्मानं प्रत्यक्चैतन्यितारं ब्रह्म विद्धि । नेदमित्यादि पूर्ववत ॥

यैच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥७॥

यच्चक्षुषा न पश्यति न विषयीकरोत्यंत करणवृत्तिसंयुक्तेन लोकः, येन चक्षूंष्यंतःकरणवृत्तिभेदभिन्नाश्चक्षुर्वृत्तीः पश्यति चैतन्यात्मज्योतिषा विषयीकरोति व्याप्नोति ॥

यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदꣳ श्रुतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥८॥

यच्छ्रोत्रेण न शृणोति दिग्देवताधिष्ठितेनाकाशकार्येण मनोवृत्तिसंयुक्तेन न विषयीकरोति लोको, येन श्रोत्रमिदं श्रुतं यत्प्रसिद्धं चैतन्यात्मज्योतिषा विषयीकृतं तदेवेत्यादि पूर्ववत् ॥

यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥९॥

॥ इति प्रथमः खंडः ॥

यत्प्राणेन घ्राणेन पार्थिवेन नासिकापुटान्तरवर्त्तिनान्त करणप्राणवृत्तिभ्यां सहितेन यन्न प्राणिति गंधवन्न विषयीकरोति, येन चैतन्यात्मज्योतिषावभास्यत्वेन स्वविषयं प्रति प्राणः प्रणीयते तदेवेत्यादि सर्वं समानम् ॥

यदि मन्यसे सुवेदेति दभ्रमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपं यदस्य त्वं यदस्य देवेष्वथ नु मीमांस्यमेव ते मन्ये विदितम् ॥१॥

एवं हेयोपादेयविपरीतस्वमात्मा ब्रह्मेति प्रत्यायित शिष्योऽहमेव ब्रह्मेति सुष्ठु वेदाहमिति मा गृह्णीयादित्याशंक्याह आचार्य शिष्यबुद्धिविचालनार्थं यदीत्यादि । ननु इष्टैव सु वेदाहमिति निश्चिता प्रतिपत्तिः, सत्यमिष्टा निश्चिता प्रतिपत्तिर्न हि सुवेदाहमिति । यद्धि वेद्यं वस्तु विषयीभवति तत्सुष्ठु वेदितुं शक्यं, दाह्यमिव दग्धुमग्नेर्दग्धुर्न त्वग्नेः स्वरूपमिव । सर्वस्य हि वेदितुः स्वात्मा ब्रह्मेति सर्ववेदान्तानां सुनिश्चितोऽर्थः । इह च तदेव प्रतिपादितं प्रश्नप्रतिवचनोक्त्या 'श्रोत्रस्य श्रोत्रं' [१ २] इत्याद्यया । 'यद्वाचा-

नम्युदितं [१ ४] इति च विशेषतोऽवधारितम । ब्रह्मवित्संप्रदायनिश्चयश्चोक्तो 'अन्यदेव तद्विदितादथो अविदितादधि' [१ ३] इत्युपन्यस्तमुपसंहरिष्यति च 'अविज्ञातं विजानता विज्ञातमविजानता' [२ ३] इति । तस्मादयुक्तमेव शिष्यस्य सुवेदेति बुद्धि निराकर्तुम । न हि वेदिता वेदितुर्वेदितुं शक्योऽग्निरिव दग्धुमग्नेः । न चान्यो वेदिता ब्रह्मणोऽस्ति यस्य वेद्यमन्यत्स्यात् ब्रह्म । 'नान्यदतोऽस्ति विज्ञातृ' इत्यन्यो विज्ञाता प्रतिषिध्यते । तस्मात्सुष्ठु वेदाहं ब्रह्मेति प्रतिपत्तिर्मिथ्यैव । तस्मादयुक्तमेवाहाचार्यो यदित्यादि । यदि कदाचिन्मन्यसे सु वेदेति सुष्ठु वेदाहं ब्रह्मेति । कदाचिद्यथाश्रुतं दुर्विज्ञेयमपि क्षीणदोषः सुमेधाः कश्चित्प्रतिपद्यते कश्चिन्नेति गाथकमाह यदित्यादि । दृष्ट च 'न रूपोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्म इत्युक्ते प्राजापत्य पंडितोऽप्यसुररादविरोचनः स्वभावदोषवशादनुपपद्यमानमपि विपरीतमर्थं शरीरमात्मेति प्रतिपन्न. । तथेद्रो देवराट् सकृत द्विस्त्रिरुक्त चापतिपद्यमान स्वभावदोषक्षयमपेक्ष्य चतुर्थे पर्याये प्रथमोक्तमेव ब्रह्म प्रतिपन्नवान । लोकेऽप्येकस्मादुरो श्रुत्वा कश्चिद्यथावत्प्रतिपद्यते कश्चिदयथावत्कश्चिद्विपरीतं कश्चिन्न प्रतिपद्यते किमु वक्तव्यमतीन्द्रियमात्मतत्त्वम । अत्र हि विप्रतिपन्ना सदसद्वादिनस्तार्किकाः सर्वे । तस्मात् विदितं ब्रह्मेति सुनिश्चितोक्तमपि विषमपतिपत्तित्वाद्यदि मन्यस इत्यादि साधकं वचनं युक्तमेवाचार्यस्य । दभ्रमल्पमेवापि नूनं त्वं वेत्थ जानीषे ब्रह्मणो रूपम । किमनेकानि ब्रह्मणो रूपाणि महान्त्यभ्रकाणि च येनाह दभ्रमेवेत्यादि । बाढम । अनेकानि हि नामरूपोपाधिकृतानि ब्रह्मणो रूपाणि न स्वत । स्वतस्तु 'अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगंधवच्च यत' इति शब्दादिभि सह रूपाणि प्रतिषिध्यन्ते । ननु येनैव धर्मेण यद्दृश्यते तदेव तस्य स्वरूपमिति ब्रह्मणोऽपि येन विशेषेण निरूपणं तदेव तस्य रूपं स्यादत उच्यते—चैतन्यं पृथिव्यादीनामन्यतमस्य सर्वेषा विपरिणताना वा धर्मो न भवति, तथा श्रोत्रादीनामंतःकरणस्य च धर्मो न भवतीति ब्रह्मणो रूपमिति ब्रह्म रूप्यते चैतन्येन । तथा चोक्तम्—'विज्ञानमानंदं ब्रह्म' 'विज्ञानघन एव' 'सत्यं ज्ञानमनंतं ब्रह्म' 'प्रज्ञानं ब्रह्म' इति च ब्रह्मणो रूपं निर्दिष्टं श्रुतिषु । सत्यमेवं तथापि तदंतःकरणदेहेंद्रियोपाधिद्वारेणैव विज्ञानादिशब्दैर्निर्दिश्यते तदनुकारित्वाद्देहादिबुद्धिसंकोचच्छेदादिषु नाशेषु च, न स्वतः । स्वतस्तु अविज्ञात विजानतां विज्ञातमवि-

जानतां [२.३] इति स्थितं भविष्यति । यदस्य ब्रह्मणो रूपमिति पूर्वेण संबंधः । न केवलमध्यात्मोपाधिपरिच्छिन्नस्यास्य ब्रह्मणो रूपं त्वमल्पं वेत्थ, यदप्यधिदैवतोपाधिपरिच्छिन्नस्यास्य ब्रह्मणो रूपं देवेषु वेत्थ त्वं, तदपि नूनं दभ्रमेव वेत्थेति मन्येऽहम । यदध्यात्मं यदपि देवेषु तदपि चोपाधिपरिच्छिन्नत्वाद्दहरत्वान्न निवर्तते । यत्तु विध्वस्तसर्वोपाधिविशेषं शान्तमनंतमेकमद्वैतं भूमाख्यं नित्यं ब्रह्म न तत्संवेद्यमित्यभिप्राय । यत एवमथ नु तस्मान्मन्येऽद्यापि मीमांस्यं विचार्यमेव ते तव ब्रह्म । एवमाचार्योक्तः शिष्य एकान्त उपविष्टः समाहितः सन्यथोक्तं आचार्येणागममर्थतो विचार्य तर्कतश्च निर्धार्य स्वानुभवं कृत्वाचार्यसकाशमुपगम्योवाच-- मन्येऽहमथेदानीं विदितं ब्रह्मेति ॥

नाहं मन्ये सुवेदेति नो न वेदेति वेद च ।
यो नस्तद्वेद तद्वेद नो न वेदेति वेद च ॥२॥

कथमिति शृणुत । नाहं मन्ये सु वेदेति, नैवाहं मन्ये सु वेद ब्रह्मेति । नैव तर्हि विदितं त्वया ब्रह्मत्युक्त आह-- नो न वेदेति वेद च । वेद चेति चशब्दान्न वेद च । ननु विप्रतिषिद्धं नाहं मन्ये सु वेदेति, नो न वेदेति, वेद चेति । यदि न मन्यसे सु वेदेति, कथं मन्यसे वेद चेति । अथ मन्यसे वेदेवेति कथं न मन्यसे सुवेदेति । एकं वस्तु येन ज्ञायते तेनैव तदेव वस्तु **न** सुविज्ञायत इति विप्रतिषिद्धं संशयविपर्ययौ वर्जयित्वा । न च ब्रह्म संशयितत्वेन ज्ञेयं विपरीतत्वेन वेति नियन्तुं शक्यम् । संशयविपर्ययौ हि सर्वत्रानर्थकरत्वेनैव प्रसिद्धौ । एवमाचार्येण विचार्यमाणोऽपि शिष्यो न विचचाल । 'अन्यदेव तद्विदितादथो अविदितादधि' [१ ३] इत्याचार्योक्तागमसंप्रदायबलादुपपत्त्यनुभवबलाच्च, जगर्ज च ब्रह्मविद्यायां दृढनिश्चयता दर्शयन्नात्मनः । कथमित्युच्यते । यो यः कश्चिन्नोऽस्माकं सब्रह्मचारिणा मध्ये तन्मदुक्तं वचनं तत्त्वतो वेद स तद्ब्रह्म वेद । किं पुनस्तद्वचनमित्यत आह— नो न वेदेति वेद चेति । यदेव 'अन्यदेव तद्विदितादथो अविदितादधि' इत्युक्तं तदेव वस्त्वनुमानानुभवाभ्यां संयोज्य निश्चितं वाक्यान्तरेण नो न वेदेति वेद चेत्यवोचदाचार्यबुद्धिसंवादार्थं मंदबुद्धिग्रहणव्यपोहार्थं च । तथा च गर्जितमुपपन्नं भवति यो नस्तद्वेदेति ॥

यस्यामतं तस्य मतं मतं यस्य न वेद स ।
अविज्ञातं विजानतां विज्ञातमविजानताम् ॥३॥

शिष्याचार्यसंवादात्प्रतिनिवृत्य स्वेन रूपेण श्रुति समस्तसंवादानिवृत्तमर्थमेव बोधयति— यस्यामतमित्यादिना । यस्य ब्रह्मविदोऽमतमविज्ञातमविदितं ब्रह्मेति मतमभिप्रायो निश्चयः तस्य मत ज्ञातं सम्यग्ब्रह्मेत्यभिप्राय. । यस्य पुनर्मत ज्ञातं विदितं मया ब्रह्मेति निश्चयो, न वेदैव स न ब्रह्म विजानाति सः । विद्वद्विदुषोर्यथोक्तौ पक्षावव्यवधारयति— अविज्ञातममतमविदितमेव ब्रह्म विजानतां सम्यग्विदितवतामित्येतत् । विज्ञातं विदितं ब्रह्माविजानतामसम्यग्दर्शिनामिन्द्रियमनोबुद्धिष्वेवात्मदर्शिनामित्यर्थः, न त्वत्यंतमेवाव्युत्पन्नबुद्धीनाम् । न हि तेषा विज्ञातमस्माभिर्ब्रह्मेति मतिर्भवति । इंद्रियमनोबुद्ध्युपाधिष्वात्मदर्शिना तु ब्रह्मोपाधिविवेकानुपलंभात् बुद्ध्याद्युपाधेश्च विज्ञातत्वाद्विदितं ब्रह्मेत्युपपद्यते भ्रान्तिरित्यतोऽसम्यग्दर्शनं पूर्वपक्षत्वेनोपन्यस्यते विज्ञातमविजानतामिति । अथवा हेत्वर्थ उत्तरार्धो अविज्ञातमित्यादिः ॥

प्रतिबोधविदितं मतममृतत्वं हि विंदते ।
आत्मना विंदते वीर्यं विद्यया विंदतेऽमृतम् ॥४॥

अविज्ञातं विजानतामित्यवधृतम् । यदि ब्रह्मात्यंतमेवाविज्ञातं लौकिकानां ब्रह्मविदां चाविशेष प्राप्त । अविज्ञातं विजानतामिति च परस्परविरुद्धम । कथं तु तत् ब्रह्म सम्यग्विदितं भवतात्येवमर्थमाह— प्रतिबोधविदितं बोधं बोधं प्रति विदितम । बोधशब्देन बौद्धाः प्रत्यया उच्यन्ते । सर्वे प्रत्यया विषयीभवन्ति यस्य स आत्मा सर्वबोधान्प्रतिबुध्यते सर्वप्रत्ययदर्शी चिच्छक्तिस्वरूपमात्रः प्रत्ययैरेव प्रत्ययेष्वविशिष्टतया लक्ष्यते, नान्यदद्वारमात्मनो विज्ञानाय । अतः प्रत्ययप्रत्यगात्मतया विदितं ब्रह्म यदा तदा तन्मतं तत्सम्यग्दर्शनमित्यर्थः । सर्वप्रत्ययदर्शित्वे चोपजननापायवर्जितदृक्स्वरूपता नित्यत्वं विशुद्धस्वरूपत्वमात्मत्वं निर्विशेषैतकत्व च सर्वभूतेषु सिद्धं भवेत् । लक्षणभेदाभावान्नेम इव घटगिरिगुहादिषु । विदितावविदिताभ्यामन्यद्ब्रह्मेत्यागमवाक्यार्थः एवं परिशुद्ध एवोपसंहृतो भवति । 'दृष्टेर्द्रष्टा श्रुतेः श्रोता मतेर्मन्ता विज्ञातेर्विज्ञाता' इति हि श्रुत्यंतरम । यदा पुनर्बोधक्रियाकर्तेति बोधक्रियालक्षणेन तत्कर्तारं विजानातीति बोधलक्षणेन विदितं प्रतिबोधविदितमिति व्याख्यायते, यथा यो वृक्षशाखाश्चालयति स वायुरिति तद्वत् । तदा बोधक्रियाशक्तिमानात्मा द्रव्यं न बोधस्वरूप एव । बोधस्तु जायते विनश्यति च । यदा बोधो जायते तदा बोधक्रियया सविशेषः ।

यदा बोधो नश्यति तदा नष्टबोधो द्रव्यमात्रं निर्विशेषः । तत्रैवं सति विक्रियात्मकः सावयवोऽनित्योऽशुद्ध इत्यादयो दोषा न परिहर्तुं शक्यन्ते । यद्यपि काणादानां आत्ममनःसंयोगजो बोध आत्मनि समवैति, अत आत्मनि बोदधृत्वं नतु विक्रियात्मक आत्मा, द्रव्यमात्रस्तु भवति घट इव रागसमवायी । अस्मिन्पक्षेऽप्यचेतनं द्रव्यमात्रं ब्रह्मेति 'विज्ञानमानंदं ब्रह्म' इत्याद्याः श्रुतयो बाधिताः स्युः । आत्मनो निरवयवत्वेन प्रदेशाभावान्नित्यसंयुक्तत्वाच्च मनसः स्मृत्युत्पत्तिनियमानुपपत्तिरपरिहार्या स्यात । संसर्गधर्मित्वं चात्मनः श्रुतिस्मृतिन्यायविरुद्धं कल्पितं स्यात् । 'असंगो न हि सज्यते' "असक्तं सर्वभृत्" इति श्रुतिस्मृता । न्यायश्च गुणवद्गुणवता संसृज्यते नातुल्यजातीयम । अतो निर्गुणं निर्विशेषं सर्वविलक्षणं केनचिदप्यतुल्यजातीयेन संसृज्यत इत्येतन्न्यायविरुद्धं भवेत । तस्मान्नित्यात्मप्रविज्ञानस्वरूपज्योतिरात्मा ब्रह्मेत्ययमर्थः सर्वबोधबोदधृत्व आत्मनः सिध्यति नान्यथा । तस्मात् प्रतिबोधविदितं मतामति यथाव्याख्यात एवार्थोऽस्माभिः । यत्पुनः स्वसंवेद्यता प्रतिबोधविदितमित्यस्य वाक्यस्यार्थो वर्ण्यते, तत्र भवति सोपाधिकत्वं आत्मनो बुद्ध्युपाधिस्वरूपत्वेन भेदं परिकल्प्यात्मनात्मानं वेत्तीति संव्यवहारः 'आत्मनैवात्मानं पश्यति' "स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम" इति । ननु निरुपाधिकस्यात्मन एकत्वे स्वसंवेद्यता परसंवेद्यता वा संभवति । संवेदनस्वरूपत्वात्संवेदनान्तरापेक्षा च न संभवति यथा प्रकाशस्य प्रकाशान्तरापेक्षायां न संभवस्तद्वत । बौद्धपक्षे स्वसंवेद्यतायां तु क्षणभंगुरत्वं निरात्मकत्वं च विज्ञानस्य स्यात । 'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वात्' 'नित्यं विभुं सर्वगतं' 'स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयः' इत्याद्याः श्रुतयो बाध्येरन । यत्पुनः प्रतिबोधशब्देन निर्निमित्तो बोधः प्रतिबोधो यथा सुप्तस्येत्यर्थं परिकल्पयन्ति, सकृद्विज्ञानं प्रतिबोध इत्यपरे, निर्निमित्तः सनिमित्तः सकृद्वाऽसकृद्वा प्रतिबोध एव हि सः । अमृतत्वममरणभावं स्वात्मन्यवस्थानं मोक्षं हि यस्माद्विदते लभते यथोक्तात्प्रतिबोधात्प्रतिबोधविदितात्मकात्तस्मात्प्रतिबोधाविदितमेव मतामित्यभिप्रायः । बोधस्य हि प्रत्यगात्मविषयं च मतममृतत्वे हेतुः । न ह्यात्मनोऽनात्मत्वममृतत्वं भवति आत्मत्वादात्मनोऽमृतत्वं निर्निमित्तमेव । एवं मर्त्यत्वमात्मनो यदविद्ययाऽनात्मत्वप्रतिपत्ति । कथं पुनर्यथोक्तयात्मविद्ययामृतत्वं विदत इत्यत आह— आत्मना स्वेन रूपेण

विदते लभते वार्यं बलं सामर्थ्यं, धनसहायमंत्रौषधितपोयोगकृतं वार्यं मृत्युं न शक्नोत्यभिभवितुमनित्यवस्तुकृतत्वात् । आत्मविद्याकृतं तु वार्यमात्मनैव विदते नान्येनत्यतोऽनन्यसाधनत्वादात्मविद्यावार्यस्य तदेव वार्यं मृत्युं शक्नोत्यभिभवितुम । यत एवमात्मविद्याकृतं वार्यमात्मनैव विदतेऽतो विषयात्मविषयया विदतेऽमृतमसृतत्वम । 'नायमात्मा बलहीनेन लभ्य ' इत्यार्थर्वणे । अत समर्थो हेतु· अमृतत्वं हि विदत इति ॥

इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः ।
भूतेषु भूतेषु विचित्य धीरा. प्रेत्यास्माल्लोकादमृता भवन्ति ॥५॥

॥ इति द्वितीय खंड ॥

कष्टा खलु सुरनरतिर्यक्प्रेतादिषु संसारदुःखबहुलेषु प्राणिनिकायेषु जन्मजरामरणरोगादिसंप्राप्तिरज्ञानात । अत इहैव चेन्मनुष्येऽधिकृतः समर्थ सन्यद्यवेदीदात्मानं यथोक्तलक्षण विदितवान्यथोक्तेन प्रकारेण, अथ तदास्ति सत्यं मनुष्यजन्मन्यस्मिन्नविनाशेऽर्थवत्ता वा सद्भावो वा परमार्थता वा सत्यं विद्यते । न चेदिहावेदादिति, न चेदिह जानंश्चेदधिकृतोऽवेदान्न विदितवास्तदा महती दीर्घानंता विनष्टिर्विनाशनं जन्मजरामरणादिप्रबंधाविच्छेदलक्षणा संसारगति. । तस्मादिदं गुणदोषौ विज्ञानन्तो ब्राह्मणा भूतेषु भूतेषु सर्वभूतेषु स्थावरेषु चरेषु चैकमात्मतत्त्व ब्रह्म विचित्य विज्ञाय साक्षात्कृत्य धारा धीमंतः प्रेत्य व्यावृत्य ममाहंभावलक्षणादविद्यारूपादस्माल्लोकादुपरम्य सर्वात्मैकभावमद्वैतमापन्ना सन्तोऽमृता भवन्ति ब्रह्मैव भवन्तीत्यर्थः । 'स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति' इति श्रुतेः ॥ इति द्वितीयः खंड ॥

ब्रह्म ह देवेभ्यो विजिग्ये तस्य ह ब्रह्मणो विजये देवा अमहीयन्त ।
त ऐक्षन्तास्माकमेवायं विजयोऽस्माकमेवायं महिमेति ॥१॥

ब्रह्म ह देवेभ्यो विजिग्ये 'अविज्ञातं विजानता विज्ञातमविजानताम्' इत्याविश्रवणाद्यदस्ति तद्विज्ञातं प्रमाणैर्यन्नास्ति तदविज्ञातं शशविषाणकल्पमत्यंतमेवासत् दृष्टम । तथेदं ब्रह्माविज्ञातत्वादसदेवेति मंदबुद्धीना व्यामोहो मा भूदिति तदर्थेयमाख्यायिकारभ्यते । तदेव हि ब्रह्म सर्वप्रकारेण प्रशास्तृ देवानामपि परो देव , ईश्वराणामपीश्वरो, दुर्विज्ञेयो, देवाना जयहेतु·, असुराणां पराजयहेतु. तत्कथं

नास्तीत्येतस्यार्थस्यानुकूलानि ह्युत्तराणि वचांसि दृश्यन्ते । अथवा ब्रह्मविद्यायाः स्तुतये । कथं ? ब्रह्मविज्ञानाद्ध्यग्न्यादयो देवा देवानां श्रेष्ठत्वं जग्मुः ततोऽप्यतितरामिद्र इति । अथवा दुर्विज्ञेयं ब्रह्मेत्येतत्प्रदर्श्यते । येनाग्न्यादयोऽतितेजसोऽपि क्लेशेनैव ब्रह्म विदितवन्तस्तथेद्रो देवानामीश्वरोऽपि सन्निति । वक्ष्यमाणोपनिषद्विधिपरं वा सर्वम । ब्रह्मविद्याव्यतिरेकेण प्राणिना कर्तृत्वभोक्तृत्वाद्यभिमानो मिथ्येत्येतदर्शनार्थं वाख्यायिका, यथा देवानां जयाद्यभिमानस्तद्वदिति । ब्रह्म यथोक्तलक्षणं परं ह किल देवेभ्योऽर्थाय विजिग्ये जयं लब्धवद्देवानाममुराणा च संग्रामे ऽसुरान्जित्वा जगदरातीनीश्वरेसतृभेत्तृन्देवेभ्यो जयं तत्फलं च प्रायच्छज्जगतः स्थेम्ने । तस्य ह किल ब्रह्मणो विजये देवा अग्न्यादयोऽमहीयन्त महिमानं प्राप्नुवन्त· । तदात्मसंस्थस्य प्रत्यगात्मन ईश्वरस्य सर्वज्ञस्य सर्वक्रियाफलसंयोजयितु· प्राणिना सर्वशक्तेर्जगत स्थिति चिकीर्षोरयं जयो महिमा चेत्यजानन्तस्ते देवा ऐक्षन्तेक्षितवन्तोऽग्न्यादिस्वरूपपरिच्छिन्नात्मकृतोऽस्माकमेवायं विजयोऽस्माकमेवायं महिमाऽग्निर्वायुरित्यादिलक्षणो जयफलभूतोऽस्माभिरनुभूयते नास्मत्प्रत्यगात्मभूतेश्वरकृत इति ॥

तद्धैषां विजज्ञौ तेभ्यो ह प्रादुर्बभूव तन्न व्यजानत किमिदं यक्षमिति ॥२॥

एव मिथ्याभिमानेक्षणवता तद्ध किलैषां मिथ्येक्षणं विजज्ञौ विज्ञातवद्ब्रह्म । सर्वेक्षितृ हि तत्सर्वभूतकरणप्रयोक्तृत्वाद्देवाना च मिथ्याज्ञानमुपलभ्य मैवामुरवद्देना मिथ्याभिमानात्पराभवेयुरिति तदनुकंपया देवान्मिथ्याभिमानापनोदेननानुगृह्णीयामिति तेभ्यो देवेभ्यो ह किलार्थाय प्रादुर्बभूव स्वयोगमाहात्म्यनिर्मितेनात्यद्भुतेन विस्मापनीयेन रूपेण देवानामिद्रियगोचरे प्रादुर्बभूव । तत्प्रादुर्भूतं ब्रह्म न व्यजानत नैव विज्ञातवन्तो देवाः । किमिदं यक्षं पूज्यं महद्भूतमिति ॥

तेऽग्निमब्रुवञ्जातवेद एतद्विजानीहि किमेतद्यक्षमिति तथेति ॥३॥ तदभ्यद्रवत्तमभ्यवदत्कोऽसीत्यग्निर्वा अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीति ॥४॥ तस्मिंस्त्वयि किं वीर्यमित्यपीदꣳ सर्वं दहेयं यदिदं पृथिव्यामिति ॥५॥ तस्मै तृणं निदधावेतद्दहेति तदुपप्रेयाय सर्वजवेन तन्न शशाक दग्धुं स तत एव निववृते नैतदशकं विज्ञातुं यदेतद्यक्षमिति ॥६॥

ते तदजानन्तो देवाः सान्तर्भयास्तद्विजिज्ञासवोऽग्निमग्रगामिनं जातवेदसं सर्वज्ञकल्पमब्रुवन्नुक्तवन्तो, हे जातवेद एतदस्मद्गोचरस्थं यक्षं विजानीहि विजि-

षतो बुध्यस्व त्वं नस्तेजस्त्वं किमेतद्यक्षमिति । तथास्त्विति तद्यक्षमभ्यद्रवत्तत्प्रति गतवानग्निः तं च गतवन्तं पिपृच्छिषुं तत्समीपेऽप्रगल्भत्वात्तूष्णीभूतं तद्यक्षमभ्यवददग्ने प्रत्यभाषत कोऽसीति । एवं ब्रह्मणा पृष्टोऽग्निरब्रवीदग्निर्वा अग्निनामाहं प्रसिद्धो जातवेदा इति च नामद्वयेन प्रसिद्धतयात्मानं श्लाघयन्निति' । एवमुक्तवंतं ब्रह्मावोचत्तस्मिन्नेवं प्रसिद्धगुणनामवति त्वयि किं वीर्यं सामर्थ्यमिति । सोऽब्रवीदिदं जगत्सर्वं दहेयं भस्मीकुर्यां यदिदं स्थावरादि पृथिव्यामिति । पृथिव्यामित्युपलक्षणार्थं यतोऽन्तरिक्षस्थमपि दह्यत एवाग्निना । तस्मा एवमभिमानवते ब्रह्म तृणं निदधौ पुरोऽग्ने. स्थापितवत् । ब्रह्मणा एतत्तृणमात्रं समाप्नुतो दह, न चेदगि दग्धुं समर्थो मुंच दग्धुत्वाभिमानं सर्वत्रेत्युक्तस्तत्तृणमुपप्रेयाय तृणसमीपं गतवान्सर्वजवेन सर्वोत्साहकृतेन वेगेन, गत्वा न शशाक नाशकद्दग्धुं, स जातवेदास्तृणं दग्धुमशक्तो व्रीडितो हतप्रतिज्ञस्तत एव यक्षादेव तूष्णी देवान्प्रति निवर्तते निवृत्तः प्रतिगतवान नैतद्यक्षमशकं शक्तवानहं विज्ञातुं विशेषतो यदेतद्यक्षमिति ॥

अथ वायुमब्रुवन्नयवेतद्विजानीहि किमेतद्यक्षमिति तथेति ॥७॥ तदभ्यद्रवत्तमभ्यवदत्कोऽसीति वायुर्वा अहमस्मीत्यब्रवीन्मातरिश्वा वा अहमस्मीति ॥८॥ तस्मिंस्त्वयि किं वीर्यमित्यपीदꣳ सर्वमादद्दीय यदिदं पृथिव्यामिति ॥९॥ तस्मै तृणं निदधावेतदादत्स्वेति तदुपप्रेयाय सर्वजवेन तन्न शशाकादातुं स तत एव निववृते नैतदशकं विज्ञातुं यदेतद्यक्षमिति ॥१०॥

अथानंतरं वायुमब्रुवन्हे वायो एतद्विजानीहीत्यादि समानार्थं पूर्वेण । वानाद्गमनाद्गंधनाद्वा वायुः । मातर्यतरिक्षे श्वयतीति मातरिश्वा । इदं सर्वमप्यादर्दाय गृह्णीयाम । यदिदं पृथिव्यामित्यादि समानमेव ॥

अथेंद्रमब्रुवन्मघवन्नेतद्विजानीहि किमेतद्यक्षमिति तथेति तदभ्यद्रवत्तस्मात्तिरोदधे ॥११॥ स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीं तां होवाच किमेतद्यक्षमिति ॥१२॥

॥ इति तृतीयः खंड. ॥

अथेंद्रमब्रुवन्मघवन्नेतद्विजानीहीत्यादि पूर्ववत् । इंद्रः परमेश्वरो मघवा बलवत्त्वात्तथेति तदभ्यद्रवत्तस्मादिंद्रादात्मसमीपं गतात्तद्ब्रह्म तिरोदधे तिरोभूतं इंद्रस्येंद्रत्वाभिमानोऽतितरां निराकर्तव्य इत्यतः संवादमात्रमपि नादात् ब्रह्मेंद्राय । तद्यक्षं यस्मिन्नाकाश आकाशप्रदेश आत्मानं दर्शयित्वा तिरोभूतमिंद्रश्च ब्रह्मण-

स्तिरोधानकाले यस्मिन्नाकाश आसीत्स इंद्रस्तस्मिन्नेवाकाशे तस्थौ किं तद्यक्षमिति ध्यायन्न निवर्त्तेऽन्यादिवत्तस्येदस्य यक्षे भक्ति बुद्ध्वा विद्योमारूपिणी प्रादुरभूत्स्त्रीरूपा । स इंद्रस्तामुमां बहुशोभमानां,—सर्वेषा हि शोभमानानां शोभनतमा विद्या तदा बहुशोभमानेति विशेषणमुपपन्नं भवति—हैमवतीं हेमकृताभरणवतीमिव बहुशोभमानामित्यर्थ. । अथवोमैव हिमवतो दुहिता हैमवती नित्यमेव सर्वज्ञेनेश्वरेण सह वर्तत इति ज्ञातुं समर्थेति कृत्वा तामुपजगाम । इंद्रस्ता होमां किलोवाच पप्रच्छ ब्रूहि किमेतद्दर्शयित्वा तिरोभूतं यक्षमिति ॥

सा ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये महीयध्वमिति ततो हैव विदांचकार ब्रह्मेति ॥१॥

सा ब्रह्मेति होवाच ह किल ब्रह्मणो वै ईश्वरस्यैव विजये, ईश्वरेणैव जिता असुरा यूयं तत्र निमित्तमात्रं तस्यैव विजये,यूयं महीयध्वं महिमानं प्राप्नुथ । एतदिति क्रियाविशेषणार्थम् । मिथ्याभिमानस्तु युष्माकं अस्माकमेवायं विजयोऽस्माकमेवायं महिमेति । ततस्तस्मादुमावाक्यादेव विदांचकार ब्रह्मेतीद्र· अवधारणात्ततो हैवेति न स्वातंत्र्येण ॥

तस्माद्वा एते देवा अतितरामिवान्यान्देवान्यदग्निर्वायुरिंद्रस्ते ह्येनन्नेदिष्ठं पस्पर्शुस्ते ह्येनत्प्रथमो विदाचकार ब्रह्मेति ॥२॥

यस्मादग्निवाय्विंद्रा एते देवा ब्रह्मणः संवाददर्शनादिना सामीप्यमुपगताः, तस्मादैश्वर्यगुणैरततितरामिव शक्तिगुणादिमहाभाग्यैरन्यान्देवानतिततरामतिशयेन शेरत इवैते देवा· । इवशब्दोऽनर्थकोऽवधारणार्थो वा । यदग्निर्वायुरिंद्रस्ते हि देवा यस्मादेनद्ब्रह्म नेदिष्ठमंतिकतमं प्रियतमं पस्पर्शु स्पृष्टवन्तो यथोक्तैर्ब्रह्मणः संवादादिप्रकारैस्ते हि यस्माच्च हेतोरेनद्ब्रह्म प्रथमः प्रथमा. प्रधाना· सन्त इत्येतद्विदाचकार विदांचक्रुरित्येतद्ब्रह्मेति ॥

तस्माद्वा इंद्रोऽतितरामिवान्यान्देवान्स ह्येनन्नेदिष्ठं पस्पर्श स ह्येनत्प्रथमो विदांचकार ब्रह्मेति ॥३॥

यस्मादग्निवायू अपींद्रवाक्यादेव विदांचक्रुरिंद्रेण ह्युमावाक्यात्प्रथमं श्रुतं ब्रह्मेति तस्माद्वा इंद्रोऽतितरामतिशयेन शेत इवान्यान्देवान्स ह्येनन्नेदिष्ठं पस्पर्श यस्मात्स ह्येनत्प्रथमो विदांचकार ब्रह्मेत्युक्तार्थं वाक्यम् ॥

तस्यैष आदेशो यदेतद्विद्युतो व्यद्युतदा३ इतीन्यमीमिषदा३ इत्यधिदैवतम् ॥४॥

तस्य प्रकृतस्य ब्रह्मण एष आदेशो उपमोपदेशो, निरुपमस्य ब्रह्मणो येनोपमानेनोपदेशः सोऽयमादेश इत्युच्यते । किं तत् यदेतत्प्रसिद्धं लोके विद्युतो व्यद्युतद्विद्योतनं कृतवदित्येतदनुपपन्नमिति विद्युतो विद्योतनमिति कल्प्यते । आ इत्युपमार्थे । विद्युतो विद्योतनमिवेत्यर्थः । "यथा सकृद्विद्युतं" इति श्रुत्यन्तरे च दर्शनाद्विद्युदिव हि सकृदात्मानं दर्शयित्वा तिरोभूतं ब्रह्म देवेभ्यः । अथवा विद्युतस्तेज इत्यध्याहार्यम् । व्यद्युतद्विद्योतितवत्, आ इव । विद्युतस्तेजः सकृद्विद्योतितवदिवेत्यभिप्रायः । इतिशब्द आदेशप्रतिनिर्देशार्थ इत्ययमादेश इति । इच्छब्दः समुच्चयार्थः । अयं चापरस्तस्यादेशः । कोऽसौ ? न्यमीमिषत् यथा चक्षुर्न्यमीमिषन्निमेषं कृतवत् । स्वार्थे णिच् । उपमार्थ एवाकारः । चक्षुषो विषयं प्रति प्रकाशतिरोभाव इव चेत्यर्थः । इत्याधिदैवतं देवताविषयं ब्रह्मण उपमानदर्शनम् ॥

अथाध्यात्मं यदेतद्गच्छतीव च मनोऽनेन चैतदुपस्मरत्यभीक्ष्णं संकल्पः ॥५॥

अथानंतरमध्यात्मं प्रत्यगात्मविषय आदेश उच्यते । यदेतद्गच्छतीव च मनः एतद्ब्रह्म दीपकल्प इव विषयाकारेणेव यच्चानेन मनसैतद्ब्रह्मोपस्मरति समीपतः स्मरति साधकोऽभीक्ष्णं मुहुर्मुहुः । संकल्पश्च मनसो ब्रह्मविषयः । मनउपाधिकत्वाद्धि मनसः संकल्पस्मृत्यादिप्रत्ययैरभिव्यज्यते ब्रह्म, विषयाकियमाणमिव । अतः स एष ब्रह्मणोऽध्यात्मादेशो, विद्युन्निमेषणवदधिदैवतं द्युतप्रकाशनधर्मि, अध्यात्मं च मन प्रत्ययसमकालाभिव्यक्तिधर्मि, इत्येष आदेशः । एवमादिश्यमानं हि ब्रह्म मदबुद्धिगम्यं भवतीति ब्रह्मण आदेश उपदेशः । नहि निरुपाधिकमेव ब्रह्म मंदबुद्धिभिराकलयितुं शक्यम् ॥

तद्ध तद्वनं नाम तद्वनमित्युपासितव्यं स य एतदेवं वेदाभि हैनं सर्वाणि भूतानि संवांछन्ति ॥६॥

किंच तद्ब्रह्म ह किल तद्वनं नाम तस्य वनं तद्वनं तस्य प्राणिजातस्य प्रत्यगात्मभूतत्वाद्वननीयं संभजनीयमतस्तद्वनं नाम प्रख्यातं ब्रह्म तद्वनमिति यतः, तस्मात्तद्वनमित्यनेनैव गुणाभिधाननेनोपासितव्यं चिंतनीयम् । अनेन नाम्नोपासनस्य फलमाह—स यः कश्चिदेतद्यथोक्तं ब्रह्मैवं यथोक्तगुणं वेदोपास्तेऽभि हैनमुपासकं सर्वाणि भूतान्यभिसंवांछन्ति ह प्रार्थयन्त एव यथा ब्रह्म ॥

उपनिषदं भो ब्रूहीत्युक्ता त उपनिषद्ब्राह्मीं वाव त उपनिषदमब्रूमेति ॥७॥

एवमनुशिष्टः शिष्य आचार्यमुवाच उपनिषदं रहस्यं यच्चित्यं भो भगवन्ब्रूहि इति । एवमुक्तवति शिष्य आहाचार्य उक्ताभिहिता ते तवोपनिषत् । का पुनः सेत्याह— ब्राह्मीं ब्रह्मणः परमात्मन इयं ता, परमात्मविषयत्वादतीतविज्ञानस्य, वावैव त उपनिषदमब्रूमेत्युक्तामेव परमात्मविषयामुपनिषदमब्रूमेत्यवधारयत्युत्तरार्थम् । परमात्मविषयामुपनिषदं श्रुतवत उपनिषदं भो ब्रूहीति पृच्छत शिष्यस्य कोऽभिप्राय ' यदि तावच्छ्रुतस्यार्थस्य प्रश्नः कृत ततः पिष्टपेषणवत्पुनरुक्तोऽनर्थकः प्रश्न स्यात् । अथ सावशेषोक्तोपनिषत्स्यात्ततस्तस्या फलवचनेनोपसंहारो न युक्त. 'प्रेत्यास्माल्लोकादमृता भवन्ति' [१ २] इति । तस्मादुक्तोपनिषच्छेषविषयोऽपि प्रश्नोऽनुपपन्न. एवानवशेषितत्वात् । कस्तर्ह्यभिप्रायः प्रष्टुरित्युच्यते । किं पूर्वोक्तोपनिषच्छेषतया तत्सहकारिसाधनान्तरापेक्षा, अथ निरपेक्षैव ' सापेक्षा चेदपेक्षितविषयामुपनिषदं ब्रूहि । अथ निरपेक्षा चेदवधारय पिप्पलादवत् नातः परमस्तीत्येवमभिप्राय । एतदुपपन्नमाचार्यस्यावधारणवचनं उक्ता त उपनिषदिति । ननु नावधारणमिदं, यतोऽन्यद्वक्तव्यमाह 'तस्यै तपो दम' [१ ८] इत्यादि । सत्यं वक्तव्यमुच्यत आचार्येण । नतूक्तोपनिषच्छेषतया तत्सहकारिसाधनान्तराभिप्रायेण वा किंतु ब्रह्मविद्याप्राप्त्युपायाभिप्रायेण वेदैस्तदंगैश्च सहपाठेन समीकरणात्तप प्रभृतीनाम् । न हि वेदाना शिक्षाद्यंगाना च साक्षाद्ब्रह्मविद्याशेषत्वं तत्सहकारिसाधनत्वं वा संभवति । सहपठितानामपि यथायोगं विभज्य विनियोगस्यादिति चेन्नयथा सूक्तवाकानुमंत्रणमंत्राणा यथादैवतं विभागस्तथा तपोदमकर्मसत्यादीनामपि ब्रह्मविद्याशेषत्वं तत्सहकारिसाधनत्वं वेति कल्प्यते । वेदाना तदंगानां चार्थप्रकाशकत्वेन कर्मात्मज्ञानोपायत्वमित्येवं न्याय्यं विभागो युज्यतेऽर्थसंबंधोपपत्तिसामर्थ्यादिति चेत् । नायुक्तं । न न्याय्यं विभागो घटना प्राप्नोति । न हि सर्वक्रियाकारकफलभेदबुद्धितिरस्कारिण्या ब्रह्मविद्याया. शेषापेक्षा सहकारिसाधनसंबंधो वा युज्यते । सर्वविषयव्यावृत्तप्रत्यगात्मविषयनिष्ठत्वाच्च ब्रह्मविद्यायास्तत्फलस्य च निःश्रेयसस्य "मोक्षमिच्छन्सदा कर्म त्यजेदेव समाधनम । त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदम्" तस्मात्कर्मणा सहकारित्वं कर्मशेषापेक्षा न वा ज्ञानस्योपपद्यते । ततोऽमदेव सूक्तवाकानुमंत्रणवद्यथायोगं विभाग इति । तस्मादवधारणार्थतैव प्रश्नप्रतिवचनस्योपपद्यते । एतावत्येवेयमुपनिषदुक्तान्यनिरपेक्षा अमृतत्वाय ॥

तस्यै तपो दम. कर्मेति प्रतिष्ठा वेदाः सर्वांगाणि सत्यमायतनम् ॥८॥

यामिमा ब्राह्मीमुपनिषदं तवाग्रेऽब्रूमेति तस्यै तस्या उक्तायाः उपनिषदः प्राप्त्युपायभूतानि तपआदीनि । तप कायेंद्रियमनसा समाधानम् । दम उपशमः। कर्माग्निहोत्रादि । एतैर्हि संस्कृतस्य सत्त्वशुद्धिद्वारा तत्त्वज्ञानोत्पत्तिर्दृष्टा । दृष्टा ह्यमृदितकल्मषस्योक्तेऽपि ब्रह्मण्यप्रतिपत्तिर्विपरीतप्रतिपत्तिश्च, यथेंद्रविरोचनप्रभृतीनाम् । तस्मादिह वार्तेषु वा बहुषु जन्मान्तरेषु तपआदिभिः कृतसत्त्वशुद्धेर्ज्ञानं समुत्पद्यते यथाश्रुतम् । "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" इति मंत्रवर्णात । "ज्ञानमुत्पद्यते पुंसा क्षयात्पापस्य कर्मण " इति स्मृतेश्च । इतिशब्द उपलक्षणत्वप्रदर्शनार्थ. । इत्येवमाद्यन्यदपि ज्ञानोत्पत्तेरुपकारकं "अमानित्वमदंभित्वं" इत्याद्युपदर्शितं भवति । प्रतिष्ठा पादौ पादाविवास्यास्तेषु हि सत्सु प्रतीतिष्ठति ब्रह्मविद्या प्रवर्तते, पद्भ्यामिव पुरुष । वेदाश्चत्वार· सर्वाणि चांगानि शिक्षादीनि षट कर्मज्ञानप्रकाशकत्वाद्वेदाना तद्रक्षणार्थत्वादंगाना प्रतिष्ठात्वम् । अथवा प्रतिष्ठाशब्दस्य पादरूपकल्पनार्थत्वाद्वेदाश्चत्वारि सर्वांगाणि शिरआदीनि । अस्मिन्पक्षे शिक्षादीनां वेदग्रहणेनैव ग्रहणं कृतं प्रत्येतव्यम् । अंगिनि गृहीतेऽगानि गृहीतान्येव भवन्ति तदायतनत्वादंगानाम् । सत्यमायतनं यत्र तिष्ठत्युपनिषत्तदायतनं, सत्यमिति अमायिताऽकौटिल्यं वाङ्मनःकायाना, तेषु ह्याश्रयति विद्या येऽमायाविनः साधव· नासुरप्रकृतिषु मायाविषु । 'न येषु जिह्ममनृतं न माया च' इति श्रुतेः । तस्मात्सत्यमायतनमिति कल्प्यते । तपआदिष्वेव प्रतिष्ठात्वेन प्राप्तस्य सत्यस्य पुनरायतनत्वेन ग्रहणं साधनातिशयत्वज्ञापनार्थम् । "अश्वमेधसहस्रं च सत्यं च तुलया धृतम् । अश्वमेधसहस्राच्च सत्यमेकं विशिष्यते" इति स्मृते· ॥

यो वा एतामेवं वेदापहत्य पाप्मानमनंते स्वर्गे लोके ज्येये प्रतितिष्ठति प्रतितिष्ठति ॥९॥

॥ इति चतुर्थ. खंडः ॥

यो वा एतां ब्रह्मविद्या 'केनेषितं' इत्यादिना यथोक्तामेवं महाभागा 'ब्रह्म ह देवेभ्य' इत्यादिस्तुतां सर्वविद्याप्रतिष्ठा वेद अमृतत्वं हि विंदते [२.४] इत्युक्तमपि ब्रह्मविद्याफलमंते निगमयति—अपहत्य पाप्मानमविद्याकामकर्मलक्षणं संसारबीजं विधूयानंतेऽपर्यन्ते, स्वर्गे लोके सुखात्मके ब्रह्मणीत्येतत् । अनंत इति

विशेषणान्न त्रिविष्टपे । अनंतशब्द औपचारिकोऽपि स्यादित्यत आह— ज्येय इति । ज्येये ज्यायसि सर्वमहत्तरे स्वात्मनि मुख्य एव प्रतितिष्ठति । न पुनः संसारमापद्यत इत्यभिप्रायः ॥

ॐ आप्यायन्तु० इति शान्तिः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदभगवत्पूज्यपादशिष्यश्रीमच्छंकर-भगवद्विरचितं तलवकारोपनिषदपरपर्यायकेनोपनिषत्पदभाष्यं समाप्तम् ॥

शांकरं
केनोपनिषद्वाक्यभाष्यम् ।

समाप्तं कर्मात्मभूतप्राणविषयं विज्ञानं कर्म चानेकप्रकारं ययोर्विकल्पसमुच्चयानुष्ठानादक्षिणोत्तराभ्यां स्मृतिभ्यामावृत्त्यनावृत्ती भवत । अत ऊर्ध्वं फलनिरपेक्षज्ञानकर्मसमुच्चयानुष्ठानात्कृतात्मसंस्कारस्योच्छिन्नात्मज्ञानप्रतिबंधकस्य द्वैतविषयदोषदर्शिनो निर्ज्ञाताशेषबाह्यविषयत्वात्संसारबीजमज्ञानमुच्चिच्छित्सत प्रत्यगात्मविषयजिज्ञासा 'केनेषितं' इत्यात्मस्वरूपतत्त्वविज्ञानायायमध्याय आरभ्यते । तेन च मृत्युपदमज्ञानमुच्छेत्तव्यं तत्तंत्रो हि संसारो यतः । अनधिगतत्वादात्मनो युक्ता तदधिगमाय तद्विषया जिज्ञासा । कर्मविषये चानुक्तिः तद्विरोधित्वात् । अस्य विजिज्ञासितव्यस्यात्मतत्त्वस्य कर्मविषयेऽवचनम् । कस्मादिति चेदात्मनो हि यथावद्विज्ञानं कर्मणा विरुध्यते । निरतिशयब्रह्मस्वरूपो ह्यात्मा विजिज्ञापयिषितः 'तदेव ब्रह्म त्वं विद्धि नेदं यदिदं' [१.४] इत्यादिश्रुतेः । नहि स्वाराज्येऽभिषिक्तो ब्रह्मत्वं गमितः कंचन नमितुमिच्छति अतो ब्रह्मास्मीति संबुद्धौ न कर्म कारयितुं शक्यते । नह्यात्मानमवाप्तार्थं ब्रह्म मन्यमान प्रवृत्ति प्रयोजनवतीं पश्यति । न च निष्प्रयोजना प्रवृत्तिः अतो विरुध्यत एव कर्मणा ज्ञानम् । अत कर्मविषयेऽनु-

*"केनेषितमित्यादिका सामवेदशाखाभेदब्राह्मणोपनिषद पदशो व्याख्यायापि न तुतोष भगवान् भाष्यकार. शारीरकेन्यायैरनिर्णीतार्थत्वादिति न्यायप्रधानः श्रुत्यर्थसंग्राहकैर्वाक्यैर्व्याचिख्यासुः वाक्यस्यार्थं संगृह्णाति" इति आनंदगिरिकृत-टीकारंभः ।

क्तिर्विज्ञानविशेषविषयेव जिज्ञासा । कर्मानारंभ इति चेन्न । निष्कामस्य संस्कारार्थत्वात् । यदि ह्यात्मविज्ञानेनात्माविद्याविषयत्वात्पर्रितत्याजयिषितं कर्म, तत "प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरं" इत्यनारंभ एव कर्मण. श्रेयानल्पफलत्वादायासबहुलत्वात्तत्त्वज्ञानादेव च श्रेय:प्राप्तिरिति चेत्सत्यम । एतदविद्याविषयं कर्म अल्पफलत्वादिदोषवद्बंधरूपं च सकामस्य । 'कामान्य: कामयते' 'इति नु कामयमान.' इत्यादिश्रुतिभ्य । न निष्कामस्य । तस्य तु संस्कारार्थान्येव कर्माणि भवन्ति तन्निर्वर्तकाश्रयप्राणविज्ञानसहितानि । "देवयाजी श्रेयानात्मयाजी वा" इत्युपक्रम्य "आत्मयाजी तु करोति इदं मेऽनेनागं संस्क्रियते" इति संस्कारार्थमेव कर्माणीति वाजसनेयके । "महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः । यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्" इत्यादिस्मृतेश्च । प्राणादिविज्ञानं च केवलं कर्मसमुच्चितं वा सकामस्य प्राणात्मप्राप्त्यर्थमेव भवति । निष्कामस्य त्वात्मज्ञानप्रतिबंधनिर्मार्ष्टयं भवति आदर्शनिर्मार्जनवत् । उत्पन्नात्मविद्यस्य त्वनारंभो निरर्थकत्वात् । "कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते । तस्मात्कर्म न कुर्वन्ति यतय पारदर्शिन" इति, "क्रियापथश्चैव पुरस्तात्संन्यासश्च तयो संन्यास एवात्यरेचयत" इति, 'त्यागेनैके' 'नान्य पंथा विद्यते' इत्यादिश्रुतिभ्यश्च, न्यायाच्च । उपायभूतानि हि कर्माणि संस्कारद्वारेण ज्ञानस्य । ज्ञानेन त्वमृतत्वप्राप्ति:, 'अमृतत्वं हि विन्दते' 'विद्यया विन्दतेऽमृतम' इत्यादिश्रुतिस्मृतिभ्यश्च । नहि नद्या. पारगो नावं न मुंचति यथेष्टदेशगमनं प्रति स्वातंत्र्ये सति । नहि स्वभावसिद्धं वस्तु सिषाधयिषति साधनं., स्वभावसिद्धश्चात्मा । तथा नापिप्सितं, आत्मत्वे सति नित्यात्वात् । नापि विचिकीर्षितं, आत्मत्वे सति नित्यत्वादविकारित्वादविषयत्वादमूर्तत्वाच्च । श्रुतेश्च 'न वर्धते कर्मणा' इत्यादि । स्मृतेश्च "अविकार्योऽयमुच्यते" इति । नच संचिस्कीर्षितः । 'शुद्धमपापविद्धम्" इत्यादिश्रुतिभ्य । अनन्यत्वाच्च । अन्येनान्यत्संस्क्रियते । न चात्मनोऽन्यभूता क्रियास्ति, न च स्वेनैवात्मना स्वमात्मानं संचिस्कीर्षेत । न च वस्त्वंतराधानं नित्यप्राप्तिर्वा वस्त्वंतरस्य नित्या । नित्यत्वं चेष्टं मोक्षस्य । अत उत्पन्नविद्यस्य कर्मारंभोऽनुपपन्नः । अतो व्यावृत्तबाह्यबुद्धेरात्मविज्ञानाय केनेषितमित्याद्यारंभः ॥

१.१– प्रवृत्तिलिंगाद्विशेषार्थः प्रश्न उपपन्नः । रथादीनां हि चेतनावदधिष्ठितानां प्रवृत्तिर्दृष्टा नानधिष्ठितानाम् । मनआदीनां चाचेतनानां प्रवृत्तिर्दृश्यते ।

तद्धि लिंगं चेतनावतोऽधिष्ठातुरस्तित्वे । करणानि हि मनआदीनि नियमेन प्रवर्तन्ते, तन्नासति चेतनावत्यधिष्ठातर्युपपद्यते । तद्विशेषस्य चानधिगमाच्चेतनावत्यधिष्ठातृसामान्ये चाधिगते विशेषार्थः प्रश्न उपपद्यते । केनेषितं केनेष्टं कस्येच्छामात्रेण मनः पतति गच्छति, स्वविषये नियमेन व्याप्रियत इत्यर्थः । मनुतेऽनेनेति विज्ञाननिमित्तमंतःकरणं मनः । प्रेषितमिवेत्युपमार्थः । न त्विषितप्रेषितशब्दयोरर्थोऽिह संभवतः । न हि शिष्यानिव मनआदीनि विषयेभ्यः प्रेषयत्यात्मा विविक्तनित्यचित्स्वरूपतया तु निमित्तमात्रं प्रवृत्तौ नित्यचिकित्साधिष्ठातृवत् । प्राण इति नासिकाभव प्रकरणात । प्रथमत्वं चलनक्रियायाः प्राणनिमित्तत्वात स्वतो विषयावभासमात्रं करणानां प्रवृत्ति , चालिक्रिया तु प्राणस्यैव मनआदिषु । तस्मात्प्राथम्यं प्राणस्य । प्रैति गच्छति युक्तः प्रयुक्त इत्येतत । वाचो वचनं किंनिमित्तं प्राणिनां चक्षु श्रोत्रयोश्च को देवः प्रयोक्ता । करणानामधिष्ठाता चेतनावान्य स किविशेषण इत्यर्थः ॥

१ २— श्रोत्रस्य श्रोत्रमित्यादिप्रतिवचनं निर्विशेषस्य निमित्तत्वार्थम । विक्रियादिविशेषरहितस्यात्मनो मनआदिप्रवृत्तौ निमित्तत्वमित्येतच्छ्रोत्रस्य श्रोत्रमित्यादिप्रतिवचनस्यार्थः । अनुगमात्तदनुगतानि ह्यस्मिन्नर्थेऽक्षराणि । कथं? शृणोत्यनेनेति श्रोत्रं, तस्य शब्दावभासकत्वं श्रोत्रत्वम् । शब्दोपलब्धृरूपतयावभासकत्वं न स्वतः, श्रोत्रस्याचिद्रूपत्वात् आत्मनश्च चिद्रूपत्वात् । यच्छ्रोत्रस्योपलब्धृत्वेनावभासकत्वं तदात्मनिमित्तत्वाच्छ्रोत्रस्य श्रोत्रमित्युच्यते । यथा क्षत्रस्य क्षत्रं, यथा वा उदकस्यौष्ण्यं अग्निनिमित्तमिति दग्धुरप्युदकस्य दग्धाग्निरुच्यते, उदकमपि हि अग्निसंयोगादग्निरुच्यते । तद्वदनित्यं यत्संयोगादुपलब्धृत्वं तत्करणं श्रोत्रादि । उदकस्येव दग्धृत्वमनित्यं हि तत्र तत् । यत्र तु नित्यमुपलब्धृत्वमग्नावित्रौष्ण्यं स नित्योपलब्धिस्वरूपत्वाद्दग्धैवोपलब्धोच्यते । श्रोत्रादिषु श्रोतृत्वाद्युपलब्धिरनित्या, नित्या चात्मनि । अतः श्रोत्रस्य श्रोत्रमित्याद्यक्षराणामर्थानुगमादुपपद्यते निर्विशेषस्योपलब्धिस्वरूपस्यात्मनो मनआदिप्रवृत्तिनिमित्तत्वमिति । मनआदिष्वेवं यथोक्तम् । वाचो ह वाचं प्राणस्य प्राण इति विभक्तिद्वयं, सर्वत्रैवं द्रष्टव्यम् । कथं? पृष्टत्वात्स्वरूपनिर्देशः । प्रथमयैव च निर्देशः । तस्य च ज्ञेयत्वात्कर्मत्वमिति द्वितीया । अतो वाचो ह वाचं प्राणस्य प्राण इत्यस्मात्सर्वत्रैव विभक्तिद्वयम् । यदेतच्छ्रोत्राद्युपलब्धिनिमित्तं श्रोत्रस्य श्रोत्रमित्यादिलक्षणं तन्नि-

त्योपलब्धिस्वरूपं निर्विशेषमात्मतत्त्वं बुद्ध्वा अतिमुच्यानवबोधनिमित्ताध्यारोपितात् बुद्ध्यादिलक्षणात्संसारान्मोक्षणं कृत्वा धीरा धीमन्त प्रेत्यास्माल्लोकाच्छरीरात्प्रेत्य वियुज्यान्यस्मिन्नप्रतिसंधीयमाने निर्निमित्तत्वादमृता भवन्ति । सति ह्यज्ञाने कर्माणि शरीरान्तरं प्रतिसंदधते, आत्मावबोधे तु सर्वकर्मारंभनिमित्ताज्ञानविपर्यगतविद्याग्निविप्लुष्टत्वात् कर्मणामित्यनारंभेऽमृता एव भवन्ति । शरीरादिसंतानाविच्छेदप्रतिसंधानाद्यपेक्षयाऽध्यारोपितमृत्युवियोगात्पूर्वमप्यमृता सन्तो नित्यात्मस्वरूपत्वादमृता भवन्तीत्युपचर्यते ॥

१.३— न तत्र चक्षुर्गच्छतीत्युक्तेऽपि पर्यनुयोगे हेतुरप्रतिपत्तेः । श्रोत्रस्य श्रोत्रमित्येवमादिनोक्तेऽप्यात्मतत्त्वेऽप्रतिपन्नत्वात्सृष्टत्वहेतोर्वस्तुन पुन. पुन· पर्यनुयुयुक्षाकारणमाह— न तत्र चक्षुर्गच्छतीति । तत्र श्रोत्राद्यात्मभूते चक्षुरादीनि, वाक्चक्षुषो· सर्वेंद्रियोपलक्षणार्थत्वान्न विज्ञानमुत्पादयन्ति । सुखादिवत्तार्हि गृह्यतान्तःकरणेनात आह— नो मन , न सुखादिवन्मनसो विषयस्तत्त इंद्रियाविषयत्वात् । न विद्मो न विजानीमोऽन्तःकरणेन, यथैतद्ब्रह्म मनआदिकरणजातमनुशिष्यादनुशासनं कुर्यात्प्रवर्त्तिनिमित्तं भवेत्तथाऽविषयत्वान्न विद्मो न विजानीमः । अथवा श्रोत्रादीना श्रोत्रादिलक्षणं ब्रह्म विशेषेण दर्शयेत्युक्त आचार्य आह— न शक्यते दर्शयितुं, कस्मात? न तत्र चक्षुर्गच्छतीत्यादि पूर्ववत सर्वम् । अत्र तु विशेषो यथैतदनुशिष्यादिति । यथैतदनुशिष्यात्प्रतिपादयेत । अन्योऽपि शिष्यानितोऽन्येन विधिनेत्यभिप्राय ॥

१.४— सर्वथापि ब्रह्म बोधयेत्युक्त आचार्य आह, अन्यदेव तद्विदितादथो अविदितादधीत्यागमम । विदिताविदिताभ्यामन्यत्वम । यो हि ज्ञाता स एव सः सर्वात्मकत्वात । अत. सर्वात्मनो ज्ञातुर्ज्ञात्रंतराभावाद्विदितादन्यत्वम् । "स वेत्ति वेद्यं न च तस्यास्ति वेत्ता" इति च मंत्रवर्णात । 'विज्ञातारमरे केन विजानीयात्' इति च वाजसनेयके । अपि च व्यक्तमेव विदितं तस्मादन्यदित्यभिप्राय· । यद्विदितं व्यक्तं तदन्यविषयत्वादल्पं सविरोधं ततोऽनित्यं अत एवानेकत्वादशुद्धं, अत एव तद्विलक्षणं ब्रह्मेति सिद्धम । अस्तु तर्ह्यविदितम् । न, विज्ञानानपेक्षत्वात् । यद्धयविदितं तद्विज्ञानापेक्षं अविदितविज्ञानाय हि लोकप्रवृत्ति. । इदं तु विज्ञानानपेक्षं, कस्मात् विज्ञानस्वरूपत्वात् । न हि यस्य यत्स्वरूपं तत्तेनान्यतोऽपेक्षते । न च स्वत एवापेक्षा, अनपेक्षमेव सिद्धत्वात् ।

नहि प्रदीपः स्वरूपाभिव्यक्तौ प्रकाशान्तरमन्यतोऽपेक्षते स्वतो वा । यद्धयनपेक्षं तत्स्वत एव सिद्धं, प्रकाशात्मकत्वात् । प्रदीपस्यान्योऽपेक्षितोऽप्यनर्थकः स्यात् प्रकाशे विशेषाभावात् । नहि प्रदीपस्य स्वरूपाभिव्यक्तौ प्रदीपप्रकाशोऽर्थवान् । न चैवमात्मनोऽन्यत्र विज्ञानमस्ति येन स्वरूपविज्ञानेऽप्यपेक्ष्येत । विरोध इति चेन्नान्यत्वात् । स्वरूपविज्ञाने विज्ञानस्वरूपत्वाद्विज्ञानान्तरं नापेक्षत इत्येतदसत् । दृश्यते हि विपरीतज्ञानमात्मनि सम्यग्ज्ञानं च, न जानाम्यामात्मानमिति च, श्रुतेश्च । तत्त्वमसि' 'आत्मानमेवावेत्' 'एतं वै तमात्मानं विदित्वा' इति च । सर्वत्र श्रुतिष्वात्मविज्ञाने विज्ञानान्तरापेक्षत्वं दृश्यते । तस्मात्प्रत्यक्षश्रुतिविरोध इति चेन्न । कस्मात् ? अन्यो हि स आत्मा बुद्ध्यादिकार्यकरणसंघातात्मिकासंतानाविच्छेदलक्षणोऽविवेकात्मको बुद्धयवभासप्रधानश्चक्षुरादिकरणो नित्यचित्स्वरूपात्मान्तःसारो यत्रानित्यं विज्ञानमवभासते । बौद्धप्रत्ययानामाविर्भावतिरोभावधर्मकत्वात्तद्धर्मतयैव विलक्षणमपि चावभासते । अंतःकरणस्य मनसोऽपि मनोऽन्तर्गतत्वात्सर्वान्तरश्रुते । अंतर्गतेन नित्यविज्ञानस्वरूपेणाकाशवदप्रचलितात्मनान्तर्गर्भभूतेन स बाह्यो बुद्ध्यात्मा तद्विलक्षणः अर्चिर्भिरिवाग्नि प्रत्ययैराविर्भावतिरोभावधर्मकैर्विज्ञानाभासरूपैरनित्यैरनित्यविज्ञान आत्मा सुखी दुःखीत्यभ्युपगतो लौकिकैः, अतोऽन्यो नित्यविज्ञानस्वरूपादात्मनः । तत्र हि विज्ञानापेक्षा विपरीतज्ञानत्वं चोपपद्यते, न पुनर्नित्यविज्ञाने । तत्त्वमसीति बोधोपदेशो नोपपद्यत इति चेन 'आत्मानमेवावेत्' इत्येवमादीनि च, नित्यबोधात्मकत्वात् । न त्वादित्योऽन्येन प्रकाश्यतेऽतस्तदर्थबोधोपदेशोऽनर्थक इति चेन्न । लोकाध्यारोपापोहार्थत्वात् । सर्वात्मनि हि नित्यविज्ञाने बुद्ध्याद्यनित्यधर्मा लोकैरध्यारोपिता आत्मविवेकतः तदपोहार्थो बोधोपदेशो बोधात्मन । तत्र च बोधाबोधौ समंजसौ । अन्यनिमित्तत्वादुदक इवौष्ण्यमग्निनिमित्तम् । रात्र्यहनी इवादित्यनिमित्ते लोके नित्यावौष्ण्यप्रकाशावन्यादित्ययोरन्यत्र भावाभावयोर्निमित्तत्वादनित्याविवोपचर्येते । धक्ष्यत्यग्निः प्रकाशयिष्यति सवितेति तद्वत् । एवं च सुखदुःखबंधमोक्षाद्यध्यारोपो लोकस्य तदपेक्ष्य 'तत्त्वमसि' 'आत्मानमेवावेत्' इत्यात्मावबोधोपदेशिन्यः श्रुतय केवलमध्यारोपापोहार्थाः । यथा सवितासौ प्रकाशयत्यात्मानमिति तद्वत् । बोधकर्तृत्वं च नित्यबोधात्मनि । तस्मादन्यदविदितात् । अधिशब्दश्चान्यार्थे । यद्वा यद्धि यस्याधि तत्ततोऽन्यत्सामर्थ्याद्यथाधि मृत्यादीनां राजा । अव्यक्तमेवाविदितं ततोऽन्यदि-

त्यर्थः । विदितमविदितं च व्यक्ताव्यक्ते कार्यकारणत्वेन विकल्पिते, ताभ्यामन्यद्ब्रह्म विज्ञानस्वरूपं सर्वविशेषप्रत्यस्तमितमित्ययं समुदायार्थः । अत एवात्मत्वान्न हेय उपादेयो वा । अन्यद्धन्येन हेयमुपादेयं वा । न तेनैव तद्यस्य कस्यचिद्धेयमुपादेयं वा भवति । आत्मा च ब्रह्म सर्वान्तरात्मत्वादविषयः । अतोऽन्यस्यापि न हेयमुपादेयं वा । अन्याभावाच्च । इति शुश्रुम पूर्वेषामित्यागमोपदेशः । व्याचचक्षिर इत्यस्मातंत्र्यं तर्कप्रतिषेधार्थम । ये नस्तद्ब्रह्मोक्तवन्तस्ते नित्यमेवागमं ब्रह्मप्रतिपादकं व्याख्यातवन्तो, न पुनः स्वबुद्धिप्रभवेण तर्केणोक्तवन्त इति तस्यैव द्रढिम्ने आगमपारंपर्याविच्छेदं दर्शयति विद्यास्तुतये । तर्कस्त्वनवस्थितो भ्रान्तोऽपि भवतीति ॥

१.५— यद्वाचेति मंत्रानुवादो दृढप्रतीत्यै । 'अन्यदेव तद्विदितात्' [१.४] इति योऽयमागमार्थो ब्राह्मणोक्तोऽस्यैव द्रढिम्ने इमे मंत्रा यद्वाचेत्यादयः पठ्यन्ते । यद्ब्रह्म वाचा शब्देनानभ्युदितमनभ्युक्तमप्रकाशितमित्येतत । येन वागभ्युद्यत इति वाक्प्रकाशहेतुत्वोक्तिः । येन प्रकाश्यत इति वाचोऽभिधानस्याभिधेयप्रकाशकत्वस्य हेतुत्वमुच्यते ब्रह्मणः । उक्तं च 'केनेषिता वाचमिमां वदन्ति' 'यद्वाचो ह वाचं' इति । 'तदेव ब्रह्म त्वं विद्धि' इत्यविषयत्वेन ब्रह्मण आत्मन्यवस्थापनार्थ आम्नायः । यद्वाचाऽनभ्युदितं वाक्प्रकाशनिमित्तं चेति ब्रह्मणोऽविषयत्वेन वस्त्वंतरजिघृक्षां निवर्त्य स्वात्मन्येवावस्थापयत्याम्नायस्तदेव ब्रह्म त्वं विद्धीति यत्नत उपरमयति, नेदमित्युपास्यप्रतिषेधाच्च ॥

१.६–९— यन्मनसेत्यादि समानम । मनो मतामात येन ब्रह्मणा मनोऽपि विषयीकृतं नित्यविज्ञानस्वरूपेणेत्येतत । सर्वकरणानामविषयं तानि च सव्यापाराणि सविषयाणि नित्यविज्ञानस्वरूपावभासतया येनावभास्यन्त इति श्लोकार्थः । "क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत" इति स्मृतेः । 'तस्या भासा' इति चाथर्वणे । येन प्राण इति क्रियाशक्तिरप्यात्मविज्ञानानिमित्तेत्येतत ॥

२.१—यदि मन्यसे सुवेदेति शिष्यबुद्धिविचालना गृहीतास्थिरतार्थं । विदितादविदिताभ्यां निवर्त्य बुद्धिं शिष्यस्य स्वात्मन्यवस्थाप्य 'तदेव ब्रह्म त्वं विद्धि' [१.५] इति स्वाराज्येऽभिषिच्य उपास्यप्रतिषेधेनाथास्य बुद्धिं विचालयति यदि मन्यसे सुष्ठु वेदाहं ब्रह्मतत्त्वमिति ततोऽल्पमेव ब्रह्मणो रूपं वेत्थ त्वमिति नूनं निश्चितं मन्यत आचार्यः । सा पुनर्विचालना किमर्थेत्युच्यते– पूर्वगृहीते वस्तुनि बुद्धेः

स्थिरतार्थं । देवेष्वपि सुवेदाहमिति मन्यते यः सोऽप्यस्य ब्रह्मणो रूपं दभ्रमेव वेति नूनम् । कस्मात्? अविषयत्वात्कस्यचिद्ब्रह्मणः । अथवात्मेवास्याध्यात्मिकं मनुष्येषु देवेषु च आधिदैविकमस्य ब्रह्मणो यद्रूपं तदिति संबंधः । अथ न्विति हेतुमीमांसायां । यस्माद्दहरमेव सुविदितं ब्रह्मणो रूपमन्यदेव तद्विदितादियुक्तत्वात्सुवेदेति च मन्यसेऽतोऽल्पमेव वेत्थ त्वं ब्रह्मणो रूपं यस्मादथ नु तस्मान्मीमास्यमेवाद्यापि ते तव ब्रह्म विचार्यमेव यावद्विदितावेदितप्रतिषेधागमार्थानुभव इत्यर्थः । मन्ये विदितमिति शिष्यस्य मीमांसानंतरोक्ति प्रत्ययत्रयसंगतेः । सम्यग्वस्तुनिश्चयाय विचालित शिष्य आचार्येण मीमांस्यमेव त इति चोक्त एकान्ते समाहितो भूत्वा विचार्य यथोक्तं सुपरिनिश्चितः सन आह आगमाचार्यात्मानुभवप्रत्ययत्रयस्यैकविषयत्वेन संगत्यर्थम् । एवं हि सुपरिनिष्ठिता विद्या सफला स्यान्नानिश्चितेति न्यायः प्रदर्शितो भवति । मन्ये विदितमिति परिनिष्ठितनिश्चितविज्ञानप्रतिज्ञाहेतूक्तिः ॥

२.२— परिनिष्ठितं सफलं विज्ञानं प्रतिजानीते आचार्यात्मनिश्चययोस्तुल्यतार्थं, यस्माद्धेतुमाह— नाह मन्ये सुवेदेति, अहेत्यवधारणार्थो निपातो, नैव मन्ये इत्येतत् । यावदपरिनिष्ठितं विज्ञानं तावत्सुवेद सुष्ठु वेदाहं ब्रह्मेति विपरीतो मम निश्चय आसीत् । सोऽपजगाम भवद्भिर्विचालितस्य यथोक्तार्थमीमांसाफलभूतात्मब्रह्मत्वनिश्चयरूपात्सम्यक्प्रत्ययात् । विरुद्धत्वात् अतो नाह मन्ये सुवेदेति यस्माच्चैतन्नैव न वेदेति, मन्य इत्यनुवर्तते । अविदितब्रह्मप्रतिषेधात् । कथं तर्हि मन्यस इत्युक्त आह— वेद च । चशब्दाद्वेद च न वेद चेत्यभिप्रायः विदिताविदिताभ्यामन्यत्वाद्ब्रह्मण । तस्मान्मया विदितं ब्रह्मेति मन्य इति वाक्यार्थः । अथवा वेद चेति नित्यविज्ञानब्रह्मस्वरूपतया नो न वेद वेदैव चाहं स्वरूपविक्रियाभावात् । विशेषविज्ञानं च परास्यस्तं न स्वत इति परमार्थतो न च वेदेति । यो नस्तद्वेद तदेवेति पक्षान्तरानिरासार्थमाम्नाय उक्तार्थानुवादात् । यो नोऽस्माकं मध्ये तद्वेद स एव तद्ब्रह्म वेद नान्यः उपास्यब्रह्मवित्त्वात् । अतोऽन्यस्य यथाहं वेदेति पक्षान्तरे ब्रह्मवित्त्वं निरस्यते । कुतोऽयमर्थोऽवसीयत इत्युच्यते— उक्तानुवादादुक्तं ह्यनुवदति नो न वेदेति वेद चेति ॥

२.३— यस्यामतमिति श्रौतमाख्यायिकार्थोपसंहारार्थम् । शिष्याचार्योक्तिप्रत्युक्तिलक्षणयाऽनुभवयुक्तिप्रधानयाख्यायिकया योऽर्थः सिद्धः स श्रौतेन वचनेना-

गमप्रधानेन निगमनस्थानीयेन संक्षेपत उच्यते । यदुक्तं विदिताविदिताभ्यामन्यद्वागादीनामगोचरत्वात् मीमांसितं चानुभवोपपत्तिभ्यां ब्रह्म, तत्तथैव ज्ञातव्यम । कस्मात्? यस्यामतं यस्य विविदिषाप्रयुक्तप्रवृत्तस्य साधकस्यामतमविज्ञातमविदितं ब्रह्मेत्यात्मतत्त्वनिश्चयफलावसानाबोधतया विविदिषा निवृत्तेर्त्याभप्राय, तस्य मतं ज्ञातं, तेन विदितं ब्रह्म येनाविषयत्वेनात्मत्वेन प्रतिबुद्धं इत्यर्थ । स सम्यग्दर्शी यस्य विज्ञानानंतरमेव ब्रह्मात्मभावस्यावस्थितत्वात्सर्वत कार्यभावो विपर्ययेण मिथ्याज्ञानो भवति । कथं? मतं विदितं ज्ञातं मया ब्रह्मेति यस्य विज्ञानं, स मिथ्यादर्शी विपरीतविज्ञानो विदितादन्यत्वाद्ब्रह्मणो न वेद स न विजानाति । ततश्च सिद्धमवैदिकस्य विज्ञानस्य मिथ्यात्वं अब्रह्मविषयतया निर्दिष्टत्वात् । तथा कपिलकणभुगादिसमयस्यापि विदितब्रह्मविषयत्वादनवस्थितर्तकजन्यत्वाद्विदितविषयतया विविदिषानिवृत्तेश्च मिथ्यात्वमिति । स्मृतेश्च "या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः । सर्वास्ता निष्फला प्रेत्य तमोनिष्ठा हि ता स्मृताः" इति । 'अविज्ञातं विजानता विज्ञातमविजानता' इति पूर्वहेतूक्तिरनुवादस्यानर्थक्यात् अनुवादमात्रेऽनर्थकं वचनमिति विपर्ययमिथ्याज्ञानयोर्नष्टत्वात् पूर्वोक्तयोर्यस्यामतमित्यादिज्ञानाज्ञानयोर्हेत्वर्थत्वेनेदमुच्यते– अविज्ञातमविदितमात्मत्वेनाविषयतया ब्रह्म विजानता यस्मात तस्मात्तदेव ज्ञानं यत्तेषा विज्ञातं विदितं व्यक्तमेव बुद्ध्यादिविषयं ब्रह्माविजानता विदिताविदितव्यावृत्तमात्मभूतं नित्यविज्ञानस्वरूपमात्मस्थमविक्रियममृतमजरमभयमनन्यत्वादविषयमित्येवमविजानता बुद्ध्यादिविषयात्मनैव नित्यं विज्ञातं ब्रह्म । तस्माद्विदिताविदितव्यक्ताव्यक्तधर्माध्यारोपेण कार्यकारणभावेन सविकल्पमयथार्थविषयत्वात । शुक्तिकादौ रजताद्यध्यारोपणज्ञानवन्मिथ्याज्ञानं तेषाम ॥

२ ४— प्रतिबोधविदितमिति वाक्या पत्ययाना आत्मावबोधद्वारत्वात बोधं प्रति बोधं गतीति वाक्या सर्वप्रत्ययव्याप्त्यर्था । बौद्धा हि सर्वे प्रत्ययास्तप्तलोहवन्नित्यविज्ञानस्वरूपात्मव्याप्तत्वाद्विज्ञानस्वरूपावभासा तदन्यावभासश्चात्मा तद्विलक्षणोऽग्निवदुपलभ्यत इति ते द्वारीभवन्त्यात्मोपलब्धौ । तस्मात्प्रतिबोधावभासप्रत्यगात्मतया यद्विदितं तद्ब्रह्म, तदेव मतं ज्ञातं, तदेव सम्यग्ज्ञानं यत्प्रत्यगात्मविज्ञानं न विषयविज्ञानम । आत्मत्वेन 'प्रत्यगात्मानमैक्षत' इति च काठके । अमृतत्वं हि विदत इति हेतुवचनं विपर्यये मृत्युप्राप्ते· । विषयात्मविज्ञाने हि

मृत्यु· प्रारभत इत्यात्मविज्ञानममृतत्वनिमित्तमिति युक्तं हेतुवचनममृतत्वं हि विदत इति । आत्मज्ञानेन किममृतत्वमुत्पाद्यते ? न, कथं तर्हि ? आत्मना विदते स्वेनैव नित्यात्मस्वभावेनामृतत्वं विदते नालंबनपूर्वकम । विदत इत्यात्मविज्ञानापेक्षम् । यदि हि विद्योत्पाद्यममृतत्वं स्यादनित्यं भवेत्कर्मकार्यवत । अतो न विद्योत्पाद्यम । यदि चात्मनैवामृतत्वं विदते किं पुनर्विद्यया क्रियत इत्युच्यते । अनात्मविज्ञानं निवर्तयन्ती सा तन्निवृत्त्या स्वाभाविकस्यामृतत्वस्य निमित्तमिति कल्प्यते । यत आह—वीर्यं विद्यया विदते । वीर्यं सामर्थ्यमनात्माध्यारोपमायास्वान्तध्वान्तानभिभाव्यलक्षणं बलं विद्यया विदते । तच्च किंविशिष्टम । अमृतमविनाशि । अविद्याजं हि वीर्यं विनाशि । विद्ययाऽविद्याया बाध्यत्वात् । न तु विद्याया बाधकोऽस्तीति विद्याजममृतं वीर्यम । अतो विद्या अमृतत्वे निमित्तमात्रं भवति । 'नायमात्मा बलहीनेन लभ्यः' इति चाथर्वणे । लोकेऽपि विद्याजमेव बलमभिभवति न शरीरादिसामर्थ्यं यथा हस्त्यादेः । अथवा प्रतिबोधविदितं मतमिति । सकृदेवाशेषविपरीतानरर्थसंस्कारेण स्वप्नप्रतिबोधवद्यद्विदितं तदेव मतं ज्ञातं भवतीति । अथवा गुरूपदेश प्रतिबोधस्तेन वा विदितं मतमिति उभयत्र प्रतिबोधशब्दप्रयोगोऽस्ति । सुप्तप्रतिबुद्धो गुरुणा प्रतिबोधित इति । पूर्वं तु यथार्थम् ॥

२.५— इह चेदवेदादित्यवश्यकर्तव्यतोक्तिर्विपर्यये विनाशश्रुते । इह मनुष्यजन्मनि सत्यवश्यमात्मा वेदितव्य इत्येतद्विधीयते । कथं इह चेदवेदाद्विदितवान् अथ सत्यं परमार्थतत्त्वमस्त्यवाप्तं, तस्य जन्म सफलमित्यभिप्राय । न चेदिहावेदान्न विदितवान्वृथैव जन्म । अपि च महती विनष्टिर्महान्विनाशो जन्ममरणप्रबंधाविच्छेदप्राप्तिलक्षण स्याद्यत, तस्मादवश्यं तद्विच्छेदाय ज्ञेय आत्मा । ज्ञानेन तु किं स्यादित्युच्यते । भूतेषु भूतेषु चराचरेषु सर्वोपलब्ध्यर्थः । विचित्य विचार्य पृथग्निष्कृष्यैकमात्मतत्त्वं संसारधर्मैरस्पृष्टमात्मभावेनोपलभ्येत्यर्थ । अनेकार्थत्वाद्धातूनाम् । न पुनश्चित्वेति संभवति विरोधात । धीराः धीमन्तो विवेकिनो विनिवृत्तबाह्यविषयाभिलाषा, प्रेत्य मृत्वास्माल्लोकाच्छरीराद्यनात्मलक्षणाद्यावृत्तममत्वाहंकाराः सन्त इत्यर्थ । अमृता अमरणधर्माणो नित्यविज्ञानामृतत्वस्वभावा एव भवन्ति ॥ इति द्वितीय खंड ॥

३ १— ब्रह्म ह देवेभ्य इति ब्रह्मणो दुर्विज्ञेयतोक्तिर्यत्नाधिक्यार्था । समाप्ता ब्रह्मविद्या यदधीनः पुरुषार्थ । अत ऊर्ध्वमर्थवादेन ब्रह्मणो दुर्विज्ञेयतोच्यते ।

र्तोद्बोधने कथं नु नाम यत्नमाधकं कुर्यादिति । शमाद्यर्थो वाम्नायोऽभिमानशाननात । शमादि वा ब्रह्मविद्यासाधनं विविदिषितं तदर्थोऽयमर्थवादाम्नायः । न हि शमादिसाधनरहितस्याभिमानरागद्वेषादियुक्तस्य ब्रह्मविज्ञाने सामर्थ्यमस्ति, व्यावृत्तबाह्यमिथ्याप्रत्ययग्राह्यत्वाद्ब्रह्मणः । यस्माच्चान्यादीनां जयाभिमानं शातयति, ततश्च ब्रह्मविज्ञानं दर्शयत्यभिमानोपशमे, तस्माच्छमादिसाधनविधानार्थोऽयमर्थवाद इत्यवसीयते । सगुणोपासनार्थो वा अपोदितत्वात । 'नेदं यदिदमुपासते' [१.५] इत्युपास्यत्वं ब्रह्मणोऽपोदितम् । अपोदितत्वादनुपास्यत्वे प्राप्ते तस्यैव ब्रह्मणः सगुणत्वेनाधिदैवतमध्यात्मं चोपासनं विधातव्यमित्येवमर्थो वेति । अधिदैवतं 'तदनमित्युपासितव्यं' [४.६] इति हि वक्ष्यति । ब्रह्मेति परो लिंगात । नह्यन्यत्र परादीश्वरान्नित्यसर्वज्ञात्परिभूयान्यादीस्तृणं वज्रीकर्तुं सामर्थ्यमस्ति । तन्न शशाक दग्धुमित्यादिलिंगाद्ब्रह्मशब्दवाच्य ईश्वर इत्यवसीयते । नह्यन्यथाग्निस्तृणं दग्धुं नोत्सहते वायुर्वाऽऽदातुम । ईश्वरेच्छया तु तृणमपि वज्रीभवतीत्युपपद्यते । तत्सिद्धिर्जगतो नियतप्रवृत्तेः । श्रुतिस्मृतिप्रसिद्धिभिर्नित्यसर्वविज्ञान ईश्वरे सर्वात्मनि सर्वशक्तौ सिद्धेऽपि शास्त्रार्थनिश्चयार्थमुच्यते । तस्येश्वरस्य सद्भावसिद्धिः कुतो भवतीत्युच्यते-- यदिदं जगद्देवगंधर्वयक्षरक्षःपितृपिशाचादिलक्षणं युवियत्पृथिव्यादित्यचंद्रग्रहनक्षत्रविचित्रं विविधप्राण्युपभोगयोग्यस्थानसाधनसंबंधि, तदत्यंतकुशलशिल्पिभिरपि दुर्निर्माणं देशकालनिमित्तानुरूपनियतप्रवृत्तिनिवृत्तिक्रमं एतद्धावतृकर्मविभागज्ञप्रयत्नपूर्वकं भवितुमर्हति । कार्यत्वे सति यथोक्तलक्षणत्वात । गृहप्रासादरथशयनासनादिवद्विद्यपक्ष आत्मादिवत् । कर्मण एवेति चेत् न । परतंत्रस्य निमित्तमात्रत्वात । यदिदमुपभोगवैचित्र्यं प्राणिना तत्साधनवैचित्र्यं च देशकालनिमित्तानुरूपनियतप्रवृत्तिनिवृत्तिक्रमं च तन्न नित्यसर्वज्ञकर्तृकम् । किं तर्हि कर्मण एव, तस्याचित्यप्रभावत्वात्सर्वैश्च फलहेतुत्वाभ्युपगमात । सति कर्मणः फलहेतुत्वे किमीश्वराधिककल्पनयेति न नित्यस्येश्वरस्य नित्यसर्वज्ञशक्तेः फलहेतुत्वं चेति चेत । न, कर्मण एवोपभोगवैचित्र्याद्युपपद्यते । कस्मात कर्तृतंत्रत्वात्कर्मणः । चितिमत्प्रयत्ननिर्वृत्तं हि कर्म तत्प्रयत्नोपरमादुपरतं सदेशान्तरे कालान्तरे वा नियतनिमित्तविशेषापेक्षं कर्तुः फलं जनयिष्यतीति न युक्तमनपेक्ष्यान्यदात्मनः प्रयोक्तृ, कर्तैव फलकाले प्रयोक्तेति चेन्मया निर्वर्तितोऽसि त्वा प्रयोक्ष्ये फलाय यदात्मानुरूपं फलमिति न

देशकालनिमित्तविशेषानभिज्ञत्वात् । यदि हि कर्ता देशादिविशेषाभिज्ञः सन्स्वातंत्र्येण कर्म नियुंज्यात्ततोऽनिष्टफलस्याप्रयोक्ता स्यात । न च निर्निमित्तं तत् अनिच्छयात्मसमवेतं तच्चर्मवद्विकरोति कर्म । न चात्मकृतमकर्तृसमवेतं अयस्कान्तमणिवत आकृष्टृ भवति, प्रधानकर्तृसमवेतत्वात कर्मणः । भूताश्रयमिति चेत न, साधनत्वात । कर्तृक्रियायाः साधनभूतानि भूतानि क्रियाकालेऽनुभूतव्यापाराणि समाप्तौ च हलादिवत्कर्त्रा परित्यक्तानि न फलं कालान्तरे कर्तुमुत्सहन्ते । न हि हलं क्षेत्रात व्रीहीन्गृहं प्रवेशयति । भूतकर्मणोश्चेतनत्वात्स्वतः प्रवृत्त्यनुपपत्ति । वायुवदिति चेन्नासिद्धत्वात । न हि वायोरचितिमत स्वत प्रवृत्तिः सिद्धा, रथादिष्वदर्शनात् । शास्त्रात्कर्मण एवेति चेच्छास्त्रं हि क्रियातः फलसिद्धिमाह नेश्वरादेः "स्वर्गकामो यजेत" इत्यादि । न च प्रमाणाधिगतत्वादानर्थक्यं युक्तम । न चेश्वरास्तित्वे प्रमाणान्तरमस्तीति चेत न, दृष्टन्यायहानानुपपत्तेः । क्रिया हि द्विविधा दृष्टफलाऽदृष्टफला च । दृष्टफलापि द्विविधाऽनंतरफला कालान्तरफला च । अनंतरफला गतिभुजिलक्षणा । कालान्तरफला च कृषिसेवादिलक्षणा । तत्रानंतरफला फलापवर्गिण्येव, कालान्तरफला तूत्पन्नप्रध्वंसिनी । आत्मसेव्याद्यधीनं हि कृषिसेवादे फलं यतो, न चोभयन्यायव्यतिरेकेण स्वतंत्रं कर्म ततो वा फलं दृष्टम । तथा च कर्मफलप्राप्तौ न दृष्टन्यायहानमुपपद्यते । तस्माच्छास्त्रे यागादिकर्मणि नित्य कर्तृकर्मफलविभागज्ञ ईश्वरः सेव्यादिवद्यागाद्यनुरूपफलदातोपपद्यते । स चात्मभूतः सर्वस्य सर्वक्रियाफलप्रत्ययसाक्षी नित्यविज्ञानस्वभावः संसारधर्मैरसंस्पृष्टः । श्रुतेश्च । 'न लिप्यते लोकदुःखेन बाह्यः' 'जरा मृत्युमत्येति' 'विजरो विमृत्युः' 'सत्यकाम सत्यसंकल्पः' 'एष सर्वेश्वरः पुण्यं कर्म कारयति' 'अनश्नन्नन्यो अभिचाकशीति' 'एतस्य वा अक्षरस्य प्रशासने' इत्याद्या असंसारिण एकस्य आत्मनो नित्यमुक्तस्य सिद्धा श्रुतयः । स्मृतयश्च सहस्रशो विद्यन्ते । न चार्थवादाः शक्यन्ते कल्पयितुं अनन्ययोगित्वे सति विज्ञानोत्पादकत्वात् । न चोत्पन्नं विज्ञानं बाध्यते । अप्रतिषेधाच्च । न चेश्वरो नास्तीति निषेधोऽस्ति । प्राप्त्यभावादिति चेन्नोक्तत्वात् । "न हिंस्यात्" इतिवत्प्राप्त्यभावात्प्रतिषेधो नारभ्यत इति चेन्न, ईश्वरसद्भावे न्यायस्योक्तत्वात् । अथवाऽप्रतिषेधादिति कर्मणः फलदान ईश्वरकालादीना न प्रतिषेधोऽस्ति । न च निमित्तान्तरनिरपेक्षं

केवलेन कर्त्रैव प्रयुक्तं फलदं दृष्टम् । नच विनष्टोऽपि याग कालान्तरे फलदो भवति । सेव्यबुद्धिवत्सेवकेन सर्वज्ञेश्वरबुद्धौ तु संस्कृताया यागादिकर्मणा विनष्टेऽपि कर्मणि सेव्यादिवेश्वरात्फलं कर्तुभवतीति युक्तम् । न तु पुनः पदार्थो वाक्यशतेनापि देशान्तरे कालान्तरे वा स्वं स्वं स्वभावं जहति । नहि देशकालान्तरेषु चाग्निरनुष्णो भवति । एवं कर्मणोऽपि कालान्तरे फलं द्विप्रकारमेवोपलभ्यते । बीजक्षेत्रसंस्कारपरिरक्षाविज्ञानवत्कर्त्रपेक्षफलं कृष्यादि, विज्ञानवत्सेव्यबुद्धिसंस्कारापेक्षफलं च सेवादि । यागादेः कर्मणस्तथाऽविज्ञानवत्कर्त्रपेक्षफलत्वानुपपत्तौ कालान्तरफलत्वात्कर्मदेशकालनिमित्तविपाकविभागज्ञबुद्धिसंस्कारापेक्षं फलं भवितुमर्हति, सेवादिकर्मानुरूपफलज्ञसेव्यबुद्धिसंस्कारापेक्षफलस्येव । तस्मात्सिद्ध सर्वज्ञ ईश्वर सर्वजन्तुबुद्धिकर्मफलविभागमार्क्षा सर्वभूतान्तरात्मा । 'यत्साक्षादपरोक्षात्' 'य आत्मा सर्वान्तर' इति श्रुतेः । स एव चात्रात्मा जन्तुना 'नान्योऽतोऽस्ति द्रष्टा श्रोता मन्ता विज्ञाता' 'नान्यदतोऽस्ति विज्ञातृ' इत्याद्यात्मान्तरप्रतिषेधश्रुतेः 'तत्त्वमसि' इति चात्मत्वोपदेशात् । न हि मृत्पिण्डे काचनात्मत्वेनोपदिश्यते । ज्ञानशक्तिकर्मोपास्योपासकशुद्धाशुद्धमुक्तामुक्तभेदादात्मभेद एवेति चेन्न । भेददृष्ट्यपवादात् । यदुक्तं संसारिण ईश्वरादन्या इति तन्न । किं तर्हि ? भेद एव संसार्यात्मनाम् । कस्मात् ? लक्षणभेदादश्वमहिषवत् । कथं लक्षणभेद इत्युच्यते ईश्वरस्य तावन्नित्यं सर्वविषयं ज्ञानं सवितृप्रकाशवत् । तद्विपरीतं संसारिणा खद्योतस्येव । तथैव शक्तिभेदोऽपि । नित्या सर्वविषया चेश्वरशक्तिः विपरीतेतरस्य । कर्म च चित्स्वरूपात्मसत्तामात्रनिमित्तमीश्वरस्य । औष्ण्यस्वरूपद्रव्यसत्तामात्रनिमित्तदहनकर्मवत् । राजायस्कान्तप्रकाशकर्मवच्च स्वात्माविकियारूपम् । विपरीतमितरस्य । उपास्मीतिवचनादुपास्य ईश्वरो गुरुराजवत् । उपासकश्चेतर शिष्यभृत्यवत् । अपहतपाप्मादिश्रवणान्नित्यशुद्ध ईश्वर । 'पुण्यो वै पुण्येन' इतिवचनाद्विपरीत इतर । अत एव नित्यमुक्त एवेश्वरः, नित्याशुद्धियोगात्संसारीतर. । यत्र च ज्ञानादिलक्षणभेदोऽस्ति तत्र भेदो दृष्ट । यथाश्वमहिषयो । तथा ज्ञानादिलक्षणभेदादात्मगतात्मना भेदोऽस्तीति चेन्न । कस्मात् ? 'अन्योऽसावन्योऽहमस्मीति न स वेद' 'ते क्षय्यलोका भवन्ति' 'मृत्योः स मृत्युमाप्नोति' इति भेददृष्टिर्व्यपोह्यते । एकत्वप्रतिपादिन्यश्च श्रुतयः सहस्रशो विद्यन्ते । यदुक्तं ज्ञानादिलक्षणभेदादित्यत्रोच्यते । नानभ्युपगमात् ।

युद्ध्यादिभ्यो व्यतिरिक्ता विलक्षणाश्चेश्वराद्भिन्नलक्षणा आत्मानो न सन्ति । एक एवेश्वरश्चात्मा सर्वभूतानां नित्यमुक्तोऽभ्युपगम्यते । बाह्यश्च बुद्ध्यादिसमाहार-संतानाहंकारममत्वादिविपरीतप्रत्ययप्रबंधाविच्छेदलक्षणो नित्यशुद्धबुद्धमुक्तविज्ञानात्मेश्वरगर्भो नित्यविज्ञानावभासश्चित्तचैत्यबीजस्वभाव कल्पितोऽनित्यविज्ञान ईश्वरलक्षणविपरीतोऽभ्युपगम्यते । यस्याविच्छेदे संसारव्यवहारः, विच्छेदे च मोक्षव्यवहार । अन्यश्च मृत्प्रलेपवत्प्रत्यक्षध्वंसो देवपितृमनुष्यादिलक्षणो भूतविशेषसमाहारो न पुनश्चतुर्थोऽन्यो भिन्नलक्षण ईश्वरादभ्युपगम्यते । बुद्ध्यादिकल्पितात्मव्यतिरेकाभिप्रायेण तु लक्षणभेदादित्याश्रयासिद्धो हेतुः, ईश्वरादन्यस्यात्मनोऽसत्त्वात । ईश्वरस्यैव विरुद्धलक्षणत्वमयुक्तमिति चेत्सुखदुःखादियोगश्च, न । निमित्तत्वे सति लोकविपर्ययाध्यारोपणात्सवितृवत । यथा हि सविता नित्यप्रकाशरूपत्वाल्लोकाभिव्यक्त्यनभिव्यक्तिनिमित्तत्वे सति लोकदृष्टिविपर्ययेणोदयास्तमयाहोरात्रादिकर्तृत्वाध्यारोपभाग्भवत्येवमीश्वरे नित्यविज्ञानशक्तिरूपे लोकज्ञानापोहसुखदुःखमृत्यादिनिमित्तत्वे सति लोकविपरीतबुद्ध्याध्यारोपितं विपरीतलक्षणत्वं सुखदुःखादयश्च, न स्वतः । आत्मदृष्ट्यनुरूपाध्यारोपाच्च । यथा घनादिविप्रकीर्णे अंबरे येनैव सवितृप्रकाशो न दृश्यते, स आत्मदृष्ट्यनुरूपमेवाध्यस्यति सवितेदानीमिह न प्रकाशयतीति सत्येव प्रकाशेऽन्यत्र भ्रान्त्या । एवमिह बौद्धादिवृत्त्युद्भवाभिभवाकुलभ्रान्त्याध्यारोपित सुखदुःखादियोग उपपद्यते । तत्स्मरणाच्च तस्यैवेश्वरस्यैव हि स्मरणं "मत्त स्मृतिर्ज्ञानमपोहनं च" "नादत्ते कस्यचित्पापम" इत्यादि । अतो नित्यमुक्त एकस्मिन्सवितरीव लोकाविद्याध्यारोपितमीश्वरे संसारित्वम । शास्त्रादिप्रामाण्यादभ्युपगतसंसारित्वं इत्यविरोध इति । एतेन प्रत्येकं ज्ञानादिभेद प्रत्युक्त । सौक्ष्म्यैचैतन्यसर्वगतत्वाद्यविशेषे च भेदहेत्वभावात । विक्रियावत्त्वे चानित्यत्वात । मोक्षे च विशेषानभ्युपगमादभ्युपगमे चानित्यत्वप्रसंगात । अविद्यावदुपलभ्यत्वाच्च भेदस्य तत्क्षयेऽनुपपत्तिरिति सिद्धमेकत्वम् । तस्माच्छरीरेंद्रियमनोबुद्धिविषयवेदनासंतानस्याहंकारसंबंधादज्ञानबीजस्य नित्यविज्ञानान्यनिमित्तस्यात्मतत्त्वयाथात्म्यविज्ञानाद्विनिवृत्तावज्ञानबीजस्य विच्छेद आत्मनो मोक्षसंज्ञा, विपर्यये च बंधसंज्ञा, स्वरूपापेक्षत्वादुभयोः । ब्रह्म– ह इत्यैतिह्यार्थ.— पुरा किल देवासुरसंग्रामे जगत्स्थितिपरिपिपालयिषया आत्मानुशासनानुवर्तिभ्यो देवेभ्योऽर्थिभ्योऽर्थाय विजि-

ग्येऽजैषादसुरान् । ब्रह्मण इच्छानिमित्तो विजयो देवाना बभूवेत्यर्थः । **तस्य ह** ब्रह्मणो विजये देवा अमहीयन्त । यज्ञादिलोकस्थित्यपहारिष्वसुरेषु पराजितेषु देवा वृद्धि पूजा वा प्राप्तवन्त । त ऐक्षन्तेति मिथ्याप्रत्ययत्वाद्धेयत्वख्यापनार्थं आम्नाय ॥

३.१-१२— ईश्वरनिमित्तं विजयं स्वसामर्थ्यनिमित्तोऽस्माकमेवायं विजयोऽस्माकमेवायं महिमेत्यात्मनो जयादिश्रेयोनिमित्तं सर्वात्मानमात्मस्थं सर्वकल्याणास्पदमीश्वरमेवात्मत्वेनानुदध्या पिडमात्राभिमाना. सन्तो यं मिथ्याप्रत्ययं चक्रुस्तस्य पिडमात्रविषयत्वेन मिथ्याप्रत्ययत्वात्सर्वात्मेश्वरयाथात्म्यावबोधेन हातव्यताख्यापनार्थस्तद्वैषामित्याद्याख्यायिकाम्नाय । तद्ब्रह्म ह किलैषां देवानामभिप्रायं मिथ्याहंकाररूपं विजज्ञौ विज्ञातवत् । ज्ञात्वा च मिथ्याभिमानशातनेन तदनुजिघृक्षया देवेभ्योऽर्थाय तेषामेवेंद्रियगोचरे नातिदूरे प्रादुर्बभूव । महेश्वरशक्तिमायोपात्तनात्यंताद्भुतेन प्रादुर्भूतं किल केनचिद्रूपविशेषेण । तार्किकैरपलभमाना अपि देवा न व्यजानत न विज्ञातवन्त किमिदं यदेतद्यक्षं पूज्यमिति । तद्विज्ञानायाग्निमब्रुवन । तृणनिधानेऽयमभिप्रायः— अत्यंतसंभावितयोरग्निमारुतयोस्तृणदहनादानाशक्त्यात्मसंभावना शातिता भवेदिति । इंद्र आदित्यो वज्रभृद्वा, अविरोधात् इंद्रोपसर्पणे ब्रह्म तिरोदध इत्यत्रायमभिप्राय.— इंद्रोऽहमित्यधिकृतमोऽभिमानोऽस्य, सोऽहमन्यादिभिः प्राप्तं वाक्संभाषणमात्रमप्यनेन न प्राप्तोऽस्मीत्यभिमानं कथं न नाम जह्यादिति । तदनुग्रहायैवान्तर्हितं तत ब्रह्म बभूव स शान्ताभिमान इंद्रोऽत्यर्थं ब्रह्म विजिज्ञासुर्यस्मिन्नाकाशे ब्रह्मणः प्रादुर्भाव आसीत्तिरोधानं च, तस्मिन्नेव स्त्रियमतिरूपिणी विद्यामाजगाम । अभिप्रायोद्बोधहेतुत्वाद्रुद्रपत्न्युमा हैमवतीव सा बहु शोभमाना विद्यैव । विरूपोऽपि विद्यावान्बहु शोभते ॥ इति तृतीयः खंडः ॥

४.१-३— तां च पृष्ट्वा तस्या एव वचनाद्विदांचकार विदितवान् । अत इंद्रस्य बोधहेतुत्वाद्विद्यैवोमा । "विद्यासहायवानीश्वर" इति स्मृतिः । यस्मादिंद्रविज्ञानपूर्वकमग्निवाय्विंद्रास्ते ह्यनन्येदिष्टमतिसमीपं ब्रह्मविद्यया ब्रह्म प्राप्ताः सन्तः पस्पर्शुः स्पृष्टवन्तः । ते हि प्रथमः प्रथमं विदांचकार विदांचकुरित्येतत् । तस्मादतितरामतीत्यातिशयेन दीप्यन्तेऽन्यान्देवांस्ततोऽपींद्रोऽतितरां दीप्यते आदौ ब्रह्मविज्ञानात् ॥

४.४— तस्यैष आदेशस्तस्य ब्रह्मण एष वक्ष्यमाण आदेश उपासनोपदेश इत्यर्थः । यस्माद्देवेभ्यो विद्युदिव सहसैव प्रादुर्भूतं ब्रह्म द्युतिमत्तस्माद्विद्युतो विद्योतनं यथा यदेतन ब्रह्म व्यद्युतद्विद्योतितवत् । आ इत्युपमार्थ आशब्दः । यथा घनांधकारं विदार्य विद्युत्सर्वत प्रकाशत, एव तद्ब्रह्म देवानां पुरत सर्वत प्रकाशवद्व्यक्तीभूतं अतो व्यद्युतदिवेत्युपास्यम । "यथा नक्तद्विद्युतं" इति च वाजसनेयके । यस्माच्चैषोपसर्पणकाले न्यर्मीमिषत् । यथा कश्चिच्चक्षुर्निमेषणं कृतवानिति । इतीदित्यनर्थकौ निपातौ । —निमिषितवदिव तिरोभूतमित्येवं अधिदैवतं देवताया अधि यद्दर्शनमधिदैवतं तत् ॥

४.५— अथानंतरमध्यात्मं, आत्मनोऽध्यात्मविषयमध्यात्मं, उच्यत इति वाक्यशेष । यदेतद्यथोक्तलक्षणं ब्रह्म गच्छतीव प्राप्नोतीव विषयीकरोतीवेत्यर्थ । न पुनर्विषयीकरोति मन मनसोऽविषयत्वात् ब्रह्मणोऽतो मनो न गच्छति । 'येनाहुर्मनो मतं' इति हि चोक्तम । गच्छतीवेति तु मनसोऽपि मनस्त्वात् आत्मभूतत्वाच्च ब्रह्मणस्तत्समीपे मनो वर्तत इत्युपस्मरत्यनेन मनसैव तद्ब्रह्म विद्वान यस्मात्तस्मात ब्रह्म गच्छतीवेत्युच्यते । अभीक्ष्ण पुनः पुनः । संकल्पो ब्रह्मप्रेषितस्य मनसः । अत उपस्मरणसंकल्पादिभिर्लिंगैर्ब्रह्म मनआद्यात्मभूतमित्युपास्यमित्यभिप्राय ॥

४.६— तस्य चाध्यात्ममुपासने गुणो विधीयते—तद्ध तद्वनं तदेतद्ब्रह्म तच्च तद्वनं च तत्परोक्षं वनं संभजनीयम । वनंतस्तत्कर्मणस्तस्मात्तद्वनं नाम । ब्रह्मणो गौणं हीदं नाम । तस्मादनेन गुणेन तद्वनमित्युपासितव्यम् । स यः कश्चिदेतद्यथोक्तमेवं यथोक्तेन गुणेन वनमित्यनेन नाम्नाभिधेयं ब्रह्म वेदोपास्ते तस्यैतत्फलमुच्यते—सर्वाणि भूतान्येनमुपासकमभिसंवांछन्तीहाभिसंभजन्ते सेवन्ते इत्यर्थ । यथागुणोपासनं हि फलम् ॥

४.७— उपनिषदं भो ब्रूहीत्युक्तायामुपनिषदि शिष्येणोक्त आचार्य आह— उक्ता कथिता ते तुभ्यमुपनिषदात्मोपासनं च । अधुना ब्राह्मी वाव ते तुभ्यं ब्रह्मणो ब्राह्मणजातेरुपनिषदमब्रूम वक्ष्याम इत्यर्थः । वक्ष्यति हि ब्राह्मीं, नोक्ता । उक्ता त्वात्मोपनिषत् । तस्मान्न भूताभिप्रायोऽब्रूमेत्ययं शब्दः ॥

४.८— तस्यै तस्या वक्ष्यमाणाया उपनिषदस्तपो ब्रह्मचर्यादि दम उपशमः कर्माग्निहोत्रादीत्येतानि प्रतिष्ठा आश्रयः । एतेषु हि सत्सु ब्राह्मी उपनिषत्प्रति-

ष्ठिता भवति । वेदाश्चत्वारोऽङ्गानि च सर्वाणि । प्रतिष्ठेत्यनुवर्तते । ब्रह्माश्रया हि विद्या । सत्यं यथाभूतवचनमपीडाकरं, आयतनं निवासः । सत्यवत्सु हि सर्वं यथोक्तमायतन इवावस्थितम् ॥

९— तामेतां तपआद्यंगा तत्प्रतिष्ठा ब्राह्मीमुपनिषदं सनातनामात्मज्ञान-हेतुभूतामेवं यथावद्यो वेदानुवर्ततेऽनुतिष्ठति, तस्यैतत्फलमाह– अपहत्य पाप्मानं अपक्षय्य धर्माधर्मावित्यर्थः । अनंतेऽपारेऽविद्यमानांते स्वर्गे लोके सुखप्राये निर्दुःखात्मनि परे ब्रह्मणि ज्येये महति सर्वमहत्तरे प्रतितिष्ठति, सर्ववेदान्तवेद्यं ब्रह्मात्मत्वेनावगम्य तदेव ब्रह्म प्रतिपद्यते इत्यर्थः ॥ इति चतुर्थ खंड ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ केनोपनिषद्भाष्यभाष्यं समाप्तम् ॥

॥ ॐ ॥

श्रीमच्छंकराचार्यविरचितभाष्ययुता

छांदोग्योपनिषत् ।

ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षु श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मौपनिषदं माहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणमस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

॥ प्रथमोऽध्यायः ॥

'ओमित्येतदक्षरं' इत्याद्यष्टाध्यायी छांदोग्योपनिषत् । तस्याः संक्षेपतोऽर्थजिज्ञासुभ्य ऋजुविवरणमल्पग्रंथमिदमारभ्यते । तत्र संबंधः — समस्तं कर्माधिगतं प्राणादिदेवताविज्ञानसहितमर्चिरादिमार्गेण ब्रह्मप्रतिपत्तिकारणम् । केवलं च कर्म धूमादिमार्गेण चंद्रलोकप्रतिपत्तिकारणम् । स्वभावप्रवृत्तानां च मार्गद्वयपरिभ्रष्टानां कष्टाऽधोगतिरुक्ता । न चोभयोर्मार्गयोरन्यतरस्मिन्नपि मार्गे आत्यंतिकी पुरुषार्थसिद्धिः । इत्यत कर्मनिरपेक्षमद्वैतात्मविज्ञानं संसारगतित्रयहेतूपमर्देन वक्तव्यमित्युपनिषदारभ्यते ॥

न चाद्वैतात्मविज्ञानादन्यत्रात्यंतिकी निःश्रेयसप्राप्तिः । वक्ष्यति हि—'अथ येऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति', विपर्यये च 'स स्वराट् भवति' इति । तथा, द्वैतविषयानृताभिसंधस्य बंधनं, तस्करस्येव तत्परशुग्रहणे बंधदाहभावः, संसारदुःखप्राप्तिश्च, इत्युक्त्वा अद्वैतात्मसत्याभिसंधस्यातस्करस्येव तत्परशुग्रहणे बंधदाहाभावः संसारदुःखनिवृत्तिर्मोक्षश्चेति ॥

अत एव न कर्मसहभाव्यद्वैतात्मदर्शनम् । क्रियाकारकफलभेदोपमर्देन 'सदेकमेवाद्वितीयं' 'आत्मैवेदं सर्वं' इत्येवमादिवाक्यजनितस्य बाधकप्रत्ययानुपपत्तेः । कर्मविधिप्रत्यय इति चेत् न । कर्तृभोक्तृस्वभावविज्ञानवतस्तज्जनितकर्मफलरागद्वेषादिदोषवतश्च कर्मविधानात् । अधिगतसकलवेदार्थस्य कर्मविधानादद्वैतज्ञानवतोऽपि कर्मेति चेत् । न । कर्माधिकृतविषयस्य कर्तृभोक्त्रादिज्ञानस्य स्वाभाविकस्य 'सदेकमेवाद्वितीयं' 'आत्मैवेदं सर्वं' इत्येनेनोपमर्दितत्वात् ।

तस्मादविद्यादिदोषवत एव कर्माणि विधीयन्ते । नाद्वैतज्ञानवतः । अत एव हि वक्ष्यति— 'सर्व एते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति' इति ॥

तत्रैतस्मिन्नद्वैतविद्याप्रकरणेऽभ्युदयसाधनान्युपासनान्युच्यन्ते । कैवल्यसंनिकृष्टफलानि चाद्वैतादर्शाद्वैकृतब्रह्मविषयाणि 'मनोमय प्राणशरीर' इत्यादीनि, कर्मसमृद्धिफलानि च कर्माङ्गसंबंधानि, रहस्यसामान्यान्मनोवृत्तिसामान्याच्च । यथाऽद्वैतज्ञानं मनोवृत्तिमात्र तथाऽन्यान्यप्युपासनानि मनोवृत्तिरूपाणीत्यस्ति हि सामान्यम् । कस्तर्ह्यद्वैतज्ञानस्योपासनाना च विशेषः ? उच्यते— स्वाभाविकस्यात्मन्यक्रियेऽध्यारोपितस्य कर्त्रादिकारकक्रियाफलभेदविज्ञानस्य निवर्तकमद्वैतविज्ञानम् । रज्ज्वादाविव सर्पाद्यध्यारोपलक्षणज्ञानस्य रज्ज्वादिस्वरूपनिश्चयः प्रकाशनिमित्त । उपासनं तु यथाशास्त्रसमर्पितं किंचिदालंबनमुपादाय तस्मिन्समानचित्तवृत्तिसंतानकरणं तद्विलक्षणप्रत्ययानंतरितमिति विशेषः ॥ तान्येतान्युपासनानि सत्त्वशुद्धिकरत्वेन वस्तुतत्त्वावभासकत्वाद्वैतज्ञानोपकारकाणि, आलंबनविषयत्वात्समाध्यानि चेति पूर्वमुपन्यस्यन्ते । तत्र कर्माभ्यासस्य दृढीकृतत्वात्कर्मपरित्यागेनोपासन एव दृश्यं चेत.समर्पणं कर्तुमिति कर्माङ्गविषयमेव तावदादावुपासनमुपन्यस्यते ॥

ॐ इत्येतदक्षरमुद्गीथमुपासीत । ओमिति ह्युद्गायति तस्योपव्याख्यानम् ॥१॥

ओमित्येतदक्षरमुद्गाथमुपासीत । ओमित्येतदक्षरं परमात्मनोऽभिधानं नेदिष्ठम । तस्मिन्हि प्रयुज्यमाने स प्रसीदति, प्रियनामग्रहण इव लोकः । तदिहेतिपरं प्रयुक्तमभिधायकत्वाद्यावर्तितं शब्दस्वरूपमात्रं प्रतायते । तथा चाचार्यादिवत्परस्यात्मनः प्रतीकं संपद्यते । एव नामत्वेन प्रतीकत्वेन च परमात्मोपासनसाधनं श्रेष्ठमिति सर्ववेदान्तेष्ववगतम । जपकर्मस्वाध्यायादितेषु च बहुशः प्रयोगात्प्रसिद्धमस्य श्रेष्ठत्वम । अतस्तदेतदक्षरं वर्णात्मकमुद्गाथभक्त्यवयवत्वादुद्गाथशब्दवाच्यमुपासीत । कर्माङ्गावयवभूत ओंकार परमात्मप्रतीके दृढमेकाग्र्यलक्षणां मति सतनुयात । स्वयमेव श्रुतिरोंकारस्योद्गाथशब्दवाच्यत्वे हेतुमाह— ओमिति ह्युद्गायति, ओमित्यारभ्य हि यस्मादुद्गायत्यत उद्गाथ ओंकार इत्यर्थः । तस्योपव्याख्यानं तस्याक्षरस्योपव्याख्यानमेवमुपासनमेवंविधत्येवंफलमित्यादिकथनमुपव्याख्यानम । प्रवर्तत इति वाक्यशेष. ॥

एषां भूतानां पृथिवी रसः पृथिव्या आपो रस । अपामोषधयो रस ओषधीनां पुरुषो रस पुरुषस्य वाग्रसो वाच ऋग्रस ऋचः साम रसः साम्न उद्गीथो रसः ॥२॥

एषा चराचराणा भूताना पृथिवी रसो गतिः परायणमवष्टंभः । पृथिव्या आपो रसोऽप्सु ह्येता च प्रोता च पृथिव्यतस्ता रस. पृथिव्या । अपामोषधयो रसोऽप्परिणामत्वादोषधीनाम् । तासा पुरुषो रसोऽन्नपरिणामत्वात्पुरुषस्य । तस्यापि पुरुषस्य वाग्रस । पुरुषावयवानां हि वाक्सारिष्ठा, अतो वाक्पुरुषस्य रस उच्यते । तस्या अपि वाच ऋग्रस सारतरा । ऋच साम रस. सारतरम् । तस्यापि साम्न उद्गीथ प्रकृतत्वादोंकार सारतर ॥

स एष रसानां रसतम. परमः परार्ध्योऽष्टमो यदुद्गीथ ॥३॥

एवं स एष उद्गीथाख्य ओंकारो भूतादानामुत्तरोत्तररसानामतिशयेन रसो रसतम. । परम परमात्मप्रतीकत्वात् । पराध्योंऽर्ध स्थानं, परं च तदर्ध च परार्ध तदर्हतीति परार्ध्य , परमात्मस्थानार्हः परमात्मवदुपास्यत्वादित्यभिप्राय. । अष्टम पृथिव्यादिरससंख्यायां, यदुद्गीथो य उद्गीथ ॥

कतमा कतमर्क्कतमत्कतमत्साम कतम कतम उद्गीथ इति विमृष्टं भवति ॥४॥

वाच ऋग्रस इत्युक्तम । कतमा सा ऋक्, कतमत्तत्साम, कतमो वा स उद्गीथ. । कतमा कतमेति वीप्साऽऽदरार्था । ननु "वा बहुना जातिपरिप्रश्ने डतमच्" इति डतमच्प्रत्यय दृष्ट । न ह्यत्र ऋग्जातिबहुत्वं, कथं डतमच्प्रयोगः? नैष दोष । जातौ परिप्रश्नो जातपरिप्रश्न इत्येतस्मिन्विग्रहे जाताव्यक्तानां बहुत्वोपपत्तेः, न तु जाते परिप्रश्न इति विगृह्यते । ननु जातेः परिप्रश्न इत्यस्मिन्विग्रहे कतमः कठ इत्यादुदाहरणमुपपन्नं, जातौ परिप्रश्न इत्यत्र तु न युज्यते । तत्रापि कठादिजातावेव व्यक्तिबहुत्वाभिप्रायेण परिप्रश्न इत्यदोषः । यदि जाते परिप्रश्नः स्यात्कतमा कतमार्गेत्यादावुपसख्यानं कर्तव्यं स्यात । विमृष्टं भवति विमर्शः कृतो भवति ॥

वागेवर्क्प्राण सामोमित्येतदक्षरमुद्गीथं । तद्वा एतन्मिथुनं यद्वाक्च प्राणश्चर्क्च साम च ॥५॥

विमर्शे हि कृते सति प्रतिवचनोक्तिरुपपन्ना, वागेवर्क्प्राण. सामेति । वागृचोरेकत्वेऽपि नाष्टमत्वव्याघात·, पूर्वस्माद्वाक्यान्तरत्वात् आप्तिगुणसिद्धये हि ओमित्येतदक्षरमुद्गीथ इति । वाक्प्राणावृक्सामयोर्ना इति वागेवर्क्प्राणः सामेत्युच्यते । यथाऽकमसृक्सामयोन्योर्वाक्प्राणयोर्ग्रहणे हि सर्वासाम्चा सर्वेषां च साम्नामवरोध· कृत स्यात् । सर्वर्क्सामावरोधे च ऋक्सामसाध्याना च सर्वकर्मणामवरोध· कृत स्यात् । तदवरोधे च सर्वे कामा अवरुद्धा स्यु । ओमित्येतदक्षरमुद्गीथ इति भक्त्यांशका निवर्त्यते । तद्वा एतदिति मिथुनं निर्दिश्यते । कि तन्मिथुनमित्याह– यद्वाक्च प्राणश्च सर्वर्क्सामकारणभूतौ मिथुनम । ऋक्च साम चेति ऋक्सामकारणावृक्सामशब्दोक्तावित्यर्थ । न तु स्वतंत्रमृक्च साम च मिथुनम । अन्यथा हि वाक्प्राणावेत्येकं मिथुनमृक्साम च परमिति द्वे मिथुने स्याताम् । तथा च तद्वैतन्मिथुनमित्येकवचननिर्देशोऽनुपपन्न स्यात । तस्माद्दक्सामयोन्योर्वाक्प्राणयोरेव मिथुनत्वम ॥

तदेतन्मिथुनमोमित्येतस्मिन्नक्षरे संसृज्यते यदा वै मिथुनौ समागच्छत आपयतो वै तावन्योन्यस्य कामम् ॥६॥

तदेतदेवंलक्षणं मिथुनमोमित्येतस्मिन्नक्षरे संसृज्यते । एव सर्वकामाप्तिगुणविशिष्टं मिथुनमोकारे संसृष्टं विद्यत इत्योकारस्य सर्वकामाप्तिगुणवत्त्वं सिद्धम । वाङ्मयत्वमोकारस्य प्राणनिष्पाद्यत्वं च मिथुनेन संसृष्टत्वम । मिथुनस्य कामापयितृत्व प्रसिद्धमिति दृष्टान्त उच्यते– यथा लोके मिथुनौ मिथुनावयवौ स्त्रीपुंसौ यदा समागच्छतो ग्राम्यधर्मतया संयुज्येयाता तदाऽऽपयत प्रापयतः अन्योन्यस्येतरेतरस्य तौ कामम् । तथा च स्वात्मानुप्रविष्टेन मिथुनेन सर्वकामाप्तिगुणवत्त्वमोकारस्य सिद्धमित्यभिप्राय ॥

तदुपासकोऽप्युद्गाता तद्धर्मा भवतीत्याह—

आपयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते ॥७॥

आपयिता ह वै कामाना यजमानस्य भवति य एतदक्षरमेवमाप्तिगुणवदुद्गीथमुपास्ते तस्यैतद्यथोक्तं फलमित्यर्थ । "तं यथा यथोपासते तदेव भवति" इति श्रुते· ॥

तद्वा एतदनुज्ञाक्षरं यद्धि किंचानुजानात्योमित्येव तदाहैषो एव समृद्धिर्यदनुज्ञा समर्धयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते ॥८॥

समृद्धिगुणवांश्चोकार । कथम्— तद्वै एतत्प्रकृतमनुज्ञाक्षरमनुज्ञा च साक्षरं च तत् । अनुज्ञाऽनुमतिरोकार इत्यर्थः । कथमनुज्ञेत्याह श्रुतिरेव— यद्धि किंच यत्किंच लोके ज्ञानं धनं वानुजानाति विद्वान्धनी वा, तत्रानुमतिं कुर्वन्नोमित्येव तदाह । तथा च वेदे 'त्रयस्त्रिंशदित्योमिति होवाच' इत्यादि । तथा च लोकोऽपि तवेदं धनं गृह्णामीत्युक्ते ओमित्येवाह । अत एषा उ एवैषैव समृद्धिर्यदनुज्ञा, यानुज्ञा सा समृद्धिस्तन्मूलत्वादनुज्ञाया । समृद्धो ह्योमित्यनुज्ञां ददाति । तस्मात्समृद्धिगुणवानोंकार इत्यर्थः । समृद्धिगुणोपासकत्वात्तद्धर्मा सन्समर्धयिता ह वै कामाना यजमानस्य भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्त इत्यादि पूर्ववत् ॥

तेनेयं त्रयी विद्या वर्तत ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायत्येतस्यैवाक्षरस्यापचित्यै महिम्ना रसेन ॥९॥

अथेदानीमक्षरं स्तौत्युपास्यत्वात्प्रेरयितुमर्चनार्थम् । कथं, तेनाक्षरेण प्रकृतेनेयं ऋग्वेदादिलक्षणा त्रयी विद्या,— त्रय्यां विद्यायां विहितं कर्मेत्यर्थः न हि त्रयी विद्यैव,— आश्रावणादिभिर्वर्तते । कर्म तु तया प्रवर्तत इति प्रसिद्धम् । कथं, ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायतीति । लिंगाच्च सोमयाग इति गम्यते । तच्च कर्मैतस्यैवाक्षरस्यापचित्यै पूजार्थम् । परमात्मप्रतीकं हि तत् । तदर्पयतीति परमात्मन एव स्यात् "स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानवः" इति स्मृतेः । महिम्ना रसेन, किंचैतस्यैवाक्षरस्य महिम्ना महत्त्वेन ऋत्विग्यजमानादिप्राणैरित्यर्थः । तथैतस्यैवाक्षरस्य रसेन व्रीहियवादिरसनिर्वृत्तेन हविषेत्यर्थः । यागहोमाद्यक्षरेण क्रियते, तच्चादित्यमुपतिष्ठते, ततो वृष्ट्यादिक्रमेण प्राणोऽन्नं च जायते, प्राणैरन्नेन च यज्ञस्तायते, अत उच्यतेऽक्षरस्य महिम्ना रसेनेति ॥

तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद । नाना तु विद्या चाविद्या च यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति ॥१०॥ इति प्रथमः खंडः ॥

तत्राक्षरविज्ञानवतः कर्म कर्तव्यमिति स्थितमाक्षिपति— तेनाक्षरेणोभौ कुरुतः, यश्चैतदक्षरमेवं यथाव्याख्यातं वेद, यश्च कर्ममात्रविदक्षरयाथात्म्यं न वेद, तावुभौ कुरुतः कर्म । तयोश्च कर्ममामर्थ्यादेव फलं स्यात्कि तत्राक्षरयाथात्म्यविज्ञानेनेति । दृष्टं हि लोके हरीतकीं भक्षयतोस्तद्रसाभिज्ञेतरयोर्विरेचनम् । नैवम् ।

यस्माज्ज्ञाना तु विद्या चाविद्या च, भिन्ने हि विद्याविद्ये । तुशब्दः पक्षव्यावृत्त्यर्थः । नोकारस्य कर्मांगत्वमात्रविज्ञानमेव रसतमात्रिसमृद्धिगुणवद्विज्ञानं, किं तर्हि ततोऽभ्यधिकम् । तस्मात्तदंगाधिक्यात्तत्फलाधिक्यं युक्तमित्यभिप्रायः । दृष्टं हि लोके वणिक्शबरयोः पद्मरागादिमणिविक्रये वणिजो विज्ञानाधिक्यात्फलाधिक्यम् । तस्माद्यदेव विद्यया विज्ञानेन युक्त सन्करोति कर्म श्रद्धया श्रद्दधानश्च सन उपनिषदा योगेन युक्तश्चेत्यर्थ, तदेव कर्म वीर्यवत्तरमविद्वत्कर्मणोऽधिकफलं भवतीति । विद्वत्कर्मणो वीर्यवत्तरत्ववचनादविदुषोऽपि कर्म वीर्यवदेव भवतीत्यभिप्राय । न चाविदुष कर्मण्यनधिकारः । औपस्त्ये काडेऽविदुषामप्यात्विज्यदर्शनात् । रसतमात्रिसमृद्धिगुणवदक्षरमित्येकमुपासनम । मध्ये प्रयत्नान्तरादर्शनात् । अनेकैर्हि विशेषणैरनेकधोपास्यत्वात स्वत्वेनस्यैव प्रकृतस्योद्गीथाख्यस्य अक्षरस्योपव्याख्यानं भवति ॥ १ १ —

देवासुरा ह वै यत्र संयेतिरे उभये प्राजापत्यास्तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्याम इति ॥१॥

देवासुरा देवाश्चासुराश्च । देवा दाव्यतेर्द्योतनार्थस्य शास्त्रोद्भासिता इंद्रियवृत्तय । असुरास्तद्विपरीताः स्वेष्वेवासुषु विषयेषु प्राणनक्रियासु रमणास्वाभाविक्यस्तमआत्मिका इंद्रियवृत्तय एव । ह वै इति पूर्ववृत्तोद्भासकौ निपातौ । यत्र यस्मिन्निमित्त इतरेतरविषयापहारलक्षणे संयेतिरे, संपूर्वस्य यततेः संग्रामार्थत्वमिति सग्रामं कृतवन्त इत्यर्थ । शास्त्रीयप्रकाशवृत्त्यभिभवनाय प्रवृत्ताः स्वाभाविक्यस्तमोरूपा इंद्रियवृत्तयोऽसुराः । तथा तद्विपरीता शास्त्रार्थविषयविवेकज्योतिरात्मानो देवाः स्वाभाविकतमोरूपासुराभिभवनाय प्रवृत्ता इत्यन्योन्याभिभवोद्भवरूपः सग्राम इव सर्वप्राणिषु प्रतिदेहं देवासुरसंग्रामोऽनादिकालप्रवृत्त इत्यभिप्रायः । स इह श्रुत्याख्यायिकारूपेण धर्माधर्मोत्पत्तिविवेकविज्ञानाय कथ्यते प्राणविशुद्धिविज्ञानविधिपरतया । अत उभयेऽपि देवासुरा, प्रजापतेरपत्यानीति प्राजापत्याः । प्रजापतिः कर्मज्ञानाधिकृतः पुरुषः "पुरुष एवोक्थमयमेव महान्प्रजापतिः" इति श्रुत्यंतरात् । तस्य हि शास्त्राया स्वाभाविक्यश्च करणवृत्तयो विरुद्धा अपत्यानीव तदुद्भवत्वात् । तत्तत्रोत्कर्षापकर्षलक्षणनिमित्ते ह देवा उद्गीथमुद्गीथभक्त्युपलक्षितमौद्गात्रं कर्म आजह्रुराहृतवन्तः । तस्यापि केवलस्याहरणासंभवाज्ज्योतिष्टोमाद्याहृतवन्त इत्यभिप्रायः । तत्किमर्थमाजह्रुरित्यु-

च्यते अनेन कर्मणेनानमुरानभिभविष्याम इत्येवमभिप्राया. सन्त ॥

यदा च तदुद्गीथं कर्माजिहीर्षवस्तदा—

ते ह नासिक्यं प्राणमुद्गीथमुपासांचक्रिरे तं हासुरा पाप्मना विविधुस्तस्मात्तेनोभयं जिघ्रति सुरभि च दुर्गंधि च पाप्मना ह्येष विद्ध ॥२॥

ते ह देवा नासिक्यं नासिकाया भवं प्राणं चेतनावन्तं घ्राणं उद्गीथकर्तारमुद्गातारमुद्गीथभक्त्योपासांचक्रिरे उपासनं कृतवन्त इत्यर्थ । नासिक्यप्राणदृष्ट्योद्गीथाख्यमक्षरमोंकारमुपासांचक्रिर इत्यर्थ. । एवं हि प्रकृतार्थपरित्यागोऽप्रकृतार्थोपादानं च न कृतं स्यात । 'खल्वेतस्यैवाक्षरस्य' इत्योंकारो ह्युपास्यतया प्रकृतः । ननूद्गीथोपलक्षितं कर्माहृतवन्त इत्यवोच., इदानींमेवं कथं नासिक्यप्राणदृष्ट्योद्गीथाख्यमक्षरमोंकारमुपासांचक्रिर इत्याह्य ! नैष दोष । उद्गीथकर्मण्येव हि तत्कर्तृप्राणदेवतादृष्ट्योद्गीथभक्त्यवयवश्चोंकार उपास्यत्वेन विवक्षितो, न स्वतंत्र., अतस्तादर्थ्येन कर्माहृतवन्त इति युक्तमेवोक्तम । तमेवं देवैर्वृतमुद्गातारं ह्यासुरा स्वाभाविकतमआत्मानो ज्योतीरूपं नासिक्यं प्राणं देवं स्वेन पाप्मनाऽधर्मीसंगरूपेण विविधुर्विद्धवन्त , ससर्ग कृतवन्त इत्यर्थः । स हि नासिक्य. प्राणः कल्याणगंधग्रहणाभिमानासंगाभिभूतविवेकविज्ञानो बभूव । स तेन दोषेण पाप्मसंसर्गी बभूव । तदिदमुक्तमसुरा. पाप्मना विविधुरिति । यस्मादासुरेण पाप्मना विद्धस्तस्मात्तेन पाप्मना प्रेरितो घ्राणप्राणो दुर्गंधग्राहकः प्राणिनाम । अतस्तेनोभयं जिघ्रति लोक. सुरभि च दुर्गंधि च पाप्मना ह्येष यस्माद्विद्ध. । उभयग्रहणमविवक्षितम । यस्योभयं हविरार्तिमार्छतीति यद्वत । 'यदेवेदमप्रतिरूपं जिघ्रति' इति समानप्रकरणश्रुते. ॥

अथ ह वाचमुद्गीथमुपासांचक्रिरे ता हासुराः पाप्मना विविधुस्तस्मात्तयोभयं वदति सत्यं चानृतं च पाप्मना ह्येषा विद्धा ॥३॥ अथ ह चक्षुरुद्गीथमुपासांचक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयं पश्यति दर्शनीयं चादर्शनीयं च पाप्मना ह्येतद्विद्धम् ॥४॥ अथ ह श्रोत्रमुद्गीथमुपासांचक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयं शृणोति श्रवणीयं चाश्रवणीयं च पाप्मना ह्येतद्विद्धम् ॥५॥ अथ ह मन उद्गीथमुपासांचक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयं संकल्पते संकल्पनीयं चासंकल्पनीयं च पाप्मना ह्येतद्विद्धम् ॥६॥

मुख्यप्राणस्योपास्यत्वाय तद्विशुद्धत्वानुभवार्थोऽयं विचारः श्रुत्या प्रवर्तित । अतश्चक्षुरादिदेवता· क्रमेण विचार्य आसुरेण पाप्मना विद्धा इत्यपोद्यन्ते । समानमन्यत , अथ ह वाचं चक्षु· श्रोत्र मन इत्यादि । अनुक्ता अप्यन्या· त्वग्रसनादिदेवता द्रष्टव्या । 'एवमु खल्वेता देवताः पाप्मभि ' इति श्रुत्यंतरात ॥

अथ ह य एवायं मुख्य प्राणस्तमुद्गीथमुपासांचक्रिरे तं ह्यासुरा ऋत्वा विदध्वंसुर्यथाश्मानमाखणमृत्वा विध्वंसेतैवम् ॥७॥

आसुरेण पाप्मना विद्धत्वात् प्राणादिदेवता अपोद्याथानतरं ह य एवायं प्रसिद्धो मुखे भवो मुख्य प्राणस्तमुद्गीथमुपासाचक्रिरे, तं ह्यासुराः पूर्ववदृत्वा प्राप्य विदध्वंसुर्विनष्टा, अभिप्रायमात्रेण, अकृत्वा किंचिदपि प्राणस्य । कथं विनष्टा इत्यत्र दृष्टान्तमाह— यथा लोकेऽश्मानमाखण, न शक्यते खनितुं कुद्दालादिभि· टंकैश्च च्छेतुं न शक्योऽखन अखन एव आखणस्तं, ऋत्वा सामर्थ्यालोष्ट पांसुपिंडः श्रुत्यंतराच्च अश्मनि क्षिप्तोऽश्मभेदनाभिप्रायेण, तस्याश्मनः किंचिदप्यकृत्वा स्वयं विध्वंसेत विदार्येत, एव विदत्वंसुरित्यर्थः । एवं विशुद्धोऽसुरैरधर्षितत्वात्प्राण इति ॥

यथाश्मानमाखणमृत्वा विध्वंसत एवं हैव स विध्वंसते य एवंविदि पापं कामयते यश्चैनमभिदासति स एषोऽश्माखण ॥८॥

एवंविद· प्राणात्मभूतस्येदं फलमाह यथाश्मानमिति । एष एव दृष्टान्त । एवं हैव स विध्वंसते विनश्यति । कोऽसावित्याह— य एवंविदि यथोक्तप्राणविदि पापं तदनर्हं कर्तु कामयत इच्छति यश्चाप्येनमभिदासति हिनस्ति प्राणविदं प्रत्याक्रोशताडनादि प्रयुंक्ते सोऽप्येवमेव विध्वंसत इत्यर्थः । यस्मान्स एष प्राणवित्प्राणभूतत्वादश्माखण इवाश्माखणोऽधर्षणीय इत्यर्थः । ननु नासिक्योऽपि प्राणो वाग्वात्मा यथा मुख्यः, तत्र नासिक्य प्राणः पाप्मना विद्धः प्राण एव सन्न मुख्य· । कथम् ' नैष दोष । नासिक्यस्तु स्थानकरणवैगुण्यादसुरैः पाप्मना विद्ध , वाग्वात्मापि सन । मुख्यस्तु स्थानदेवताबलीयस्त्वाच्च विद्ध इति युक्तम । यथा वास्यादय· शिक्षावत्पुरुषाश्रया· कार्यविशेषं कुर्वन्ति, नान्यहस्तगता , तद्वद्दोषवत् घ्राणसचिवत्वाद्विद्धा घ्राणदेवता न मुख्य· ॥

नैवैतेन सुरभि न दुर्गंधि विजानात्यपहतपाप्मा ह्येष तेन यदश्नाति यत्पिबति तेनेतरान्प्राणानवति । एतमु एवान्ततोऽवित्त्वोत्क्रामति व्यादद्ा-त्येवान्तत इति ॥९॥

यस्मान्न विद्वोऽसुरैर्मुख्यस्तस्मान्नैवेतेन सुरभि दुर्गंधि वा विजानाति लोकः घ्राणेनैव तदुभयं विजानाति । अतश्च पाप्मकार्यादर्शनादपहतपाप्माऽपहतो विनाशितोऽपनीत पाप्मा यस्मात्सोऽयमपहतपाप्मा ह्येष विशुद्ध इत्यर्थ । यस्माच्च आत्मंभरय कल्याणाद्यासंगवत्त्वान घ्राणादयो, न तथात्मंभरिर्मुख्य, किं तर्हि, सर्वार्थः । कथमित्युच्यते– तेन मुख्येन यदश्नाति यत्पिबति लोकस्तेनाशितेन पीतेन चेतरान्प्राणान्घ्राणादीनवति पालयति । तेन हि तेषां स्थितिर्भवतीत्यर्थ. । अतः सर्वभर प्राणोऽतो विशुद्ध. । कथं पुनर्मुख्याशितपीताभ्यां स्थितिरितरेषां गम्यत इति, उच्यते— एतमु एव मुख्यं प्राणं मुख्यप्राणस्य वृत्तिमन्नपाने इत्यर्थः । अंततोऽन्ते मरणकालेऽविद्वांसलब्ध्वोत्क्रामति, घ्राणादिप्राणसमुदाय इत्यर्थ । अप्राणो हि न शक्नोत्यशितुं पातुं वा । तेन तदोत्क्रान्ति प्रसिद्धा घ्राणादिकलापस्य । दृश्यते ह्युत्क्रान्तौ प्राणस्याशिशिषा, यतो व्याददात्येव आस्यविदारणं करोतीत्यर्थ । तद्धयन्नालाभ उत्क्रान्तस्य लिंगम ॥

तं हांगिरा उद्गीथमुपासांचक्र एतमु एवांगिरसं मन्यन्तेऽगानां यद्रस ॥

तं हांगिरास्त मुख्यं प्राणं हांगिरा इत्येवंगुणमुद्गीथमुपासांचक्र उपासनं कृतवान्बको दाल्भ्य इति वक्ष्यमाणेन संबध्यते । तथा बृहस्पतिरित्याख्याय इति चोपासांचक्रे बक इत्येव संबंधं कृतवन्त केचित् । एतमु एवांगिरसं बृहस्पतिमायास्यं प्राणं मन्यन्ते इति वचनात् । भवत्येवं यथाश्रुतासंभवे, संभवति तु यथाश्रुतमृषिचोदनायामपि— श्रुत्यंतरवत—'तस्मान्छर्तावेन इत्याचक्षत एतमेव सन्तं' ऋषिमपि । तथा माध्यमा गृत्समदो विश्वामित्रो वामदेवोऽत्रिरित्यादिऋषीनेव प्राणमापादयति श्रुति. । तथा तानप्यृषीन्प्राणोपासकानांगिरोबृहस्पत्यायास्यान्प्राणं करोत्यभेदविज्ञानाय "प्राणो ह पिता प्राणो माता" इत्यादिवच्च । तस्माद्दृषिरांगिरा नाम प्राण एव सन्नात्मानमांगिरसं प्राणमुद्गीथमुपासांचक्र इत्येतत । यद्यस्मात्सोऽगाना प्राणः सन्रसस्तेनासावांगिरसः ॥

तेन तं ह बृहस्पतिरुद्गीथमुपासांचक्र एतमु एव बृहस्पतिं मन्यन्ते वाग्घि बृहती तस्या एष पति. ॥११॥

तथा वाचो बृहत्याः पतिस्तेनासौ बृहस्पतिः ॥

तेन तं हायास्य उद्गीथमुपासांचक्र एतमु एवायास्यं मन्यन्त आस्याद्यदयते ॥१२॥

तथा यद्यस्मादास्यादयते निर्गच्छति तेनायास्य ऋषिः प्राण एव सन्नित्यर्थः । तथान्योऽप्युपासक आत्मानमेवाङ्गिरसादिगुणं प्राणमुद्गीथमुपासीतेत्यर्थः ॥

तेन तं ह बको दाल्भ्यो विदांचकार । स ह नैमिशीयानामुद्गाता बभूव स ह स्मेभ्यः कामानागायति ॥१३॥

न केवलमाङ्गिरसप्रभृतय उपासाञ्चक्रिरे । तं ह बको नाम दल्भस्यापत्यं दाल्भ्यो विदाञ्चकार यथादर्शितं प्राण विज्ञातवान् । विदित्वा च स ह नैमिशीयाना सत्रिणामुद्गाता बभूव । स च प्राणविज्ञानसामर्थ्यादेभ्यो नैमिशीयेभ्यः कामानागायति स्म ह आगीतवान्किलेत्यर्थ ॥

आगाता ह वै कामानां भवति य एतदेव विद्वानक्षरमुद्गीथमुपास्त इत्यध्यात्मम् ॥१४॥ इति द्वितीय खड ॥

तथान्योऽप्युद्गाताऽऽगाता ह वै कामाना भवति, य एतदेव विद्वान्यथोक्तगुणं प्राणमक्षरमुद्गीथमुपास्ते, तस्यैतत दृष्ट फलमुक्तम । प्राणात्मभावस्त्वदृष्टं 'देवो भूत्वा देवानप्येति' इति श्रुत्यंतरात्सिद्धमेवेत्यभिप्राय । इत्यध्यात्मं एतदात्मविषयमुद्गीथोपासनमित्युक्तोपसंहार . अधिदैवतोद्गीथोपासने वक्ष्यमाणे बुद्धिसमाधानार्थः ॥ १२—

अथाधिदैवतं य एवासौ तपति तमुद्गीथमुपासीतोद्यन्वा एष प्रजाभ्य उद्गायति । उद्यंस्तमो भयमपहन्त्यपहन्ता ह वै भयस्य तमसो भवति य एवं वेद ॥१॥

अथानंतरमधिदैवतं देवताविषयमुद्गीथोपासनं प्रस्तुतमित्यर्थ अंतकोपास्यत्वादुद्गीथस्य । य एवासावादित्यस्तपति तमुद्गीथमुपासात आदित्यदृष्टयोद्गीथमुपासीतेत्यर्थः । तमुद्गीथमित्युद्गाथशब्दोऽक्षरवाची सन्कथमादित्ये वर्तते इति उच्यते— उद्यन्नुद्गच्छन्वै । एष प्रजाभ्यः प्रजार्थमुद्गायति प्रजानामन्नोत्पत्त्यर्थम् । न ह्यनुद्यति तस्मिन्व्रीह्यादे निष्पत्ति स्यादत उद्गायतीवोद्गायति, यथैवोद्गातान्नार्थमत उद्गीथः सवितेत्यर्थ । किंचोद्यन्नेष तमस्तज्ज च भयं प्राणिनामपहन्ति । तमेवंगुणं सवितारं यो वेद सोऽपहन्ता नाशयिता ह वै भयस्य जन्ममरणादिलक्षणस्यात्मनस्तमसश्च तत्कारणस्याज्ञानलक्षणस्य भवति ॥

यद्यपि स्थानभेदात्प्राणादित्यौ भिन्नाविव लक्ष्येते तथापि न स तत्त्वभेदस्तयोः ।

कथम्—

समान उ एवायं चासौ चोष्णोऽयमुष्णोऽसौ स्वर इतीममाचक्षते स्वर इति प्रत्यास्वर इत्यमुं तस्माद्वा एतमिममसुं चोद्गीथमुपासीत ॥२॥

समान उ एव तुल्य एव प्राण. सवित्रा गुणत., सविता च प्राणेन। यस्मादुष्णोऽयं प्राण उष्णश्चासौ सविता। किंच स्वर इतामं प्राणमाचक्षते कथयन्ति, तथा स्वर इति प्रत्यास्वर इति चामुं सवितारम्। यस्मात्प्राण स्वरित्येव न पुनर्मृत प्रत्यागच्छति, सविता त्वस्तमित्वा पुनरन्यदहन्यहनि प्रत्यागच्छति, अतः प्रत्यास्वर.। अस्माद्गुणतो नामतश्च समानावितरेतरं प्राणादित्यौ। अतः तत्त्वाभेदादेतं प्राणमिममसुं चादित्यमुद्गीथमुपासीत ॥

अथ खलु व्यानमेवोद्गीथमुपासीत यद्वै प्राणिति स प्राणो यदपानिति सोऽपानः। अथ य प्राणापानयोः संधिः स व्यानो यो व्यान सा वाक्। तस्मादप्राणन्नपानन्वाचमभिव्याहरति ॥३॥

अथ स्वित्यति प्रकारान्तरेणोपासनमुद्गीथस्योच्यते, व्यानमेव वक्ष्यमाणलक्षणं प्राणस्यैव वृत्तिविशेषमुद्गीथमुपासीत। अधुना तस्य तत्त्व निरूप्यते—यद्वै पुरुष प्राणिति मुखनासिकाभ्यां वायुं बहिर्निःसारयति स प्राणाख्यो वायोर्वृत्तिविशेषो, यदपानित्यपश्वासिति ताभ्यामेवान्तराकर्षति वायुं सोऽपानोऽपानाख्या वृत्ति। ततः किमिति, उच्यते—अथ य उक्तलक्षणयोः प्राणापानयोः संधिस्तयोरन्तरा वृत्तिविशेष. स व्यानः, यः सांख्यादिशास्त्रप्रसिद्धः, श्रुत्या विशेषनिरूपणाच्छ्रुत्या व्यान इत्यभिप्रायः। कस्मात्पुनः प्राणापानौ हित्वा महतायासेन व्यानस्यैवोपासनमुच्यते। वीर्यवत्कर्महेतुत्वात्। कथं वीर्यवत्कर्महेतुत्वमित्याह—यो व्यान सा वाक्। व्यानकार्यत्वाद्वाच्च। यस्माच्च्यानानिर्वर्त्या वाक् तस्मादप्राणन्नपानन्प्राणापानव्यापारावकुर्वन्वाचमभिव्याहरत्युच्चारयति लोक ॥

या वाक्सर्क्तस्मादप्राणन्नपानन्नृचमभिव्याहरति यर्क्तत्साम तस्मादप्राणन्नपानन्साम गायति यत्साम स उद्गीथस्तस्मादप्राणन्नपानन्नुद्गायति ॥४॥

तथा वाग्विशेषामृचमृक्संस्थं च साम, सामावयवं चोद्गीथमप्राणन्नपानन व्यानेनैव निर्वर्तयतार्त्याभिप्रायः ॥

अतो यान्यन्यानि वीर्यवन्ति कर्माणि यथाग्नेर्मथनमाजे सरणं दृढस्य धनुष आयमनमप्राणन्नपानंस्तानि करोत्येतस्य हेतोर्व्यानमेवोद्गीथमुपासीत ॥५॥

न केवलं वागाद्यभिव्याहरणमेव, अतोऽस्मादन्यान्यपि यानि वीर्यवन्ति कर्माणि प्रयत्नाधिक्यनिर्वर्त्यानि यथाग्निर्मथनं, आजेर्मर्यादाया मरणं धावनं, दृढस्य धनुष आयमनमाकर्षणमप्राणन्नपानंस्तानि करोति । अतो विशिष्टो व्यान प्राणादिवृत्तिभ्यः । विशिष्टस्योपासनं ज्यायः फलवत्त्वाद्राजोपासनवत् । एतस्य हेतोरेतस्मात्कारणाद्व्यानमेवोद्गीथमुपासीत नान्यदवृत्त्यतरम् । कर्मवीर्यवत्तरत्वं फलम् ॥

अथ खलूद्गीथाक्षराण्युपासीतोद्गीथ इति प्राण एवोत्प्राणेन ह्युत्तिष्ठति वाग्गीर्वाचो ह गिर इत्याचक्षतेऽन्नं थमन्ने हीदं सर्वं स्थितम् ॥६॥

अथाधुना खलूद्गीथाक्षराण्युपासीत भक्त्यक्षराणि मा भवान्नत्यतो विशिनष्टि—उद्गीथ इति, उद्गीथनामाक्षराणात्यर्थं । नामाक्षरोपासनेऽपि नामवत एवोपासनं कृतं भवेदमुकमिश्रा इति यद्वत । प्राण एवोत्, उदित्यस्मिन्नक्षरे प्राणदृष्टिं । कथं प्राणस्योत्त्वमित्याह—प्राणेन ह्युत्तिष्ठतीति सर्वोऽप्राणस्यावसाददर्शनादतोऽस्त्युदः प्राणस्य च सामान्यम् । वाग्गा । वाचो ह गिर इत्याक्षचते शिष्टा । तथान्नं थमन्ने हीदं सर्वं स्थितमतोऽस्त्यन्नस्य थाक्षरस्य च सामान्यम् ॥

द्यौरेवोदंतरिक्षं गी पृथिवी थमादित्य एवोद्गायुर्गीरग्निस्थं सामवेद एवोद्यजुर्वेदो गीर्ऋग्वेदस्थं दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतान्येव विद्वानुद्गीथाक्षराण्युपास्त उद्गीथ इति ॥७॥

त्रयाणा श्रुत्युक्तानि सामान्यानि तानि तेनानुरूपेण शेषेष्वपि द्रष्टव्यानि । द्यौरेव उत् उच्चःस्थानात् । अंतरिक्षं गीर्गिरणाल्लोकानाम् । पृथिवी थं प्राणिस्थानात् । आदित्य एवोद्गुरुत्वात् । वायुर्गीरन्नादानां गिरणात् । अग्निस्थं याज्ञायकर्मावस्थानात । सामवेद एवोत्स्वर्गसंस्तुतत्वात् । यजुर्वेदो गीर्यजुषां प्रत्तस्य हविषो देवताना गिरणात् । ऋग्वेदस्थमृच्यध्यूढत्वात्साम्नः । उद्गीथाक्षरोपासनफलमधुनोच्यते—दुग्धे दोग्ध्यस्मै साधकाय । का सा, वाक्, कं दोहम् । कोऽसौ दोहः इत्याह—यो वाचो दोह ऋग्वेदादिशब्दसाध्यं फलमित्यभिप्रायः, तद्वाचो दोहः तं स्वयमेव वाग्दोग्ध्यात्मानमेव दोग्धि । किचान्नवान्प्रभूतान्नोऽन्नादश्च दीप्ताग्निर्भवति, य एतानि यथोक्तान्येव यथोक्तगुणान्युद्गीथाक्षराणि विद्वान्सन उपास्त उद्गीथ इति ॥

अथ खल्वार्शाःसमृद्धिरुपसरणानीत्युपासीत येन साम्ना स्तोष्यन्स्यात्तत्सामोपधावेत ॥८॥

अथ खल्विदानीमाशी समृद्धिराशिष. कामस्य समृद्धिर्यथा भवत्तदुच्यत इति वाक्यशेष. । उपसरणान्युपसर्तव्यानि उपगंतव्यानि ध्येयानीत्यर्थ । कथ, इत्युपासीत एवमुपासीत । तद्यथा-- येन साम्ना येन सामविशेषेण स्तोष्यन्स्तुति करिष्यन्स्याद्धवेदुद्गाता तत्सामोपधावेदुपसंराचितयेदुत्पत्त्यादिभि ॥

यस्यामृचि तामृचं यदार्षेयं तमृषिं यां देवतामभिष्टोष्यन्स्यात्ता देवतामुपधावेत ॥९॥

यस्यामृचि तत्साम ता चर्चमुपधावेद्देवतादिभि । यदार्षेय साम त चर्षिम । या देवतामभिष्टोष्यन्स्यात्ता देवतामुपधावेत ॥

येन च्छंदसा स्तोष्यन्स्यात्तच्छंद उपधावेद्येन स्तोमेन स्तोष्यमाणः स्यात्तं स्तोममुपधावेत् ॥१०॥

येन च्छंदसा गायत्र्यादिना स्तोष्यन्स्यात्तच्छंद उपधावेत् । येन स्तोमेन स्तोष्यमाणः स्यात्— स्तोमागफलस्य कर्तृगामित्वादात्मनेपदं स्तोष्यमाण इति— तं स्तोममुपधावेत् ॥

यां दिशमभिष्टोष्यन्स्यात्ता दिशमुपधावेत् ॥११॥

यां दिशमभिष्टोष्यन्स्यात्ता दिशमुपधावेदधिष्ठावादिभि ॥

आत्मानमंतत उपसृत्य स्तुवीत कामं ध्यायन्नप्रमत्तोऽभ्याशो ह यदस्मै स काम समृध्येत यत्काम स्तुवीतेति यत्काम स्तुवीतेति ॥१२॥

आत्मानमुद्गाता स्वं रूपं गोत्रनामादिभिः, सामादीन्क्रमेण स्वं चात्मानं अंततोऽन्त उपसृत्य स्तुवीत । काम ध्यायन्नप्रमत्त स्वरोष्मव्यंजनादिभ्यः प्रमादमकुर्वन । ततोऽभ्याश क्षिप्रमेव ह यद्यत्रात्मा एवंविदे स काम समृध्येत समृद्धि गच्छेत् । कोऽसौ यत्कामो. य कामोऽस्य गोऽयं यत्काम . संस्तुवीतेति । द्विरुक्तिरादरार्था ॥ **इति तृतीयः खंडः ॥** १.३.—

ओमित्येतदक्षरमुद्गीथमुपासीतोमिति ह्युद्गायति तस्योपव्याख्यानम् ॥१॥

ओमित्येतदित्यादिप्रकृतस्याक्षरस्य पुनरुपादानमुद्गीथाक्षरायुपासनान्तरितत्वादन्यत्र प्रसंगो मा भूदित्येवमर्थम । प्रकृतस्यैवाक्षरस्यामृताभयगुणविशिष्टस्योपासनं विधातव्यमित्यारंभ· । ओमित्यादि व्याख्यातम ॥

देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशंस्ते छंदोभिरच्छादयन्यदेभिरच्छादयंस्तच्छंदसां छंदस्त्वम ॥२॥

देवा वै मृत्योर्मारकाद्बिभ्यतः किं कृतवन्त इत्युच्यते । त्रयी विद्यां त्रयी-विहितं कर्म प्राविशन्प्रविष्टवन्तो वैदिकं कर्म प्रारब्धवन्त इत्यर्थः, तन्मृत्योस्त्राणं मन्यमानाः । किंच ते कर्मण्यविनियुक्तैश्छंदोभिर्मन्त्रैर्जपहोमादि कुर्वन्त आत्मानं कर्मान्तरेष्वच्छादयंश्छादितवन्तः । यद्यस्मादेभिर्मन्त्रैरच्छादयंस्तत्तस्माच्छंदसा मंत्राणां छादनाच्छंदस्त्वं प्रसिद्धमेव ॥

तानु तत्र मृत्युर्यथा मत्स्यमुदके परिपश्येदेवं पर्यपश्यदृचि साम्नि यजुषि । ते नु विदित्वोर्ध्वा ऋच साम्नो यजुष स्वरमेव प्राविशन् ॥३॥

तास्तत्र देवान्कर्मपरान्मृत्युर्यथा लोके मत्स्यघातको मत्स्यमुदके नाति-गंभीरे परिपश्येद्वडिशोदकस्रावोपायसाध्यं मन्यमान, एवं पर्यपश्यत् दृष्टवान्मृत्यु कर्मक्षयोपायेन साध्यान्देवान्मेने इत्यर्थः । कासौ देवान्ददर्शेत्युच्यते— ऋचि साम्नि यजुषि । ऋग्यजुःसामसंबंधिकर्मणात्यर्थ । ते नु देवा वैदिकेन कर्मणा संस्कृता शुद्धात्मान सन्तो मृत्योश्चिकीर्षितं विदितवन्त । विदित्वा च त ऊर्ध्वा व्यावृत्ता कर्मभ्य ऋच साम्नो यजुष ऋग्यजु सामसंबद्धात्कर्मणोऽभ्युत्था-येत्यर्थ । तेन कर्मणा मृत्युभयापगमं प्रति निराशास्तदपास्यामृताभयगुणमक्षरं स्वरं स्वरशब्दितं प्राविशन्नेव प्रविष्टवन्त, ओंकारोपासनपरा संवृत्ताः । एवशब्दो अवधारणार्थ सन्समुच्चयप्रतिषेधार्थ । तदुपासनपरा संवृत्ता इत्यर्थ. ॥

कथं पुन स्वरशब्दवाच्यत्वमक्षरस्येत्युच्यते

यदा वा ऋचमाप्नोत्योमित्येवातिस्वरत्येवं सामैवं यजुरेष उ स्वरो यदेतदक्षरमेतदमृतमभयं तत्प्रविश्य देवा अमृता अभया अभवन् ॥४॥

यदा वा ऋचमाप्नोत्योमित्येवातिस्वरत्येवं सामैवं यजुः । एष उ स्वर. । कोऽसौ ? यदेतदक्षरमेतदमृतमभयं, तत्प्रविश्य यथागुणमेवामृता अभयाश्चाभव-न्देवाः ॥

स य एतदेवं विद्वानक्षरं प्रणौत्येतदेवाक्षरं स्वरममृतमभयं प्रविशति तत्प्रविश्य यदमृता देवास्तदमृतो भवति ॥५॥ इति चतुर्थ खंडः ॥

स योऽन्योऽपि देववदेवैतदक्षरमेवममृताभयगुणं विद्वान्प्रणौति स्तौति । उपासनमेवात्र स्तुतिर्रभिप्रेता । स तथैवैतदेवाक्षरं स्वरममृतमभयं प्रविशति । तत्प्रविश्य च, राजकुलं प्रविष्टानामिव राज्ञोऽन्तरंगबहिरंगतावन्न परस्य ब्रह्मणोऽ-न्तरंगबहिरंगताविशेषः । किं तर्हि, यदमृता देवा येनामृतत्वेन यदमृता अभू-

वंस्तेनैवामृतत्वेन विशिष्टस्तदमृतो भवति, न न्यूनता नाप्यधिकताऽमृतत्व इत्यर्थः ॥

॥ इति चतुर्थ खंडः ॥ १.४ —

प्राणादित्यदृष्टिविशिष्टस्योद्गीथस्योपासनमुक्तमेवानूद्य प्रणवोद्गीथयोरेकत्वं कृत्वा तस्मिन्प्राणरश्मिभेदगुणविशिष्टदृष्ट्या अक्षरस्योपासनमनेकपुत्रफलमिदानीं वक्तव्यमित्यारभ्यते—

अथ खलु य उद्गीथ स प्रणवो य प्रणव स उद्गीथ इत्यसौ वा आदित्य उद्गीथ एष प्रणव ओमिति ह्येष स्वरन्नेति ॥१॥

अथ खलु य उद्गीथ स प्रणवो बह्वृचानां, यश्च प्रणवस्तेषां स एव च्छांदोग्य उद्गीथशब्दवाच्यः। असौ वा आदित्य उद्गीथ एष प्रणवः। प्रणवशब्दवाच्योऽपि स एव बह्वृचाना नान्यः। उद्गीथ आदित्यः। कथं? उद्गाथाख्यमक्षरमोमित्येतदेष हि यस्मात्स्वरन्नुच्चारयन्नेनेकार्थत्वाद्धातूनाम्। अथवा स्वरन्गच्छन्नेति। अतोऽसावुद्गीथः सविता ॥

एतमु एवाहमभ्यगासिषं तस्मान्मम त्वमेकोऽसीति ह कौषीतकिः पुत्रमुवाच रश्मींस्त्वं पर्यावर्तयाद्बहवो वै ते भविष्यन्तीत्यधिदैवतम् ॥२॥

तमेतमु एवाहमभ्यगासिषमभिमुख्येन गातवानस्मि आदित्यरश्म्यभेदं कृत्वा ध्यानं कृतवानस्मीत्यर्थः। तेन तस्मात्कारणान्मम त्वमेकोऽसि पुत्र इति ह कौषीतकिः कुषीतकस्यापत्यं कौषीतकिः पुत्रमुवाचोक्तवान्। अतो रश्मीनादित्यं च भेदेन त्वं पर्यावर्तयात्पर्यावर्तयेत्यर्थः, त्वयोगात्। एवं बहवो वै ते तव पुत्रा भविष्यन्तीत्यधिदैवतम् ॥

अथाध्यात्मं य एवाय मुख्यः प्राणस्तमुद्गीथमुपासीतोमिति ह्येष स्वरन्नेति ॥३॥

अथानंतरमध्यात्ममुच्यते। य एवायं मुख्यः प्राणस्तमुद्गीथमुपासीतेत्यादि पूर्ववत्। तथोमिति ह्येष प्राणोऽपि स्वरन्नेत्योमिति ह्यनुज्ञा कुर्वन्निव वागादिप्रवृत्त्यर्थमेतीत्यर्थः। न हि मरणकाले मुमूर्षोः समीपस्थाः प्राणस्योंकरणं शृण्वन्तीति। एतत्सामान्यादादित्येऽप्योंकरणमनुज्ञामात्र द्रष्टव्यम् ॥

एतमु एवाहमभ्यगासिषं तस्मान्मम त्वमेकोऽसीति ह कौषीतकिः पुत्रमुवाच प्राणांस्त्वं भूमानमभिगायताद्बहवो वै मे भविष्यन्तीति ॥४॥

एतमु एवाहमस्यगासिषमित्यादि पूर्ववदेव । अतो वागादान्मुख्य च प्राणं भेदगुणविशिष्टमुद्गाथं पश्यन्मुमानं मनसाभिगायतात् पूर्ववदावर्तयेत्यर्थः । बहवो वै मे मम पुत्रा भविष्यन्तीत्येवमभिप्रायः सन्नित्यर्थः । प्राणादित्वैकत्वोद्गाथदृष्टेरेकपुत्रत्वफलदोषेणापोदितत्वाद्वहिमप्राणभेददृष्टे कर्तव्यता चोद्यतेऽस्मिन्खंडे बहुपुत्रफलत्वार्थम् ॥

अत्र खलु य उद्गीथ स प्रणवो य प्रणव स उद्गीथ इति होतृषदनाद्वैवापि दुरुद्गीतमनुसमाहरतीत्यनुसमाहरतीति ॥५॥

अथ खलु य उद्गीथ इत्यादि प्रणवोद्गाथैकत्वदर्शनमुक्तं तस्यैतत्फलमुच्यते—होतृषदनाद्धोता यत्रस्थ ओंमिति तत्स्थानं होतृषदनं, होत्रात्कर्मण सम्यक्प्रयुक्तादित्यर्थः । न हि देशमात्रात्फलमाहर्तुं शक्यम । किं तर्हि वैवापि दुरुद्गीतं दुष्टमुद्गीतमुद्गात्रा स्वकर्मणि क्षतं कृतमित्यर्थ । तदनुसमाहरत्यनुसंधत्त इत्यर्थ । द्विरुक्तयेव धातुवैषम्यसमीकरणमिति ॥ इति पंचम खंडः ॥ १५ —

अथेदानीं सर्वफलसंपत्त्यर्थमुद्गाथस्योपासनान्तरं विधित्स्यते—

इयमेवर्गग्निः साम तदेतदेतस्यामृच्यध्यूढं साम तस्मादृच्यध्यूढं साम गीयत इयमेव साग्निरमस्तत्साम ॥१॥

इयमेव पृथिव्यृक् । ऋचि पृथिवादृष्टि कार्या । तथाग्निः साम । साम्न्यग्निदृष्टि । कथं पृथिव्यग्न्योर्ऋक्सामत्वमिति । उच्यते । तदेतदग्न्याख्यं सामैतस्यां पृथिव्यामृच्यध्यूढमाधिगतमुपरिभावेन स्थितमित्यर्थः । ऋचीव साम । तस्मादत एव कारणादृच्यध्यूढमेव साम गायत इदानीमपि सामगे । यथा च ऋक्सामना नात्यंत भिन्ने अन्योन्य तथैतौ पृथिव्यग्नी । कथं इयमेव पृथिवी सा सामनामार्थशब्दवाच्या, इतरार्थशब्दवाच्योऽग्निरम । तदेतत्पृथिव्यग्निद्वयं सामैकशब्दाभिधेयत्वमापन्नं साम । तस्मान्नान्योन्य भिन्नं पृथिव्यग्निद्वयं नित्यसंश्लिष्टमृक्सामना इव । तस्माच्च पृथिव्यग्न्योर्ऋक्सामत्वमित्यर्थ । सामाक्षरयोः पृथिव्यग्निदृष्टिविधानार्थमियमेव साग्निरम इति केचित् ॥

अंतरिक्षमेवर्वायु सामं तदेतदेतस्यामृच्यध्यूढं साम तस्मादृच्यध्यूढं साम गीयतेऽन्तरिक्षमेव सा वायुरमस्तत्साम ॥२॥

अंतरिक्षमेवर्वायु सामेत्यादि पूर्ववत् ॥

द्यौरेवर्गादित्यः साम तदेतदेतस्यामृच्यध्यूढं साम तस्मादृच्यध्यूढं साम गीयते द्यौरेव सादित्योऽमस्तत्साम ॥३॥ नक्षत्राण्येवर्क्चंद्रमा साम तदेतदेतस्यामृच्यध्यूढं साम तस्मादृच्यध्यूढं साम गीयते नक्षत्राण्येव सा चंद्रमा अमस्तत्साम ॥४॥

नक्षत्राणामाधिपतिश्चंद्रमा अतः स साम ॥

अथ यदेतदादित्यस्य शुक्लं भा· सैवर्गथ यन्नीलं पर· कृष्णं तत्साम तदेतदेतस्यामृच्यध्यूढं साम तस्मादृच्यध्यूढं साम गीयते ॥५॥ .

अथ यदेतदादित्यस्य शुक्लं भा. शुक्ला दीप्तिः सैवर्क् । अथ यदादित्ये नीलं परः कृष्णं परोऽतिशयेन कार्ष्ण्यं तत्साम । तद्धयेकान्तसमाहितदृष्टैर्दृश्यते ॥

अथ यदेवैतदादित्यस्य शुक्लं भा· सैव साथ यन्नीलं पर· कृष्णं तदम·स्तत्सामाथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णः ॥६॥

ते एवैते भासौ शुक्लकृष्णावे सा चामश्च साम । अथ य एषोऽन्तरादित्य आदित्यस्यान्तर्मध्ये हिरण्मयो हिरण्मय इव हिरण्मयः । न हि सुवर्णविकारत्वं देवस्य संभवति । ऋक्सामगेष्णत्वापहतपाप्मत्वासंभवात । न हि सौवर्णेऽचेतने पाप्मादिप्राप्तिरस्ति येन प्रतिषिध्येत, चाक्षुषे चाग्रहणात् । अतो लुप्तोपम एव हिरण्मयशब्दो, ज्योतिर्मय इत्यर्थः । उत्तरेष्वपि समाना योजना । पुरुषः पुरि शयनात्पूरयति वा स्वेनात्मना जगदिति, दृश्यते निवृत्तचक्षुभि· समाहितचेतोभिः ब्रह्मचर्यादिसाधनापेक्षैः । तेजस्विनोऽपि श्मश्रुकेशादय. कृष्णाः स्युरित्यतो विशिनष्टि— हिरण्यश्मश्रुर्हिरण्यकेश इति । ज्योतिर्मयाण्येवास्य श्मश्रूणि केशाश्चेत्यर्थः । आप्रणखात्प्रणखो नखाग्रं नखाग्रेण सह सर्वः सुवर्ण इव भारूप इत्यर्थः ॥

तस्य यथा कप्यासं पुंडरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्य. पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद ॥७॥

तस्यैवं सर्वत सुवर्णवर्णस्याप्यक्ष्णोर्विशेषः । कथं ? तस्य यथा कपेर्मर्कटस्यासः कप्यासः । आसेरुपवेशनार्थस्य करणे घञ् । कपिपृष्ठान्तो येनोपविशति । कप्यास इव पुंडरीकमत्यंततेजस्व्येवमस्य देवस्याक्षिणी । उपमितोपमानत्वान्न हीनोपमा । तस्यैवंगुणविशिष्टस्य गौणमिदं नामोदिति । कथं गौणत्वम् । स एष देवः सर्वेभ्यः पाप्मभ्यः पाप्मना सह तत्कार्येभ्य इत्यर्थः । 'य आत्माऽपहतपाप्मा'

इत्यादि वक्ष्यति । उदित उत् इत उद्गत इत्यर्थः, अतोऽसावुन्नामा । तमेवंगुणसंपन्नमुन्नामानं यथोक्तेन प्रकारेण यो वेद सोऽप्येवमेवोदित्युद्गच्छति सर्वेभ्यः पाप्मभ्यः । ह वै इत्यवधारणार्थौ निपातौ । उदेत्येवेत्यर्थः ॥

तस्यर्क्च साम च गेष्णौ तस्मादुद्गीथस्तस्मात्त्वेवोद्गातैतस्य हि गाता स एष ये चामुष्मात्परांचो लोकास्तेषां चेष्टे देवकामानां चेत्यधिदैवतम् ॥८॥

तस्योद्गीथत्वं देवस्यादित्यादीनामिव विवक्षितत्वात् आह— तस्यर्क्च साम च गेष्णौ पृथिव्याद्युक्तलक्षणे पर्वणी । सर्वात्मा हि देवः । परापरलोककामेशितृत्वादुपपद्यते पृथिव्यन्याद्यृक्सामगेष्णत्वम् । सर्वयोनित्वाच्च । यत एवमुन्नामा चासावृक्सामगेष्णश्च तस्मादृक्सामगेष्णत्वे प्राप्ते उद्गीथत्वमुच्यते परोक्षेण, परोक्षप्रियत्वाद्देवस्य, तस्मादुद्गीथ इति । तस्मात्त्वेव हेतोरुद्गं गायतीत्युद्गाता । यस्माद्धयेतस्य यथोक्तस्योन्नाम्नो गाताऽसौ अतो युक्तोद्गातेति नामप्रसिद्धिरुद्गातुः । स एष देव उन्नामा ये चामुष्मादादित्यात्पराचः परागंचनाद्ध्वा लोकास्तेषां लोकानां चेष्टे न केवलमादित्यस्यैव । चशब्दादाहरयति च "स दाधार पृथिवीं द्यामुतेमाम्" इत्यादिमंत्रवर्णात् । किंच देवकामानामार्ष्टि इत्येतदधिदैवतं देवताविषयं देवस्योद्गीथस्य स्वरूपमुक्तम् ॥ इति षष्ठः खंडः ॥ १६ —

अथाध्यात्मं वागेवर्क्प्राण साम तदेतदेतस्यामृच्यध्यूढं साम तस्माद्दच्यध्यूढं साम गीयते । वागेव सा प्राणोऽमस्तत्साम ॥१॥

अथाधुनाध्यात्ममुच्यते । वागेवर्क्प्राणः साम । अधरोपरिस्थानत्वसामान्यात् । प्राणो घ्राणमुच्यते सह वायुना वागेव सा प्राणोऽम इत्यादि पूर्ववत् ॥

चक्षुरेवर्गात्मा साम तदेतदेतस्यामृच्यध्यूढं साम तस्माद्दच्यध्यूढं साम गीयते चक्षुरेव सात्मामस्तत्साम ॥२॥

चक्षुरेव ऋक् आत्मा साम । आत्मेति च्छायात्मा तत्स्थत्वात्साम ॥

श्रोत्रमेवर्ङ्मनः साम तदेतदेतस्यामृच्यध्यूढं साम तस्माद्दच्यध्यूढं साम गीयते । श्रोत्रमेव सा मनोऽमस्तत्साम ॥३॥

श्रोत्रमेवर्क् मनः साम, श्रोत्रस्याधिष्ठातृत्वान्मनसः सामत्वम् ॥

अथ यदेतदक्ष्णः शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णं तत्साम तदेतदेतस्यामृच्यध्यूढं साम तस्माद्दच्यध्यूढं साम गीयते । अथ यदेवैतदक्ष्णः शुक्लं भाः सैव साथ यन्नीलं परः कृष्णं तदमस्तत्साम ॥४॥

अथ यदेतदक्ष्णः शुक्लं भाः सैवर्क् । अथ यन्नीलं परः कृष्णमादित्य इव दृक्शक्त्यधिष्ठानं तत्साम ॥

अथ य एषोऽन्तराक्षिणि पुरुषो दृश्यते सैवर्क्तत्साम तदुक्थं तद्यजुस्तद्ब्रह्म तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम ॥५॥

अथ य एषोऽन्तराक्षिणि पुरुषो दृश्यते । पूर्ववत् । सैवर्गध्यात्मं वागाद्या पृथिव्याद्या चाधिदैवतम् । प्रसिद्धा च ऋक्पादबद्धाक्षरात्मिका । तथा साम । उक्थमाहुर्यद्वा स्तोत्रं साम ऋक शस्त्रमुक्थादन्यत्तथा यजुः स्वाहास्वधावषडादि सर्वमेव वाग्यजुस्तत्स एव । गर्वात्मकत्वात्सर्वयोनित्वाच्चेति ह्युवोचाम । ऋगादिप्रकरणान्तद्ब्रह्मेति त्रयो वेदा । तस्यैतस्य चाक्षुषस्य पुरुषस्य तदेव रूपमतिदिश्यते । किं तत् यदमुष्यादित्यपुरुषस्य । हिरण्मय इत्यादि यदधिदैवतमुक्तं, यावमुष्य गेष्णौ पर्वणौ तावेवास्यापि चाक्षुषस्य गेष्णौ, यच्चामुष्य नामोदित्युद्गीथ इति च तदेवास्य नाम । स्थानभेदाद्रूपगुणनामातिदेशादीशितृत्वविषयभेदव्यपदेशाच्चादित्यचाक्षुषयोर्भेद इति चेत् । न । अमुना अनेनैव इत्येकस्योभयात्मत्वप्राप्त्यनुपपत्तेः । द्विधाभावेनोपपद्यत इति चेत् । वक्ष्यति हि 'स एकधा भवति त्रिधा भवति' इत्यादि । न । चेतनस्यैकस्य निरवयवत्वात् द्विधाभावानुपपत्तेः । तस्मादध्यात्माधिदैवतयोरैक्यमेव । यत्तु रूपार्यातिदेशो भेदकारणमवोचो न तद्भेदावगमाय । किं तर्हि स्थानभेदाद्भेदाशंका मा भूदित्येवमर्थम ॥

स एष ये चैतस्मादर्वाचो लोकास्तेषां चेष्टे मनुष्यकामाणां चेति तद्य इमे वीणायां गायन्त्येतं ते गायन्ति तस्मात्ते धनसनयः ॥६॥

स एष चाक्षुष पुरुषो ये चैतस्मादाध्यात्मिकादात्मनोऽर्वाचोऽर्वाग्गता लोकाः तेषां चेष्टे मनुष्यसंबंधिना च कामानाम् । तत्तस्माद्य इमे वीणाया गायन्ति गायकास्त एतमेव गायन्ति । यस्मादीश्वरं गायन्ति तस्मात्ते धनसनयो धनलाभयुक्ता धनवन्त इत्यर्थः ॥

अथ य एतदेवं विद्वान्साम गायत्युभौ स गायति सोऽमुनैव स एष ये चामुष्मात्परांचो लोकास्तांश्चाप्नोति देवकामांश्च ॥७॥

अथ य एतदेवं विद्वान्यथोक्तं देवमुद्गीथं विद्वान्साम गायत्युभौ स गायति चाक्षुषमादित्यं च । तस्यैवंविदः फलमुच्यते--सोऽमुनैवादित्येन स एष ये चामु-

त्मात्परांचो लोकास्तानाप्नोति, आदित्यान्तर्गतदेवो भूत्वेत्यर्थो, देवकामाश्च ॥

अथानेनैव ये चैतस्मादर्वांचो लोकास्तांश्चाप्नोति मनुष्यकामांश्च तस्मादु हैवंविदुद्गाता ब्रूयात् ॥८॥ कं ते काममागायानीत्येष ह्येव कामागानस्येष्टे य एवं विद्वान्साम गायति साम गायति ॥९॥ इति सप्तमः खंडः ॥

अथानेनैव चाक्षुषेणैव ये चैतस्मादर्वांचो लोकास्ताश्चाप्नोति मनुष्यकामाश्च, चाक्षुषो भूत्वेत्यर्थः । तस्मादु हैवंविदुद्गाता ब्रूयाद्यजमानं कमिष्टे ते तव काममागायानीति । एष हि यस्मादुद्गाता कामागानस्योद्गानेन कामं संपादयितुमीष्टे समर्थ इत्यर्थः । कोऽसौ, य एवं विद्वान्साम गायति । द्विरुक्तिरुपासनसमाप्त्यर्था ॥ इति सप्तमः खंडः ॥ १.७—

त्रयो होद्गीथे कुशला बभूवुः शिलकः शालावत्यश्चैकितायनो दाल्भ्यः प्रवाहणो जैवलिरिति ते होचुरुद्गीथे वै कुशलाः स्मो हन्तोद्गीथे कथां वदाम इति ॥१॥

अनेकधोपास्यत्वादक्षरस्य प्रकारान्तरेण परोवरीयस्त्वगुणफलमुपासनान्तरमानिनाय । इतिहासस्तु सुखावबोधनार्थः । त्रयस्त्रिसंख्याकाः ह इत्यैतिह्यार्थः उद्गीथ उद्गीथज्ञानं प्रति कुशला निपुणा बभूवुः । कस्मिंश्चिद्देशे काले च निमित्ते वा समेतानामित्यभिप्रायः । न हि सर्वस्मिञ्जगति त्रयाणामेव कौशलमुद्गीथादिविज्ञाने । श्रूयन्ते ह्युपस्तिज्ञानश्रुतिर्कैकेयप्रभृतय सर्वज्ञकल्पाः । के ते त्रय इत्याह— शिलको नामतः, शालावतोऽपत्यं शालावत्यः । चिकितायनस्यापत्यं चैकितायनः, दल्भगोत्रो दाल्भ्यो ह्यामुष्यायणो वा । प्रवाहणो नामतो जीवलस्यापत्यं जैवलिरित्येते त्रय । ते होचुरन्योन्यमुद्गीथे वै कुशला निपुणा इति प्रसिद्धाः स्मः । अतो हंत यद्यनुमतिर्भवतामुद्गीथ उद्गीथज्ञाननिमित्तां कथां विचारणां पक्षप्रतिपक्षोपन्यासेन वदामो वादं कुर्म इत्यर्थः । तथा च तद्विद्यसंवादे विपरीतग्रहणनाशोऽपूर्वविज्ञानोपजनः संशयनिवृत्तिश्चेति । अतस्तद्विद्यसंयोगः कर्तव्य इति चेतिहासप्रयोजनम । दृश्यते हि शिलकादीनाम् ॥

तथेति ह समुपविविशुः स ह प्रवाहणो जैवलिरुवाच भगवन्तावग्रे वदतां ब्राह्मणयोर्वदतोर्वाचं श्रोष्यामीति ॥२॥

तथेत्युक्त्वा ते समुपविविशुर्होपविष्टवन्तः किल । तत्र राज्ञः प्रागल्भ्योपपत्तेः स ह प्रवाहणो जैवलिरुवाचेतरौ—भगवन्तौ पूजावन्तावग्रे पूर्वं वदताम् । ब्राह्मण-

योरिति लिंगाद्राजासौ । युवयोर्ब्राह्मणयोर्वदतोर्वाचं श्रोष्यामि । अर्थरहितामित्यपरे, वाचमिति विशेषणात् ॥

स ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच हंत त्वा पृच्छानीति पृच्छेति होवाच ॥३॥

उक्तयोः स ह शिलक शालावत्यश्चैकितायनं दाल्भ्यमुवाच– हंत यद्यनुमंस्यसे त्वा त्वा पृच्छानीत्युक्त इतर पृच्छेति होवाच ॥

का साम्नो गतिरिति स्वर इति होवाच स्वरस्य का गतिरिति प्राण इति होवाच प्राणस्य का गतिरित्यन्नमिति होवाचान्नस्य का गतिरित्याप इति होवाच ॥४॥

लब्धानुमतिराह— का साम्न.— प्रकृतत्वादुद्गीथस्य, उद्गीथो ह्यत्रोपास्यत्वेन प्रकृत., 'परोवरीयासमुद्गीथम' इति च वक्ष्यति, — गतिराश्रय परायणमित्येतत् । एवं पृष्टो दाल्भ्य उवाच— स्वर इति । स्वरात्मकत्वात्साम्न· । यो यदात्मक स तद्गतिस्तदाश्रयश्च भवतीति युक्तं, मृदाश्रय इव घटादि । स्वरस्य का गतिरिति, प्राण इति होवाच । प्राणनिष्पाद्यो हि स्वरस्तस्मात्स्वरस्य प्राणो गति । प्राणस्य का गतिरित्यन्नमिति होवाच । अन्नावष्टंभो हि प्राण । "शुष्यति वै प्राण ऋतेऽन्नात" इति श्रुते । "अन्नं दाम" इति च । अन्नस्य का गतिरित्याप इति होवाच । अप्संभवत्वादन्नस्य ॥

अपां का गतिरित्यसौ लोक इति होवाचामुष्य लोकस्य का गतिरिति न स्वर्गं लोकमतिनयेदिति होवाच । स्वर्गं वयं लोकं सामाभिसंस्थापयाम· स्वर्गसंस्तावं हि सामेति ॥५॥

अपां का गतिरित्यसौ लोक इति होवाच । अमुष्माद्धि लोकादृष्टि· संभवति । अमुष्य लोकस्य का गतिरिति पृष्टो दाल्भ्य उवाच— स्वर्गममुं लोकमतीत्याश्रयान्तरं साम न नयेत्कश्चिदिति होवाचाह । अतो वयमपि स्वर्गं लोकं सामाभिसंस्थापयाम । स्वर्गलोकप्रतिष्ठं साम जानाम इत्यर्थ· । स्वर्गसंस्तावं स्वर्गत्वेन संस्तवनं संस्तावो यस्य तत्साम स्वर्गसंस्तावं, हि यस्मात्स्वर्गो वै लोक. साम वेद इति श्रुति. ॥

तं ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाचाप्रतिष्ठितं वै किल ते दाल्भ्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति ॥६॥

तमितर शिलक शालावत्यश्चैकितायनं दाल्भ्यमुवाच— अप्रतिष्ठितमसंस्थितं परोवर्यायस्त्वेनाग्रमात्रगति सामेत्यर्थ. । वै इत्यागमं स्मारयति किलेति च दाल्भ्य ते तव साम । यस्त्वमहिष्णु सामविदेतत्तस्मिन्काले ब्रूयात्कश्चिद्विपरीतविज्ञानं— अप्रतिष्ठितं साम प्रतिष्ठितमिति— एवंवादापराधिनो मूर्धा शिरस्ते विपतिष्यति विस्पष्टं पतिष्यतीति । एवमुक्तस्यापराधिनस्तथैव तद्विपतेन्न संशयो, न त्वहं ब्रवीमात्याभप्राय । ननु मूर्धपातार्हं चेदपराधं कृतवानत परेणानुक्तस्यापि पतेन्मूर्धा, न चेदपराध्युक्तस्यापि नैव पतति । अन्यथा अकृताभ्यागमः कृतनाशश्च स्याताम् । नैष दोष । कृतस्य कर्मण शुभाशुभस्य फलप्राप्तेर्देशकालनिमित्तापेक्षत्वात् । तत्रैवं सति मूर्धपातनिमित्तस्याप्यज्ञानस्य पराभिव्याहारनिमित्तापेक्षत्वमिति ॥

हंताहमेतद्भगवतो वेदानीति विद्धीति होवाचामुष्य लोकस्य का गतिरित्ययं लोक इति होवाचास्य लोकस्य का गतिरिति न प्रतिष्ठां लोकमतिनयेदिति होवाच प्रतिष्ठां वयं लोकं सामाभिसंस्थापयामः प्रतिष्ठासंस्तावं हि सामेति ॥७॥

एवमुक्तो दाल्भ्य आह— हंताहमेतद्भगवतो वेदानि यत्प्रतिष्ठं सामेत्युक्तः प्रत्युवाच शालावत्यो— विद्धीति होवाच । अमुष्य लोकस्य का गतिरिति पृष्टो दाल्भ्येन शालावत्योऽयं लोक इति होवाच । अयं हि लोको यागदानहोमादिभिरमुं लोकं पुष्यतीति । "अत प्रदानं देवा उपजीवन्ति" इति हि श्रुतय. । प्रत्यक्षं हि सर्वभूताना धरणं प्रतिष्ठेति । अत साम्नोऽप्ययं लोक प्रतिष्ठेवेति युक्तम् । अस्य लोकस्य का गतिरित्युक्त आह शालावत्य । न प्रतिष्ठामिमं लोकमतीत्य नयेत्साम कश्चित् । अतो वयं प्रतिष्ठां लोकं सामाभिसंस्थापयाम । यस्मात्प्रतिष्ठासंस्तावं हि प्रतिष्ठात्वेन संस्तुतं सामेत्यर्थ । "इयं वै रथंतरम्" इति च श्रुति. ॥

तं ह प्रवाहणो जैवलिरुवाचान्तवद्वै किल ते शालावत्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति हन्ताहमेतद्भगवतो वेदानीति विद्धीति होवाच ॥८॥ इत्यष्टमः खंड. ॥

तमेवमुक्तवन्तं ह प्रवाहणो जैवलिरुवाचान्तवद्वै किल ते शालावत्य सामेत्यादि पूर्ववत् । तत. शालावत्य आह— हंताहमेतद्भगवतो वेदानीति, विद्धीति होवाचेतर. ॥ इति अष्टमः खंडः ॥ १.८.—

अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवभ्यो ज्यायानाकाश परायणम् ॥१॥

अनुज्ञातः आह-- अस्य लोकस्य का गतिरिति । आकाश इति होवाच प्रवाहण । आकाश इति च पर आत्मा "आकाशो वै नाम" इति श्रुतेः । तस्य हि कर्म सर्वभूतोत्पादकत्वम् । तस्मिन्नेव हि भूतप्रलयः । 'तत्तेजोऽसृजत' 'तेजः परस्यां देवतायाम्' इति हि वक्ष्यति । सर्वाणि ह वा इमानि भूतानि स्थावरजंगमान्याकाशादेव समुत्पद्यन्ते तेजोबन्नादिक्रमेण, सामर्थ्यात् । आकाशं प्रत्यस्तं यन्ति प्रलयकाले तेनैव विपरीतक्रमेण । हि यस्मादाकाश एवैभ्यः सर्वेभ्यो भूतेभ्यो ज्यायान्महत्तरोऽतः स सर्वेषां भूतानां परमयनं परायणं प्रतिष्ठा त्रिष्वपि कालेष्वित्यर्थः ॥

स एष परोवरीयानुद्गीथः स एषोऽनंत परोवरीयो ह्यस्य भवति परोवरीयसो ह लोकाञ्जयति य एतदेवं विद्वान्परोवरीयांसमुद्गीथमुपास्ते ॥२॥

यस्मात्परं परं वरीयो वरीयसोऽप्येष वर परश्च वरीयाश्च परोवरीयानुद्गीथः परमात्मा संपन्न इत्यर्थः । अत एव स एषोऽनंतोऽविद्यमानान्तः । तमेतं परोवरीयांसं परमात्मभूतमनंतमेवं विद्वान्परोवरीयांसमुद्गीथमुपास्ते । तस्यैतत्फलमाह-- परोवरीयः परं परं वरीयो विशिष्टतरं जावनं ह्यस्य विदुषो भवति दृष्टं फलमदृष्टं च परोवरीयस उत्तरोत्तरविशिष्टतरानेव ब्रह्माकाशान्तांल्लोकाञ्जयति य एतदेवं विद्वानुद्गीथमुपास्ते ॥

तं हैतमतिधन्वा शौनक उदरशांडिल्यायोक्त्वोवाच यावत्त एनं प्रजायामुद्गीथं वेदिष्यन्ते परोवरीयो हैभ्यस्तावदस्मिँल्लोके जीवनं भविष्यति ॥३॥

किं च तमेतमुद्गीथं विद्वानतिधन्वा नामतः, शुनकस्यापत्यं शौनक, उदरशांडिल्याय शिष्यायैतमुद्गीथदर्शनमुक्त्वोवाच । यावत्ते तव प्रजाया संततावित्यर्थः एनमुद्गीथ त्वत्संततिजा वेदिष्यन्ते ज्ञास्यन्ति, तावन्तं कालं परोवरीयो हैभ्यः प्रसिद्धेभ्यो लौकिकजीवनेभ्य उत्तरोत्तरविशिष्टतरं जीवनं तेभ्यो भविष्यति ॥

तथाऽमुष्मिँल्लोके लोक इति स य एतदेवं विद्वानुपास्ते परोवरीय एव हास्यास्मिँल्लोके जीवनं भवति तथामुष्मिँल्लोके लोक इति लोके लोक इति ॥४॥ इति नवमः खंडः ॥

तथाऽदृष्टेऽपि परलोकेऽमुष्मिन्परोवरीयाँल्लोको भविष्यतीत्युक्तवाञ्शाडिल्यायातिधन्वा शौनकः । स्यादेतत्फलं पूर्वेषा महाभाग्याना नैदंयुगीनानामित्याशंकानिवृत्तय आह— स य कश्चिदेतदेवं विद्वानुद्गीथमेतद्युपास्ते, तस्याप्येवमेव परोवरीय एव हास्यामुष्मिल्लोके जीवनं भवति तथामुष्मिल्लोके लोक इति ॥—

मटचीहतेषु कुरुष्वाटिक्या सह जाययोषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक उवास ॥१॥

उद्गीथोपासनप्रसंगेन पस्तावप्रतिहारविषयमप्युपासनं वक्तव्यमितीदमारभ्यते । आख्यायिका तु सुखावबोधार्था । मटचीहतेषु मटच्योऽशनयस्ताभिर्हतेषु नाशितेषु कुरुषु कुरुसस्येष्वित्यर्थ । ततो दुर्भिक्षे जाते आटिक्याऽनुपजातपयोधरादिस्त्रीव्यंजनया सह जाययोषस्तिर्ह नामत, चक्रस्यापत्यं चाक्रायण. । इभो हस्ती तमर्हतीतीभ्य ईश्वरो, हस्त्यारोहो वा, तस्य ग्राम इभ्यग्रामस्तस्मिन्प्रद्राणकोऽन्नालाभात । द्रा कुत्सायां गतौ । कुत्सिता गतिं गतोऽन्त्यावस्था प्राप्त इत्यर्थ । उवासोषितवान्कस्यचिद्गृहमाश्रित्य ॥

स हेभ्यं कुल्माषान्खादन्तं विभिक्षे तं होवाच । नेतोऽन्ये विद्यन्ते यच्च ये म इम उपनिहिता इति ॥२॥

सोऽन्नार्थमटन्निभ्यं कुल्माषान्कुत्सितान्माषान्खादन्तं भक्षयन्त यदृच्छयोपलभ्य विभिक्षे याचितवान । तमुपस्ति होवाचेभ्यः । नेतोऽस्मान्मया भक्ष्यमाणादुच्छिष्टराशेः कुल्माषा अन्ये न विद्यन्ते, यच्च ये राशौ मे ममोपनिहिताः प्राक्षिप्ता इमे भाजने, किं करोमि, इत्युक्तः प्रत्युवाचोपस्ति ॥

एतेषां मे देहीति होवाच तानस्मै प्रददौ हन्तानुपानमित्युच्छिष्टं वै मे पीतं स्यादिति होवाच ॥३॥

एतेषामेतानित्यर्थ । मे मह्यं देहीति होवाच । तान्स इभ्योऽस्मा उपस्तये प्रददौ प्रदत्तवान । पानाय सर्मापमथमुदकं च गृहीत्वोवाच— हंत गृहाणानुपानम् । इत्युक्तः प्रत्युवाच— उच्छिष्टं वै मे ममेदमुदकं पीतं स्याद्यदि पास्यामि । इत्युक्तवन्तं प्रत्युवाचेतरः ॥

न स्विदेतेऽप्युच्छिष्टा इति न वा अजीविष्यमिमानखादन्निति होवाच कामो म उदपानमिति ॥४॥

किं न स्विदेते कुल्माषा अप्युच्छिष्टा, इत्युक्त आहोपस्तिः— न वै अजी-

विष्यं नेव जीविष्यामीमान्कुल्माषानखादन्नभक्षयान्निति होवाच । कामं इच्छातो मे ममोदकपानं लभ्यत इत्यर्थः । अतश्चैतामवस्थां प्राप्तस्य विद्याधर्मयशोवत्स्वात्मपरोपकारसमर्थस्यैतदपि कर्म कुर्वतो नाघस्पर्श इत्यभिप्रायः । तस्यापि जीवितं प्रत्युपायान्तरेऽजुगुप्सिते सति जुगुप्सितमेतत्कर्म दोषाय । ज्ञानावलेपेन कुर्वतो नरकपात स्यादेवेत्यभिप्रायः । प्रद्राणकशब्दश्रवणात् ॥

स ह खादित्वातिशेषाज्ञायाया आजहार साग्र एव सुभिक्षा बभूव तान्प्रतिगृह्य निदधौ ॥ ५ ॥

तांश्च स खादित्वातिशेषानतिशिष्टाज्ञायायै कारुण्यादाजहार । सा तिक्ष्यग्र एव कुल्माषप्राप्तेः सुभिक्षा शोभनभिक्षा लब्धान्नेत्येतद्बभूव सवृत्ता । तथापि स्त्रीस्वाभाव्यादनवज्ञाय तान्कुल्माषान्पत्युर्हस्तात्प्रतिगृह्य निदधौ निक्षिप्तवती ॥

स ह प्रातः संजिहान उवाच यद्वतान्नस्य लभेमहि लभेमहि धनमात्रां राजासौ यक्ष्यते स मा सर्वैरार्त्विज्यैर्वृणीतेति ॥६॥

स तस्या कर्म जानन्प्रातरुषः काले संजिहान शयनं निद्रा वा परित्यजन्नुवाच पत्न्या अपृण्वत्या— यदि वतेति खिद्यमानोऽन्नस्य स्तोकं लभेमहि तद्भुक्त्वान्नं समर्थो गत्वा लभेमहि धनमात्रा धनस्याल्पम् । ततोऽस्माकं जीवनं भविष्यतीति । धनलाभे च कारणमाह— राजासौ नातिदूरे स्थाने यक्ष्यते । यजमानत्वात्तस्यात्मनेपदम् । स च राजा मा मा पात्रमुपलभ्य सर्वैरार्त्विज्यैर्ऋत्विक्कर्मभिर्ऋत्विक्कर्मप्रयोजनायेत्यर्थो वृणीतेति ॥

तं जायोवाच हन्त पत इम एव कुल्माषा इति तान्खादित्वामुं यज्ञं वितनमेयाय ॥७॥

एवमुक्तवन्तं जायोवाच— हंत गृहाण हे पत इम एव ये मद्धस्ते विनिक्षिप्तास्त्वया कुल्माषा इति । तान्खादित्वामुं यज्ञं राज्ञो वितनं विस्तारितमृत्विग्भिरेयाय

तत्रोद्गातॄनास्तावे स्तोष्यमाणानुपोपविवेश स ह प्रस्तोतारमुवाच ॥८॥

तत्र च गत्वोद्गातॄनुद्गातृपुरुषानागत्य, स्तुवन्त्यस्मिन्नित्यास्तावस्तस्मिन्नास्तावे स्तोष्यमाणानुपोपविवेश समीप उपाविक्षस्तेषामित्यर्थः । उपविश्य च स ह प्रस्तोतारमुवाच ॥

प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति ॥९॥

हे प्रस्तोतरित्यामंत्र्याभिमुखीकरणाय । या देवता प्रस्तावं प्रस्तावभक्ति-मनुगतान्वायत्ता तां चेद्देवतां प्रस्तावभक्तेरविद्वान्मन्प्रस्तोष्यसि विदुषो मम समंपे—। तत्परोक्षेऽपि चेद्विपतेत्तस्य मूर्धा, कर्ममात्रविदामनधिकार एव कर्मणि स्यात्। तच्चानिष्टमविदुषामपि कर्मदर्शनात् दक्षिणमार्गश्रुतेश्च*। अनधिकारे चाविदुषामुत्तर एवैको मार्ग श्रूयेत्। न च स्मार्तकर्मनिमित्त एव दक्षिण पंथाः 'यज्ञेन दानेन' इत्यादिश्रुते । 'तथोक्तस्य मया' इति च विशेषणाद्विद्वत्समधर्मेव कर्मण्यनधिकारो, न सर्वत्राग्निहोत्रस्मार्तकर्माध्ययनादिषु च । अनुज्ञायास्तत्र तत्र दर्शनात् कर्ममात्रविदामप्यधिकार सिद्ध कर्मणीति । – मूर्धा ते विपतिष्यतीति ॥

एवमेवोद्गातारमुवाचोद्गातर्यां देवतोद्गीथमन्वायत्ता तां चेदविद्वानुद्गास्यसि मूर्धा ते विपतिष्यतीति ॥१०॥ एवमेव प्रतिहर्तारमुवाच प्रतिहर्तर्यां देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रतिहरिष्यसि मूर्धा ते विपतिष्यतीति ते ह समारतास्तूष्णीमासांचक्रिरे ॥११॥ इति दशम खंड ॥

एवमेवोद्गातारं प्रतिहर्तारमुवाचेत्यादि समानमन्यत् । ते प्रस्तोत्रादयः कर्मभ्य समारता उपरताः सन्तो मूर्धपातभयात् तूष्णीमासांचक्रिरेऽन्यच्चाकुर्वन्तः आर्षत्वात् ॥ इति दशमः खंड ॥ १.१०.—

अथ हैनं यजमान उवाच भगवन्तं वा अहं विविदिषाणीत्युषस्तिरस्मि चाक्रायण इति होवाच ॥१॥

अथानंतरं हैनमुपास्ति यजमानो राजोवाच । भगवन्तं वै पूजावन्तमहं विविदिषाणि वेदितुमिच्छामि । इत्युक्त उपस्तिरस्मि चाक्रायणस्तवापि श्रोत्रपथमागतो यदि, इति होवाचोक्तवान ॥

स होवाच भगवन्तं वा अहमेभिः सर्वैरार्त्विज्यैः पर्यैषिषं भगवतो वा अहमवित्त्यान्यानवृषि ॥२॥

स ह यजमान उवाच—सत्यमेवमहं भगवन्तं बहुगुणमश्रौषं सर्वैश्च ऋत्विक्कर्मभिरार्त्विज्यं पर्येषिषं पर्येषणं कृतवानस्मि । अन्विष्य भगवतो वा अहमवित्त्याऽलाभेनान्यानिमानवृषि वृतवानस्मि ॥

भगवांस्त्वेव मे सर्वैरार्त्विज्यैरिति तथेत्यथ तर्ह्येत एव समतिसृष्टाः स्तुवतां यावत्त्वेभ्यो धनं दद्यास्तावन्मम दद्या इति तथेति ह यजमान उवाच ॥३॥

अद्यापि भगवास्त्वेव मे मम सर्वैरार्त्विज्यैर्ऋत्विक्कर्मार्थमस्तु. इत्युक्तस्तथेत्याहोपस्ति । किंत्वथैवं तर्ह्येत एव त्वया पूर्व वृता मया समतिसृष्टा मया सम्यक्प्रसन्नेनानुज्ञाताः सन्तः स्तुवताम् । त्वया त्वेतत्कार्यम् । यावत्त्वेभ्यः प्रस्तोत्रादिभ्य सर्वेभ्यो धनं दद्याः प्रयच्छसि तावन्मम दद्या । इत्युक्तस्तथेति ह यजमान उवाच ॥

अथ हैनं प्रस्तोतोपससाद प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा सा देवतेति ॥४॥

अथ हैनमौपस्त्यं वच श्रुत्वा प्रस्तोतोपससादोपस्थि विनयेनोपजगाम । प्रस्तोतर्या देवतेत्यादि मा मा भगवानवोचत्पूर्वम । कतमा सा देवता या प्रस्तावभक्तिमन्वायत्तेति ॥

प्राण इति होवाच । सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रास्तोष्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति ॥५॥

पृष्ट प्राण इति होवाच । युक्तं प्रस्तावस्य प्राणो देवतेति । कथं सर्वाणि स्थावरजंगमानि भूतानि प्राणमेवाभिसंविशन्ति प्रलयकाले, प्राणमाभि लक्षयित्वा प्राणात्मनैवोज्जिहते प्राणादेवोद्गच्छन्तीत्यर्थ उत्पत्तिकाले । अतः सैषा देवता प्रस्तावमन्वायत्ता । ता चेदविद्वान्प्रास्तोष्य प्रस्तवनं प्रस्तावभक्ति कृतवानसि यदि मूर्धा शिरस्ते व्यपतिष्यद्विपतितमभविष्यत्तथोक्तस्य मया तत्काले मूर्धा ते विपतिष्यतीति । अतस्त्वया साधु कृतं, मया निषिद्ध कर्मणो यदुपरममकार्षीः इत्यभिप्रायः ॥

अथ हैनमुद्गातोपससादोद्गातर्या देवतोद्गीथमन्वायत्ता तां चेदविद्वानुद्गास्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा सा देवतेति ॥६॥

तथोद्गाता पप्रच्छ कतमा सोद्गाथभक्तिमनुगतान्वायत्ता देवतेति ॥

आदित्य इति होवाच सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैः सन्तं गायन्ति सैषा देवतोद्गीथमन्वायत्ता तां चेदविद्वानुदगास्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति ॥७॥

पृष्ट आदित्य इति होवाच । सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैरूर्ध्व

सन्तं गायन्ति शब्दयन्ति स्तुवन्तीत्यभिप्राय. । उच्छब्दसामान्यात्प्रशब्दसामान्यादिव प्राण । अत. सैषा देवतेत्यादि पूर्ववत ॥

अथ हैनं प्रतिहर्तोपससाद प्रतिहर्तर्या देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रतिहरिष्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा सा देवतेति ॥८॥

एवमेवाथ हैनं प्रतिहर्तोपससाद कतमा सा देवता प्रतिहारमन्वायत्तेति ॥

अन्नमिति होवाच सर्वाणि ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीवन्ति सैषा देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रत्यहरिष्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति तथोक्तस्य मयेति ॥९॥

पृष्टोऽन्नमिति होवाच । सर्वाणि ह वा इमानि भूतान्यन्नमेवात्मानं प्रति सर्वत प्रतिहरमाणानि जीवन्ति । सैषा देवता प्रतिशब्दसामान्यात्प्रतिहारभक्तिमनुगता । समानमन्यत्तथोक्तस्य मयेति । प्रस्तावोद्गीथप्रतिहारभक्तौ प्राणादिल्यान्नदृष्ट्योपासीतेति समुदायार्थ. । प्राणाद्यापत्तिः कर्मसमृद्धिर्वा फलमिति ॥ — इति एकादश खंडः ॥ १-११.—

अथात. शौव उद्गीथस्तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेय स्वाध्यायमुद्वव्राज ॥१॥

अर्तीते खंडेऽन्नाप्तिनिमित्ता कष्टावस्थोक्तोच्छिष्टोच्छिष्टपर्युषितभक्षणलक्षणा । सा मा भूदित्यन्नलाभायाथानंतरं शौव श्वभिर्दृष्ट उद्गीथ उद्गानं सामात प्रस्तूयते । तत्तत्र ह किल बको नामतो, दल्भस्यापत्यं दाल्भ्यो, ग्लावो वा नामतो, मित्रायाश्चापत्यं मैत्रेय. । वाशब्दश्चार्थे, द्व्यामुष्यायणो द्व्यामुष्यायणो । वस्तुविषये क्रियास्विव विकल्पानुपपत्ते. । द्विनामा द्विगोत्र इत्यादि हि स्मृतिः । दृश्यते चोभयतः पिंडभाक्त्वम । उद्गीथे बद्धचित्तत्वादृषावनादरादा । वाशब्दः स्वाध्यायार्थ । स्वाध्यायं कर्तुं ग्रामाद्बहिरुद्व्राजोद्गतवान्विविक्तदेशस्थोदकाभ्याशम । उद्व्राज, प्रतिपालयाचकार, इति चैकवचनाच्छिगादेकोऽसावृषि. । श्वोद्गीथकालप्रतिपालनादृषे. स्वाध्यायकरणमत्रकामनेयेति लक्ष्यत इत्यभिप्रायत. ॥

तस्मै श्वा श्वेत प्रादुर्बभूव तमन्ये श्वान उपसमेत्योचुरन्नं नो भगवानागायत्वशनायाम वा इति ॥२॥

स्वाध्यायेन तोषिता देवतर्षिर्वा स्वरूपं गृहीत्वा श्वा श्वेतः संस्तस्मा ऋषये तदनुग्रहार्थं प्रादुर्बभूव प्रादुश्चकार । तमन्ये शुक्लं श्वानं क्षुल्लकाः श्वान उपसमे-

त्योचुरुक्तवन्त अन्नं नोऽस्मभ्यं भगवानागायत्वागानेन निष्पादयत्वित्यर्थः । मुख्यप्राणं वागादयो वा प्राणमन्वन्नभुजः स्वाध्यायपरितोषिता सन्तोऽनुगृह्णीयुरेनं श्वरूपमादायेति युक्तमेवं प्रतिपत्तुम । अशनायाम वै बुभुक्षिता. स्मो वै इति॥

तान्होवाचेहैव मा प्रातरुपसमीयातेति तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेय. प्रतिपालयांचकार ॥३॥

एवमुक्ते श्वा श्वेत उवाच तान्क्षुल्लकाञ्शुनः, इहैवास्मिन्नेव देशे मा मा प्रातः प्रात काल उपसमीयातेति । दैर्घ्य छादसं, समीयातेति प्रमादपाठो वा । प्रात कालकरणं तत्काल एव कर्तव्यार्थम । अन्नदस्य वा सवितुरपरोक्षेऽनाभिमुख्यात् । तत्तत्रैव ह बको दाल्भ्यो ग्लावो वा मैत्रेय ऋषि प्रतिपालयाचकार प्रतीक्षणं कृतवानित्यर्थ ॥

ते ह यथेवेदं बहिष्पवमानेन स्तोष्यमाणाः संरब्धा सर्पन्तीत्येवमाससृपुस्ते ह समुपविश्य हिं चक्रु ॥४॥

ते श्वानस्तत्रैवागत्य ऋषे समक्षं यथेवेह कर्मणि बहिष्पवमानेन स्तोत्रेण स्तोष्यमाणा उद्गातृपुरुषाः संरब्धाः संलग्ना अन्योन्यमेव सर्पन्ति एवं मुखेनान्योन्यस्य पुच्छं गृहीत्वाऽऽससृपुरासृप्तवन्तः परिश्रमणं कृतवन्त इत्यर्थः । त एवं संसृप्य समुपविश्योपविष्टाः सन्तो हि चक्रुर्हिंकारं कृतवन्त. ॥

ओ३मदा३मो३पिबा३मो३ देवो वरुणः प्रजापतिः सविता२ऽन्नमिहा२ऽऽहरदन्नपते३ऽन्नमिहा२ऽऽहरा२ऽऽहरो३मिति ॥५॥ इति द्वादशः खंडः ॥

ओमदामो पिबामो देवो द्योतनात् । वरुणो वर्षणाज्जगतः । प्रजापति पालनात्प्रजानाम् । सविता प्रसवितृत्वात्सर्वस्यादित्य उच्यते । एतं पर्यायं. स एवंभूत आदित्योऽन्नमस्मभ्यमिहाहरदाहरत्विति । त एवं हि कृत्वा पुनरप्यूचुः - स त्वं हेऽन्नपते । स हि सर्वस्यान्नस्य प्रसवितृत्वात्पति. । न हि तत्पाकेन विना प्रसूतमन्नमणुमात्रमपि जायेत प्राणिनाम् । अतोऽन्नपतिः । हेऽन्नपतेऽन्नमस्मभ्यमिहाहराहरेति । अभ्यास आदरार्थः । ओमिति ॥ १.१२.—

भक्तिविषयोपासनं सामावयवसंबद्धमित्यतः सामावयवान्तरस्तोभाक्षरविषयाण्युपासनान्तराणि संहतान्युपदिश्यन्तेऽनंतरं तेषा सामावयवसंबद्धत्वाविशेषात्—

अयं वाव लोको हाउकारो वायुर्हाइकारश्चंद्रमा अथकारः । आत्मेहकारोऽग्निरीकारः ॥१॥

अयं वावायमेव लोको हाउकारः स्तोभो रथंतर साम्नि प्रसिद्धः– 'इयं वै रथंतरं' इत्यस्मात्संबंधसामान्याद्धाउकारस्तोभोऽयं लोक इत्येवमुपासीत । वायुर्हाइकारः वामदेव्ये सामनि हाइकारः प्रसिद्धः । वाय्वग्निसंबंधश्च वामदेव्यस्य साम्नो योनिरित्यस्मात्सामान्याद्धाइकारं वायुदृष्ट्योपासीत । चंद्रमा अथकारः । चंद्रदृष्ट्याऽथकारमुपासीत । अन्ने हीदं स्थितम् । अन्नात्मा चंद्र । थकाराकारसामान्याच्च । आत्मेहकार । इहेति स्तोभः । प्रत्यक्षो ह्यात्मेहेति व्यपदिश्यते । इहेति च स्तोभः । तत्सामान्यात् । अग्निरीकार । ईनिधनानि चाग्नेयानि सर्वाणि सामानीत्यतस्तत्सामान्यात् ॥

आदित्य ऊकारो निहव एकारो विश्वेदेवा औहोयिकार प्रजापतिर्हिंकारः प्राण स्वरोऽन्नं या वाग्विराट् ॥२॥

आदित्य ऊकार । उच्चैरूर्ध्व गच्छन्तमादित्यं गायन्तीत्यूकारार्थ स्तोभ । आदित्यदैवत्ये साम्नि स्तोभ इत्यादित्य ऊकार । निहव इत्याह्वानमेकार स्तोभः । एहीति चाह्वयन्तीति तत्सामान्यात् । विश्वेदेवा औहोयिकारो वैश्वदेव्ये साम्नि स्तोभस्य दर्शनात् । प्रजापतिर्हिंकारः आनिरुक्त्याद्धिंकारस्य चाव्यक्तत्वात् । प्राण स्वर . स्वर इति स्तोभ , प्राणस्य च स्वरहेतुत्वसामान्यात् । अन्नं या या इति स्तोभोऽन्नम । अन्नेन हीदं यातीत्यतस्तत्सामान्यात् । वागिति स्तोभो विराडन्नं देवताविशेषो वा । वैराजे साम्नि स्तोभदर्शनात ॥

अनिरुक्तस्त्रयोदश स्तोभ संचरो हुंकार. ॥३॥

अनिरुक्तोऽव्यक्तत्वादिदं चेदं चेति निर्वक्तुं न शक्यत इत्यतः संचरो विकल्प्यमानस्वरूप इत्यर्थः । कोऽसावित्याह— त्रयोदश स्तोभो हुंकार. । अव्यक्तो ह्यथमतोऽनिरुक्तविशेष एवोपास्य इत्यभिप्राय ॥ स्तोभाक्षरोपासनाफलमाह—

दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतामेवं साम्नामुपनिषदं वेदोपनिषदं वेदेति ॥४॥ इति त्रयोदशः खंड. ॥

दुग्धेऽस्मै वाग्दोहमित्याद्युक्तार्थम् । य एतामेवं यथोक्तलक्षणां साम्ना सामावयवस्तोभाक्षरविषयामुपनिषदं दर्शनं वेद तस्यैतद्यथोक्तं फलमित्यर्थः । द्विरभ्यासोऽध्यायपरिसमाप्त्यर्थ । सामावयवविषयोपासनाविशेषपरिसमाप्त्यर्थ इतिशब्द इति ॥ इति प्रथमोऽध्यायः समाप्त· ॥ १ १३.—

॥ द्वितीयोऽध्यायः ॥

'ओमित्येतदक्षरं' इत्यादिना सामावयवविषयमुपासनमनेकफलमुपादिष्टम् । अनंतरं च स्तोभाक्षरविषयमुपासनमुक्तम् । सर्वथापि सामैकदेशसंबद्धमेव तदिति । अथेदानीं समस्ते साम्नि समस्तसामविषयाण्युपासनानि वक्ष्यामीत्यारभते श्रुतिः । युक्तं ह्येकदेशोपासनानंतरमेकदेशिविषयमुपासनमुच्यत इति ।

ॐ । समस्तस्य खलु साम्न उपासनं साधु यत्खलु साधु तत्साम-ेत्याचक्षते यदसाधु तदसामेति ॥१॥

समस्तस्य सर्वावयवविशिष्टस्य पांचभौक्तिकस्य सप्तभौक्तिकस्य चेत्यर्थः । खल्विति वाक्यालंकारार्थः । साम्न उपासनं साधु । समस्ते साम्नि साधुदृष्टिविधिपरत्वान्न पूर्वोपासननिंदार्थत्वं साधुशब्दस्य । ननु पूर्वत्राविद्यमानं साधुत्वं समस्ते साम्न्यभिधीयते । न । साधु सामेत्युपास्त इत्युपसंहारात् । साधुशब्दः शोभनवाची । कथमवगम्यत इत्याह— यत्खलु लोके साधु शोभनमनवद्यं प्रसिद्धं तत्साधेत्याचक्षते कुशलाः । यदसाधु विपरीतं तदसामेति ॥

तदुताप्याहुः साम्नैनमुपागादिति साधुनैनमुपागादित्येव तदाहुरसाम्नैनमुपागादित्यसाधुनैनमुपागादित्येव तदाहुः ॥२॥

तत्तत्रैव साध्वसाधुविवेककरण उताप्याहुः— साम्नैनं राजानं सामन्तं चोपागादुपगतवान् । कोऽसौ यतोऽसाधुत्वप्राप्त्याशंका स इत्यभिप्रायः । शोभनाभिप्रायेण साधुनैनमुपागादित्येव तत्तत्राहुर्लौकिका बंधनाद्यसाधुकार्यमपश्यन्तः । यत्र पुनर्विपर्ययेण बंधनाद्यसाधुकार्यं पश्यन्ति तत्रासाम्नैनमुपागादित्यसाधुनैनमुपागादित्येव तदाहुः ॥

अथोताप्याहुः साम नो बतेति यत्साधु भवति साधु बतेत्येव तदाहुरसाम नो बतेति यदसाधु भवत्यसाधु बतेत्येव तदाहुः ॥३॥

अथोताप्याहुः स्वसंवेद्यं साम नोऽस्माकं बतेत्यनुकंपयन्तः संवृत्तमित्याहुः । एतत्तैरुक्तं भवति, यत्साधु भवति साधु बतेत्येव तदाहुः । विपर्यये जातेऽसाम नो बतेति । यदसाधु भवत्यसाधु बतेत्येव तदाहुः । तस्मात्सामसाधुशब्दयोरेकार्थत्वं सिद्धम् ॥

स य एतदेवं विद्वान्साधु सामेत्युपास्तेऽभ्याशो ह यदेनं साधवो धर्मा आ च गच्छेयुरुप च नमेयुः ॥४॥ इति प्रथमः खंडः ॥

अत स य: कश्चित्साधु सामेति साधुगुणवत्सामेत्युपास्ते समस्त साम साधुगुणवद्विद्वांस्तस्यैतत्फलमभ्याशो ह क्षिप्रं ह, यदिति क्रियाविशेषणार्थ, एन-मुपासकं साधव शोभना धर्मा श्रुतिस्मृत्यविरुद्धा आ च गच्छेयुरागच्छेयुश्च । न केवलमागच्छेयुरुप च नमेयुरुपनमेयुश्च, भोग्यत्वेनोपनिष्ठेयुरित्यर्थ ॥ २ १ —

लोकेषु पंचविधं सामोपासीत पृथिवी हिंकार: । अग्नि प्रस्तावोऽन्त-रिक्षमुद्गीथ आदित्य प्रतिहारो द्यौर्निधनमित्यूर्ध्वेषु ॥१॥

कानि पुनस्तानि साधुदृष्टिविशिष्टानि समस्तानि सामान्युपास्यानीति । इमानि तान्युच्यन्ते– लोकेषु पंचविधमित्यादीनि । ननु लोकादिदृष्ट्या तान्यु-पास्यानि साधुदृष्ट्या चेति विरुद्धम् । न । सार्वत्र्यस्य लोकादिकार्येषु कारणस्या-नुगतत्वात्— । मृदादिबद्धटादिविकारेषु । साधुशब्दवाच्योऽर्थो धर्मो ब्रह्म वा सर्वथापि लोकादिकार्येष्वनुगतम् । अतो यथा यत्र घटादिदृष्टिर्मृदादिदृष्ट्यनुगतैव सा, तथा साधुदृष्ट्यनुगतैव लोकादिदृष्टि ।— धर्मादिकार्यत्वाल्लोकादीनाम् । यद्यपि कारणत्वमविशिष्टं ब्रह्मधर्मयो , तथापि धर्म एव साधुशब्दवाच्य इति युक्तं, साधुकारी साधुर्भवतीति धर्मविषये साधुशब्दप्रयोगात । ननु लोकादिका-र्येषु कारणस्यानुगतत्वादर्थप्राप्तैव तद्दृष्टिरिति 'साधु सामेत्युपास्ते' इति न वक्त-व्यम । न । शास्त्रगम्यत्वात्तद्दृष्टे: । सर्वत्र हि शास्त्रप्राप्ता एव धर्मा उपास्या न विद्यमाना अप्यशास्त्रीया: ॥ लोकेषु पृथिव्यादिषु पंचविधं पंचभक्तिभेदेन पंच-प्रकारं साधु समस्तं सामोपासीत । कथम् ? पृथिवी हिंकार: । लोकेष्विति या सप्तमी सा प्रथमात्वेन विपरिणम्य पृथिवीदृष्ट्या हिंकारे पृथिवी हिंकार इत्यु-पासीत । व्यत्यस्य वा सप्तम्यर्थश्रुति लोकविषया हिंकारादिषु पृथिव्यादिदृष्टि कृत्वोपासीत । तत्र पृथिवी हिंकार:, प्राथम्यसामान्यात । अग्नि: प्रस्तावः । अग्नौ हि कर्माणि प्रस्तूयन्ते । प्रस्तावश्च भक्तिः । अंतरिक्षमुद्गीथः । अंतरिक्षं हि गगनम । गकारविशिष्टश्चोद्गीथ: । आदित्य प्रतिहारः, प्रतिप्राण्यभिमुखत्वा-न्मां प्रति मा प्रतीति । द्यौर्निधनम् । दिवि निधीयन्ते हीतो गता इत्युर्ध्वेषूर्ध्व-गतेषु लोकदृष्ट्या सामोपासनम् ॥

अथावृत्तेषु द्यौर्हिंकार आदित्य: प्रस्तावोऽन्तरिक्षमुद्गीथोऽग्नि प्रति-हार: पृथिवी निधनम् ॥२॥

अथ आवृत्तेष्ववाङ्मुखेषु पंचविधमुच्यते सामोपासनम् । गत्यागतिवि-

शिष्टा हि लोकाः । यथा ते तथाऽदृष्टत्वेव सामोपासनं विधीयते यतोऽत आवृत्तेषु लोकेषु । द्यौर्हिकार प्राथम्यात् । आदित्य प्रस्ताव·, उदिते ह्यादित्ये प्रस्तूयन्ते कर्माणि प्राणिनाम् । अंतरिक्षमुद्गाथ पूर्ववत् । अग्निः प्रतिहार , प्राणिभि. पतिहरणादग्नि । पृथिवी निधनम् । तत आगतानामिह निधनात् ॥

कल्पन्ते हास्मै लोका ऊर्ध्वाश्चावृत्ताश्च य एतदेवं विद्वाँल्लोकेषु पंचविधं सामोपास्ते ॥३॥ इति द्वितीय खंड. ॥

उपासनफलं— कल्पन्ते समर्था भवन्ति हास्मै लोका ऊर्ध्वाश्च आवृत्ताश्च गत्यागतिविशिष्टा भोग्यत्वेन व्यवतिष्ठन्त इत्यर्थ । य एतदेवं विद्वाल्लोकेषु पंचविधं समस्तं साधु सामेत्युपास्त इति सर्वत्र योजना पंचविधे सप्तविधे च ॥

वृष्टौ पंचविधं सामोपासीत पुरोवातो हिंकारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहारः उद्गृह्णाति तन्निधनम् ॥१॥

वृष्टौ पचविधं सामोपासीत । लोकस्थितेर्वृष्टिनिमित्तत्वादानंतर्यम् । पुरोवातो हिकारः । पुरोवाताद्युद्गृहणान्ता हि वृष्टि·, यथा साम हिकारादिनिधनान्तम् । अतः पुरोवातो हिकार प्राथम्यात् । मेघो जायते स प्रस्ताव·, प्रावृषि मेघजनने वृष्टे प्रस्ताव इति हि प्रसिद्धिः । वर्षति स उद्गीथ श्रेष्ठ्यात् । विद्योतते स्तनयति स प्रतिहार । प्रतिहतत्वात् ॥ उद्गृह्णाति तन्निधनं, समाप्तिसामान्यात् ॥

वर्षति हास्मै वर्षयति ह य एतदेवं विद्वान्वृष्टौ पंचविधं सामोपास्ते ॥२॥ इति तृतीय· खंडः ॥

फलमुपासनस्य— वर्षति हास्मै इच्छात । तथा वर्षयति हासत्यामपि वृष्टौ । य एतदित्यादि पूर्ववत् ॥ इति तृतीय. खंडः ॥ २ ३ —

सर्वास्वप्सु पंचविधं सामोपासीत मेघो यत्संप्लवते स हिंकारो यद्वर्षति स प्रस्तावो याः प्राच्य. स्यंदन्ते स उद्गीथो या प्रतीच्यः स प्रतिहारः समुद्रो निधनम् ॥१॥

सर्वास्वप्सु पंचविधं सामोपासीत । वृष्टिपूर्वकत्वात्सर्वासामपामानंतर्यम् । मेघो यत्संप्लवत एकीभावेनेतरेतरं घनीभवति मेघो यदोन्नतः तदा संप्लवत इत्युच्यते, तदा अपामारंभः स हिकारः । यद्वर्षति स प्रस्ताव·, आपः सर्वतो

व्याप्तुं प्रस्तुताः । याः प्राच्यः स्यंदन्ते स उद्गीथः श्रैष्ठ्यात् । याः प्रतीच्यः स प्रतिहारः प्रतिशब्दसामान्यात् । समुद्रो निधनं, तन्निधनत्वादपाम् ॥

न हाप्सु प्रेत्यप्सुमान्भवति य एतदेवं विद्वान्सर्वास्वप्सु पंचविधं सामोपास्ते ॥२॥ इति चतुर्थः खंडः ॥

न हाप्सु प्रेति । नेच्छति चेत् । अप्सुमानस्मान्भवति फलम् ॥ २.४—

ऋतुषु पंचविधं सामोपासीत वसंतो हिंकारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत्प्रतिहारो हेमंतो निधनम् ॥१॥

ऋतुषु पंचविधं सामोपासीत । ऋतुव्यवस्थाया यथोक्तांबुनिमित्तत्वादानंतर्यम् । वसंतो हिंकारः, प्राथम्यात् । ग्रीष्म प्रस्तावः, यवादिसंग्रहः प्रस्त्यते हि प्रावृडर्थम् । वर्षा उद्गीथः, प्राधान्यात् । शरत्प्रतिहारः, रोगिणां मृतानां च प्रतिहरणात । हेमंतो निधनं, निवाते निधनात्प्राणिनाम् ॥

कल्पन्ते हास्मा ऋतव ऋतुमान्भवति य एतदेवं विद्वानृतुषु पंचविधं सामोपास्ते ॥२॥ इति पंचमः खंडः ॥

फलं— कल्पन्ते ह ऋतुव्यवस्थानुरूपं भोग्यत्वेनास्मा उपासकाय ऋतवः । ऋतुमानार्तवैर्भोगैश्च संपन्नो भवतात्यर्थः ॥ २.५—

पशुषु पंचविधं सामोपासीताजा हिंकारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनम् ॥१॥

पशुषु पंचविधं सामोपासीत । सम्यग्व्रत्तेष्वृतुषु पशव्य काल इत्यानंतर्यम् । अजा हिंकार । प्राधान्यात्प्राथम्याद्वा । "अज. पशूनां प्रथमः" इति श्रुते. । अवय प्रस्ताव , साहचर्यदर्शनादजावीनाम् । गाव उद्गीथः श्रैष्ठ्यात् । अश्वाः प्रतिहारः प्रतिहरणात्पुरुषाणाम् । पुरुषो निधनं पुरुषाश्रयत्वात्पशूनाम् ॥

भवन्ति हास्य पशवः पशुमान्भवति य एतदेवं विद्वान्पशुषु पंचविधं सामोपास्ते ॥२॥ इति षष्ठः खंडः ॥

फलं— भवन्ति हास्य पशवः पशुमान्भवति । पशुफलैश्च भोगत्यागादिभिर्युज्यत इत्यर्थः ॥ २.६—

प्राणेषु पंचविधं परोवरीयः सामोपासीत प्राणो हिंकारो वाक्प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारो मनो निधनं परोवरीयांसि वा एतानि ॥१॥

प्राणेषु पंचविधं परोवरीयः सामोपासीत । परंपरं वरीयस्त्वगुणवत्प्राण-

दृष्टिविशिष्टं सामोपासीतेत्यर्थः । प्राणो हिंकारः उत्तरोत्तरवरीयसां प्राथम्यात् । वाक्प्रस्तावः वाचा हि प्रस्तूयते सर्वम् । वाग्वरीयसी प्राणात् । अप्राप्तमप्युच्यते वाचा, प्राप्तस्यैव तु गंधस्य ग्राहक प्राणः । चक्षुरुद्गीथः । वाचो बहुतरविषयं प्रकाशयति चक्षुरतो वरीयो वाच उद्गीथः, श्रेष्ठ्यात् । श्रोत्रं प्रतिहार प्रतिहतत्वात् । वरीयश्चक्षुष सर्वतः श्रवणात् । मनो निधनं, मनसि हि निधीयन्ते पुरुषस्य भोग्यत्वेन सर्वेंद्रियाश्रिता विषयाः । वरीयस्त्वं च श्रोत्रान्मनसः सर्वेंद्रियविषयव्यापकत्वात् । अतींद्रियविषयोऽपि मनसो गोचर एवेति । यथोक्तहेतुभ्यः परोवरीयांसि प्राणादीनि वै एतानि ॥

परोवरीयो हास्य भवति परोवरीयसो ह लोकाञ्जयति य एतदेवं विद्वान्प्राणेषु पंचविधं परोवरीयः सामोपास्त इति तु पंचविधस्य ॥२॥

एतद्दृष्ट्या विशिष्टं य परोवरीयः सामोपास्ते परोवरीयो हास्य जीवनं भवतीत्युक्तार्थम् । इति तु पंचविधस्य सामन उपासनमुक्तमिति सप्तविधे वक्ष्यमाणविषये बुद्धिसमाधानार्थम् । निरपेक्षो हि पंचविधे, वक्ष्यमाणे बुद्धिं समाधित्सति ॥ इति सप्तमः खंडः ॥ २.७—

अथ सप्तविधस्य वाचि सप्तविधं सामोपासीत यत्किंच वाचो हुमिति स हिंकारो यत्प्रेति स प्रस्तावो यदेति स आदि ॥१॥

अथानंतरं सप्तविधस्य समस्तस्य सामन उपासनं साध्विदमारभ्यते । वाचीति सप्तमी पूर्ववत् वाग्दृष्टिविशिष्टं सप्तविधं सामोपासीतेत्यर्थः । यत्किंच वाचः शब्दस्य हुमिति यो विशेष स हिंकारो हकारसामान्यात् । यत्प्रेति शब्दरूपं स प्रस्तावः प्रसामान्यात् । यत् आ इति स आदिः आकारसामान्यात् । आदिरित्योंकारः सर्वादित्वात् ॥

यदुदिति स उद्गीथो यत्प्रतीति स प्रतिहारो यदुपेति स उपद्रवो यन्नीति तन्निधनम् ॥२॥

यदुदिति स उद्गीथः उत्पूर्वत्वादुद्गाथस्य । यत्प्रतीति स प्रतिहारः प्रतिसामान्यात् । यदुपेति स उपद्रव उपोपक्रमत्वादुपद्रवस्य । यन्नीति तन्निधनं निशब्दसामान्यात् ॥

दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतदेवं विद्वान्वाचि सप्तविधं सामोपास्ते ॥३॥ इति अष्टमः खंडः ॥

दुर्धेऽस्मा इत्याद्युक्तार्थम् ॥ २८—

अथ खल्वमुमादित्यं सप्तविधं सामोपासीत सर्वदा समस्तेन साम मां प्रति मां प्रतीति सर्वेण समस्तेन साम ॥१॥

अवयवमात्रे साम्न्यादित्यदृष्टिः पञ्चविधेयुक्ता प्रथमे चाध्याये । अथेदानीं खल्वमुमादित्यं समस्ते साम्न्यवयवविभागशोऽध्यस्य सप्तविधं सामोपासीत । कथं पुनः सामत्वमादित्यस्येति उच्यते— उद्गीथत्वे हेतुवदादित्यस्य सामत्वे हेतुः । कोऽसौ ? सर्वदा समो वृद्धिक्षयाभावात्तेन हेतुना सामादित्यः । मां प्रति मा प्रतीति तुल्या बुद्धिमुत्पादयति । अत सर्वेण समोऽत. साम सामत्वादित्यर्थ. । उद्गीथभक्तिसामान्यवचनादेव लोकादिपक्तसामान्याद्धिकारादित्यं गम्यत इति हिंकारादित्वे कारणं नोक्तम् । सामत्वे पुन. सवितुरनुक्तं कारणं न सुबोधमिति समत्वमुक्तम् ॥

तस्मिन्निमानि सर्वाणि भूतान्यन्वायत्तानीति विद्यात्तस्य यत्पुरोदयात्स्य हिंकारस्तदस्य पशवोऽन्वायत्तास्तस्मात्ते हिं कुर्वन्ति हिंकारभाजिनो ह्येतस्य साम्न ॥२॥

तस्मिन्नादित्येऽवयवविभागश इमानि वक्ष्यमाणानि सर्वाणि भूतान्यन्वायत्तान्यनुगतान्यादित्यमुपजीव्यत्वेनेति विद्यात् । कथं ? तस्यादित्यस्य यत्पुरोदयाद्धर्मरूपं स हिंकारो भक्तिस्तत्रेदं सामान्यं यत्तस्य हिंकारभक्तिरूपम् । तदस्यादित्यस्य साम्नः पशवो गवादयोऽन्वायत्ता अनुगतास्तद्भक्तिरूपमुपजीवन्तीत्यर्थः । यस्मादेवं, तस्मात्ते हि कुर्वन्ति पशवः प्रागुदयात् । तस्माद्धिंकारभाजिनो ह्येतस्यादित्याख्यस्य साम्न , तद्भक्तिभजनशीलत्वाद्धि त एवं वर्तन्ते ॥

अथ यत्प्रथमोदिते स प्रस्तावस्तदस्य मनुष्या अन्वायत्तास्तस्मात्ते प्रस्तुतिकामाः प्रशंसाकामा प्रस्तावभाजिनो ह्येतस्य साम्नः ॥३॥

अथ यत्प्रथमोदिते सवितृरूपं तदस्यादित्याख्यस्य साम्न स प्रस्तावस्तदस्य मनुष्या अन्वायत्ता· पूर्ववत् । तस्मात्ते प्रस्तुतिं प्रशंसां कामयन्ते, यस्मात्प्रस्तावभाजिनो ह्येतस्य साम्न. ॥

अथ यत्संगववेलायां स आदिस्तदस्य वयांस्यन्वायत्तानि तस्मात्तान्यंतरिक्षेऽनारंबणान्यादायात्मानं परिपतन्त्यादिभाजीनि ह्येतस्य साम्नः ॥४॥

अथ यत्संगववेलाया गवां रश्मीनां संगमनं संगमो यस्यां वेलायां, गवां

वा वत्सैः सह, सा सगववेला, तस्मिन्काले यत्सावित्रं रूपं स आदिर्भक्तिविशेष ओंकारः । तदस्य वयांसि पक्षिणोऽन्वायत्तानि । यत एवं तस्मात्तानि वयांस्यंतरिक्षेऽनारंबणान्यनालंबनानि आत्मानमादायात्मानमेवालंबनत्वेन गृहीत्वा परिपतन्ति गच्छन्ति, अत आकारसामान्यादादिभक्तिभाजीनि ह्येतस्य साम्नः ॥

अथ यत्संप्रति मध्यंदिने स उद्गीथस्तदस्य देवा अन्वायत्तास्तस्मात्ते सत्तमाः प्राजापत्यानामुद्गीथभाजिनो ह्येतस्य साम्नः ॥५॥

अथ यत्संप्रति मध्यंदिन ऋजु मध्यंदिन इत्यर्थः । स उद्गीथभक्तिस्तदस्य देवा अन्वायत्ताः, द्योतनातिशयात्तत्काले । तस्मात्ते सत्तमा विशिष्टतमाः प्राजापत्याना प्रजापत्यपत्यानामुद्गीथभाजिनो ह्येतस्य साम्नः ॥

अथ यदूर्ध्वं मध्यंदिनात्प्रागपराह्णात्स प्रतिहारस्तदस्य गर्भा अन्वायत्तास्तस्मात्ते प्रतिहृता नावपद्यन्ते प्रतिहारभाजिनो ह्येतस्य साम्न ॥६॥

अथ यदूर्ध्वं मध्यंदिनात्प्रागपराह्णाद्यद्रूपं सवितुः, स प्रतिहारस्तदस्य गर्भा अन्वायत्ताः । अतस्ते सवितु प्रतिहारभक्तिरूपेणोर्ध्वं प्रतिहृता. सन्तो नावपद्यन्ते नाधः पतन्ति तद्द्वारे सत्यर्पात्यर्थ । यत. प्रतिहारभाजिनो ह्येतस्य साम्नो गर्भाः ॥

अथ यदूर्ध्वमपराह्णात्प्रागस्तमयात्स उपद्रवस्तदस्यारण्या अन्वायत्तास्तस्मात्ते पुरुषं दृष्ट्वा कक्षं श्वभ्रमित्युपद्रवन्त्युपद्रवभाजिनो ह्येतस्य साम्न. ॥

अथ यदूर्ध्वमपराह्णात्प्रागस्तमयात्स उपद्रवस्तदस्यारण्या पशवोऽन्वायत्ताः । तस्मात्ते पुरुषं दृष्ट्वा भीताः कक्षमरण्यं श्वभ्रं भयशून्यमित्युपद्रवन्त्युपगच्छन्ति, दृष्ट्वोपद्रवणादुपद्रवभाजिनो ह्येतस्य साम्नः ॥

अथ यत्प्रथमास्तमिते तन्निधनं तदस्य पितरोऽन्वायत्तास्तस्मात्तान्निदधति निधनभाजिनो ह्येतस्य साम्न एवं खल्वमुमादित्यं सप्तविधं सामोपास्ते ॥८॥ इति नवमः खंडः ॥

अथ यत्प्रथमास्तमितेऽदर्शनं जिगमिषति सवितरि तन्निधनं, तदस्य पितरोऽन्वायत्ताः, तस्मात्तान्निदधति पितृपितामहप्रपितामहरूपेण दर्भेषु निक्षिपन्ति तांस्तदर्थं पिंडान्वा स्थापयन्ति । निधनसंबंधान्निधनभाजिनो ह्येतस्य साम्नः पितरः । एवमवयवशः सप्तधा विभक्तं खल्वमुमादित्यं सप्तविधं सामोपास्ते यस्तस्य तदापत्तिः फलमिति वाक्यशेषः ॥ २.९.—

मृत्युरादित्यः । अहोरात्रादिकालेन जगत· प्रमापयितृत्वात् । तस्यातितरणायेदं सामोपासनमुपदिश्यते—

अथ खल्वात्मसंमितमतिमृत्यु सप्तविधं सामोपासीत हिंकार इति त्र्यक्षरं प्रस्ताव इति त्र्यक्षरं तत्सममम् ॥१॥

अथ खल्वनंतरं आदित्यमृत्युविषयसामोपासनस्य, आत्मसंमितं स्वावयवतुल्यतया मितं, परमात्मतुल्यतया वा संमितं, अतिमृत्यु मृत्युजयहेतुत्वात् । यथा प्रथमेऽध्याय उद्गीथभक्तिनामाक्षराण्युद्गीथ इत्युपास्यत्वेनोक्तानि, तथेह साम्नः सप्तविधभक्तिनामाक्षराणि समाहृत्य त्रिभिस्त्रिभिः समतया सामत्वं परिकल्प्योपास्यत्वेनोच्यन्ते । तदुपासनं मृत्युगोचराक्षरसंख्यासामान्येन मृत्युं प्राप्य तदतिरिक्ताक्षरेण तस्यादित्यस्य मृत्योरतिक्रमणायैव संक्रमणं कल्पयति । अतिमृत्यु सप्तविधं सामोपासीत, मृत्युमतिक्रान्तमतिरिक्ताक्षरसंख्येत्यतिमृत्यु साम । तस्य प्रथमभक्तिनामाक्षराणि हिंकार इत्येतत्त्र्यक्षरं भक्तिनाम । प्रस्ताव इति च भक्तेस्त्र्यक्षरमेव नाम, तत्पूर्वेण सममम् ॥

आदिरिति द्व्यक्षरं प्रतिहार इति चतुरक्षरं तत इहैकं तत्सममम् ॥२॥

आदिरिति द्व्यक्षरं, सप्तविधस्य साम्न संख्यापूरण ओंकार आदिरित्युच्यते । प्रतिहार इति चतुरक्षरम । तत इहैकमक्षरमर्वाच्छब्दाभ्यामक्षरयोः प्रक्षिप्यते । तेन तत्सममेव भवति ॥

उद्गीथ इति त्र्यक्षरमुपद्रव इति चतुरक्षरं त्रिभिस्त्रिभिः समं भवत्यक्षरमतिशिष्यते त्र्यक्षरं तत्सममम् ॥३॥

उद्गीथ इति त्र्यक्षरमुपद्रव इति चतुरक्षरं त्रिभिस्त्रिभिः समं भवति । अक्षरमतिशिष्यतेऽतिरिच्यते । तेन वैषम्ये प्राप्ते साम्न. समत्वकरणायाह— तदेकमपि सदक्षरमिति त्र्यक्षरमेव भवति । अतस्तत्सममम् ॥

निधनमिति त्र्यक्षरं तत्सममेव भवति तानि ह वा एतानि द्वाविंशतिरक्षराणि ॥४॥

निधनमिति त्र्यक्षरं तत्सममेव भवति । एवं त्र्यक्षरसमतया सामत्वं संपाद्य यथाप्राप्तान्येवाक्षराणि संख्यायन्ते— तानि ह वा एतानि सप्तभक्तिनामाक्षराणि द्वाविंशतिः ॥

एकविंशत्यादित्यमाप्नोत्येकविंशो वा इतोऽसावादित्यो द्वाविंशेन पर-

मादित्याज्जयति तन्नाकं तद्विशोकम् ॥५॥

तत्रैकविंशत्यक्षरसंख्ययादित्यमाप्नोति मृत्युम्। यस्मादेकविंश इतोऽस्माल्लोकादसावादित्यः संख्यया। 'द्वादश मासाः पंचर्तवस्त्रय इमे लोका असावादित्य एकविंशः' इति श्रुतेरतिशिष्टेन द्वाविंशेनाक्षरेण परं मृत्योरादित्याज्जयत्याप्नोतीत्यर्थः। यच्च तदादित्यात्परं, किं तत्, नाकं, कमिति सुखं तस्य प्रतिषेधोऽकं तन्न भवतीति नाकं, कमेवेत्यर्थः अमृत्युविषयत्वात्। विशोकं च तद्विगतशोकं मानसदुःखरहितमित्यर्थः। तदाप्नोतीति ॥

आप्नोति ह्यादित्यस्य जयं परो ह्यस्यादित्यजयाज्जयो भवति य एतदेवं विद्वानात्मसंमितमतिमृत्यु सप्तविधं सामोपास्ते सामोपास्ते ॥६॥

उक्तस्यैव पिंडितार्थमाह— एकविंशतिसंख्ययाऽऽदित्यस्य जयमाप्नोति। परो ह्यस्यैवंविद आदित्यजयान्मृत्युगोचरात्परो जयो भवति, द्वाविंशत्यक्षरसंख्ययेत्यर्थः। य एतदेवं विद्वानित्यायुक्तार्थम्। तस्यैतद्यथोक्तं फलमिति। द्विरभ्यास सप्तविध्यसमाप्त्यर्थः ॥ इति दशमः खंडः ॥ २.१०.—

मनो हिंकारो वाक्प्रस्तावश्चक्षुरुद्गीथ श्रोत्रं प्रतिहारः प्राणो निधनमेतद्गायत्रं प्राणेषु प्रोतम् ॥१॥

विना नामग्रहणं पंचविधस्य सप्तविधस्य च साम्न उपासनमुक्तम्। अथेदानीं गायत्रादिनामग्रहणपूर्वकं विशिष्टफलानि सामोपासनानन्तराण्युच्यन्ते। यथाक्रमं गायत्रादीनां कर्मणि प्रयोगः, तथैव मनो हिंकारो मनसः सर्वकरणवृत्तीनां प्राथम्यात्। तदानंतर्याद्वाक्प्रस्तावः, चक्षुरुद्गीथ श्चेष्टत्वात्। श्रोत्रं प्रतिहारः प्रतिहृतत्वात्। प्राणो निधनं यथोक्तानां प्राणे निधनात्स्वापकाले। एतद्गायत्रं साम प्राणेषु प्रोतं, गायत्र्याः प्राणसंस्तुतत्वात् ॥

स य एवमेतद्गायत्रं प्राणेषु प्रोतं वेद प्राणी भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या महामनाः स्यात्तद् व्रतम् ॥२॥ इति एकादशः खंडः ॥

स य एवमेतद्गायत्रं प्राणेषु प्रोतं वेद प्राणी भवति, अविकलकरणो भवतीत्येतत्। सर्वमायुरेति, 'शतं वर्षाणि सर्वमायुः पुरुषस्य' इति श्रुतेः। ज्योगुज्ज्वलं जीवति। महान्भवति प्रजादिभिर्महांश्च कीर्त्या। गायत्रोपासकस्यैतद् व्रतं भवति, यन्महामना अक्षुद्रचित्तः स्यादित्यर्थः ॥ २.११.—

अभिमंथति स हिंकारो धूमो जायते स प्रस्तावो ज्वलति स उद्गीथोऽगारा भवन्ति स प्रतिहार उपशाम्यति तन्निधनं संशाम्यति तन्निधनमेतद्रथंतरमग्नौ प्रोतम् ॥१॥

अभिमंथति स हिंकार. प्राथम्यात् । अग्नेर्धूमो जायते स प्रस्ताव आनंतर्यात् । ज्वलति स उद्गीथो हवि.संबंधाच्छ्रैष्ठ्यं ज्वलनस्य । अगारा भवन्ति स प्रतिहारोऽगाराणा प्रतिहृतत्वात । उपशम. सावशेषत्वादग्नेः, संशमो नि शेषोपशम., समाप्तिसामान्यान्निधनम् । एतद्रथंतरमग्नौ प्रोतम् । मंथने ह्यग्निर्गायते ॥

स य एवमेतद्रथंतरमग्नौ प्रोतं वेद ब्रह्मवर्चस्यन्नादो भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या न प्रत्यङ्ङग्निमाचामेन्न निष्ठीवेत्तद्व्रतम् ॥२॥ इति द्वादशः खंड ॥

स य इत्यादि पूर्ववत । ब्रह्मवर्चसी व्रतस्वाध्यायनिमित्तं तेजो ब्रह्मवर्चसम । तेजस्तु केवलं त्विड्भाव । अन्नादो दाताग्निः । न प्रत्यङ्ङग्नेरभिमुखो नाचामेन्न भक्षयेत्किंचिन्न निष्ठीवेत् श्लेष्मनिरसनं च न कुर्यात तत व्रतम् ॥ २.१२ —

उपमंत्रयते स हिंकारो ज्ञपयते स प्रस्ताव स्त्रिया सह शेते स उद्गीथः प्रति स्त्रीं सह शेते स प्रतिहारः कालं गच्छति तन्निधनं पारं गच्छति तन्निधनमेतद्वामदेव्यं मिथुने प्रोतम् ॥१॥

उपमंत्रयते संकेत करोति प्राथम्यात्स हिंकार । ज्ञपयते तोषयति स प्रस्ताव । सहशयनमेकपर्यंकगमनं स उद्गीथ. श्रैष्ठ्यात् । प्रति स्त्री शयनं स्त्रिया अभिमुखाभाव· स प्रतिहार. । काल गच्छति मैथुनेन पारं समाप्तिं गच्छति तन्निधनमेतद्वामदेव्यं मिथुने प्रोतम् । बाभ्रवंमिथुनसंबंधात ॥

स य एवमेतद्वामदेव्यं मिथुने प्रोतं वेद मिथुनी भवति मिथुनान्मिथुनात्प्रजायते सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या न कांचन परिहरेत्तद्व्रतम् ॥२॥ इति त्रयोदश खंड· ॥

स य इत्यादि पूर्ववत् । मिथुनीभवत्यविधुरो भवतीत्यर्थ· । मिथुनान्मथुनात्प्रजायत इत्यमोघरेतस्त्वमुच्यते । न काचन काचिदपि स्त्रियं स्वात्मतल्पप्राप्तां न परिहरेत्समागमार्थिनीम् । वामदेव्यसामोपासनागत्वेन विधानात । एतस्मादन्यत्र प्रतिषेधस्मृतयः । वचनप्रामाण्याच्च धर्मावगतेर्न प्रतिषेधशास्त्रेणास्य विरोधः ॥२॥ इति त्रयोदशः खंडः ॥ २.१३ —

उद्यन्हिंकार उदित. प्रस्तावो मध्यंदिन उद्गीथोऽपराह्ण प्रतिहारोऽस्तं यन्निधनमेतत् बृहदादित्ये प्रोतम् ॥१॥

उद्यन्सविता स हिंकारः प्राथम्याद्दर्शनस्य । उदितः प्रस्तावः प्रस्तवनहेतुत्वात्कर्मणाम । मध्यंदिन उद्गीथः श्रैष्ठ्यात । अपराह्ण प्रतिहारः पश्चादानां गृहान्प्रति हरणात । यदस्तं यंस्तन्निधनं रात्रौ गृहे निधानात्प्राणिनाम् । एतत बृहदादित्ये प्रोतं बृहत आदित्यदैवत्यत्वात ॥

स य एवमेतत बृहदादित्ये प्रोत वेद तेजस्व्यन्नादो भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या तपन्तं न निंदेत्तत् व्रतम् ॥२॥ इति चतुर्दश खंड· ॥

स य इत्यादि पूर्ववत् । तपन्तं न निंदेत्तद्व्रतम् ॥ २.१४.—

अभ्राणि संप्लवन्ते स हिंकारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहार उद्गृह्णाति तन्निधनमेतद्रूपं पर्जन्ये प्रोतम् ॥१॥

अभ्राण्यब्भरणात । मेघ उदकसेक्तृत्वात । उक्तार्थमन्यत । एतद्रूपं नाम साम पर्जन्ये प्रोतम । अनेकरूपत्वात अभ्रादिभि. पर्जन्यस्य वैरूप्यम ॥१॥

स य एवमेतद्रूपं पर्जन्ये प्रोतं वेद विरूपांश्च सुरूपांश्च पशूनवरुन्धे सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या वर्षन्तं न निंदेत्तत् व्रतम् ॥२॥ इति पंचदश. खंड ॥

विरूपांश्च सुरूपांश्चाजाविप्रभृतीन्पशूनवरुन्धे प्राप्नोतीत्यर्थः । वर्षन्तं न निन्देत्तत व्रतम ॥ इति पंचदशः खंड. ॥ २.१५.—

वसंतो हिंकारो ग्रीष्म· प्रस्तावो वर्षा उद्गीथ· शरत्प्रतिहारो हेमंतो निधनमेतद्वैराजमृतुषु प्रोतम् ॥१॥

वसंतो हिंकार प्राथम्यात् । ग्रीष्मः प्रस्ताव इत्यादि पूर्ववत् ॥

स य एवमेतद्वैराजमृतुषु प्रोतं वेद विराजति प्रजया पशुभिर्ब्रह्मवर्चसेन सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्यर्तूंन्न निंदेत्तत् व्रतम् ॥२॥ इति षोडश· खंडः ॥

एतद्वैराजमृतुषु प्रोतं वेद विराजति ऋतुवत् यथर्तव आर्तवैर्धर्मैर्विराजन्त एव प्रजादिभिर्विद्वानिति । उक्तमन्यत् । ऋतून्न निंदेत्तत् व्रतम् ॥ २.१६.—

पृथिवी हिंकारोऽतरिक्षं प्रस्तावो द्यौरुद्गीथो दिश· प्रतिहारः समुद्रो निधनमेताः शक्वर्यो लोकेषु प्रोताः ॥१॥

पृथिवी हिकार इत्यादि पूर्ववत । शक्वर्य इति नित्यं बहुवचनं रेवत्य इव । लोकेषु प्रोता· ॥

स य एवमेताः शक्वर्यो लोकेषु प्रोता वेद लोकी भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या लोकान्न निंदेत्तत् व्रतम्॥ इति सप्तदश खंडः ॥

लोकी भवति लोकफलेन युज्यत इत्यर्थ· । लोकान्न निंदेत्तत व्रतम् ॥—

अजा हिंकारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वा· प्रतिहार· पुरुषो निधनमेता रेवत्य पशुषु प्रोताः ॥१॥

अजा हिकार इत्यादि पूर्ववत । पशुषु प्रोता· ॥

स य एवमेता रेवत्य पशुषु प्रोता वेद पशुमान्भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या पशून्न निंदेत्तत् व्रतम् ॥ इति अष्टादश· खंडः ॥

पशून्न निंदेत्तत व्रतम ॥ २.१८—

लोम हिंकारस्त्वक्प्रस्तावो मांसमुद्गीथोऽस्थि प्रतिहारो मज्जा निधनमेतद्यज्ञायज्ञीयमंगेषु प्रोतम् ॥१॥

लोम हिकारो देहावयवाना प्राथम्यात । त्वक्प्रस्ताव आनंतर्यात् । मांसमुद्गीथः श्रैष्ठ्यात । अस्थि प्रतिहारः प्रतिहतत्वात । मज्जा निधनमान्त्यात् । एतद्यज्ञायज्ञीयं नाम साम देहावयवेषु प्रोतम ॥

स य एवमेतद्यज्ञायज्ञीयमंगेषु प्रोतं वेदांगी भवति नांगेन विहूर्छति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या संवत्सरं मज्ञो नाश्नीयात्तत् व्रतं मज्ञो नाश्नीयादिति वा ॥२॥ एकोनविंशः खंड· ॥

अंगी भवति समग्रांगो भवतीत्यर्थ· । नांगेन हस्तपादादिना विहूर्छति न कुटिलो भवति पंगुः कुणी वेत्यर्थ· । संवत्सरं संवत्सरमात्रं मज्ञो मांसानि नाश्नीयान्न भक्षयेत् । बहुवचनं मत्स्योपलक्षणार्थम् । मज्ञो नाश्नीयात्सर्वदैव नाश्नीयादिति वा, तत् व्रतम् ॥ इति एकोनविंश· खंडः ॥ २.१९.—

अग्निर्हिंकारो वायुः प्रस्ताव आदित्य उद्गीथो नक्षत्राणि प्रतिहारश्चं-

द्रमा निधनमेतद्राजनं देवतासु प्रोतम् ॥१॥

अग्निर्हिंकारः प्रथमस्थानत्वात् । वायुः प्रस्ताव आनंतर्यसामान्यात् । आदित्य उद्गीथ श्रेष्ठ्यात् । नक्षत्राणि प्रतिहार प्रतिहृतत्वात् । चंद्रमा निधनं कर्मिणां तन्निधनात् । एतद्राजनं देवतासु प्रोतं देवतानां दीप्तिमत्त्वात् ॥

स य एवमेतद्राजनं देवतासु प्रोतं वेदैतासामेव देवतानां सलोकतां सार्ष्टितां सायुज्यं गच्छति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या ब्राह्मणान्न निंदेत्तत् व्रतम् ॥ इति विंशः खंडः ॥

विद्वत्फलं— एतासामेवाग्न्यादीनां देवतानां सलोकतां समानलोकतां सार्ष्टितां समानर्द्धित्वं सायुज्यं सयुग्भावमेकदेहदेहित्वमित्येतत् । वाशब्देऽत्र लुप्तो द्रष्टव्यः । सलोकता वेत्यादि । भावनाविशेषत फलविशेषोपपत्तेः । गच्छति प्राप्नोति । समुच्चयानुपपत्तेश्च । ब्राह्मणान्न निंदेत्तत व्रतम् । "एते वै देवाः प्रत्यक्षं यद्ब्राह्मणाः" इति श्रुतेर्ब्राह्मणनिंदा देवतानिंदेति ॥ २.२०.—

त्रयी विद्या हिंकारस्त्रय इमे लोकाः स प्रस्तावोऽग्निर्वायुरादित्यः स उद्गीथो नक्षत्राणि वयांसि मरीचय. स प्रतिहार. सर्पा गंधर्वाः पितरस्तन्निधनमेतत्साम सर्वस्मिन्प्रोतम् ॥१॥

त्रयी विद्या हिंकारः । अग्न्यादिसाम्न आनंतर्य त्रयीविद्याया अग्न्यादिकार्यत्वश्रुतेः । हिंकारः प्राथम्यात्सर्वकर्तव्यानाम् । त्रय इमे लोकास्तत्कार्यत्वादनंतरा इति प्रस्ताव । अग्न्यादीनामुद्गाथत्वं श्रेष्ठ्यात । नक्षत्रादीनां प्रतिहृतत्वात्प्रतिहारत्वम् । सर्पादीनां धकारसामान्यान्निधनत्वम् । एतत्साम— नामविशेषाभावात्सामसमुदायः सामशब्द —सर्वस्मिन्प्रोतम् । त्रयीविद्यादि हि सर्वम् । त्रयीविद्यादिदृष्ट्या हिंकारादिसामभक्त्य उपास्या. । अर्तीतेष्वपि सामोपासनेषु येषु येषु प्रोतं यद्यत्साम तद्दृष्ट्या तदुपास्यमिति । कर्मांगाणा दृष्टिविशेषेणैवाज्यस्येव संस्कार्यत्वात ॥

स य एवमेतत्साम सर्वस्मिन्प्रोतं वेद सर्व ह भवति ॥२॥

सर्वविषयसामविद. फलं— सर्व ह भवति सर्वेश्वरो भवतीत्यर्थः । निरुपचारितसर्वभावे हि दिक्स्थेभ्यो बलिप्राप्त्यनुपपत्तिः ॥

तदेष श्लोको यानि पंचधा त्रीणि त्रीणि तेभ्यो न ज्यायः परमन्यदस्ति ॥

तदेतस्मिन्नर्थ एष श्लोको मंत्रोऽप्यस्ति । यानि पंचधा पंचप्रकारेण हिंकारा-

दिविभागैः प्रोक्तानि त्रीणि त्रीणि त्रयाविद्यादीनि, तेभ्य पंचत्रिंकेभ्यो ज्यायो महत्तरं परं च व्यतिरिक्तमन्यद्वस्त्वेतरं नास्ति न विद्यत इत्यर्थः । तत्रैव हि सर्वस्यांतर्भावः ॥

यस्तद्वेद स वेद सर्वं सर्वा दिशो बलिमस्मै हरन्ति 'सर्वमस्मीत्युपासीत तद्व्रतं तद्व्रतम् ॥४॥ इति एकविंश खंड. ॥

यस्तद्यथोक्तं सर्वात्मकं साम वेद स वेद सर्वं स सर्वज्ञो भवतीत्यर्थ । सर्वा दिश. सर्वदिक्स्था अस्मा एवंविदे बलि भोगं हरन्ति प्रापयन्तीत्यर्थः । सर्वमस्मि भवामीत्येवमेतत्सामोपासीत तस्यैतदेव व्रतम । द्विरुक्ति सामोपासनसमाप्त्यर्था ॥ इति एकविंशः खंड ॥ २.२१ —

विनर्दि साम्नो वृणे पशव्यमित्यग्नेर्वृद्धोऽनिरुक्त प्रजापतेर्निरुक्त सोमस्य मृदु श्लक्ष्णं वायो श्लक्ष्णं बलवद्विद्रस्य क्रौंचं बृहस्पतेरपध्वान्तं वरुणस्य तान्सर्वानेवोपसेवेत वारुणं त्वेव वर्जयेत् ॥१॥

सामोपासनप्रसंगेन गानविशेषादिसंपदुद्गातृरुपदिश्यते फलविशेषसंबंधात । विनर्दि विशिष्टो नर्द. स्वरविशेष ऋषभकृजितसमोऽस्यास्तीति विनर्दि गानमिति वाक्यशेष. । तच्च साम्न सर्वेभ्यो हितं पशव्यमग्नेरग्निदेवत्यं चोद्गीथ उद्गानम । तदहमेवंविशिष्टं वृणे प्रार्थय इति कश्चिद्यजमान उद्गाता वा मन्यते । अनिरुक्तोऽमुकसम इत्यविशेषितः प्रजापतेः प्रजापतिदेवत्यः स गानविशेष., आनिरुक्तत्वात्प्रजापतेः । निरुक्त स्पष्टः सोमस्य सोमदेवत्य स उद्गीथ इत्यर्थ । मृदु श्लक्ष्णं च गानं वायोर्वायुदेवत्यं तत् । श्लक्ष्णं बलवच्च प्रयत्नाधिक्येपेतं चंद्रस्यैद्रं तद्गानम । क्रौंचं क्रौंचपक्षिनिनादसमं बृहस्पतेर्बार्हस्पत्यं तत् । अपध्वांतं भिन्नकास्यस्वरसमं वरुणस्यैतद्गानम् । तान्सर्वानेवोपसेवेत प्रयुंजीत वारुण त्वेवैकं वर्जयेत ॥

अमृतत्वं देवेभ्य आगायानीत्यागायेत्स्वधां पितृभ्य आशां मनुष्येभ्यस्तृणोदकं पशुभ्य स्वर्गं लोकं यजमानायान्नमात्मन आगायानीत्येतानि मनसा ध्यायन्नप्रमत्त. स्तुवीत ॥२॥

अमृतत्वं देवेभ्य आगायानि साधयानि । स्वधा पितृभ्य आगायानि, आशां मनुष्येभ्य आशां प्रार्थनां प्रार्थितमित्येतत । तृणोदकं पशुभ्य , स्वर्गं लोकं यजमानाय, अन्नमात्मने मह्यमागायानि इत्येतानि । मनसा चिंतयन्ध्यायन्न-

प्रमत्तः स्वरोपमव्यंजनादिभ्य स्तुर्वीत ॥

सर्वे स्वरा इंद्रस्यात्मान सर्व ऊष्माण प्रजापतेरात्मान सर्वे स्पर्शा मृत्योरात्मानस्तं यदि स्वरेणोपालभेतेंद्रं शरण प्रपन्नोऽभूवं स त्वा प्रति वक्ष्यतीत्येनं ब्रूयात् ॥३॥

सर्वे स्वरा अकारादय इंद्रस्य बलकर्मण प्राणस्यात्मानो देहावयवस्थानीया । सर्व ऊष्माण शपसहादयः प्रजापतेर्विराज कश्यपस्य वा आत्मान । सर्वे स्पर्शा कादयो व्यंजनानि मृत्योरात्मान । तमेवंविदमुद्गातारं यदि कश्चित्स्वरेणोपालभेत, स्वरस्त्वया दुष्ट प्रयुक्त इति, एवमुपालब्ध इंद्रं प्राणमीश्वरं शरणमाश्रयं प्रपन्नोऽभूवं स्वरान्प्रयुंजानोऽहं, स इंद्रो यत्तव वक्तव्यं त्वा त्वां प्रति वक्ष्यति स एव देव उत्तरं दास्यतीत्येनं ब्रूयात ॥

अथ यद्येनमूष्मसूपालभेत प्रजापतिं शरणं प्रपन्नोऽभूवं स त्वा प्रति पेक्ष्यतीत्येनं ब्रूयादथ यद्येनं स्पर्शेषूपालभेत मृत्युं शरणं प्रपन्नोऽभूवं स त्वा प्रति धक्ष्यतीत्येनं ब्रूयात् ॥४॥

अथ यद्येनमूष्मसु तथैवोपालभेत, प्रजापतिं शरणं प्रपन्नोऽभूवं, स त्वा प्रति पेक्ष्यति संचूर्णयिष्यतीत्येनं ब्रूयात । अथ यद्येनं स्पर्शेषूपालभेत, मृत्युं शरणं प्रपन्नोऽभूव, स त्वा प्रति धक्ष्यति भस्मीकरिष्यतीत्येनं ब्रूयात ॥

सर्वे स्वरा घोषवन्तो बलवन्तो वक्तव्या इंद्रे बलं ददानीति सर्व ऊष्माणोऽग्रस्ता अनिरस्ता विवृता वक्तव्या. प्रजापतेरात्मानं परिददानीति सर्वे स्पर्शा लेशेनानाभिनिहिता वक्तव्या मृत्योरात्मानं परिहराणीति ॥५॥ इति द्वाविंश खंड ॥

यत इंद्राद्यात्मानः स्वरादयोऽत. सर्वे स्वरा घोषवन्तो बलवन्तो वक्तव्या । तथाहमिंद्रे बलं ददानि बलमादधानीति । तथा सर्व ऊष्माणोऽग्रस्ता अंतरग्रवेशिता अनिरस्ता बहिरप्रक्षिप्ता विवृता विवृतप्रयत्नोपेता , प्रजापतेरात्मानं परिददानि प्रयच्छानीति । सर्वे स्पर्शा लेशेन शनकैरनभिनिहिता अनाभिनिक्षिप्ता वक्तव्याः । मृत्योरात्मानं बालानिव शनकै परिहरन् मृत्योरात्मानं परिहराणीति ॥

त्रयो धर्मस्कंधा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यंतमात्मानमाचार्यकुलेऽवसादयन्सर्व एते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति ॥१॥

ओंकारस्योपासनाविध्यर्थं त्रयो धर्मस्कंधा इत्याद्यारभ्यते । नैवं मन्तव्यं सामावयवभूतस्यैवोद्गीथादिलक्षणस्योंकारस्योपासनात्फलं प्राप्यत इति । किं तर्हि यत्सर्वैरपि सामोपासनैः कर्मभिश्चाप्राप्यं तत्फलममृतत्वं केवलादोंकारोपासनात्प्राप्यत इति । तत्स्तुत्यर्थं सामप्रकरणे तदुपन्यासः । त्रयाणां संख्याकाः धर्मस्य स्कंधा धर्मस्कंधा धर्मप्रविभागा इत्यर्थः । के ते इत्याह— यज्ञोऽग्निहोत्रादिः, अध्ययनं सनियमस्य ऋगादेरभ्यासः, दानं बहिर्वेदि यथाशक्ति द्रव्यसंविभागो भिक्षमाणेभ्यः । इत्येष प्रथमो धर्मस्कंधः गृहस्थसमवेतत्वान्निर्वर्तकेन गृहस्थेन निर्दिश्यते । प्रथम एक इत्यर्थो द्वितीयतृतीयश्रवणान्नाद्यार्थः । तप एव द्वितीयः, तप इति कृच्छ्रचान्द्रायणादि तद्वान्तापसः पारिव्राड्वा, न ब्रह्मसंस्थ आश्रमधर्ममात्रसंस्थो ब्रह्मसंस्थस्य त्वमृतत्वश्रवणात् । द्वितीयो धर्मस्कंधः । ब्रह्मचार्याचार्यकुले वस्तुं शीलमस्येत्याचार्यकुलवासी । अत्यंतं यावज्जीवमात्मानं नियमेनाचार्यकुलेऽवसादयन्क्षपयन्देहं तृतीयो धर्मस्कंधः । अत्यंतमित्यादिविशेषणानैष्ठिक इति गम्यते । उपकुर्वाणस्य स्वाध्यायग्रहणार्थत्वान्न पुण्यलोकत्वं ब्रह्मचर्येण । सर्व एते त्रयोऽप्याश्रमिणो यथोक्तैर्धर्मैः पुण्यलोका भवन्ति । पुण्यो लोको येषां त इमे पुण्यलोका आश्रमिणो भवन्ति । अवशिष्टस्त्वनुक्तः पारिव्राट् तुरीयो ब्रह्मसंस्थो ब्रह्मणि सम्यक् स्थितः सोऽमृतत्वं पुण्यलोकावलक्षणममरणभावमात्यंतिकमेति नोपाधिकं देवाद्यमृतत्ववत्, पुण्यलोकात्पृथगमृतत्वस्य विभागकरणात् ॥

यदि च पुण्यलोकातिशयमात्रममृतत्वमभविष्यत्तत पुण्यलोकत्वाद्विभक्तं नावक्ष्यत । विभक्तोपदेशाच्चात्यंतिकममृतत्वमिति गम्यते । अत्र चाश्रमधर्मफलोपन्यासः प्रणवसेवास्तुत्यर्थः, न तत्फलविध्यर्थः, स्तुतये च प्रणवसेवाया आश्रमधर्मफलविधये चेति हि भिद्येत वाक्यम् । तस्मात् स्मृतिसिद्धाश्रमफलानुवादेन प्रणवसेवाफलममृतत्वं ब्रुवन्प्रणवसेवां स्तौति । यथा पूर्णवर्मणः सेवा भक्तपरिधानमात्रफला राजवर्मणस्तु सेवा राज्यतुल्यफलेति तद्वत् । प्रणवश्च तत्सत्यं परं ब्रह्म तत्प्रतीकत्वात् । 'एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परं' इत्याद्यामनायात्काठके युक्तं तत्सेवातोऽमृतत्वम् ॥

अत्राहुः केचित्— चतुर्णामाश्रमिणामविशेषेण स्वधर्मानुष्ठानात्पुण्यलोकता इहोक्ता ज्ञानवर्जितानां 'सर्व एते पुण्यलोका भवन्ति' इति । नात्र पारिव्राडवशेषितः, पारिव्राजकस्यापि ज्ञानं यमा नियमाश्च तप एवेति । तप एव द्वितीय

इत्यत्र तपःशब्देन पारिव्राट्तापसौ गृहीतौ। अतस्तेषामेव चतुर्णां यो ब्रह्मसंस्थः प्रणवसेवकः सोऽमृतत्वमेतीति चतुर्णामधिकृतत्वाविशेषात् ब्रह्मसंस्थत्वेऽप्रतिषेधाच्च स्वकर्मच्छेदे च ब्रह्मसंस्थतायां सामर्थ्योपपत्तेः। न च यववराहादिशब्दवद्ब्रह्मसंस्थशब्दः, पारिव्राजके रूढः ब्रह्मणि संस्थितिनिमित्तमुपादाय प्रवृत्तत्वात्। न हि रूढिशब्दा निमित्तमुपादत्ते। सर्वेषां च ब्रह्मणि स्थितिरुपपद्यते। यत्र यत्र निमित्तमस्ति ब्रह्मणि संस्थितिस्तस्य तस्य निमित्तवतो वाचकं सन्तं ब्रह्मसंस्थशब्दं पारिव्राडेकविषये संकोचे कारणाभावान्निरोद्धुमयुक्तम्॥ न च पारिव्राज्याश्रमधर्ममात्रेणामृतत्व, ज्ञानानर्थक्यप्रसंगात्। पारिव्राज्यधर्मयुक्तमेव ज्ञानं अमृतत्वसाधनमिति चेन्न। आश्रमधर्मत्वाविशेषात्। धर्मो वा ज्ञानविशिष्टोऽमृतत्वसाधनमित्येदपि सर्वाश्रमधर्माणामाविशिष्टम्। न च वचनमस्ति पारिव्राजकस्यैव ब्रह्मसंस्थस्य मोक्षो नान्येषामिति। ज्ञानान्मोक्ष इति च सर्वोपनिषदां सिद्धान्तः। तस्माद्य एव ब्रह्मसंस्थ स्वाश्रमविहितधर्मवता सोऽमृतत्वमेतीति॥

न। कर्मनिमित्तविद्याप्रत्यययोर्विरोधात्। कर्त्रादिकारकक्रियाफलभेदप्रत्ययवत्त्वं हि निमित्तमुपादायेदं कुर्विदं मा कार्षीरिति कर्मविधयः प्रवृत्ता। तच्च निमित्तं न शास्त्रकृतं सर्वप्राणिषु दर्शनात्। 'सदेकमेवाद्वितीयं' 'आत्मैवेदं सर्वं' 'ब्रह्मैवेदं सर्वं' इति शास्त्रजन्यः प्रत्ययो विद्यारूप स्वाभाविकं क्रियाकारकफलभेदप्रत्ययं कर्मविधिनिमित्तमनुपमृद्य न जायते, भेदाभेदप्रत्ययययोर्विरोधात्। न हि तैमिरिकद्विचंद्रादिभेदप्रत्ययमनुपमृद्य तिमिरापगमे चंद्रैक्यत्वप्रत्यय उपजायते, विद्याविद्याप्रत्ययययोर्विरोधात्। तत्रैवं सति यं भेदप्रत्ययमुपादाय कर्मविधयः प्रवृत्ता स यस्योपमर्दितः 'सदेकमेवाद्वितीयं' 'तत्सत्यं' 'विकारभेदोऽनृतं' इत्येतद्वाक्यप्रमाणजनितेनैकत्वप्रत्ययेन, स सर्वकर्मभ्यो निवृत्तो निमित्तनिवृत्तेः स च निवृत्तकर्मा ब्रह्मसंस्थ उच्यते, स च परिव्राडेवान्यस्यासंभवात्। अन्यो ह्यनिवृत्तभेदप्रत्ययः सोऽन्यत्पश्यञ्शृण्वन्मन्वानो विजानन्निदं कृत्वेदं प्राप्नुयामिति हि मन्यते। तस्यैवं कुर्वतो न ब्रह्मसंस्थता। वाचारंभणमात्रविकारानृताभिसंधिप्रत्ययवत्त्वात्। न चासत्यमित्युपमर्दिते भेदप्रत्यये सत्यमिदमनेन कर्तव्यं मयेति प्रमाणप्रमेयबुद्धिरुपपद्यते, आकाश इव तलमलबुद्धिर्विवेकिनः। उपमर्दितेऽपि भेदप्रत्यये कर्मभ्यो न निवर्तते चेत्प्रागिव भेदप्रत्ययानुपमर्दनादेकत्वप्रत्ययविधायकं वाक्यमप्रमाणकृतं स्यात्। अभक्ष्यभक्षणादिप्रति-

षेधवाक्यानां प्रामाण्यवद्युक्तं एकत्ववाक्यस्यापि प्रामाण्यं, सर्वोपनिषदां तत्परत्वात् । कर्मविधीनामप्रामाण्यप्रसंग इति चेत् । न । अनुपमर्दितभेदप्रत्ययवत्पुरुषविषये प्रामाण्योपपत्ते स्वप्नादिप्रत्यय इव प्राक्प्रबोधात् । विवेकिनामकरणात्कर्मविधिप्रामाण्योच्छेद इति चेन्न । काम्यविध्यनुच्छेददर्शनात् । न हि कामात्मता न प्रशस्ता इत्येवंविज्ञानवद्भि काम्यानि कर्माणि नानुष्ठीयन्त इति काम्यकर्मविधय उच्छिद्यन्ते, अनुष्ठीयन्त एव कामिभिरिति । तथा ब्रह्मसंस्थः ब्रह्मविद्भिर्नानुष्ठीयन्ते कर्माणीति न तद्विधय उच्छिद्यन्ते, अब्रह्मविद्भिरनुष्ठीयन्त एवेति । परिव्राजकानां भिक्षाचरणादिवदुत्पन्नैकत्वप्रत्ययानामपि गृहस्थादीनामग्निहोत्रादिकर्मानिवृत्तिरिति चेन्न । प्रामाण्यचिंतायां पुरुषप्रवृत्तेरदृष्टान्तत्वात् । न हि नाभिचरेदिति प्रतिषिद्धमप्यभिचरणं कश्चित्कुर्वन्दृष्ट इति, शत्रौ द्वेषरहितेनापि विवेकिनाभिचरणं क्रियते । न च कर्मविधिप्रवृत्तिनिमित्ते भेदप्रत्यये बाधितेऽग्निहोत्रादौ प्रवर्तके निमित्तमस्ति, परिव्राजकस्येव भिक्षाचरणादौ बुभुक्षादि प्रवर्तकम् । इहाप्यकरणे प्रत्यवायभयं प्रवर्तकमिति चेत् न । भेदप्रत्ययवतोऽधिकृतत्वात् । भेदप्रत्ययवानुपमर्दितभेदबुद्धिर्विद्यया यः, स कर्मण्यधिकृत इत्यवोचाम । यो ह्यधिकृतः कर्मणि तस्य तदकरणे प्रत्यवायो, न निवृत्ताधिकारस्य, गृहस्थस्येव ब्रह्मचारिणो विशेषधर्माननुष्ठाने । एवं तर्हि सर्वे स्वाश्रमस्थ उत्पन्नैकत्वप्रत्ययः परिव्राडिति चेत् न । स्वस्वामित्वभेदबुद्ध्यनिवृत्तकर्मार्थत्वाच्चेतराश्रमाणां, "अथ कर्म कुर्वाय" इति श्रुतेः । तस्मात् स्वस्वामित्वाभावाद्भिक्षुरेक एव परिव्राट न गृहस्थादि । एकत्वप्रत्ययविधिर्जानतेन प्रत्ययेन विधिनिमित्तभेदप्रत्ययस्योपमर्दितत्वाद्यमनियमाद्यनुपपत्ति परिव्राजकस्येति चेत् न । बुभुक्षादिनैकत्वप्रत्ययात्प्रच्यावितस्योपपत्तेर्निवृत्त्यर्थत्वात् । न च प्रतिषिद्धसेवाप्राप्तिः । एकत्वप्रत्ययोत्पत्ते प्रागेव प्रतिषिद्धत्वात् । न हि रात्रौ कूपे कंटके वा पतित उदितेऽपि सवितारं पतति तास्मिन्नेव । तस्मात्सिद्धं निवृत्तकर्मा भिक्षुक एव ब्रह्मसंस्थ इति ॥

यत्पुनरुक्तं सर्वेषां ज्ञानवर्जितानां पुण्यलोकेति । सत्यमेतत् । यच्चोक्तं तपःशब्देन परिव्राडप्युक्त इति । एतदसत् । कस्मात् ? परिव्राजकस्यैव निवृत्तभेदप्रत्ययस्य ब्रह्मसंस्थतासंभवात् । स एव ह्यवशेषित इत्यवोचाम । एकत्वविज्ञानवतोऽग्निहोत्रादिवत्तपोनिवृत्तेश्च । भेदबुद्धिमत एव हि तपःकर्तव्यता

स्यात । एतेन कर्मच्छेदे ब्रह्मसंस्थतासामर्थ्यम् । अप्रतिषेधश्च प्रत्युक्तः । तथा ज्ञानवानेव निवृत्तकर्मा पारिव्राडिति ज्ञानवैयर्थ्यं प्रत्युक्तम् ॥ यत्पुनरुक्तं यवक्रराहादिशब्दवत्पारिव्राजके न रूढो ब्रह्मसंस्थशब्द इति तत्परिहृतम् । तस्यैव ब्रह्मसंस्थतासंभवान्नान्यस्येति । यत्पुनरुक्तं रूढशब्दा निमित्तं नोपादद्त इति । तन्न । गृहस्थतक्षपारिव्राजकादिशब्ददर्शनात । गृहस्थितिपारिव्राज्यतक्षणादिनिमित्तोपादाना अपि गृहस्थपारिव्राजकावाश्रमविशेषे, विशिष्टजातिमति च तक्षेति, रूढा दृश्यन्ते शब्दा । न यत्र यत्र तानि निमित्तानि तत्र तत्र वर्तन्ते, प्रसिद्धयभावात् । तथेहापि ब्रह्मसंस्थशब्दो निवृत्तसर्वकर्मतत्साधनपरिव्राडेकविषयेऽस्त्याश्रमिणि परमहंसाख्ये वृत्त इह भवितुमर्हति, मुख्यामृतत्वफलश्रवणात् । अतश्चैदमेवैकं वेदोक्तं पारिव्राज्यं, न यज्ञोपवीतत्रिदंडकमंडल्वादिपरिग्रह इति । 'मुंडोऽपरिग्रहोऽसंग' इति च श्रुतिः । 'अत्याश्रमिभ्यः परमं पवित्रं' इत्यादि च श्वेताश्वतरीये । "निस्तुतिर्निर्नमस्कार" इत्यादिस्मृतिभ्यश्च । "तस्मात्कर्म न कुर्वन्ति यतय पारदर्शिनः । तस्मादलिंगो धर्मज्ञोऽव्यक्तालिंग" इत्यादिस्मृतिभ्यश्च ॥

ननु सांख्ये कर्मत्यागोऽभ्युपगम्यते क्रियाकारकफलभेदबुद्धेः सत्यत्वाभ्युपगमात तन्मृषा । यच्च बौद्धैः शून्यताभ्युपगमादकर्तृत्वमभ्युपगम्यते, तदप्यसत् । तदभ्युपगन्तुः सत्त्वाभ्युपगमात । यच्चाञ्जरलसतयाऽकर्तृत्वाभ्युपगमः सोऽप्यसत् कारकबुद्धेरनिवर्तितत्वात्प्रमाणेन । तस्माद्वेदान्तप्रमाणजनितैकत्वप्रत्ययवत एव कर्मनिवृत्तिलक्षणं पारिव्राज्यं ब्रह्मसंस्थत्वं चेति सिद्धम् । एतेन गृहस्थस्यैकत्वविज्ञाने सति पारिव्राज्यमर्थसिद्धम् ॥

ननु अग्न्युत्सादनदोषभाक्त्वात्पारिव्रजन् "वीरहा वा एष देवानां योऽग्निमुद्वासयते" इति श्रुतेः । न । दैवोत्सादितत्वात् उत्सन्न एव हि स एकत्वदर्शने जाते । "अपागादग्नेरग्नित्वं" इति श्रुतेः । अतो न दोषभाग्गृहस्थः परिव्रजन्निति ॥

यत्संस्थोऽमृतत्वमेति तन्निरूपणार्थमाह—

प्रजापतिर्लोकानभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयी विद्या संप्रास्रवत्तामभ्यतपत्तस्या अभितप्ताया एतान्यक्षराणि संप्रास्रवन्त भूर्भुवः स्वरिति ॥२॥

प्रजापतिर्विराट् कश्यपो वा लोकानुद्दिश्य तेषु सारजिघृक्षयाभ्यतपदभितापं कृतवान्ध्यानं तपः कृतवानित्यर्थः । तेभ्योऽभितप्तेभ्यः सारभूता त्रयी विद्या संप्रास्रवत्प्रजापतेर्मनसि प्रत्यभादित्यर्थः । तामभ्यतपत् पूर्ववत् । तस्या अभित-

माया एतान्यक्षराणि संप्रास्यवन्त भूर्भुव स्वरिति व्याहृतय ॥

तान्यभ्यतपत्तेभ्योऽभितप्तेभ्य ओंकार संप्रास्रवत्तद्यथा शंकुना सर्वाणि पर्णानि संतृण्णान्येवमोंकारेण सर्वा वाक्संतृण्णोंकार एवेदं सर्वमोंकार एवेदं सर्वम् ॥ ३ ॥ इति त्रयोविंश खंड. ॥

तान्यक्षराण्यभ्यतपत्तेभ्योऽभितप्तेभ्य ओंकार संप्रास्रवत । तद्ब्रह्म कीदृशं इत्याह— तद्यथा शंकुना पर्णनालेन सर्वाणि पर्णानि पत्रावयवजातानि संतृण्णानि निविद्धानि व्याप्तानीत्यर्थ । एवमोंकारेण ब्रह्मणा परमात्मनः प्रतीकभूतेन सर्वा वाक्शब्दजातं संतृण्णा । 'अकारो वै सर्वा वाक' इत्यादिश्रुते । परमात्मविकारश्च नामधेयमात्रमित्यतः ओंकार एवेदं सर्वमिति । द्विरभ्यास आदरार्थः । लोकादिनिष्पादनकथनमोंकारस्तुत्यर्थमिति ॥ २ २३ —

सामोपासनप्रसंगेन कर्मगुणभूतत्वान्निबद्धोंकारं परमात्मप्रतीकत्वादमृतत्वहेतुत्वेन महीकृत्य प्रकृतस्यैव यज्ञस्यागभूतानि सामहोममंत्रोत्थानान्युपदिदिक्षन्नाह—

ब्रह्मवादिनो वदन्ति यद्वसूनां प्रात सवनं रुद्राणा माध्यंदिनं सवनमादित्यानां च विश्वेषां च देवानां तृतीयसवनम् ॥ १ ॥

ब्रह्मवादिनो वदन्ति— यत्प्रातःसवनं प्रसिद्धं तद्वसूनाम् । तैश्च प्रात सवनसंबद्धोऽयं लोको वशीकृत प्रातःसवनेशानैः । तथा रुद्रैर्माध्यंदिनसवनेशानैरंतरिक्षलोक । आदित्यैश्च विश्वैर्देवैश्च तृतीयसवनेशानैस्तृतीयो लोको वशीकृत. । इति यजमानस्य लोकोऽन्य पारिशेष्टो न विद्यते ॥

क्व तर्हि यजमानस्य लोक इति स यस्तं न विद्यात्कथं कुर्यादथ विद्वान्कुर्यात् ॥२॥

अत. क्व तर्हि यजमानस्य लोको यदर्थं यजेत । न क्वचिल्लोकोऽस्तीत्यभिप्रायः । "लोकाय वै यजते यो यजते" इति श्रुते. । लोकाभावे च स यो यजमानस्तं लोकस्वीकरणोपायं सामहोममंत्रोत्थानलक्षणं न विद्यान्न विजानीयात् सोऽज्ञ. कथं कुर्याद्यज्ञं न कथंचन तस्य कर्तृत्वमुपपद्यत इत्यर्थ. । सामादिविज्ञानस्तुतिपरत्वान्नाविदुषः कर्तृत्वं कर्ममात्रविद प्रतिषिध्यते । स्तुतये च सामादिविज्ञानस्याविद्वत्कर्तृत्वप्रतिषेधाय चेति हि भिद्येत वाक्यम् । आद्ये चोपस्त्ये काडेऽविदुषोऽपि कर्मास्तीति हेतुमवोचाम । अथैतद्वक्ष्यमाणं सामाद्युपायं विद्वान्कुर्यात् ॥

पुरा प्रातरनुवाकस्योपाकरणाज्जघनेन गार्हपत्यस्योदङ्मुख उपविश्य स वासवं सामाभिगायति ॥३॥

किं तद्वेद्यमित्याह—पुरा पूर्वं प्रातरनुवाकस्य शस्त्रस्य प्रारंभाज्जघनेन गार्हपत्यस्य पश्चादुदङ्मुखः सन्नुपविश्य स वासवं वसुदैवत्यं सामाभिगायति ॥

लो३कद्वारमपावा३र्णू३३ पश्येम त्वा वयं रा३३३३३हु३म् आ३३ ज्या३यो३आ३२१११ इति ॥४॥

लोकद्वारमस्य पृथिवीलोकस्य प्राप्तये द्वारमपावृणु हेऽग्ने तेन द्वारेण पश्येम त्वा त्वां राज्यायेति ॥

अथ जुहोति नमोऽग्नये पृथिवीक्षिते लोकक्षिते लोकं मे यजमानाय विंदैष वै यजमानस्य लोक एतास्मि ॥५॥

अथानंतरं जुहोत्यनेन मंत्रेण—नमोऽग्नये ब्रह्मीभूतास्तुभ्यं वयं पृथिवीक्षिते पृथिवीनिवासाय लोकक्षिते लोकनिवासाय पृथिवीलोकनिवासायेत्यर्थः । लोकं मे मह्यं यजमानाय विद लभस्व । एष वै मम यजमानस्य लोक एतां गन्तास्मि ॥

अत्र यजमान परस्तादायुष स्वाहापजहि परिघमित्युक्त्वोत्तिष्ठति तस्मै वसवः प्रातःसवनं संप्रयच्छन्ति ॥६॥

अत्रास्मिंल्लोके यजमानोऽहमायुष परस्तादूर्ध्वं सूत सन्नित्यर्थः । स्वाहेति जुहोति । अपजह्यपनय परिघं लोकद्वारार्गलं इत्येवं मंत्रमुक्त्वोत्तिष्ठति । एवमेतैः वसुभ्यः प्रातःसवनसंबद्धो लोको निष्क्रांतः स्यात । ततस्ते प्रातःसवनं वसवो यजमानाय संप्रयच्छन्ति ॥

पुरा माध्यंदिनस्य सवनस्योपाकरणाज्जघनेनाग्नीध्रीयस्योदङ्मुख उपविश्य स रौद्रं सामाभिगायति ॥७॥ लो३कद्वारमपावा३र्णू३३ पश्येम त्वा वयं वैरा३३३३३हु३म् आ३३ज्या३यो३आ३२१११ इति ॥८॥

तथा आग्नीध्रीयस्य दक्षिणाग्नेर्जघनेनोदङ्मुख उपविश्य स रौद्रं सामाभिगायति यजमानो रुद्रदैवत्यं वैराज्याय ॥

अथ जुहोति नमो वायवेऽन्तरिक्षक्षिते लोकक्षिते लोकं मे यजमानाय विंदैष वै यजमानस्य लोक एताऽस्मि ॥९॥ अत्र यजमान परस्तादायुष स्वाहापजहि परिघमित्युक्त्वोत्तिष्ठति तस्मै रुद्रा माध्यंदिनं सवनं संप्रयच्छन्ति ॥१०॥

अंतरिक्षक्षित इत्यादि समानम् ॥

पुरा तृतीयसवनस्योपाकरणाज्जघनेनाहवनीयस्योदङ्मुख उपविश्य स आदित्यं स वैश्वदेवं सामाभिगायति ॥११॥ लो३कद्वारमपावा३र्णू३३ पश्येम त्वा वयं स्वारा३३३३३हु३म् आ३३ज्या३यो३ आ३२१११ इति ॥१२॥ आदित्यमथ वैश्वदेवं लो३कद्वारमपावा३र्णू३३ पश्येम त्वा वयं साम्रा३३३३३हु३म् आज्या३आ३यो३२१११ इति ॥१३॥

तथा आहवनीयस्योदङ्मुख उपविश्य स आदित्यदैवत्यमादित्यं वैश्वदेवं च सामाभिगायति क्रमेण स्वाराज्याय साम्राज्याय ॥

अथ जुहोति नम आदित्येभ्यश्च विश्वेभ्यश्च देवेभ्यो दिविक्षिद्भ्यो लोकक्षिद्भ्यो लोकं मे यजमानाय विंदत ॥१४॥ एष वै यजमानस्य लोक एतास्मिन्यत्र यजमान. परस्तादायुष स्वाहापहत परिघमित्युक्त्वोत्तिष्ठति ॥१५॥

दिविक्षिद्भ्य इत्येवमादि समानमन्यत् । विदतापहतेति बहुवचनमात्रं विशेष । याजमानं त्वेतत् । एतास्मिन्यत्र यजमान इत्यादिलिंगात् ॥

तस्मा आदित्याश्च विश्वे च देवास्तृतीयसवनं संप्रयच्छन्त्येष ह वै यज्ञस्य मात्रां वेद य एवं वेद य एवं वेद ॥१६॥ इति चतुर्विंश. खंड· ॥

एष ह वै यजमान एवंवित् यथोक्तस्य सामादेर्विद्वान्यज्ञस्य मात्रा यज्ञयाथात्म्यं वेद यथोक्तम् । य एवं वेद य एव वेदेति द्विरुक्तिरध्यायपारसमाप्त्यर्था ॥ इति द्वितीयोऽध्यायः ॥ २.२४.—

॥ तृतीयोऽध्यायः ॥

'असौ वा आदित्य.' इत्याद्यध्यायारंभे संबंध· । अतीतानंतराध्यायान्त उक्तं 'यज्ञस्य मात्रां वेद' इति । यज्ञविषयाणि च सामहोममंत्रोत्थानानि विशिष्टफलप्राप्तये यज्ञांगभूतान्युपदिष्टानि । सर्वयज्ञानां च कार्यनिर्वृत्तिरूपः सविता महत्या श्रिया दीप्यते । स एष सर्वप्राणिकर्मफलभूतः प्रत्यक्षं सर्वैरुपजीव्यते । अतो यज्ञव्यपदेशानंतरं तत्कार्यभूतसवितृविषयमुपासनं सर्वपुरुषार्थेभ्यः श्रेष्ठतमफल विधास्यामीत्येवमारभते श्रुति —

ॐ असौ वा आदित्यो देवमधु तस्य द्यौरेव तिरश्चीनवंशोऽन्तरिक्षमपूपो मरीचयः पुत्राः ॥१॥

असौ वा आदित्यो देवमधित्यादि । देवानां मोदनान्मधिव मध्वसावादित्य । वस्वादीनां च मोदनहेतुत्वं वक्ष्यति सर्वयज्ञफलरूपत्वादादित्यस्य । कथं मधुत्वमित्याह– तस्य मधुनो द्यौरेव भ्रामरस्येव मधुनस्तिरश्चीनवंश. तिरश्चीनश्चासौ वंशश्चेति तिरश्चीनवंश. । तिर्यग्गतेव हि द्यौर्लक्ष्यते । अंतरिक्षं च मध्वपूपो युवंशे लग्न सन् लंबत इवातो मध्वपूपसामान्यादंतरिक्षं मध्वपूपो, मधुन· सवितुराश्रयत्वाच्च । मरीचयो रश्मयो रश्मिभ्या आपो भौमा सवित्राकृष्टा· । 'एता वा आप स्वराजो यन्मरीचय' इति हि विज्ञायन्ते । ता अंतरिक्षमध्वपूपस्थरश्मयंतर्गतत्वात् भ्रमरबीजभूता· पुत्रा इव हिता लक्ष्यन्त इति पुत्रा इव पुत्रा, मध्वपूपनाड्यंतर्गता हि भ्रमरपुत्राः ॥

तस्य ये प्रांचो रश्मयस्ता एवास्य प्राच्यो मधुनाड्य. । ऋच एव मधुकृत ऋग्वेद एव पुष्पं ता अमृता आपस्ता वा एता ऋचः ॥२॥

तस्य सवितुर्मध्वाश्रयस्य मधुनो ये प्राच प्राच्यां दिशि गता रश्मयस्ता एवास्य प्राच्य प्रागंचनान्मधुनो नाड्यो मधुनाड्य इव मध्वाधारच्छिद्राण्यर्थ । तत्र ऋच एव मधुकृतो लोहितरूपं सवित्राश्रयं मधु कुर्वन्तीति मधुकृतो भ्रमरा इव, यतो रसानादाय मधु कुर्वन्ति, तत्पुष्पमिव पुष्पमृग्वेद एव । तत्र ऋग्ब्राह्मणसमुदायस्यर्ग्वेदाख्यत्वाच्छब्दमात्राच्च भोग्यरूपरसनिस्रावासंभवादृग्वेदशब्देनात्र ऋग्वेदविहितं कर्म । ततो हि कर्मफलभूतमधुरसनिस्रावसंभवात । मधुकृद्भिरिव पुष्पस्थार्नायादृग्वेदविहितात्कर्मणोऽप आदाय ऋग्भिर्मधु निर्वर्त्यते । कास्ता आप इत्याह— ता कर्मणि प्रयुक्ता सोमाज्यपयोरूपा अग्नौ प्राक्षिप्तास्तत्पाकाभिनिर्वृत्ता अमृता अमृतार्थत्वादत्यंतरसवत्य आपो भवन्ति । तद्रसानादाय ता वा एता ऋच· पुष्पेभ्यो रसमाददाना इव भ्रमरा ऋचः ॥

एतमृग्वेदमभ्यतपंस्तस्याभितप्तस्य यशस्तेज इंद्रियं वीर्यमन्नाद्यं रसोऽजायत ॥३॥

एतमृग्वेदमृग्वेदविहितं कर्म पुष्पस्थार्नायं अभ्यतपन्नभितापं कृतवत्ता इवैता ऋचः कर्माणि प्रयुक्ताः । ऋग्भिर्हि मंत्रै· शस्त्राद्यंगभावमुपगतैः क्रियमाणं कर्म मधुनिर्वर्तकं रसं मुंचतीत्युपपद्यते, पुष्पाणीव भ्रमरैराचूष्यमाणानि । तदेत-

दाह— तस्यर्चेदस्याभितप्तस्य । कोऽसौ रसो य ऋङ्मधुकराभितापनिःसृत इत्युच्यते । यशो विश्रुतत्वं तेजो देहगता दीप्तिरिंद्रियं सामर्थ्येपैतैरिंद्रियैरर्चकल्यं वीर्यं सामर्थ्यं बलमित्यर्थः । अन्नाद्यमन्नं च तदाद्यं च येनोपयुज्यमानेनाहन्यहनि देवानां स्थिति स्यात्तदन्नाद्यमेष रसोऽजायत यागादिलक्षणात्कर्मणः ॥

तद्व्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य रोहितं रूपम् ॥४॥ इति प्रथमः खंडः ॥१॥

यशआद्यन्नाद्यपर्यंतं तद्यक्षरद्विशेषणाक्षरदगमत् । गत्वा च तदादित्यमभित पार्श्वत. पूर्वभागं सवितुरश्रयदाश्रितवदित्यर्थ । अमुष्मिन्नादित्ये संचितं कर्मफलाख्यं मधु भोक्ष्यामहे इत्येव हि यशआदिलक्षणफलप्राप्तये कर्माणि क्रियन्ते मनुष्यै , केदारनिष्पादनमिव कर्षकै । तत्प्रत्यक्षं प्रदर्श्यते श्रद्धाहेतो । तद्वा एतत् । किं तत् यदेतदादित्यस्योद्यतो दृश्यते रोहितं रूपम् ॥ ३ १ —

अथ येऽस्य दक्षिणा रश्मयस्ता एवास्य दक्षिणा मधुनाड्यो यजूंष्येव मधुकृतो यजुर्वेद एव पुष्पं ता अमृता आप ॥१॥

अथ येऽस्य दक्षिणा रश्मय इत्यादि समानम् । यजूंष्येव मधुकृतो यजुर्वेदविहितं कर्माणि प्रयुक्तानि, पूर्ववन्मधुकृत इव । यजुर्वेदविहितं कर्म पुष्पस्थानीयं पुष्पमित्युच्यते । ता एव सोमाद्या अमृता आप. ॥

तानि वा एतानि यजूंष्येतं यजुर्वेदमभ्यतपंस्तस्याभितप्तस्य यशस्तेज इंद्रियं वीर्यमन्नाद्यं रसोऽजायत ॥२॥ तद्व्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य शुक्लं रूपम् ॥३॥ इति द्वितीय खंडः ॥

तानि वा एतानि यजूंष्येतं यजुर्वेदमभ्यतपन्नित्येवमादि सर्वं समानम् । मध्येतदादित्यस्य दृश्यते शुक्लं रूपम् ॥ ३.२.—

अथ येऽस्य प्रत्यंचो रश्मयस्ता एवास्य प्रतीच्यो मधुनाड्य सामान्यव मधुकृतः सामवेद एव पुष्पं ता अमृता आपः ॥१॥ तानि वा एतानि सामान्येतं सामवेदमभ्यतपंस्तस्याभितप्तस्य यशस्तेज इंद्रियं वीर्यमन्नाद्यं रसोऽजायत ॥२॥ तद्व्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य कृष्णं रूपम् ॥३॥ इति तृतीय खंड. ॥

अथ येऽस्य प्रत्यंचो रश्मय इत्यादि समानम । तथा साम्नां मधु । एतदादित्यस्य कृष्णं रूपम् ॥ इति तृतीयः खंडः ॥ ३ ३.—

अथ येऽस्योदंचो रश्मयस्ता एवास्योदीच्यो मधुनाड्योऽथर्वांगिरस एव मधुकृत इतिहासपुराणं पुष्पं ता अमृता आपः ॥१॥ ते वा एतेऽथर्वांगिरस एतदितिहासपुराणमभ्यतपंस्तस्याभितप्तस्य यशस्तेज इंद्रियं वीर्यमन्नाद्यं रसोऽजायत ॥२॥ तद्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य परं कृष्णं रूपम् ॥३॥ इति चतुर्थः खंडः ॥

अथ येऽस्योदंचो रश्मय इत्यादि समानम् । अथर्वांगिरसोऽथर्वणा अंगिरसा च दृष्टा मंत्रा अथर्वांगिरसः, कर्मणि प्रयुक्ता मधुकृतः । इतिहासपुराणं पुष्पम् । तयोश्चेतिहासपुराणयोरध्यमेधे पारिप्लवासु रात्रिषु कर्मांगत्वेन विनियोगसिद्धः । मध्येतदादित्यस्य परं कृष्णं रूपमतिशयेन कृष्णमित्यर्थः ॥ ३ ४.—

अथ येऽस्योर्ध्वा रश्मयस्ता एवास्योर्ध्वा मधुनाड्यो गुह्या एवादेशा मधुकृतो ब्रह्मैव पुष्पं ता अमृता आपः ॥१॥ ते वा एते गुह्या आदेशा एतद्ब्रह्माभ्यतपंस्तस्याभितप्तस्य यशस्तेज इंद्रियं वीर्यमन्नाद्यं रसोऽजायत ॥२॥ तद्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य मध्ये क्षोभत इव ॥

अथ येऽस्योर्ध्वा रश्मय इत्यादि पूर्ववत् । गुह्या गोप्या रहस्या एव आदेशा लोकद्वारीयादिविधय उपासनानि च कर्मांगविषयाणि मधुकृतो, ब्रह्मैव शब्दाधिकारात्प्रणवाख्यं पुष्पम् । समानमन्यत् । मध्येतदादित्यस्य मध्ये क्षोभत इव समाहितदृष्टेर्दृश्यते संचलतीव ॥

ते वा एते रसानां रसा वेदा हि रसास्तेषामेते रसास्तानि वा एतान्यमृतानाममृतानि वेदा ह्यमृतास्तेषामेतान्यमृतानि ॥४॥ इति पंचमः खंडः ॥

ते वा एते यथोक्ता रोहितादिरूपविशेषा रसानां रसाः । केषां रसानामित्याह— वेदा हि यस्माल्लोकनिष्यंदत्वात्सारा इति रसा , तेषां रसानां कर्मभावमापन्नानामप्येते रोहितादिविशेषा रसा अत्यंतसारभूता इत्यर्थः । तथा अमृतानाममृतानि वेदा ह्यमृताः नित्यत्वात् तेषामेतानि रोहितार्दानि रूपाण्यमृतानि । रसानां रसा इत्यादि कर्मस्तुतिरेषा यस्यैवंविशिष्टान्यमृतानि फलमिति ।

तद्यत्प्रथममृतं तद्वसव उपजीवन्त्यग्निना मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यंति ॥१॥

तत्तत्र यत्प्रथममृतं रोहितरूपलक्षणं तद्वसवः । प्रातःसवनेशाना उपजीवन्त्यग्निना मुखेनाग्निना प्रधानभूतेनाग्निप्रधानाः सन्त उपजीवन्तीत्यर्थः । 'अन्नाद्यं

रसोऽजायत' इतिवचनात्कवलग्राहमश्नन्तीति प्राप्तं तत्प्रतिषिध्यते—न वै देवा अश्नन्ति न पिबन्तीति । कथं तर्हि उपजीवन्तीत्युच्यते— एतदेव हि यथोक्तममृतं रोहितं रूपं दृष्ट्वोपलभ्य सर्वकरणैरनुभूय तृप्यन्ति । दृशेः सर्वकरणद्वारोपलब्ध्यर्थत्वात् । ननु रोहितं रूपं दृष्ट्वेत्युक्तं कथमन्येद्रियविषयत्वं रूपस्येति । न यशआदीनां श्रोत्रादिगम्यत्वात । श्रोत्रग्राह्यं यश. । तेजोरूपं चाक्षुषम । इंद्रियं विषयग्रहणकार्यानुमेयं करणसामर्थ्यम । वीर्यं बलं देहगत उत्साह. प्राणवत्ता । अन्नाद्यं प्रत्यहमुपजीव्यमानं शरीरस्थितिकरं यद्भवति । रसो द्येवमात्मकः सर्व । ये दृष्ट्वा तृप्यन्ति सर्वे । देवा दृष्ट्वा तृप्यन्तीत्येतत्सर्वं स्वकरणैरनुभूय तृप्यन्तीत्यर्थ. । आदित्यसंश्रया· सन्तो वैगुण्यादिदेहकरणदोषरहिताश्च ॥

न एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ॥२॥

किं ते निरुद्यमा अमृतमुपजीवन्ति । न । कथं तर्हि, एतदेव रूपमभिलक्ष्याधुना भोगावसरो नास्माकमिति बुद्ध्या अभिसंविशन्त्युदासते । यदा वै तस्यामृतस्य भोगावसरो भवेत्तदैतस्मादमृतादमृतभोगनिमित्तमित्यर्थ· । एतस्माद्रूपादुद्यन्त्युत्साहवन्तो भवन्तीत्यर्थः । न ह्यनुत्साहवतामनुतिष्ठतामलभमानां भोगप्राप्तिर्लोके दृष्टा ॥

स य एतदेवममृतं वेद वसूनामेवैको भूत्वाग्निनैव मुखेनतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ॥३॥

स य. कश्चिदेतदेवं यथोदितमृज्ञधुकरतापरसमंरक्षणमृग्वेदविहितकर्मपुण्यानस्य चादित्यसंश्रयणं रोहितरूपत्वं चामृतस्य प्राच्यादिदिग्गतरश्मिनाडीसंस्थतां वसुदेवभोग्यतां तद्विदश्च वसुभि. सहैकता गत्वा अग्निना मुखेनोपजीवनं दर्शनमात्रेण तृप्तिं च स्वभोगवासरे उद्यमनं तत्कालापाये च संवेशनं वेद, सोऽपि वसुवत्सर्वं तथैवानुभवति ॥

स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता वसूनामेव तावदाधिपत्यं स्वाराज्यं पर्येता ॥४॥ इति षष्ठः खंडः ॥

कियन्तं कालं विद्वांस्तदमृतमुपजीवतीत्युच्यते— स विद्वान्यावदादित्यः पुरस्तात्प्राच्यां दिश्युदेता पश्चात्प्रतीच्यामस्तमेता, तावद्वसूना भोगकालः, तावन्तमेव कालं वसूनामाधिपत्यं स्वाराज्यं पर्येता परितो गन्ता भवतीत्यर्थः । न यथा चंद्रमंडलस्थः केवलकर्मी परतंत्रो देवानामन्नभूतः । किं तर्हि अयमाधि-

पत्यं स्वाराज्यं स्वराडभावं चाधिगच्छति ॥ ३.६.—

अथ यद्द्वितीयममृतं तद्वसवो उपजीवन्तीदंद्रेण मुखेन न वै वेदा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥१॥ त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ॥२॥ स य एतदेवममृतं वेद वसूनामेवैको भूत्वेंद्रेणैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ॥३॥

अथ यदद्वितीयममृतं तद्वसवो उपजीवन्तीत्यादि समानम् ॥

स यावदादित्य पुरस्तादुदेता पश्चादस्तमेता द्विस्तावद्दक्षिणत उदेतोत्तरतोऽस्तमेता वसूनामेव तावदाधिपत्यं स्वाराज्यं पर्येता ॥४॥

इति सप्तमः खंडः ॥

स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता द्विस्तावत्तता द्विगुणं कालं दक्षिणत उदेतोत्तरतोऽस्तमेता वसूनां तावद्भोगकालः ॥ ३.७.—

अथ यत्तृतीयममृतं तदादित्या उपजीवन्ति वरुणेन मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥१॥ त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ॥२॥ स य एतदेवममृतं वेदादित्यानामेवैको भूत्वा वरुणेनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ॥३॥ स यावदादित्यो दक्षिणत उदेतोत्तरतोऽस्तमेता द्विस्तावत्पश्चादुदेता पुरस्तादस्तमेतादित्यानामेव तावदाधिपत्य स्वाराज्यं पर्येता ॥४॥ इति अष्टमः खंडः ॥

अथ यच्चतुर्थममृतं तन्मरुत उपजीवन्ति सोमेन मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥१॥ त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ॥२॥ स य एतदेवममृतं वेद मरुतामेवैको भूत्वा सोमेनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ॥३॥ स यावदादित्यः पश्चादुदेता पुरस्तादस्तमेता द्विस्तावदुत्तरत उदेता दक्षिणतोऽस्तमेता मरुतामेव तावदाधिपत्यं स्वाराज्यं पर्येता ॥४॥

इति नवमः खंडः ॥

अथ यत्पंचममृतं तत्साध्या उपजीवन्ति ब्रह्मणा मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥१॥ त एतदेव रूपमभिसंवि-

शन्त्येतस्माद्रूपादुद्यन्ति ॥२॥ स य एतदेवममृतं वेद साध्यानामेवैको भूत्वा ब्रह्मणैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ॥३॥ स यावदादित्य उत्तरत उदेता दक्षिणतोऽस्तमेता द्विस्तावदूर्ध्वं उदेताऽर्वागस्तमेता साध्यानामेव तावदाधिपत्यं स्वाराज्यं पर्येता ॥४॥ इति दशम खड ॥

तथा पश्चादुत्तरत ऊर्ध्वमुदेता विपर्ययेणास्तमेता । पूर्वस्मात्पूर्वस्मात् द्विगुणोत्तरोत्तरेण कालेनेत्यपौराणं दर्शनम् । सवितुश्चनुर्दिशमिद्रयमवरुणसोमपुरीषु उदयास्तमयकालस्य तुल्यत्वं हि पौराणिकैरुक्तम् । मानसोत्तरस्य मूर्धनि मेरो प्रदक्षिणावृत्तेस्तुल्यत्वादिति । अत्रोक्त परिहार आचार्यैः । अमरावत्यादीना पुराणा द्विगुणोत्तरोत्तरेण कालेनोद्गम स्यात् । उदयश्च नाम सवितुस्तन्निवासिनां प्राणिना चक्षुर्गोचरापत्तिः तदल्पयश्चास्तमनं, न परमार्थत उदयास्तमने स्त । तन्निवासिना च प्राणिनामभावे तान्प्रति तेनैव मार्गेण गच्छन्नपि नैवोदेता नास्तमेतेति, चक्षुर्गोचरापत्तेस्तदल्पयस्य चाभावात् । तथा अमरावत्या सकाशात् द्विगुणं कालं संयमनी पुरी वसति अतस्तन्निवासिनः प्राणिनः प्रति दक्षिणत इवोदेत्युत्तरतोऽस्तमेतीत्युच्यतेऽस्मद्बुद्धि चापेक्ष्य । तथोत्तरास्वपि पुरीषु योजना । सर्वेषा च मेरुरुत्तरतो भवति । यदाऽमरावत्या मध्याह्नगत सविता तदा संयमन्यामुद्यन्दृश्यते, तत्र मध्याह्नगतो वारुण्यामुद्यन्दृश्यते, तथोत्तरस्या, प्रदक्षिणावृत्तेः तुल्यत्वात् । इलावृतवासिना सर्वत. पर्वतप्राकारनिवारितादित्यरश्मीना सवितोर्ध्व इवोदेताऽर्वागस्तमेता दृश्यते, पर्वतोर्ध्वच्छिद्रप्रवेशात्सवितृप्रकाशस्य । तथर्गाद्यमृतोपजीविनामृतानां च द्विगुणोत्तरोत्तरर्वार्यवत्त्वमनुमीयते भोगकालद्वैगुण्यलिगेन । उद्यमनसंवेशनादि देवानां रुद्रादीना विदुषश्च समानम् ॥ ३.१०.—

अथ तत ऊर्ध्व उदेत्य नैवोदेता नास्तमेतैकल एव मध्ये स्थाता तदेष श्लोक ॥१॥

कृत्स्नवमुदयास्तमनेन प्राणिनां स्वकर्मफलभोगनिमित्तमनुग्रहं, तत्कर्मफलोपभोगक्षये तानि प्राणिजातान्यात्मनि संहृत्याथ ततस्तस्मादनंतरं प्राण्यनुग्रहकालादूर्ध्वः सन्नात्मन्युदेत्योद्गम्य यान्प्रत्युदेति तेषा प्राणिनामभावात्स्वात्मस्थो नैवोदेता नास्तमेतैकलोऽद्वितीयोऽनवयवो मध्ये स्वात्मन्येव स्थाता । तत्र कश्चिद्विद्वान्स्वादिसमानचरणो रोहिताद्यमृतभोगभागी यथोक्तक्रमेण स्वात्मानं सविता-

रमात्मत्वेनोपेत्य समाहित सन्नेतं मंत्रं दृष्ट्वोत्थितोऽन्यस्मै पृष्टवंत जगाद यतस्त्वमागतो ब्रह्मलोकान्कि तत्राप्यहोरात्राभ्यां परिवर्तमान. सविता प्राणिनामायुः क्षपयति यथेहास्माकम। इत्येवं पृष्ट. प्रत्याह तत्तत्र यथा पृष्ट यथोक्ते चार्थ एष श्लोको भवति तेनोक्तो योगिनेति श्रुतेर्वचनमिदम् ॥

न वै तत्र न निम्लोच नोदियाय कदाचन।
देवास्तेनाहं सत्येन मा विराधिषि ब्रह्मणेति ॥२॥

न वै तत्र यतोऽहं ब्रह्मलोकादागतस्मिन्न वै तत्रैतदस्ति यत्पृच्छसि। न हि तत्र निम्लोचास्तमगमत्सविता न चोदियायोद्गतः कुतश्चित्कदाचन कस्मिश्चिदपि काल इति। उदयास्तमयवर्जितो ब्रह्मलोक इत्यनुपपन्नमित्युक्तं शपथमिव प्रतिपेदे। हे देवा साक्षिणो यूयं शृणुत यथा मयोक्तं सत्य वचस्तेन सत्येनाहं ब्रह्मणा ब्रह्मस्वरूपेण मा विराधिषि मा विरुध्येयं अप्राप्तिर्ब्रह्मणो मम मा भूदित्यर्थः ॥

सत्यं तेनोक्तमित्याह श्रुतिः—

न ह वा अस्मा उदेति न निम्लोचति सकृद्दिवा हैवास्मै भवति य एतामेवं ब्रह्मोपनिषदं वेद ॥३॥

न ह वा अस्मै यथोक्तब्रह्मविदे नोदेति न निम्लोचति नास्तमेति, किं तु ब्रह्मविदेऽस्मै सकृद्दिवा हैव सदैवाहर्भवति स्वयंज्योतिष्ट्वात् य एतां यथोक्तां ब्रह्मोपनिषदं वेदगुह्यं वेद। एवं तंत्रेण वंशादित्रयं प्रत्यमृतसंबंधं च यच्चान्यदवोचामेवं जानातीत्यर्थः। विद्वानुदयास्तमयकालापरिच्छेद्यं नित्यमजं ब्रह्म भवतीत्यर्थ.॥

तदेतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्यस्तद्धैतदुद्दालकायारुणये ज्येष्ठाय पुत्राय पिता ब्रह्म प्रोवाच ॥४॥

तद्धैतन्मधुज्ञानं ब्रह्मा हिरण्यगर्भो विराजे प्रजापतय उवाच। सोऽपि मनवे। मनुरिक्ष्वाकाद्याभ्य. प्रजाभ्यः प्रोवाचेति विद्या स्तौति ब्रह्मादिविशिष्टक्रमागतेति। किं च तद्धैतन्मधुज्ञानमुद्दालकायारुणये पिता ब्रह्मविज्ञानं ज्येष्ठाय पुत्राय प्रोवाच ॥

इदं वाव तज्ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात्प्रणाय्याय वान्तेवासिने ॥५॥

इदं वाव तद्यथोक्तमन्योऽपि ज्येष्ठाय पुत्राय सर्वाप्रियार्हाय ब्रह्म प्रब्रूयात्। प्रणाय्याय वा योग्यायान्तेवासिने शिष्याय ॥

नान्यस्मै कस्मैचन यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां दद्यादेतदेव ततो भूय इत्येतदेव ततो भूय इति ॥६॥ इति एकादशः खंडः ॥

नान्यस्मै कस्मैचन प्रब्रूयात्तीर्थदृयमनुज्ञातमनेकेषां प्राप्ताना तीर्थानामाचार्यादीनाम् । कस्मात्पुनस्तीर्थसंकोचनं विद्यायाः कृतमित्याह— यद्यप्यस्मा आचार्यायेमां कश्चित्पृथिवीमद्भिः परिगृहीतां समुद्रपरिवेष्टितां समस्तामपि दद्यादस्या विद्याया निष्क्रयार्थं, आचार्याय धनस्य पूर्णा संपन्ना भोगोपकरणैः, नास्यावस्य निष्क्रयो यस्मात्ततोऽपि दानादेतदेव यन्मधुविद्यादानं भूयो बहुतरफलमित्यर्थः । द्विरभ्यास आदरार्थः ॥ इति एकादश खंडः ॥ ३.११.—

यत एवमतिशयफलैषा ब्रह्मविद्या अतः सा प्रकारान्तरेणापि वक्तव्येति गायत्री वा इत्याद्यारभ्यते । गायत्र्याद्वारेण चोच्यते ब्रह्म सर्वविशेषरहितस्य 'नेति नेति' इत्यादिविशेषप्रतिषेधगम्यस्य दुर्बोधत्वात् । सत्स्वनेकेषु च्छंदःसु गायत्र्या एव ब्रह्मज्ञानद्वारतयोपादानं प्राधान्यात् । सोमाहरणादितरच्छंदोक्षराहरणेनेतरच्छंदोव्याप्त्या च सर्वसवनव्यापकत्वाच्च यज्ञे प्राधान्यं गायत्र्याः । गायत्रीसारत्वाच्च ब्राह्मणस्य मातरमिव, हित्वा गुरुतरां गायत्री ततोऽन्यद्गुरुतरं न प्रतिपद्यते यथोक्तं ब्रह्मप्राप्ति, तस्यामत्यंतगौरवस्य प्रसिद्धत्वात् । अतो गायत्रीमुखेनैव ब्रह्मोच्यते—

गायत्री वा इदं सर्वं भूतं यदिदं किंच वाग्वै गायत्री वाग्वा इदं सर्वं भूतं गायति च त्रायते च ॥१॥

गायत्री वा इत्यवधारणार्थो वैशब्दः । इदं सर्वं भूतं प्राणिजातं यत्किंच स्थावरं जंगमं वा तत्सर्वं गायत्र्येव । तस्याश्छंदोमात्राया सर्वभूतत्वमनुपपन्नमिति गायत्रीकारणं वाचं शब्दरूपामापादयति गायत्री वाग्वै गायत्रीति । वाग्वा इदं सर्वं भूतम् । यस्माद्वाक्शब्दरूपा सती सर्वं भूतं गायति शब्दयति, असौ गौरसावश्व इति च, त्रायते च रक्षति, अमुष्मान्मा भैषीः किं ते भयमुत्थितमित्यादिना सर्वतो भयान्निवर्त्यमानो वाचा त्रातः स्यात् । यद्वाग्भूतं गायति च त्रायते च, गायत्र्येव तद्गायति च त्रायते च, वाचोऽनन्यत्वाद्गायत्र्याः । गानात्त्राणाच्च गायत्र्या गायत्रीत्वम् ॥

या वै सा गायत्रीयं वाव सा येयं पृथिव्यस्यां हीदं सर्वं भूतं प्रतिष्ठितमेतामेव नातिशीयते ॥२॥

या वै सर्वलक्षणा सर्वभूतरूपा गायत्री, इयं वाव सा यैयं पृथिवी । कथं पुनरियं पृथिवी गायत्रीति, उच्यते— सर्वभूतसंबंधात् । कथं सर्वभूतसंबंधः, अस्या पृथिव्या हि यस्मात्सर्वं स्थावरं जंगमं च भूतं प्रतिष्ठितमेतामेव पृथिवीं नातिशीयते नातिवर्तत इत्येतत् । यथा गानत्राणाभ्यां भूतसंबंधो गायत्र्या, एवं भूतप्रतिष्ठानाद्भूतसंबद्धा पृथिवी, अतो गायत्री पृथिवी ॥

या वै सा पृथिवीयं वाव सा यदिदमस्मिन्पुरुषे शरीरमस्मिन्हीमे प्राणाः प्रतिष्ठिता एतदेव नातिशीयन्ते ॥३॥

या वै सा पृथिवी गायत्रीयं वाव सेदमेव । तत्किं? यदिदमस्मिन्पुरुषे कार्यकरणसंघातं जीवति शरीरं, पार्थिवत्वाच्छरीरस्य । कथं शरीरस्य गायत्रीत्वमिति, उच्यते— अस्मिन्हीमे प्राणा भूतशब्दवाच्याः प्रतिष्ठिताः । अतः पृथिवीवद्भूतशब्दवाच्यप्राणप्रतिष्ठानाच्छरीरं गायत्री । एतदेव यस्माच्छरीरं नातिशीयन्ते प्राणाः ॥

यद्वै तत्पुरुषे शरीरमिदं वाव तद्यदिदमस्मिञ्छंत पुरुषे हृदयमस्मिन्हीमे प्राणाः प्रतिष्ठिता एतदेव नातिशीयन्ते ॥४॥

यद्वै तत्पुरुषे शरीरं गायत्र्यादं वाव तत् । यदिदमस्मिञ्छंतर्मध्ये पुरुषे हृदयं पुंडरीकाख्यमेतद्गायत्री । कथमित्याह— अस्मिन्हीमे प्राणाः प्रतिष्ठिता अतः शरीरवद्गायत्री हृदयम् । एतदेव च नातिशीयन्ते प्राणाः । "प्राणो ह पिता प्राणो माता" "अहिंसन्सर्वभूतानि" इति च श्रुतेर्भूतशब्दवाच्याः प्राणाः ॥

सैषा चतुष्पदा षड्विधा गायत्री तदेतदृचाभ्यमनूक्तम् ॥५॥

सैषा चतुष्पदा षडक्षरपदा छंदोरूपा सती भवति गायत्री षड्विधा वाग्भूतपृथिवीशरीरहृदयप्राणरूपा सती षड्विधा भवति । वाक्प्राणयोरन्यार्थनिर्दिष्टयोरपि गायत्रीप्रकारत्वं अन्यथा षड्विधसंख्यापूरणानुपपत्तेः । तदेतस्मिन्नर्थ एतद्गायत्र्याख्यं ब्रह्म गायत्र्यनुगतं गायत्रीमुखेनोक्तमृचापि मंत्रेणाभ्यनूक्तं प्रकाशितम् ॥

तावानस्य महिमा ततो ज्यायांश्च पूरुषः ।
पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीति ॥६॥

तावानस्य गायत्र्याख्यस्य ब्रह्मणः समस्तस्य महिमा विभूतिविस्तारः, यावांश्चतुष्पात्षड्विधश्च ब्रह्मणो विकारः पादो गायत्रीति व्याख्यातः । अतस्त-

स्माद्विकारलक्षणाद्गायत्र्याख्याद्वाचारंभणमात्रात्ततो ज्यायान्महत्तरश्च परमार्थसत्य-रूपोऽविकार· पुरुषः पुरुषः सर्वपूरणात्पुरि शयनाच्च । तस्यास्य पाद सर्वा सर्वाणि भूतानि तेजोबन्नादीनि सस्थावरजंगमानि । त्रिपात्त्रय· पादा अस्य सोऽयं त्रिपात । त्रिपादमृतं पुरुषाख्यं समस्तस्य गायत्र्यात्मनो दिवि द्योतनवति स्वात्मन्यवस्थितमित्यर्थ इति ॥

यद्वै तद्ब्रह्मेतीदं वाव तद्योऽयं बहिर्धा पुरुषादाकाशो यो वै स बहिर्धा पुरुषादाकाश· ॥७॥

यद्वै तत्त्रिपादमृतं गायत्रीमुखेनोक्तं ब्रह्मेतीदं वाव तदिदमेव तत् । यः अयं प्रसिद्धो बहिर्धा बहि· पुरुषादाकाशो भौतिको यो वै, स बहिर्धा पुरुषादाकाश उक्तः ॥

अयं वाव स योऽयमंत पुरुष आकाशो यो वै सोऽन्त पुरुष आकाश· ॥८॥

अयं वाव स योऽयमंत· पुरुषे शरीर आकाश· । यो वै सोऽन्त· पुरुष आकाशः ॥

अयं वाव स योऽयमंतर्हृदय आकाशस्तदेतत्पूर्णमप्रवर्ति पूर्णामप्रवर्तिनीं श्रियं लभते य एवं वेद ॥९॥ इति द्वादश· खंड ॥

अयं वाव स योऽयमंतर्हृदये हृदयपुंडरीक आकाश । कथमेकस्य सत आकाशस्य त्रिधा भेद इति । उच्यते—बाह्येंद्रियविषये जागरितस्थाने नभसि दु खबाहुल्यं दृश्यते । ततोऽन्त·शरीरे स्वप्नस्थानभूते मंदतरं दुःखं भवति । स्वप्नान्पश्यतो हृदयस्थे पुनर्नभसि न कंचन कामं कामयते न कंचन स्वप्नं पश्यति । अत· सर्वदु खनिवृत्तिरूपमाकाशं सुषुप्तस्थानम् । अतो युक्तमेक-स्यापि त्रिधा भेदान्वाख्यानम । बहिर्धा पुरुषादारभ्य आकाशस्य हृदये संकोच-करणं चेत समाधानस्थानस्तुतये । यथा "त्रयाणामपि लोकानां कुरुक्षेत्रं विशि-ष्यते । अर्धतस्तु कुरुक्षेत्रमर्धतस्तु पृथूदकम्" इति तद्वत् । तदेतद्बाह्याकाशाख्यं ब्रह्म पूर्ण सर्वगतं, न हृदयमात्रपरिच्छिन्नमिति मन्तव्यं, यद्यपि हृदयाकाशे चेत· समाधीयते । अप्रवर्ति न कुतश्चित्कचित्प्रवर्तितुं शीलमस्येत्यप्रवर्ति तदनुच्छि-त्तिधर्मकम् । यथान्यानि भूतानि परिच्छिन्नान्युच्छित्तिधर्मकाणि न तथा हार्द नभः । पूर्णामप्रवर्तिनीमनुच्छेदात्मिकां श्रियं विभूति गुणफलं लभते दृष्टम् । य

एवं यथोक्तं पूर्णाप्रवर्तिगुणं ब्रह्म वेद जानातीहैव जीवंस्तद्भावं प्रतिपद्यत इत्यर्थ ।
इति द्वादशः खंडः ॥ ३ १२.—

तस्य ह वा एतस्य हृदयस्य पंच देवसुषयः स योऽस्य प्राङ्सुषिः स प्राणस्तच्चक्षुः स आदित्यस्तदेतत्तेजोऽन्नाद्यमित्युपासीत तेजस्व्यन्नादो भवति य एवं वेद ॥१॥

तस्य ह वा इत्यादिना गायत्र्याख्यस्य ब्रह्मण उपासनांगत्वेन द्वारापालादिगुणावधानार्थमारभ्यते । यथा लोके द्वारपाला राज्ञ उपासनेन वशीकृता राजप्राप्त्यर्था भवन्ति तथेहापीति । तस्येति प्रकृतस्य हृदयस्येत्यर्थ. । एतस्यानंतरनिर्दिष्टस्य पंच पंचसंख्याका देवाना सुषयो देवसुषय· स्वर्गलोकप्राप्तिद्वारच्छिद्राणि, देवैः प्राणादित्यादिभी रक्ष्यमाणानीत्यतो देवसुषय, तस्य स्वर्गलोकभवनस्य हृदयस्यास्य य प्राङ्सुषि पूर्वाभिमुखस्य प्राग्गतं यच्छिद्रं द्वारं प्राणः, तत्स्थस्तेनं द्वारेण य संचरति वायुविशेष स प्रागनितीति प्राण. । तेनैव संबद्धमव्यतिरिक्तं तच्चक्षुस्तथैव स आदित्यः 'आदित्यो ह वै बाह्यप्राण ' इति श्रुतेश्चक्षू·पप्रतिष्ठाक्रमेण हृदि स्थित । 'स आदित्य. कस्मिन्प्रतिष्ठित इति चक्षुषि' इत्यादि हि वाजसनेयके । प्राणवायुदेवतैव चैका चक्षुरादित्यश्च सहाश्रयेण । वक्ष्यति च—प्राणाय स्वाहेति हुतं हवि सर्वमेतत्तर्पयतीति । तदेतत्प्राणाख्यं स्वर्गलोकद्वारपालत्वाद्ब्रह्म । स्वर्गलोकं प्रतिपित्सु· तेजस्त्वेतच्चक्षुरादित्यस्वरूपेण अन्नाद्यत्वाच्च सवितुस्तेजोऽन्नाद्यमित्याभ्यां गुणाभ्यामुपासीत । ततस्तेजस्व्यन्नादश्च आमयाविन्वरहितो भवति, य एवं वेद तस्यैतदुपासनेन वशीकृतो द्वारप स्वर्गलोकप्राप्तिहेतुर्भवतीति मुख्यं च फलम् ॥

अथ योऽस्य दक्षिणः सुषिः स व्यानस्तच्छ्रोत्रं स चंद्रमास्तदेतच्छ्रीश्च यशश्चेत्युपासीत श्रीमान्यशस्वी भवति य एवं वेद ॥२॥

अथ योऽस्य दक्षिणः सुषिस्तत्स्थो वायुविशेष. स वीर्यवत्कर्म कुर्वन्विगृह्य वा प्राणापानौ नाना वा अनितीति व्यान· । तत्संबद्धमेव च तच्छ्रोत्रमिंद्रियं, तथा स चंद्रमाः, 'श्रोत्रेण सृष्टा दिशश्च चंद्रमाश्च' इति श्रुतेः । सहाश्रयो पूर्ववत् । तदेतच्छ्रीश्च विभूतिः श्रोत्रचंद्रमसोर्ज्ञानान्नहेतुत्वं अतस्ताभ्या श्रीत्वम् । ज्ञानान्नवतश्च यशः ख्यातिर्भवतीति यशोहेतुत्वाद्यशस्त्वं अतस्ताभ्यां गुणाभ्यामुपासीतेत्यादि समानम् ॥

अथ योऽस्य प्रत्यङ्सुषि. सोऽपान: सा वाक्सोऽग्निस्तदेतद्ब्रह्मवर्चसमन्नाद्यमित्युपासीत ब्रह्मवर्चस्यन्नादो भवति य एवं वेद ॥३॥

अथ योऽस्य प्रत्यङ्सुषिः पश्चिमस्तत्स्थो वायुविशेष· स मूत्रपुरीषाद्यपनयन्नधोऽनितीत्यपान· । सा तथा वाक तत्संबंधात । तथाऽग्निः। तदेतद्ब्रह्मवर्चसं, वृत्तस्वाध्यायनिमित्तं तेजो ब्रह्मवर्चसम । अग्निसंबंधात् वृत्तस्वाध्यायस्य। अन्नप्रसनहेतुत्वादपानस्यान्नाद्यत्वम । समानमन्यत् ।

अथ योऽस्योदङ्सुषि: स समानस्तन्मन स पर्जन्यस्तदेतत्कीर्तिश्च व्युष्टिश्चेत्युपासीत कीर्तिमान्व्युष्टिमान्भवति य एवं वेद ॥४॥

अथ योऽस्योदङ्सुषिरुदग्गत· सुषिस्तत्स्थो वायुविशेषः सोऽशितपीते समं नयतीति समान· । तत्संबद्धं मनोऽन्त. करणं, स पर्जन्यो वृष्ट्यात्मको देवः पर्जन्यानिमित्ताश्चाप इति । "मनसा सृष्टा आपश्च वरुणश्च" इति श्रुते । तदेतत्कीर्तिश्च मनसो ज्ञानस्य कीर्तिहेतुत्वात । आत्मपरोक्षं विश्रुतत्वं कीर्तिर्यशः । स्वकरणसंवेद्यं विश्रुतत्वं व्युष्टिः कान्तिर्देहगतं लावण्यम । ततश्च कीर्तिसंभवात्कीर्तिश्चेति । समानमन्यत् ॥

अथ योऽस्योर्ध्व· सुषि· स उदान स वायु. स आकाशस्तदेतदोजश्च महश्चेत्युपासीतौजस्वी महस्वान्भवति य एवं वेद ॥५॥

अथ योऽस्योर्ध्वः सुषिः स उदानः आ पादतलादारभ्योर्ध्वमुत्क्रमणादुत्कर्षार्थं च कर्म कुर्वन्ननितीत्युदान. । स वायुस्तदाधारश्चाकाश. । तदेतद्वाय्वाकाशयोरोजोहेतुत्वादोजो बलं महत्वाच्च मह इति । समानमन्यत् ॥

ते वा एते पंच ब्रह्मपुरुषा. स्वर्गस्य लोकस्य द्वारपाः स य एतानेवं पंच ब्रह्मपुरुषान्स्वर्गस्य लोकस्य द्वारपान्वेदास्य कुले वीरो जायते प्रतिपद्यते स्वर्गं लोक य एतानेवं पंच ब्रह्मपुरुषान्स्वर्गस्य लोकस्य द्वारपान्वेद ॥६॥

ते वा एते यथोक्ता. पंचसुषिसंबंधात्पंच ब्रह्मणो हार्दस्य पुरुषा राजपुरुषा इव द्वारस्थाः स्वर्गस्य हार्दस्य लोकस्य द्वारपा द्वारपालाः । एतैर्हि चक्षु.श्रोत्रवाङ्मन.प्राणैर्बहिर्मुखप्रवृत्तैर्ब्रह्मणो हार्दस्य प्राप्तिद्वाराणि निरुद्धानि । प्रत्यक्षं ह्येतदजितकरणतया बाह्यविषयासंगानृतप्ररूढत्वान्न हार्दे ब्रह्मणि मनस्तिष्ठति । तस्मात्सत्यमुक्तमेते पंच ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारपा इति । अतः स य एतानेवं यथोक्तगुणविशिष्टान्स्वर्गस्य लोकस्य द्वारपान्वेद उपास्त उपासनया वशी-

करोति, स राजद्वारपालानिवोपासनेन वशीकृत्य तैरनिवारित. प्रतिपद्यते स्वर्गं लोकं राजानमिव हार्दं ब्रह्म । किंचास्य विदुषः कुले वीरः पुत्रो जायते वीरपुरुषसेवनात् । तस्य च ऋणापाकरणेन ब्रह्मोपासनप्रवृत्तिहेतुत्वम् । ततश्च स्वर्गलोकप्रतिपत्तये पारंपर्येण भवतीति स्वर्गलोकप्रतिपत्तिरेवैकं फलम् ॥

अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वत पृष्ठेषु सर्वत पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नंतः पुरुषे ज्योतिस्तस्यैषा दृष्टिर्यत्रैतदस्मिञ्छरीरे संस्पर्शेनोष्णिमानं विजानाति तस्यैषा श्रुतिर्यत्रैतत्कर्णावपिगृह्य निनदमिव नदथुरिवाग्नेरिव ज्वलत उपश्रृणोति तदेतदृष्टं च श्रुतं चेत्युपासीत चक्षुष्य. श्रुतो भवति य एवं वेद य एवं वेद ॥७॥

अथ यदसौ विद्वान्स्वर्गं लोकं वीरपुरुषसेवनात्प्रतिपद्यते, यच्चोक्तं त्रिपादस्यामृतं दिवीति, तदिदं लिंगेन चक्षुःश्रोत्रेन्द्रियगोचरमापादयितव्यम्, यथाऽन्यादि धूमादिलिंगेन । तथा ह्येवमेवेदमिति यथोक्तेऽर्थे दृढा प्रतीति स्यात्, अनन्यत्वेन च निश्चय इति, अत आह— यदतोऽमुष्मादिवो द्युलोकात्परः, परमिति लिंगव्यत्ययेन, ज्योतिर्दीप्यते । स्वयंप्रभं सदाप्रकाशत्वाद्दीप्यत इव दीप्यत इत्युच्यते अग्न्यादिवज्ज्वलनलक्षणाया दीप्तेरसंभवात् । विश्वत· पृष्ठेष्वित्येतस्य व्याख्यानं सर्वत पृष्ठेष्विति, संसारादुपरीत्यर्थं । संसार एव हि सर्वः, असंसारिण एकत्वान्निर्भेदत्वाच्च । अनुत्तमेषु तत्पुरुषसमासाशंकानिवृत्तय आह उत्तमेषु लोकेष्विति सत्यलोकादिषु हिरण्यगर्भादिकार्यरूपस्य परमेश्वरस्य आसन्नत्वादुच्यत उत्तमेषु लोकेष्विति । इदं वावेदमेव तद्यदिदमस्मिन्पुरुषेऽन्तर्मध्ये ज्योतिश्चक्षु श्रोत्रग्राह्येण लिंगेनोष्णिम्ना शब्देन चावगम्यते । यत्त्वचा स्पर्शरूपेण गृह्यते तच्चक्षुषैव । दृढप्रतीतिकरत्वाच्चवः, अविनाभूतत्वाच्च रूपस्पर्शयोः । कथं पुनस्तस्य ज्योतिषो लिंगं त्वग्दृष्टिगोचरत्वमापद्यत इति आह— यत्र यस्मिन्काले । एतदिति क्रियाविशेषणम् । अस्मिञ्शरीरे हस्तेनालभ्य संस्पर्शेनोष्णिमानं रूपसहभाविनमुष्णस्पर्शभावं विजानाति । स ह्युष्णिमा नामरूपव्याकरणाय देहमनुप्रविष्टस्य चैतन्यात्मज्योतिषो लिंगमव्यभिचारात् । न हि जीवन्तमात्मानमुष्णिमा व्यभिचरति । उष्ण एव जीवित्यञ्शीतो मारिष्यन्निति हि विज्ञायते । मरणकाले च तेजः परस्यां देवतायामिति परेणाविभागत्वोपगमात् । अतोऽसाधारणं लिंगमौष्ण्यमग्नेरिव धूमः । अतस्तस्य परस्यैषा दृष्टिः

साक्षादिव दर्शनं दर्शनोपाय इत्यर्थः । तथा तस्य ज्योतिष एषा श्रुतिः श्रवणं श्रवणोपायोऽप्युच्यमान. । यत्र यदा पुरुषो ज्योतिषो लिंगं शुश्रूषति श्रोतुमिच्छति, तदैतत्कर्णावपिगृह्य, एतच्छब्दः क्रियाविशेषणं, अपिगृह्यापिधायेत्यर्थः, अंगुलिभ्यां प्रोर्णुत्य निनदमिव रथस्येव घोषो निनदस्तमिव शृणोति, नदथुरिव ऋषभकूजितमिव शब्दो यथा चाग्नेर्बहिर्ज्वलत एवं शब्दमंत शरीर उपशृणोति तदेतज्ज्योतिर्दृष्टश्रुतलिंगत्वान दृष्टं च श्रुतं चेत्युपासीत । तथोपासनाच्चक्षुष्यो दर्शनीयः श्रुतो विश्रुतश्च । यत्स्पर्शगुणोपासननिमित्तं फलं तद्रूपं संपादयति चक्षुष्य इति, रूपस्पर्शयोः सहभावित्वात् दृष्टत्वाच्च दर्शनीयताया: । एवं च विद्याया. फलमुपपन्नं स्यान्न तु मृदुत्वादिस्पर्शवत्त्वे । य एवं यथोक्तौ गुणौ वेद । स्वर्गलोकप्रतिपत्तिस्तूक्तमदृष्टं फलम । द्विरभ्यास आदरार्थः ॥ इति त्रयोदश· खंड

पुनस्तस्यैव त्रिपादमृतस्य ब्रह्मणोऽनंतगुणवतोऽनंतशक्तेरनेकभेदोपास्यस्य विशिष्टगुणशक्तिमत्त्वेनोपासनं विधित्सन्नाह—

सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत । अथ खलु क्रतुमय· पुरुषो यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेत· प्रेत्य भवति स क्रतुं कुर्वीत ॥१॥

सर्वं समस्तं, खल्विति वाक्यालंकारार्थो निपातः । इदं जगन्नामरूपविकृतं प्रत्यक्षादिविषयं ब्रह्म कारण, बृहत्तमत्वाद्ब्रह्म । कथं सर्वस्य ब्रह्मत्वमित्यत आह— तज्जलानिति । तस्माद्ब्रह्मणो जातं तेजोबन्नादिक्रमेण सर्वम् । अतस्तज्जम् । तथा तेनैव जननक्रमेण प्रतिलोमतया तस्मिन्नेव ब्रह्मण लीयते तदात्मतया श्लिष्यत इति तल्लम । तथा तस्मिन्नेव स्थितिकालेऽनिति प्राणिति चेष्टत इति । एवं ब्रह्मात्मतया त्रिषु कालेषु अविशिष्टं तद्व्यतिरेकेण अग्रहणात् । अत. तदेव इदं जगत् । यथा चेदं तदेव एकं अद्वितीयं तथा षष्ठे विस्तरेण वक्ष्यामः । यस्माच्च सर्वं इदं ब्रह्म, अत. शान्तो रागद्वेषादिदोषरहितः संयत. सन यत्तत्सर्वं ब्रह्म तत् वक्ष्यमाणैः गुणैः उपासीत । कथमुपासीत ? क्रतुं कुर्वीत क्रतुर्निश्चयोऽध्यवसाय एवमेव नान्यथेत्यविचलः प्रत्ययस्तं क्रतुं कुर्वीतोपासीतेत्यनेन व्यवहितेन संबंधः । किं पुनः क्रतुकरणेन कर्तव्यं प्रयोजनम् ? कथं वा क्रतुः कर्तव्यः ? क्रतुकरणं चाभिप्रेतार्थसिद्धिसाधनं कथम् ? इत्यस्यार्थस्य प्रतिपादनार्थमथेत्यादिग्रंथः । अथ खल्विति हेत्वर्थः ।

यस्मात्क्रतुमयः क्रतुप्रायोऽध्यवसायात्मकः पुरुषो जीवः । यथाक्रतुर्यादृशः क्रतुः अस्य सोऽयं यथाक्रतुर्यथाध्यवसायो यादृङ्निश्चयोऽस्मिल्लोके जीवन्निह पुरुषो भवति तथेतोऽस्माद्देहात्प्रेत्य मृत्वा भवति । कर्त्वनुरूपफलात्मको भवतीत्यर्थः । एवं ह्येतच्छास्त्रते। दृष्टं "यं यं वापि स्मरन्भावं त्यजत्यंते कलेवरम्" इत्यादि । यत एवं व्यवस्था शास्त्रदृष्टा अतः स एवं जानन्कर्तुं कुर्वीत यादृशं कर्तुं वक्ष्यामस्तम् । यत एवं शास्त्रप्रामाण्यादुपपद्यते कर्त्वनुरूपं फलमतः स कर्तव्यः क्रतुः ॥

मनोमय प्राणशरीरो भारूप सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकाम सर्वगंध. सर्वरस. सर्वमिदमभ्यात्तोऽवाक्यनादर. ॥२॥

कथम् । मनोमयो मनःप्राय । मनुतेऽनेनेति मनस्तत्स्ववृत्त्या विषयेषु प्रवृत्तं भवति तेन मनसा तन्मय. । तथा प्रवृत्त इव तत्प्रायो निवृत्त इव च । अत एव प्राणशरीर. प्राणो लिंगात्मा विज्ञानक्रियाशक्तिद्वयसंमूर्च्छित. 'यो वै प्राण सा प्रज्ञा या वा प्रज्ञा स प्राण ' इति श्रुतेः । स शरीरं यस्य स प्राणशरीर 'मनोमय प्राणशरीरनेता' इति च श्रुत्यंतरात । भारूप भा दीप्तिश्चैतन्यलक्षणं रूपं यस्य स भारूपः । सत्यसंकल्प सत्या अवितथा. संकल्पा यस्य सोऽयं सत्यसंकल्प । न यथा संसारिण इवानैकांतिकफल· संकल्प ईश्वरस्येत्यर्थ । संसारिण अनृतेन मिथ्याफलत्वहेतुना प्रत्यूढत्वात्संकल्पस्य मिथ्याफलत्वं वक्ष्यति 'अनृतेन हि प्रत्यूढा' इति । आकाशात्मा आकाश इवात्मा स्वरूपं यस्य स आकाशात्मा । सर्वगतत्वं सूक्ष्मत्वं रूपादिहानत्वं च आकाशतुल्यतेश्वरस्य । सर्वकर्मा सर्वं विश्वं तेनेश्वरेण क्रियते इति जगत्सर्वं कर्मास्य स सर्वकर्मा 'स हि सर्वस्य कर्ता' इति श्रुतेः । सर्वकामः सर्वे कामा दोषरहिता अस्येति सर्वकामः । "धर्माविरुद्धो भूतेषु कामोऽस्मि" इति स्मृतेः । ननु कामोऽस्मीति वचनादिह बहुव्रीहिर्न संभवति सर्वकाम इति । न, कामस्य कर्तव्यत्वाच्छब्दादिवत्पारार्थ्यप्रसंगाच्च देवस्य । तस्माद्यथेह सर्वकाम इति बहुव्रीहिः. तथा कामोऽस्मीतिस्मृत्यर्थो वाच्य । सर्वगंधः सर्वे गंधाः सुखकरा अस्य सोऽयं सर्वगंध. "पुण्यो गंधः पृथिव्याम्" इति स्मृतेः । तथा रसा अपि विज्ञेयाः । अपुण्यगंधरसग्रहणस्य पाप्मसंबंधनिमित्तत्वश्रवणात् 'तस्मात्तनोभयं जिघ्रति सुरभि च दुर्गंधि च । पाप्मना ह्येष विद्धः' इति श्रुतेः । न च पाप्मसंसर्ग ईश्वरस्य । अविद्यादिदोषस्यानुपपत्तेः । सर्वमिदं जगदभ्यात्तोऽभिव्याप्तः । अततेर्व्याप्त्यर्थस्य कर्तरि निष्ठा । तथाऽवाक्यो,

उच्यतेऽनेनेति वाग्वागेव वाक । यद्वा वचेर्घञंतस्य करणे वाक् । स यस्य विद्यते स वाक्की न वाक्यवाक्की । वाक्प्रतिषेधश्चात्रोपलक्षणार्थः । गंधरसादिश्रवणादीश्वरस्य प्राप्तानि घ्राणादीनि करणानि गंधादिग्रहणाय । अतो वाक्प्रतिषेधेन प्रतिषिध्यन्ते तानि । "अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्ण" इत्यादिमंत्रवर्णात । अनादरोऽसंभ्रम । अप्राप्तप्राप्तौ हि संभ्रमः स्यादनाप्तकामस्य । न त्वाप्तकामत्वान्नित्यतृप्तस्येश्वरस्य संभ्रमोऽस्ति क्वचित ॥

एष म आत्माऽन्तर्हृदयेऽणीयान्व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाकतंडुलाद्वैष म आत्माऽन्तर्हृदये ज्यायान्पृथिव्या ज्यायानंतरिक्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्य ॥३॥

एष यथोक्तगुणो मे ममात्मा अंतर्हृदये हृदयपुंडरीकस्यान्तर्मध्येऽणीयान् अणुतरो, व्रीहिर्वा यवाद्वेत्यादयस्तंतमृक्ष्मत्वप्रदर्शनार्थम् । श्यामाकाद्वा श्यामाकतंडुलादिति पारिच्छिन्नपरिमाणादणीयानित्युक्तेऽणुपरिमाणत्वं प्राप्तमाशंक्य अतस्तत्प्रतिषेधायारभते— एष आत्माऽन्तर्हृदये ज्यायान्पृथिव्या इत्यादिना । ज्यायःपरिमाणाच्च ज्यायस्त्वं दर्शयन्ननंतपरिमाणत्वं दर्शयति— मनोमय इत्यादिना ज्यायानेभ्यो लोकेभ्य इत्यंतेन ॥

सर्वकर्मा सर्वकाम सर्वगंध सर्वरस सर्वमिदमभ्यात्तोऽवाक्यनादर एष म आत्माऽन्तर्हृदय एतद्ब्रह्मैतमित प्रेत्याभिसंभवितास्मीति यस्य स्याद्धा न विचिकित्सास्तीति ह स्माह शांडिल्य शांडिल्यः ॥४॥

यथोक्तगुणलक्षण ईश्वरो ध्येयो न तु तद्गुणविशिष्ट एव । यथा राजपुरुषमानय चित्रगुं वेत्युक्ते न विशेषणस्यान्यानयने व्याप्रियते तद्वदिहापि प्राप्तम् । अतस्तन्निवृत्त्यर्थं सर्वकर्मेत्यादि पुनर्वचनम् । तस्मान्मनोमयत्वादिगुणाविशिष्ट एवेश्वरो ध्येयः । अत एव षष्ठसप्तमयोरिव 'तत्त्वमसि' 'आत्मैवेदं सर्वं' इति नेह स्वाराज्येऽभिषिच्यैष म आत्मैतद्ब्रह्मैतमितः प्रेत्याभिसंभवितास्मीति लिंगात् । न त्वात्मशब्देन प्रत्यगात्मैवोच्यते, ममेति षष्ठ्या संबंधार्थप्रत्ययकत्वादेतमभिसंभवितास्मीति च कर्मकर्तृत्वनिर्देशात् । ननु षष्ठेऽप्यथ संपत्स्य इति सत्संपत्तेः कालान्तरितत्वं दर्शयति । न, आरब्धसंस्कारशेषस्थित्यर्थपरत्वात् । न कालान्तरितार्थता । अन्यथा तत्त्वमसीत्येतस्यार्थस्य बाधप्रसंगात् । यद्यप्यात्मशब्दस्य प्रत्यगर्थत्वं सर्वं खल्विदं ब्रह्मेति च प्रकृतमेष म आत्माऽन्तर्हृदय

एतद्ब्रह्मेत्युच्यते, तथाप्यंतर्धानमीषदपरित्यज्यैवैतमात्मानमितोऽस्माच्छरीरात्प्रेत्याभिसंभवितास्मीत्युक्तम् । यथाक्रतुरूपस्यात्मनः प्रतिपत्तास्मीति यस्यैवंविदः स्याद्धवेदद्धा सत्यमेवं स्यामहं प्रेत्यैवं न स्यामिति न च विचिकित्साऽस्तीत्येतस्मिन्नर्थे क्रतुफलसंबंधे स तथैवेश्वरभावं प्रतिपद्यते विद्वानित्येतदाह स्मोक्तवान् किल शांडिल्यो नामर्षिः । द्विरभ्यास आदरार्थः ॥ इति चतुर्दश खंड ॥ —

'अस्य कुले वीरो जायते' इत्युक्तम् । न वीरजन्ममात्रं पितुस्त्राणाय "तस्मात्पुत्रमनुशिष्टं लोक्यमाहुः" इति श्रुत्यंतरात् । अतस्तद्दीर्घायुष्ट्वं कथं स्यादित्येवमर्थं कोशविज्ञानारंभः । अभ्यर्हितविज्ञानव्यायामगादनंतरमेव नोक्तं तदिदानीमेव आरभ्यते—

अंतरिक्षोदरः कोशो भूमिबुध्नो न जीर्यति दिशो ह्यस्य स्वक्तयो द्यौरस्योत्तरं बिलं स एष कोशो वसुधानस्तस्मिन्विश्वमिदं श्रितम् ॥१॥

अंतरिक्षमुदरमंतःसुषिरं यस्य सोऽयमंतरिक्षोदरः, कोशः, कोश इवानेकधर्मसादृश्यात्कोशः, स च भूमिबुध्नो भूमिर्बुध्नो मूलं यस्य स भूमिबुध्नः, न जीर्यति न विनश्यति त्रैलोक्यात्मकत्वात् । सहस्रयुगकालावस्थायी हि सः । दिशो ह्यस्य सर्वाः स्वक्तय कोणाः । द्यौरस्य कोशस्योत्तरमर्ध्वं बिलम् । स एष यथोक्तगुणः कोशो वसुधानो, वसु धीयतेऽस्मिन्प्राणिना कर्मफलाख्यमतो वसुधानः । तस्मिन् अंतर्विश्वं समस्तं प्राणिकर्मफलं सह तन्साधनैरिदं यद्दृश्यते प्रत्यक्षादिप्रमाणैः श्रितमाश्रितं स्थितमित्यर्थः ॥

तस्य प्राची दिग्जुहूर्नाम सहमाना नाम दक्षिणा राज्ञी नाम प्रतीची सुभूता नामोदीची तासां वायुर्वत्सः स य एतमेवं वायुं दिशां वत्सं वेद न पुत्ररोदं रोदिति सोऽहमेतमेवं वायुं दिशां वत्सं वेद मा पुत्ररोदं रुदम् ॥

तस्यास्य प्राची दिक्प्राग्गतो भागो जुहूर्नाम जुह्वत्यस्या दिशि कर्मिणः प्राङ्मुखाः सन्त इति जुहूर्नाम । सहमाना नाम सहन्तेऽस्या पापकर्मफलानि यमपुर्या प्राणिन इति सहमाना नाम दक्षिणा दिक् । तथा राज्ञी नाम प्रतीची पश्चिमा दिग्राज्ञी राज्ञा वरुणेनाधिष्ठिता संध्यारागयोगाद्वा । सुभूता नाम भूतिमद्भिरीश्वरकुबेरादिभिरधिष्ठितत्वात्सुभूता नामोदीची । तासां दिशां वायुर्वत्सो, दिग्जत्वाद्वायोः, पुरोवात इत्यादिदर्शनात् । स यः कश्चित्पुत्रदीर्घजीविताथ्यैवं यथोक्तगुणं वायुं दिशा वत्समममृतं वेद स न पुत्ररोदं पुत्रनिमित्तं रोदनं न

रोदिति पुत्रो न म्रियत इत्यर्थः । यत एवं विशिष्टं कोशदिग्वत्सविषयं विज्ञानमतः सोऽहं पुत्रजीविताथ्यैवमेतं वायुं दिशां वत्सं वेद जाने । अतः पुत्ररोदं मा रुदं पुत्रमरणनिमित्तम् । पुत्ररोदो मम मा भूदित्यर्थः ॥

अरिष्टं कोशं प्रपद्येऽमुनामुनामुना प्राणं प्रपद्येऽमुनामुनामुना भूः प्रपद्येऽमुनामुनामुना भुवः प्रपद्येऽमुनामुनामुना स्वः प्रपद्येऽमुनामुनामुना ॥

अरिष्टमविनाशिनं कोशं यथोक्तं प्रपद्ये प्रपन्नोऽस्मि पुत्रायुष । अमुनाऽमुनाऽमुनेति त्रिर्नाम गृह्णाति पुत्रस्य । तथा प्राणं प्रपद्येऽमुनामुनामुना, भूः प्रपद्येऽमुनामुनामुना, भुवः प्रपद्येऽमुनामुनामुना, स्वः प्रपद्येऽमुनामुनामुना, सर्वत्र प्रपद्य इति त्रिर्नाम गृह्णाति पुनः पुनः ॥

स यदवोचं प्राणं प्रपद्य इति प्राणो वा इदं सर्वं भूतं यदिदं किंच तमेव तत्प्रापयिष्यन् ॥४॥

स यदवोचं प्राणं प्रपद्य इति व्याख्यानार्थमुपन्यासः । प्राणो वा इदं सर्वं भूतं यदिदं जगत् । 'यथा वाऽरा नाभौ' इति वक्ष्यति । अतस्तमेव सर्वं तत्तेन प्राणप्रतिपादनेन प्रापयिष्यन् प्रपन्नोऽभूवम् ॥

अथ यदवोचं भूः प्रपद्य इति पृथिवीं प्रपद्येऽन्तरिक्षं प्रपद्ये दिवं प्रपद्य इत्येव तदवोचम् ॥५॥

तथा भूः प्रपद्य इति त्रीन् लोकान्भूरादीन्प्रपद्य इति तदवोचम् ॥

अथ यदवोचं भुवः प्रपद्य इत्यग्निं प्रपद्ये वायुं प्रपद्य आदित्यं प्रपद्य इत्येव तदवोचम् ॥६॥

अथ यदवोचं भुवः प्रपद्य इत्यग्न्यादीन्प्रपद्य इति तदवोचम् ॥

अथ यदवोचं स्वः प्रपद्य इत्यृग्वेदं प्रपद्ये यजुर्वेदं प्रपद्ये सामवेदं प्रपद्य इत्येव तदवोचं तदवोचम् ॥७॥ इति पंचदशः खंडः ॥

अथ यदवोचं स्वः प्रपद्य इत्यृग्वेदादीन्प्रपद्य इत्येव तदवोचमिति । उपरिष्टान्मंत्राज्जपेत्तत् पूर्वोक्तमजरं कोशं सदिग्वत्सं यथावद्ध्यात्वा दिर्वचनमादरार्थम् ॥ इति पंचदशः खंडः ॥ ३.१५ —

पुत्रायुष उपासनमुक्तं जपश्च । अथेदानीमात्मनो दीर्घजीवनायेदमुपासनं जपं च विदधदाह । जीवन् हि स्वयं पुत्रादिफलेन युज्यते नान्यथा । इत्यत आत्मानं यज्ञं संपादयति पुरुषः—

पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशति वर्षाणि तत्प्रातःसवनं चतुर्विंशत्यक्षरा गायत्री गायत्रं प्रातःसवनं तदस्य वसवोऽन्वायत्ता. प्राणा वाव वसव एते हीदं सर्वं वासयन्ति ॥१॥

पुरुषो जीवनविशिष्ट· कार्यकरणसंघातो यथाप्रसिद्ध एव। वावशब्दोऽवधारणार्थ·। पुरुष एव यज्ञ इत्यर्थः। तथाहि सामान्यैः संपादयति यज्ञत्वम्। कथम्? तस्य पुरुषस्य यानि चतुर्विंशति वर्षाण्यायुषः तत्प्रातःसवनं पुरुषाख्यस्य यज्ञस्य। केन सामान्येनेत्याह— चतुर्विंशत्यक्षरा गायत्री छंदो, गायत्रं गायत्री-छंदस्कं हि विधियज्ञस्य प्रात·सवनम्। अतः प्रात·सवनसंपन्नेन चतुर्विंशति-वर्षायुषा युक्त पुरुष.। अतो विधियज्ञसादृश्याद्यज्ञ·। तथोत्तरयोरप्यायुषो. सवनद्वयसंपत्तिः त्रिष्टुब्जगत्यक्षरसंख्यासामान्यतो वाच्या। किंच तदस्य पुरुष-यज्ञस्य प्रात सवनं विधियज्ञस्येव वसवो देवा अन्वायत्ता अनुगताः। सवनदेव-तात्वेन स्वामिन इत्यर्थः। पुरुषयज्ञेऽपि विधियज्ञ इवाग्न्यादयो वसवो देवा· प्राप्ता इत्यतो विशिनष्टि— प्राणा वाव वसवो वागादयो वायवश्च। एते हि यस्मादिदं पुरुषादिप्राणिजातमेते वासयन्ति। प्राणेषु हि देहे वसत्सु सर्वमिदं वसति नान्यथा। इत्यतो वसनाद्वासनाच्च वसव।

तं चेदेतस्मिन्वयसि किंचिदुपतपेत्स ब्रूयात्प्राणा वसव इदं मे प्रात-सवनं माध्यंदिनं सवनमनुसंतनुतेति माहं प्राणानां वसूनां मध्ये यज्ञो विलोप्सीयेत्युद्वैव तत एत्यगदो ह भवति ॥२॥

तं चेद्यज्ञसंपादिनमेतस्मिन्प्रातःसवनसंपन्ने वयसि किंचिद्व्याध्यादि मरण-शंकाकारणमुपतपेन दुःखमुत्पादयेत्स तदा यज्ञसंपादी पुरुष आत्मानं यज्ञं मन्य-मानो ब्रूयाज्जपेदित्यर्थः इमं मंत्रं— हे प्राणा वसव इद मे प्रात सवनं मम यज्ञस्य वर्तते, तन्माध्यंदिनं सवनमनुसंतनुतेति माध्यंदिनेन सवनेनायुषा सहित-मेकीभूतं संततं कुरुतेत्यर्थः। माहं यज्ञो युष्माकं प्राणाना वसूना प्रातःसवने-शानां मध्ये विलोप्सीय विलुप्येय विच्छिद्येयेत्यर्थः। इतिशब्दो मंत्रपरिसमा-प्त्यर्थ·। स तेन जपेन ध्यानेन च ततस्तस्मादुपतापादुदेत्युद्गच्छति। उद्गम्य विमुक्तः सन्नगदो हानुपतापो भवत्येव ॥

अथ यानि चतुश्चत्वारिंशद्वर्षाणि तन्माध्यंदिनं सवनं चतुश्चत्वारिंश-दक्षरा त्रिष्टुप्त्रैष्टुभं माध्यंदिनं सवनं तदस्य रुद्रा अन्वायत्ता· प्राणा वाव

रुद्रा एते हीदं सर्वं रोदयन्ति ॥३॥

अथ यानि चतुश्चत्वारिंशद्वर्षाणीत्यादि समानम्। रुदन्ति रोदयन्तीति प्राणा रुद्राः। क्रूरा हि ते मर्त्यमेत्य वयस्यतो रुद्राः ॥

तं चेदेतस्मिन्वयसि किंचिदुपतपेत्स ब्रूयात्प्राणा रुद्रा इदं मे माध्यंदिनं सवनं तृतीयसवनमनुसंतनुतेति माहं प्राणानां रुद्राणां मध्ये यज्ञो विलोप्सीयेत्युद्ध्येव तत एत्यगदो ह भवति ॥४॥ अथ यान्यष्टाचत्वारिंशद्वर्षाणि तत्तृतीयसवनमष्टाचत्वारिंशदक्षरा जगती जागतं तृतीयसवनं तदस्यादित्या अन्वायत्ताः प्राणा वावादित्या एते हीदं सर्वमाददते ॥५॥ तं चेदेतस्मिन्वयसि किंचिदुपतपेत्स ब्रूयात्प्राणा आदित्या इदं मे तृतीयसवनमायुरनुसंतनुतेति माहं प्राणानामादित्यानां मध्ये यज्ञो विलोप्सीयेत्युद्ध्येव तत एत्यगदो ह्येव भवति ॥४॥

तथा आदित्याः प्राणाः। ते हीदं शब्दादिजातमाददतेऽत आदित्याः। तृतीयसवनमायुः षोडशोत्तरवर्षशतं समापयतानुसंतनुत यज्ञं समापयतेत्यर्थः। समानमन्यत् ॥

निश्चिता हि विद्या फलायेत्येतदर्शयन्नुदाहरति—

एतद्ध स्म वै तद्विद्वानाह महिदास ऐतरेय स किं म एतदुपतपसि योऽहमनेन न प्रेष्यामीति स ह षोडशं वर्षशतमजीवत्प्र ह षोडशं वर्षशतं जीवति य एवं वेद ॥७॥ इति षोडश खंडः ॥

एतद्यज्ञदर्शनं ह स्म वै किल तद्विद्वानाह महिदासो नामतः, इतरायाः अपत्यमैतरेयः। किं कस्मान्मे मम एतदुपतपनमुपतपसि स त्वं हे रोग, योऽहं यज्ञोऽनेन त्वत्कृतेनोपतापेन न प्रेष्यामि न मरिष्यामि अतो वृथा तव श्रम इत्यर्थः। इति एवमाह स्मेति पूर्वेण संबंधः। स एवंनिश्चय सन्षोडशं वर्षशतमजीवत्। अन्योऽप्येवंनिश्चयः षोडशं वर्षशतं प्रजीवति य एवं यथोक्तं यज्ञसंपादनं वेद जानाति स इत्यर्थः ॥ इति षोडशः खंडः ॥ ३.१६ —

स यदशिशिषति यत्पिपासति यन्न रमते ता अस्य दीक्षाः ॥१॥

स यदशिशिषतीत्यादियज्ञसामान्यनिर्देशः पुरुषस्य पूर्वेणैव संबध्यते। यदशिशिषत्यशितुमिच्छति, तथा पिपासति पातुमिच्छति, यन्न रमत इष्टाद्यप्राप्तिनिमित्तं, यदेवंजातीयकं दुःखमनुभवति, ता अस्य दीक्षाः। दुःखसामा-

न्याद्विधियज्ञस्येव ॥

अथ यदश्नाति यत्पिबति यद्रमते तदुपसदैरेति ॥३॥

अथ यदश्नाति यत्पिबति यद्रमते रति चानुभवतोष्टादिसंयोगात्तदुपसदैः समानतामेति । उपसदां च पयोव्रतत्वनिमित्तं सुखमस्ति । अल्पभोजनीयानि च अहान्यासन्नानीति प्रश्नामः अतोऽशनादानामुपसदा च सामान्यम् ॥

अथ यद्धसति यज्जक्षति यन्मैथुनं चरति स्तुतशस्त्रैरेव तदेति ॥३॥

अथ यद्धसति यज्जक्षति भक्षयति यन्मैथुनं चरति, स्तुतशस्त्रैरेव तत्समानतामेति । शब्दवत्त्वसामान्यात् ॥

अथ यत्तपो दानमार्जवमहिंसा सत्यवचनमिति ता अस्य दक्षिणाः ॥४॥

अथ यत्तपो दानमार्जवमहिंसा सत्यवचनमिति ता अस्य दक्षिणा । धर्मपुष्टिकरत्वसामान्यात् ॥

तस्मादाहु सोष्यत्यसोष्टेति पुनरुत्पादनमेवास्य तन्मरणमेवावभृथ ॥५॥

यस्माच्च यज्ञः पुरुष., तस्मात्तं जनयिष्यति माता यदा तदाहुरन्ये सोष्यतीति तस्य मातरं, यदा च प्रसूता भवति तदाऽसोष्ट पूर्णिकेति । विधियज्ञे इव सोष्यति सोमं देवदत्तोऽसोष्ट सोमं यज्ञदत्त इति, अत शब्दसामान्याद्वा पुरुषो यज्ञः । पुनरुत्पादनमेवास्य तत्पुरुषाख्यस्य यज्ञस्य यत्सोष्यत्यसोष्टेति शब्दसंबंधित्वं विधियज्ञस्येव । किंच तन्मरणमेवास्य पुरुषयज्ञस्यावभृथ समाप्तिसामान्यात् ॥

तद्धैतद्घोर आंगिरस. कृष्णाय देवकीपुत्रायोक्त्वोवाचापिपास एव स बभूव सोऽन्तवेलायामेतत्त्रयं प्रतिपद्येताक्षितमस्यच्युतमसि प्राणसंशितमसीति तत्रैते द्वे ऋचौ भवतः ॥६॥

तद्धैतद्यज्ञदर्शनं घोरो नामत , आंगिरसो गोत्रत , कृष्णाय देवकीपुत्राय शिष्यायोक्त्वोवाच तदेतत्त्रयमित्यादिव्यवहितेन संबंधः । स चैतद्दर्शनं श्रुत्वाऽपिपास एवान्याभ्यो विद्याभ्यो बभूव । इत्थं च विशिष्टेयं विद्या यत्कृष्णस्य देवकीपुत्रस्य अन्यां विद्या प्रति तृष्णिच्छेदकर्त्रीति पुरुषयज्ञविद्या स्तौति । घोर आंगिरसः कृष्णायोक्त्वेमा विद्या किमुवाचेति तदाह— स एवं यथोक्तयज्ञवित् अंतवेलायां मरणकाल एतन्मंत्रत्रयं प्रतिपद्येत जपेदित्यर्थः । किं तत् ? अक्षितं अक्षीणमक्षतं वासीत्येकं यजुः । सामर्थ्यादादित्यस्थं प्राणं चैकीकृत्याह । तथा

तमेवाह अच्युतं स्वरूपादप्रच्युतमसीति द्वितीयं यजु. । प्राणसंशितं प्राणश्च स संशितं सम्यक्तनूकृतं च सूक्ष्मं तत्त्वमसीति तृतीयं यजु' । तत्रैतस्मिन्नर्थे विद्यास्तुतिपरे द्वे ऋचौ मंत्रौ भवतो न जपार्थे । त्रयं प्रतिपद्येतेति त्रित्वसंख्याबाधनात् । पंचसंख्या हि तदा स्यात ॥

आदित्यप्रलस्य रेतस । उद्वयं तमसस्परि ज्योतिः पश्यन्त उत्तरं स्वः पश्यन्त उत्तरं देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तममिति ज्योतिरुत्तममिति ॥७॥ इति सप्तदश खंड ॥

आदिदित्यत्र आकारस्यानुबंधस्तकारोऽनर्थक इच्छब्दश्च । प्रलस्य चिरंतनस्य पुराणस्येत्यर्थ. । रेतस. कारणस्य बीजभूतस्य जगत: । सदाख्यस्य ज्योति प्रकाशं पश्यन्ति । आशब्द उत्सृष्टानुबंधः पश्यन्तीत्यनेन संबध्यते । किं तज्ज्योति पश्यन्ति । वासरमहरहरिव तत्सर्वतो व्याप्तं ब्रह्मणो ज्योति । निवृत्तचक्षुषो ब्रह्मविदो ब्रह्मचर्यादिनिवृत्तिसाधनै शुद्धान्त करणा आ संमततो ज्योति' पश्यन्तीत्यर्थ' । पर: परमिति लिंगव्यत्ययेन, ज्योतिष्परत्वात् । यदिष्यते दीप्यते दिवि द्योतनवति परस्मिन्ब्रह्मणि वर्तमानम् । येन ज्योतिषेद्ध: सविता तपति चंद्रमा भाति विद्युद्विद्योतते ग्रहतारागणा विभासन्ते । किंचान्यो मंत्रदृगाह यथोक्तं ज्योति: पश्यन्— उद्वयं तमसोऽज्ञानलक्षणात्परि परस्तादिति शेष. । तमसो वापनेतृ यज्ज्योतिरुत्तरमादित्यस्थं परिपश्यन्तो वयमुदगन्मेति व्यवहितेन संबध । तज्ज्योति: स्व. स्वमात्मीयमस्मद्धृदि स्थितम् । आदित्यस्थं च तदेकं ज्योति' । यदुत्तरमुत्कृष्टतरमूर्ध्वतरं वा अपरं ज्योतिरपेक्ष्य पश्यन्त उदगन्म वयम । कमुदगन्मेत्याह — देवं द्योतनवन्तं देवत्रा देवेषु सर्वेषु, सूर्य रसानां रश्मीनां प्राणाना च जगत ईरणात्सूर्यस्तमुदगन्म गतवन्तो, ज्योतिरुत्तमं सर्वज्योतिर्भ्य उत्कृष्टतममहो प्राप्ता वयमित्यर्थः । इदं तज्ज्योतिर्यदृग्भ्यां स्तुतं यद्यजुस्त्रयेण प्रकाशितम् । द्विरभ्यासो यज्ञकल्पनापारसमाप्त्यर्थः ॥ ३.१७.—

मनो ब्रह्मेत्युपासीतेत्यध्यात्ममथाधिदैवतमाकाशो ब्रह्मेत्युभयमादिष्टं भवत्यध्यात्मं चाधिदैवतं च ॥१॥

मनोमय ईश्वर उक्त आकाशात्मेति च ब्रह्मणो गुणैकदेशत्वेन । अथेदाना मनआकाशयो: समस्तब्रह्मदृष्टिविधानार्थ आरंभो मनो ब्रह्मेत्यादि । मनो मनुतेऽनेनेत्यंत:करणं तद्ब्रह्म परमित्युपासीतेति एतदात्मविषयं दर्शनमध्यात्मम् ।

अथाधिदैवतं देवताविषयमिदं वक्ष्यामः । आकाशो ब्रह्मेत्युपासीत । एवमुभयमध्यात्ममधिदैवतं चोभयं ब्रह्मदृष्टिविषयमादिष्टमुपदिष्टं भवति । आकाशमनसोः सूक्ष्मत्वात् मनसोपलभ्यत्वाच्च ब्रह्मण । योग्यं मनो ब्रह्मदृष्टेः, आकाशश्च, सर्वगतत्वात्सूक्ष्मत्वादुपाधिर्हीनत्वाच्च ॥

तदेतच्चतुष्पाद्ब्रह्म वाक्पादः प्राण पादश्चक्षुः पादः श्रोत्रं पाद इत्यध्यात्ममथाधिदैवतमग्निः पादो वायुः पाद आदित्य पादो दिशः पाद इत्युभयमेवादिष्टं भवत्यध्यात्मं चैवाधिदैवतं च ॥२॥

तदेतन्मनआख्यं चतुष्पाद्ब्रह्म, चत्वार पादा अस्येति । कथं चतुष्पात्त्वं मनसो ब्रह्मण इत्याह— वाक्प्राणश्चक्षुः श्रोत्रमित्येते पादा इत्यध्यात्मम । अथाधिदैवतमाकाशस्य ब्रह्मणोऽग्निर्वायुरादित्यो दिश इत्येते । एवमुभयमेव चतुष्पाद्ब्रह्म आदिष्टं भवत्यध्यात्मं चैवाधिदैवतं च । तत्र वागेव मनसो ब्रह्मणश्चतुर्थः पादः इतरपादत्रयापेक्षया । वाचा हि पादेनेव गवादि वक्तव्यविषयं प्रति तिष्ठति । अतो मनसः पाद इव वाक् । तथा प्राणो घ्राणः पादः । तेनापि गंधविषयं प्रति च क्रमति । तथा चक्षुः पादः श्रोत्रं पाद इत्येवमध्यात्मं चतुष्पात्त्वं मनसो ब्रह्मण । अथाधिदैवतमग्निर्वाय्वादित्यादिश आकाशस्य ब्रह्मण उदर इव गौ पादा इव लम्बा उपलभ्यन्ते । तेन तस्याकाशस्याग्न्यादयः पादा उच्यन्ते । एवमुभयमध्यात्मं चैवाधिदैवतं च चतुष्पादादिष्टं भवति ॥

वागेव ब्रह्मणश्चतुर्थं पाद सोऽग्निना ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद ॥३॥

तत्र वागेव मनसो ब्रह्मणश्चतुर्थः पादः । सोऽग्निनाधिदैवतेन ज्योतिषा भाति च दीप्यते तपति च संतापं चौष्ण्यं करोति । अथवा तैलघृताद्यग्नियाशनेनेद्धा वाग्भाति च तपति च वदनायोत्साहवती स्यादित्यर्थः । विद्वत्फलं— भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं यथोक्तं वेद ॥

प्राण एव ब्रह्मणश्चतुर्थः पाद स वायुना ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद ॥४॥ चक्षुरेव ब्रह्मणश्चतुर्थः पादः स आदित्येन ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद ॥५॥ श्रोत्रमेव ब्रह्मणश्चतुर्थः पादः स दिग्भिर्ज्योतिषा भाति च तपति च भाति च तपति च

कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद य एवं वेद ॥६॥

तथा प्राण एव ब्रह्मणश्चतुर्थः पादः । स वायुना गंधाय भाति च तपति च । तथा चक्षुरादित्येन रूपग्रहणाय, श्रोत्रं दिग्भिः शब्दग्रहणाय । विद्याफलं समानं सर्वत्र ब्रह्मसंपत्तिरदृष्टं फलं य एवं वेद । द्विरुक्तिर्दर्शनसमाप्त्यर्था ॥ इति अष्टादशः खंडः ॥ ३ १८ —

आदित्यो ब्रह्मणः पाद उक्त इति तस्मिन्सकलब्रह्मदृष्टयर्थमिदमारभ्यते—

आदित्यो ब्रह्मेत्यादेशस्तस्योपव्याख्यानमसदेवेदमग्र आसीत । तत्सदासीत्तत्समभवत्तदांडं निरवर्तत तत्संवत्सरस्य मात्रामशयत तन्निरभिद्यत ते आंडकपाले रजत च सुवर्ण चाभवताम् ॥१॥

आदित्यो ब्रह्मेत्यादेशः उपदेशः, तस्योपव्याख्यानं क्रियते स्तुत्यर्थम् । असदव्याकृतनामरूपमिदं जगदग्रेऽपमग्रे प्रागवस्थायामुत्पत्तेरासीन्न त्वसदेव । 'कथमसत सज्जायेत' इत्यसत्कार्यत्वस्य प्रतिषेधात । नन्विहासदेवेति विधानाद्विकल्पः स्यात । न, क्रियास्विव वस्तुनि विकल्पानुपपत्तेः । कथं तर्हीदमसदेवेति ? ननु अवोचामाव्याकृतनामरूपत्वादसदिवासदिति । नन्वेवशब्दोऽवधारणार्थः । सत्यमेव, न तु सत्त्वाभावमवधारयति । किं तर्हि, व्याकृतनामरूपाभावमवधारयति, नामरूपव्याकृतविषये सच्छब्दप्रयोगो दृष्टः । तच्च नामरूपव्याकरणमादित्यायत्तं प्रायशो जगतः । तदभावे ह्यंधं तम इवेदं न प्रज्ञायेत किंचनेत्यतः तत्स्तुतिपरेयं वाक्ये सदर्पादं प्रागुत्पत्तेर्जगदसदेवेत्यादित्यं स्तौति ब्रह्मदृष्टयर्हत्वाय । आदित्यनिमित्तो हि लोके सदिति व्यवहारः । यथाऽसदेवेदं राज्ञः कुलं सर्वगुणसंपन्नं पूर्णवर्मणि राजन्यसतीति तद्वत् । न च सत्त्वमसत्त्वं वेह जगतः प्रतिपिपादयिषितमादित्यो ब्रह्मेत्यादेशपरत्वात् । उपसंहारिष्यत्यंत आदित्यं ब्रह्मेत्युपास्त इति । तत्सदासीत्तदसच्छब्दवाच्यं प्रागुत्पत्तेः स्तिमितमनिस्पंदमसदिव सत्कार्याभिमुखमीषदुपजातप्रवृत्ति सदासीत् ततो लब्धपरिस्पंदं तत्समभवदल्पतरनामरूपव्याकरणनाकुरीभूतमिव बाजम् । ततोऽपि क्रमेण स्थूलीभवत्तदद्भ्य आडं समवर्तत संवृतम । आंडमिति दैर्घ्यं छांदसम् । तदंडं संवत्सरस्य कालस्य प्रसिद्धस्य मात्रा पारणाममभिन्नस्वरूपमेवाशयत स्थितं बभूव । ततः संवत्सरपरिमाणात्कालादूर्ध्वं निरभिद्यत निर्भिन्नं वयसामिवांडम । तस्य निर्भिन्नस्यांडस्य कपाले द्वे रजतं च सुवर्णं चाभवतां संवृते ॥

तद्यद्रजतं सेयं पृथिवी यत्सुवर्णं सा द्यौर्यज्जरायु ते पर्वता यदुल्बं समेघो नीहारो या धमनयस्ता नद्यो यद्वास्तेयमुदकं स समुद्र. ॥२॥

तत्तयोः कपालयोर्यद्रजतं कपालमासीत्सेयं पृथिवी पृथिव्युपलक्षितमधोऽण्डकपालमित्यर्थ.। यत्सुवर्णं कपालं सा द्यौर्युलोकोपलक्षितमूर्ध्व कपालमित्यर्थ.। यज्जरायु गर्भपरिवेष्टनं स्थूलमंडस्य द्विगकलीभावकाल आसीत्ते पर्वता बभूवु.। यदुल्बं सूक्ष्मं गर्भपरिवेष्टनं तत्सह मेघै समेघो नीहारोऽवश्यायो बभूवेत्यर्थ.। या गर्भस्य जातस्य देहे धमनयः शिरास्ता नद्यो बभूवु.। यत्तस्य वस्तौ भवं वास्तेयमुदकं स समुद्रः ॥

अथ यत्तदजायत सोऽसावादित्यस्तं जायमानं घोषा उलूलवोऽनूदतिष्ठन्सर्वाणि च भूतानि सर्वे च कामास्तस्मात्तस्योदयं प्रति प्रत्यायनं प्रति घोषा उलूलवोऽनूत्तिष्ठन्ति सर्वाणि च भूतानि सर्वे च कामा ॥३॥

अथ यत्तदजायत गर्भरूपं तस्मिन्नंडे सोऽसावादित्यस्तमादित्यं जायमानं घोषा शब्दा उलूलव उरूरवो विस्तीर्णरवा उदतिष्ठन्नुत्थितवन्त ईश्वरस्येवह प्रथमपुत्रजन्मनि सर्वाणि च स्थावरजंगमानि भूतानि सर्वे च तेषा भूताना कामा. काम्यन्त इति विषयाः स्त्रीवस्त्रान्नादय.। यस्मादादित्यजन्मनिमित्ता भूतकामोत्पत्तिः तस्मादद्यत्वेऽपि तस्यादित्यस्योदयं प्रति प्रत्यायनं प्रत्यस्तगमनं च प्रति. अथवा पुन. पुन. प्रत्यागमनं प्रत्यायनं तत्प्रति तन्निमित्तीकृत्येत्यर्थ । सर्वाणि च भूतानि सर्वे च कामा घोषा उलूलवश्चानूत्तिष्ठन्ति । प्रसिद्धं ह्येतदुदयादौ सवितुः ॥

स य एतमेवं विद्वानादित्यं ब्रह्मेत्युपास्तेऽभ्याशो ह यदेन साधवो घोषा आ च गच्छेयुरुप च निमन्त्रेडेरन्निमन्त्रेडेरन् ॥४॥ इति एकोनविंश खंड ॥

स यः कश्चिदेतमेवं यथोक्तमहिमानं विद्वान्सन्नादित्यं ब्रह्मेत्युपास्ते स तद्भावं प्रतिपद्यत इत्यर्थः। किंच दृष्टं फलमभ्यास शीघ्रं तादृशो, यदिति क्रियाविशेषणं, एनमेवंविदं साधव शोभना घोषा.। साधुत्वं घोषादीनां यदुपभोगे पापानुबंधाभावः। आ च गच्छेयुरागच्छेयुश्च उप च निमन्त्रेडेरन्नुपनिमन्त्रेडेरंश्च । न केवलमागमनमात्रं घोषाणामुपसुखयेयुश्चोपसुखं च कुर्युरित्यर्थः। द्विरभ्यासोऽध्यायपरिसमाप्त्यर्थ आदरार्थश्च ॥ इति एकोनविंशः खंड. ॥ इति तृतीयोऽध्यायः ॥

॥ चतुर्थोऽध्यायः ॥

वायुप्राणयोः ब्रह्मण. पादद्दष्टयध्याय पुरस्ताद्वर्णितः । अथेदानीं तयोः साक्षाद्ब्रह्मत्वेनोपास्यत्वायोत्तरमारभ्यते । मुख्यावबोधार्थाख्यायिका, विद्यादानग्रहणविधिप्रदर्शनार्था च । श्रद्धान्नदानानुद्धतत्वादीनां च विद्याप्राप्तिसाधनत्वं प्रदर्शयत आख्यायिकया—

ॐ जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य आस स ह सर्वत आवसथान्मापयांचक्रे सर्वत एव मेऽन्नमत्स्यन्तीति ॥१॥

जानश्रुतिर्जनश्रुतस्यापत्यम् । ह ऐतिह्यार्थः । पुत्रस्य पौत्रः पौत्रायण. स एव श्रद्धादेय., श्रद्धापुरःसरमेव ब्राह्मणादिभ्यो देयमस्येति श्रद्धादेय' । बहुदायी प्रभूतं दातुं शीलमस्येति बहुदायी । बहुपाक्यो बहु पक्तव्यमहन्यहनि गृहे यस्यासौ बहुपाक्य । भोजनार्थिभ्यो बह्वन्नं गृहेऽन्नं पच्यत इत्यर्थ. । एवंगुणसंपन्नोऽसौ जानश्रुतिः पौत्रायणो विशिष्टे देशे काले च कस्मिंश्चिदास बभूव । स ह सर्वत सर्वासु दिक्षु ग्रामेषु नगरेषु चावसथानेत्य वसन्ति येष्वित्यावसथास्तान्मापयाचक्रे कारितवानित्यर्थ. । सर्वत एव मे ममान्नं तेष्वावसथेषु वसन्तोऽत्स्यन्ति भोक्ष्यन्त इत्येवमभिप्राय ॥

अथ ह हंसा निशायामतिपेतुस्तद्वैवं हंसो हंसमभ्युवाद हो होऽयि भल्लाक्ष भल्लाक्ष जानश्रुते पौत्रायणस्य समं दिवा ज्योतिरातत तन्मा प्रसांक्षीस्त्वा मा प्रधाक्षारिति ॥२॥

तत्रैवं सति राजनि तस्मिन्घर्मकाले हर्म्यतलस्थेऽथ ह हंसा निशाया रात्रावतिपेतुः । ऋषयो देवता वा राज्ञोऽन्नदानगुणैस्तोषिताः सन्तो हंसरूपा भूत्वा राज्ञो दर्शनगोचरेऽतिपेतुः पतितवन्तः । ततस्मिन्काले तेषां पततां हंसानामेकः पृष्ठत. पतन्नग्रत पतन्तं हंसमभ्युवाचाभ्युक्तवान् हो होऽयीति भो भो इति संबोध्य भल्लाक्ष भल्लाक्षेत्यादरं दर्शयन्नथो पश्य पश्यार्थयमिति तद्वत् । भल्लाक्षेति मंददृष्टित्वं सूचयन्नाह । अथवा सम्यग्ब्रह्मदर्शनाभिमानवत्त्वात्तस्यासकृदुपालब्धः तेन पीड्यमानोऽमर्षितया तत्सूचयति भल्लाक्षेति । जानश्रुतेः पौत्रायणस्य समं तुल्यं दिवा द्युलोकेन ज्योतिः प्रभास्वरमन्नदानादिजनितप्रभावजमाततं व्याप्तं द्युलोकस्पृगित्यर्थ. । दिवाऽह्ना वा समं ज्योतिरित्येतत् । तन्मा प्रसांक्षीः संजनं सक्तिं तेन ज्योतिषा संबंधं मा कार्षीरित्यर्थ । तत्प्रसंजनेन तज्ज्योतिस्त्वा त्वां

मा प्रधाक्षीर्मा दहत्वित्यर्थः । पुरुषव्यत्ययेन मा प्रधाक्षीदिति ॥

तमु ह परः प्रत्युवाच कंवर एनमेतत्सन्तं सयुग्वानमिव रैक्कमात्थेति यो नु कथं सयुग्वा रैक्क इति ॥३॥

तमेवमुक्तवन्तं पर इतरोऽग्रगामी प्रत्युवाच—अरे निकृष्टोऽयं राजा वराक' तं कमु एनं सन्तं केन माहात्म्येन युक्तं सन्तमिति कुत्सयत्येनमेवं सबहुमानमेतद्वचनमात्थ रैक्कमिव सयुग्वानं, सह युग्वना गंत्र्या वर्तत इति सयुग्वा रैक्कः, तमिवात्थैनम् । अननुरूपमस्मिन्नयुक्तमीदृशं वक्तुं रैक्क इवेत्यभिप्राय. । इतरश्चाह यो नु कथं त्वयोच्यते सयुग्वा रैक्क' । इत्युक्तवन्तं भल्लाक्ष आह शृणु यथा स रैक्क. ॥

यथा कृतायविजितायाधरेया संयन्त्येवमेनं सर्वं तदभिसमैति यत्किंच प्रजा' साधु कुर्वन्ति यस्तद्वेद यत्स वेद स मयैतदुक्त इति ॥४॥

यथा लोके कृताय. कृतो नामायो द्यूतसमये प्रसिद्धश्चतुरंक. स यदा जयति द्यूते प्रवृत्तानां, तस्मै विजिताय तदर्थमितरे त्रिव्येकाका अधरेयास्त्रिताद्वापरकलिनामानः संयन्ति संगच्छन्तेऽन्तर्भवन्ति । चतुरंके कृतायै त्रिव्येकाकाना विद्यमानत्वात्तदन्तर्भवन्तीत्यर्थ. । यथायं दृष्टान्त एवमेनं रैक्कं कृतायस्थानीयं त्रेताद्वयस्थानीयं सर्वं तदभिसमैत्येतदर्भवति रैक्के । किं तत्? यत्किंच लोके सर्वाः प्रजा साधु शोभनं धर्मजातं कुर्वन्ति तत्सर्वं रैक्कस्य धर्मेऽन्तर्भवति । तस्य च फले सर्वप्राणिधर्मफलं अंतर्भवतीत्यर्थः । तथान्योऽपि कश्चिद्यस्तद्वेद वेद । किं तद्वेद्यं स रैक्को वेद । तद्वेद्यमन्योऽपि यो वेद तमपि सर्वप्राणिधर्मजातं तत्फलं च रैक्कमिवाभिसमैतीत्यनुवर्तते । स एवंभूतोऽरैक्कोऽपि मया विद्वानेतदुक्त एवमुक्तो रैक्कवत्स एव कृतायस्थानीयो भवतीत्यभिप्राय. ॥

तदु ह जानश्रुति. पौत्रायण उपशुश्राव स ह संजिहान एव क्षत्तारमुवाचांगारे ह सयुग्वानमिव रैक्कमात्थेति यो नु कथं सयुग्वा रैक्क इति॥५॥ यथा कृतायविजितायाधरेया. संयन्त्येवमेनं सर्वं तदभिसमैति यत्किंच प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेद स मयैतदुक्त इति ॥६॥

तदु ह तदेतदीदृशं हंसवाक्यमात्मनः कुत्सारूपमन्यस्य विदुषो रैक्कोदः प्रशंसारूपमुपशुश्राव श्रुतवान्हर्म्यतलस्थो राजा जानश्रुतिः पौत्रायण' । तच्च हंस वाक्यं स्मरन्नेव पौनःपुन्येन रात्रिशेषमतिवाहयामास । तत. स बंदिभी राजा

स्तुतियुक्ताभिर्वाग्भिः प्रतिबोध्यमान उवाच क्षत्तारं संजिहान एव शयनं निद्रां वा परित्यजन्नेव, हे अंग वत्सारे ह सयुग्वानमिव रैक्कमात्थ किं माम् ? स एव स्तुत्यर्हो नाहमित्यभिप्राय । अथवा सयुग्वानं रैक्कमात्थ गत्वा मम तादृदृक्षाम् । तदा इवशब्दोऽवधारणार्थोऽनर्थको वा वाच्यः । स च क्षत्ता प्रत्युवाच रैक्कानयनकामो राज्ञोऽभिप्रायज्ञो, यो नु कथं सयुग्वा रैक्क इति, राज्ञैवं चोक्त आनेतुं तच्चिह्नं ज्ञातुमिच्छन्यो नु कथं सयुग्वा रैक्क इत्येवोचत । स च भल्लाक्षवचनमेवावोचत तस्य स्मरन् ॥

स ह क्षत्तान्विष्य नाविदमिति प्रत्येयाय तं होवाच यत्रारे ब्राह्मणस्यान्वेषणा तदेनमर्छेति ॥७॥

स ह क्षत्ता नगरं ग्रामं वा गत्वाऽन्विष्य रैक्कं नाविदं न व्यज्ञासिषमिति प्रत्येयाय प्रत्यागतवान् । तं होवाच क्षत्तारमेरे यत्र ब्राह्मणस्य ब्रह्मविद एकान्तेऽरण्ये नदीपुलिनादौ विविक्ते देशेऽन्वेषणाऽनुमार्गणं भवति तत्तत्रैनं रैक्कमर्छ ऋच्छ गच्छ तत्र मार्गणं कुर्वित्यर्थ ॥

सोऽधस्ताच्छकटस्य पामानं कषमाणमुपोपविवेश तं हाभ्युवाद त्वं नु भगवः सयुग्वा रैक्क इत्यहं ह्यरा३ इति ह प्रतिजज्ञे स ह क्षत्ताविदमिति प्रत्येयाय ॥८॥ इति प्रथमः खंडः ॥

इत्युक्त क्षत्ताऽन्विष्य तं विजने देशेऽधस्ताच्छकटस्य गंत्र्याः पामानं खर्जू कषमाणं कंडूयमानं दृष्ट्वा अयं नूनं सयुग्वा रैक्क इत्युप समीप उपाविवेश विनयेनोपविष्टवान् । तं च रैक्कं हाभ्युवादोक्तवान् । त्वमसि हे भगवो भगवन् सयुग्वा रैक्क इति ? एवं पृष्टोऽहमस्मि ह्यरा३ अर इति हानादर एव प्रतिजज्ञेऽभ्युपगतवान । स तं विज्ञायाविदं विज्ञातवानस्मीति प्रत्येयाय प्रत्यागत इत्यर्थः ॥ इति प्रथमः खंडः ॥ ४१—

तदु ह जानश्रुतिः पौत्रायणः षट्शतानि गवां निष्कमश्वतरीरथं तदादाय प्रतिचक्रमे तं हाभ्युवाद ॥१॥

तत्तत्र ऋषेर्गार्हस्थ्यं प्रत्यभिप्रायं बुद्ध्वा धनार्थितां चो ह एव, जानश्रुतिः पौत्रायणः षट्शतानि गवां निष्कं कंठहारमश्वतरीरथमश्वतरीभ्यां युक्तं रथं तदादाय धनं गृहीत्वा प्रतिचक्रमे रैक्कं प्रति गतवान् । तं च गत्वाभ्युवाद हाभ्युक्तवान् ॥

रैक्केमानि षट्शतानि गवामयं निष्कोऽयमश्वतरीरथो नु म एतां भगवो देवतां शाधि यां देवतामुपास्स इति ॥२॥

हे रैक्क गवां षट् शतानीमानि तुभ्यं मया आनीतान्ययं निष्कोऽश्वतरीरथश्चायमेतद्धनमदत्स्व, भगवोऽनुशाधि च मे मामेता यां च देवतां त्वमुपास्से तद्देवतोपदेशेन मामनुशाधीत्यर्थ ॥

तमु ह परः प्रत्युवाचाह हारेत्वा शूद्र तवैव सह गोभिरस्त्विति तदु ह पुनरेव जानश्रुतिः पौत्रायणः सहस्रं गवां निष्कमश्वतरीरथं दुहितरं तदादाय प्रतिचक्रमे ॥३॥

तमेवमुक्तवन्तं राजानं प्रत्युवाच परो रैक्क । अहेत्ययं निपातो विनिग्रहार्थोऽन्यत्रेह त्वनर्थकः । एवशब्दस्य पृथक्प्रयोगात् । हारेत्वा हारेण युक्तेत्वा गंत्रा सेयं हारेत्वा गोभि. सह तवैवास्तु तवैव तिष्ठतु न मम, अपर्याप्तेन कर्मार्थमनेन प्रयोजनमित्यभिप्रायो, हे शूद्रेति । ननु राजासौ श्रुतसंबंधात्स ह क्षत्तारमुवाचेत्युक्तम् । विद्याग्रहणाय च ब्राह्मणसमीपोपगमाच्छूद्रस्य चानधिकारात्कथमिदमननुरूपं रैक्केणोच्यते हे शूद्रेति । तत्राहुराचार्या — हंसवचनश्रवणाच्छुचेनमाविवेश । तेनासौ शुचा श्रुत्वा रैक्कस्य महिमानं वा आद्रवतीति ऋषिरात्मनः परोक्षज्ञतां दर्शयञ्शूद्रेत्याहेति । शूद्रवद्वा धनेनैवैनं विद्याग्रहणायोपजगाम न च शुश्रूषया, न तु जात्यैव शूद्र इति । अपरे पुनराहुरल्पं धनमाहृतमिति रुषैवैनमुक्तवांछूद्रेति । लिंगं च बह्वाहरण उपादानं धनस्येति । तदु ह ऋषेर्मतं ज्ञात्वा पुनरेव जानश्रुति. पौत्रायणो गवां सहस्रमधिकं जायां चर्षेरभिमता दुहितरमात्मनस्तदादाय प्रतिचक्रमे क्रान्तवान ॥

तं हाभ्युवाद रैक्केदं सहस्रं गवामयं निष्कोऽयमश्वतरीरथ इयं जायायं ग्रामो यस्मिन्नास्सेऽन्वेव मा भगवः शाधीति ॥४॥ तस्या ह मुखमुपोद्गृह्यवाचाजहारेमाः शूद्रानेनैव मुखेनालापयिष्यथा इति ते हैते रैक्कपर्णा नाम महावृषेषु यत्रास्मा उवास तस्मै होवाच ॥५॥ इति द्वितीयः खंडः ॥

रैक्केदं गवां सहस्रमयं निष्कोऽयमश्वतरीरथ इयं जाया जायार्थं मम दुहिता आनीतायं च ग्रामो यस्मिन्नास्से तिष्ठसि स च त्वदर्थं मया कल्पितः । तदेतत्सर्वमादायानुशाध्येव मा मां हे भगवः । इत्युक्तस्तस्या जायार्थमानीताया राज्ञो दुहितुर्हैव मुखं द्वारं विद्याया दाने तीर्थमुपोद्गृह्यज्ञानन्नित्यर्थः । "ब्रह्मचारी।

धनदायी मेधावी श्रोत्रियः प्रियः । विद्यया वा विद्यां प्राह तानि तीर्थानि षण्मम ॥" इति विद्याया वचनं विज्ञायते हि । एवं जानन्नुपोद्बृंहनुवाचोक्तवान् । आजहार आहृतवान्भवान्यदिमा गा यच्चान्यद्धनं तत्साध्विति वाक्यशेषः । शूद्रेति पूर्वोक्तानुकृतिमात्रं न तु कारणान्तरापेक्षया पूर्ववत् । अनेनैव मुखेन विद्याग्रहणतीर्थनालापयिष्यथा आलापयसीति मा भाणयसीत्यर्थः । ते हैते ग्रामा रैक्वपर्णा नाम विख्याता महाग्रहेषु देशेषु यत्र येषु ग्रामेषूवासोषितवान् रैक्वस्तानसौ ग्रामानदादस्मै रैक्वाय राजा । तस्मै राज्ञे धनं दत्तवते ह किलोवाच विद्यां स रैक्वः ॥ इति द्वितीयः खंड ॥ ४.२.—

वायुर्वाव संवर्गो यदा वा अग्निरुद्वायति वायुमेवाप्येति यदा सूर्योऽस्तमेति वायुमेवाप्येति यदा चंद्रोऽस्तमेति वायुमेवाप्येति ॥१॥

वायुर्वाव संवर्गो वायुर्वाव्यो, वावेत्यवधारणार्थः । संवर्जनात्संग्रहणात्संग्रसनाद्वा संवर्गः । वक्ष्यमाणा अग्न्याद्या देवता आत्मभावमापादयतीत्यतः संवर्गः संवर्जनाख्यो गुणो ध्येयो वायोः कृतायान्तर्भावदृष्टान्तात् । कथं संवर्गत्वं वायोः इत्याह । यदा यस्मिन्काले वै अग्निरुद्वायत्युद्वासनं प्राप्नोत्युपशाम्यति तदासावग्निर्वायुमेवाप्येति वायुस्वाभाव्यमपिगच्छति । तथा यदा सूर्योऽस्तमेति वायुमेवाप्येति । यदा चंद्रोऽस्तमेति वायुमेवाप्येति । ननु कथं सूर्याचंद्रमसो स्वरूपावस्थितयोर्वायावपिगमनम् ? नैष दोषः । अस्तमनेऽदर्शनप्राप्तेर्वायुनिमित्तत्वात् । वायुना ह्यस्तं नीयते सूर्यः । चलनस्य वायुकार्यत्वात । अथवा प्रलये सूर्याचंद्रमसो स्वरूपभ्रंशे तेजोरूपयोर्वायावेवापिगमनं स्यात् ॥

यदाप उच्छुष्यन्ति वायुमेवापियन्ति वायुर्ह्येवैतान्सर्वान्संवृंक्त इत्यधिदैवतम् ॥२॥

तथा यदाप उच्छुष्यन्त्युच्छोषमाप्नुवन्ति तदा वायुमेवापियन्ति । वायुर्हि यस्मोदेवतानग्न्याद्यान्महाबलान्संवृंक्ते । अतो वायुः संवर्गगुण उपास्य इत्यर्थः । इत्यधिदैवतं देवतासु संवर्गदर्शनमुक्तम् ॥

अथाध्यात्मं प्राणो वाव संवर्गः स यदा स्वपिति प्राणमेव वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मनः प्राणो ह्येवैतान्सर्वान्संवृंक्त इति ॥३॥

अथानंतरमध्यात्ममात्मनि संवर्गदर्शनमिदमुच्यते । प्राणो मुख्यो वाव संवर्गः । स पुरुषो यदा यस्मिन्काले स्वपिति तदा प्राणमेव वागप्येति वायुमि-

वाग्नि. । प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मन प्राणो हि यस्मादेवंतान्वागादीन् सर्वान्संवृंक्त इति ॥

तौ वा एतौ द्वौ संवर्गौ वायुरेव देवेषु प्राणः प्राणेषु ॥४॥

तौ वा एतौ द्वौ संवर्गौ संवर्जनगुणौ वायुरेव देवेषु संवर्ग· प्राणः प्राणेषु वागादिषु मुख्यः ॥

अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं परिविष्यमाणौ ब्रह्मचारी बिभिक्षे तस्मा उ ह न ददतुः ॥५॥

अथैतयो. स्तुत्यर्थमियमाख्यायिकारभ्यते । ह इत्यैतिह्यार्थ शौनकं च शुनकस्यापत्यं शौनकं कापेयं कपिगोत्रमभिप्रतारिणं च नामतः काक्षसेनस्यापत्यं काक्षसेनि भोजनायोपविष्टौ परिविष्यमाणौ सूपकारैर्ब्रह्मचारी ब्रह्मविच्छ्रोडो बिभिक्षे भिक्षितवान । ब्रह्मचारिणो ब्रह्मविन्मानिता बुद्ध्वा तं जिज्ञासमानौ तस्मा उ भिक्षां न ददतुर्न दत्तवन्तौ ह किमयं वक्ष्यतीति ॥

स होवाच महात्मनश्चतुरो देव एकः कः स जगार भुवनस्य गोपाम्नं कापेय नाभिपश्यन्ति मर्त्या अभिप्रतारिन्बहुधा वसन्तं यस्मै वा एतदन्नं तस्मा एतन्न दत्तमिति ॥६॥

स होवाच ब्रह्मचारी महात्मनश्चतुर इति द्वितीयाबहुवचनम । देव एकोऽन्यादीन्वायुर्वागादीन्प्राण । क स प्रजापतिर्जगार ग्रसितवान् । क· स जागरेति प्रश्नमेके । भुवनस्य भवन्त्यस्मिन्भूतानीति भुवनं भूरादि सर्वो लोकस्तस्य गोपा गोपायिता रक्षिता गोप्तेत्यर्थः । तं कं प्रजापतिं हे कापेय नाभिपश्यन्ति न जानन्ति मर्त्या मरणधर्माणोऽविवेकिनो वा हेऽभिप्रतारिन्बहुधा अध्यात्माधिदैवताधिभूतप्रकारैर्वसन्तम । यस्मै वा एतदहन्यहन्यन्नमदनायाहियते संस्क्रियते च तस्मै प्रजापतय एतदन्नं न दत्तमिति ॥

तदु ह शौनकः कापेयः प्रतिमन्वानः प्रत्येयायात्मा देवानां जनिता प्रजानां हिरण्यदंष्ट्रो बभसोऽनसूरिर्महान्तमस्य महिमानमाहुरनद्यमानो यदनन्नमत्तीति वै वयं ब्रह्मचारिन्नेदमुपास्महे दत्तास्मै भिक्षामिति ॥७॥

तदु ह ब्रह्मचारिणो वचनं शौनक कापेयः प्रतिमन्वानो मनसा आलोचयन्ब्रह्मचारिणं प्रत्येयाय आजगाम । गत्वा चाह यं त्वमवोचो नाभिपश्यन्ति मर्त्या इति तं वयं पश्याम । कथम् ? आत्मा सर्वस्य स्थावरजंगमस्य । किंच

देवानामन्यादीनामात्मानं संहृत्य ग्रसित्वा पुनर्जनिता उत्पादयिता वायुरूपेणा-धिदैवतमन्यादीनाम् । अध्यात्मं च प्राणरूपेण वागादीना प्रजानां च जनिता । अथवा आत्मा देवानामग्निवागादीना जनिता प्रजाना स्थावरजंगमानाम् । हिर-ण्यदंष्ट्रोऽमृतदंष्ट्रोऽभग्नदंष्ट्र इति यावत् । वभसो भक्षणशील. । 'अनसूरि सूरि-मेधावी न सूरिरसूरिस्तत्प्रतिषेधोऽनसूरि सूरिरेवेत्यर्थ । महान्तमतिप्रमाणमप्र-मेयमस्य प्रजापतेर्महिमानं विभूतिमाहुर्ब्रह्मविद । यस्मात्त्वयमन्यैरनद्यमानोऽ-भक्ष्यमाणो यदनन्नमग्निवागादिदेवतारूपमत्ति भक्षयतीति । वा इति निरर्थक । वयं हे ब्रह्मचारिन, आ इदमेवं यथोक्तलक्षणं ब्रह्म वयमा उपास्महे । वयमिति व्यवहितेन संबंध । अन्ये न वयमिदमुपास्महे, किं तर्हि, परमेव ब्रह्मोपास्महे इति वर्णयन्ति । दत्तास्मै भिक्षामित्यवोचद्वृत्त्यान ॥

तस्मा उ ह ददुस्ते वा एते पंचान्ये पंचान्ये दश सन्तस्तत्कृतं तस्मा-त्सर्वासु दिक्ष्वन्नमेव दश कृतं सैषा विराडन्नादी तयेदं सर्वं दृष्टं सर्वमस्येदं दृष्टं भवत्यन्नादो भवति य एवं वेद य एवं वेद ॥८॥ इति तृतीयः खंडः ॥

तस्मा उ ह ददुस्ते हि भिक्षाम् । ते वै ये ग्रस्यन्तेऽन्यादयो यश्च तेषा ग्रसिता वायु पंचान्ये वागादिभ्य., तथान्ये तेभ्य. पंचाध्यात्मं वागादय प्राणश्च ते सर्वे दश भवन्ति संख्यया, दश सन्तस्तत्कृतं भवति ते, चतुरंक एकाय एवं चत्वारस्त्र्यंकाय. एवं त्रयोऽपरे द्व्यंकाय एवं द्वावन्यावेकांकाय एवमेकोऽन्य इत्येवं दश सन्तस्तत्कृतं भवति । यत एवं तस्मात्सर्वासु दिक्षु दशस्वप्यन्याद्या वागाद्याश्च दशसंख्यासामान्यादन्नमेव "दशाक्षरा विराट" "विराडन्नं" इति हि श्रुतिः । अतोऽन्नमेव दशसंख्यत्वात् । तत एव दश कृतं कृतेऽन्तर्भावा-च्चतुरंकायत्वेनेत्यवोचाम । सैषा विराट दशसंख्या सत्यन्नं चान्नाद्यन्नादिनी च कृतत्वेन । कृते हि दशसंख्ययातर्भूता अतोऽन्नमन्नादिनी च सा । तथा विद्वान्दश-देवतात्मभूतः सन्विराटत्वेन दशसंख्ययान्नं कृतसंख्ययान्नादी च तयान्नान्नादिन्येदं सर्वं जगद्दशदिक्संख्यं दृष्टं कृतसंख्याभूतयोपलब्धम् । एवंविदोऽस्य सर्वं कृत-संख्याभूतस्य दशदिक्संबद्धं दृष्टमुपलब्धं भवति । किंचान्नादश्च भवति य एवं वेद यथोक्तदर्शी । द्विरभ्यास उपासनसमाप्त्यर्थः ॥ इति तृतीयः खंडः ॥—

सत्यकामो ह जाबालो जबालां मातरमामंत्रयांचक्रे ब्रह्मचर्यं भवति विवत्स्यामि किंगोत्रो न्वहमस्मीति ॥१॥

सर्वं वागाद्यन्नादि चान्नान्नादत्वसंस्तुतं जगदेकीकृत्य षोडशधा प्रविभज्य तस्मिन्ब्रह्मदृष्टिविधानव्येत्यारभ्यते । श्रद्धातपसोर्ब्रह्मोपासनांगत्वप्रदर्शनाय आख्यायिका । सत्यकामो ह नामतो, हशब्द ऐतिह्यार्थो, जबालाया अपत्यं जाबालो जबालां स्वा मातरमामंत्रयाचक्र आमंत्रितवान । ब्रह्मचर्यं स्वाध्यायग्रहणाय हे भवति विवत्स्याम्याचार्यकुले, किंगोत्रोऽहं किमस्य मम गोत्रं सोऽहं किंगोत्रो न्वहमस्मीति ॥

सा हैनमुवाच नाहमेतद्वेद तात यद्गोत्रस्त्वमसि बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे साहमेतन्न वेद यद्गोत्रस्त्वमसि जबाला तु नामाहमस्मि सत्यकामो नाम त्वमसि स सत्यकाम एव जाबालो ब्रुवीथा इति ॥२॥

एवं पृष्टा जबाला सा हैनं पुत्रमुवाच— नाहमेतत्तव गोत्रं वेद हे तात यद्गोत्रस्त्वमसि । कस्मान्न वेत्सीत्युक्ताह— बहु भर्तृगृहे परिचर्याजातमतिथ्यभ्यागतादि चरन्त्यहं परिचारिणी परिचरन्तीति पारचरणशीलैवाहं, परिचरणचिन्तनया गोत्रादिस्मरणं मम मनो नाभूत । यौवने च तत्काले त्वामलभे लब्धवत्यस्मि । तदैव ते पितोपरत । अतोऽनाथाहं, साहमेतन्न वेद यद्गोत्रः त्वमसि । जबाला तु नामाहमस्मि सत्यकामो नाम त्वमसि, स त्वं सत्यकाम एवाहं जाबालोऽस्मीत्याचार्याय ब्रुवीथा । यद्याचार्येण पृष्ट इत्यभिप्रायः ॥

स ह हारिद्रुमतं गौतममेत्योवाच ब्रह्मचर्यं भगवति वत्स्याम्युपेयां भगवन्तमिति ॥३॥ तं होवाच किंगोत्रो नु सोम्यासीति स होवाच नाहमेतद्वेद भो यद्गोत्रोऽहमस्म्यपृच्छं मातरं सा मा प्रत्यब्रवीद्बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे साहमेतन्न वेद यद्गोत्रस्त्वमसि जबाला तु नामाहमस्मि सत्यकामो नाम त्वमसीति सोऽहं सत्यकामो जाबालोऽस्मि भो इति ॥४॥

स ह सत्यकामो हारिद्रुमतं हरिद्रुमतोऽपत्यं हारिद्रुमतं गौतमं गोत्रत एत्य गत्वोवाच— ब्रह्मचर्यं भगवति पूजावति त्वयि वत्स्याम्यत उपेयामुपगच्छेयं शिष्यतया भगवन्तमित्युक्तवन्तं तं होवाच गौतमः । किंगोत्रो नु सोम्यासीति । विज्ञातकुलगोत्रः शिष्य उपनेतव्य. । इति पृष्टः प्रत्याह सत्यकामः । स होवाच नाहमेतद्वेद भो यद्गोत्रोऽहमस्मि । किं त्वपृच्छं पृष्टवानस्मि मातरम् । सा मया

पृष्ठा मा प्रत्यब्रवीन्माता । बह्वहं चरन्तीत्यादि पूर्ववत । तस्या अहं वचः स्मरामि सोऽहं सत्यकामो जाबालोऽस्मि भो इति ॥

तं होवाच नैतदब्राह्मणो विवक्तुमर्हति समिधं सोम्याहरोप त्वा नेष्ये न सत्यादगा इति तमुपनीय कृशानामबलानां चतुःशता गा निराकृत्योवाचेमाः सोम्यानुसंव्रजेति ता अभिप्रस्थापयन्नुवाच नासहस्रेणावर्तेयेति स ह वर्षगणं प्रोवास ता यदा सहस्रं संपेदुः ॥५॥ इति चतुर्थः खंडः॥

तं होवाच गौतमो नैतद्वचोऽब्राह्मणो विशेषेण वक्तुमर्हत्यार्जवार्थसंयुक्तम् । ऋजवो हि ब्राह्मणा नेतरे स्वभावत । यस्मान्न सत्याद्ब्राह्मणजातिधर्मादगा नापेतवानसि, अतो ब्राह्मणं त्वामुपनेष्ये । अत संस्कारार्थ होमाय समिधं सोम्याहरेत्युक्त्वा तमुपनीय कृशानामबलानां गोयूथान्निराकृत्यापकृष्य चतु शताः चत्वारि शतानि गवामुवाच— इमा गा सोम्यानुसंव्रजानुगच्छ । इत्युक्तस्ता अरण्यं प्रत्यभिप्रस्थापयन्नुवाच— नासहस्रेणापूर्णेन सहस्रेण नावर्तेय न प्रत्यागच्छेयम् । स एवमुक्त्वा गा अरण्यं तृणोदकबहुलं द्वंद्वरहितं प्रवेश्य स ह वर्षगणं दीर्घ प्रोवास प्रोषितवान् । ता सम्यग्गावो रक्षिता यदा यस्मिन्काले सहस्रं संपेदु. संपन्ना बभूवु· ॥ इति चतुर्थ खंड ॥ ४.४.—

अथ हैनमृषभोऽभ्युवाद सत्यकामेति भगव इति ह प्रतिशुश्राव प्राप्ताः सोम्य सहस्रं स्मः प्रापय न आचार्यकुलम् ॥१॥

तमेतं श्रद्धातपोभ्या सिद्धं वायुदेवता दिक्संबंधिनी तुष्टा सत्यृषभमनुप्रविश्यर्षभभावमापन्नाऽनुग्रहायाथ हैनमृषभोऽभ्युवादाभ्युक्तवान्सत्यकामेति संबोध्य । तमसौ सत्यकामो भगव इति ह प्रतिशुश्राव प्रतिवचनं ददौ । प्राप्ताः सोम्य सहस्रं स्म· पूर्णा तव प्रतिज्ञाऽत· प्रापय नोऽस्मानाचार्यकुलम् ॥

ब्रह्मणश्च ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच प्राची दिक्कला प्रतीची दिक्कला दक्षिणा दिक्कलोदीची दिक्कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणः प्रकाशवान्नाम ॥२॥

किचाह ब्रह्मण· परस्य ते तुभ्यं पादं ब्रवाणि कथयानि । इत्युक्त प्रत्युवाच— ब्रवीतु कथयतु मे मह्यं भगवान । इत्युक्त ऋषभस्तस्मै सत्यकामाय होवाच । प्राची दिक्कला ब्रह्मणः पादस्य चतुर्थो भागः । तथा प्रतीची दिक्कला दक्षिणा दिक्कलोदीची दिक्कलैष वै सोम्य ब्रह्मणः पादश्चतुष्कलश्चतस्रः कला अव-

यवा यस्य सोऽयं चतुष्कलः पादो ब्रह्मणः प्रकाशवान्नाम प्रकाशवानित्येव नामाभिधानं यस्य । तथोत्तरेऽपि पादास्त्रयश्चतुष्कला ब्रह्मणः ॥

स य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते प्रकाशवानस्मिँल्लोके भवति प्रकाशवतो ह लोकाञ्जयति य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते ॥३॥ इति पंचमः खंडः ॥

स यः कश्चिदेवं यथोक्तमेतं ब्रह्मणश्चतुष्कलं पादं विद्वान्प्रकाशवानित्यनेन गुणेन विशिष्टमुपास्ते तस्येदं फलं— प्रकाशवानस्मिल्लोके भवति प्रख्यातो भवतीत्यर्थः । तथाऽदृष्टं फलं— प्रकाशवतो ह लोकान्देवादिसंबंधिनो मृत सञ्जयति प्राप्नोति । य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मण प्रकाशवानित्युपास्ते ॥ ४.५.—

अग्निष्टे पादं वक्तेति स ह श्वोभूते गा अभिप्रस्थापयांचकार ता यत्राभि सायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश ॥१॥

सोऽग्निस्ते पादं वक्तेत्युपररामर्षभः । स सत्यकामो ह श्वोभूते परेद्युर्नैत्यकं नित्यं कर्म कृत्वा गा अभिप्रस्थापयांचकाराचार्यकुलं प्रति । ताः शनैश्चरन्त्यः आचार्यकुलाभिमुख्यः प्रस्थिता यत्र यस्मिन्काले देशेऽभि सायं निशायामभिसंबभूवुरेकत्राभिमुख्यः संभूता, तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश ऋषभवचो ध्यायन ॥

तमग्निरभ्युवाद सत्यकाम३ इति भगव इति ह प्रतिशुश्राव ॥२॥

तमग्निरभ्युवाद सत्यकाम३ इति संबोध्य । तमसौ सत्यकामो भगव इति ह प्रतिशुश्राव प्रतिवचनं ददौ ॥

ब्रह्मणः सोम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच पृथिवी कलान्तरिक्षं कला द्यौः कला समुद्रः कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणोऽनंतवान्नाम ॥३॥

ब्रह्मणः सोम्य ते पादं ब्रवाणीति । ब्रवीतु मे भगवानिति । तस्मै होवाच पृथिवी कला अंतरिक्षं कला द्यौः कला समुद्रः कलेत्यात्मगोचरमेव दर्शनमग्निः अब्रवीत् । एष वै सोम्य चतुष्कलः पादो ब्रह्मणोऽनंतवान्नाम ॥

स य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मणोऽनंतवानित्युपास्तेऽनंतवान्नस्मिँल्लोके भवत्यनंतवतो ह लोकाञ्जयति य एतमेवं विद्वांश्चतुष्कलं पादं

ब्रह्मणोऽनंतवानित्युपास्ते ॥४॥ इति षष्ठः खंडः ॥

स यः कश्चिद्यथोक्तं पादमनंतवत्त्वेन गुणेनोपास्ते स तथैव तद्गुणो भवत्यस्मिंल्लोके, मृतश्चानंतवतो ह लोकान्स जयति, य एतमेवमित्यादि पूर्ववत् ॥ इति षष्ठः खंड ॥ ४ ६ —

हंसस्ते पादं वक्तेति स ह श्वोभूते गा अभिप्रस्थापयांचकार ता यत्राभि सायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश ॥१॥ तं हंस उपनिपत्याभ्युवाद सत्यकाम३ इति भगव इति ह प्रतिशुश्राव ॥२॥

सोऽग्निर्हसमस्ते पादं वक्तेत्युक्त्वोपरराम । हंस आदित्यः । शौक्ल्यात्पतनसामान्याच्च । स ह श्वोभूत इत्यादि समानम ॥

ब्रह्मणः सौम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाचाग्निः कला सूर्यः कला चंद्रः कला विद्युत्कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणो ज्योतिष्मान्नाम ॥३॥ स य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपास्ते ज्योतिष्मानस्मिंल्लोके भवति ज्योतिष्मतो ह लोकाञ्जयति य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपास्ते ॥४॥ इति सप्तमः खंडः ॥

अग्निः कला सूर्य कला चंद्र कला विद्युत्कलैष वै सोम्येति ज्योतिर्विषयमेव च दर्शनं प्रोवाच अतो हंसस्यादित्यत्वं प्रतीयते । विद्वत्फलं— ज्योतिष्मान्दीप्तियुक्तोऽस्मिंल्लोके भवति । चंद्रादित्यादाना ज्योतिष्मत एव च मृत्वा लोकाञ्जयति । समानमुत्तरम ॥ इति सप्तमः खंड ॥ ४ ७ —

मद्गुष्टे पादं वक्तेति स ह श्वोभूते गा अभिप्रस्थापयांचकार ता यत्राभि सायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश ॥१॥

हंसोऽपि मद्गुष्टे पादं वक्तेत्युपरराम । मद्गुरुदकचर पक्षी, स चाप्सबंधात्प्राण. । स ह श्वोभूत इत्यादि पूर्ववत् ॥

तं मद्गुरुपनिपत्याभ्युवाद सत्यकाम३ इति भगव इति ह प्रतिशुश्राव ॥२॥ ब्रह्मणः सोम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच प्राणः कला चक्षुः कला श्रोत्रं कला मनः कलैष वै सोम्य चतुष्कलः पादो

ब्रह्मण आयतनवान्नाम ॥३॥

स च मद्रु प्राण· स्वविषयमेव च दर्शनमुवाच प्राण· कलेत्याद्यायतनवानित्येवं नाम । आयतन नाम मन सर्वकरणोपहृतानां भोगाना तद्यस्मिन्पादे विद्यत इत्यायतनवान्नाम पाद· ॥

स य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मण आयतनवानित्युपास्त आयतनवानस्मिँल्लोके भवत्यायतनवतो ह लोकाञ्जयति य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मण आयतनवानित्युपास्ते ॥४॥ इति अष्टमः खंडः ॥

तं पादं तथैवोपास्ते यः स आयतनवानाश्रयवानस्मिल्लोके भवति । तथायतनवत एव सावकाशाल्लोकान्मृतो जयति । य एतमेवमित्यादि पूर्ववत ॥ —

प्राप हाचार्यकुलं तमाचार्योऽभ्युवाद सत्यकाम३ इति भगव इति ह प्रतिशुश्राव ॥१॥

स एवं ब्रह्मवित्सन्प्राप ह प्राप्तवानाचार्यकुलम । तमाचार्योऽभ्युवाद सत्यकाम ३ इति । भगव इति ह प्रतिशुश्राव ॥

ब्रह्मविदिव वै सोम्य भासि को नु त्वानुशशासेत्यन्ये मनुष्येभ्य इति ह प्रतिजज्ञे भगवांस्त्वेव मे कामे ब्रूयात ॥२॥

ब्रह्मविदिव वै सोम्य भासि । प्रसन्नेन्द्रिय प्रहसितवदनश्च निश्चित· कृतार्थो ब्रह्मविद्भवति । अत आह आचार्यो ब्रह्मविदिव भासीति, को न्विति वितर्कयन्नुवाच कस्त्वामनुशशासेति । स चाह सत्यकामोऽन्ये मनुष्येभ्य· । देवता सामनुशिष्टवत्य । कोऽन्यो भगवच्छिष्य मा मनुष्य सन्ननुशासितुमुत्सहेतेत्यभिप्राय । अतोऽन्ये मनुष्येभ्य इति ह प्रतिजज्ञे प्रतिज्ञातवान । भगवांस्त्वेव मे कामे ममेच्छायां ब्रूयात्किमन्यैरुक्तैन, नाहं तद्गणयामीत्यभिप्राय· ॥

श्रुतं ह्येव मे भगवद्दृशेभ्य आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापतीति तस्मै हैतदेवोवाचात्र ह न किंचन वीयायेति वीयायेति ॥३॥

किंच श्रुतं हि यस्मान्मम विद्यत एवास्मिन्नर्थे भगवद्दृशेभ्यो भगवत्समेभ्य ऋषिभ्यः । आचार्याद्धैव विद्या विदिता साधिष्ठं साधुतमत्व प्रापति प्राप्नोति इत्यतो भगवानेव ब्रूयादित्युक्त आचार्योऽब्रवीत्तस्मै तामेव दैवतैरुक्तां विद्याम । अत्र ह न किंचन षोडशकलविद्यायाः किंचिदेकदेशमात्रमपि न वीयाय न विगतमित्यर्थ· । द्विरभ्यासो विद्यापरिसमाप्त्यर्थ· ॥ इति नवम. खंडः ॥ ४.९ —

पुनर्ब्रह्मविद्यां प्रकारान्तरेण वक्ष्यामीत्यारभते गतिं च तद्विदोऽग्निविद्यां च। आख्यायिका पूर्ववच्छ्रद्धातपसोर्ब्रह्मविद्यासाधनत्वप्रदर्शनार्था—

उपकोसलो ह वै कामलायनः सत्यकामं जाबाले ब्रह्मचर्यमुवास तस्य ह द्वादश वर्षाण्यग्नीन्परिचचार स ह स्मान्यानंतेवासिनः समावर्तयंस्तं ह स्मैव न समावर्तयति ॥१॥

उपकोसलो ह वै नामतः कमलस्यापत्यं कामलायनः सत्यकामे जाबाले ब्रह्मचर्यमुवास। तस्य, ह ऐतिह्यार्थं, तस्याचार्यस्य द्वादश वर्षाण्यग्नीन्परिचचार अग्नीनां परिचरणं कृतवान्। स ह स्म आचार्योऽन्यान्ब्रह्मचारिणः स्वाध्यायं ग्राहयित्वा समावर्तयंस्तमेवोपकोसलमेकं न समावर्तयति स्म ह ॥

तं जायोवाच तप्तो ब्रह्मचारी कुशलमग्नीन्परिचचार्यान्मा त्वाग्नयः परिप्रवोचन्प्रब्रूह्यस्मा इति तस्मै हाप्रोच्यैव प्रवासांचक्रे ॥२॥

तमाचार्यं जायोवाच— तप्तो ब्रह्मचारी कुशलं सम्यगग्नीन्परिचचार्यान्परिचरितवान्। भगवांश्चाग्निषु भक्तं न समावर्तयति। अतोऽस्मद्भक्तं न समावर्तयतीति ज्ञात्वा त्वामग्नयो मा परिप्रवोचन्गर्हां तव मा कुर्युः। अतः प्रब्रूह्यस्मै विद्यामिष्टामुपकोसलायेति। तस्मा एवं जाययोक्तोऽपि हाप्रोच्यैवानुक्त्वैव किंचित्प्रवासांचक्रे प्रवसितवान् ॥

स ह व्याधिनाऽनशितुं दध्रे तमाचार्यजायोवाच ब्रह्मचारिन्नशान किं नु नाश्नासीति स होवाच बहव इमेऽस्मिन्पुरुषे कामा नानात्यया व्याधिभिः प्रतिपूर्णोऽस्मि नाशिष्यामीति ॥३॥

स होपकोसलो व्याधिना मानसेन दुःखेनानशितुमनशनं कर्तुं दध्रे धृतवान्मनः। तं तूष्णीमग्न्यागारेऽवस्थितमाचार्यजायोवाच— हे ब्रह्मचारिन्नशान भुंक्ष्व, किं नु कस्मान्नु कारणान्नाश्नासीति। स होवाच— बहवोऽनेकेऽस्मिन्पुरुषेऽकृतार्थे प्राकृते कामा इच्छाः कर्तव्यं प्रति नाना अत्ययोऽतिगमनं येषां व्याधीनां कर्तव्यचिंतानां ते नानात्यया व्याधयः कर्तव्यताप्राप्तिनिमित्तानि चित्तदुःखानीत्यर्थः। तैः प्रतिपूर्णोऽस्मि अतो नाशिष्यामीति ॥

अथ हाग्नयः समूदिरे तप्तो ब्रह्मचारी कुशलं नः पर्यचारीद्धन्तास्मै प्रब्रवामेति तस्मै होचुः प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति ॥४॥

उक्त्वा तूष्णींभूते ब्रह्मचारिणि, अथ हाग्नयः शुश्रूषया वर्जिताः कारु-

ष्याविष्टाः सन्तस्त्रयोऽपि समूदिरे संभूयोक्तवन्तः। हंतेदानीमस्मै ब्रह्मचारिणेऽस्मद्भक्ताय दुःखिताय तपस्विने श्रद्दधानाय सर्वेऽनुशास्मोऽनुप्रब्रवाम ब्रह्मविद्यां इत्येवं संप्रधार्य तस्मै होचुरुक्तवन्तः— प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति ॥

स होवाचं विजानाम्यहं यत्प्राणो ब्रह्म कं च तु खं च न विजानामीति ते होचुर्यद्वाव कं तदेव खं यदेव खं तदेव कमिति प्राणं च ह्यस्मै तदाकाशं चोचुः ॥५॥ इति दशमः खंडः ॥

स होवाच ब्रह्मचारी— विजानाम्यहं यद्भवद्भिरुक्तं प्रसिद्धपदार्थकत्वात्प्राणो ब्रह्मेति। स यस्मिन्सति जीवनं यदपगमे च न भवति तस्मिन्वायुविशेषे लोके रूढोऽतो युक्तं ब्रह्मत्वं तस्य। तेन प्रसिद्धपदार्थकत्वाद्विजानाम्यहं यत्प्राणो ब्रह्मेति। कं च तु खं च न विजानामीति। ननु कंखंशब्दयोरपि सुखाकाशविषयत्वेन प्रसिद्धपदार्थकत्वमेव, कस्माद्ब्रह्मचारिणोऽज्ञानम्? नूनं सुखस्य कंशब्दवाच्यस्य क्षणप्रध्वंसित्वात्खंशब्दवाच्यस्य चाकाशस्याचेतनस्य कथं ब्रह्मत्वमिति मन्यते। कथं च भगवता वाक्यमप्रमाणं स्यादिति। अतो न विजानामीत्याह। तमेवमुक्तवन्तं ब्रह्मचारिणं ते ह्यमय ऊचुः— यद्वाव यदेव वयं कमवोचाम तदेव खमाकाशमित्येवं खेन विशेष्यमाणं कं विषयेंद्रियसंयोगजात्सुखान्निवर्तितं स्यात् नीलेनेव विशेष्यमाणमुत्पलं रक्तादिभ्यः। यदेव खमित्याकाशमवोचाम तदेव च कं सुखमिति जानीहि। एवं च सुखेन विशेष्यमाणं खं भौतिकादचेतनात्खान्निवर्तितं स्यात् नीलोत्पलवदेव। सुखमाकाशस्यं नेतरल्लौकिकं, आकाशं च सुखाश्रयं नेतरद्भौतिकमित्यर्थः। नन्वाकाशं चेत्सुखेन विशेषयितुमिष्टं अस्त्वन्यतरदेव विशेषणं यद्वाव कं तदेव खमित्यतिरिक्तमितरत्। यदेव खं तदेव कमिति पूर्वविशेषणं वा। ननु सुखाकाशयोरुभयोरपि लौकिकसुखाकाशाभ्यां व्यावृत्तिरिष्टेत्यवोचाम। सुखेनाकाशो विशेषिते व्यावृत्तिरुभयोरर्थप्राप्तेवेति चेत्सत्यमेवं, किंतु सुखेन विशेषितस्यैवाकाशस्य ध्येयत्वं विहितं, न त्वाकाशगुणस्य विशेषणस्य सुखस्य ध्येयत्वं विहितं स्यात्। विशेषणोपादानस्य विशेषनियन्तृत्वेनैवोपक्षयात्। अतः खेन सुखमपि विशेष्यते ध्येयत्वाय। कुतश्चैतन्निश्चीयते? कंशब्दस्यापि ब्रह्मशब्दसंबंधात्कं ब्रह्मेति। यदि हि सुखगुणविशिष्टस्य खस्य ध्येयत्वं विवक्षितं स्यात्कं खं ब्रह्मेति ब्रूयुरमयः प्रथमम्। न चैवमुक्तवन्तः। किं तर्हि? कं ब्रह्म खं ब्रह्मेति। अतो ब्रह्मचारिणो मोहापनय-

नाय कंखंशब्दयोरितरेतरविशेषणविशेष्यत्वनिर्देशो युक्त एव यद्वाव कमित्यादिः । तदेतदाग्निमरुक्तं वाक्यार्थमस्मद्बोधाय श्रुतिराह प्राण च हाग्नं ब्रह्मचारिणे । तस्याकाशस्तदाकाश । प्राणस्य संबंधो आश्रयत्वेन हार्द आकाश इत्यर्थः । सुख-गुणवत्त्वनिर्देशात । तं चाकाशं सुखगुणविशिष्टं ब्रह्म तत्स्थं च प्राणं ब्रह्मसंपर्का-देव ब्रह्मेत्युभयं प्राणं चाकाशं च समुच्चित्य ब्रह्मणा ऊचुरमय इति ॥ ४ १० —

अथ हैनं गार्हपत्योऽनुशशास पृथिव्यग्निरन्नमादित्य इति य एष आदित्ये पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति ॥१॥

संभयाग्नयो ब्रह्मचारिणे ब्रह्मोक्तवन्त । अथानंतरं प्रत्येकं स्वस्वविषयां विद्या वक्तुमारेभिरे । तत्रादावेनं ब्रह्मचारिणं गार्हपत्योऽग्निरनुशशास । पृथिव्यग्नि-रन्नमादित्य इति ममैताश्चतस्रस्तनव । तत्र य आदित्ये एष पुरुषो दृश्यते सोऽ-हमस्मि गार्हपत्योऽग्नेर्यश्च गार्हपत्योऽग्निः स एवाहमादित्ये पुरुषोऽस्मीति पुन परावृत्त्या स एवाहमस्मीति वचनम् । पृथिव्यन्नयोरिव भोज्यत्वलक्षणयोः संबंधो न गार्हपत्यादित्ययो । अन्नत्वपक्तृत्वप्रकाशनधर्मा अविशिष्टा इत्यत एकत्व-मेवानयोरत्यंतम । पृथिव्यन्नयोस्तु भोज्यत्वेनान्यां संबंध· ॥

स य एतमेवं विद्वानुपास्तेऽपहते पापकृत्यां लोकी भवति सर्वमायुरेति ज्योगजीवति नास्यावरपुरुषाः क्षीयन्त उप वयं तं भुंजामोऽस्मिंश्च लोके-ऽमुष्मिंश्च य एतमेवं विद्वानुपास्ते ॥२॥ इति एकादशः खंडः ॥

स य कश्चिदेवं यथोक्तं गार्हपत्यमग्निमन्नाद्यादत्वेन चतुर्धा प्रविभक्तमु-पास्ते सोऽपहते विनाशयति पापकृत्या पापं कर्म । लोकी लोकवाञ्श्मर्दायेन लोकेनाग्नेयेन तद्वान्भवति यथा वयम । इह च लोके सर्व वर्षशतमायुरेति प्राप्नोति ज्योगुज्ज्वलं जीवति नाप्रस्खलात इत्येतत् । न चास्यावराश्च ते पुरुषाश्चास्य विदुष· संततिजा इत्यर्थ·, न क्षीयन्ते संतत्युच्छेदो न भवतीत्यर्थ । किं च तं वयमुपभुंजाम पालयामोऽस्मिंश्च लोके जीवन्तममुष्मिंश्च परलोके । य एतमेवं विद्वानुपास्ते यथोक्तं तस्य तत्फलमित्यर्थ· ॥ इति एकादश खंड· ॥४ ११.—

अथ हैनमन्वाहार्यपचनोऽनुशशासापो दिशो नक्षत्राणि चंद्रमा इति य एष चंद्रमसि पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति ॥१॥ स य एतमेवं विद्वानुपास्तेऽपहते पापकृत्यां लोकी भवति सर्वमायुरेति ज्योगजी-वति नास्यावरपुरुषाः क्षीयन्त उप वयं तं भुंजामोऽस्मिंश्च लोकेऽमुष्मिंश्च

य एतमेवं विद्वानुपास्ते ॥२॥ इति द्वादशः खंडः ॥

अथ हैनमन्वाहार्यपचनोऽनुशशास दक्षिणाग्नि आपो दिशो नक्षत्राणि चंद्रमा इत्येता मम चतस्रस्तनवश्चतुर्धाहमन्वाहार्यपचन आत्मानं प्रविभज्यावस्थित. । तत्र य एष चंद्रमसि पुरुषो दृश्यते सोऽहमस्मि, स एवाहमस्मीति पूर्ववत् । अन्नसंबंधाज्ज्योतिष्टोमसामान्याच्चान्वाहार्यपचनचंद्रमसोरैक्यं दक्षिणादिकसंबंधाच्च । अपां नक्षत्राणां च पूर्ववदन्नत्वेनैव संबंध , नक्षत्राणां चंद्रमसो भोग्यत्वप्रसिद्धेः । अपामन्नोत्पादकत्वादन्नत्वं दक्षिणाग्नेः, पृथिवीवद्गार्हपत्यस्य । समानमन्यत् ॥ इति द्वादशः खंडः ॥ ४.१२ —

अथ हैनमाहवनीयोऽनुशशास प्राण आकाशो द्यौर्विद्युदिति य एष विद्युति पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति ॥१॥

स य एतमेवं विद्वानुपास्तेऽपहते पाप्मकृत्यां लोकी भवति सर्वमायुरेति ज्योग्जीवति नास्यावरपुरुषाः क्षीयन्त उप वयं तं भुंजामोऽस्मिंश्च लोकेऽमुष्मिंश्च य एतमेवं विद्वानुपास्ते ॥२॥ इति त्रयोदशः खंडः ॥

अथ हैनमाहवनीयोऽनुशशास प्राण आकाशो द्यौर्विद्युदिति ममाप्येतावत्तस्तनवः । य एष विद्युति पुरुषो दृश्यते सोऽहमस्मीत्यादि पूर्ववत्सामान्यात् । द्यु-आकाशयोस्त्वाश्रयत्वाद्विद्युदाहवनीययोर्भोग्यत्वेनैव संबंध । समानमन्यत् ॥—

ते होचुरुपकोसलैषा सोम्य तेऽस्मद्विद्यात्मविद्या चाचार्यस्तु ते गतिं वक्तेत्याजगाम हास्याचार्यस्तमाचार्योऽभ्युवादोपकोसल ३ इति ॥१॥

ते पुनः संभूयोचुर्हि— उपकोसल एषा सोम्य ते तवास्मद्विद्याऽग्निविद्येत्यर्थः । आत्मविद्या पूर्वोक्ता प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति च । आचार्यस्तु ते गतिं वक्ता विद्याफलप्राप्तय इत्युक्त्वोपरेमुरमयः । आजगाम हास्याचार्यः कालेन । तं च शिष्यमाचार्योऽभ्युवादोपकोसल ३ इति ॥

भगव इति ह प्रतिशुश्राव ब्रह्मविद इव सोम्य ते मुखं भाति को नु त्वानुशशासेति को नु मानुशिष्याद्यो एतीहापेव निह्नुत इमे नूनमीदृशा अन्यादृशा इतीहाग्नीनभ्यूदे किं नु सोम्य किल तेऽवोचन्निति ॥२॥ इदमिति ह प्रतिजज्ञे लोकान्वाव किल सोम्य तेऽवोचन्नहं तु ते तद्वक्ष्यामि यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यत इति ब्रवीतु मे भगवानिति तस्मै होवाच ॥३॥ इति चतुर्दशः खंडः ॥

भगव इति ह प्रतिशुश्राव । ब्रह्मविद इव सोम्य ते मुखं प्रसन्नं भाति को नु त्वाऽनुशशासेत्युक्त· प्रत्याह— को नु माऽनुशिष्यादनुशासनं कुर्याद्भो भगवंस्त्वयि प्रेषित, इतीहापेव निह्नुतेऽपनिह्नुत इवेति व्यवहितेन संबंध·, न चापनिह्नुते, न च यथावदग्निभिरुक्तं ब्रवीतीत्यभिप्राय । कथं? इमेऽग्नयो मया परिचारिता उक्तवन्तो नूनं, यतस्त्वा दृष्ट्वा वेपमाना इवेदृशा दृश्यन्ते पूर्वमन्यादृशाः सन्त, इतीहाग्नीनभ्यूदेऽभ्युक्तवान्काक्काऽग्नीन्दर्शयन् । कि नु सोम्य किल ते तुभ्यमवोचन्नग्नय ? इति पृष्ट इत्येवमिदमुक्तवन्त इत्येवं ह प्रतिजज्ञे प्रतिज्ञातवान्प्रतीकमात्रं किंचिन्न सर्वं यथोक्तमग्निभिरुक्तमवोचत् । यत आहाचार्यो— लोकान्वाव पृथिव्यादींन्हे सोम्य किल तेऽवोचन्न ब्रह्म साकल्येन । अहं तु ते तुभ्यं तद्ब्रह्म यदिच्छसि त्वं श्रोतुं वक्ष्यामि, शृणु तस्य मयोच्यमानस्य ब्रह्मणो ज्ञानमाहात्म्यं यथा पुष्करपलाशे पद्मपत्र आपो न श्लिष्यन्त, एवं यथा वक्ष्यामि ब्रह्मवंविदि पापं कर्म न श्लिष्यते न संबध्यत इति । एवमुक्तवत्याचार्य आहोपकोसलो ब्रवीतु मे भगवानिति । तस्मै होवाचाचार्य· ॥ इति चतुर्दश खंड. ॥ ४.१४.—

य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति तद्यद्यप्यस्मिन्सर्पिर्वोदकं वा सिंचति वर्त्मनी एव गच्छति ॥१॥

य एषोऽक्षिणि पुरुषो दृश्यते निवृत्तचक्षुर्भिर्ब्रह्मचर्यादिसाधनसंपन्नै· शान्तैर्विवेकिभिर्दृष्टेर्द्रष्टा । 'चक्षुषश्चक्षु' इत्यादिश्रुत्यंतरात । नन्वग्निभिरुक्तं वितथं, यत आचार्यस्तु ते गतिं वक्तेति गतिमात्रस्य वक्तेत्यवोचन भविष्यद्विषयापरिज्ञानं चाग्नीनाम् । नैष दोष । सुखाकाशस्यैवाक्षिणि दृश्यत इति द्रष्टुरनुवादात् । एष आत्मा प्राणिनामिति होवाचैवमुक्तवान एतद्यदेवात्मतत्त्वमवोचाम । एतदमृतममरणधर्म्यविनाश्यत एवाभयं, यस्य हि विनाशाशंका तस्य भयोपपत्तिस्तदभावादभयमत एवैतद्ब्रह्म बृहदनंतमिति । किंचास्य ब्रह्मणोऽक्षिपुरुषस्य माहात्म्यं तत्तत्र पुरुषस्य स्थानेऽक्षिणि यद्यप्यस्मिन्सर्पिर्वोदकं वा सिंचति वर्त्मनी एव गच्छति, पक्ष्माण्येव गच्छति, न चक्षुषा संबध्यते पद्मपत्रेणेवोदकम् । स्थानस्याप्येतन्माहात्म्यं किं पुन स्थानिनोऽक्षिपुरुषस्य निरंजनत्वं वक्तव्यमित्यभिप्राय· ॥

एतं संयद्वाम इत्याचक्षत एतं हि सर्वाणि वामान्यभिसंयन्ति सर्वाण्येनं वामान्यभिसंयन्ति य एवं वेद ॥२॥

एतं यथोक्तं पुरुषं संयद्वाम इत्याचक्षते । कस्मात्? यस्मादेतं सर्वाणि

वामानि वननीयानि संभजनीयानि शोभनान्यभिसंयन्त्यभिसंगच्छन्तीत्यत· संयद्वामः । तथैवंविदमेनं सर्वाणि वामान्यभिसंयन्ति य एवं वेद ॥२॥

एष उ एव वामनीरेष हि सर्वाणि वामानि नयति सर्वाणि वामानि नयति य एवं वेद ॥३॥

एष उ एव वामनी. यस्मादेष हि सर्वाणि वामानि पुण्यकर्मफलानि पुण्यानुरूपं प्राणिभ्यो नयति प्रापयति वहति चात्मधर्मत्वेन । विदुष फलं—सर्वाणि वामानि नयति य एवं वेद ॥

एष उ एव भामनीरेष हि सर्वेषु लोकेषु भाति सर्वेषु लोकेषु भाति य एवं वेद ॥४॥

एष उ एव भामनी. एष हि यस्मात्सर्वेषु लोकेष्वादित्यचंद्राग्न्यादिरूपेभाति दीप्यते 'तस्य भासा सर्वमिदं विभाति' इति श्रुतेः । अतो भामानि नयतीति भामनीः । य एवं वेदासावपि सर्वेषु लोकेषु भाति ॥

अथ यदु चैवास्मिञ्छव्यं कुर्वन्ति यदि च नार्चिषमेवाभिसंभवन्त्यार्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्डेति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चंद्रममं चंद्रमसो विद्युतं तत्पुरुषोऽमानव· स एनान्ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते नावर्तन्ते ॥५॥ इति पंचदशः खंड ॥

अथेदानी यथोक्तब्रह्मविदो गतिरुच्यते । यद्यदि उ चैवास्मिन्नेवंविदि शव्यं शवकर्म मृते कुर्वन्ति, यदि च न कुर्वन्ति ऋत्विज·, सर्वथाप्येवंवित्तेन शवकर्मणाऽकृतेनापि प्रतिबद्धो न ब्रह्म न प्राप्नोति, न च कृतेन शवकर्मणास्य कश्चनाभ्यधिको लोक. । 'न कर्मणा वर्धते नो कनीयान्' इति श्रुत्यंतरात् । शवकर्मण्यनादरं दर्शयन्विद्या स्तौति, न पुन· शवकर्मैवंविदो न कर्तव्यमिति । अक्रियमाणे हि शवकर्मणि कर्मणां फलारंभे प्रतिबंधः कश्चिदनुमीयतेऽन्यत्र । यत इह विद्याफलारंभकाले शवकर्म स्याद्वा न वेति विद्यावतोऽप्रतिबंधेन फलारंभं दर्शयति । ये सुखाकाशमाश्रित्यं संयद्वामो वामनीर्भामनीरित्येवंगुणमुपासते प्राणसहितामग्निविद्यां च तेषामन्यत्कर्म भवतु मा वा भूत्सर्वथापि तेऽर्चिषमेवाभिसंभवन्त्यर्चिरभिमानिनी देवतामभिसंभवन्ति प्रतिपद्यन्त इत्यर्थः । अर्चिषोऽर्चिर्देवताया अहरहरभिमानिनी देवतां, अह्न आपूर्यमाणपक्षं शुक्लपक्षदेवतां, आपूर्य-

माणपक्षाद्यैन्पण्मासानुदङ्नुत्तरा दिशमेति सविता तान्मासानुत्तरायणदेवता, तेभ्यो मासेभ्यः संवत्सरं संवत्सरदेवता, ततः संवत्सरादादित्यं, आदित्याच्चंद्रमसं चंद्रमसो विद्युतम् । तत्तत्रस्थास्तान्पुरुष कश्चिद्ब्रह्मलोकोदित्यामानवो, मानव्या सृष्टौ भवो मानवो न मानवोऽमानवः, स पुरुष एनान्ब्रह्म सत्यलोकस्थं गमयति गन्तृगन्तव्यगमयितृत्वव्यपदेशेभ्य सन्मात्रब्रह्मप्राप्तौ तदनुपपत्ते । 'ब्रह्मैव सन ब्रह्माप्येति' इति हि तत्र वक्तुं न्याय्यम् । सर्वभेदनिरासेन सन्मात्रप्रतिपत्ति वक्ष्यति । न चादृष्टो मार्गोऽगमनायोपतिष्ठते 'स एनमविदितो न भुनक्ति' इति श्रुत्यंतरात् । एष देवपथो देवैरर्चिरादिभिर्गमयितृत्वेनाधिकृतैरुपलक्षितः पंथा देवपथ उच्यते । ब्रह्म गंतव्यं तेनचोपलक्षित इति ब्रह्मपथ । एतेन प्रतिपद्यामाना गच्छन्तो ब्रह्मेम मानवं मनुसंबंधिनं मनो सृष्टिलक्षणमावर्त नावर्तन्त, आवर्तन्तेऽस्मिञ्जननमरणप्रबंधचक्रारूढा घटीयंत्रवत्पुन. पुनरित्यावर्तस्तं न प्रतिपद्यन्ते । नावर्तन्त इति द्विर्मुक्ति सफलाया विद्याया परिसमाप्तिप्रदर्शनार्था ॥-

रहस्यप्रकरणे प्रसंगादारण्यकत्वसामान्याच्च यज्ञे श्रुत उत्पन्ने व्याहृतय प्रायश्चित्तार्था विधातव्यास्तदभिज्ञस्य चर्त्विजो ब्रह्मणो मौनमित्यत इदमारभ्यते--

एष ह वै यज्ञो योऽयं पवत एष ह यन्निदं सर्वं पुनाति यदेष यन्निदं सर्वं पुनाति तस्मादेष एव यज्ञस्तस्य मनश्च वाक्च वर्तनी ॥१॥

एष ह वै एष वायुर्योऽयं पवतेऽयं यज्ञः । ह वै इति प्रसिद्धार्थावद्योतकौ निपातौ । वायुप्रतिष्ठो हि यज्ञ. प्रसिद्ध श्रुतिषु । "स्वाहा वातेधा" "अयं वै यज्ञो योऽयं पवते" इत्यादिश्रुतिभ्यः । वात एव हि चलनात्मकत्वात्क्रियासमवायी । "वात एव यज्ञस्यारंभको वातः प्रतिष्ठा" इति च श्रवणात । एष ह यन्गच्छंश्चलन्निदं सर्वं जगत्पुनाति पावयति शोधयति । न ह्यचलत शुद्धिरस्ति । दोषनिरसनं चलतो हि दृष्टं न स्थिरस्य । यद्यस्माच्च यज्ञेष इदं सर्वं पुनाति तस्मादेष एव यज्ञो यत्पुनातीति । तस्यास्यैवंविशिष्टस्य यज्ञस्य वाक्च मंत्रोच्चारेण व्याप्रृता । मनश्च यथाभूतार्थज्ञाने व्याप्रृतम् । ते एते वाङ्मनसे वर्तनी मार्गौ याभ्या यज्ञस्तायमानः प्रवर्तते ते वर्तनी । "प्राणापानपरिचलनबल्या हि वाचश्चित्तस्य चोत्तरोत्तरक्रमो यद्यज्ञः" इति हि श्रुत्यंतरम । अतो वाङ्मनसाभ्या यज्ञो वर्तत इति वाङ्मनसे वर्तनी उच्येते यज्ञस्य ॥

तयोरन्यतरां मनसा संस्करोति ब्रह्मा वाचा होताध्वर्युरुद्गातान्यतरां

स यत्रोपाकृते प्रातरनुवाके पुरा परिधानीयाया ब्रह्मा व्यवदति ॥३॥ अन्यतरामेव वर्तनीं संस्करोति हीयतेऽन्यतरा स यथैकपाद्व्रजत्रथो वैकेन चक्रेण वर्तमानो रिष्यत्येवमस्य यज्ञो रिष्यति यज्ञं रिष्यन्तं यजमानोऽनुरिष्यति स इष्ट्वा पापीयान्भवति ॥३॥

तयोर्वर्तन्योरन्यतरा वर्तनी मनसा विवेकज्ञानवता संस्करोति ब्रह्मत्विक्, वाचा वर्तन्या होताध्वर्युरुद्गाता, इत्येते त्रयोऽप्यृत्विजोऽन्यतरां वाग्लक्षणां वर्तनीं वाचैव संस्कुर्वन्ति । तत्रैवं सति वाङ्मनसे वर्तनी संस्कार्ये यज्ञे । अथ स ब्रह्मा यत्र यस्मिन्काल उपाकृते प्रारब्धे प्रातरनुवाके शस्त्रे पुरा पूर्वं परिधानीयाया ऋचो ब्रह्मैतस्मिन्नंतरे काले व्यवदति मौनं परित्यजति यदि, तदान्यतरामेव वाग्वर्तनीं संस्करोति । ब्रह्मणा असंस्क्रियमाणा मनोवर्तनी हीयते विनश्यति छिद्रीभवत्यन्यतरा । स यज्ञो वाग्वर्तन्यैवान्यतरया वर्तितुमशक्नुवन्रिष्यति । कथमिवेत्याह— स यथैकपात्पुरुषो व्रजन्गच्छन्नश्वानं रिष्यति, रथो वैकेन चक्रेण वर्तमानो गच्छन्रिष्यत्येवमस्य यजमानस्य कुब्रह्मणा यज्ञो रिष्यति विनश्यति । यज्ञं रिष्यन्तं यजमानोऽनुरिष्यति । यज्ञप्राणो हि यजमानः । अतो युक्तो यज्ञेरेष रेषस्तस्य । स तं यज्ञमिष्ट्वा तादृशं पापीयान्पापतरो भवति ॥

अथ यत्रोपाकृते प्रातरनुवाके न पुरा परिधानीयाया ब्रह्मा व्यवदत्युभे एव वर्तनी संस्कुर्वन्ति न हीयतेऽन्यतरा ॥४॥ स यथोभयपाद्व्रजत्रथो वोभाभ्यां चक्राभ्यां वर्तमानः प्रतितिष्ठत्येवमस्य यज्ञः प्रतितिष्ठति यज्ञं प्रतितिष्ठन्तं यजमानोऽनुप्रतितिष्ठति स इष्ट्वा श्रेयान्भवति ॥५॥ इति षोडशः खंडः ॥

अथ पुनर्यत्र ब्रह्मा विद्वान्मौनं परिगृह्य वाग्विसर्गमकुर्वन्वर्तते यावत्परिधानीयाया न व्यवदति, तथैव सर्वर्त्विजः उभे एव वर्तनी संस्कुर्वन्ति न हीयतेऽन्यतरापि । किमिवेत्याह पूर्वोक्तविपरीतौ दृष्टान्तौ । एवमस्य यजमानस्य यज्ञः स्ववर्तनीभ्यां वर्तमानः प्रतितिष्ठति स्वेनात्मनाऽविनश्यन्वर्तत इत्यर्थः । **यज्ञं प्रतितिष्ठन्तं** यजमानोऽनुप्रतितिष्ठति । स यजमान एवं मौनविज्ञानवद्ब्रह्मोपेतं **यज्ञमिष्ट्वा श्रेयान्भवति** श्रेष्ठो भवतीत्यर्थः॥ इति षोडश खंडः ॥ ४.१६.—

अत्र ब्रह्मणो मौनं विहितं, तद्वेषे ब्रह्मत्वकर्मणि चाथान्यस्मिंश्च होत्रादिकर्मवेषे व्याहृतिहोमः प्रायश्चित्तमिति तदर्थं व्याहृतयो विधातव्या इत्याह—

प्रजापतिर्लोकानभ्यतपत्तेषां तप्यमानानां रसान्प्रावृहदग्निं पृथिव्या वायुमंतरिक्षादादित्यं दिवः ॥१॥

प्रजापतिर्लोकानभ्यतपल्लोकानुद्दिश्य तत्र सारजिघृक्षया ध्यानलक्षणं तपश्चचार । तेषां तप्यमानाना लोकाना रसान्सारूपान्प्रावृहदुद्धृतवान् जग्राहेत्यर्थः । कान् । अग्निं रसं पृथिव्याः वायुमंतरिक्षात् आदित्यं दिवः ॥

स एतास्तिस्रो देवता अभ्यतपत्तासां तप्यमानानां रसान्प्रावृहदग्नेर्ऋचो वायोर्यजूंषि सामान्यादित्यात् ॥२॥

पुनरप्येवमेवमन्याद्याः स एतास्तिस्रो देवता उद्दिश्याभ्यतपत् । ततोऽपि सारं रसं त्रयीविद्या जग्राह ॥

स एतां त्रयीं विद्यामभ्यतपत्तस्यास्तप्यमानाया रसान्प्रावृहद्भूरित्यृग्भ्यो भुवरिति यजुर्भ्यः स्वरिति सामभ्यः ॥३॥ तद्यदाह रिष्येद्भूः स्वाहेति गार्हपत्ये जुहुयादृचामेव तद्रसेनर्चां वीर्येणर्चां यज्ञस्य विरिष्टं संदधाति ॥४॥

स एता पुनरभ्यतपत् त्रयीं विद्याम् । तस्यास्तप्यमानाया रसं भूरिति व्याहृतिमृग्भ्यो जग्राह । भुवरिति व्याहृतिं यजुर्भ्यः । स्वरिति व्याहृतिं सामभ्यः । अत एव लोकदेववेदरसा महाव्याहृतयः । अतस्तत्र यज्ञे यद्यदुक्तं ऋक्संबंधादृक्निमित्तं रिष्येद्यज्ञः क्षतं प्राप्नुयात् भूः स्वाहेति गार्हपत्ये जुहुयात् । सा तत्र प्रायश्चित्तिः । कथम्, ऋचामेव, तदिति क्रियाविशेषणं, रसेनर्चा वीर्येणाजसर्चा यज्ञस्य ऋक्संबंधिनो यज्ञस्य विरिष्टं विच्छिन्नं क्षतरूपमुत्पन्नं संदधाति प्रतिसंधत्ते ॥

अथ यदि यजुष्टो रिष्येद्भुवः स्वाहेति दक्षिणाग्नौ जुहुयाद्यजुषामेव तद्रसेन यजुषां वीर्येण यजुषां यज्ञस्य विरिष्टं संदधाति ॥५॥ अथ यदि सामतो रिष्येत्स्वः स्वाहेत्याहवनीये जुहुयात्साम्नामेव तद्रसेन साम्नां वीर्येण साम्नां यज्ञस्य विरिष्टं संदधाति ॥६॥

अथ यदि यजुष्टो यजुर्निमित्तं रिष्येत् भुवः स्वाहेति दक्षिणाग्नौ जुहुयात् । तथा सामनिमित्ते रेषे स्वः स्वाहेत्याहवनीये जुहुयात् । तथा पूर्ववद्यज्ञं संदधाति । ब्रह्मनिमित्ते तु रेषे त्रिष्वग्निषु तिसृभिर्व्याहृतिभिर्जुहुयात् । त्रय्या हि विद्यायाः स रेषः । "अथ केन ब्रह्मत्वमित्यनयैव त्रय्या विद्यया" इति श्रुतेः । न्यायान्तरं वा मृग्यं ब्रह्मत्वनिमित्ते रेषे ॥

तद्यथा लवणेन सुवर्णं संदध्यात्सुवर्णेन रजतं रजतेन त्रपु त्रपुणा सीसं सीसेन लोहं लोहेन दारु दारु चर्मणा ॥७॥ एवमेषां लोकानामासां देवतानामस्यास्त्रय्या विद्यायै वीर्येण यज्ञस्य विरिष्टं संदधाति भेषजकृतो ह वा एष यज्ञो यत्रैवंविद्ब्रह्मा भवति ॥८॥

तद्यथा लवणेन सुवर्णं संदध्यात् । क्षारेण टंकणादिना खेर मृदुत्वकरं हि तत् । सुवर्णेन रजतमशक्यसंधानं संदध्यात् । रजतेन तथा त्रपु, त्रपुणा सीसं, सीसेन लोहं, लोहेन दारु, दारु चर्मणा चर्मबंधनेन । एवमेषा लोकानामासा देवतानामस्यास्त्रय्या विद्याया वीर्येण रसाख्येनौजसा यज्ञस्य विरिष्टं संदधाति । भेषजकृतो ह वा एष यज्ञ । रोगार्त इव पुमांश्चिकित्सकेन सुशिक्षितेनैष यज्ञो भवति । कोऽसौ । यत्र यस्मिन्यज्ञ एवंविद्यथोक्तव्याहृतिहोमप्रायश्चित्तविद्ब्रह्मत्विग्भवति स यज्ञ इत्यर्थ. ॥

एष ह वा उदक्प्रवणो यज्ञो यत्रैवंविद्ब्रह्मा भवत्येवंविदं ह वा एषा ब्रह्माणमनुगाथा यतो यत आवर्तते तत्तद्गच्छति ॥९॥

किंचैष ह वा उदक्प्रवण उदङ्निम्नो दक्षिणोच्छ्रायो यज्ञो भवति । उत्तरमार्गप्रतिपत्तिहेतुरित्यर्थ । यत्रैवंविद्ब्रह्मा भवत्येवंविदं ह वै ब्रह्माणमृत्विजं प्रत्येषाऽनुगाथा ब्रह्मण स्तुतिपरा । यतो यत आवर्तते कर्म प्रदेशाद्दक्षिणा यज्ञ क्षतीभवंस्तत्तद्यज्ञस्य क्षतरूपं प्रतिसंदधत्प्रायश्चित्तेन गच्छति परिपालयति इत्येतत् ॥

मानवो ब्रह्मैवैक ऋत्विक्कुरूनश्चाभिरक्षत्येवंविद्ध वै ब्रह्मा यज्ञं यजमानं सर्वोश्चर्त्विजोऽभिरक्षति तस्मादेवंविदमेव ब्रह्माणं कुर्वीत नानेवंविदं नानेवंविदम् ॥१०॥ इति सप्तदश खंड ॥ इति चतुर्थोऽध्याय ॥

मानवो ब्रह्मा मौनाचरणान्मननाद्वा ज्ञानवत्त्वात्ततो ब्रह्मैवैकर्त्विक् कुरून्कर्तृन् । योद्धृनारुढानश्वा वडवा यथाभिरक्षत्येवंविद्ध वै ब्रह्मा यज्ञं यजमानं सर्वोश्चर्त्विजोऽभिरक्षति तत्कृतदोषापनयनात् । यत एवं विशिष्टो ब्रह्मा विद्वांस्तस्मादेवंविदमेव यथोक्तव्याहृत्यादिविद ब्रह्माणं कुर्वात नानेवंविदं कदाचनेति । द्विरभ्यासोऽध्यायपरिसमाप्त्यर्थः ॥ ४.१७—

॥ इति चतुर्थोऽध्याय. ॥

॥ पंचमोऽध्यायः ॥

सगुणब्रह्मविद्याया उत्तरा गतिरुक्ता । अथेदानीं पंचमेऽध्याये पंचाग्निविदो गृहस्थस्याध्वरेतसां च श्रद्धालूनां विद्यान्तरशालिना तामेव गतिमनूद्य, अन्या दक्षिणा दिक्संबंधिनी केवलकर्मिणां धूमादिलक्षणा, पुनरावृत्तिरूपा तृतीया च तत कष्टतरा संसारगतिर्वैराग्यहेतोर्वक्तव्येत्यारभ्यते । प्राण श्रेष्ठो वागादिभ्य प्राणो वाव संवर्ग इत्यादि च बहुशोऽनंति ग्रंथे प्राणग्रहणं कृतं, स कथं, श्रेष्ठो वागादिषु सर्वे संहत्यकारित्वाविशेषे कथं च तस्योपासनमिति तस्य श्रेष्ठत्वादि-गुणविधित्सयेदमनंतरमारभ्यते—

ॐ । यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च ह वै श्रेष्ठश्च भवति प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च ॥१॥

यो ह वै कश्चिज्ज्येष्ठं च प्रथमं वयसा श्रेष्ठं च गुणैरभ्यधिकं वेद स ज्येष्ठश्च ह वै श्रेष्ठश्च भवति । फलेन पुरुषं प्रलोभ्याभिमुखीकृत्याह—प्राणो वाव ज्येष्ठश्च वयसा वागादिभ्य । गर्भस्थे हि पुरुषे प्राणस्य वृत्तिर्वागादिभ्यः पूर्व लब्धात्मिका भवति यथा गर्भो विवर्धते । चक्षुरादिस्थानावयवनिष्पत्तौ सत्यां पश्चाद्वागादीना वृत्तिलाभ इति प्राणो ज्येष्ठो वयसा भवति । श्रेष्ठत्वं तु प्रतिपादयिष्यति 'सुहृय' इत्यादिनिदर्शनेन । अत प्राण एव ज्येष्ठश्च श्रेष्ठश्चास्मिन्कार्य-करणसंघाते ॥

यो ह वै वसिष्ठं वेद वसिष्ठो ह स्वानां भवति वाग्वाव वसिष्ठः॥२॥

यो ह वै वसिष्ठं वासितृतममाच्छादयितृतमं वसुमत्तमं वा यो वेद, स तथैव वसिष्ठो ह भवति स्वानां ज्ञातानाम् । कस्तर्हि वसिष्ठ इत्याह—वाग्वाव वसिष्ठो, वाग्मिनो हि पुरुषा वसन्त्यभिभवन्त्यन्यान वसुमत्तमाश्च, अतो वाग्वसिष्ठ ॥

यो ह वै प्रतिष्ठां वेद प्रति ह तिष्ठत्यस्मिंश्च लोकेऽमुष्मिंश्च चतुर्वाव प्रतिष्ठा ॥३॥

यो ह वै प्रतिष्ठा वेद स अस्मिंल्लोकेऽमुष्मिंश्च परे प्रतितिष्ठति ह । का तर्हि प्रतिष्ठेत्याह—चक्षुर्वाव प्रतिष्ठा । चक्षुषा हि पश्यन्समे च दुर्गे च प्रतितिष्ठति यस्मादतः प्रतिष्ठा चक्षुः ॥

यो ह वै संपदं वेद सं हास्मै कामाः पद्यन्ते दैवाश्च मानुषाश्च श्रोत्रं

वाव संपत् ॥४॥

यो ह वै संपदं वेद तस्मा अस्मै देवाश्च मानुषाश्च कामा संपद्यन्ते ह । का तर्हि संपदित्याह— श्रोत्र वाव संपत् । यस्माच्छ्रोत्रेण वेदा गृह्यन्ते तदर्थविज्ञान च, तत कर्माणि क्रियन्ते, तत कामसंपत इत्येवं कामसंपद्धेतुत्वाच्छ्रोत्रं वाव संपत ॥

यो ह वा आयतनं वेदायतनं ह स्वानां भवति मनो ह वा आयतनम् ॥५॥

यो ह वा आयतनं वेद आयतनं ह स्वानां भवत्याश्रयो भवतीत्यर्थः । किं तदायतनमित्याह— मनो ह वा आयतनम । इंद्रियोपहृतानां विषयाणां भोक्तृत्वर्थानां प्रत्ययरूपाणां मन आयतनमाश्रय । अतो मनो ह वा आयतनमित्युक्तम ॥

अथ ह प्राणा अहंश्रेयसि व्यूदिरेऽहं श्रेयानस्म्यह श्रेयानस्मीति ॥६॥

अथ ह प्राणा एवं यथोक्तगुणा सन्तोऽहंश्रेयसि अहं श्रेयानस्म्यहं श्रेयानस्मीत्येतस्मिन्प्रयोजने व्यूदिरे नाना विरुद्धं चोदिर उक्तवन्त ॥

ते ह प्राणाः प्रजापतिं पितरमेत्योचुर्भगवन्को नः श्रेष्ठ इति तान्होवाच यस्मिन्व उत्क्रान्ते शरीरं पापिष्ठतरमिव दृश्येत स वः श्रेष्ठ इति ॥७॥

ते ह ते हैवं विवदमाना आत्मनः श्रेष्ठत्वविज्ञानाय प्रजापतिं पितरं जनयितारं कंचिदेत्योचुरुक्तवन्तो हे भगवन्को नोऽस्माकं मध्ये श्रेष्ठोऽभ्यधिको गुणैः इत्येव पृष्टवन तान्पितोवाच ह— यस्मिन्वो युष्माकं मध्य उत्क्रान्ते शरीरमिद पापिष्ठमिवातिशयेन जीवतोऽपि समुत्क्रान्तप्राण ततोऽपि पापिष्ठतरमिवातिशयेन दृश्येत कुणपमस्पृश्यमशुचि दृश्येत स वो युष्माकं श्रेष्ठ इत्येवोचत्काङ्क्षा तद्दृश्यं परिजिहार्षुः ॥

स ह वागुच्चक्राम सा संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितुमिति यथा कला अवदन्तः प्राणन्तः प्राणेन पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण ध्यायन्तो मनसैवमिति प्रविवेश ह वाक् ॥८॥ चक्षुर्होच्चक्राम तत्संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितुमिति यथांधा अपश्यन्तः प्राणन्तः प्राणेन वदन्तो वाचा शृण्वन्तः श्रोत्रेण ध्यायन्तो मनसैवमिति प्रविवेश ह चक्षुः ॥९॥ श्रोत्रं होच्चक्राम तत्संवत्सरं प्रोष्य पर्येत्यो-

वाच कथमशकतर्ते मज्जीवितुमिति यथा बधिरा अशृण्वन्तः प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा ध्यायन्तो मनसैवमिति प्रविवेश ह श्रोत्रम् ॥१०॥ मनो होच्चक्राम तत्संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितुमिति यथा बाला अमनसः प्राणन्त प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेणैवमिति प्रविवेश ह मनः ॥११॥

तथोक्तेषु पित्रा प्राणेषु सा ह वागुच्चक्रामोत्क्रान्तवती । सा चोत्क्रम्य संवत्सरमात्रं प्रोष्य स्वव्यापाराच्निवृत्ता सती पुन पर्येत्येतरान्प्राणानुवाच— कथं केन प्रकारेणाशकत शक्तवन्तो यूयं मदृते मा विना जावितुं धारयितुमात्मानमिति । ते होचुर्यथा कला इत्यादि । कला मूका यथा लोकेऽवदन्तो वाचा जीवन्ति । कथम् । प्राणन्त प्राणेन पश्यन्तश्चक्षुषा शृण्वन्त श्रोत्रेण ध्यायन्तो मनसैवं सर्वकरणचेष्टा कुर्वन्त इत्यर्थ । एवं वयमजीविष्मेत्यर्थ । आत्मनोऽश्रेष्ठता प्राणेषु बुद्ध्वा प्रविवेश ह वाक्पुन स्वव्यापारे प्रवृत्ता बभूवेत्यर्थ· । समानमन्यच्चक्षुर्होच्चक्राम श्रोत्रं होच्चक्रामेत्यादि । यथा बाला अमनसोऽप्ररूढमनस इत्यर्थ ॥

अथ ह प्राण उच्चिक्रमिषन्स यथा सुहय पर्ट्वीशशंकृन्संखिदेदेवमितरान्प्राणान्समखिदत्तं हाभिसमेत्योचुर्भगवन्नेधि त्वं न श्रेष्ठोऽसि मोत्क्रमीरिति ॥१२॥

एवं परीक्षितेषु वागादिष्वथानंतरं ह स मुख्य प्राण उच्चिक्रमिषन्नुत्क्रमितुमिच्छन्किमकरोदित्युच्यते । यथा लोके सुहय· शोभनोऽश्व पर्ट्वीशशंकृन्पादबंधनकीलान्परीक्षणायारूढेन कशया हत. सन्संखिदेत्समुत्खनेत्समुत्पाटयेत्, एवं इतरान्वागादीन्प्राणान्समखिदत्समुद्धृतवान । ते प्राणा· संचालिता सन्त स्वस्थाने स्थातुमनुत्सहमाना अभिसमेत्य मुख्यं प्राणं तमूचुर्हे भगवन्नेधि भव न· स्वामी यस्मात्त्वं नोऽस्माकं श्रेष्ठोऽसि मा चास्मादेहादुत्क्रमीरिति ॥

अथ हैनं वागुवाच यदहं वासिष्ठोऽस्मि त्वं तद्वसिष्ठोऽसीत्यथ हैनं चक्षुरुवाच यदहं प्रतिष्ठास्मि त्वं तत्प्रतिष्ठासीति ॥१३॥ अह हैनं श्रोत्रमुवाच यदहं संपदस्मि त्वं तत्संपदसीत्यथ हैनं मन उवाच यदहमायतनमस्मि त्वं तदायतनमसीति ॥१४॥

अथ हैनं वागादय· प्राणस्य श्रेष्ठत्वं कार्येण आपादयन्त आहुर्वालिमिव

हरन्तो राज्ञे विश । कथं, वाक् तावदुवाच—— यदहं वसिष्ठोऽस्मि, यदिति क्रियाविशेषणं, यद्वसिष्ठत्वगुणोऽस्मीत्यर्थ । त्वं तद्वसिष्ठस्तेन वसिष्ठत्वगुणेन त्वं तद्वसिष्ठोऽसि तद्गुणस्त्वमित्यर्थ । अथवा तच्छब्दोऽपि क्रियाविशेषणमेव । त्वत्कृतस्त्वदीयोऽसौ वसिष्ठत्वगुणोऽज्ञानान्ममेति मयाभिमत इत्येतत् । तथोत्तरेषु योज्यं चक्षुःश्रोत्रमनःसु ॥

न वै वाचो न चक्षूंषि न श्रोत्राणि न मनांसीत्याचक्षते प्राणा इत्येवाचक्षते प्राणो ह्येवैतानि सर्वाणि भवति ॥१५॥ इति प्रथमः खंडः ॥

श्रुतेरिदं वचो युक्तमिदं वागादिभिर्मुख्यं प्राणं प्रत्यभिहितं यस्मान्न वै लोके वाचो न चक्षूंषि न श्रोत्राणि न मनांसीति वागादीनि करणान्याचक्षते लौकिका आगमज्ञा वा, किं तर्हि प्राणा इत्येवाचक्षते कथयन्ति, यस्मात्प्राणे ह्येवैतानि सर्वाणि वागादीनि करणजातानि भवन्ति । अतो मुख्यं प्राणं प्रत्यनुरूपमेव वागादिभिरुक्तमिति प्रकरणार्थमुपगंजिहीर्षति ॥

ननु कथमिदं युक्तं चेतनावन्त इव पुरुषा अहंश्रेष्ठतायै विवदन्तोऽन्योन्यं स्पर्धेरन्निति । न हि चक्षुरादीना वाचं प्रत्याख्याय प्रत्येकं वदनं संभवति । तथापगमो देहात्पुनः प्रवेशो ब्रह्मगमनं प्राणस्तुतिर्वोपपद्यते । तत्राग्न्यादिचेतनावद्देवताधिष्ठितत्वाद्वागादीना चेतनावत्त्वं तावत्सिद्धमागमत । तार्किकसमयविरोध इति चेद्देह एकस्मिन्ननेकचेतनावत्त्वे । न । ईश्वरस्य निमित्तकारणत्वाभ्युपगमात । ये तावदीश्वरमभ्युपगच्छन्ति तार्किका , ते मनआदिकार्यकरणानामाध्यात्मिकाना बाह्याना च पृथिव्यादीनामीश्वराधिष्ठितानामेव नियमेन प्रवृत्तिमिच्छन्ति रथादिवत । न चास्माभिरन्याद्याधेतनावत्योऽपि देवता अध्यात्मं भोक्त्र्योऽभ्युपगम्यन्ते, किं तर्हि, कार्यकरणवर्तीना हि तासा प्राणैकदेवताभेदाना अध्यात्माधिभूताधिदैवभेदकोटिविकल्पानां अभ्यक्षतामात्रेण नियन्तेश्वरोऽभ्युपगम्यते । स त्वकरण 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः' इत्यादिमंत्रवर्णात् । 'हिरण्यगर्भ पश्यत जायमानम्' 'हिरण्यगर्भ जनयामास पूर्वम्' इत्यादि च श्वेताश्वतरीयाः पठन्ति । भोक्ता कर्मफलसंबंधी देहे तद्विलक्षणो जीव इति वक्ष्यामः । वागादीनां चेह संवादः कल्पितो विदुषोऽन्वयव्यतिरेकाभ्यां प्राणश्रेष्ठतानिर्धारणार्थम् । यथा लोके पुरुषा अन्योन्यमात्मनः श्रेष्ठतायै विवदमानाः कंचिद्गुणविशेषाभिज्ञं पृच्छन्ति को नः श्रेष्ठो गुणैरिति, तेनोक्ता एकैकशेयेन अदः कार्यं

साधयितुमुद्यच्छत, येनादः कार्यं साध्यते, स व श्रेष्ठ, इत्युक्तास्तथैवोद्यच्छन्तः आत्मनोऽन्यस्य वा श्रेष्ठतां निर्धारयन्ति, तथेमं संव्यवहारं वागादिषु कल्पितवर्तां श्रुति — कथं नाम विद्वान्वागादीनामेकैकस्याभावेऽपि जीवनं द्रष्टं न तु प्राणस्येति प्राणश्रेष्ठता प्रतिपद्येतेति । तथाच श्रुति कौषीतकिना— "जीवति वागपेतो मूकान्हि पश्यामो जीवति चक्षुरपेतोऽन्धान्हि पश्यामो जीवति श्रोत्रापेतो बधिरान्हि पश्यामो जीवति मनोऽपेतो बालान्हि पश्यामो जीवति बाहुच्छिन्नो जीवत्यूरुच्छिन्न·" इत्याद्या ॥ इति प्रथमः खड ॥ ५.१ —

स होवाच किं मेऽन्नं भविष्यतीति यत्किंचिदिदमा श्वभ्य आ शकुनिभ्य इति होचुस्तद्वा एतदनस्यान्नमनो ह वै नाम प्रत्यक्षं न ह वा एवंविदि किंचनानन्नं भवतीति ॥१॥

स होवाच मुख्य प्राणः किं मेऽन्नं भविष्यतीति । मुख्यं प्राणं प्रष्टारमिव कल्पयित्वा वागादीन्प्रतिवक्तृनिव कल्पयन्ती श्रुतिराह— यदिदं लोकेऽन्नजातं प्रसिद्धमा श्वभ्य श्वभि सह आ शकुनिभ्यः सह शकुनिभि सर्वप्राणिना यदन्नं तत्त्ववान्नमिति होचुर्वागादय इति । प्राणस्य सर्वमन्नं प्राणोऽन्ना सर्वस्यान्नस्येत्येवं प्रतिपन्नये कल्पितारुयायिकारूपाद्यावृत्य स्वेन श्रुतिरूपेणाह— तद्वै एतद्यत्किंचिल्लोके प्राणिभिरन्नमद्यत अनस्य प्राणस्य तदन्नं प्राणेनैव तदद्यत इत्यर्थ । सर्वप्रकारचेष्टाव्याप्तिगुणप्रदर्शनार्थमन इति प्राणस्य प्रत्यक्ष नाम । प्राद्युपसर्गपूर्वत्वे हि विशेषगतिरेव स्यात । तथाच सर्वान्नानामन्नर्नामग्रहणमिति प्रत्यक्षं नाम अन इति सर्वान्नानामन्नं साक्षादभिधानम । न ह वा एवंविदि यथोक्तप्राणविदि प्राणोऽहमस्मि सर्वभूतस्थ सर्वान्नानामन्नेति तस्मिन्नेवंविदि ह वै किंचिदपि प्राणिभिरद्यं सर्वैरनन्नमनद्यं न भवति, सर्वमेवंविद्यन्नं भवतीत्यर्थ । प्राणभूतत्वाद्विदुष । 'प्राणाद्वा एष उदेति प्राणेऽस्तमेति' इत्युपक्रम्य "एवंविदो ह वा उदेति सूर्य एवंविद्यस्तमेति" इति श्रुत्यंतरात् ॥

स होवाच किं मे वासो भविष्यतीत्याप इति होचुस्तस्माद्वा एतदशिष्यन्त· पुरस्ताच्चोपरिष्टाच्चाद्भि· परिदधति लंभुको ह वासो भवत्यनग्नो ह भवति ॥२॥

स होवाच पुनः प्राणः । पूर्ववदेव कल्पना । किं मे वासो भविष्यतीत्याप इति होचुर्वागादय· । यस्मात्प्राणस्य वास आपस्तस्माद्वा एतदशिष्यन्तो भोक्ष्य-

माणा भुक्तवन्तश्च ब्राह्मणा विद्वांस एतत्कुर्वन्ति । किम । अद्भिर्वासस्थानायाभिः पुरस्ताद्भोजनात्पूर्वमुपरिष्टाच्च भोजनादूर्ध्वं च परिदधति परिधानं कुर्वन्ति मुख्यस्य प्राणस्य । लंभुको लंभनशीलो वासो ह भवति । वासस्वी लब्धैव भवतीत्यर्थः । अनग्नो ह भवति । वासस्वी लंभुकत्वेनार्थसिद्धेवानग्नतेत्यनग्नो ह भवतीत्युत्तरो-यवान्भवतीत्येतत् ॥

भोक्ष्यमाणस्य भुक्तवतश्च यदाचमनं शुद्ध्यर्थं विज्ञातं तस्मिन्प्राणस्य वास इति दर्शनमात्रमिह विधीयते, अद्भि परिदधतीति । नाचमनान्तरम । यथा लौकिकैः प्राणिभिरद्यमानमन्नं प्राणस्येति दर्शनमात्रं, तद्वत् । किं मेऽन्नं किं मे वास इत्यादिप्रश्नप्रतिवचनयोस्तुल्यत्वात् । यद्याचमनमपूर्वं तादर्थ्येन क्रियेत तदा कृम्याद्यन्नमपि प्राणस्य भक्ष्यत्वेन विहितं स्यात् । तुल्ययोर्विज्ञानार्थयोः प्रश्नप्रति-वचनयोः प्रकरणस्य विज्ञानार्थत्वादर्धजरतीयो न्यायो न युक्त कल्पयितुम् ॥

यत्तु प्रसिद्धमाचमनं प्रायत्यार्थं प्राणस्यानग्नतार्थं च न भवतीत्युच्यते, न तथा वयमाचमनमुभयार्थं ब्रूमः । किं तर्हि, प्रायत्यार्थाचमनसाधनभूता आपः । प्राणस्य वास इति दर्शनं चोद्यत इति ब्रूमः । तत्राचमनस्योभयार्थत्वप्रसंगदोष-चोदना अनुपपन्ना । वासोर्थ एवाचमने तद्दर्शनं स्यादिति चेत । न । वासो ज्ञानार्थवाक्ये वासोर्थापूर्वाचमनविधाने तत्रानग्नतार्थत्वदृष्टिविधाने च वाक्यभेदः । आचमनस्य तदर्थत्वमन्यार्थत्वं चेति प्रमाणाभावात् ॥

तद्धैतत्सत्यकामो जाबालो गोश्रुतये वैयाघ्रपद्यायोक्त्वोवाच यद्यप्ये-नच्छुष्काय स्थाणवे ब्रूयाज्जायेरन्नेवास्मिञ्छाखाः प्ररोहेयुः पलाशानीति ॥३॥

तदेतत्प्राणदर्शनं स्तूयते । कथम । तद्धैतत्प्राणदर्शनं सत्यकामो जाबालो गोश्रुतये नाम्ना वैयाघ्रपद्याय व्याघ्रपदोऽपत्यं वैयाघ्रपद्यस्तस्मै गोश्रुत्याख्यायो-क्त्वोवाच अन्यदपि वक्ष्यमाण वचः । किं तदुवाचेत्याह—यद्यपि शुष्काय स्थाणवे एतद्दर्शनं ब्रूयात्प्राणविद जायेरन्नुत्पद्येरन्नेवास्मिन्स्थाणौ शाखा प्ररोहेयुश्च पलाशानि पत्राणि, किमु जीवते पुरुषाय ब्रूयादिति ॥

यथोक्तप्राणदर्शनविद इदं मंथाख्यं कर्मारभ्यते—

अथ यदि महज्जिगमिषेदमावास्यायां दीक्षित्वा पौर्णमास्यां रात्रौ सर्वौषधस्य मंथं दधिमधुनोरुपमथ्य ज्येष्ठाय श्रेष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा मंथे संपातमवनयेत् ॥४॥

अथानंतरं यदि महन्महत्त्वं जिगमिषेद्वंतुमिच्छेन्महत्त्वं प्राप्तुं यदि कामयेतेत्यर्थः । तस्येदं कर्म विधीयते । महत्त्वे हि सति श्रीरुपनमते । श्रीमतो ह्यर्थप्राप्तं धनं, तत कर्मानुष्ठानं, ततश्च देवयानं पितृयाणं वा पंथानं प्रतिपत्स्यत इत्येतत्प्रयोजनमुररीकृत्य महत्त्वप्रेप्सोरिदं कर्म, न विषयोपभोगैकामस्य । तस्यायं कालादिविधिरुच्यते—अमावास्यायां दीक्षित्वा दीक्षित इव भूमिशयनादिनियमं कृत्वा तपोरूपं सत्यवचनं ब्रह्मचर्यमित्यादिधर्मवान्भूत्वेत्यर्थः । न पुनर्दक्षमेव कर्मजातं सर्वमुपादत्ते, अतद्विकारत्वान्मंथाख्यस्य कर्मणः । 'उपसद्वर्ती' इति श्रुत्यंतरात्पयोमात्रभक्षणं च शुद्धिकारणं तप उपादत्ते । पौर्णमास्यां रात्रौ कर्मारभते सर्वौषधस्य ग्राम्यारण्यानामोषधीनां यावच्छक्त्यल्पमल्पमुपादाय तान्तुषीकृत्य आमेमेव पिष्टे दधिमधुनोरौदुंबरे कंसाकारे चमसाकारे वा पात्रे श्रुत्यंतरात्प्रक्षिप्योपमथ्याग्नत स्थापयित्वा ज्येष्ठाय श्रेष्ठाय स्वाहेत्यग्नावावसथ्य आजस्यावापस्थाने हुत्वा स्रुवसंलग्नं मंथे संपातमवनयेत्संस्रवमध पातयेत् ॥

वसिष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा मंथे संपातमवनयेत्प्रतिष्ठायै स्वाहेत्यग्नावाज्यस्य हुत्वा मंथे संपातमवनयेत्संपदे स्वाहेत्यग्नावाज्यस्य हुत्वा मंथे संपातमवनयेदायतनाय स्वाहेत्यग्नावाज्यस्य हुत्वा मंथे संपातमवनयेत् ॥५॥

समानमन्यत् । वसिष्ठाय प्रतिष्ठायै संपदे आयतनाय स्वाहेति प्रत्येकं तथैव संपातमवनयेत हुत्वा ॥

अथ प्रतिसृप्यांजलौ मंथमाधाय जपत्यमो नामास्यमा हि ते सर्वमिदं स हि ज्येष्ठ श्रेष्ठो राजाधिपति स मा ज्यैष्ठ्यं श्रैष्ठ्यं राज्यमाधिपत्यं गमयत्वहमेवेदं सर्वमसानीति ॥६॥

अथ प्रतिसृप्याग्नेरापदपसृत्य अंजलौ मंथमाधाय जपतीमं मंत्रम्—अमो नामास्यमा हि ते । अम इति प्राणस्य नाम । अन्नेन हि प्राणः प्राणिति देह इत्यतो मंथद्रव्यं प्राणस्यान्नत्वात्प्राणत्वेन स्तूयतेऽमो नामासीति । कुत । यतो अमा सह हि यस्मात्ते तव प्राणभूतस्य सर्व समस्तं जगदिदमतः । स हि प्राणभूतो मंथो ज्येष्ठः श्रेष्ठश्च । अत एव च राजा दीप्तिमानधिपतिश्चाधिष्ठाय पालयिता सर्वस्य । स मा मामपि मंथः प्राणो ज्यैष्ठ्यादिगुणपृगमात्मनो गमयतु अहमेवेदं सर्वं जगदसानि भवानि प्राणवत् । इतिशब्दो मंत्रपरिसमाप्त्यर्थः ॥

अथ स्वल्वेतयर्चा पच्छ आचामति तत्सवितुर्वृणीमह इत्याचामति वयं देवस्य भोजनमित्याचामति श्रेष्ठं सर्वधातममित्याचामति तुरं भगस्य धीमहीति सर्वं पिबति निर्णिज्य कंसं चमसं वा पश्चादग्नेः संविशति चर्मणि वा स्थंडिले वा वाचंयमोऽप्रसाह स यदि स्त्रियं पश्येत्समृद्धं कर्मेति विद्यात् ॥७॥

अथानंतरं स्वल्वेतया वक्ष्यमाणयर्चा पच्छ पादश आचामति भक्षयति, मंत्रस्यैकैकेन पादेनैकैकं ग्रासं भक्षयति । तद्भोजनं सवितुः सर्वस्य प्रसवितुः । प्राणमादित्यं चैकीकृत्योच्यते । आदित्यस्य वृणीमहे प्रार्थयेमहि संभक्षणम । येनान्नेन सावित्रेण भोजनेनोपभुक्तेन वयं सवितृस्वरूपापन्ना भवेमेत्यभिप्रायः । देवस्य सवितुरिति पूर्वेण संबधः । श्रेष्ठं प्रशस्यतमं सर्वान्नेभ्यः. सर्वधातम सर्वस्य जगतो धारयितृतममतिशयेन विधातृतममिति वा । सर्वथा भोजनविशेषणम । तुरं त्वरं तूर्णं शीघ्रमित्येतत । भगस्य देवस्य सवितुः स्वरूपमिति शेषः । धीमहि चिंतयेमहि विशिष्टभोजनेन संस्कृताः शुद्धान्तःकरणा सन्त इत्यभिप्रायः । अथवा भगस्य श्रिय कारणं महत्त्वं प्राप्तुं कर्म कृतवन्तो वयं तद्धीमहि चिंतयेमहीति सर्वं च मंथलेपं पिबति । निर्णिज्य प्रक्षाल्य कंसं कंसाकारं चमसं चमसाकारं वौदुंबरं पात्रम । पीत्वान्नस्य पश्चादग्नेः प्राक्शिरा संविशति चर्मणि वाऽजिने स्थंडिले केवलाया वा भूमौ । वाचंयमो वाग्यतः सन्नित्यर्थः । अप्रसाहो न प्रसह्यते नाभिभूयते स्वयाद्यनिष्टस्वप्नदर्शनेन यथा, तथा संयतचित्त सन्नित्यर्थः । स एवंभूतो यदि स्त्रियं पश्येत्स्वप्नेषु, तदा विद्यात्समृद्धं ममेदं कर्मेति ॥

तदेष श्लोको यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने तस्मिन्स्वप्ननिदर्शने ॥८॥ इति द्वितीय खंडः ॥

तदेतस्मिन्नर्थ एष श्लोको मंत्रोऽपि भवति । यदा कर्मसु काम्येषु कामार्थेषु स्त्रियं स्वप्नेषु स्वप्नदर्शनेषु स्वप्नकालेषु वा पश्यति, समृद्धिं तत्र जानीयात । कर्मणां फलानिष्पत्तिर्भविष्यतीति जानीयादित्यर्थः । तस्मिन्स्त्र्यादिप्रशस्तस्वप्नदर्शने सतीत्यभिप्रायः । द्विरुक्तिः कर्मसमाप्त्यर्था ॥ ५.२ —

ब्रह्मादिस्तंबपर्यंता संसारगतयो वक्तव्या वैराग्यहेतोर्मुमुक्षूणामित्यतः आख्यायिकारभ्यते—

श्वेतकेतुर्हारुणेयः पंचालानां समितिमेयाय त ह प्रवाहणो जैवलिरुवाच कुमारानु त्वाशिषन्पितेत्यनु हि भगव इति ॥१॥

श्वेतकेतुर्नामतो, ह इत्यैतिह्यार्थः, अरुणस्यापत्यमारुणिस्तस्यापत्यमारुणेयः पंचालाना जनपदाना समिति सभामेयायाजगाम । तमागतवन्तं ह प्रवाहणो नामतो जीवलस्यापत्यं जैवलिरुवाचोक्तवान । हे कुमारानु त्वा त्वामशिषदन्वशिषत्पिता ' किमनुशिष्टस्त्वं पित्रेत्यर्थः । इत्युक्त स आह — अनु ह्यनुशिष्टोऽस्मि भगव इति सूचयन्नाह ॥

वेत्थ यदितोऽधि प्रजा प्रयन्तीति न भगव इति वेत्थ यथा पुनरावर्तन्त३ इति न भगव इति वेत्थ पथोर्देवयानस्य पितृयाणस्य च व्यावर्तना३ इति न भगव इति ॥२॥

तं होवाच— यद्यनुशिष्टोऽसि, वेत्थ यदितोऽस्माल्लोकादध्यूर्ध्वं यत्प्रजाः प्रयान्ति यद्गच्छन्ति तत्कि जानाषि इत्यर्थ । न भगव इत्याहेतरो, न जानेऽहं तद्यत्पृच्छसि । एवं तर्हि वेत्थ जानीषे यथा येन प्रकारेण पुनरावर्तन्त इति । न भगव इति प्रत्याह । वेत्थ पथोर्मार्गयो सहप्रयाणयोर्देवयानस्य पितृयाणस्य च व्यावर्तना व्यावर्तनामितरेतरवियोगस्थान सह गच्छतामित्यर्थ । न भगव इति॥

वेत्थ यथासौ लोको न संपूर्यत३ इति न भगव इति वेत्थ यथा पंचम्यामाहुतावाप पुरुषवचसो भवन्तीति नैव भगव इति ॥३॥

वेत्थ यथासौ लोक पितृसंबंधी यं प्राप्य पुनरावर्तन्ते, बहुभिः प्रयद्भिरपि येन कारणेन न संपूर्यत इति । न भगव इति प्रत्याह । वेत्थ यथा येन क्रमेण पंचम्या पंचमसंख्याकायामाहुतौ हुतायामाहुतिनिर्वृत्ता आहुतिसाधनाश्चापः पुरुषवचसः पुरुष इत्येवं वचोऽभिधानं यासां हूयमानाना क्रमेण षष्ठाहुतिभूताना ता पुरुषवचस पुरुषशब्दवाच्या भवन्ति पुरुषाख्यां लभन्त इत्यर्थः । इत्युक्तो नैव भगव इत्याह । नैवाहमत्र किंचन जानामीत्यर्थः ॥

अथानु किमनुशिष्टोऽवोचथा यो ह्यमानि न विद्यात्कथं सोऽनुशिष्टो ब्रुवीतेति स होवाचाथमस्तं पितुरर्धमेयाय तं होवाचाननुशिष्य वाव किल मा भगवानब्रवीदनु त्वाशिषमिति ॥४॥

अथैवमज्ञः सन्किमनु कस्मात्त्वमनुशिष्टोऽस्मीत्यवोचथा उक्तवानसि । यो ह्यमानि मया पृष्टान्यर्थजातानि न विद्यान्न विजानीयात्कथं स विद्वत्स्वनु-

शिष्टोऽस्मीति ब्रुवाण । इत्येवं स श्वेतकेतू राज्ञा आयस्त आयासित सन्पितुरर्धं स्थानमेयायागतवांस्त च पितरमुवाच– अननुशिष्यानुशासनमकृत्वैव मा मा किल भगवान्समावर्तनकालेऽब्रवीदुक्तवाननु त्वाशिषमन्वशिषं त्वामिति ॥

पंच मा राजन्यबंधु· प्रश्नानप्राक्षीत्तेषां नैकंचनाशकं विवक्तुमिति स होवाच यथा मा त्वं तदैतानवदो यथाहमेषां नैकंचन वेद यद्यहमिमानवेदिष्यं कथं ते नावक्ष्यमिति ॥५॥ स ह गौतमो राज्ञोऽर्धमेयाय तस्मै ह प्राप्तायार्हांचकार स ह प्रात सभाग उदेयाय तं होवाच मानुषस्य भगवन् गौतम वित्तस्य वरं वृणीथा इति स होवाच तवैव राजन्मानुषं वित्त यामेव कुमारस्यांते वाचमभाषथास्तामेव मे ब्रूहीति स ह कृच्छ्री बभूव ॥

यतः पंच पंचसंख्याकान्प्रश्नान् राजन्यबंधू राजन्या बंधवोऽस्येति राजन्यबंधु स्वयं दुर्वृत्त इत्यर्थ , अप्राक्षीत्पृष्टवांस्तेषा प्रश्नाना नैकंचनैकमपि नाशकं न शक्तवानहं विवक्तुं विशेषेणार्थतो निर्णेतुमित्यर्थ । स होवाच पिता— यथा मा मा वत्स त्वं तदा आगतमात्र एवैतान्प्रश्नानवद उक्तवानसि, तेषां नैकंचनाशकं विवक्तुमिति, तथा मा जानीहि, त्वदीयाज्ञानेन लिंगेन मम तद्विषयमज्ञानं जानीहीत्यर्थ । कथं, यथाहमेषा प्रश्नानामेकंचनैकमपि न वेद न जान इति । यथा त्वमेवाग एतान्प्रश्नान्न जानीषे तथाहमप्येतान्न जान इत्यर्थ । अतो मय्यन्यथाभावो न कर्तव्य । कुत एतदेवं, यतो न जाने । यद्यहमिमान्प्रश्नानवेदिष्यं विदितवानस्मि कथं ते तुभ्यं प्रियाय पुत्राय समावर्तनकाले पुरा नावक्ष्यं नोक्तवानस्मि । इत्युक्त्वा स ह गौतमो गोत्रतो राज्ञो जैवलेरर्धं स्थानमेयाय गतवान । तस्मै ह गौतमाय प्राप्तायार्हमर्हणां चकार कृतवान । स च गौतम. कृतातिथ्य उषित्वा परेद्यु प्रात·काले सभागे सभा गते राज्युदेयाय । भजनं भागः पूजा सेवा सह भागेन वर्तमानो वा सभाग. पूज्यमानोऽन्यै स्वयं गौतम उदेयाय राजानमुद्गतवान् । तं होवाच गौतमं राजा— मानुषस्य भगवन्गौतम मनुष्यसंबंधिनो वित्तस्य ग्रामादेर्वरं वरणीयं कामं वृणीथा· प्रार्थयेथा· । स होवाच गौतम.— तवैव तिष्ठतु राजन्मानुषं वित्तम् । यामेव कुमारस्य मम पुत्रस्यान्ते समीपे वाचं पंचप्रश्नलक्षणामभाषथा उक्तवानसि, तामेव वाचं मे मह्यं ब्रूहि कथय । इत्युक्तो गौतमेन राजा स ह कृच्छ्री दुःखी बभूव । कथं त्विदमिति ॥

तं ह चिरं वसेत्याज्ञापयांचकार तं होवाच यथा मा त्वं गौतमावदो

यथेयं न प्राक्त्वत्तः पुरा विद्या ब्राह्मणान्गच्छति तस्मादु सर्वेषु लोकेषु क्षत्रस्यैव प्रशासनमभूदिति तस्मै होवाच ॥७॥ इति तृतीयः खंडः ॥३॥

स ह कृच्छ्राभूतोऽप्रत्याख्येयं ब्राह्मणं मन्वानो न्यायेन विद्या वक्तव्येति मत्वा तं ह गौतमं चिरं दीर्घकालं वसेत्येवमाज्ञापयांचकाराज्ञप्तवान् । यत्पूर्वं प्रख्यातवान्राजा विद्यां, यच्च पश्चाच्चिरं वसेत्याज्ञप्तवान्, तन्निमित्तं ब्राह्मणं श्रमापयति हेतुवचनोक्त्या । तं होवाच राजा— सर्वविद्यो ब्राह्मणोऽपि सन्यथा येन प्रकारेण मा मा हे गौतमावदस्त्वं, तामेव विद्यालक्षणां वाचं मे ब्रूहि, इत्यज्ञानात्तेन त्वं जानीहि । तत्रास्ति वक्तव्यं— यथा येन प्रकारेणेयं विद्या प्राक्त्वत्तो ब्राह्मणान्न गच्छति न गतवती, न च ब्राह्मणा अनया विद्ययाऽनुशासितवन्त, तथैतत्प्रसिद्धं लोके यत, तस्मादु पुरा पूर्वं सर्वेषु लोकेषु क्षत्रस्यैव क्षत्रजातेरेवानया विद्यया प्रशासनं प्रशास्तृत्वं शिष्याणामभूद्बभूव । क्षत्रियपरंपरयैवेयं विद्यैतावन्तं कालमागता । तथाप्यहमेतां तुभ्यं वक्ष्यामि, त्वत्संप्रदानादूर्ध्वं ब्राह्मणान्गामिष्यति । अतो मया यदुक्तं तत्क्षंतुमर्हसीत्युक्त्वा तस्मै होवाच विद्यां राजा ॥ इति तृतीय खंड.॥ ५ ३ --

'पंचम्यामाहुतावाप' इत्ययं प्रश्न प्राथम्येनापाक्रियते । तदपाकरणमनुक्रमेणेतरेषामपाकरणमनुकूलं भवेदिति । अग्निहोत्राहुत्यो कार्यारंभो य स उक्तो वाजसनेयके— "तं प्रति प्रश्ना । उत्क्रांतिराहुत्योर्गति प्रतिष्ठा तृप्त पुनरावृत्तिर्लोकं प्रत्युत्थायी" इति । तेषा चापाकरणमुक्तं तत्रैव— "ते वा एते आहुता हुते उत्क्रामतस्ते अंतरिक्षमाविशतस्ते अंतरिक्षमेवाहवनीयं कुर्वाते वायुं समिधं मरीचीरेव शुक्रामाहुति ते अंतरिक्षं तर्पयतस्ते तत उत्क्रामत इत्यादेवमेव पूर्ववाहुतं तर्पयतस्ते तत आवर्तेते । इमामाविश्य तर्पयित्वा पुरुषमाविशत । तत स्त्रियमाविश्य लोकं प्रत्युत्थायी भवति" इति । तत्राग्निहोत्राहुत्यो कार्यारंभमात्रमेवंप्रकारं भवतीत्युक्तम् । इह तु त कार्यारंभमग्निहोत्रापूर्वविपरिणामलक्षणं पंचधा प्रविभज्याग्नित्वेनोपासनमुत्तरमार्गप्रतिपत्तिसाधनं विधित्सन्नाह—

असौ वाव लोको गौतमाग्निस्तस्यादित्य एव समिद्रश्मयो धूमोऽहरर्चिश्चंद्रमा अंगारा नक्षत्राणि विस्फुलिंगाः ॥१॥

असौ वाव लोको गौतमाग्निरित्यादि । इह सायंप्रातरग्निहोत्राहुता हुतपयआदिसाधने श्रद्धापुरस्सरे आहवनीयाग्निसमिद्धूमार्चिरंगारविस्फुलिंगभावितं

कर्त्रादिकारकभावित्वे चातरिक्षक्रमेणोत्क्रम्य द्युलोकं प्रविशन्त्यौ सूक्ष्मभूते अप्सम्बायित्वादप्शब्दवाच्ये श्रद्धाहेतुत्वाच्च श्रद्धाशब्दवाच्ये। तयोरधिकरणोऽग्निरन्यच्च तत्संबंधं समिदादित्युच्यते । या चासावग्न्यादिभावना आहुत्यो सापि तथैव निर्दिश्यते । असौ वाव लोकोऽग्निर्हे गौतम यथाग्निहोत्राधिकरणमाहवनीय इह । तस्याग्नेर्द्युलोकाख्यस्य आदित्य एव समित्तेन हीद्धोऽसौ लोको दीप्यते । अत समिधनात्समिदादित्यः । रश्मयो धूमस्तदुत्थानात्, समिधो हि धूम उत्तिष्ठति । अहरर्चिः प्रकाशसामान्यात्, आदित्यकार्यत्वाच्च । चंद्रमा अंगारा । अहःप्रशमेऽभिव्यक्ते । अर्चिषो हि प्रशमेऽगारा अभिव्यज्यन्ते । नक्षत्राणि विस्फुलिंगा. चंद्रमसोऽवयवा इव विप्रकीर्णत्वसामान्यात् ॥

तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा संभवति ॥२॥ इति चतुर्थ खंडः ॥४॥

तस्मिन्नेतस्मिन्यथोक्तलक्षणेऽग्नौ देवा यजमानप्राणा अग्न्यादिरूपा अधिदैवतम् । श्रद्धामग्निहोत्राहुतिपरिणामावस्थारूपा. सूक्ष्मा आप श्रद्धाभाविता. श्रद्धा उच्यन्ते । "पंचम्यामाहुतावाप. पुरुषवचसो भवन्ति" इत्यपा होम्यतया प्रश्ने श्रुतत्वात । "श्रद्धा वा आपः श्रद्धामेवाग्रभ्य प्रणीय प्रचरन्ति" इति च विज्ञायते । तां श्रद्धाम्पां जुह्वति । तस्या आहुते सोमो राजा अपा श्रद्धाशब्दवाच्याना द्युलोकाग्नौ हुताना परिणाम सोमो राजा संभवति । यथर्ग्वेदादिपुष्परसा कृम्यादिमधुकरोपनीतास्ते आदित्ये यजआदिकार्ये रोहितादिरूपलक्षणमारभन्ते इत्युक्तं, तथेमा अग्निहोत्राहुतिसमवायिन्यः सूक्ष्माः श्रद्धाशब्दवाच्या आपो द्युलोकमनुप्रविश्य चाद्रं कार्यमारभन्ते फलरूपमग्निहोत्राहुत्यो. । यजमानाश्च तत्कर्तार आहुतिभया आहुतिभावनाभाविता आहुतिरूपेण कर्मणा आकृष्टा श्रद्धाप्समवायिनो द्युलोकमनुप्रविश्य सोमभूता भवन्ति । तदर्थ हि तैरग्निहोत्रं हुतम । अत्र त्वाहुतिपरिणाम एव पंचाग्निसंबंधक्रमेण प्राधान्येन विवक्षित उपासनार्थ न यजमानानां गति. । तां त्वविदुषा धूमादिक्रमेणोत्तरत्र वक्ष्यति, विदुषा चोत्तरां विद्याकृताम् ॥ इति चतुर्थः खंड ॥ ५.४.—

पर्जन्यो वाव गौतमाग्निस्तस्य वायुरेव समिदभ्रं धूमो विद्युदर्चिरशनिरंगारा ह्रादनयो विस्फुलिंगा. ॥१॥

द्वितीयहोमपर्यायार्थमाह— पर्जन्यो वाव पर्जन्य एव गौतमाग्निः पर्जन्यो

नाम वृष्ट्युपकरणाभिमानी देवताविशेष. । तस्य वायुरेव समित् वायुना हि पर्जन्योऽग्नि. समिध्यते । पुरोवातादिप्राबल्ये वृष्टिदर्शनात् । अभ्रं धूमो, धूमकार्यत्वाद्धूमवच्च लक्ष्यमाणत्वात् । विद्युदर्चि., प्रकाशसामान्यात् । अशनिरंगारा काठिन्याद्विद्युत्संबंधाद्वा । ह्रादनयो विस्फुलिंगा । ह्रादनयो गर्जितशब्दा मेघाना विप्रकीर्णत्वसामान्यात् ॥

तस्मिन्नेतस्मिन्नग्नौ देवाः सोमं राजानं जुह्वति तस्या आहुतेर्वर्षं संभवति ॥२॥ इति पंचमः खंड ॥

तस्मिन्नेतस्मिन्नग्नौ देवा पूर्ववत्सोमं राजानं जुह्वति । तस्या आहुतेर्वर्षं संभवति । श्रद्धाख्या आप सोमाकारपरिणता द्वितीये पर्याये पर्जन्याग्नि प्राप्य वृष्टित्वेन परिणमन्ते ॥ इति पंचम खंडः ॥ ५.५ —

पृथिवी वाव गौतमाग्निस्तस्याः संवत्सर एव समिदाकाशो धूमो रात्रिरर्चिर्दिशोऽगारा अवान्तरदिशो विस्फुलिंगाः ॥१॥

पृथिवी वाव गौतमाग्निरित्यादि पूर्ववत् । तस्या पृथिव्याख्यस्याग्ने. संवत्सर एव समित् । संवत्सरेण हि कालेन समिद्धा पृथिवी व्रीह्यादिनिष्पत्तये भवति । आकाशो धूम. पृथिव्या इवोत्थित आकाशो दृश्यत । यथाऽग्नेर्धूम । रात्रिरर्चि , पृथिव्या हि अप्रकाशात्मिकाया अनुरूपा रात्रि । तमोरूपत्वात् । अग्नेरिवानुरूपमर्चिः । दिशोऽगारा, उपशान्तत्वसामान्यात् । अवान्तरदिशो विस्फुलिंगा. क्षुद्रत्वसामान्यात् ॥

तस्मिन्नेतस्मिन्नग्नौ देवा वर्षं जुह्वति तस्या आहुतेरन्नं संभवति ॥२॥ इति षष्ठः खंडः ॥

तस्मिन्नित्यादि समानम् । तस्या आहुतेरन्नं व्रीह्यादिवादि संभवति ॥५.६ —

पुरुषो वाव गौतमाग्निस्तस्य वागेव समित्प्राणो धूमो जिह्वार्चिश्चक्षुरंगाराः श्रोत्रं विस्फुलिंगाः ॥१॥

पुरुषो वाव गौतमाग्नि । तस्य वागेव समित् । वाचा हि मुखेन समिध्यते पुरुषो न मूकः । प्राणो धूमो, धूम इव मुखान्निर्गमनात् । जिह्वार्चिर्लोहितत्वात् । चक्षुरंगारा भास आश्रयत्वात् । श्रोत्रं विस्फुलिंगा. । विप्रकीर्णत्वसाम्यात् ॥

तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति तस्या आहुते रेत संभवति ॥२॥ इति सप्तमः खंडः ॥

समानमन्यत । अन्नं जुह्वति व्रीह्यादिसंस्कृतम् । तस्या आहुते रेतः संभवति ॥२॥ इति सप्तम खंड ॥ ५.७.—

योषा वाव गौतमाग्निस्तस्या उपस्थ एव समिद्यदुपमंत्रयते स धूमो योनिरर्चिर्यदंतः करोति तेऽगारा अभिनंदा विस्फुलिंगाः ॥१॥

योषा वाव गौतमाग्निः । तस्या उपस्थ एव समित् । तेन हि सा पुत्रोत्पादनाय समिध्यते । यदुपमंत्रयते स धूमः । स्त्रीसंभवादुपमंत्रणस्य । योनिरर्चिर्लोहितत्वात् । यदंतः करोति तेऽगारा अग्निसंबंधात् । अभिनंदा मुखत्वात् विस्फुलिंगा क्षुद्रत्वात् ॥

तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुतेर्गर्भ संभवति ॥२॥ इति अष्टम खंड ॥

तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति । तस्या आहुतेर्गर्भः संभवतीति । एवं श्रद्धासोमवर्षान्नरेतोहवनपर्यायक्रमेणाप एव गर्भीभूतास्ताः । तत्रापामाहुतिसमवायित्वात्प्राधान्यविवक्षा— आपः पंचम्यामाहुतौ पुरुषवचसो भवन्तीति । न त्वाप एव केवला सोमादिकार्यमारभन्ते । न चापो अत्रिवृत्कृताः सन्तीति । त्रिवृत्कृतत्वेऽपि विशेषसंज्ञालाभो दृष्ट पृथिवीयमिमा आपोऽयमग्निरित्यन्यतमबाहुल्यनिमित्तः । तस्मात्समुदितान्येव भूतान्यब्बाहुल्यात्कर्मसमवायीनि सोमादिकार्यारंभकाण्यापः इत्युच्यन्ते । दृश्यते च द्रवबाहुल्यं सोमवृष्टयन्नरेतोदेहेषु । बहुद्रवं च शरीरं यद्यपि पार्थिवम् । तत्र पंचम्यामाहुतौ हुतायां रेतोरूपा आपो गर्भीभूताः ॥ ५.८.—

इति तु पंचम्यामाहुतावापः पुरुषवचसो भवन्तीति स उल्बावृतो गर्भो दश वा नव वा मासानंतः शयित्वा यावद्वाथ जायते ॥१॥

इति त्वेवं तु पंचम्यामाहुतावापः पुरुषवचसो भवन्तीति व्याख्यात एकः प्रश्नः । यत्तु द्युलोकादिमां प्रत्यावृत्तयोराहुत्योः पृथिवीं पुरुषं स्त्रियं क्रमेणाविश्य लोकं प्रत्युत्थायी भवतीति वाजसनेयके उक्तं, तत्प्रासंगिकमिहोच्यते । इह च प्रथमे प्रश्ने उक्तं— वेत्थ यदितोऽधि प्रजाः प्रयन्तीति । तस्य चायमुपक्रमः । स गर्भोऽपां पंचमः परिणामविशेषः आहुतिकर्मसमवायिनीनां श्रद्धाशब्दवाच्यानामुल्बावृत उल्बेन जरायुणा आवृतो वेष्टितो दश वा नव वा मासानंतर्मातुः कुक्षौ शयित्वा यावद्वा यावता कालेन न्यूनेनातिरिक्तेन वा अथानंतरं जायते ॥

उल्बावृत इत्यादि वैराग्यहेतोरिदमुच्यते । कष्टं हि मातुः कुक्षौ मूत्रपूरीषवातपित्तश्लेष्मादिपूर्णे तदनुलिप्तस्य गर्भस्योल्बाशुचिपटावृतस्य लोहितरेतोशुचिबीजस्य मातुरशितपीतरसानुप्रवेशेन विवर्धमानस्य निरुद्धशक्तिबलवीर्यतेजःप्रज्ञाचेष्टस्य शयनम् । ततो योनिद्वारेण पाट्यमानस्य कष्टतरा निःसृतिर्जन्मेति वैराग्यं ग्राहयति, मुहूर्तमप्यसह्यं दश वा नव वा मासानतिदीर्घकालमंत. शयित्वेति च ॥

स जातो यावदायुषं जीवति तं प्रेतं दिष्टमितोऽग्नय एव हरन्ति यत एवेतो यत संभूतो भवति ॥२॥ इति नवमः खंडः ॥

स एवं जातो यावदायुषं पुन पुनर्घटीयंत्रवद्गमनागमनाय कर्म कुर्वन्कुलालचक्रवद्वा तिर्यग्भ्रमणाय यावत्कर्मणोपात्तमायुस्तावज्जीवति । तमेनं क्षीणायुषं प्रेतं मृतं दिष्टं कर्मणा निर्दिष्टं परलोकं प्रति, यदि चेज्जीवन्वैदिके कर्मणि ज्ञाने वाधिकृत , तमेनं मृतमितोऽस्माद्ग्रामादग्नेयऽन्यर्थमृत्विजो हरन्ति पुत्रा ना अंत्यकर्मणे । यत एवेत आगतोऽग्ने सकाशाच्छ्रद्धाद्याहुतिक्रमेण, यतश्च पंचभ्योऽग्निभ्य· संभूत उत्पन्नो भवति, तस्मा एवाग्नये हरन्ति स्वामेव योनिमग्निमापादयन्तीत्यर्थः ॥ ५.९ —

तद्य इत्थं विदुः । ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङेति मासांस्तान् ॥१॥ मासेभ्य संवत्सरं संवत्सरादादित्यमादित्याच्चंद्रमसं चंद्रमसो विद्युतं तत्पुरुषोऽमानव. स एनान्ब्रह्म गमयत्येष देवयानः पंथा इति ॥२॥

'वेत्थ यदितोऽधि प्रजाः प्रयन्ति' इत्ययं प्रश्न प्रत्युपस्थितोऽपाकर्तव्यतया । तत्तत्र लोकं प्रत्युत्थितानामधिकृताना गृहमेधिना य इत्थमेवं यथोक्तं पंचाग्निदर्शनं– द्युलोकाद्यग्निभ्यो वयं क्रमेण जाता अग्निस्वरूपा पंचाग्न्यात्मानः– इत्येवं विदुर्जानीयुः । कथमवगम्यत इत्थं विदुरिति गृहस्था एवोच्यन्ते नान्य इति? गृहस्थाना ये त्वनित्थंविद. केवलेष्टापूर्तदत्तपरास्ते धूमादिना चंद्रं गच्छन्तीति वक्ष्यति । ये चारण्योपलक्षिता वैखानसा परिव्राजकाश्च श्रद्धा तप इत्युपासते, तेषां चेत्थंविद्धि. सहार्चिरादिना गमनं वक्ष्यति, पारिशेष्यादग्निहोत्राहुतिसंबंधाच्च गृहस्था एव गृह्यन्ते इत्थं विदुरिति ॥

ननु ब्रह्मचारिणोऽप्यगृहीता ग्रामश्रुत्याऽरण्यश्रुत्या चानुपलक्षिता विद्यन्ते,

कथं पारिशेष्यसिद्धि । नैष दोष । पुराणस्मृतिप्रामाण्यादूर्ध्वरेतसा नैष्ठिकब्रह्मचारिणामुत्तरेणार्यम्ण. पंथा प्रसिद्ध । अतस्तेऽप्यरण्यवासिभि सह गमिष्यन्ति। उपकुर्वाणकास्तु स्वाध्यायग्रहणार्था इति न विशेषनिर्देशार्हा ।

ननु ऊर्ध्वरेतस्त्वं चेदुत्तरमार्गप्रतिपत्तिकारणं पुराणस्मृतिप्रामाण्यादिष्यत, इत्थंविद्त्वमनर्थकं प्राप्तम् । न । गृहस्थान्प्रत्यर्थवत्त्वात । ये गृहस्था अनित्थंविदस्तेषा स्वभावतो दक्षिणो धूमादि: पंथा प्रसिद्ध , तेषां य इत्थं विदु: सगुणं वान्यद्वा ब्रह्म विदु । 'अथ यदु चैवास्मिञ्छव्यं कुर्वन्ति यदि च नार्चिषमेव' इति लिंगादुत्तरेण ते गच्छन्ति । ननूर्ध्वरेतसा गृहस्थानां च समाने आश्रमित्वे ऊर्ध्वरेतसामेवोत्तरेण पथा गमनं न गृहस्थानामिति न युक्तं अग्निहोत्रादिवैदिककर्मवाहुल्ये च गति । नैष दोष । अप्रता हि ते । शत्रुमित्रसंयोगनिमित्तौ हि तेषा रागद्वेषौ । तथा धर्माधर्मौ हिंसानुग्रहनिमित्तौ । हिंसानृतमायाब्रह्मचर्यादि च ब्रह्मशुद्धिकारणमपरिहार्यं तेषाम् । अतोऽपूता । अपूतत्वान्नोत्तरेण पथा गमनम् । हिंसानृतमायाब्रह्मचर्यादिपरिहाराच्च शुद्धात्मानो हीतरे, शत्रुमित्ररागद्वेषादिपरिहाराच्च विरजस , तेषा युक्त उत्तर पंथा । तथा च पौराणिका — "ये प्रजामीपिरेऽधीरास्ते श्मशानानि भेजिरे । ये प्रजा नेपिरे धीरास्तेऽमृतत्वं हि भेजिरे" इत्याहुः । इत्थंविदा गृहस्थानामरण्यवासिना च समानमार्गत्वेऽमृतत्वफले च सत्यरण्यवासिना विद्यानर्थक्यं प्राप्तम् । तथाच श्रुतिविरोध "न तत्र दक्षिणा यन्ति नाविद्वासस्तपस्विन" इति । 'स एनमविदितो न भुनक्ति' इति च विरुद्धम । न । आभूतसंप्लवस्थानस्यामृतत्वेन विवक्षितत्वात । तत्रैवोक्तं पौराणिकै — 'आभूतसंप्लवं स्थानममृतत्व हि भाष्यते" इति । यच्चात्यंतिकममृतत्वं तदपेक्षया 'न तत्र दक्षिणा यन्ति' 'स एनमविदितो न भुनक्ति' इत्याद्याः श्रुतय , इत्यतो न विरोध । 'न च पुनरावर्तन्ते' इति 'इमं मानवमावर्तं नावर्तन्ते इत्यादिश्रुतिविरोध इति चेत् । न । इमं मानवमिति विशेषणात् 'तेषामिह न पुनरावृत्तिरस्ति' इति च । यदि ह्येकांतिनेव नावर्तेरन्निमं मानवमिहेति च विशेषणमनर्थकं स्यात् । इममिहेत्याकृतिमात्रमुच्यत इति चेत् । न । अनावृत्तिशब्देनैव नित्यानावृत्त्यर्थस्य प्रतीतत्वादाकृतिकल्पनाऽनर्थिका । अत इममिहेति च विशेषणार्थवत्त्वायान्यत्रावृत्तिः कल्पनीया । न च सदेकमेवाद्वितीयमित्येवं प्रत्ययवतां मूर्धन्यया नाड्याऽर्चिरादिमार्गेण गमनम् । 'ब्रह्मैव सन्ब्रह्माप्येति'

'तस्मात्तत्सर्वमभवत्' 'न तस्य प्राणा उत्क्रामन्ति अत्रैव समवलीयन्ते' इत्यादिश्रुतिशतेभ्य ॥

ननु तस्माज्जीवादुच्चिक्रमिषोः प्राणा नोत्क्रामन्ति, सहैव गच्छन्तीत्ययमर्थः कल्प्यत इति चेत् । न । 'अत्रैव समवलीयन्ते' इति विशेषणानर्थक्यात् । 'सर्वे प्राणा अनूत्क्रामन्ति' इति च प्राणैर्गमनस्य प्राप्तत्वात् । तस्मादुत्क्रामन्तीत्यनाशंकैवैषा । यद्यपि मोक्षस्य संसारगतिवैलक्षण्यात्प्राणानां जीवेन सहागमनमाशंक्य तस्मान्नोत्क्रामन्तीत्युच्यते, तदापि 'अत्रैव समवलीयन्ते' इति विशेषणमनर्थकं स्यात् । न च प्राणैर्वियुक्तस्य गतिरुपपद्यते जीवत्वं वा । सर्वगतत्वात्सदात्मनो निरवयवत्वात्प्राणसंबंधमात्रेणैव ह्यग्निविस्फुलिंगवज्जीवत्वभेदकारणमित्यत तद्वियोगे जीवत्वं गतिर्वा न शक्या परिकल्पयितुं श्रुतयश्चेन्प्रमाणम् । नच सतोऽणुरवयव स्फुटितो जीवाख्यः सद्रूपं छिद्रीकुर्वन्गच्छतीति शक्यं कल्पयितुम् । तस्मात "तयोर्ध्वमायन्नमृतत्वमेति" इति सगुणब्रह्मोपासकस्य प्राणैः सह नाड्या गमनं, सापेक्षमेव चामृतत्वं न साक्षान्मोक्ष, इति गम्यते । 'तदपराजिता पूस्तदैरं मदीयं सर ' इत्याद्युक्त्वा 'तेषामेवैष ब्रह्मलोक ' इति विशेषणात ॥

अतः पंचाग्निविदो गृहस्था ये चेमेऽरण्ये वानप्रस्थाः परिव्राजकाश्च सह नैष्ठिकब्रह्मचारिभि श्रद्धा तप इत्येवमाद्युपासते श्रद्दधानास्तप्विनश्चेत्यर्थः । उपासनशब्दस्तात्पर्यार्थः । इष्टापूर्ते दत्तमित्युपासत इति यद्वत् । श्रुत्यंतरादेव च सत्यं ब्रह्म हिरण्यगर्भाख्यमुपासते ते सर्वेऽर्चिषमर्चिरभिमानिनी देवतामभिसंभवन्ति प्रतिपद्यन्ते । समानमन्यच्चतुर्थगतिव्याख्यानेन । एष देवयान पंथा व्याख्यातः सत्यलोकावसानो न अंडाद्बहिः । "यदंतरा पितरं मातरं च" इति मंत्रवर्णात ॥

अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्यान्षड्दक्षिणैति मासांस्तान्नैते संवत्सरमभिप्राप्नुवन्ति ॥३॥

अथेत्यर्थांतरप्रस्तावनार्थो, य इमे गृहस्था ग्रामे । ग्राम इति गृहस्थानामसाधारणं विशेषणमरण्यवासिभ्यो व्यावृत्त्यर्थ, यथा वानप्रस्थपारिव्राजकानां अरण्यं विशेषणं गृहस्थेभ्यो व्यावृत्त्यर्थ तद्वत । इष्टापूर्ते इष्टमग्निहोत्रादि वैदिकं कर्म, पूर्तं वापीकूपतडागारामादिकरणम् । दत्त बहिर्वेदि यथाशक्त्यर्हेभ्यो द्रव्यसंविभागो दत्तम् । इत्येवंविधं परिचरणपरित्राणाद्युपासते । इतिशब्दस्य प्रकार-

दर्शनार्थत्वात् । ते दर्शनवर्जितत्वाद्धूमं धूमाभिमानिनीं देवतामभिसंभवन्ति प्रतिपद्यन्ते । तयातिवाहिता धूमाद्रात्रिं रात्रिदेवतां रात्रेरपरपक्षदेवतां एवमेव कृष्णपक्षाभिमानिनीं अपरपक्षात् यान्षण्मासान्दक्षिणा दक्षिणां दिशमेति सविता । तान्मासान्दक्षिणायनषण्मासाभिमानिनीर्देवताः प्रतिपद्यन्त इत्यर्थ । संघचारिण्यो हि षण्मासदेवता इति मासानिति बहुवचनप्रयोगस्तासु । नैते कर्मिणः प्रकृता. संवत्सरं संवत्सराभिमानिनीं देवतामभिप्राप्नुवन्ति । कुतः पुन संवत्सरप्राप्तिप्रसंगो यत. प्रतिषिध्यते ? अस्ति हि प्रसंग । संवत्सरस्य ह्यवयवभूते दक्षिणोत्तरायणे. तत्राचिरादिमार्गप्रवृत्ताना उदगयनमासेभ्योऽवयविनः संवत्सरस्य प्राप्तिरुक्ता । अत इहापि तदवयवभूतानां दक्षिणायनमासानां प्राप्तिं श्रुत्वा तदवयविन संवत्सरस्यापि पूर्ववत्प्राप्तिरापन्ना । इत्यतस्तत्प्राप्ति. प्रतिषिध्यते - नैते संवत्सरमभिप्राप्नुवन्तीति ॥

मासेभ्य पितृलोकं पितृलोकादाकाशमाकाशाच्चंद्रममसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति ॥४॥

मासेभ्य पितृलोकं पितृलोकादाकाशमाकाशाच्चंद्रममम् । कोऽसौ यस्तैः प्राप्यते चंद्रमा, य एष दृश्यतेऽन्तरिक्षे सोमो राजा ब्राह्मणानां, तदन्नं देवाना, तं चंद्रममसमन्नं देवा इंद्रादयो भक्षयन्ति । अतस्ते धूमादिना गत्वा चंद्रभूता कर्मिणो देवैर्भक्ष्यन्ते । नन्वनर्थायेष्टादिकरणं यद्यन्नभूता देवैर्भक्ष्येरन् । नैष दोषः । अन्नमित्युपकरणमात्रस्य विवक्षितत्वात् । न हि ते कवलीत्क्षेपेण देवैर्भक्ष्यन्ते । किं तर्हि उपकरणमात्रं देवानां भवन्ति ते स्त्रीपशुभृत्यादिवत् । दृष्टश्चान्नशब्द उपकरणेषु, स्त्रियोऽन्नं पशवोऽन्नं विशोऽन्नं राज्ञामित्यादि । न च तेषां स्त्र्यादीना पुरुषोपभोग्यत्वेऽप्युपभोगो नास्ति । तस्मात्कर्मिणो देवानामुपभोग्या अपि सन्तः सुखिनो देवैः क्रीडन्ति । शरीरं च तेषां सुखोपभोगयोग्यं चंद्रमंडल आप्यमारभ्यते । तदुक्तं पुरस्तान्छ्रद्धाशब्दा आपो द्युलोकाग्नौ हुता. सोमो राजा संभवतीति । ता आपः कर्मसमवायिन्य इतरेश्च भूतैरनुगता द्युलोकं प्राप्य चंद्रत्वमापन्ना शरीराद्यारंभिका इष्टाद्युपासकाना भवन्ति । अंत्यायां च शरीराहुतावग्नौ हुतायामग्निना दह्यमाने शरीरे तदुत्था आपो धूमेन सहोर्ध्वं यजमानमावेष्ट्य चंद्रमंडलं प्राप्य कुशर्मृत्तिकास्थानीया बाह्यशरीरारंभिका भवन्ति । तदारब्धेन च शरीरेणेष्टादिफलमुपभुंजाना आसते ॥

तस्मिन्यावत्संपातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाभ्रं भवति ॥५॥

यावत्तदुपभोगनिमित्तस्य कर्मण क्षय, संपतन्ति येनेति संपात कर्मण क्षयो यावत्संपातं यावत्कर्मण क्षय इत्यर्थ । तावत्तस्मिश्चंद्रमंडले उषित्वा अथानंतरमेतमेव वक्ष्यमाणमध्वानं मार्ग पुनर्निवर्तन्ते । पुनर्निवर्तन्त इति प्रयोगात्पूर्वमप्यसकृच्चंद्रमंडलं गता निवृत्ताश्चासन्निति गम्यते । तस्मादिह लोके इष्टादिकर्मोपचित्य चंद्रं गच्छन्ति । तत्क्षये चावर्तन्ते । क्षणमात्रमपि तत्र स्थातुं न लभ्यते स्थितिनिमित्तकर्मक्षयात स्नेहक्षयादिव प्रदीपस्य ॥

तत्र किं येन कर्मणा चंद्रमंडलमारूढस्तस्य सर्वस्य क्षये तस्मादवरोहणं, किं वा सावशेष इति । किं ततः । यदि सर्वस्यैव क्षय कर्मण चंद्रमंडलस्थस्यैव मोक्ष. प्राप्नोति । तिष्ठतु तावत्तत्रैव । मोक्षः स्यान्न वेति । तत आगतस्येह शरीरोपभोगादि न संभवति । "ततः शेषेण" इत्यादिस्मृतिविरोधश्च स्यात । ननु इष्टापूर्तदत्तव्यतिरेकेणापि मनुष्यलोके शरीरोपभोगनिमित्तानि कर्माण्यनेकानि संभवन्ति, न च तेषा चंद्रमंडल उपभोग । अतोऽक्षीणानि तानि । यन्निमित्तं चंद्रमंडलमारूढस्तान्येव क्षीणानीत्यविरोध । शेषशब्दश्च सर्वेषा कर्मत्वसामान्यादविरुद्धः । अत एव च तत्रैव मोक्ष. स्यादिति दोषाभाव । विरुद्धानेकयोन्युपभोगफलानां च कर्मणामेकैकस्य जंतोरारंभकत्वसंभवात । न चैकस्मिन जन्मनि सर्वकर्मणां क्षय उपपद्यते । ब्रह्महत्यादेश्चैकस्य कर्मणोऽनेकजन्मारंभकत्वस्मरणात । स्थावरादिप्राप्तानां चात्यंतमृढानामुत्कर्षहेतो कर्मण आरंभकत्वासंभवात । गर्भभूतानां च क्षममानाना कर्मासंभवे संसारानुपपत्तिः । तस्मान्नैकस्मिन जन्मनि सर्वेषां कर्मणामुपभोग ॥

यत्तु कैश्चिदुच्यते-- सर्वकर्माश्रयोपमर्देन प्रायेण कर्मणां जन्मारंभकत्वम् । तत्र कानिचित्कर्माण्यनारंभकत्वेनैव तिष्ठन्ति कानिचिज्जन्मारभत इति नोपपद्यते । मरणस्य सर्वकर्माभिव्यंजकत्वात्स्वगोचराभिव्यंजकप्रदीपवदिति । तदसत् । सर्वस्य सर्वात्मकत्वाभ्युपगमात् । न हि सर्वस्य सर्वात्मकत्वे देशकालनिमित्तावरुद्धत्वात्सर्वात्मनोपमर्द. कस्यचित्क्वचिदभिव्यक्तिर्वा सर्वात्मनोपपद्यते । तथा कर्मणामपि साश्रयाणा भवेत् । यथा च पूर्वानुभूतमनुष्यमयूरमर्कटादिजन्माभिसंस्कृता विरुद्धानेकवासना मर्कटत्वप्रापकेण कर्मणा मर्कटजन्म आरभमाणेन

नोपमृद्यन्ते तथा कर्माण्यपि अन्यजन्मप्राप्तिनिमित्तानि नोपमृद्यन्त इति युक्तम् । यदि हि सर्वाः पूर्वजन्मानुभववासना उपमृद्येरन्मर्कटजन्मनिमित्तेन कर्मणा मर्कटजन्मन्यारब्धे मर्कटस्य जातमात्रस्य मातुः शाखायाः शाखांतरगमने मातुरुदरसंलग्नत्वादिकौशलं न प्राप्नोति । इह जन्मन्यनभ्यस्तत्वात् । न चातीतानंतरजन्मनि मर्कटत्वमेवासीत्तस्येति शक्यं वक्तुम । 'तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च' इति श्रुते । तस्माद्वासनावत् नाशेषकर्मोपमर्द इति शेषकर्मसंभवः । यत एवं तस्माच्छेषेणोपभुक्तात्कर्मण संसार उपपद्यत इति न कश्चिद्विरोध ॥

कोऽसावध्वा यं प्रति निवर्तन्त इत्युच्यते । यथेतं यथागतं निवर्तन्ते । ननु मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चंद्रमसमिति गमनक्रम उक्तो, न तथा निवृत्ति । किं तर्ह्याकाशाद्वायुमित्यादि, कथं यथेतमित्युच्यते । नैष दोषः । आकाशप्राप्तेस्तुल्यत्वात्पृथिवीप्राप्तेश्च । न चात्र यथेतमेवेति नियमो अनेवंविधमपि निवर्तन्ते, पुनर्निवर्तन्त इति तु नियम । अत उपलक्षणार्थमेतद्यथेतमिति । अतो भौतिकमाकाशं तावत्प्रतिपद्यन्ते । या तेषां चंद्रमंडले शरीरारंभिका आप आसंस्तास्तेषा तत्रोपभोगनिमित्तानां कर्मणा क्षये विलीयन्ते । घृतसंस्थानामवाग्निसंयोगे, ता विलीना अंतरिक्षस्था आकाशभूता इव सूक्ष्मा भवन्ति । ता अंतरिक्षाद्वायुर्भवन्ति । वायुप्रतिष्ठा वायुभूता इतश्च अमुतश्च ऊह्यमानास्ताभि सह क्षाणकर्मा वायुभूता भवति । वायुर्भूत्वा ताभिः सहैव धूमो भवति । धूमो भूत्वाभ्रमब्भरणमात्ररूपो भवति ॥

अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्तेऽतो वै खलु दुर्निष्प्रपतरं यो यो ह्यन्नमत्ति यो रेतः सिंचति तद्भूय एव भवति ॥६॥

अभ्र भूत्वा ततः सेचनसमर्थो मेघो भवति, मेघो भूत्वोन्नतेषु प्रदेशेष्वथ प्रवर्षति । वर्षधारारूपेण शेषकर्मा पततीत्यर्थः । ते व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इत्येवंप्रकारा जायन्ते । क्षीणकर्मणामनेकत्वाद्बहुवचननिर्देश । मेघादिषु पूर्वेष्वेकरूपत्वादेकवचननिर्देशः । यस्माद्गिरितटदुर्गनदीगमुद्गारण्यमरुदेशादिसंनिवेशसहस्राणि वर्षधाराभि पतितानाम् । अतस्तस्माद्धेतोर्वै खलु दुर्निष्प्रपतरं दुर्निष्क्रमणं दुर्निःसरणम् । यतो गिरितटादुदकस्रोतसोह्यमाना नदी प्राप्नुवन्ति,

ततः समुद्रं, ततो मकरादिभिर्भक्ष्यन्ते, तेऽप्यन्येन, तत्रैव च सह मकरेण समुद्रे विलीना. समुद्राभोभिर्जलधरैराकृष्टाः पुनर्वर्षधाराभिर्मरुदेशे शिलातटे वाऽगम्ये पतितास्तिष्ठन्ति. कदाचिद्व्यालमृगादिपीता भक्षिताश्चान्ये , तेऽप्यन्ये , इत्येवंप्रकाराः परिवर्तेरन । कदाचिदभक्ष्येषु स्थावरेषु जातास्तत्रैव शुष्यैरन भक्ष्येष्वपि स्थावरेषु जाताना रेतःसिग्देहसंबंधो दुर्लभ एव बहुत्वात्स्थावराणा, इत्यतो दुर्निष्क्रमणत्वम। अथवा अतोऽस्माद्व्रीहियवादिभावात् दुर्निष्प्रपततरं दुर्निर्गमतरम । दुर्निष्प्रपततरमिति तकार एकां लुप्तो द्रष्टव्य । व्रीहियवादिभावो दुर्निष्प्रपत तस्मादपि दुर्निष्प्रपतादेतःसिग्देहसंबंधो दुर्निष्प्रपततर इत्यर्थ । यस्मादूर्ध्वरेतोभिर्बालैः पुंस्त्वरहितैः स्थविरैर्वा भक्षिता अंतराल शीर्यन्ते. अनेकत्वादन्नादानाम् । कदाचित्काकतालीयवृत्त्या रेतःसिग्भिर्भक्ष्यन्ते यदा, तदा रेत सिग्भावं गतानां कर्मणो वृत्तिलाभ । कथम् । यो यो ह्यन्नमत्त्यनुशयिभि संश्लिष्टं रेत सिग्यश्च रेत सिचत्यृतुकाले योषिति तद्भूय एव तदाकृतिरेव भवति । तदवयवाकृतिभूयस्त्वं भूय इत्युच्यते रेतोरूपेण योषितो गर्भाशयेऽन्त प्रविष्टोऽनुशयी । रेतसो रेतःसिगाकृतिभावितत्वात् । 'सर्वेभ्योऽगेभ्यस्तेज संभृतम' इति हि श्रुत्यंतरात् । अतो रेत सिगाकृतिरेव भवतीत्यर्थ । तथाहि पुरुषात्पुरुषो जायते गोर्गवाकृतिरेव न जात्यंतराकृति तस्माद्युक्तं तद्भूय एव भवतीति ॥

ये त्वन्येऽनुशयिभ्यश्चंद्रमंडलमनारुह्य इहैव पापकर्मभिर्घोरैर्व्रीहियवादिभावं प्रतिपद्यन्ते पुनर्मनुष्यादिभावं तेषा नानुशयिनामिव दुर्निष्प्रपततरम् । कस्मात् । कर्मणा हि तैर्व्रीहियवादिदेह उपात्त इति तदुपभोगनिमित्तक्षये व्रीह्यादिस्तंबदेहविनाशे यथाकर्माजितं देहान्तरं नवं नवं जलूकावत्संक्रमन्ते सविज्ञाना एव । "सविज्ञानो भवति सविज्ञानमेवान्ववक्रामति" इति श्रुत्यंतरात । यद्यप्युपसंहृतकरणाः सन्तो देहान्तरं गच्छन्ति तथापि स्वप्नवद्देहान्तरप्राप्तिनिमित्तकर्मोद्भावितवासनाज्ञानेन सविज्ञाना एव देहान्तरं गच्छन्ति । श्रुतिप्रामाण्यात । तथा अर्चिरादिना धूमादिना च गमनं स्वप्न इवोद्भूतविज्ञानेन । लब्धवृत्तिकर्मनिमित्तत्वाद्गमनस्य । न तथा अनुशयिनां व्रीह्यादिभावेन जातानां सविज्ञानमेव रेतःसिग्योषिद्देहसंबंध उपपद्यते । नहि व्रीह्यादिलवनकंडनपेषणादौ च सविज्ञानानां स्थितिरास्ति । ननु चंद्रमंडलादपि अवरोहतां देहान्तरगमनस्य तुल्यत्वात् जलूकावत्सविज्ञानता एव युक्ता । तथा सति घोरे नरकानुभव इष्टापूर्ता-

दिकारिणा चंद्रमंडलात् आरभ्य प्राप्तो यावत ब्राह्मणादिजन्म। तथा च सति अनर्थायैवेष्टापूर्तादुपासनं विहितं स्यात्। श्रुतेश्चाप्रामाण्यं प्राप्तं वैदिकानां कर्मणामनर्थानुबंधित्वात्। न। वृक्षारोहणपतनवद्विशेषसंभवात। देहाद्देहान्तरं प्रतिपित्सोः कर्मणो लब्धवृत्तित्वात्कर्मणोद्भावितेन विज्ञानेन सविज्ञानत्वं युक्तम्। वृक्षाग्रमारोहत इव फलं जिघृक्षोः। तथाचिरादिना गच्छता सविज्ञानत्वं भवेत्। धूमादिना च चंद्रमंडलमारुरुक्षताम्। न तथा चंद्रमंडलादवरुरुक्षता वृक्षाग्रादिव पतता सचेतनत्वम्। यथा च मुद्गराद्यभिहतानां तदभिघातवेदनानिमित्तसंमूर्छितप्रतिबद्धकरणानां स्वदेहेनैव देशाद्देशान्तरं नीयमानानां विज्ञानशून्यता दृष्टा, तथा चंद्रमंडलान्मानुषादिदेहान्तरं प्रत्यवरुरुक्षतां स्वर्गभोगनिमित्तकर्मक्षयान्मृदितावद्देहानां प्रतिबद्धकरणानाम्। अतस्तेऽपरित्यक्तदेहबीजभूताभिरद्भिर्मूर्छिता इवाकाशादिक्रमेणेमामवरुह्य कर्मनिमित्तजातिस्थावरदेहे संश्लिष्यन्ते प्रतिबद्धकरणतया अनुद्भूतविज्ञाना एव। तथा लवनकंडनपेषणसंस्कारभक्षणरसादिपरिणामेषु सेककालेषु मूर्छितवदेव। देहान्तरारंभकस्य कर्मणोऽलब्धवृत्तित्वात्। देहबीजभूताप्संबंधापरित्यागेनैव सर्वास्ववस्थासु वर्तन्त इति जलकावश्चेतनावत्त्वं न विरुध्यते। अंतराले त्वविज्ञानं मूर्छितवदेवेत्यदोषः॥ न च वैदिकानां कर्मणां हिंसायुक्तत्वेनोभयहेतुत्वं शक्यमनुमानुम्। हिंसायाः शास्त्रचोदितत्वात्। "अहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्यः" इति श्रुतेः शास्त्रचोदितायाः हिंसायाः नाधर्महेतुत्वमभ्युपगम्यते। अभ्युपगतेऽप्यधर्महेतुत्वे मंत्रैर्विषादिवत्तदपनयोपपत्तेर्न दुःखकार्यारंभकत्वोपपत्तिर्वैदिकानां कर्मणां, मंत्रेणेव विषभक्षणस्येति॥

तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वाथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरञ्श्वयोनिं वा सूकरयोनिं वा चंडालयोनिं वा॥७॥

तत्तत्र तेष्वनुशयिनो य इह लोके रमणीयं शोभनं चरणं शीलं येषां ते रमणीयचरणाः, रमणीयचरणेनोपलक्षितः शोभनोऽनुशयः पुण्यं कर्म येषां ते रमणीयचरणा उच्यन्ते। क्रौर्यानृतमायावर्जितानां हि शक्य उपलक्षयितुं शुभानुशयसद्भावः। तेनानुशयेन पुण्येन कर्मणा चंद्रमंडले भुक्तशेषेणाभ्याशो ह क्षिप्रमेव, यदिति क्रियाविशेषणं, ते रमणीयां क्रौर्यादिवर्जितां योनिमापद्येरन्प्राप्नुयुर्ब्रा-

ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा स्वकर्मानुरूपेण । अथ पुनर्ये तद्विपरीता कपूयचरणोपलक्षितकर्माणोऽशुभानुशया अभ्याशो ह यत्ते कपूयां यथाकर्म योनिमापद्येरन्कपूयामेव धर्मसंबंधवर्जिता जुगुप्सिता योनिमापद्येरन श्वयोनिं वा सूकरयोनिं वा चंडालयोनिं वा स्वकर्मानुरूपेणैव ॥

ये तु रमणीयचरणा द्विजातयस्ते स्वकर्मस्थाश्चेदिष्टादिकारिणस्ते धूमादिगत्या गच्छन्त्यागच्छन्ति च पुनः पुनर्घटीयंत्रवत् । विद्या चेत्प्राप्नुयुस्तदाऽर्चिरादिना गच्छन्ति, यदा तु न विद्यासेविनो नापि इष्टादिकर्म सेवन्ते तदा—

अथैतयोः पथोर्न कतरेणचन तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं तेनासौ लोको न संपूर्यते तस्माज्जुगुप्सेत तदेष श्लोकः ॥८॥

अथैतयोः पथोर्यथोक्तयोरर्चिर्धूमादिलक्षणयोः न कतरेणान्यतरेणचनापि यन्ति । तानीमानि भूतानि क्षुद्राणि दंशमशककीटादीन्यसकृदावर्तानि भवन्ति । अत उभयमार्गपरिभ्रष्टा ह्यसकृज्जायन्ते म्रियन्ते चेत्यर्थः । तेषां जननमरणसंततेरनुकरणमिदमुच्यते । जायस्व म्रियस्वेतीश्वरनिमित्तचेष्टोच्यते । जननमरणलक्षणेनैव कालयापना भवति । न तु क्वियासु भोगेषु वा कालोऽस्तीत्यर्थः । एतत्क्षुद्रजंतुलक्षणं तृतीयं पर्वोक्तौ पंथानावपेक्ष्य स्थानं संसरताम् । येनैवं दक्षिणमार्गगा अपि पुनरागच्छन्त्यनधिकृतानां ज्ञानकर्मणोरगमनमेव दक्षिणेन पथेति । तेनासौ लोको न संपूर्यते । पंचमस्तु प्रश्नः पंचाग्निविद्यया व्याख्यात । प्रथमो दक्षिणोत्तरमार्गाभ्यामपाकृतः । दक्षिणोत्तरयोः पथोर्व्यावर्तनापि— मृतानामग्नौ प्रक्षेप समानस्तेनो व्यावर्त्यान्येऽर्चिरादिना यन्त्यन्ये धूमादिना पुनरुत्तरदक्षिणायने षण्मासान्प्राप्नुवन्त संयुज्य पुनर्व्यावर्तन्ते । अन्ये संवत्सरमन्ये मासेभ्यः पितृलोकं— इति व्याख्याता । पुनरावृत्तिरपि क्षीणानुशयाना चंद्रमंडलादाकाशादिक्रमेणोक्ता । अमुष्य लोकस्यापूरणं स्वशब्देनैवोक्तम्— तेनासौ लोको न संपूर्यत इति । यस्मादेवं कष्टा संसारगतिस्तस्माज्जुगुप्सेत । यस्माच्च जन्ममरणजनितवेदनानुभवकृतक्षणाः क्षुद्रजंतवो ध्वान्ते च घोरे दुस्तरे प्रवेशिताः, सागर इवागाधेऽप्लवे निराशाश्चोत्तरणं प्रति, तस्माच्चैवंविधां संसारगतिं जुगुप्सेत बीभत्सेत घृणा भवेन्मा भूदेवंविधे संसारमहोदधौ घोरे पात इति । तदेतस्मिन्नर्थे एष श्लोकः पंचाग्निविद्यास्तुतये ॥

स्तेनो हिरण्यस्य सुरां पिबंश्च गुरोस्तल्पमावसन्ब्रह्महा चैते पतन्ति चत्वारः पंचमश्चाचरंस्तैरिति ॥९॥

स्तेनो हिरण्यस्य ब्राह्मणसुवर्णस्य हर्ता। सुरां पिबन्ब्राह्मण सन्। गुरोश्च तल्पं दारानावसंन। ब्रह्महा ब्राह्मणस्य हन्ता च। इत्येते पतन्ति चत्वार। पंचमश्च तै सह आचरन्निति ॥

अथ ह य एतानेवं पंचाग्नीन्वेद न सह तैरप्याचरन्पाप्मना लिप्यते शुद्धः पूतः पुण्यलोको भवति य एवं वेद य एवं वेद ॥१०॥ इति दशम खंड ॥

अथ ह पुनर्यो यथोक्तान्पंचाग्नीन्वेद स तैरप्याचरन्महापातकिभि. सह न पाप्मना लिप्यते शुद्ध एव। तेन पंचाग्निदर्शनेन पावितो यस्मात्पूत. पुण्यो लोक. प्राजापत्यादिर्यस्य सोऽयं पुण्यलोको भवति. य एवं वेद यथोक्तं समस्तं पंचभि प्रश्नै. पृष्टमर्थजातं वेद। द्विरुक्ति. समस्तप्रश्ननिर्णयप्रदर्शनार्था ॥ इति दशम खंड ॥ ५.१०.—

दक्षिणेन पथा गच्छतामन्नभाव उक्त तद्देवानामन्नं' 'तं देवा भक्षयन्ति' इति, क्षुद्रजंतुलक्षणा च कष्टा संसारगतिरुक्ता। तदुभयदोषपरिजिहीर्षया वैश्वानरात्मभावप्रतिपत्त्यर्थमुत्तरो ग्रंथ आरभ्यते। 'अत्यन्नं पश्यसि प्रियं' इत्यादिलिंगात्। आख्यायिका तु मुखावबोधार्था विद्यासंप्रदानन्यायप्रदर्शनार्था च—

प्राचीनशाल औपमन्यव सत्ययज्ञः पौलुषिरिंद्रद्युम्नो भाल्लवेयो जनः शार्कराक्ष्यो बुडिल आश्वतराश्विस्ते हैते महाशाला महाश्रोत्रियाः समेत्य मीमांसां चक्रुः को न आत्मा किं ब्रह्मेति ॥१॥

प्राचीनशाल इति नामत उपमन्योरपत्यमौपमन्यव। सत्ययज्ञो नामतो पुलुषस्यापत्यं पौलुषि.। तथेंद्रद्युम्नो नामतो भल्लवेरपत्यं भाल्लविस्तस्यापत्यं भाल्लवेय.। जन इति नामत शर्कराक्षस्यापत्यं शार्कराक्ष्य.। बुडिलो नामत. अश्वतराश्वस्यापत्यमाश्वतराश्वि.। पंचापि ते हैते महाशाला महागृहस्था विस्तीर्णाभि. शालाभिर्युक्ता. संपन्ना इत्यर्थ.। महाश्रोत्रिया. श्रुताध्ययनवृत्तसंपन्ना इत्यर्थ.। त एवंभूता. सन्त. समेत्य संभूय क्वचिन्मीमांसां विचारणां चक्रु. कृतवन्त इत्यर्थ.। कथम्। को नोऽस्माकमात्मा किं ब्रह्मेति। आत्मब्रह्मशब्द-

योरितरेतरविशेषणविशेष्यत्वम् । ब्रह्मेत्यध्यात्मपरिच्छिन्नमात्मानं निवर्तयति, आत्मेति चात्मव्यतिरिक्तस्यादित्यादिब्रह्मण उपास्यत्वं निवर्तयति । अभेदेनात्मैव ब्रह्म ब्रह्मैवात्मेत्येवं सर्वात्मा वैश्वानरो ब्रह्म स आत्मेत्येतस्मिन्सिद्धं भवति । मूर्धा ते व्यपतिष्यत अंधोऽभविष्यत इत्यादिलिंगात ॥

ते ह संपादयांचक्रुरुद्दालको वै भगवन्तोऽयमारुणिः संप्रतीममात्मानं वैश्वानरमध्येति तं हताभ्यागच्छामेति तं ह्याभ्याजग्मुः ॥२॥

ते ह मीमांसन्तोऽपि निश्चयमलभमाना संपादयाचक्रुः संपादितवन्त आत्मन उपदेष्टारम् । उद्दालको वै प्रसिद्धो नामतो, भगवन्त पूजावन्तोऽयमारुणिररुणस्यापत्यं संप्रति सम्यगिममात्मानं वैश्वानरमस्मदभिप्रेतमधीत इति स्मरति ॥ तं हैतेदानीमभ्यागच्छामेत्येवं निश्चित्य तं ह्याभ्याजग्मु गतवन्तस्तमारुणिम् ॥

स ह संपादयांचकार प्रक्ष्यन्ति मामिमे महाशाला महाश्रोत्रियास्तेभ्यो न सर्वमिव प्रतिपत्स्ये हंताहमन्यमभ्यनुशास्मानीति ॥३॥

स ह तान्दृष्ट्वैव तेषामागमनप्रयोजनं बुद्ध्वा संपादयाचकार । कथम् । प्रक्ष्यन्ति मा वैश्वानरमिमे महाशाला महाश्रोत्रियास्तेभ्योऽहं न सर्वमिव पृष्टं प्रतिपत्स्ये वक्तुं नोत्सहे । अतो हंताहमिदानीमन्यमेषामभ्यनुशास्मानि वक्ष्याम्युपदेष्टारमिति ॥

तान्होवाचाश्वपतिर्वै भगवन्तोऽयं कैकेयः संप्रतीममात्मानं वैश्वानरमध्येति तं हंताभ्यागच्छामेति तं ह्याभ्याजग्मुः ॥४॥

एवं संपाद्य तान्होवाच । अश्वपतिर्वै नामतो भगवन्तोऽयं केकयस्यापत्यं कैकेयः संप्रति सम्यगिममात्मानं वैश्वानरमध्येतीत्यादि समानम ॥

तेभ्यो ह प्रातेभ्यः पृथगर्हाणि कारयांचकार स ह प्रातः संजिहान उवाच न मे स्तेनो जनपदे न कदर्यो न मद्यपो नानाहिताग्निर्नाविद्वान्न स्वैरी स्वैरिणी कुतो यक्ष्यमाणो वै भगवन्तोऽहमस्मि यावदेकैकस्मा ऋत्विजे धनं दास्यामि तावद्भगवद्भ्यो दास्यामि वसन्तु भगवन्त इति ॥५॥

तेभ्यो ह राजा प्रातेभ्य पृथक्पृथगर्हाण्यर्हणानि पुरोहितैर्भृत्यैश्च कारयांचकार कारितवान् । स ह्यन्येद्यू राजा प्रातः संजिहान उवाच विनयेनोपगम्य—एतद्धनं मत्त उपादध्वमिति । तैः प्रत्याख्यातो मयि दोषं पश्यन्ति नूनं, यतो न

प्रतिगृह्णन्ति मन्तो धनमिति मन्वान आत्मनः सद्भूतता प्रतिपिपादयिषन्नाह । न मे मम जनपदे स्तेनः परस्वहर्ता विद्यते । न कदर्योऽदाता सति विभवे । न मद्यपो द्विजोत्तमः सन । नानाहिताग्निः शतगु । नाविद्वानधिकारानुरूपम । न स्वैरी परदारेषु गन्ता । अत एव स्वैरिणी कुतो दुश्चारिणी न संभवतीत्यर्थ । तेश्च न वयं धनेनार्थिन इत्युक्त आह अल्पं मत्वेते धनं न गृह्णन्तीति– यक्ष्यमाणो वै कतिभिरहोभिरहं हे भगवन्तोऽस्मि । तदर्थं क्लृप्तं धनं मया यावदेकैकस्मै यथोक्तमृत्विजे धनं दास्यामि तावत्प्रत्येकं भगवद्भ्योऽपि दास्यामि । वसन्तु भगवन्तः पश्यन्तु च मम यागम् ॥

ते होचुर्येन हैवार्थेन पुरुषश्चरेत्तं हैव वदेदात्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहीति ॥६॥

इत्युक्तास्ते होचुः । येन हैवार्थेन प्रयोजनेन यं प्रति चरेद्गच्छेत्पुरुषस्तं हैवार्थं वदन् । इदमेव प्रयोजनमागमनस्येत्ययं न्यायः सताम् । वयं च वैश्वानरज्ञानार्थिन । आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि सम्यग्जानासि । अतस्तमेव नोऽस्मभ्यं ब्रूहि ॥

तान्होवाच प्रातर्व प्रतिवक्तास्मीति ते ह समित्पाणय पूर्वाह्णे प्रतिचक्रमिरे तान्हानुपनीयैवैतदुवाच ॥७॥ इति एकादशः खंडः ॥

इत्युक्तास्तान्होवाच । प्रातर्वो युष्मभ्यं प्रतिवक्तास्मि प्रतिवाक्यं दातास्मि । इत्युक्तास्ते ह राज्ञोऽभिप्रायज्ञाः समित्पाणयः समिद्धारहस्ता अपरेद्युः पूर्वाह्णे राजानं प्रतिचक्रमिरे गतवन्तः । यत एवं महाशाला महाश्रोत्रिया ब्राह्मणाः सन्तो महाशालत्वाद्यभिमानं हित्वा समिद्धारहस्ता जातितो हीनं राजानं विद्यार्थिनो विनयेनोपजग्मुः । तथान्यैर्विद्योपादित्सुभिर्भवितव्यम् । तेभ्यश्चादाद्विद्यामनुपनीयैवोपनयनमकृत्वैव तान् । यथा योग्येभ्यो विद्यामदात्तथान्येनापि विद्या दातव्येत्याख्यायिकार्थः । एतद्वैश्वानरविज्ञानमुवाचेति वक्ष्यमाणेन संबंधः ॥ ५.११ —

औपमन्यव कं त्वमात्मानमुपास्स इति दिवमेव भगवो राजन्निति होवाचैष वै सुतेजा आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्तव सुतं प्रसुतमासुतं कुले दृश्यते ॥१॥

स कथमुवाचेत्याह— औपमन्यव हे कमात्मानं वैश्वानरं त्वमुपास्स इति पप्रच्छ । नन्वयमन्याय आचार्यः सञ्शिष्यं पृच्छतीति । नैष दोषः । 'यद्वेत्थ तेन

मोपसीद ततस्त ऊर्ध्वं वक्ष्यामीति' न्यायदर्शनात । अन्यत्राप्याचार्यस्याप्रतिभानवति शिष्ये प्रतिभोत्पादनार्थः प्रश्नो दृष्टोऽजातशत्रोः, 'कैष तदाभूत्कुत एतदागात्' इति । दिवमेव द्युलोकमेव वैश्वानरमुपास्से भगवो राजन्निति होवाच । एष वै सुतेजाः शोभनं तेजो यस्य सोऽयं सुतेजा इति प्रसिद्धो वैश्वानर आत्मा आत्मनोऽवयवभूतत्वात् यं त्वमात्मानमात्मैकदेशमुपास्से तस्मात्सुतेजसो वैश्वानरस्योपासनात्तव सुतमभिसुतं सोमरूपं कर्माणि प्रसुतं प्रकर्षेण च सुतमामृतं चाहर्गणादिषु तव कुले दृश्यतेऽतोऽव कर्मिणस्त्वत्कुलीना इत्यर्थः ॥

अन्यन्न पश्यसि प्रियमन्यन्न पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मान वैश्वानरमुपास्ते मूर्धा त्वेष आत्मन इति होवाच मूर्धा ते व्यपतिष्यद्यन्मां नागमिष्य इति ॥ इति द्वादश खड ॥

अन्यन्न दीप्तादि सन्पश्यसि च पुत्रपौत्रादि प्रियमिष्टम् । अन्योऽप्यत्त्यन्नं पश्यति च प्रियं भवत्यस्य सुत प्रसुतमामृतमित्यादि कर्मित्वं ब्रह्मवर्चसं कुले यः कश्चिदेतं यथोक्तमेवं वैश्वानरमुपास्ते । मूर्धा त्वात्मनो वैश्वानरस्यैष न समस्तो वैश्वानर । अत समस्तबुद्ध्या वैश्वानरस्योपासनान्मूर्धा शिरस्ते विपरीतग्राहिणो व्यपतिष्यद्विपतितमभविष्यत् यद्यहि मा नागमिष्यो नागतोऽभविष्य । साध्वकार्षीर्यन्मामागतोऽस्यभिप्राय ॥ इति द्वादश खंड ॥ ५.१२ —

अथ होवाच सत्ययज्ञं पौलुषिं प्राचीनयोग्य कं त्वमात्मानमुपास्स इत्यादित्यमेव भगवो राजन्निति होवाचैष वै विश्वरूप आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्तव बहु विश्वरूपं कुले दृश्यते ॥१॥

अथ होवाच सत्ययज्ञं पौलुषि— हे प्राचीनयोग्य कं त्वमात्मानमुपास्स इति । आदित्यमेव भगवो राजन्निति होवाच । शुक्लनीलादिरूपत्वाद्विश्वरूपत्वमादित्यस्य, सर्वरूपत्वाद्वा । सर्वाणि रूपाणि हि त्वाष्ट्राणि यतोऽतो वा विश्वरूप आदित्य । तदुपासनात्तव बहु विश्वरूपमिहामुत्रार्थमुपकरणं दृश्यते कुले ॥

प्रवृत्तोऽश्वतरीरथो दासीनिष्कोऽत्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते चक्षुष्ट्वेतदात्मन इति होवाचांधोऽभविष्यो यन्मां नागमिष्य इति ॥२॥

किंच त्वामनु प्रवृत्तोऽश्वतर्याभ्यां युक्तो रथोऽश्वतरीरथो दासीनिष्को दासीभिर्युक्तो निष्को हारो दासीनिष्क. । अन्यन्नमित्यादि समानम् । चक्षुर्वैश्वानरस्य

तु सविता । तस्य समस्तबुद्ध्योपासनादंधोऽभविष्य॰ चक्षुहानोऽभविष्यो यन्मां नागमिष्य इति पूर्ववत् ॥ इति त्रयोदश खंड ॥ ५.१३.—

अथ होवाचेंद्रद्युम्नं भाल्लवेयं वैयाघ्रपद्य कं त्वमात्मानमुपास्स इति वायुमेव भगवो॰राजन्निति होवाचैष वै पृथग्वर्त्मात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वा पृथग्बलय आयन्ति पृथग्रथश्रेणयोऽनुयन्ति ॥१॥

अथ होवाचेंद्रद्युम्नं भाल्लवेय वैयाघ्रपद्य कं त्वमात्मानमुपास्स इत्यादि समानम । पृथग्वर्त्मा नाना वर्त्मानि यस्य वायो आवहोद्वहादिभिर्भेदैर्वर्तमानस्य सोऽयं पृथग्वर्त्मा वायु । तस्मात्पृथग्वर्त्मात्मनो वैश्वानरस्योपासनात्पृथङ्नानादिक्कास्त्वा बलयो वस्त्रान्नादिलक्षणा बलय आयन्त्यागच्छन्ति । पृथग्रथश्रेणयो रथपंक्तयोऽपि त्वामनुयान्ति ॥

अत्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते प्राणस्त्वेष आत्मन इति होवाच प्राणस्त उदक्रमिष्यद्यन्मां नागमिष्य इति ॥२॥ इति चतुर्दश खंड॰ ॥

अत्यन्नमित्यादि समानम् । प्राणस्त्वेष आत्मन इति होवाच । प्राणस्ते तवोदक्रमिष्यदुत्क्रान्तोऽभविष्यद्यन्मा नागमिष्य इति ॥ ५.१४ —

अथ होवाच जनं शार्कराक्ष्य कं त्वमात्मानमुपास्स इत्याकाशमेव भगवो राजन्निति होवाचैष वै बहुल आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वं बहुलोऽसि प्रजया च धनेन च ॥१॥

अथ होवाच जनमित्यादि समानम् । एष वै बहुल आत्मा वैश्वानर । बहुलत्वमाकाशस्य सर्वगतत्वाद्बहुलगुणोपासनाच्च । त्वं बहुलोऽसि प्रजया च पुत्रपौत्रादिलक्षणया धनेन च हिरण्यादिना ॥

अत्यन्न पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते संदेहस्त्वेष आत्मन इति होवाच संदेहस्ते व्यशीर्यद्यन्मां नागमिष्य इति ॥२॥ इति पंचदश खंड ॥

संदेहस्त्वेष संदेहो मध्यमं शरीरं वैश्वानरस्य । दिहेरुपचयार्थत्वान्मांसरुधिरास्थ्यादिभिश्च बहुलं शरीरं तत्संदेहस्ते तव शरीरं व्यशीर्यच्छीर्णमभविष्यद्यन्मां नागमिष्य इति ॥ इति पंचदश॰ खंडः ॥ ५.१५ —

अथ होवाच बुडिलमाश्वतराश्विं वैयाघ्रपद्य कं त्वमात्मानमुपास्स

इत्यप एव भगवो राजन्निति होवाचैष वै रयिरात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वं रयिमान्पुष्टिमानसि ॥१॥

अथ होवाच बुडिलमाश्वतराश्विमित्यादि समानम् । एष वै रयिरात्मा वैश्वानरो धनरूपः । अद्भ्योऽन्नं ततो धनमिति । तस्माद्रयिमान्धनवांस्त्वं पुष्टिमांश्च शरीरेण पुष्टैश्चान्ननिमित्तत्वात् ॥

अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते बस्तिस्त्वेष आत्मन इति होवाच बस्तिस्ते व्यभेत्स्यद्यन्मां नागमिष्य इति ॥२॥ इति षोडश. खंड ॥

बस्तिस्त्वेष आत्मनो वैश्वानरस्य. बस्तिर्मूत्रसंग्रहस्थानं, बस्तिस्ते व्यभेत्स्यद्विन्नोऽभविष्यद्यन्मा नागमिष्य इति ॥ इति षोडश खंड.॥ ५.१६.—

अथ होवाचोद्दालकमारुणिं गौतम कं त्वमात्मानमुपास्स इति पृथिवीमेव भगवो राजन्निति होवाचैष वै प्रतिष्ठात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वं प्रतिष्ठितोऽसि प्रजया च पशुभिश्च ॥१॥

अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते पादौ त्वेतावात्मन इति होवाच पादौ ते व्यम्लास्येतां यन्मां नागमिष्य इति ॥ इति सप्तदश खंड ॥

अथ होवाचोद्दालकमित्यादि समानम । पृथिवीमेव भगवो राजन्निति होवाच । एष वै प्रतिष्ठा पादौ वैश्वानरस्य । पादौ ते व्यम्लास्येता विम्लानौ अभविष्यतां श्लथीभूतौ यन्मा नागमिष्य इति ॥ ५.१७.—

तान्होवाचैते वै खलु यूयं पृथगिवेममात्मानं वैश्वानरं विद्वांसोऽन्नमत्थ यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति ॥१॥

तान्यथोक्तवैश्वानरदर्शनवतो होवाच— एते यूयं, वै खल्वित्यनर्थकौ, यूयं पृथगिवापृथक्सन्तामिममेकं वैश्वानरमात्मानं विद्वांसोऽन्नमत्थ परिच्छिन्नात्मबुद्ध्येत्येतत् हस्तिदर्शन इव जात्यंधाः । यस्त्वेतमेवं यथोक्तावयवैर्द्युमूर्धादिभि. पृथिवीपादान्तैर्विशिष्टमेकं प्रादेशमात्रं प्रादेशैर्द्युमूर्धादिभिः पृथिवीपादान्तैरध्यात्मं मीयते ज्ञायत इति प्रादेशमात्रम् । मुखादिषु वा करणेष्वन्नत्वेन मीयत इति प्रादेशमात्रः । द्युलोकादिपृथिव्यंतप्रदेशपरिमाणो वा प्रादेशमात्रः । प्रकर्षेण शास्त्रेणा-

दिश्यन्त इति प्रादेशा द्युलोकादय एव तावत्परिमाण प्रादेशमात्रः । शाखान्तरे तु मूर्धादिश्चिबुकप्रतिष्ठ इति प्रादेशमात्रं कल्पयन्ति । इह तु न तथाभिप्रेतः । तस्य ह वा एतस्यात्मन. इत्याद्युपसंहारात् । प्रत्यगात्मतया अभिविमीयतेऽहमिति ज्ञायत इत्यभिविमानस्तमेतमात्मानं वैश्वानरं, विश्वान्नरान्नयति पुण्यपापानुरूपां गति सर्वात्मैष ईश्वरो वैश्वानरो, विश्वो नर एव वा सर्वात्मत्वात् । विश्वैर्वा नरैः प्रत्यगात्मतया प्रविभज्य नीयत इति वैश्वानरस्तमेवमुपास्ते य, सोऽदन्नादी सर्वेषु लोकेषु द्युलोकादिषु सर्वेषु भूतेषु चराचरेषु सर्वेष्वात्मसु शरीरेंद्रियमनोबुद्धिषु, तेषु ह्यात्मकल्पनाव्यपदेशः, प्राणिनामन्नमत्ति । वैश्वानरविर्त्सर्वात्मा सन्नन्नमत्ति । न यथाऽज्ञः पिण्डमात्राभिमान सन्नित्यर्थ ॥

तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा संदेहो बहुलो बस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः ॥२॥ इति अष्टादश. खंडः ॥

कस्मादेवम् । यस्मात्तस्य ह वै प्रकृतस्यैवैतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राण. पृथग्वर्त्मात्मा संदेहो बहुलो बस्तिरेव रयिः पृथिव्येव पादौ । अथवा विध्यर्थमेतद्वचनं एवमुपास्य इति । अथेदानीं वैश्वानरविदो भोजनेऽग्निहोत्रं संपिपादयिषन्नाह— एतस्य वैश्वानरस्य भोक्तुरुर एव वेदिराकारसामान्यात । लोमानि बर्हिर्वेद्यामिवोरसि लोमान्यास्तीर्णानि दृश्यन्ते । हृदयं गार्हपत्यो हृदयाद्धि मनः प्रणीतामिवानंतरी भवति । अतोऽन्वाहार्यपचनोऽग्निर्मन. । आस्यं मुखमाहवनीय इवाहवनीयो हूयतेऽस्मिन्नन्नमिति ॥ ५.१८.—

तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहेति प्राणस्तृप्यति ॥१॥

तत्तत्रैवं सति यद्भक्तं प्रथमं भोजनकाल आगच्छेद्भोजनार्थं तद्धोमीयं तद्धोतव्यं, अग्निहोत्रसंपन्मात्रस्य विवक्षितत्वान्नाग्निहोत्रांगेतिकर्तव्यताप्राप्तिरिह । स भोक्ता यां प्रथमामाहुति जुहुयात्तां कथं जुहुयादित्याह— प्राणाय स्वाहेत्यनेन मंत्रेण । आहुतिशब्दादवदानप्रमाणमन्नं प्रक्षिपेदित्यर्थः । तेन प्राणस्तृप्यति ॥

प्राणे तृप्यति चक्षुस्तृप्यति चक्षुषि तृप्यत्यादित्यस्तृप्यत्यादित्ये तृप्यति द्यौस्तृप्यति दिवि तृप्यन्त्यां यत्किंच द्यौश्चादित्यश्चाधितिष्ठतस्तत्तृप्यति

तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥२॥ इति एकोनविंशः खंड. ॥

प्राणे तृप्यति चक्षुस्तृप्यति, चक्षुरादित्यो द्यौश्चेत्यादि तृप्यति, यच्चान्यत् द्यौश्चादित्यश्च स्वामित्वेनाधितिष्ठतस्तच्च तृप्यति, तस्य तृप्तिमनु स्वयं भुंजानः तृप्यत्येवं प्रत्यक्षम् । किं च प्रजादिभिश्च । तेज शरीरस्था दीप्तिरुज्ज्वलत्वं प्रागल्भ्यं वा, ब्रह्मवर्चसं वृत्तस्वाध्यायनिमित्तं तेज ॥ ५.१९.—

अथ यां द्वितीयां जुहुयात्तां जुहुयाद्व्यानाय स्वाहेति व्यानस्तृप्यति ॥१॥ व्याने तृप्यति श्रोत्रं तृप्यति श्रोत्रे तृप्यति चंद्रमास्तृप्यति चंद्रमसि तृप्यति दिशस्तृप्यन्ति दिक्षु तृप्यन्तीषु यत्किंच दिशश्च चंद्रमाश्चाधितिष्ठन्ति तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥२॥ इति विंश खंड ॥

अथ यां तृतीयां जुहुयात्तां जुहुयादपानाय स्वाहेत्यपानस्तृप्यति ॥१॥ अपाने तृप्यति वाक्तृप्यति वाचि तृप्यन्त्यामग्निस्तृप्यत्यग्नौ तृप्यति पृथिवी तृप्यति पृथिव्यां तृप्यन्त्यां यत्किंच पृथिवी चाग्निश्चाधितिष्ठतस्तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥२॥ इति एकविंश खंडः ॥

अथ यां चतुर्थीं जुहुयात्तां जुहुयात्समानाय स्वाहेति समानस्तृप्यति ॥१॥ समाने तृप्यति मनस्तृप्यति मनसि तृप्यति पर्जन्यस्तृप्यति पर्जन्ये तृप्यति विद्युत्तृप्यति विद्युति तृप्यन्त्यां यत्किंच विद्युच्च पर्जन्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥२॥ इति द्वाविंशः खंडः ॥

अथ यां पंचमीं जुहुयात्तां जुहुयादुदानाय स्वाहेत्युदानस्तृप्यति ॥१॥ उदाने तृप्यति त्वक्तृप्यति त्वचि तृप्यन्त्या वायुस्तृप्यति वायौ तृप्यत्याकाशस्तृप्यत्याकाशे तृप्यति यत्किंच वायुश्चाकाशश्चाधितिष्ठतस्तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥२॥

अथ यां द्वितीयां तृतीया चतुर्थीं पंचमीमिति समानम् ॥ ५.२३.—

स य इदमविद्वानग्निहोत्रं जुहोति यथांगारानपोह्य भस्मनि जुहुयात्ता-दृक्तस्यात् ॥१॥

स यः कश्चिदिदं वैश्वानरदर्शनं यथोक्तमविद्वान्सन्नग्निहोत्रं प्रसिद्धं जुहोति, यथांगारानाहुतियोग्यानपोह्य अनाहुतिस्थाने भस्मनि जुहुयात्तादृक्तुल्यं तस्य तदग्निहोत्रहवनं स्याद्वैश्वानरविदोऽग्निहोत्रमेपक्ष्येति प्रसिद्धाग्निहोत्रनिदया वैश्वानरविदोऽग्निहोत्रं स्तूयते ॥

अथ य एतदेवं विद्वानग्निहोत्रं जुहोति तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भवति ॥२॥

अतश्चैतद्विशिष्टमग्निहोत्रम् । कथम् । अथ य एतदेवं विद्वानग्निहोत्रं जुहोति तस्य यथोक्तवैश्वानरविज्ञानवत सर्वेषु लोकेष्वित्याद्युक्तार्थम् । हुतमन्नमत्तीत्यनयोरेकार्थत्वात् ॥

तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते य एतदेवं विद्वानग्निहोत्रं जुहोति ॥३॥

किंच तद्यथेषीकायास्तूलमग्नौ प्रोतं प्रक्षिप्तं प्रदूयेत प्रदह्येत क्षिप्रं एवं ह्यस्य विदुष सर्वात्मभूतस्य सर्वान्नानामत्तु सर्वे निरवशिष्टाः पाप्मानो धर्मा धर्माख्या अनेकजन्मसंचिता इह च प्राग्ज्ञानोत्पत्तेर्ज्ञानसहभाविनश्च प्रदूयन्ते प्रदह्येरन्वर्तमानशरीरारंभकपाप्मवर्ज, लक्ष्यं प्रति मुक्तेषुवत्प्रवृत्तफलत्वात्तस्य न दाह । य एतदेवं विद्वानग्निहोत्रं जुहोति भुंक्ते ॥

तस्मादु हैवंविद्यद्यपि चंडालायोच्छिष्टं प्रयच्छेदात्मनि हैवास्य तद्वैश्वानरे हुतं स्यादिति तदेष श्लोकः ॥४॥

स यद्यपि चंडालायोच्छिष्टानहायोच्छिष्टं प्रयच्छेदुच्छिष्टं दद्यात्प्रतिषिद्धमुच्छिष्टदानं यद्यपि कुर्यात् आत्मनि हैवास्य चंडालदेहस्थे वैश्वानरे तद्धुतं स्यान्नाधर्मनिमित्तमिति विद्यामेव स्तौति । तदेतस्मिन्स्तुत्यर्थे श्लोको मंत्रोऽर्थेष भवति ॥

यथेह क्षुधिता बाला मातरं पर्युपासत एवं सर्वाणि भूतान्यग्निहोत्रमुपासत इत्यग्निहोत्रमुपासत इति॥५॥ इति चतुर्विंशः खंडः ॥

इति पंचमोऽध्याय समाप्तः ॥

यथेह लोके क्षुधिता बुभुक्षिता बाला मातरं पर्युपासते, कदा नो मातान्नं प्रयच्छतीति एवं सर्वाणि भूतान्यन्नादान्यैर्ववैदोऽग्निहोत्रं भोजनमुपासते कदा त्वसौ भोक्ष्यत इति, जगत्सर्वं विद्वद्भोजनेन तृप्तं भवतीत्यर्थः । द्विरुक्तिरध्यायपरिसमाप्त्यर्था ॥ इति पंचमोऽध्यायः ॥ ५.२४.—

॥ षष्ठोऽध्यायः ॥

श्वेतकेतुर्हारुणेय आसेत्याद्यध्यायसंबंधः । 'सर्वं खल्विदं ब्रह्म तज्जलानिति' इत्युक्तं, कथं तस्माज्जगदिदं जायते तस्मिन्नेव च लीयतेऽनिति च तेनैवेत्येतद्वक्तव्यम् । अनंतरं चैकस्मिन्भुक्ते विदुषि सर्वं जगत्तृप्तं भवतीत्युक्तं, तदेकत्वे सत्यात्मन सर्वभूतस्थस्योपपद्यते नात्मभेदे । कथं च तदेकत्वमिति तदर्थोऽयं षष्ठोऽध्याय आरभ्यते । पितापुत्राख्यायिका विद्यायाः सारिष्ठत्वप्रदर्शनार्था ।

ॐ । श्वेतकेतुर्हारुणेय आस तं ह पितोवाच श्वेतकेतो वस ब्रह्मचर्यं न वै सोम्यास्मत्कुलीनोऽननूच्य ब्रह्मबंधुरिव भवतीति ॥१॥

श्वेतकेतुरिति नामतो, हेत्यैतिह्यार्थं, आरुणेयोऽरुणस्य पौत्र आस बभूव । तं पुत्रं हारुणि पिता योग्यं विद्याभाजनं मन्वानस्तस्योपनयनकालाप्तयं च पश्यन्नुवाच—हे श्वेतकेतोऽनुरूपं गुरुं कुलस्य नो गत्वा वस ब्रह्मचर्यम् । न चैतद्युक्तं यदस्मत्कुलीनो हे सोम्याननूच्यानधीत्य ब्रह्मबंधुरिव भवतीति ब्राह्मणान्बंधून्व्यपदिशति न स्वयं ब्राह्मणव्रत्त इति तस्यात· प्रवासोऽनुमीयते पितु येन स्वयं गुणवान्सन्पुत्रं नोपनेष्यति ॥

स ह द्वादशवर्ष उपेत्य चतुर्विंशतिवर्ष सर्वान्वेदानधीत्य महामना अनूचानमानी स्तब्ध एयाय तं ह पितोवाच ॥२॥

स पित्रोक्तः श्वेतकेतुर्ह द्वादशवर्ष सर्वोपलाचार्य यावच्चतुर्विंशतिवर्षो बभूव तावत्सर्वान्वेदांश्चतुरोऽप्यधीत्य तदर्थं च बुद्ध्वा, महामना महद्भारं मनो यस्यासममात्मानमन्यैर्मन्यमानं मनो यस्य सोऽयं महामना, अनूचानमान्यनूचानमात्मानं मन्यत इत्येवंशीलो यः सोऽनूचानमानी स्तब्धोऽप्रणतस्वभाव एयाय गृहम् । तमेवंभूतं ह्यात्मनोऽननुरूपशीलं स्तब्धं मानिनं पुत्रं दृष्ट्वा पितोवाच सद्धर्मावतारचिकीर्षया ॥

श्वेतकेतो यस्नु सोम्येदं महामना अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्ष्यः येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति कथं नु भगवः स आदेशो भवतीति ॥३॥

श्वेतकेतो यत्नु इदं महामना अनूचानमानी स्तब्धश्चासि कस्तेऽतिशयः प्राप्त उपाध्यायादुतापि तमादेशमादिश्यत इत्यादेशः केवलशास्त्राचार्योपदेशगम्यमित्येतद्येन वा परं ब्रह्मादिश्यते स आदेशः तमप्राक्ष्यः पृष्टवानस्याचार्यम् ?

तमादेशं विशिनष्टि येनादेशेन श्रुतेनाश्रुतमप्यन्यत् श्रुतं भवत्यमतं मतमतार्कितं तर्कितं भवत्यविज्ञातं विज्ञातमनिश्चितं निश्चितं भवतीति । सर्वानपि वेदानधीत्य सर्वं चान्यद्वेद्यमधिगम्याप्यकृतार्थ एव भवति यावदात्मतत्त्वं न जानातीत्याख्यायिकातोऽवगम्यते । तदेतदद्भुतं श्रुत्वाह, कथं न्वेतदप्रसिद्धमन्यविज्ञानेनान्यद्विज्ञातं भवतीत्येवं मन्वानः पृच्छति, कथं नु केन प्रकारेण हे भगवः स आदेशो भवतीति ॥

यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ॥४॥

यथा स आदेशो भवति तच्छृणु हे सोम्य । यथा लोके एकेन मृत्पिंडेन रुचककुंभादिकारणभूतेन विज्ञातेन सर्वमन्यत्तद्विकारजातं मृन्मयं मृद्विकारजातं विज्ञातं स्यात् । कथं मृत्पिंडे कारणे विज्ञाते कार्यमन्यद्विज्ञातं स्यात । नैष दोष । कारणेनानन्यत्वात्कार्यस्य । यन्मन्यसेऽन्यस्मिन्विज्ञातेऽन्यन्न ज्ञायत इति । सत्यमेवं स्यात । यद्यन्यत्कारणात्कार्यं स्यान्नत्वेवमन्यत्कारणात्कार्यम् । कथं तर्हीदं लोक, इदं कारणमयमस्य विकार इति । शृणु । वाचारंभणं वागारंभणं वागालंबनमित्येतत् । कोऽसौ, विकारो नामधेयं, नामैव नामधेयं, स्वार्थे धेयप्रत्यय । वागालंबनमात्रं नामैव केवलं न विकारो नाम वस्त्वस्ति, परमार्थतो मृत्तिकेत्येव मृत्तिकैव तु सत्यं वस्त्वस्ति ॥

यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं लोहमित्येव सत्यम् ॥५॥

यथा सोम्यैकेन लोहमणिना सुवर्णपिंडेन सर्वमन्यद्विकारजातं कटकमुकुटकेयूरादि विज्ञातं स्यात । वाचारंभणमित्यादि समानम् ॥

यथा सोम्यैकेन नखनिकृंतनेन सर्वं कार्ष्णायसं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं कृष्णायसमित्येव सत्यमेवं सोम्य स आदेशो भवतीति ॥६॥

यथा सोम्यैकेन नखनिकृंतनेनोपलक्षितेन कृष्णायसपिंडेनेत्यर्थ, सर्वं कार्ष्णायसं कृष्णायसविकारजातं विज्ञातं स्यात् । समानमन्यत् । अनेकदृष्टान्तोपादानं दार्ष्टान्तिकानेकभेदानुगमार्थं दृढप्रतीत्यर्थं च । एवं सोम्य स आदेशो योऽयमुक्तो भवति ॥

तदेतद्विपरीतग्रहणं महावैनाशिकपक्षं दर्शयित्वा प्रतिषेधति । कुतस्तु प्रमाणात्खलु हे सोम्यैवं स्यादसत सज्जायेतेत्येवं कुतो भवेत ? न कुतश्चित्प्रमाणादेवं संभवतीत्यर्थः । यदपि बीजोपमर्दे अंकुरो जायमानो दृष्टोऽभावादेवेति, तदप्यभ्युपगमविरुद्धं तेषाम् । कथम् । ये तावद्बीजावयवा बीजसंस्थानविशिष्टा. तेऽकुरेऽप्यनुवर्तन्त एव न तेषामुपमर्दोऽकुरजन्मनि । यत्पुनर्बीजाकारसंस्थानं, तद्बीजावयवव्यतिरेकेण वस्तुभूतं न वैनाशिकैरभ्युपगम्यते, यदंकुरजन्मन्युपमृद्येत । अथ तदस्त्यवयवव्यतिरिक्तं वस्तुभूतं, तथा च सत्यभ्युपगमनिरोध. । अथ संवृत्या अभ्युपगतं बीजसंस्थानरूपमुपमृद्यत इति चेत् । केयं संवृतिर्नाम किमसावभाव, उत भाव इति । यद्यभावो, दृष्टान्ताभाव । अथ भावस्तथापि नाभावादंकुरोत्पत्ति. कुर्बीजावयवेभ्यो ह्यंकुरोत्पत्तिः । अवयवा अप्युपमृद्यन्त इति चेत । न । तदवयवेषु तुल्यत्वात् । यथा वैनाशिकानां बीजसंस्थानरूपोऽवयवी नास्ति तथावयवा अपीति तेषामप्युपमर्दानुपपत्ति· । बीजावयवानामपि सूक्ष्मावयवाः तदवयवानामप्यन्ये सूक्ष्मतरावयवा इत्येवं प्रसंगस्यानिवृत्ते सर्वत्रोपमर्दानुपपत्ति. । सद्बुद्ध्यनुवृत्ते सत्त्वानिवृत्तिश्चेति । सद्वादिना सत एव सदुत्पत्तिः सेत्स्यति । न त्वसद्वादिनां दृष्टान्तोऽस्त्यसत सदुत्पत्ते । मृत्पिडात घटोत्पत्तिर्दृश्यते सद्वादिनां, तद्भावे भावात्तदभावे चाभावात । यद्यभावादेव घट उत्पद्येत घटार्थिना मृत्पिडो नोपादीयेत । अभावशब्दबुद्ध्यनुवृत्तिश्च घटादौ प्रसज्येत । न त्वेतदस्ति । अतो नासत सदुत्पत्ति· । यदप्याहुर्मृद्बुद्धिर्घटबुद्धेर्निमित्तमिति मृद्बुद्धिर्घटबुद्धेः कारणमुच्यते, न तु परमार्थत एव मृद्घटो वास्तीति, तदपि मृद्बुद्धिर्विद्यमाना विद्यमानाया एव घटबुद्धे कारणमिति नासतः सदुत्पत्ति· । मृद्घटबुद्ध्योर्निमित्तनैमित्तिकतया आनंतर्यमात्रं न तु कार्यकारणत्वमिति चेत । न । बुद्धीनां नैरंतर्ये गम्यमाने वैनाशिकानां बहिर्दृष्टान्ताभावात । अत कुतस्तु खलु सोम्यैवं स्यादिति होवाच, कथं केन प्रकारेणासत सज्जायेतेति । असत सदुत्पत्तौ न कश्चिदपि दृष्टान्तप्रकारोऽस्तीत्यभिप्राय· । एवमसद्वादिपक्षमुन्मथ्योपसंहरति सत्त्वेव सोम्येदमग्र आसीदिति स्वपक्षसिद्धिम् ॥

ननु सद्वादिनोऽपि सत सदुत्पद्यत इति नैव दृष्टान्तोऽस्ति । घटात् घटांतरोत्पत्त्यदर्शनात् । सत्यमेवं न सतः सदंतरमुत्पद्यते, कि तर्हि सदेव संस्थानांतरेणावतिष्ठते । यथा सर्पः कुंडली भवति, यथा च मृद चूर्णपिंड-

घटकपालादिप्रभेदैः । यद्येवं सदेव सर्वप्रकारावस्थं, कथं प्रागुत्पत्तेरिदमासीदित्युच्यते । ननु न श्रुतं त्वया सदेवेत्यवधारणं इदंशब्दवाच्यस्य कार्यस्य । प्राप्तं तर्हि प्रागुत्पत्तेरसदेवासीन्नेदंशब्दवाच्यं, इदानीमिदं जातमिति । न । सत एव इदंशब्दबुद्धिविषयतया अवस्थानाद्यथा मृदेव पिंडघटादिशब्दबुद्धिविषयत्वेनावतिष्ठते तद्वत् । ननु यथा मृद्वस्त्वेवं पिंडघटाद्यपि, तद्वत्सद्बुद्धेरन्यबुद्धिविषयत्वात् कार्यस्य सतोऽन्यद्वस्त्वंतरं स्यात्कार्यजातं यथाश्वाद्गौ । न । पिंडघटादीनां इतरेतरव्यभिचारेऽपि मृत्त्वाव्यभिचारात् । यद्यपि घटः पिंडं व्यभिचरति पिंडश्च घटं, तथापि पिंडघटौ मृत्त्वं न व्यभिचरतः तस्मान्मृन्मात्रं पिंडघटौ । व्यभिचरति त्वश्वं गौरश्वो वा गाम् । तस्मान्मृदादिसंस्थानमात्रं घटादयः । एवं सत्संस्थानमात्रमिदं सर्वमिति युक्तं प्रागुत्पत्तेः सदेवेति । वाचारंभणमात्रत्वात् विकारसंस्थानमात्रस्य ।

ननु निरवयवं सत् 'निष्कलं निष्क्रियं शांतं निरवद्यं निरंजनं, दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यंतरो ह्यजः' इत्यादिश्रुतिभ्यो, निरवयवस्य सतः कथं विकारसंस्थानमुपपद्यते । नैष दोषः । रज्ज्वाद्यवयवेभ्यः सर्पादिसंस्थानवत् बुद्धिपरिकल्पितेभ्यः सदवयवेभ्यो विकारसंस्थानोपपत्तेः । 'वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं' एवं सदेव सत्यमिति श्रुतेः । एकमेवाद्वितीयं परमार्थ इदंबुद्धिकालेऽपि ॥

तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत तत्तेज ऐक्षत बहु स्यां प्रजायेयेति तदपोऽसृजत । तस्माद्यत्र क्व च शोचति स्वेदते वा पुरुषस्तेजस एव तदध्यापो जायन्ते ॥३॥

तत्सदैक्षतेक्षा दर्शनं कृतवत् । अतश्च न प्रधानं सांख्यपरिकल्पितं जपत्कारणम् । प्रधानस्याचेतनत्वाभ्युपगमात् । इदं तु सच्चेतनमीक्षितृत्वात् । तत्कथमैक्षतेत्याह— बहु प्रभूतं स्या भवेयं प्रजायेय प्रकर्षेणोत्पद्येय । यथा मृद् घटाद्याकारेण यथा वा रज्ज्वादि सर्पाद्याकारेण बुद्धिपरिकल्पितेन । असदेव तर्हि सर्वं यद्गृह्यते रज्जुरिव सर्पाद्याकारेण । न । सत एव द्वैतभेदेन अन्यथागृह्यमाणत्वान्नासत्त्वं कस्यचित्कचिदिति ब्रूमः । यथा सतोऽन्यद्वस्त्वंतरं परिकल्प्य पुनस्तस्यैव प्रागुत्पत्तेः प्रध्वंसाच्चोर्ध्वमसत्त्वं ब्रुवते तार्किकाः, न तथास्माभिः कदाचित्कचिदपि सतोऽन्यदभिधानमभिधेयं वा वस्तु परिकल्प्यते । सदेव तु सर्वमभि-

धानमभिधीयते च यदन्यबुद्धया । यथा रज्जुरेव सर्पबुद्धया सर्प इत्यभिधीयते, यथा वा पिडघटादिमृदोऽन्यबुद्धया पिडघटादिशब्देनाभिधीयते लोके । रज्जुविवेकदर्शिनां तु सर्पाभिधानबुद्धी निवर्तेते यथा च मृद्विवेकदर्शिनां घटादिशब्दबुद्धी । तद्वत्सद्विवेकदर्शिना अन्यविकारशब्दबुद्धी निवर्तेत । 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति, 'अनिरुक्तोऽनिलयने' इत्यादिश्रुतिभ्यः । एवमीक्षित्वा तत्तेजोऽसृजत तेज सृष्टवत् । ननु 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इति श्रुत्यंतरे आकाशाद्वायुस्ततस्तृतीयं तेजः श्रुतं, इह कथं प्राथम्येन तस्मादेव तेज सृज्यते तत एव चाकाशमिति विरुद्धम् । नैष दोषः । आकाशवायुसर्गानंतरं तत्सत्तेजोऽसृजतेतिकल्पनोपपत्तेः । अथवा अविवक्षित इह सृष्टिक्रमः, सत्कार्यमिदं सर्वं, अतः सदेकमेवाद्वितीयमित्येतद्विवक्षितम । मृदादिदृष्टान्तात । अथवा त्रिवृत्करणस्य विवक्षितत्वात्तेजोबन्नानामेव सृष्टिमाचष्टे । तेज इति प्रसिद्धं लोके दग्धृ पक्तृ प्रकाशकं रोहितं चेति । तत्सत्सृष्टं तेज ऐक्षत तेजोरूपसंस्थितं सदैक्षतेत्यर्थः । बहु स्यां प्रजायेयेति पूर्ववत । तदपोऽसृजत । आपो द्रवाः स्निग्धाः स्यंदिन्यः शुक्राश्चेति प्रसिद्धा लोके । यस्मात्तेजसः कार्यभूता आपः तस्माद्यत्र क्वच देशे काले वा शोचति संतप्यते स्वेदते प्रस्विद्यते वा पुरुषस्तेजस एव तत्तदा आपोऽधिजायन्ते ॥

ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहीति ता अन्नमसृजन्त तस्माद्यत्र क्व च वर्षति तदेव भूयिष्ठमन्नं भवत्यद्भ्य एव तदध्यन्नाद्यं जायते ॥४॥ इति द्वितीयः खंडः ॥

ता आप ऐक्षन्त पूर्ववदेव अवाकारसंस्थितं सदैक्षतेत्यर्थः । बह्व्यः प्रभूताः स्याम भवेम प्रजायेमह्युत्पद्येमहीति । ता अन्नमसृजन्त पृथिवीलक्षणम । पार्थिवं ह्यन्नं, यस्मादप्कार्यमन्नं तस्माद्यत्र क्व च वर्षति देशे तत्तत्रैव भूयिष्ठं प्रभूतमन्नं भवति । अतोऽद्भ्य एव तदन्नाद्यमधिजायते । ता अन्नमसृजन्तेति पृथिव्युक्ता पूर्व, इह तु दृष्टान्तेऽन्नं च तदाद्यं चेति विशेषणात् व्रीहियवाद्या उच्यन्ते । अन्नं च गुरु स्थिरं धारणं कृष्णं च रूपतः प्रसिद्धम् ॥

ननु तेजःप्रभृतिष्वीक्षणं न गम्यते हिंसादिप्रतिषेधाभावात त्रासादिकार्यानुपलभाच्च । तत्र कथं तत्तेज ऐक्षतेत्यादि । नैषः दोषः । ईक्षितृकारणपरिणामत्वात् तेजःप्रभृतीनां सत एवेक्षितुर्नियतक्रमविशिष्टकार्योत्पादकत्वाच्च तेजःप्रभृ-

तीक्षत इवेक्षत इत्युच्यते भूतम् । ननु सतोऽप्युपचरितमेवक्षितृत्वम् । न । सदीक्षणस्य केवलशब्दगम्यत्वान्न शक्यमुपचरितं कल्पयितुम् । तेज प्रभृतीनां त्वनुमीयते मुख्येक्षणाभाव इति युक्तमुपचरितं कल्पयितुम् । ननु सतोऽपि मृद्बुत्कारणत्वात् अचेतनत्वं शक्यमनुमातुम् । अत प्रधानस्यैवाचेतनस्य सतश्चेतनार्थत्वात् नियतकालकमविशिष्टकार्योत्पादकत्वाच्च ऐक्षतेक्षतेति शक्यमनुमातुमुपचरितमेव ईक्षणम् । दृष्टश्च लोकेऽचेतनेन चेतनवदुपचार । यथा कूलं पिपतिषतीति तद्वत्सतोऽपि स्यात् । न । 'तत्सत्यं स आत्मा' इति तस्मिन्नात्मोपदेशात् । आत्मोपदेशोऽप्युपचरित इति चेन यथा ममात्मा भद्रसेन इति सर्वार्थकारिण्यनात्मन्यात्मोपचार· तद्वत । न । सदर्स्मीति सत्यत्वाभिसंधस्य 'तस्य तावदेव चिरं' इति मोक्षोपदेशात् । सोऽप्युपचार इति चेत । प्रधानात्माभिसंधस्य मोक्षसामीप्यं वर्तत इति मोक्षोपदेशोऽप्युपचरित एव । यथा लोके ग्रामं गंतुं प्रास्थित प्राप्तवानहं ग्रामंमिति ब्रूयात्त्वरापेक्षया, तद्वत । न । येन विज्ञातेनाविज्ञातं विज्ञातं भवतीत्युपक्रमात् । सत्येकस्मिन्विज्ञाते सर्व विज्ञातं भवति तदनन्यत्वात्सर्वस्याद्वितीयवचनाच्च । न चान्यद्विज्ञातव्यमवशिष्टं श्रावितं श्रुत्यानुमेय वा लिंगतोऽस्ति येन मोक्षोपदेश उपचरित· स्यात् । सर्वस्य च प्रपाठकार्थस्य उपचरितत्वपरिकल्पनाया वृथा श्रमः परिकल्पयितु. स्यात पुरुषार्थसाधनविज्ञानस्य तर्केणाधिगतत्वात्तस्य । तस्माद्वेदप्रामाण्यान्न युक्त· श्रुतार्थपरित्याग । अत. चेतनावत्कारणं जगत इति सिद्धम ॥ इति द्वितीय. खंड ॥ ३.२ —

तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्यांडज जीवजमुद्भिज्जमिति ॥१॥

तेषां जीवाविष्टाना खल्वेषा पक्ष्यादीना भूतानां, एषामिति प्रत्यक्षनिर्देशान्न तु तेज प्रभृतीनां, तेषां त्रिवृत्करणस्य वक्ष्यमाणत्वात, अमति त्रिवृत्करणे प्रत्यक्षनिर्देशानुपपत्ति· । देवताशब्दप्रयोगाच्च तेज·प्रभृतिषु 'इमास्तिस्रो देवता' इति । तस्मात्तेषां खल्वेषा भूताना पक्षिपशुस्थावरादीनां त्रीण्येव नातिरिक्तानि बीजानि कारणानि भवन्ति । कानि तानीत्युच्यन्ते आंडजमंडाज्जातं अंडजं अंडजं एवांडजं पक्ष्यादि । पक्षिसर्पादिभ्यो हि पक्षिसर्पादयो जायमाना दृश्यन्ते । तेन पक्षी पक्षिणां बीजं सर्पः सर्पाणां, तथान्यदप्यंडाज्जातं तज्जातीयानां बीजमित्यर्थः । ननु अंडाज्जातमंडजमुच्यतेऽतो अंडमेव बीजमिति युक्तं, कथमंडजं बीजमुच्यते ?

सत्यमेवं स्याद्यदि त्वदिच्छातंत्रा श्रुतिः स्यात् स्वतंत्रा तु श्रुतिः यत आह अंडजाद्येव बीजं नाडादीति । दृश्यते चांडजाद्यभावे तज्जातीयसंतत्यभावो नांडाद्यभावे । अतोंऽडजादीन्येव बीजान्यंडजादीनाम् । तथा जीवाज्जातं जीवजं जरायुजमित्येतत्पुरुषपश्वादि । उद्भिज्जं उद्भिनत्तीत्युद्भित्स्थावरं ततो जातमुद्भिज्जं, धाना वोद्भित्ततो जायत इत्युद्भिज्जं स्थावरबीजं स्थावराणां बीजमित्यर्थः । स्वेदजसंशोकजयोरंडजोद्भिज्जयोरेव यथासंभवमंतर्भावः । एवं व्यवधारणं त्रीण्येव बीजानीत्युपपन्नं भवति ॥

सेयं देवतैक्षत हंताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति ॥२॥

सेयं प्रकृता सदाख्या तेजोबन्नयोनिर्देवतोक्ता ऐक्षतेक्षितवती यथापूर्वं बहु स्यामिति । तदेव बहुभवनं प्रयोजनं नाद्यापि निर्वृत्तं इत्यत ईक्षा पुनः कृतवती बहुभवनमेव प्रयोजनमुररीकृत्य । कथम् । हंतेदानीमहमिमा यथोक्तास्तिजआद्यास्तिस्रो देवता अनेन जीवेनेति स्वबुद्धिस्थं पूर्वसृष्ट्यनुभूतप्राणधारणं आत्मानमेव स्मरन्त्याह अनेन जीवेनात्मनेति । प्राणधारणकर्त्रात्मनेति वचनात्स्वात्मनोऽव्यतिरिक्तेन चैतन्यस्वरूपतया अविशिष्टेनेत्येतद्दर्शयति । अनुप्रविश्य तेजोबन्नभूतमात्रासंसर्गेण लब्धविशेषविज्ञाना सती नाम च रूपं च नामरूपे व्याकरवाणि विस्पष्टमाकरवाणि असौनामायं इदंरूप इति व्याकुर्यामित्यर्थ ॥

ननु न युक्तमिदं असंसारिण्याः सर्वज्ञाया देवताया बुद्धिपूर्वकमनेकशतसहस्रानर्थाश्रयं देहमनुप्रविश्य दुःखमनुभविष्यामीति संकल्पनं, अनुप्रवेशश्च, स्वातंत्र्ये सति । सत्यमेवं न युक्तं स्यात् यदि स्वेनैवाविकृतेन रूपेणानुप्रविशेयं दुःखमनुभवेयमिति च संकल्पितवती । न त्वेवम् । कथं तर्हि । अनेन जीवेनात्मनानुप्रविश्येति वचनात् । जीवो हि नाम देवताया आभासमात्रम् । बुद्ध्यादिभूतमात्रासंसर्गजनितः, आदर्शे इव प्रविष्टः पुरुषप्रतिबिंबो जलादिष्विव च सूर्यादीनाम् । अचिंत्यानंतशक्तिमत्या देवताया बुद्ध्यादिसंबंधश्चैतन्याभासो देवतास्वरूपविवेकाग्रहणनिमित्तः सुखी दुःखी मूढ इत्याद्यनेकविकल्पप्रत्ययहेतुः । छायामात्रेण जीवरूपेणानुप्रविष्टत्वाद्देवता न दैहिकैः स्वतः सुखदुःखादिभिः संबध्यते । यथा पुरुषादित्यादय आदर्शोदकादिषु च्छायामात्रेणानुप्रविष्टा आदर्शोदकादिदोषैर्न संबध्यन्ते, तद्वद्देवतापि । 'सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते

चाक्षुषैर्बाह्यदोषैः । एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः' ॥ 'आकाशवत्सर्वगतश्च नित्य' इति हि काठके । 'ध्यायतीव लेलायतीव' इति च वाजसनेयके । ननु च्छायामात्रश्चेज्जीवो मृषैव प्राप्त तथा परलोकेहलोकादि च तस्य । नैष दोषः । सदात्मना सत्यत्वाभ्युपगमात् । सर्वं च नामरूपादि सदात्मनैव सत्यं विकारजातं, स्वतस्त्वनृतमेव । 'वाचारंभणं विकारो नामधेयं' इत्युक्तत्वात् । तथा जीवोऽपीति । यक्षानुरूपो हि बलिरिति न्यायप्रसिद्धिः । अत सदात्मना सर्वव्यवहाराणा सर्वविकाराणां च सत्यत्वं सतोऽन्यत्वे चानृतत्वमिति न कश्चिद्दोषः तार्किकैरिहानुवक्तुं शक्यः । यथेतरेतरविरुद्धद्वैतवादाः स्ववुद्धिविकल्पमात्रा अतत्त्वनिष्ठा इति शक्यं वक्तुम् ॥

तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति सेयं देवतेमास्तिस्रो देवता अनेनैव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत् ॥३॥

सैवं तिस्रो देवता अनुप्रविश्य स्वात्मावस्थे बीजभूते अव्याकृते नामरूपे व्याकरवाणीतीक्षित्वा तासां च तिसृणा देवतानामेकैका त्रिवृतं त्रिवृतं करवाणि । एकैकस्यास्त्रिवृत्करण एकैकस्या प्राधान्यं द्वयोर्द्वयोर्गुणभावः, अन्यथा हि रज्ज्वा इवैकमेव त्रिवृत्करणं स्यात । न तु तिसृणा पृथक्पृथक्त्रिवृत्करणमिति । एवं हि तेजोवन्नाना पृथङ्नामप्रत्ययलाभ स्यात् तेज इदं इमा आपोऽन्नमिदमिति च । सति च पृथङ्नामप्रत्ययलाभे देवताना सम्यग्व्यवहारस्य प्रसिद्धिः प्रयोजनं स्यात । एवमीक्षित्वा सेयं देवतेमास्तिस्रो देवता अनेनैव यथोक्तेनैव जीवेन सूर्यबिंबवदंतः प्रविश्य वैराजं पिंडं प्रथमं देवादीनां च पिंडाननुप्रविश्य यथासंकल्पमेव नामरूपे व्याकरोत् असौनामायं इदंरूप इति ॥

तासां त्रिवृतं त्रिवृतमेकैकामकरोद्यथा तु खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति ॥४॥ इति तृतीयः खंडः ॥

तासां च देवताना गुणप्रधानभावेन त्रिवृतं त्रिवृतमेकैकामकरोत्कृतवती देवता । तिष्ठतु तावद्देवतादिपिंडानां नामरूपाभ्यां व्याकृतानां तेजोबन्नमयत्वेन त्रिधात्वं यथा तु बहिरिमाः पिंडेभ्यस्तिस्रो देवताः त्रिवृत्त्रिवृदेकैका भवति तन्मे मम निगदतो विजानीहि विस्पष्टमवधारयोदाहरणतः ॥ ६.३.—

यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारंभणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥१॥

यत्तद्देवतानां त्रिवृत्करणमुक्तं तस्यैवोदाहरणमुच्यते । उदाहरणं नाम एकदेशप्रसिद्धया अशेषप्रसिद्ध्यर्थमुदाह्रियत इति । तदेतदाह— यदग्नेस्त्रिवृत्कृतस्य रोहितं रूपं प्रसिद्धं लोके तदत्रिवृत्कृतस्य तेजसो रूपमिति विद्धि । तथा यच्छुक्लं रूपमग्नेरेव तदपामत्रिवृत्कृतानां यत्कृष्णं तस्यैवान्नस्य रूपं तदन्नस्य पृथिव्या अत्रिवृत्कृताया इति विद्धि । तत्रैवं सति रूपत्रयव्यतिरेकेणाग्निरिति यन्मन्यसे त्वं, तस्याग्नेरग्नित्वमिदानामपागादपगतम् । प्राग्रूपत्रयविवेकविज्ञानात् या अग्निबुद्धिरासीत्ते साग्निबुद्धिरपगताग्निशब्दश्चेत्यर्थः । यथा दृश्यमानरक्तोपधानसयुक्तस्फटिको गृह्यमाण पद्मरागोऽयमितिशब्दबुद्धयो प्रयोजको भवति प्रागुपधानस्फटिकयोर्विवेकविज्ञानात् तद्विवेकविज्ञाने तु पद्मरागशब्दबुद्धी निवर्तेते तद्विवेकविज्ञातृतद्वत् । ननु किमत्र बुद्धिशब्दकल्पनया क्रियते प्राग्रूपत्रयविवेककरणादग्निरेवासीत्तदग्नेरग्नित्वं रोहितादिरूपविवेककरणात् अपागादिति युक्तं, यथा तंत्वपकर्षणे पटाभाव । नैव, बुद्धिशब्दमात्रमेव ह्यग्निः, यत आह वाचारंभणमग्निर्नाम विकारो नामधेयं नाममात्रमित्यर्थः । अतोऽग्निबुद्धिरपि मृषैव । किं तर्हि तत्र सत्यं, त्रीणि रूपाणीत्येव सत्यं, नाणुमात्रमपि रूपत्रयव्यतिरेकेण सत्यमस्तीत्यवधारणार्थं ॥

यदादित्यस्य रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादादित्यादादित्यत्वं वाचारंभणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥२॥ यच्चन्द्रमसो रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाच्चन्द्राच्चन्द्रत्वं वाचारंभणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥३॥ यद्विद्युतो रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाद्विद्युतो विद्युत्त्वं वाचारंभणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥४॥

तथा यदादित्यस्य यच्चंद्रमसो यद्विद्युत इत्यादि समानम् । ननु 'यथा तु खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहि' इत्युक्त्वा तेजस एव चतुर्निरुद्याहरणं अन्नस्यादिभिस्त्रिवृत्करणं दर्शितं नाबन्नयोरुदाहरणं दर्शितं त्रिवृत्करणे । नैष दोषः । अबन्नविषयाण्युदाहरणानि एवमेव च द्रष्टव्यानीति मन्यते श्रुतिः । तेजस उदाहरणमुपलक्षणार्थम् । रूपवत्त्वात्स्पष्टार्थत्वोपपत्तेश्च । गंधरसयोरनुदाहरणं त्रयाणामसंभवात् । न हि गंधरसौ तेजसि स्तः ।

स्पर्शशब्दयोरनुदाहरणं विभागेन दर्शयितुमशक्यत्वात् । यदि सर्वं जगत्त्रिवृत्कृतमित्यग्न्यादिवत् त्रीणि रूपाण्येव सत्यं अग्नेरग्नित्ववदपागाज्जगतो जगत्त्वम् । तथा अन्नमप्यापश्शुंगत्वादाप इत्येव सत्यं वाचारंभणमात्रमन्नम । तथा अपामपि तेजःशुंगत्वाद्वाचारंभणत्वं तेज इत्येव सत्यम् । तेजसोऽपि सच्छुंगत्वाद्वाचारंभणत्वं सदित्येव सत्यमित्लेषोऽर्थो विवक्षितः । ननु व्यंतरिक्षे त्वत्रिवृत्कृते तेजःप्रभृतिष्वनंतर्भूतत्वादवशिष्येत । एवं गंधरसशब्दस्पर्शाश्चावशिष्टा इति कथं सता विज्ञातेन सर्वमन्यद्विज्ञातं विज्ञातं भवेत । तद्विज्ञाने वा प्रकारान्तरं वाच्यम । नैष दोषः । रूपवद्द्रव्ये सर्वस्य दर्शनात् । कथम । तेजसि तावद्रूपवति शब्दस्पर्शयोरप्युपलंभाद्वाय्वंतरिक्षयोस्तत्र स्पर्शशब्दगुणवतोः सद्भावोऽनुमीयते । तथा अवन्नयो रूपवतो रसगंधांतर्भाव इति । रूपवता त्रयाणां तेजोवन्नानां त्रिवृत्करणप्रदर्शनेन सर्वं तदंतर्भूतं सद्विकारत्वात् त्रीण्येव रूपाणि विज्ञातं मन्यते श्रुतिः । न हि मूर्तं रूपवद्द्रव्यं प्रत्याख्याय वाय्वाकाशयोः तद्गुणयोर्गंधरसयोर्वा ग्रहणमस्ति । अथवा रूपवतामपि त्रिवृत्करणं प्रदर्शनार्थमेव मन्यते श्रुतिः । यथा तु त्रिवृत्कृते त्रीणि रूपाण्येव सत्यं, तथा पंचीकरणेऽपि समानो न्याय इत्यतः सर्वस्य सद्विकारत्वात्सता विज्ञातेन सर्वमिदं विज्ञातं स्यात्सदेकमेवाद्वितीयं सत्यमिति सिद्धमेव भवति । तदेकस्मिन्सति विज्ञाते सर्वमिदं विज्ञातं भवतीति सूक्तम् ॥

एतद्ध स्म वै तद्विद्वांस आहुः पूर्वे महाशाला महाश्रोत्रिया न नोऽद्य कश्चनाश्रुतममतमविज्ञातमुदाहरिष्यतीति ह्येभ्यो विदांचक्रुः ॥५॥

एतद्विद्वांसो विदितवन्तः पूर्वेऽतिक्रान्ता महाशाला महाश्रोत्रिया आहुर्ह स्म वै किल । किमुक्तवन्त इत्याह— न नोऽस्माकं कुलेऽद्येदानीं यथोक्तविज्ञानवता कश्चन कश्चिदपि अश्रुतममतमविज्ञातं उदाहरिष्यति नोदाहरिष्यति, सर्वं विज्ञातमेवास्मत्कुलीनानां सद्विज्ञानवत्त्वादित्यभिप्रायः । ते पुनः कथं सर्वं विज्ञातवन्त इत्याह—एभ्यस्त्रिभ्यो रोहितादिरूपेभ्यः त्रिवृत्कृतेभ्यो विज्ञातेभ्य सर्वमप्यन्यच्छब्दमवमेवेति विदांचक्रुर्विज्ञातवन्तो यस्मात्तस्मात्सर्वज्ञा एव सद्विज्ञानात्त आसुरित्यर्थः । अथवैभ्यो विदांचक्रुरिति अग्न्यादिभ्यो दृष्टान्तेभ्यो विज्ञातेभ्यः सर्वमन्यद्विदांचक्रुरित्येतत् ॥

यदु रोहितमिवाभूदिति तेजसस्तद्रूपमिति तद्विदांचक्रुर्यदु शुक्लमिवा-

भूदित्यपां रूपमिति तद्विदांचक्रुर्यदु कृष्णमिवाभूदित्यन्नस्य रूपमिति तद्विदांचक्रुः ॥६॥ यद्वविज्ञातमिवाभूदित्येतासामेव देवतानां समास इति तद्विदांचक्रुर्यथा नु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति ॥७॥ इति चतुर्थः खंडः ॥

कथम् । यदन्यद्रूपेण संदिह्यमानं कपोतादिरूपे रोहितमिव यद्गृह्यमाणमभूत्तेषा पर्वेषा ब्रह्मविदा, तेजसो रूपमिति विदांचक्रु । तथा यच्छुक्लमिवाभूद्गृह्यमाणं तदपा रूपं, यत्कृष्णमिव गृह्यमाणं तदन्नस्येति विदांचक्रुः । एवमेवास्य तदुर्लक्ष्यं यदु अविज्ञातमिव विशेषतोऽगृह्यमाणमभूत् तदप्येतासामेव तिसृणां देवतानां समास. समुदाय इति विदांचक्रुः । एवं तावद्बाह्यं वस्त्वन्यादिवद्विज्ञातं तथेदाना यथा नु खलु हे सोम्येमा यथोक्तास्तिस्रो देवताः पुरुषं शिरपाण्यादिलक्षणं कार्यकारणसंघातं प्राप्य पुरुषेणोपयुज्यमाना. त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहि निगदत इत्युक्त्वाह ॥ इति चतुर्थः खंडः॥ ६.४.—

अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः ॥१॥

अन्नमशितं भुक्तं त्रेधा विधीयते जाठरेणाग्निना पच्यमानं त्रिधा विभज्यते । कथं. तस्यान्नस्य त्रिधा विधीयमानस्य यः स्थविष्ठः स्थूलतमो धातुः स्थूलतमं वस्तु विभक्तस्य स्थूलोऽश तत्पुरीषं भवति । यो मध्यमोऽशो धातुरन्नस्य तद्मादिक्रमेण परिणम्य मांसं भवति, योऽणिष्ठोऽणुतमो धातु स ऊर्ध्वं हृदयं प्राप्य सूक्ष्मासु हिताख्यासु नाडीष्वनुप्रविश्य वागादिकरणसंघातस्य स्थितिमुत्पादयन्मनो भवति । मनोरूपेण विपरिणमन्मनस उपचयं करोति । ततश्चान्नोपचितत्वान्मनसो भौतिकत्वमेव न वैशेषिकतंत्रोक्तलक्षणं नित्यं निरवयवं चेति गृह्यते । यदपि मनोऽस्य दैवं चक्षुरिति वक्ष्यति तदपि न नित्यत्वापेक्षया, किं तर्हि सूक्ष्मव्यवहितविप्रकृष्टादिसर्वेंद्रियविषयव्यापारकत्वापेक्षया । यच्चान्येंद्रियविषयापेक्षया नित्यत्वं तदप्यापेक्षिकमेवेति वक्ष्यामः । 'सदेकमेवाद्वितीयं' इति श्रुतेः ॥

आपः पीतास्त्रेधा विधीयन्ते तासां यः स्थविष्ठो धातुस्तन्मूत्रं भवति यो मध्यमस्तल्लोहितं योऽणिष्ठः स प्राणः ॥२॥

तथा आपः पीतास्त्रेधा विधीयन्ते । तासां यः स्थविष्ठो धातुस्तन्मूत्रं

भवति। यो मध्यमस्तल्लोहितं भवति। योऽणिष्ठः स प्राणो भवति। वक्ष्यति हि 'आपोमयः प्राणो नपिबतो विच्छेत्स्यते' इति ॥

तेजोऽशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तदस्थि भवति यो मध्यमः स मज्जा योऽणिष्ठः सा वाक् ॥३॥

तथा तेजोऽशितं तैलघृतादि भक्षितं त्रेधा विधीयते। तस्य यः स्थविष्ठो धातुस्तदस्थि भवति। यो मध्यम स मज्जा अस्थ्यंतर्गतः स्नेहः। योऽणिष्ठ सा वाक्। तैलघृतादिभक्षणाद्धि वाग्विशदा भाषणे समर्था भवतीति प्रसिद्धं लोके ॥

अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥४॥ इति पंचमः खंड ॥

यत एवमन्नमयं हि सोम्य मन आपोमय प्राणस्तेजोमयी वाक्। ननु केवलान्नभक्षिण आखुप्रभृतयो वाग्मिन प्राणवन्तश्च, तथा अब्मात्रभक्ष्याः सामुद्रा मीनमकरप्रभृतयो मनस्विनो वाग्मिनश्च, तथा स्नेहपानामपि प्राणवत्त्वं मनस्वित्वं चानुमेयम्। यदि सन्ति तत्र कथमन्नमयं हि सोम्य मन इत्याद्युच्यते। नैष दोषः। सर्वस्य त्रिवृत्कृतत्वात्सर्वत्र सर्वोपपत्ते। नहि अत्रिवृत्कृतमन्नं अश्नाति कश्चिदापो वा अत्रिवृत्कृताः पीयन्ते तेजो वा अत्रिवृत्कृतमश्नाति कश्चिदित्यन्नादानामाखुप्रभृतीनां वाग्मित्वं प्राणवत्त्वं चेत्याद्यविरुद्धम्। इत्येवं प्रत्यायितः श्वेतकेतुराह— भूय एव पुनरेव मा मां भगवानन्नमयं हि सोम्य मन इत्यादि विज्ञापयतु दृष्टान्तेनावगमयतु, नाद्यापि ममाम्मिन्नर्थे सम्यङ्निश्चयो जात। यस्मात्तेजोवन्नमयत्वेनाविशिष्टे देह एकस्मिन्नुपयुज्यमानान्यन्नाप्स्नेहजातानि अणिष्ठधातुरूपेण मनःप्राणवाच उपचिन्वन्ति स्वजात्यनतिक्रमेणेति दुर्विज्ञेयमित्यभिप्रायः। अतो भूय एवेत्याह। तमेवमुक्तवन्तं तथास्तु सोम्येति होवाच पिता शृण्वत्र दृष्टान्तं यथैतदुपपद्यते यत्पृच्छसि ॥ इति पंचमः खंडः ॥ ६.५ —

दध्नः सोम्य मथ्यमानस्य योऽणिमा स ऊर्ध्वं समुदीषति तत्सर्पिर्भवति ॥१॥

दध्नः सोम्य मथ्यमानस्य योऽणिमा अणुभावः स ऊर्ध्वं समुदीषति संभूयोर्ध्वं नवनीतभावेन गच्छति तत्सर्पिर्भवति ॥

एवमेव खलु सोम्यान्नस्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति

तन्मनो भवति ॥२॥

यथायं दृष्टान्तः, एवमेव खलु सोम्यान्नस्यादनादेरश्यमानस्य भुज्यमानस्य औदर्येणाग्निना वायुसहितेन खजेनेव मथ्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति, तन्मनो भवति मनोवयवैः सह संभूय मन उपचिनोतीत्येतत् ॥

अपां सोम्य पीयमानानां योऽणिमा स ऊर्ध्वः समुदीषति स प्राणो भवति ॥३॥

तथा अपा सोम्य पीयमानानां योऽणिमा स ऊर्ध्वः समुदीषति स प्राणो भवतीति ॥

तेजसः सोम्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति सा वाग्भवति ॥४॥

एवमेव खलु सोम्य तेजसोऽश्यमानस्य योऽणिमा स ऊर्ध्व. समुदीषति सा वाग्भवति ॥

अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥५॥ इति षष्ठः खंडः ॥

अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति युक्तमेव मयोक्तमित्यभिप्रायः । अतोऽन्नेजसोरस्त्वेतत्सर्वमेवम् । मनस्त्वन्नमयमित्यत्र नैकान्तेन मम निश्चयो जातः । अतो भूय एव मा भगवान्मनसोऽन्नमयत्वं दृष्टान्तेन विज्ञापयत्विति । तथा सोम्येति होवाच पिता ॥ ६.६.—

षोडशकलः सोम्य पुरुषः पंचदशाहानि माशीः काममपः पिबापोमयः प्राणो नपिबतो विच्छेत्स्यत इति ॥१॥

अन्नस्य भुक्तस्य योऽणिष्ठो धातु. स मनसि शक्तिमधात । सान्नोपचिता मनसः शक्ति· षोडशधा प्रविभज्य पुरुषस्य कलात्वेन निर्दिदिक्षिता । तया मनस्यन्नोपचितया शक्त्या षोडशधा प्रविभक्तया संयुक्तस्तद्वान्कार्यकारणसंघातलक्षणो जीवविशिष्ट· पुरुषः षोडशकल उच्यते । यस्यां सत्यां द्रष्टा श्रोता मन्ता बोद्धा कर्ता विज्ञाता सर्वक्रियासमर्थः पुरुषो भवति । हीयमानायां च यस्यां सामर्थ्यहानिः । वक्ष्यति च 'अथान्नस्यायै द्रष्टा' इत्यादि । सर्वस्य कार्यकारणस्य सामर्थ्यं मन कृतमेव । मानसेन हि बलेन संपन्ना बलिनो दृश्यन्ते लोके ध्यानाहाराश्च केचित्, अन्नस्य सर्वात्मकत्वात् । अतोऽन्नकृतं मानसं वीर्यम् । षोडश कला

यस्य पुरुषस्य सोऽयं षोडशकलः पुरुषः । एतच्चेत्प्रत्यक्षीकर्तुमिच्छसि पंचदशसंख्याकान्यहानि माऽशीरशनं मा कार्षीः, कामामिच्छातोऽपः पिब, यस्मान्नपिबतोऽपस्ते प्राणो विच्छेत्स्यते विच्छेदमापत्स्यते, यस्मादापोमयोऽब्विकारः प्राण इत्यवोचाम । न हि कार्यं स्वकारणोपष्टंभमंतरेणाविध्रंशमानं स्थातुमुत्सहते ॥

स ह पंचदशाहानि नाशाथ हैनमुपससाद किं ब्रवीमि भो इत्यृचः सोम्य यजूंषि सामानीति स होवाच न वै मा प्रतिभान्ति भो इति ॥२॥

स हैवं श्रुत्वा मनसोऽन्नमयत्वं प्रत्यक्षीकर्तुमिच्छन्पंचदशाहानि न आश अशनं न कृतवान् । अथ षोडशेऽहनि हैनं पितरमुपसमादोपगतवानुपगम्य चोवाच— किं ब्रवीमि भो इति । इतर आह ऋच. सोम्य यजूंषि सामान्यर्धाष्वेति । एवमुक्त पित्राह— न वै मा मामृगादीनि प्रतिभान्ति मम मनसि न दृश्यन्त इत्यर्थो हे भो भगवन्निति ॥

तं होवाच यथा सोम्य महतोऽभ्याहितस्यैकोंऽगारः खद्योतमात्रः परिशिष्टः स्यात्तेन ततोऽपि न बहु दहेदेवं सोम्य ते षोडशानां कलानामेका कलातिशिष्टा स्यात्तयैतर्हि वेदान्नानुभवस्यशानाथ मे विज्ञास्यसीति ॥३॥

एवमुक्तवन्तं पिताह— शृणु तत्र कारणं येन ते तान्यृगादीनि न प्रतिभान्तीति । तं होवाच यथा लोके हे सोम्य महतो महत्परिमाणस्याभ्याहितस्य उपचितस्येंधनैरग्नेरेकोंगारः खद्योतमात्रः खद्योतपरिमाणः शान्तस्य परिशिष्टोऽवशिष्टः स्याद्धवेत्तेनांगारेण ततोऽपि तत्परिमाणादाधदपि न बहु दहेत् एवमेव खलु सोम्य ते तवान्नोपचिताना षोडशानां कलानामेका कला अवयवोऽतिशिष्टावशिष्टा स्यात् तया त्वं खद्योतमात्रांगारतुल्ययैतर्हीदानी वेदान्नानुभवसि न प्रतिपद्यसे, श्रुत्वा च मे मम वाचमथाशेषं विज्ञास्यस्यशान भुंक्ष्व तावत् ॥

स हाशाथ हैनमुपससाद तं ह यत्किंच पप्रच्छ सर्वं ह प्रतिपेदे ॥४॥

स ह तथैवाश भुक्तवान् । अथानंतरं हैनं पितरं शुश्रूषुरुपससाद । तं होपगतं पुत्रं यत्किंचर्गादिषु पप्रच्छ ग्रंथरूपमर्थजातं वा पिता, स श्वेतकेतुः सर्वं ह तत्प्रतिपेदे ऋगाद्यर्थतो ग्रंथतश्च ॥

तं होवाच यथा सोम्य महतोऽभ्याहितस्यैकमंगारं खद्योतमात्रं परिशिष्टं तं तृणैरुपसमाधाय प्राज्वलयेत्तेन ततोऽपि बहु दहेत् ॥५॥

तं होवाच पुनः पिता— यथा सोम्य महतोऽभ्याहितस्येत्यादि समानम् ।

एकमंगारं शान्तस्याग्नेः खद्योतमात्रं परिशिष्टं तं तृणैश्चूर्णैश्चोपसमाधाय प्राज्वलयेद्वर्धयेत् । तेनेद्धेनांगारेण ततोऽपि पूर्वपरिमाणाद्बहु दहेत् ॥

एवं सोम्य ते षोडशानां कलानामेका कलाऽतिशिष्टाभूत्सान्नेनोपसमाहिता प्राज्वाली तयैतर्हि वेदाननुभवस्यन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति तद्धास्य विजज्ञाविति विजज्ञाविति ॥६॥

एवं सोम्य ते षोडशानामन्नकलानां सामर्थ्यरूपाणामेका कलातिशिष्टाभूत् अतिशिष्टासीत् । पंचदशाहान्यभुक्तवत एकैकेनाह्नैकैका कला चंद्रमस इवापरपक्षे क्षीणा, सातिशिष्टा कला नवान्नेन भुक्तेनोपसमाहिता वर्धितोपचिता प्राज्वाली, दैर्घ्य छादसं, प्रज्वलिता वर्धितेत्यर्थः । प्राज्वालीदिति पाठान्तरं तदा तेनोपसमाहिता स्वयं प्रज्वलितवतीत्यर्थ· । तया वर्धितयैतर्हीदानीं वेदाननुभवस्युपलभसे । एवं व्यावृत्त्यनुवृत्तिभ्यामन्नमयत्वं मनसः सिद्धमित्युपसंहरति अन्नमयं हि सोम्य मन इत्यादि । यथैतन्मनसोऽन्नमयत्वं तव सिद्धं, तथा आपोमय· प्राणस्तेजोमयी वागित्येतदपि सिद्धमेवेत्यभिप्रायः । तदेतद्धाम्य पितुरुक्तं मनआदीनामन्नादिमयत्वं विजज्ञौ विज्ञातवाञ्श्वेतकेतुः । द्विरभ्यासस्त्रिवृत्करणप्रकरणसमाप्त्यर्थ· ॥ इति सप्तम· खंड· ॥ ६.७.—

उद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाच स्वप्नान्तं मे सोम्य विजानीहीति यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवति ॥१॥

यस्मिन्मनसि जीवेनात्मनानुप्रविष्टा परा देवता, आदर्श इव पुरुषः प्रतिबिंबेन जलादिष्विव च सूर्यादय प्रतिबिंबै. । तन्मनोऽन्नमयं तेजोमयाभ्यां वाक्प्राणाभ्यां संगतमधिगतम् । यन्मयो यत्स्थश्च जीवो मननदर्शनश्रवणादिव्यवहाराय कल्पते तदुपरमे च स्वं देवतारूपमेव प्रतिपद्यते । तदुक्तं श्रुत्यंतरे 'ध्यायतीव लेलायतीव स हि स्वप्नो भूत्वेमं लोकमतिक्रामति' 'स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः' इत्यादि, 'स्वेप्नेन शारीरं' इत्यादि, 'प्राणस्नेव प्राणो नाम भवति' इत्यादि च । तस्यास्य मनःस्थस्य मनआख्यां गतस्य मनउपशमद्वारेणेंद्रियविषयेभ्यो निवृत्तस्य यस्यां परस्यां देवतायां स्वात्मभूतायां यदवस्थानं, तत्पुत्रायाचिख्यासुरुद्दालको ह किलारुणिः श्वेतकेतुं पुत्रमुवाचोक्तवान् ।

स्वप्नान्तं स्वप्नमध्यं स्वप्न इति दर्शनवृत्तेः स्वप्नस्याख्या, तस्य मध्यं स्व-

प्रान्त सुषुप्तमित्येतत्। अथवा स्वप्नान्तं स्वप्नसतत्त्वमित्यर्थः। तत्राप्यर्थात्सुषुप्तमेव भवति। 'स्वमपीतो भवति' इति वचनात्। न ह्यन्यत्र सुषुप्तात्स्वमपीति जीवस्येच्छन्ति ब्रह्मविदः। तत्र ह्यादर्शापनयने पुरुषप्रतिबिंब आदर्शगतो यथा स्वमेव पुरुषमपीतो भवति, एवं मनआद्युपरमे चैतन्यप्रतिबिंबरूपेण जीवेनात्मना मनसि प्रविष्टा नामरूपव्याकरणाय परा देवता सा स्वमेवात्मानं प्रतिपद्यते जीवरूपतां मनआख्यां हित्वा। अतः सुषुप्त एव स्वप्नान्तशब्दवाच्य इति अवगम्यते। यत्र तु सुप्त स्वप्नान्पश्यति तत्स्वाप्नं दर्शनं सुखदुःखसंयुक्तमिति पुण्यापुण्यकार्यम्। पुण्यापुण्ययोर्हि सुखदुःखारंभकत्वं प्रसिद्धम्। पुण्यापुण्ययोश्चाविद्याकामोपष्टंभेनैव सुखदुःखतद्दर्शनकार्यारंभकत्वमुपपद्यते नान्यथेति अविद्याकामकर्मभिः संसारहेतुभिः संयुक्त एव स्वप्न इति न स्वमपीतो भवति। 'अनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य भवति' 'तद्वा अस्यैतदतिच्छंदा एष परम आनंदः' इत्यादिश्रुतिभ्यः। सुषुप्त एव स्वं देवतारूपं जीवत्वविनिर्मुक्तं दर्शयिष्यामि इत्याह— स्वप्नान्तं मे मम निगदतो हे सोम्य विजानीहि विस्पष्टं अवधारय इत्यर्थः। कदा स्वप्नान्तो भवतीत्युच्यते— यत्र यस्मिन्काल एतन्नाम भवति पुरुषस्य स्वप्स्यतः। प्रसिद्धं हि लोके स्वपितीति। गौणं चेदं नामेत्याह— यदा स्वपितीत्युच्यते पुरुषस्तदा तस्मिन्काले सता सच्छब्दवाच्यया प्रकृतया देवतया संपन्नो भवति संगत एकीभूतो भवति। मनसि प्रविष्टं मनआदिसंसर्गकृतं जीवरूपं परित्यज्य स्वं सद्रूपं यत्परमार्थसत्यमपीतोऽपिगतो भवति। अतस्तस्मात्स्वपितीत्येनमाचक्षते लौकिकाः। स्वमात्मानं हि यस्मादपीतो भवति। गुणनामप्रसिद्धितोऽपि स्वात्मप्राप्तिर्गम्यत इत्यभिप्रायः। कथं पुनर्लौकिकानां प्रसिद्धा स्वात्मसंपत्तिः? जाग्रच्छ्रमनिमित्तोद्भवत्वात्स्वापस्येत्याहुः। जागरिते हि पुण्यापुण्यनिमित्तसुखदुःखाद्यनेकायासानुभवाच्छ्रान्तो भवति, ततश्चायस्तानां करणानां अनेकव्यापारनिमित्तग्लानानां स्वव्यापारेभ्य उपरमो भवति। श्रुतेश्च 'श्राम्यत्येव वाक्श्राम्यति चक्षुः' इत्येवमादि। तथा च 'गृहीता वाग्गृहीतं चक्षुर्गृहीतं श्रोत्रं गृहीतं मनः' इत्येवमादीनि करणानि प्राणग्रस्तानि। प्राण एकोऽश्रान्तो देहे कुलाये यो जागर्ति तदा जीवः श्रमापनुत्तये स्वं देवतारूपमात्मानं प्रतिपद्यते। नान्यत्र स्वरूपावस्थानाच्छ्रमापनोदः स्यात् इति युक्ता प्रसिद्धिर्लौकिकानां, स्वं ह्यपीतो भवतीति।

दृश्यते हि लोके ज्वरादिरोगग्रस्तानां तद्विनिर्मोके स्वात्मस्थानां विश्रमणं तद्वदिहापि स्यादिति युक्तम्। 'तद्यथा श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः' इत्यादिश्रुतेश्च ॥

स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा बंधनमेवोपश्रयत एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयते प्राणबंधनं हि सोम्य मन इति ॥२॥

तत्रायं दृष्टान्तो यथोक्तेऽर्थे—स यथा शकुनिः पक्षी शकुनिघातकस्य हस्तगतेन सूत्रेण प्रबद्धः पाशितो दिशं दिशं बंधनमोक्षार्थी सन्प्रतिदिशं पतित्वान्यत्र बंधनादायतनमाश्रयं विश्रमणायालब्ध्वाऽप्राप्य बंधनमेवोपश्रयते । एवमेव यथायं दृष्टान्तः खलु हे सोम्य तन्मनस्तत्प्रकृतं षोडशकलमन्नोपचितं मनो निर्धारितं, तत्प्रविष्टस्तत्स्थस्तदुपलक्षितो जीवस्तन्मन इति निर्दिश्यते मंचाक्रोशनवत् । स मनआख्योपाधिर्जीवो अविद्याकामकर्मोपदिष्टां दिशं दिशं सुखदुःखादिलक्षणां जाग्रत्स्वप्नयोः पतित्वा गत्वानुभूयेत्यर्थः, अन्यत्र सदाख्यात्स्वात्मनः आयतनं विश्रमणस्थानमलब्ध्वा प्राणमेव, प्राणेन सर्वकार्यकरणाश्रयेणोपलक्षिता प्राण इत्युच्यते सदाख्या परा देवता, 'प्राणस्य प्राणं' 'प्राणशरीरो भारूपः' इत्यादिश्रुतेः । अतस्ता देवतां प्राणं प्राणाख्यामेवोपश्रयते । प्राणो बंधनं यस्य मनसस्तत्प्राणबंधनं हि यस्मात्सोम्य मनः प्राणोपलक्षितदेवताश्रयं, मन इति तदुपलक्षितो जीव इति ॥

अशनापिपासे मे सोम्य विजानीहीति यत्रैतत्पुरुषोऽशिशिषति नामाप एव तदशितं नयन्ते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तदप आचक्षतेऽशनायेति तत्रैतच्छुंगमुत्पतितं सोम्य विजानीहि नेदममूलं भविष्यतीति ॥३॥

एवं स्वापितनामप्रसिद्धिद्वारेण यज्जीवस्य सत्यस्वरूपं जगतो मूलं तत्पुत्रस्य दर्शयित्वा आह अन्नादिकार्यकारणपरंपरयापि जगतो मूलं सद्दिदर्शयिषुः । अशनापिपासे अशितुमिच्छाऽशना, यालोपेन, पातुमिच्छा पिपासा, ते अशनापिपासे, अशनापिपासयोः सतत्त्वं विजानीहीत्येतत् । यत्र यस्मिन्काल एतन्नाम पुरुषो भवति । किं तदशिशिषत्यशितुमिच्छतीति । तदा तस्य पुरुषस्य किंनिमित्तं नाम भवतीत्याह— यत्तत्पुरुषेणाशितमन्नं कठिनं पीता आपो नयन्ते

द्रवीकृत्य रसादिभावेन विपरिणमयन्ते तदा भुक्तमन्नं जीर्यति । अथ च भवत्यस्य नामाशिशिषतीति गौणम् । जोषं ह्यन्नेऽशितुमिच्छति सर्वो हि जंतुः । तत्रापामशितनेतृत्वादशनाया इति नाम प्रसिद्धमित्येतस्मिन्नर्थे । यथा गोनायो गा नयतीति गोनाय इत्युच्यते गोपालः । तथाश्वान्नयतीत्यश्वनायोऽश्वपाल इत्युच्यते । पुरुषनायः पुरुषान्नयतीति राजा सेनापतिर्वा । एवं तत्तदा अप आचक्षते लौकिका अशनायेति विसर्जनीयलोपेन । तत्रैवं सत्यद्भी रसादिभावेन नीतेनाशितेनान्नेन निष्पादितमिदं शरीरं वटकणिकायामिव शुंगोकुर उत्पतित उद्गतः, तमिमं शुंगं कार्यं शरीराख्यं वटादिशुंगवदुत्पतितं हे सोम्य विजानीहि । किं तत्र विज्ञेयमित्युच्यते— स्थूण्विदं शुंगवत्कार्यत्वाच्छरीरं नामूलं मूलरहितं भविष्यतीत्युक्त आह श्वेतकेतुः ॥

तस्य क्व मूलं स्यादन्यत्रान्नादेवमेव खलु सोम्यान्नेन शुंगेनापो मूलमन्विच्छाद्भिः सोम्य शुंगेन तेजो मूलमन्विच्छ तेजसा सोम्य शुंगेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ॥४॥

यद्येवं समूलमिदं शरीरं वटादिशुंगवत्तस्यास्य शरीरस्य क्व मूलं स्याद्धे वेदित्येवं पृष्ट आह पिता— तस्य क्व मूलं स्यादन्यत्रान्नादन्नं मूलमित्यभिप्रायः । कथम् । अशितं ह्यन्नमद्भिर्द्रवीकृतं जाठरेणाग्निना पच्यमानं रसभावेन परिणमते । रसाच्छोणित शोणितान्मांसं मांसान्मेदो मेदसोऽस्थ्यन्यस्थिभ्यो मज्जा मज्जायाः शुक्रम् । तथा योषिद्भुक्तं चान्नं रसादिक्रमेणैवं परिणतं लोहितं भवति । ताभ्यां शुक्रशोणिताभ्यामन्नकार्याभ्यां संयुक्ताभ्यामन्नेनैवं प्रत्यहं भुज्यमानेन आपूर्यमाणाभ्यां कुड्यमिव मृत्पिंडैः प्रत्यहमुपचीयमानोऽन्नमूलो देहशुंगः परिनिष्पन्न इत्यर्थः । यत्तु देहशुंगस्य मूलमन्नं निर्दिष्टं तदपि देहवद्विनाशोत्पत्तिमत्त्वात्कस्माच्चिन्मूलादुत्पतितं शुंग एवेति कृत्वाह— यथा देहशुंगोऽन्नमूल एवमेव खलु सोम्यान्नेन शुंगेन कार्यभूतेन अपो मूलमन्नस्य शुंगस्यान्विच्छ प्रतिपद्यस्व । अपामपि विनाशोत्पत्तिमत्त्वाच्छुंगत्वमेवेति अद्भिः सोम्य शुंगेन कार्येण कारणं तेजो मूलमन्विच्छ । तेजसोऽपि विनाशोत्पत्तिमत्त्वाच्छुंगत्वमिति तेजसा सोम्य शुंगेन सन्मूलमेकमेवाद्वितीयं परमार्थसत्यम् । यस्मिन्सर्वमिदं वाचारंभणं विकारो नामधेयमनृतं रज्ज्वामिव सर्पादिविकल्पजातमध्यस्तमविद्यया, तदस्य जगतो मूलम् । अतः सन्मूलाः सत्कारणा हे सोम्येमाः स्थावरजंगमलक्षणाः सर्वाः प्रजाः ।

न केवलं सन्मूला एव इदानीमपि स्थितिकाले सदायतनाः सदाश्रया एव। नहि मृदमनाश्रित्य घटादेः सत्त्वं स्थितिर्वास्ति। अतो मृद्वत्सन्मूलत्वात्प्रजानां सदायतनं यासां ताः सदायतनाः प्रजाः। अंते च सत्प्रतिष्ठा. सदेव प्रतिष्ठा लयः समाप्तिरवसानं परिशेषो यासा ताः सत्प्रतिष्ठाः ॥

अथ यत्रैतत्पुरुषः पिपासति नाम तेज एव तत्पीतं नयते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तत्तेज आचष्ट उदन्येति तत्रैतदेव शुंगमुत्पतितं सोम्य विजानीहि नेदममूलं भविष्यतीति ॥५॥

अथेदानीमप्शुंगद्वारेण सतो मूलस्यानुगमः कार्य इत्याह— यत्र यस्मिन्काल एतन्नाम पिपासति पातुमिच्छतीति पुरुषो भवति। आशिशिषतीतिवदिदमपि गौणमेव नाम भवति। द्रवीकृतस्याशितस्यान्नस्य नेतृन्य आपोऽन्नशुंगं देहं क्लेदयन्त्यः शिथिलीकुर्युरब्बाहुल्यादिति तेजसा न शोष्यन्ते। नितरां च तेजसा शोष्यमाणास्वप्सु देहभावेन परिणममानासु पातुमिच्छा पुरुषस्य जायते तदा पुरुषः पिपासति नाम। तदेतदाह-- तेज एव तत्तदा पीतमबादि शोषयद्देहगतलोहितप्राणभावेन नयते परिणमयति। तद्यथा गोनाय इत्यादि समानं. एवं तत्तेज आचष्टे लोक -- उदन्येत्युदकं नयतीत्युदन्यम्। उदन्येतीति च्छादसं तत्रापि पूर्ववत्। अपामप्येतदेव शरीराख्यं शुंगं नान्यदित्येवमादि समानमन्यत ॥

तस्य क्व मूलं स्यादन्यत्राद्भ्योऽद्भिः सोम्य शुंगन तेजो मूलमन्विच्छ तेजसा सोम्य शुंगेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा यथा नु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तदुक्तं पुरस्तादेव भवत्यस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम् ॥६॥

सामर्थ्यात्तेजसोऽप्येतदेव शरीराख्यं शुंगम्। अतोऽप्शुंगेन देहेन आपो मूलं गम्यते। अद्भिः शुंगेन तेजो मूलं गम्यते। तेजसा शुंगेन सन्मूलं गम्यते पूर्ववत्। एवं हि तेजोबन्नमयस्य देहशुंगस्य वाचारंभणमात्रस्यान्नादिपरंपरया परमार्थसत्यं सन्मूलमभयमसंत्रासं निरायासं सन्मूलमन्विच्छेति पुत्रं गमयित्वा अशिशिषति पिपासतीति नामप्रसिद्धिद्वारेण यदन्यदिहास्मिन्प्रकरणे तेजोबन्नानां पुरुषेणोपयुज्यमानानां कार्यकरणसंघातस्य देहशुंगस्य स्वजात्यसांकर्येणोपचयकरत्वं वक्त-

व्यं प्राप्तं, तदिहोक्तमेव द्रष्टव्यमिति पूर्वोक्तं व्यपदिशति। यथा नु खलु येन प्रकारेण इमास्तेजोबन्नाख्यास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तदुक्तं पुरस्तादेव भवति 'अन्नमशितं त्रेधा विधीयते' इत्यादि। तत्रैवोक्तमन्नादीनामशितानां यै मध्यमा धातवस्ते साप्तधातुकं शरीरमुपचिन्वन्तीत्युक्तम्। मांसं भवति लोहितं भवति मज्जा भवत्यस्थि भवतीति। ये त्वणिष्ठा धातवो मनः प्राणं वाचं देहस्यांतःकरणसंघातमुपचिन्वन्तीति चोक्तं— तन्मनो भवति स प्राणो भवति सा वाग्भवतीति। सोऽयं प्राणकरणसंघातो देहे विशीर्णे देहान्तरं जीवाधिष्ठितो येन क्रमेण पूर्वदेहात्प्रच्युतो गच्छति तदाह, अस्य हे सोम्य पुरुषस्य प्रयतो म्रियमाणस्य वाङ्मनसि संपद्यते मनस्युपसंह्रियते। अथ तदाहुर्ज्ञातयो न वदतीति। मनःपूर्वको हि वाग्व्यापार। 'यद्वै मनसा ध्यायति तद्वाचा वदति' इति श्रुतेः। वाच्युपसंहृताया मनसि मनो मननव्यापारेण केवलेन वर्तते। मनोऽपि यदोपसंह्रियते तदा मनः प्राणे संपन्नं भवति सुषुप्तकाल इव। तदा पार्श्वस्था ज्ञातयो न विजानातीत्याहुः। प्राणश्च तदोर्ध्वोच्छ्वासी स्वात्मन्युपसंहृतबाह्यकरणः संवर्गविद्याया दर्शनाद्धस्तपादादीन्विक्षिपन्मर्मस्थानानि निर्कृन्तन्निवोत्सृजन् क्रमेणोपसंहृतस्तेजसि संपद्यते। तदाहुर्ज्ञातयो न चलतीति। मृतो नेति वा विचिकित्सन्तो देहमालभमाना उष्णं चोपलभमाना देह उष्णो जीवतीति। यदा तदप्यौष्ण्यलिंगं तेज उपसंह्रियते, तदा तत्तेजः परस्यां देवतायां प्रशाम्यति। तदैवं क्रमेणोपसंहृते स्वमूले प्राप्ते च मनसि तत्स्थो जीवोऽपि सुषुप्तकालवत् निमित्तोपसंहारादुपसंह्रियमाण सन्सत्याभिसंधिपूर्वकं चेदुपसंह्रियते सदेव संपद्यते न पुनर्देहान्तराय सुषुप्तादिवोत्तिष्ठति। यथा लोके सभये देशे वर्तमानः कथंचिदिवाभयं देशं प्राप्तस्तद्वत्। इतरस्त्वनात्मज्ञस्तस्मादेव मूलात्सुषुप्तादिवोत्थाय मृत्वा पुनर्देहजालमाविशति यस्मान्मूलादुत्थाय देहमाविशति जीवः॥

स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥७॥ इति अष्टमः खंडः॥

स यः सदाख्य एष उक्तोऽणिमाणुभावो जगतो मूलमैतदात्म्यं एतत्सदात्मा यस्य सर्वस्य तत् एतदात्म तस्य भाव ऐतदात्म्यम्। एतेन सदाख्येन आत्मना आत्मवत्सर्वमिदं जगत्। नान्योऽस्त्यस्यात्मा संसारी। 'नान्यदतोऽस्ति

द्रष्टृ नान्यदतोऽस्ति श्रोतृ' इत्यादिश्रुत्यंतरात्। येन चात्मनात्मवत्सर्वमिदं जगत्तदेव सदाख्यं कारणं सत्यं परमार्थसत्। अतः स एवात्मा जगतः प्रत्यक्स्वरूपं सतत्त्वं याथात्म्यम्। आत्मशब्दस्य निरुपपदस्य प्रत्यगात्मनि गवादिशब्दवन्निरूढत्वात्। अतस्तत्सत्त्वमसीति हे श्वेतकेतो इत्येवं प्रत्यायितः पुत्र आह— भूय एव मा भगवान्विज्ञापयतु, यद्भवदुक्तं तत्संदिग्धं मम, अहन्यहनि सर्वाः प्रजाः सुषुप्तौ सत्संपद्यन्त इत्येतद्येन सत्संपद्य न विदुः सत्संपन्ना वयमिति। अतो दृष्टान्तेन मां प्रत्याययत्वित्यर्थः। एवमुक्तस्तथास्तु सोम्येति होवाच पिता ॥

यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणां रसान्समवहारमेकतां रसं गमयन्ति ॥१॥

यत्पृच्छसि अहन्यहनि सत्संपद्य न विदुः सत्संपन्नाः स्म इति तत्कस्मादित्यत्र शृणु दृष्टान्तम्। यथा लोके हे सोम्य मधुकृतो, मधु कुर्वन्तीति मधुकृतो मधुकरमक्षिका मधु निस्तिष्ठन्ति मधु निष्पादयन्ति तत्पराः सन्तः। कथम्। नानात्ययाना नानागतीनां नानादिक्कानां वृक्षाणां रसान्समवहारं समाहृत्यैकतामेकभावं मधुत्वेन रसान्गमयन्ति मधुत्वमापादयन्ति ॥

ते यथा तत्र न विवेकं लभन्तेऽमुष्याहं वृक्षस्य रसोऽस्म्यमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सोम्येमाः सर्वा प्रजाः सति संपद्य न विदुः सति संपद्यामह इति ॥२॥

ते रसा यथा मधुत्वैनकता गतास्तत्र मधुनि विवेकं न लभन्ते। कथं, अमुष्याहमाम्रस्य पनसस्य वा वृक्षस्य रसोऽस्मीति। यथाहि लोके बहूनां चेतनावतां समेतानां प्राणिनां विवेकलाभो भवत्यमुष्याहं पुत्रोऽमुष्याहं नप्तास्मीति। ते च लब्धविवेकाः सन्तो न संकीर्यन्ते। न तथेह अनेकप्रकारवृक्षरसानामपि मधुराम्लतिक्तकटुकादीनां मधुत्वेनैकतां गताना मधुरादिभावेन विवेको गृह्यत इत्यभिप्रायः। यथायं दृष्टान्तः, इत्येवमेव खलु सोम्येमाः सर्वाः प्रजा अहन्यहनि सति संपद्य सुषुप्तिकाले मरणप्रलययोश्च न विदुर्न विजानीयुः, सति संपद्यामह इति संपन्ना इति वा ॥

त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतंगो वा दंशो वा मशको वा यद्यद्भवन्ति तदाभवन्ति ॥३॥

यस्माच्चैवमात्मनः सद्रूपतामज्ञात्वैव सत्संपद्यन्ते। अतस्ते इह लोके यत्क-

र्मानमित्तां यां यां जाति प्रतिपन्ना आसुव्र्याघ्रादीनां व्याघ्रोऽहं सिंहोऽहमित्येवं, ते तत्कर्मज्ञानवासनांकिताः सन्तः सत्प्रविष्टा अपि तद्भावेनैव पुनराभवन्ति पुनः सत आगत्य व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतंगो वा दंशो वा मशको वा यद्यत्पूर्वामिह लोके भवन्ति बभूवुरित्यर्थः, तदेव पुनरागत्य भवन्ति । युगसहस्रकोट्यंतरितापि संसारिणो जंतोर्या पुरा भाविता वासना सा न नश्यतीत्यर्थः । 'यथाप्रज्ञं हि संभवाः' इति श्रुत्यंतरात् ॥

स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥४॥ इति नवमः खंडः ॥

ता प्रजा यस्मिन्प्रविश्य पुनराविर्भवन्ति, ये त्वितोऽन्ये सत्सत्यात्माभिसंधा यमणुभावं सदात्मानं प्रविश्य नावर्तन्ते, स य एषोऽणिमेत्यादि व्याख्यातम् । यथा लोके स्वकीये गृहे सुप्त उत्थाय ग्रामान्तरं गतो जानाति स्वगृहादागतोऽस्मीत्येवं सत आगतोऽस्मीति च जंतूना कस्माद्विज्ञानं न भवतीति, भूय एव मा भगवान्विज्ञापयतु इत्युक्तस्तथा सोम्येति होवाच पिता ॥ ६.९ —

इमाः सोम्य नद्यः पुरस्तात्प्राच्यः स्यंदन्ते पश्चात्प्रतीच्यस्ताः समुद्रात्समुद्रमेवापियन्ति स समुद्र एव भवति ता यथा तत्र न विदुरियमहमस्मीयमहमस्मीति ॥१॥

शृणु तत्र दृष्टान्तं— यथा सोम्येमा नद्यो गंगाद्याः पुरस्तात्पूर्वां दिशं प्रति प्राच्यः प्रागंचना स्यंदन्ते स्रवन्ति । पश्चात्प्रतीचीं दिशं प्रति सिंध्वाद्याः प्रतीचीमंचन्ति गच्छन्तीति प्रतीच्य , ताः समुद्रादंभोनिर्धेर्जलधरैराक्षिप्ता पुनर्वृष्टिरूपेण पतिता गंगादिनदीरूपेण पुनः समुद्रमंभोनिधिमेवापियन्ति स समुद्र एव भवति । ता नद्यो यथा तत्र समुद्रे समुद्रात्मनैकतां गता न विदुर्न जानन्तीयं गंगाहमस्मीयं यमुनाहमस्मीति च ॥

एवमेव खलु सोम्येमाः सर्वाः प्रजाः सत आगम्य न विदुः सत आगच्छामह इति त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतंगो वा दंशो वा मशको वा यद्यद्भवन्ति तदाभवन्ति ॥२॥ स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥३॥ इति दशमः खंडः ॥

एवमेव खलु सोम्येमाः सर्वाः प्रजा यस्मात्सति संपद्य न विदुस्तस्मात्सत आगम्य न विदुः, सत आगच्छामह आगता इति वा । त इह व्याघ्र इत्यादि समानमन्यत् । दृष्टं लोके जले वीचीतरंगफेनबुद्बुदादय उत्थिताः पुनस्तद्भावं गता विनष्टा इति । जीवास्तु तत्कारणभावं प्रत्यहं गच्छन्तोऽपि सुषुप्ते मरण-प्रलययोश्च न विनश्यन्तीत्येतत् । भूय एव मा भगवान्विज्ञापयतु दृष्टान्तेन । तथा सोम्येति होवाच पिता ॥ इति दशम खंडः ॥ ६ १० —

अस्य सोम्य महतो वृक्षस्य यो मूलेऽभ्याहन्याज्जीवन्स्रवेद्यो मध्येऽभ्याहन्याज्जीवन्स्रवेद्योऽग्रेऽभ्याहन्याज्जीवन्स्रवेत्स एष जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति ॥१॥

शृणु दृष्टान्तं— अस्य हे सोम्य महतोऽनेकशाखादियुक्तस्य वृक्षस्य, अस्येत्यग्रतः स्थितं वृक्षं दर्शयन्नाह । यदि य कश्चिदस्य मूलेऽभ्याहन्यात्परश्वादिना सकृद्घातमात्रेण न शुष्यतीति जीवन्नेव भवति, तदा तस्य रसः स्रवेत् । तथा यो मध्येऽभ्याहन्याज्जीवन्स्रवेत्तथा योऽग्रेऽभ्याहन्याज्जीवन्स्रवेत् । स एष वृक्ष इदानीं जीवेनात्मनानुप्रभूतोऽनुव्याप्तः पेपीयमानोऽत्यर्थं पिबन्नुदकं भौमांश्च रसान्मूलैर्गृह्णन्मोदमानो हर्षं प्राप्नुवंस्तिष्ठति ॥

अस्य यदेकां शाखां जीवो जहात्यथ सा शुष्यति द्वितीयां जहात्यथ सा शुष्यति तृतीयां जहात्यथ सा शुष्यति सर्वं जहाति सर्वः शुष्यति ॥२॥

तस्यास्य यदेका शाखा रोगग्रस्तामाहता वा जीवो जहात्युपसंहरति शाखायां विप्रसृतमात्मांशम् । अथ सा शुष्यति । वाङ्मनःप्राणकरणग्रामानुप्रविष्टो हि जीव इति तदुपसंहारे उपसंहियते । जीवेन च प्राणयुक्तेनाशितं पीतं च रसता गतं जीवच्छरीरं वृक्षं च वर्धयद्रसरूपेण जीवस्य सद्भावे लिंगं भवति । अशितपीताभ्यां हि देहे जीवस्तिष्ठति । ते चाशितपीते जीवकर्मानुसारिणी इति तस्यैकांगवैकल्यनिमित्तं कर्म यदोपस्थितं भवति तदा जीव एकां शाखां जहाति शाखाया आत्मानमुपसंहरति । अथ तदा सा शाखा शुष्यति । जीवस्थितिनिमित्तो रसो जीवकर्माक्षिप्तो जीवोपसंहारे न तिष्ठति । रसापगमे च शाखा शोषमुपैति । तथा सर्वं वृक्षमेव यदायं जहाति तदा सर्वोऽपि वृक्षः शुष्यति । वृक्षस्य रसस्रवणशोषणादिलिंगाज्जीववत्त्वं दृष्टान्तश्रुतेश्च चेतनावन्तः स्थावरा इति, बौद्धकाणादमतमचेतनाः स्थावरा इत्येतदसारं, इति दर्शितं भवति ॥

एवमेव खलु सोम्य विद्धीति होवाच जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥३॥ इति एकादशः खंडः ॥

यथास्मिन्वृक्षदृष्टान्ते दर्शितं, जीवेन युक्तो वृक्षोऽशुष्को रसपानादियुक्तो जीवतीत्युच्यते तदपेतश्च म्रियत इत्युच्यते, एवमेव खलु सोम्य विद्धीति होवाच-जीवापेतं जीववियुक्तं वाव किलेदं शरीरं म्रियते न जीवो म्रियत इति । कार्यशेषे च सुप्तोत्थितस्य ममेदं कार्यशेषमवरिप्समाप्तमिति स्मृत्वा समापनदर्शनात् । जातमात्राणा च जंतूना स्तन्याभिलाषभयादिदर्शनाच्च अतीतजन्मान्तरानुभूत-स्तन्यपानदुःखानुभवस्मृतिर्गम्यते । अग्निहोत्रादीना च वैदिकाना कर्मणामर्थ-वत्त्वान्न जीवो म्रियत इति । स य एषोऽणिमेत्यादि समानम् । कथं पुनरिदम-त्यंतस्थूलं पृथिव्यादि नामरूपवज्जगत् अत्यंतसूक्ष्मात्सदृपान्नामरूपरहितात्मतो जायते, इत्येतदृष्टान्तेन भूय एव मा भगवान्विज्ञापयत्विति । तथा सोम्येति हो-वाच पिता ॥ इति एकादश खंड ॥ ६ ११.—

न्यग्रोधफलमत आहरेतीदं भगव इति भिंद्धीति भिन्नं भगव इति किमत्र पश्यसीत्यण्व्य इवेमा धाना भगव इत्यासामंगैकां भिंद्धीति भिन्ना भगव इति किमत्र पश्यसीति न किंचन भगव इति ॥१॥

यद्येतत्प्रत्यक्षीकर्तुमिच्छसि अतोऽस्मान्महतो न्यग्रोधात्फलमेकमाहरेत्यु-क्तस्तथा चकार सः । इदं भगव उपहृतं फलमिति दर्शितवन्तं प्रत्याह फलं भि-द्धीति । भिन्नमित्याहेतरः । तमाह पिता किमत्र पश्यसीत्युक्त आह अण्व्योऽणु-तरा इवेमा धाना बीजानि पश्यामि भगव इति । आसा धानानामेका धानां अंग हे वत्स भिद्धीत्युक्त आह भिन्ना भगव इति । यदि भिन्ना धाना तस्यां भिन्नायां किं पश्यसीत्युक्त आह न किंचन पश्यामि भगव इति ॥

तं होवाच यं वै सोम्यैतमणिमानं न निभालयस एतस्य वै सोम्यै-षोऽणिम्न एवं महान्यग्रोधस्तिष्ठति श्रद्धत्स्व सोम्येति ॥२॥

तं पुत्रं होवाच वटधानायां भिन्नाया यं वटबीजाणिमानं हे सोम्यैतं न निभालयसे न पश्यसि । तथाप्येतस्य वै किल सोम्यैष महान्यग्रोधो बीजस्या-णिम्नः सूक्ष्मस्यादृश्यमानस्य कार्यभूतः स्थूलशाखास्कंधफलपलाशवांस्तिष्ठत्यु-

त्पन्नः सन् उत्तिष्ठतीति वा, उच्छब्दोऽध्याहार्यः । अतः श्रद्धत्स्व सोम्य सत एव अणिम्नः स्थूलं नामरूपादिमत्कार्यं जगदुत्पन्नमिति । यद्यपि न्यायागमाभ्यां निर्धारितोऽर्थस्तथैवेत्यवगम्यते, तथाप्यत्यंतसूक्ष्मेष्वर्थेषु बाह्यविषयासक्तमनसः स्वभावप्रवृत्तस्यासत्यां गुरुतरायां श्रद्धायां दुरवगमत्वं स्यादित्याह श्रद्धत्स्वेति । श्रद्धाया तु सत्या मनसः समाधानं बुभुत्सितेऽर्थे भवेत्ततश्च तदर्थावगतिः । 'अन्यत्रमना अभूवम्' इत्यादिश्रुतेः ॥

स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥३॥ इति द्वादशः खंडः ॥

स य इत्याद्युक्तार्थम् । यदि तत्सज्जगतो मूलं कस्मान्नोपलभ्यत इत्येतत् दृष्टान्तेन मा भगवान्भूय एव विज्ञापयत्विति । तथा सोम्येति होवाच पिता ॥—

लवणमेतदुदकेऽवधायाथ मा प्रातरुपसीदथा इति स ह तथा चकार तं होवाच यद्दोषा लवणमुदकेऽवाधा अंग तदाहरेति तद्धावमृश्य न विवेद ॥१॥

विद्यमानमपि वस्तु नोपलभ्यते प्रकारान्तरेण तूपलभ्यत इति शृण्वत्र दृष्टान्तम् । यदि चेममर्थं प्रत्यक्षीकर्तुमिच्छसि पिंडरूपं लवणमेतद्धटादावुदकेऽवधाय प्रक्षिप्याथ मा मां श्वः प्रातरुपसीदथा उपगच्छेथा इति । स ह पित्रोक्तं अर्थं प्रत्यक्षीकर्तुमिच्छंस्तथा चकार । तं होवाच परेद्युः प्रातर्यल्लवणं दोषा रात्रौ उदकेऽवाधा निक्षिप्तवानसि अंग हे वत्स तदाहर । इत्युक्तस्तल्लवणमाजिहीर्षुर्हि किलावमृश्योदके न विवेद न विज्ञातवान् यथा तल्लवणं विद्यमानमेव सदप्सु लीनं संश्लिष्टमभूत् ॥

यथा विलीनमेवांगास्यांतादाचामेति कथमिति लवणमिति मध्यादाचामेति कथमिति लवणमित्यंतादाचामेति कथमिति लवणमित्यभिप्रास्यैतदथ मोपसीदथा इति तद्ध तथा चकार तच्छश्वत्संवर्तते तं होवाचात्र वाव किल सत्सोम्य न निभालयसेऽत्रैव किलेति ॥२॥

यथा विलीनं लवणं न वेत्थ तथापि तच्चक्षुषा स्पर्शनेन च पिंडरूपं लवणमगृह्यमाणं विद्यत एवाप्सूपलभ्यते चोपायान्तरेण, इत्येतत्पुत्रं प्रत्याययितुमिच्छन्नाह— अंग अस्योदकस्यान्तादुपरि गृहीत्वाचाम । इत्युक्त्वा पुत्रं तथाकृत-

वन्तमुवाच कथमिति । इतर आह लवणं स्वादुत इति । तथा मध्यादुदकस्य गृहीत्वाचामेति । कथमिति लवणमिति । तथांतादधोदेशाद्गृहीत्वाचामेति । कथमिति लवणमिति । यद्येवमभिप्राय परित्यज्यैतदुदकमाचम्याथ मोपसीदथा इति । तद्ध तथा चकार लवणं परित्यज्य पितृसमीपमाजगामेत्यर्थः इदं वचनं श्रुवन्— तल्लवणं तस्मिन्नेवोदके यन्मया रात्रौ क्षिप्तं शश्वन्नित्यं संवर्तते विद्यमानमेव सत्सम्यग्वर्तते । इत्येवमुक्तवन्तं तं होवाच पिता— यथेदं लवणं दर्शनस्पर्शनाभ्यां पूर्वं गृहीतं पुनरुदके विलीनं ताभ्यामगृह्यमाणमपि विद्यत एवोपायान्तरेण जिह्वयोपलभ्यमानत्वात्, एवमेवात्रैवास्मिन्नेव तेजोवन्नादिकार्ये शुंगे देहे । वाव किलेत्याचार्योपदेशस्मरणप्रदर्शनार्थौ । सत्तेजोवन्नादिशुंगकारणं वटबीजाणिमवत् विद्यमानमेवेंद्रियैर्नोपलभसे न निभालयसे । यथात्रैवोदके दर्शनस्पर्शनाभ्यामनुपलभ्यमानं लवणं विद्यमानमेव जिह्वयोपलब्धवानसि । एवमेवात्रैव किल विद्यमानं सज्जगन्मूलमुपायान्तरेण लवणाणिमवदुपलप्स्यस इति वाक्यशेषः ॥

स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥३॥ इति त्रयोदशः खंडः ॥

स य इत्यादि समानम् । यद्येवं लवणाणिमवदिंद्रियैरनुपलभ्यमानमपि जगन्मूलं सदुपायान्तरेणोपलब्धुं शक्यते, यदुपलंभात्कृतार्थः स्यामनुपलंभाच्चाकृतार्थः स्यामहं, तन्मेवोपलब्धौ क उपाय इत्येतत भूय एव मा भगवान्विज्ञापयतु दृष्टान्तेन । तथा सोम्येति होवाच ॥ इति त्रयोदशः खंडः ॥ ६.१३.—

यथा सोम्य पुरुषं गंधारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेत्स यथा तत्र प्राङ्वोदङ्वाधराङ्वा प्रत्यङ्वा प्रध्मायीताभिनद्धाक्ष आनीतोऽभिनद्धाक्षो विसृष्टः ॥१॥

यथा लोके हे सोम्य पुरुषं यं कंचिद्गंधारेभ्यो जनपदेभ्योऽभिनद्धाक्षं बद्धचक्षुषमानीय द्रव्यहर्ता तस्करस्तमभिनद्धाक्षमेव बद्धहस्तमरण्ये ततोऽप्यतिजनेऽतिगतजनेऽत्यंतविगतजने देशे विसृजेत्स तत्र दिग्भ्रमेणोपतो यथा प्राङ्वा प्रागंचनः प्राङ्मुखो वेत्यर्थः । तथोदङ्वा अधराङ्वा प्रत्यङ्वा प्रध्मायीत शब्दं कुर्याद्विक्रोशेत— अभिनद्धाक्षोऽहं गंधारेभ्यस्तस्करेणानीतोऽभिनद्धाक्ष एव विसृष्ट इति ॥

तस्य यथाभिनहनं प्रमुच्य प्रब्रूयादेतां दिशं गंधारा एतां दिशं व्रजेति स ग्रामाद्ग्रामं पृच्छन्पंडितो मेधावी गंधारानेवोपसंपद्येतैवमेवेहाचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति ॥२॥

एवं विक्रोशतस्तस्य यथाभिनहनं यथा बंधनं प्रमुच्य मुक्त्वा कारुणिक कश्चिदेना दिशमुत्तरतो गंधारा एता दिशं व्रजेति प्रब्रूयात् । स एवं कारुणिकेन बंधनान्मोक्षितो ग्रामाद्ग्रामान्तर पृच्छन्पंडित उपदेशवान्मेधावी परोपदिष्टग्रामप्रवेशमार्गावधारणसमर्थ· सन्गंधारानेवोपसंपद्यत । नेतरो मूढमतिर्देशान्तरदर्शनतृड्वा । यथायं दृष्टान्तो वर्णितः— स्वविषयेभ्यो गंधारेभ्यः पुरुषस्तस्करैरभिनद्धाक्षोऽविवेको दिङ्मूढोऽशनायापिपासादिमान्व्याघ्रतस्करादयनेकभयानर्थव्रातयुतं अरण्यं प्रवेशितो दु खार्तो विक्रोशन्बंधनेभ्यो मुमुक्षुस्तिष्ठति, स कथंचिदेव कारुणिकेन केचिन्मोक्षित स्वदेशान्गंधारानेवापन्नो निर्वृत. सुख्यभूत् । एवमेव सतो जगदात्मस्वरूपान्जीवब्रह्मादिमयं देहारण्यं वातपित्तकफरुधिरमेदोमांसास्थिमज्जाशुक्रकृमिमूत्रपुरीषवत् शीतोष्णाद्यनेकद्वंद्वदु खवच्चेदं मोहपट्टाभिनद्धाक्षो भार्यापुत्रमित्रपशुबंधवादिदृष्टादृष्टानेकविषयतृष्णापाशित· पुण्यापुण्यादितस्करैः प्रवेशित·, अहममुष्य पुत्रो, ममेते बाधवा·, सुख्यहं दु.खी मृद· पंडितो धार्मिको बंधुमाञ्ज्ञातो मृतो जार्ण· पार्पा, पुत्रो मे मृतो, धनं मे नष्टं, हा हतोऽस्मि, कथं जीविष्यामि, का मे गति , किं मे त्राणं, इत्येवमनेकशतसहस्रानर्थजालवान्विक्रोशन् कथंचिदेव पुण्यातिशयात्परमकारुणिकं कंचित्सद्ब्रह्मात्मविदं विमुक्तबंधनं ब्रह्मिष्ठं यदा आसादयति तेन च ब्रह्मविदा कारुण्याद्दर्शितसंसारविषयदोषदर्शनमार्गो विरक्त· संसारविषयेभ्यो— नासि त्वं संसार्यमुष्य पुत्रत्वादिधर्मवान्कि तर्हि सद्यत्तत्त्वमसि— इत्यविद्यामोहपट्टाभिनहनान्मोक्षितो गंधारपुरुषवच्च स्व सदात्मानमुपसंपद्य सुखा निर्वृत स्यादित्येतमेवार्थमाह— आचार्यवान्पुरुषो वेदेति । तस्यास्यैवमाचार्यवतो मुक्ताविद्याभिनहनस्य तावदेव तावानेव कालश्चिरं क्षेप· सदात्मस्वरूपसंपत्तेरिति वाक्यशेषः । कियान्कालश्चिरमित्युच्यते, यावन्न विमोक्ष्ये न विमोक्ष्यत इत्येतत्पुरुषव्यत्ययेन । सामर्थ्यात । येन कर्मणा शरीरमारब्धं तस्योपभोगेन क्षयादेहपातो यावदित्यर्थः । अथ तदैव सत्संपत्स्ये संपत्स्यत इति पूर्ववत् । न हि देहमोक्षस्य सत्संपत्तेश्च कालभेदोऽस्ति येनाथशब्द आनंतर्यार्थः स्यात् ॥

ननु यथा सद्विज्ञानानंतरमेव देहपात सत्संपत्तिश्च न भवति कर्मशेषवशात् तथाऽप्रवृत्तफलानि प्राग्ज्ञानोत्पत्तेर्जन्मान्तरसंचितान्यपि कर्माणि सन्तीति तत्फलोपभोगार्थं पतितेऽस्मिञ्छरीरान्तरमारब्धव्यम् । उत्पन्ने च ज्ञाने यावज्जीवं विहितानि प्रतिषिद्धानि वा कर्माणि करोत्येवेति तत्फलोपभोगार्थं चावश्यं शरीरान्तरमारब्धव्यं, ततश्च कर्माणि तत शरीरान्तरमिति ज्ञानानर्थक्यं, कर्मणां फलवत्त्वात् । अथ ज्ञानवत क्षीयन्ते कर्माणि, तदा ज्ञानप्राप्तिसमकालमेव ज्ञानस्य सत्संपत्तिहेतुत्वान्मोक्ष. स्यादिति शरीरपात स्यात । तथाच आचार्याभावः इत्याचार्यवान्पुरुषो वेदेत्यनुपपत्ति· । ज्ञानान्मोक्षाभावप्रसंगश्च । देशान्तरप्राप्त्युपायज्ञानवदनैकांतिकफलत्वं वा ज्ञानस्य । न । कर्मणां प्रवृत्ताप्रवृत्तफलवत्त्वविशेषोपपत्ते· । यदुक्तमप्रवृत्तफलानां कर्मणां ध्रुवफलवत्त्वाद्ब्रह्मविदः शरीरे पतिते शरीरान्तरमारब्धव्यं अप्रवृत्तकर्मफलोपभोगार्थ इत्येतदसत । विदुष 'तस्य तावदेव चिरं' इति श्रुतेः प्रामाण्यात ॥

ननु 'पुण्यो वै पुण्येन कर्मणा भवति' इत्यादिश्रुतेरपि प्रामाण्यमेव । सत्यमेवम । तथापि प्रवृत्तफलानामप्रवृत्तफलाना च कर्मणा विशेषोऽस्ति । कथम् । यानि प्रवृत्तफलानि कर्माणि यैर्विद्वच्छरीरमारब्धं तेषामुपभोगेनैव क्षयः । यथारब्धवेगस्य लक्ष्यमुक्तेष्वादेर्वेगक्षयादेव स्थिति , न तु लक्ष्यवेधसमकालमेव प्रयोजनं नास्तीति तद्वत । अन्यानि त्वप्रवृत्तफलानीह प्राग्ज्ञानोत्पत्तेरूर्ध्वं च कृतानि वा क्रियमाणानि वा अतीतजन्मान्तरकृतानि वा अप्रवृत्तफलानि ज्ञानेन दह्यन्ते प्रायश्चित्तेनेव । "ज्ञानाग्नि· सर्वकर्माणि भस्मसात्कुरुते तथा" इति स्मृतेश्च । 'क्षीयन्ते चास्य कर्माणि' इति चाथर्वणे । अतो ब्रह्मविदो जीवनादिप्रयोजनाभावेऽपि प्रवृत्तफलाना कर्मणामवश्यमेव फलोपभोग स्यादिति मुक्तेषुवत्तस्य तावदेव चिरमिति युक्तमेवोक्तमिति यथोक्तदोषचोदनानुपपत्ति । ज्ञानोत्पत्तेरूर्ध्वं च ब्रह्मविद कर्माभावमवोचाम 'ब्रह्मसंस्थोऽमृतत्वमेति' इत्यत्र । तच्च स्मर्तुमर्हसि ॥

स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥३॥ इति चतुर्दशः खंडः ॥

स य इत्याद्युक्तार्थम् । आचार्यवान्विद्वान्येन क्रमेण सत्संपद्यते, तं क्रमं दृष्टान्तेन भूय एव मा भगवान्विज्ञापयत्विति । तथा सोम्येति होवाच ॥ —

पुरुषं सोम्योतोपतापिनं ज्ञातय पर्युपासते जानासि मां जानासि मामिति तस्य यावन्न वाङ्मनसि संपद्यते मन प्राणे प्राणस्तेजसि तेजः परस्यां देवतायां तावज्जानाति ॥१॥

पुरुषं हे सोम्येतोपतापिनं ज्वराद्युपतापवन्तं ज्ञातयो बांधवा परिवार्योपासते मुमूर्षुं, जानासि मा तव पितरं पुत्रं भ्रातरं वेति पृच्छन्त । तस्य मुमुर्षोः यावन्न वाङ्मनसि संपद्यते मन प्राणे प्राणस्तेजसि तेज परस्यां देवतायामित्येतदुक्तार्थम् ॥

अथ यदास्य वाङ्मनसि संपद्यते मन प्राणे प्राणस्तेजसि तेज परस्यां देवतायामथ न जानाति ॥२॥

संसारिणो यो मरणक्रम स एवायं विदुषोऽपि सत्संपत्तिक्रम इत्येतदाह– परस्या देवताया तेजसि संपन्नऽथ न जानाति । अविद्वांस्तु मृत उत्थाय प्राग्भावितं व्याघ्रादिभावं देवमनुष्यादिभावं वा विशति । विद्वांस्तु शास्त्राचार्योपदेशजनितज्ञानदीपप्रकाशित सद्ब्रह्मात्मानं प्रविश्य नावर्तत इत्येष सत्संपत्तिक्रम· । अन्ये तु मूर्धन्यया नाड्योत्क्रम्य आदित्यादिद्वारेण सद्गच्छन्तीत्याहु । तदसत् । देशकालनिमित्तफलाभिसंधानेन गमनदर्शनात । नहि सदात्मैकत्वदर्शिन सत्याभिसंधस्य देशकालनिमित्तफलाद्यनृताभिसंधिरुपपद्यते । विरोधात । अविद्याकामकर्मणा च गमननिमित्तानां सद्विज्ञानहुताशनविप्लुष्टत्वाद्गमनानुपपत्तिरेव । 'पर्याप्तकामस्य कृतात्मनस्त्विहैव सर्वे प्रविलीयन्ति कामा ' इत्यथर्ववेणे नर्दासमुद्रदृष्टान्तश्रुतेश्च ॥

स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥३॥ इति पंचदशः खंड ॥

स य इत्यादि समानम् । यादृ मरिष्यतो मुमुक्षतश्च तुल्या सत्संपत्तिः, तत्र विद्वान्सत्संपन्नो नावर्तते, आवर्तते त्वविद्वान इत्यत्र कारणं दृष्टान्तेन भूय एव मा भगवान्विज्ञापयत्विति । तथा सोम्येति होवाच ॥ ६.१५.—

पुरुषं सोम्योत हस्तगृहीतमानयन्त्यपहार्षीत्स्तेयमकार्षीत्परशुमस्मै तपतेति स यदि तस्य कर्ता भवति तत एवानृतमात्मानं कुरुते सोऽनृताभिसंधोऽनृतेनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यतेऽथ हन्यते ॥१

शृणु यथा सोम्य पुरुषं चौर्यकर्मणि संदिह्यमानं निग्रहाय परीक्षणाय चोतापि

हस्तगृहीतं बद्धहस्तमानयन्ति राजपुरुषाः । किं कृतवानयमिति पृष्ठाश्चाहुरपहार्षीद्धनमस्यायम । ते चाहुः किमपहरणमात्रेण बंधनमर्हति, अन्यथा दत्तेऽपि धने बंधनप्रसंगात । इत्युक्ताः पुनराहुः स्तेयमकार्षाच्चौर्येण धनमपहार्षीदिति । तेष्वेवं वदत्स्वितरोऽपह्नुते नाहं तत्कर्तेति । ते चाहुः संदिह्यमानं स्तेयमकार्षीस्त्वमस्य धनस्येति । तस्मिंश्चापह्नुवान आहुः परशुमस्यै तपतेति शोधयन्त्वात्मानमिति । स यदि तस्य स्तैन्यस्य कर्ता भवति बाढमश्चापह्नुते स एवंभूतस्तत एवानृतमन्यथाभूतं सन्तमन्यथात्मानं कुरुते । स तथा अनृताभिसंधोऽनृतेनात्मानमंतर्धाय व्यवहितं कृत्वा परशुं तप्तं मोहात्प्रतिगृह्णाति, स दह्यतेऽथ हन्यते राजपुरुषैः स्वकृतेनानृताभिसंधिदोषेण ॥

अथ यदि तस्याकर्ता भवति तत एव सत्यमात्मानं कुरुते स सत्याभिसंधः सत्येनात्मानमंतर्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यतेऽथ मुच्यते ॥२॥

अथ यदि तस्य कर्मणोऽकर्ता भवति तत एव सत्यमात्मानं कुरुते । स सत्येन तया स्तैन्याकर्तृतया आत्मानमंतर्धाय परशुं तप्तं प्रतिगृह्णाति । स सत्याभिसंधः सन्न दह्यते सत्यव्यवधानात् अथ मुच्यते च मृषाभियोक्तृभ्यः । तप्तपरशुहस्ततलसंयोगस्य तुल्यत्वेऽपि स्तेयकर्त्रकर्त्रोरनृताभिसंधो दह्यते न तु सत्याभिसंधः ॥

स यथा तत्र नादाह्येतैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति तद्भास्य विजज्ञाविति विजज्ञाविति ॥३॥ इति षोडशः खंडः इति षष्ठोऽध्यायः ॥

स यथा सत्याभिसंधः तप्तपरशुग्रहणकर्मणि सत्यव्यवहितहस्ततलत्वात् नादाह्येत न दह्येतेत्येतत् एवं सद्ब्रह्मसत्याभिसंधा इतरयोः शरीरपातकाले च तुल्यायां सत्संपत्तौ विद्वान्सत्संपद्य न पुनर्व्याघ्रादेवादिदेहग्रहणायावर्तते । अविद्वांस्तु विकारानृताभिसंधः पुनर्व्याघ्रादिभावं देवतादिभावं वा यथाकर्म यथाश्रुतं प्रतिपद्यते । यदात्माभिसंध्यनभिसंधिकृते मोक्षबंधने, यच्च मूलं जगतो, यदायतना यत्प्रतिष्ठाश्च सर्वाः प्रजा, यदात्मकं च सर्वं यच्चाजममृतमभयं शिवमद्वितीयं, तत्सत्यं स आत्मा तव, अनस्तत्त्वमसि हे श्वेतकेतो इत्युक्तार्थमसकृद्वाक्यम् । कः पुनरसौ श्वेतकेतुस्त्वंशब्दार्थः ? योऽहं श्वेतकेतुरुद्दालकस्य पुत्र इति वेद आत्मानमादेशं श्रुत्वा मत्वा विज्ञाय च, अश्रुतममतमविज्ञातं विज्ञातुं पितरं

पप्रच्छ कथं नु भगवः स आदेशो भवतीति । स एषोऽधिकृतः श्रोता मन्ता विज्ञाता तेजोबन्नमयं कार्यकारणसंघातं प्रविष्टा परैव देवता नामरूपव्याकरणाय आदर्श इव पुरुषः सूर्यादिरिव जलादौ प्रतिबिम्बरूपेण । स आत्मानं कार्यकरणेभ्यः प्रविभक्तं सदूपं सर्वात्मानं प्राक पितुः श्रवणान्न विजज्ञौ । अथेदानीं पित्रा प्रतिबोधित तत्त्वमसीतिदृष्टान्तैर्हेतुभिश्च तत्पितुरस्य ह किलोक्तं सदेवाहमस्मीति विजज्ञौ विज्ञातवान् । द्विर्वचनमध्यायपरिसमाप्त्यर्थम् ॥

किं पुनरत्र षष्ठे वाक्यप्रमाणेन जनितं फलमात्मनि ? कर्तृत्वभोक्तृत्वयोरधिकृतत्वविज्ञाननिवृत्तिस्तस्य फलं वयमवोचाम । त्वंशब्दवाच्यमर्थं श्रोतुं मन्तुं चाधिकृतत्वमविज्ञातविज्ञानफलार्थम् । प्राक्चैतस्माद्विज्ञानादहमेवं करिष्यामीमं ग्रहेष्वादीनि कर्माणि, अहमत्राधिकृत , एषा च कर्मणा फलमिहामुत्र च भोक्ष्ये, कृतेषु वा कर्मसु कृतकर्तव्य स्यां, इत्येवं कर्तृत्वभोक्तृत्वयोरधिकृतोऽस्मीत्यात्मनि यद्विज्ञानं अभूत्तस्य, यत्सज्जगतो मूलमेकमेवाद्वितीयं तत्त्वमसीत्येनेन वाक्येन प्रतिबुद्धस्य निवर्तते । विरोधात । न ह्येकस्मिन्नद्वितीये आत्मन्ययमहमस्मीति विज्ञाते ममेदमन्यदनेन कर्तव्यमिदं कृत्वास्य फलं भोक्ष्य इति वा भेदविज्ञानमुपपद्यते । तस्मात्सत्सत्याद्वितीयात्मविज्ञाने विकारानृतजीवात्मविज्ञानं निवर्तते इति युक्तम् । ननु तत्त्वमस्मीत्यत्र त्वंशब्दवाच्येऽर्थे सदबुद्धिरादिश्यते यथादित्यमनआदिषु ब्रह्मादिबुद्धिः । यथाच लोके प्रतिमादिषु विष्ण्वादिबुद्धिस्तद्वत । ननु सदेव त्वमिति । यदि सदेव श्वेतकेतुः स्यात्कथमात्मानं न विजानीयाद्येन तस्मै तत्त्वमस्मीत्युपदिश्यते । न आदित्यादिवाक्यवैलक्षण्यात् । आदित्यो ब्रह्मेत्यादौ इति शब्दव्यवधानान्न साक्षाद्ब्रह्मत्वं गम्यते । रूपादिमत्वाच्चादित्यादीनाम् । आकाशमनसोश्चेतिशब्दव्यवधानादेवाब्रह्मत्वम । इह तु सत एवेह प्रवेशं दर्शयित्वा तत्त्वमसीति निरंकुशं सदात्मभावमुपदिशति ॥

ननु पराक्रमादिगुणः सिंहोऽसि त्वमितिवत्तत्त्वमसीति स्यात् । न । मृदादिवत्सदेकमेवाद्वितीयं सत्यमित्युपदेशात । न चोपचारविज्ञानात्तस्य तावदेव चिरमिति सत्संपत्तिरुपदिश्येत । मृषात्वादुपचारविज्ञानस्य । त्वमिन्द्रो यम इतिवत । नापि स्तुतिरनुपास्यत्वात श्वेतकेतोः । नापि सत श्वेतकेतुत्वोपदेशेन स्तूयेत । न हि राजा दासस्त्वमिति स्तुत्यः स्यात् । नापि सतः सर्वात्मन एकदेशनिरोधो युक्तस्तत्त्वमसीति, देशाधिपतेरिव ग्रामाध्यक्षस्त्वमिति । न चान्या गतिरिह सदात्मत्वोप-

देशादर्थान्तरभूता संभवति । ननु सदस्मीति बुद्धिमात्रमिह कर्तव्यतया चोद्यते न त्वज्ञातं सदस्मीति ज्ञाप्यत इति चेत । नन्वस्मिन्पक्षेऽपि 'अश्रुतं श्रुतं भवति' इत्याद्यनुपपन्नम । न सदस्मीतिबुद्धिविधे स्तुत्यर्थत्वात । न आचार्यवान्पुरुषो वेद, तस्य तावदेवं चिरमित्युपदेशात । यदि हि सदस्मीति बुद्धिमात्रं कर्तव्यतया विधीयते, न तु त्वंशब्दवाच्यस्य सद्रूपत्वमेव, तदा नाचार्यवान्वेदेति ज्ञानोपायोपदेशो वाच्यः स्यात् । यथा अग्निहोत्रं जुहुयादित्येवमादिष्वर्थप्राप्तमेव आचार्यवत्त्वमिति तद्वत । तस्य तावदेव चिरमिति च क्षेपकरणं न युक्तं स्यात् । सदात्मतत्त्वेऽविज्ञातेऽपि सकृद्बुद्धिमात्रकरणे मोक्षप्रसंगात । न च तत्त्वमसीत्युक्ते नाहं सदितिप्रमाणवाक्यजनिता बुद्धिर्निवर्तयितुं शक्या । नोत्पन्नेति वा शक्यं वक्तुम । सर्वोपनिषद्वाक्यानां तत्परतयैवोपक्षयात् । यथा अग्निहोत्रादिविधिजनिताग्निहोत्रादिकर्तव्यतावुद्धीनां अनर्थार्थत्वमनुत्पन्नत्वं वा न शक्यते वक्तुं तद्वत् । यत्तूक्तं सदात्मा सन्नात्मानं कथं न जानीयादिति । नासौ दोषः । कार्यकरणसंघातव्यतिरिक्तोऽहं जीवः कर्ता भोक्तेत्यपि स्वभावतः प्राणिनां विज्ञानादर्शनात् । किमु तस्य सदात्मविज्ञानम् । कथमेवं व्यतिरिक्तविज्ञानेऽसति तेषां कर्तृत्वादिविज्ञानं संभवति दृश्यते च । तद्वत्तस्यापि देहादिष्वात्मबुद्धित्वान्न स्यात्सदात्मविज्ञानम । तस्मात विकारानृतार्थिकृतजीवात्मविज्ञानविवर्तकमेवेदं वाक्यं तत्त्वमसीति सिद्धमिति ॥ इति षष्ठोऽध्यायः ॥

॥ सप्तमोऽध्यायः ॥

परमार्थतत्त्वोपदेशप्रधानपरः षष्ठोऽध्यायः सदात्मैकत्वनिर्णयपरतयैवोपयुक्तः । न सतोऽर्वाग्विकारलक्षणानि तत्त्वानि निर्दिष्टानीत्यतस्तानि नामादीनि प्राणान्तानि क्रमेण निर्दिश्य तद्वद्वरिष्णवपि भूमाख्यं निरतिशयं तत्त्वं निर्देक्ष्यामि शाखाचंद्रदर्शनवदिति मत्वा सप्तमं प्रपाठकमारभते । अनिर्दिष्टेषु हि सतोऽर्वाक्तत्त्वेषु सन्मात्रे च निर्दिष्टेऽन्यदप्यविज्ञातं स्यादित्याशंक्य कस्यचिन्स्यात्मा मा भूदिति वा तानि निर्दिदिक्षति । अथवा सोपानारोहणवत्स्थूलादारभ्य सूक्ष्मं सूक्ष्मतरं च बुद्धिविषयं ज्ञापयित्वा तदतिरिक्ते स्वाराज्येऽभिषेक्ष्यामीति नामादीनि निर्दिदिक्षति । अथवा नामाद्युत्तरोत्तरविशिष्टानि तत्त्वान्यतितरां च तेषामुत्कृष्टतमं भूमाख्यं तत्त्वमिति तत्स्तुत्यर्थं नामादीनां क्रमेणोपन्यासः । आख्यायिका तु परविद्यास्तुत्यर्था । कथम । नारदो देवर्षिः कृतकर्तव्यः सर्वविद्योऽपि सन्नात्म-

ज्ञात्वाच्छ्रुशोचैव, किमु वक्तव्यमन्योऽल्पविज्ञंतुः अकृतपुण्यातिशयोऽकृतार्थ इति । अथवा नान्यदात्मज्ञानान्निरतिशयश्रेय साधनमस्तीत्येतत्प्रदर्शनार्थं सनत्कुमारनारदाख्यायिकारभ्यते । येन सर्वविज्ञानसाधनशक्तिसंपन्नस्यापि नारदस्य देवर्षेः श्रेयो न बभूव, येनोत्तमाभिजनविद्यावृत्तसाधनशक्तिसंपत्तिनिमित्ताभिमानं हित्वा प्राकृतपुरुषवत्सनत्कुमारमुपससाद श्रेय साधनप्राप्तये । अत प्रख्यापितं भवति निरतिशयश्रेय·प्राप्तिसाधनत्वमात्मविद्याया इति ॥

ॐ । अधीहि भगव इति होपससाद सनत्कुमारं नारदस्तं होवाच यद्वेत्थ तेन मोपसीद ततस्त ऊर्ध्वं वक्ष्यामीति स होवाच ॥१॥

अधीह्यधीष्व भगवो भगवन्निति ह क्लेोपससाद । अधीहि भगव इति मंत्रः । सनत्कुमारं योगीश्वरं ब्रह्मिष्ठं नारद उपसन्नवान् । तं न्यायत उपसन्नं होवाच-- यदात्मविषये किंचिद्वेत्थ तेन तत्प्रख्यापनेन मामुपसादेदमहं जान इति, ततोऽहं भवतो विज्ञानात्ति तुभ्यमूर्ध्वं वक्ष्यामि । इत्युक्तवति स होवाच नारद. ॥

ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पंचमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्यामेतद्भगवोऽध्येमि ॥२॥

ऋग्वेदं भगवोऽध्येमि स्मरामि यद्वेत्थेति विज्ञानस्य पृष्टत्वात् । तथा यजुर्वेदं सामवेदमाथर्वणं चतुर्थं वेदं वेदशब्दस्य प्रकृतत्वादितिहासपुराणं पंचमं वेदं, वेदाना भारतपंचमाना वेदं व्याकरणमित्यर्थः । व्याकरणेन हि पदादिविभागशः ऋग्वेदादयो ज्ञायन्ते । पित्र्यं श्राद्धकल्पम । राशिं गणितम् । दैवमुत्पातज्ञानम । निधिं महाकालादिनिधिशास्त्रम । वाकोवाक्यं तर्कशास्त्रम । एकायनं नीतिशास्त्रम । देवविद्या निरुक्तम । ब्रह्मण ऋग्यजु सामाख्यस्य विद्या ब्रह्मविद्या शिक्षाकल्पच्छंदश्चितय· । भूतविद्या भूततंत्रम । क्षत्रविद्या धनुर्वेदम । नक्षत्रविद्या ज्यौतिषम । सर्पदेवजनविद्या सर्पविद्या गारुडं, देवजनविद्या गंधयुक्तिनृत्यगीतवाद्यशिल्पादिविज्ञानानि । एतत्सर्वं हे भगवोऽध्येमि ॥

सोऽहं भगवो मंत्रविदेवास्मि नात्मविच्छ्रुतं ह्येव मे भगवाद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगव शोचामि तं मा भगवाञ्छोकस्य पारं तारयत्विति तं होवाच यद्वै किंचैतदध्यगीष्ठा नामैवैतत् ॥३॥

सोऽहं भगव एतत्सर्वं जानन्नपि मंत्रविदेवास्मि शब्दार्थमात्रविज्ञानवानस्मीत्यर्थः । सर्वो हि शब्दोऽभिधानमात्रमभिधानं च सर्वं मंत्रेष्वंतर्भवति । मंत्रविदेवास्मि मंत्रवित्कर्मविदित्यर्थः । 'मंत्रेषु कर्माणि' इति हि वक्ष्यति । नात्मविन्नात्मानं वेद्मि । ननु आत्मापि मंत्रैः प्रकाश्यते एवेति कथं मंत्रविन्नेत्यात्मवित । न । अभिधानाभिधेयभेदस्य विकारत्वात् । न च विकार आत्मेष्यते । नन्वात्मापि आत्मशब्देनाभिधीयते । न । 'यतो वाचो निवर्तन्ते' 'यत्र नान्यत्पश्यति' इत्यादिश्रुतेः । कथं तर्ह्यात्मेवाधस्तात्स आत्मेत्यादिशब्दा आत्मानं प्रत्याययन्ति । नैष दोषः । देहवति प्रत्यगात्मनि भेदविषये प्रयुज्यमान शब्दो देहादीनामात्मत्वे प्रत्याख्यायमाने यत्पारार्थ्यं सत अवाच्यमपि प्रत्याययति । यथा सराजिकायां दृश्यमानायां सेनायां छत्रध्वजपताकादिव्यवहिते अदृश्यमानेऽपि राजन्येष राजा दृश्यत इति भवति शब्दप्रयोगः, तत्र कोऽसौ राजेति राजविशेषनिरूपणाया दृश्यमानेतरप्रत्याख्याने अन्यस्मिन्नदृश्यमानेऽपि राजनि राजपतोतिर्भवेत्तद्वत् । तस्मात्सोऽहं मंत्रवित्कर्मविदेवास्मि, कर्मकार्यं च सर्वं विकार इति विकारज एवास्मि नात्मविन्नात्मप्रकृतिस्वरूपज्ञ इत्यर्थः । अत एवोक्तं 'आचार्यवान्पुरुषो वेद' इति । 'यतो वाचो निवर्तन्ते' इत्यादिश्रुतिभ्यश्च । श्रुतमागमज्ञानमस्त्येव हि यस्मान्मे मम भगवदादिभ्यो युष्मत्सदृशेभ्य तरत्यतिक्रामति शोकं मनस्तापमकृतार्थबुद्धितामात्मविदिति । अतः सोऽहमनात्मवित्त्वाद्धे भगवः शोच्यमकृतार्थबुद्ध्या संतप्ये सर्वदा । तं मा मां शोकस्य शोकसागरस्य पारं अंतं भगवान्तारयत्वात्मज्ञानोडुपेन कृतार्थबुद्धिमापादयत्वभयं गमयत्वित्यर्थः । तमेवमुक्तवन्तं होवाच— यद्वै किंचैतदध्यगीष्ठा अधीतवानसि । अध्ययनेन तदर्थज्ञानमुपलक्ष्यते ज्ञातवानसीत्येतत् । नामैवैतत । वाचारंभणं विकारो नामधेयं' इति श्रुतेः ॥

नाम वा ऋग्वेदो यजुर्वेद सामवेद आथर्वणश्चतुर्थ इतिहासपुराणः पंचमो वेदानां वेदः पित्र्यो राशिर्दैवो निधिर्वाकोवाक्यमेकायनं देवविद्या ब्रह्मविद्या भूतविद्या क्षत्रविद्या नक्षत्रविद्या सर्पदेवजनविद्या नामैवैतन्नामोपास्स्वेति ॥४॥

नाम वा ऋग्वेदो यजुवद इत्यादि नामैवैतत । नामोपास्स्व ब्रह्मेति ब्रह्मबुद्धया । यथा प्रतिमां विष्णुबुद्धयोपास्ते तद्वत् ॥

स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति यो नाम ब्रह्मेत्युपास्तेऽस्ति भगवो नाम्नो भूय इति नाम्नो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥५॥ इति प्रथमः खंडः ॥

स यस्तु नाम ब्रह्मेत्युपास्ते तस्य यत्फलं भवति तत् शृणु— यावन्नाम्नो गतं नाम्नो गोचरं तत्र तस्मिन्नामविषयेऽस्य यथाकामचारः कामचरणं राज्ञ इव स्वविषये भवति । यो नाम ब्रह्मेत्युपास्ते इत्युपसंहारः । किमस्ति भगवो नाम्नो भूयोऽधिकतरं यद्ब्रह्मदृष्ट्यर्हमन्यदित्यभिप्रायः । सनत्कुमार आह— नाम्नो वाव भूयोऽस्त्येव । इत्युक्त आह — यद्यस्ति तन्मे भगवान्ब्रवीत्विति ॥ ७.१ —

वाग्वाव नाम्नो भूयसी वाग्वा ऋग्वेदं विज्ञापयति यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पंचमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्यां दिवं च पृथिवीं च वायुं चाकाशं चापश्च तेजश्च देवांश्च मनुष्यांश्च पशूंश्च वयांसि च तृणवनस्पतीञ्श्वापदान्यार्कीटपतंगपिपीलकं धर्मं चाधर्मं च सत्यं चानृतं च साधु चासाधु च हृदयज्ञं चाहृदयज्ञं च यद्वै वाङ्नाभविष्यन्न धर्मो नाधर्मो व्यज्ञापयिष्यन्न सत्यं नानृतं न साधु नासाधु न हृदयज्ञो नाहृदयज्ञो वाग्वैतत्सर्वं विज्ञापयति वाचमुपास्स्वेति ॥१॥

वाग्वाव । वागितीदृशं जिह्वामूलादिस्थानेषु स्थितं वर्णानामभिव्यंजकम् । वर्णाश्च नामेति नाम्नो वाग्भूयसीत्युच्यते । कार्याद्धि कारणं भूयो दृष्टं लोके, यथा पुत्रात्पिता तद्वत् । कथं च वाङ्नाम्नो भूयसीत्याह— वाग्वा ऋग्वेदं विज्ञापयत्यथमृग्वेद इति । तथा यजुर्वेदमित्यादि समानम् । हृदयज्ञं हृदयप्रियम् । तद्विपरीतमहृदयज्ञम् । यद्यपि वाङ्नाभविष्यद्धर्मादि न व्यज्ञापयिष्यत् वागभावेऽध्ययनाभावोऽध्ययनाभावे तदर्थश्रवणाभावः तच्छ्रवणाभावे धर्मादि न व्यज्ञापयिष्यन्न विज्ञातमभविष्यदित्यर्थः । तस्माद्वाग्वैतच्छब्दोच्चारणेन सर्वं विज्ञापयति । अतो भूयसी वाङ्नाम्नः । तस्माद्वाचं ब्रह्मेत्युपास्व ॥

स यो वाचं ब्रह्मेत्युपास्ते यावद्वाचो गतं तत्रास्य यथाकामचारो भवति यो वाचं ब्रह्मेत्युपास्तेऽस्ति भगवो वाचो भूय इति वाचो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥२॥ इति द्वितीयः खंडः ॥

समानमन्यत् ॥ इति द्वितीयः खंडः ॥ ७.२.—

मनो वाव वाचो भूयो यथा वै द्वे वामलके द्वे वा कोले द्वौ वाक्षौ मुष्टिरनुभवत्येवं वाचं च नाम च मनोऽनुभवति स यदा मनसा मनस्यति मंत्रानधीयीयेत्यथाधीते कर्माणि कुर्वीयेत्यथ कुरुते पुत्रांश्च पशूंश्चेच्छेयेत्यथेच्छत इमं च लोकममुं चेच्छेयेत्यथेच्छते मनो ह्यात्मा मनो हि लोको मनो हि ब्रह्म मन उपास्स्वेति ॥१॥

मनो मनस्यनाविशिष्टमंतःकरणं वाचो भूयः । तद्धि मनस्यनव्यापारवद्वाचं वक्तव्ये प्रेरयति । तेन वाङ्मनस्यंतर्भवति । यच्च यस्मिन्नंतर्भवति तत्तस्य व्याप्तत्वात्ततो भूयो भवति । यथा वै लोके द्वे वा आमलके फले द्वे वा कोले बदरफले द्वौ वाक्षौ विभीतकफले मुष्टिरनुभवति मुष्टिस्ते फले व्याप्नोति मुष्टौ हि ते अंतर्भवतः । एवं वाचं च नाम च आमलकादिवन्मनोऽनुभवति । स यदा पुरुषो यस्मिन्काले मनसाऽन्तःकरणेन मनस्यति, मनस्यनं विवक्षाबुद्धिं, कथं मंत्रानधीयीयेत्युच्चारयियमित्येवं विवक्षां कृत्वाऽधीते । तथा कर्माणि कुर्वीयेति चिकीर्षाबुद्धिं कृत्वाऽथ कुरुते । पुत्रांश्च पशूंश्चेच्छेयेति प्राप्तीच्छां कृत्वा तत्प्राप्त्युपायानुष्ठानेनाथेच्छते, पुत्रादीन्प्राप्नोतीत्यर्थः । तथेमं च लोकममुं चोपायेनेच्छेयेति तत्प्राप्त्युपायानुष्ठानेनाथेच्छते प्राप्नोति । मनो ह्यात्मा, आत्मन कर्तृत्वं भोक्तृत्वं च सति मनसि नान्यथेति मनो ह्यात्मेत्युच्यते । मनो हि लोकः, सत्येव हि मनसि लोको भवति तत्प्राप्त्युपायानुष्ठान चेति मनो हि लोको यस्मात्तस्मान्मनो हि ब्रह्म । यत एवं तस्मान्मन उपास्स्वेति ॥

स यो मनो ब्रह्मेत्युपास्ते यावन्मनसो गतं तत्रास्य यथाकामचारो भवति यो मनो ब्रह्मेत्युपास्तेऽस्मि भगवो मनसो भूय इति मनसो वाव भूयोऽस्मीति तन्मे भगवान्ब्रवीत्विति ॥२॥ इति तृतीय. खंडः ॥

स यो मन इत्यादि समानम् ॥ इति तृतीयः खंडः ॥ ७.३ —

संकल्पो वाव मनसो भूयान्यदा वै संकल्पयतेऽथ मनस्यत्यथ वाचमीरयति तामु नाम्नीरयति नाम्नि मंत्रा एकं भवन्ति मंत्रेषु कर्माणि ॥१॥

संकल्पो वाव मनसो भूयान । संकल्पोऽपि मनस्यनवदंतःकरणवृत्तिः, कर्तव्याकर्तव्यविषयविभागेन समर्थनम् । विभागेन हि समर्थिते विषये चिकीर्षाबुद्धिर्मनस्यनानंतरं भवति । कथम । यदा वै संकल्पयते कर्तव्यादिविषयान्विभजते इदं कर्तु युक्तं इदं कर्तुमयुक्तमिति, अथ मनस्यति मंत्रानधीयीये-

त्यादि । अथानन्तरं वाचमारयति मंत्राद्युच्चारणे । ता च वाचमु नाम्नि नाम्नोच्चारणनिमित्तं विवक्षा कृत्वेरयति । नाम्नि नामसामान्ये मंत्रा शब्दविशेषाः सन्तः एकं भवन्त्यंतर्भवन्तीत्यर्थः । सामान्ये हि विशेषोऽन्तर्भवति । मंत्रेषु कर्माण्येकं भवन्ति । मंत्रप्रकाशितानि कर्माणि क्रियन्ते नामंत्रकमस्ति कर्म । यद्धि मंत्रप्रकाशनेन लब्धसत्ताकं सत्कर्म ब्राह्मणेनेदं कर्तव्यमस्मै फलायेति विधीयते, याग्युत्पत्तिर्ब्राह्मणेषु कर्मणा दृश्यते, सापि मंत्रेषु लब्धसत्ताकानामेव कर्मणां स्पष्टीकरणम् । न हि मंत्राप्रकाशितं कर्म किंचिद्ब्राह्मणे उत्पन्नं दृश्यते । त्रय्याविहितं कर्मेति प्रसिद्धं लोके । त्रयीशब्दश्च ऋग्यजुःसामसमाख्या । 'मंत्रेषु कर्माणि कवयो यान्यपश्यन्' इति चार्थवणे । तस्माद्युक्तं मंत्रेषु कर्माण्येकं भवन्तीति ॥

तानि ह वा एतानि संकल्पैकायनानि संकल्पात्मकानि संकल्पे प्रतिष्ठितानि समकल्पता द्यावापृथिवी समकल्पेतां वायुश्चाकाशं च समकल्पन्तापश्च तेजश्च तेषां संक्लृप्त्यै वर्ष संकल्पते वर्षस्य संक्लृप्त्या अन्नं संकल्पतेऽन्नस्य संक्लृप्त्यै प्राणाः संकल्पन्ते प्राणानां संक्लृप्त्यै मंत्रा संकल्पन्ते मंत्राणां संक्लृप्त्यै कर्माणि संकल्पन्ते कर्मणां संक्लृप्त्यै लोकः संकल्पते लोकस्य संक्लृप्त्यै सर्वं संकल्पते स एष संकल्प संकल्पमुपास्स्वेति ॥२॥

तानि ह वा एतानि मनआदीनि संकल्पैकायनानि संकल्प एकोऽयनं गमनं प्रलयो येषा तानि संकल्पैकायनानि संकल्पात्मकान्युत्पत्तौ संकल्पे प्रतिष्ठितानि स्थितौ । समकल्पता संकल्पं कृतवत्यावित्र हि द्यौश्च पृथिवी च द्यावापृथिवी, द्यावापृथिव्यौ निश्चले लक्ष्येते । तथा समकल्पेता वायुश्चाकाशं चैतावपि संकल्पं कृतवन्तावित्र । तथा समकल्पन्तापश्च तेजश्च स्वेन रूपेण निश्चलानि लक्ष्यन्ते । यतस्तेषा द्यावापृथिव्यादीना संक्लृप्त्यै संकल्पनिमित्तं वर्ष संकल्पते समर्थीभवति । तथा वर्षस्य संक्लृप्त्यै संकल्पनिमित्तमन्नं संकल्पते । वृष्टेर्ह्यन्नं भवति । अन्नस्य संक्लृप्त्यै प्राणाः संकल्पन्ते अन्नमया हि प्राणा अन्नोपष्टंभकाः । 'अन्नं दाम' इति हि श्रुतिः । तेषा संक्लृप्त्यै मंत्रा संकल्पन्ते । प्राणवान्हि मंत्रानर्थीते नावलः । मंत्राणा हि संक्लृप्त्यै कर्माण्यग्निहोत्रादीनि संकल्पन्तेऽनुष्ठीयमानानि मंत्रप्रकाशितानि समर्थीभवन्ति फलाय । ततो लोकः फलं संकल्पते कर्मकर्तृसमवायितया समर्थीभवतीत्यर्थः । लोकस्य संक्लृप्त्यै सर्वं जगत्संकल्पते स्वरूपावैकल्याय । एतद्धीदं सर्वं जगत् यत्फलावसानं तत्सर्वं संकल्प-

मूलम् । अतो विशिष्टं स एष संकल्प । अत्र संकल्पमुपास्स्व इत्युक्त्वा फलमाह तदुपासकस्य ॥

स यः संकल्पं ब्रह्म-युपास्ते संकल्पसान्वे स लोकान्ध्रुवान्ध्रुवः प्रतिष्ठितान्प्रतिष्ठितोऽव्यथमानानव्यथमानोऽभिसिध्यति यावत्संकल्पस्य गतं तत्रास्य यथाकामचारो भवति यः संकल्पं ब्रह्मे-युपास्तेऽस्ति भगवः संकल्पाद्भूय इति संकल्पाद्वाव भूयोऽस्ति तन्मे भगवान्ब्रवीत्विति ॥३॥ इति चतुर्थः खडः ॥

स य संकल्पं ब्रह्मेति ब्रह्मबुद्ध्योपास्ते संकल्पसान्वे वात्रा अस्येमे लोकाः फलमिति कल्पसान्समर्थितान्संकल्पितान्स विद्वान्ध्रुवान्नित्यान् अत्यंताध्रुवोपेक्षया, ध्रुवश्च स्वयम् । लोकिनो ह्यध्रुवत्वे लोके ध्रुवकल्पाश्चर्यर्थेति ध्रुव सन्प्रतिष्ठितानुपकरणसंपन्नानित्यर्थः । पशुपुत्रादिभिः प्रतितिष्ठतीति दर्शनात्स्वयं च प्रतिष्ठितः आत्मीयोपकरणसंपन्नो अव्यथमानानभिघातादित्रासरहितान् अव्यथमानश्च स्वयमभिसिध्यत्यभिप्राप्नोतीत्यर्थः । यावत्संकल्पस्य गतं संकल्पगोचरस्तत्रास्य यथाकामचारो भवति, आत्मन संकल्पस्य न तु सर्वेषां संकल्पस्येति, उत्तरफलविरोधात् । य संकल्पं ब्रह्मत्युपास्ते इत्यादि पूर्ववत ॥ ७.४.—

चित्तं वाव संकल्पाद्भूयो यदा वै चेतयतेऽथ संकल्पयतेऽथ मनस्यत्यथ वाचमीरयति तामु नाम्नीरयति नाम्नि मंत्रा एकं भवन्ति मंत्रेषु कर्माणि ॥१॥

चित्तं वाव संकल्पात भूय । चित्तं चेतयितृत्व प्राप्तकालानुरूपबोधवत्त्वं अतीतानागतविषयप्रयोजननिरूपणसामर्थ्यं च, तत्संकल्पादपि भूय । कथम् । यदा वै प्राप्तं वस्त्विदमेवं प्राप्तमिति चेतयते, तदा तदादानाय वाऽपोहाय वाथ संकल्पयतेऽथ मनस्यतीत्यादि पूर्ववत् ॥

तानि ह वा एतानि चित्तैकायनानि चित्तात्मानि चित्ते प्रतिष्ठितानि तस्माद्यद्यपि बहुविदचित्तो भवति नायमस्तीत्येवैनमाहुर्यदयं वेद यद्वा अयं विद्वान्नेत्थमचित्तः स्यादित्यथ यद्यल्पवित्तवान्भवति तस्मा एवोत शुश्रूषन्ते चित्तं ह्येवैषामेकायनं चित्तमात्मा चित्तं प्रतिष्ठा चित्तमुपास्स्वेति ॥२॥

तानि संकल्पादीनि कर्मफलान्तानि चित्तैकायनानि चित्तात्मानि चित्तोत्पत्तीनि चित्ते प्रतिष्ठितानि चित्तस्थितानीत्यपि पूर्ववत् । किंच चित्तस्य माहा-

स्म्यम । यस्माच्चित्तं संकल्पादिमूलं तस्माद्यद्यपि बहुविद्बहुशास्त्रादिपरिज्ञानवान्सञ्चित्तो भवति प्राप्तादिचेतयितृत्वसामर्थ्यविरहितो भवति, तं निपुणा लौकिका नायमस्ति विद्यमानोऽप्यसन्यम एवेत्येवमाहुः । यच्चायं किंचिच्छास्त्रादि वेद श्रुतवान्तदप्यस्य वृथैवेति कथयन्ति । कस्मात । यद्ययं विद्वान्यादित्थमेवमचित्तो न स्यात् तस्मादस्य श्रुतमप्यश्रुतमेवेत्याहुरित्यर्थ । अथाल्पविदपि यदि चित्तवान्भवति तस्मा एतस्मै तदुक्तार्थग्रहणायैवोतापि शुश्रूषन्ते श्रोतुमिच्छन्ति । तस्माच्च चित्तं ह्येवैषा संकल्पादीनामेकायनामत्यादि पूर्ववत ॥

स यश्चित्तं ब्रह्मेत्युपास्ते चित्तान्वै स लोकान्ध्रुवान्ध्रुव प्रतिष्ठितान्प्रतिष्ठितोऽव्यथमानानव्यथमानोऽभिसिध्यति यावच्चित्तस्य गतं तत्रास्य यथाकामचारो भवति यश्चित्तं ब्रह्मेत्युपास्तेऽस्ति भगवश्चित्ताद्भूय इति चित्ताद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥३॥ इति पंचमः खंड ॥

चितानुपचितान्बुद्धिमद्गुणं स चितोपासकं ध्रुवानित्यादि चोक्तार्थम ॥ इति पंचम खंड ॥ ७ ५ —

ध्यानं वाव चित्ताद्भूयो ध्यायतीव पृथिवी ध्यायतीवान्तरिक्षं ध्यायतीव द्यौर्ध्यायन्तीवापो ध्यायन्तीव पर्वता ध्यायन्तीव देवमनुष्यास्तस्माद्य इह मनुष्याणां महत्तां प्राप्नुवन्ति ध्यानापादांशा इवैव ते भवन्त्यथ येऽल्पाः कलहिनः पिशुना उपवादिनस्तेऽथ ये प्रभवो ध्यानापादांशा इवैव ते भवन्ति ध्यानमुपास्स्वेति ॥१॥

स यो ध्यानं ब्रह्मेत्युपास्ते यावद्ध्यानस्य गतं तत्रास्य यथाकामचारो भवति यो ध्यानं ब्रह्मेत्युपास्तेऽस्ति भगवो ध्यानाद्भूय इति ध्यानाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥२॥ इति षष्ठः खंड ॥

ध्यानं वाव चिताद्भूय । ध्यानं नाम शास्त्रोक्तदेवताद्यालंबनेष्वचलो भिन्नजातीयैरंतरित प्रत्ययसंतान । एकाग्रेति यमाहु । दृश्यते च ध्यानस्य माहात्म्यं फलत । कथम । यथा योगी ध्यायन्निश्चलो भवति ध्यानफललाभे । एवं ध्यायतीव निश्चला दृश्यते पृथिवी । ध्यायतीवान्तरिक्षमित्यादि समानमन्यत । देवाश्च मनुष्याश्च देवमनुष्या मनुष्या एव वा देवसमा देवमनुष्या शमादिगुणसंपन्ना मनुष्या देवस्वरूपं न जहतात्यर्थ । यस्मादेवं विशिष्टं ध्यानं, तस्माद्य इह लोके मनुष्याणामेव धनैर्विद्यया गुणैर्वा महतां महत्त्वं प्राप्नुवन्ति, धनादि-

महत्त्वहेतुं लभन्ते इत्यर्थः । ध्यानापादाशा इव ध्यानस्यापादनमापादो ध्यानफललाभ इत्येतत् तस्याशोऽवयव कला कांचित् ध्यानफललाभकलावंत इवेवेत्यर्थः । ते भवन्ति निश्चला इव लक्ष्यन्ते न क्षुद्रा इव । अथ ये पुनरल्पाः क्षुद्राः किंचिदपि धनादिमहत्त्वैकदेशमप्राप्तास्ते पूर्वोक्तविपर्यया कलिहनः कलहशीलाः पिशुनाः परदोषोद्भासका उपवादिन परदोषं सामान्ययुक्तमेव वदितुं शीलं येषां ते उपवादिनश्च भवन्ति । अथ ये महत्त्वं प्राप्ता धनादिनिमित्तं तेऽन्यान्प्रति प्रभवन्तीति प्रभवो विद्याचार्यराजेश्वरादयो ध्यानापादाशा इव इत्याद्युक्तार्थम् । अतो दृश्यते ध्यानस्य महत्त्वं फलतोऽतो भूयस्त्वात् अतस्तदुपास्स्व इत्याद्युक्तार्थम् ॥ इति षष्ठ खंड. ॥ ७ ६.—

विज्ञानं वाव ध्यानाद्भूयो विज्ञानेन वा ऋग्वेदं विजानाति यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पंचमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्यां दिवं च पृथिवीं च वायुं चाकाशं चापश्च तेजश्च देवांश्च मनुष्यांश्च पशूंश्च वयांसि च तृणवनस्पतीञ्छ्वापदान्याकीटपतंगपिपीलकं धर्मं चाधर्मं च सत्यं चानृतं च साधु चासाधु च हृदयज्ञं चाहृदयज्ञं चान्नं च रसं चेमं च लोकममुं च विज्ञानेनैव विजानाति विज्ञानमुपास्स्वेति ॥१॥

विज्ञानं वाव ध्यानाद्भूयः । विज्ञानं शास्त्रार्थविषयं ज्ञानं तस्य ध्यानकारणत्वाद्ध्यानात् भूयस्त्वम् । कथं च तस्य भूयस्त्वमित्याह— विज्ञानेन वा ऋग्वेदं विजानात्ययमृग्वेद इति प्रमाणतया यस्यार्थज्ञानं ध्यानकारणम् । तथा यजुर्वेदमित्यादि । किंच पश्वादींश्च धर्माधर्मौ शास्त्रसिद्धौ साध्वसाधुनी लोकत स्मार्तौ वा दृष्टविषयं च सर्वं विज्ञानेनैव विजानातीत्यर्थः । तस्माद्युक्तं ध्यानाद्विज्ञानस्य भूयस्त्वम् । अतो विज्ञानमुपास्स्वेति ॥

स यो विज्ञानं ब्रह्मेत्युपास्ते विज्ञानवतो वै स लोकान्ज्ञानवतोऽभिसिध्यति यावद्विज्ञानस्य गतं तत्रास्य यथाकामचारो भवति यो विज्ञानं ब्रह्मेत्युपास्तेऽस्मि भगवो विज्ञानाद्भूय इति विज्ञानाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥२॥ इति सप्तमः खंडः ॥

शृणु उपासनफलं विज्ञानवतः । विज्ञानं येषु लोकेषु तान्विज्ञानवतो लोकाञ्ज्ञानवतश्च अभिसिध्यत्यभिप्राप्नोति । विज्ञानं शास्त्रार्थविषयं ज्ञानं अन्यविषयं

नैपुण्यं तद्वद्भिर्युक्तोल्लोकान्प्राप्नोतीत्यर्थ । यावद्विज्ञानम्येत्यादि पूर्ववत ॥ ७ ७.—

बलं वाव विज्ञानाद्भूयोऽपि ह शत विज्ञानवतामेको बलवानाकंपयते स यदा बली भवत्यथोत्थाता भवत्युत्तिष्ठन्परिचरिता भवति परिचरन्नुपसत्ता भवत्युपसीदन्द्रष्टा भवति श्रोता भवति मंता भवति बोद्धा भवति कर्ता भवति विज्ञाता भवति बलेन वै पृथिवी तिष्ठति बलेनांतरिक्षं बलेन द्यौर्बलेन पर्वता बलेन देवमनुष्या बलेन पशवश्च वयांसि च तृणवनस्पतय श्वापदान्याकीटपतंगपिपीलकं बलेन लोकस्तिष्ठति बलमुपास्स्वेति ॥१॥

स यो बलं ब्रह्मेत्युपास्ते यावद्बलस्य गतं तत्रास्य यथाकामचारो भवति यो बलं ब्रह्मेत्युपास्तेऽस्ति भगवो बलाद्भूय इति बलाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥२॥ इति अष्टमः खंडः ॥

बलं वाव विज्ञानात भूय । बलमित्यन्नोपयोगजनितं मनसा विज्ञेये प्रतिभानसामर्थ्यम् । अनशनात 'ऋगादीनि न वै मा प्रतिभान्ति भो' इति श्रुते । शरीरेऽपि तदेवोत्थानादिसामर्थ्य यस्माद्विज्ञानवता शतमप्येक प्राणी बलवानाकंपयते यथा हस्ती मत्तो मनुष्याणा शतं समुदितमपि । यस्मादेवमन्नाद्युपयोगनिमित्तं बलं तस्मात्स पुरुषो यदा बली बलेन तद्वान्भवति, अथोत्थातोत्थानस्य कर्तोत्तिष्ठंश्च गुरूणामाचार्यस्य च परिचरिता परिचरणस्य शुश्रूषाया कर्ता भवति परिचरन्नुपसत्ता तेषा समीपगो अंतरंग प्रियो भवतीत्यर्थः । उपसादंश्च सामीप्यं गच्छन्नेकाग्रतया आचार्यस्यान्यस्य चोपदेष्टुर्गुरोर्द्रष्टा भवति । ततस्तदुक्तस्य श्रोता भवति । तत इदमेभिरुक्तमेवमुपपद्यते इत्युपपत्तितो मंता भवति । मन्वानश्च बोद्धा भवत्येवमेवेदमिति । तत एवं निश्चित्य तदुक्तार्थस्य कर्तानुष्ठाता भवति विज्ञातानुष्ठानफलस्यानुभविता भवतीत्यर्थ । किंच बलस्य माहात्म्यं बलेन वै पृथिवी तिष्ठतीत्यादि ऋज्वर्थम् ॥ इति अष्टमः खंडः ॥ ७.८ —

अन्नं वाव बलाद्भूयस्तस्माद्यद्यपि दश रात्रीर्नाश्नीयाद्यद्यु ह जीवेदथचाऽद्रष्टाऽश्रोताऽमंताऽबोद्धाऽकर्ताऽविज्ञाता भवत्यथान्नस्यायै द्रष्टा भवति श्रोता भवति मंता भवति बोद्धा भवति कर्ता भवति विज्ञाता भवत्यन्नमुपास्स्वेति ॥१॥

अन्नं वाव बलात् भूयः । बलहेतुत्वात् । कथमन्नस्य बलहेतुत्वमित्युच्यते-**यस्माद्बलकारणमन्नं तस्माद्यद्यपि कश्चिद्दश रात्रीर्नाश्नीयात् सोऽन्नोपयोगनिमित्तस्य**

बलस्य हान्या म्रियते । न चेन्म्रियते यद्यु ह जीवेत्, दृश्यन्ते हि मासमप्यनश्नन्तो जीवन्त । अथवा, स जीवन्नप्यद्रष्टा भवति गुरोरपि, तत एवाश्रोतेत्यादि पूर्वाविपरीतं सर्वं भवति । अथ यदा बहून्यहान्यनशितो दर्शनादिक्रियासमर्थः सन्नश्नस्यार्या । आगमनमायोऽन्नस्य प्राप्तिरित्यर्थ । स यस्य विद्यते सोऽन्नस्यार्या । आर्य इत्येतद्गुणव्यत्ययेन । अथान्नस्याया इत्यपि पाठ एवमेवार्थः । द्रष्टेत्यादिकार्यश्रवणात । दृश्येत ह्यन्नोपयोगे दर्शनादिसामर्थ्यं न तदप्राप्तौ । अतो अन्नमुपास्स्वेति ॥

स योऽन्नं ब्रह्मेत्युपास्तेऽन्नवतो वै स लोकान्पानवतोऽभिसिध्यति यावदन्नस्य गतं तत्रास्य यथाकामचारो भवति योऽन्नं ब्रह्मेत्युपास्तेऽस्ति भगवोऽन्नाद्भूय इत्यन्नाद्धाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥२॥

फलं चान्नवत. प्रभूतान्नान्व स लोकान्पानवत प्रभूतोदकाश्च अन्नपानयोः नित्यसंबंधात लोकानभिसिध्यति । समानमन्यत ॥ इति नवम खंड ॥ —

आपो वावान्नाद्भूयस्तस्माद्यदा सुवृष्टिर्न भवति व्याधीयन्ते प्राणा अन्नं कनीयो भविष्यतीत्थ यदा सुवृष्टिर्भवत्यानंदिन. प्राणा भवन्त्यन्नं बहु भविष्यतीत्याप एवेमा मूर्ता येयं पृथिवी यदंतरिक्षं यद्दयौर्यत्पर्वता यद्देवमनुष्या यत्पशवश्च वयांसि च तृणवनस्पतयः श्वापदान्याकीटपतंगपिपीलकमाप एवेमा मूर्ता अप उपास्स्वेति ॥३॥

आपो वावान्नात भूयस्योऽन्नकारणत्वात् । यस्मादेवं तस्माद्यदा यस्मिन्काले सुवृष्टि सम्यहिता शोभना वृष्टिर्न भवति तदा व्याधीयन्ते प्राणा दु खिनो भवन्ति । किनिमित्तमित्याह— अन्नमस्मिन्संवत्सरे नः कनीयोऽल्पतरं भविष्यतीति । अथ पुनर्यदा सुवृष्टिर्भवति तदानंदिन सुखिनो हृष्टा प्राणा प्राणिनो भवन्त्यन्नं बहु प्रभूतं भविष्यतीति । अप्संभवत्वान्मूर्तस्यान्नस्य आप एवेमा मूर्ता, मूर्तभेदाकारपरिणता इति मूर्ता, येयं पृथिवी यदंतरिक्षमित्यादि । आप एवेमा मूर्ता अतोऽप उपास्स्वेति ॥

स योऽपो ब्रह्मेत्युपास्त आप्नोति सर्वान्कामांस्तृप्तिमान्भवति यावदपा गतं तत्रास्य यथाकामचारो भवति योऽपो ब्रह्मेत्युपास्तेऽस्ति भगवोऽद्भ्यो भूय इत्यद्भ्यो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥२॥

फलं— स योऽपो ब्रह्मेत्युपास्ते आप्नोति सर्वान्कामान्काम्यान्मूर्तिमतो

विषयानित्यर्थः । अप्संभवत्वाच्च तृप्त अंबूपासानात्तृप्तिमाश्च भवति । समानमन्यत् ॥ इति दशमः खंडः ॥ ७.१०.—

तेजो वावाद्भ्यो भूयस्तद्वा एतद्वायुमागृह्याकाशमभितपति तदाहुर्निशोचति नितपति वर्षिष्यति वा इति तेज एव तत्पूर्वं दर्शयित्वाथापः सृजते तदेतदृग्भिश्च तिरश्चीभिश्च विद्युद्भिराह्रादाश्चरन्ति तस्मादाहुर्विद्योतते स्तनयति वर्षिष्यति वा इति तेज एव तत्पूर्वं दर्शयित्वाथापः सृजते तेज उपास्स्वेति ॥१॥

तेजो वावाद्भ्यो भूय । तेजसोऽकारणत्वात् । कथमकारणत्वमित्याह— यस्मादब्योनिस्तेजस्तस्माद्वा एतत्तेजो वायुमागृह्यावष्टभ्य स्वात्मना निश्चलीकृत्य वायुं आकाशमभितपत्याकाशमभिव्याप्नुवत्तपति यदा, तदाहुर्लौकिका निशोचति संतपति सामान्येन जगत नितपति देहानतो वर्षिष्यति वै इति । प्रसिद्धं हि लोके कारणमभ्युद्यतं दृष्ट्वतः कार्यं भविष्यतीति विज्ञानम् । तेज एव तत्पूर्वमात्मानमुद्भूतं दर्शयित्वा अथानंतरमप सृजते अतोऽप्स्वष्टृत्वात भूयोऽद्भ्यस्तेज । किचान्यत्तदेतत्तेज एव स्तनयित्नुरूपेण वर्षहेतुर्भवति । कथम् । ऊर्ध्वाभिश्चोर्ध्वगाभिर्विद्युद्भिस्तिरश्चीभिश्च तिर्यग्गताभिश्च सह आह्रादाः स्तनयनशब्दाश्चरन्ति । तस्मात्तद्दर्शनादाहुर्लौकिका विद्योतते स्तनयति वर्षिष्यति वै इत्याद्युक्तार्थम् । अतस्तेज उपास्स्वेति ॥

स यस्तेजो ब्रह्मेत्युपास्ते तेजस्वी वै स तेजस्वतो लोकान्भास्वतोऽपहततमस्कानभिसिध्यति यावत्तेजसो गतं तत्रास्य यथाकामचारो भवति यस्तेजो ब्रह्मेत्युपास्तेऽस्ति भगवस्तेजसो भूय इति तेजसो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥२॥ इति एकादशः खंडः ॥

तस्य तेजस उपासनफलं— तेजस्वी वै भवति । तेजस्वत एव च लोकान्भास्वतः प्रकाशवतोऽपहततमस्कान् बाह्याध्यात्मिकाज्ञानाद्यपनीततमस्कानभिसिध्यति । कृत्स्नवर्थमन्यत् ॥ इति एकादश. खंडः ॥ ७.११.—

आकाशो वाव तेजसो भूयानाकाशे वै सूर्याचंद्रमसावुभौ विद्युन्नक्षत्राण्यग्निराकाशेनाह्वयत्याकाशेन शृणोत्याकाशेन प्रतिशृणोत्याकाशे रमत आकाशे न रमत आकाशे जायत आकाशमभिजायत आकाशमुपास्स्वेति ॥१॥

आकाशो वाव तेजसो भूयान् । वायुसहितस्य तेजसः कारणत्वाद्योन्नः ।

वायुमागृह्णेति तेजसा सहोक्तो वायुरिति पृथगिह नोक्तस्तेजस । कारणं हि लोके कार्यात् भूयो दृष्टम् । यथा घटादिभ्यो मृत्तथाकाशो वायुसहितस्य तेजसः कारणमिति ततो भूयान । कथम् । आकाशे वै सूर्याचंद्रमसावुभौ तेजोरूपौ विद्युन्नक्षत्राण्यग्निश्च तेजोरूपाण्याकाशेऽतः । यच्च यस्यातर्वर्ति तदल्पं भूय इतरत् । किंच आकाशेनाह्वयति चान्यमन्य , आहूतश्चेतर आकाशेन शृणोति, अन्योक्तं च शब्दमन्यः प्रतिशृणोति, आकाशे रमते क्रीडत्यन्योन्यं सर्वः तथा न रमते चाकाशे वय्वादिविरोगे, आकाशे जायते न मूर्तेनावष्टब्धे । तथाकाशमभिलक्ष्य अंकुरादि जायते न प्रतिलोमम् । अत आकाशमुपास्स्व ॥

स य आकाशं ब्रह्मेत्युपास्त आकाशवतो वै स लोकान्प्रकाशवतोऽसंबाधानुरुगायवतोऽभिसिध्यति यावदाकाशस्य गतं तत्रास्य यथाकामचारो भवति य आकाशं ब्रह्मेत्युपास्तेऽस्मि भगव आकाशाद्भूय इत्याकाशाद्भाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥२॥ इति द्वादशः खंडः ॥

फलं शृणु– आकाशवतो वै विस्तारयुक्तान्स विद्वाल्लोकान्प्रकाशवत. । प्रकाशाकाशयोर्नित्यसंबंधात्प्रकाशवतश्च लोकानसंबाधान् , संबाधनं संबाध. संबाधोऽन्योन्यपीडा तद्रहितानसंबाधानुरुगायवतो विस्तीर्णगतीन्विस्तीर्णप्रचारोल्लोकानभिसिध्यति । यावदाकाशस्येत्याद्युक्तार्थम् ॥ इति द्वादश खंड. ॥ ७.१२.—

स्मरो वावाकाशाद्भूयस्तस्माद्यद्यपि बहव आसीरन्न स्मरन्तो नैव ते कंचन शृणुयुर्न मन्वीरन्न विजानीरन्यदा वाव ते स्मरेयुरथ शृणुयुरथ मन्वीरन्नथ विजानीरन्स्मरेण वै पुत्रान्विजानाति स्मरेण पशून्स्मरमुपास्स्वेति ॥१॥ स य स्मरं ब्रह्मेत्युपास्ते यावत्स्मरस्य गतं तत्रास्य यथाकामचारो भवति यः स्मरं ब्रह्मेत्युपास्तेऽस्मि भगवः स्माराद्भूय इति स्माराद्भाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥१॥ इति त्रयोदशः खंड ॥

स्मरो वावाकाशात् भूय । स्मरणं स्मरोऽन्तःकरणधर्म. । स आकाशात् भूयानिति द्रष्टव्यं लिंगव्यत्ययेन । स्मर्तुः स्मरणे हि सत्याकाशादि सर्वमर्थवत् स्मरणवतो भोग्यत्वात् । असति तु स्मरणे सदपि असदेव । सत्त्वकार्याभावात् । नापि सत्त्वं स्मृत्यभावे शक्यमाकाशादीनामवगंतुं इत्यतः स्मरणस्य आकाशात् भूयस्त्वम् । दृश्यते हि लोके स्मरणस्य भूयस्त्वं यस्मात्तस्माद्यद्यपि समुदिता बहव एकस्मिन्नासीरन्नुपविशेयुस्ते तत्रासीना अन्योन्यभाषितमपि न

स्मरन्तश्चेत्स्युर्नैव ते कंचन शब्दं शृणुयु , तथा न मन्वीरन् मंतव्यं चेत्स्मरेयुस्तदा मन्वीरन्स्मृत्यभावान्न मन्वीरन् तथा न विजानीरन् । यदा वाव ते स्मरेयुर्मंतव्यं विज्ञातव्यं श्रोतव्यं चाथ शृणुयुरथ मन्वारन्नथ विजानीरन् । तथा स्मरेण वै मम पुत्रा एत इति पुत्रान्विजानाति, स्मरेण पशून् । अतो भूयस्त्वात्स्मरमुपास्स्वेति । उक्तार्थमन्यत् ॥ इति त्रयोदश खंड. ॥ ७.१३.—

आशा वाव स्मराद्भूयस्याशेद्धो वै स्मरो मंत्रानधीते कर्माणि कुरुते पुत्रांश्च पशूंश्चेच्छत इमं च लोकममुं चेच्छत आशामुपास्स्वेति ॥१॥

आशा वाव स्मरात् भूयसी । आशाऽप्राप्तवस्त्वाकाङ्क्षा, आशा तृष्णा काम इति यामाहु पर्यायै सा च स्मरात् भूयसी । कथम् । आशया ह्येतं करणस्थया स्मरति स्मर्तव्यम् । आशाविषयरूपं स्मरणमेव स्मरो भवति । अतः आशेद्ध आशयाभिवर्धितः स्मरभूत. स्मरः तृणादीन्मंत्रानधीतेऽध्याप्य च तदर्थं ब्राह्मणेभ्यो विद्यांश्च श्रुत्वा कर्माणि कुरुते तत्फलाशयैव, पुत्रांश्च पशूंश्च कर्मफलभूतानिच्छतेऽभिवाञ्छति, आशयैव तत्साधनान्यनुतिष्ठति । इमं च लोकमाशेद्ध एव स्मरलोकसंग्रहेहेतुभिरिच्छते । अमुं च लोकमाशेद्ध स्मरंस्तत्साधनानुष्ठानेनेच्छते । अत आशारशनावबद्धं स्मराकाशादिनामर्थितं जगच्चकंभूतं प्रतिप्राणि । अतः आशायाः स्मरादपि भूयस्त्वमित्यत आशामुपास्स्व ॥

स य आशां ब्रह्मेत्युपास्त आशास्य सर्वे कामा समृध्यन्त्यमोघा हास्याशिषो भवन्ति यावदाशाया गतं तत्रास्य यथाकामचारो भवति य आशां ब्रह्मेत्युपास्तेऽस्ति भगव आशाया भूय इत्याशाया वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥२॥ इति चतुर्दशः खंड· ॥

यस्त्वाशा ब्रह्मेत्युपास्ते शृणु तस्य फलम् । आशया सदोपासितया अस्योपासकस्य सर्वे कामा. समृध्यन्ति समृद्धि गच्छन्ति । अमोघाः हास्याशिषः प्रार्थना सर्वा भवन्ति, यत्प्रार्थितं सर्वं तदवश्यं भवतीत्यर्थ । यावदाशाया गतमित्यादि पूर्ववत् ॥ इति चतुर्दशः खंड. ॥ ७.१४.—

प्राणो वा आशाया भूयान्यथा वा अरा नाभौ समर्पिता एवमस्मिन्प्राणे सर्वं समर्पितं प्राणः प्राणेन याति प्राण प्राणं ददाति प्राणाय ददाति प्राणो ह पिता प्राणो माता प्राणो भ्राता प्राण. स्वसा प्राण आचार्यः प्राणो ब्राह्मणः ॥१॥

नामोपक्रममाशान्तं कार्यकारणत्वेन निमित्तनैमित्तिकत्वेन च उत्तरोत्तरभूयस्तया अवस्थितं स्मृतिनिमित्तसद्भावमाशारशनापाशैर्विपाशितं सर्व सर्वतो बिसमिव तंतुभिर्यास्मिन्प्राणे समर्पितम्। येन च सर्वतो व्याप्तेन अंतर्बहिर्गतेन सूत्रेण मणिगणा इव सूत्रेण ग्रथितं विधृतं च। स एष प्राणो वा आशाया भूयान्। कथमस्य भूयस्त्वमित्याह दृष्टान्तेन समर्पयंस्तत् भूयस्त्वम्— यथा वै लोके रथचक्रस्यारा रथनाभौ समर्पिता संप्रोताः संप्रवेशिता इत्येतत् एवमस्मिल्लिंगसंघातरूपे प्राणे प्रज्ञात्मनि दैहिके मुख्ये, यस्मिन्परा देवता नामरूपव्याकरणाय आदर्शादौ प्रतिबिंबवज्जीवेनात्मनानुप्रविष्टा। यश्च महाराजस्येव सर्वाधिकारीश्वरस्य 'कस्मिन्नु अहमुत्क्रान्ते उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजत' इति श्रुतेः। यस्तु कूटायेवानुगतेश्वरम्। "तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्रा प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिता, स एष प्राण एव प्रज्ञात्मा" इति कौषीतकिनाम्। अत एवमस्मिन्प्राणे सर्वं यथोक्तं समर्पितम्। अत स एष प्राणोऽपरतंत्रः प्राणेन स्वरूपेणैव याति, नान्यकृतं गमनादिक्रियास्वस्य सामर्थ्यमित्यर्थः। सर्वे क्रियाकारकफलभेदजातं प्राण एव, न प्राणाद्बहिर्भूतमस्तीति प्रकरणार्थः। प्राण प्राणं ददाति। यद्ददाति तत्त्वात्मभूतमेव। यस्मै ददाति तदपि प्राणायैव। अतः पित्राद्याख्योऽपि प्राण एव॥

स यदि पितरं वा मातरं वा भ्रातरं वा स्वसारं वाचार्यं वा ब्राह्मणं वा किंचिदृशमिव प्रत्याह धिक्त्वास्त्वित्येवैनमाहु पितृहा वै त्वमसि मातृहा वै त्वमसि भ्रातृहा वै त्वमसि स्वसृहा वै त्वमस्याचार्यहा वै त्वमसि ब्राह्मणहा वै त्वमसीति॥२॥

कथं पित्रादिशब्दानां प्रसिद्ध्यर्थोत्सर्गेण प्राणविषयत्वमिति। उच्यते— सति प्राणे पित्रादिषु पित्रादिशब्दप्रयोगानुदुत्क्रान्तौ च प्रयोगाभावात्। कथं तदित्याह स य कश्चित्पित्रादीनामन्यतमं यदि तं भृशमिव तदननुरूपमिव किंचिद्वचन त्वंकारादियुक्तं प्रत्याह, तदेनं पार्श्वस्था आहुर्विद्वांसो, धिक्त्वास्तु धिगस्तु त्वामित्येवम्। पितृहा वै त्वं पितुर्हन्तेत्यादि॥

अथ यद्यप्येनानुत्क्रान्तप्राणाञ्छूलेन समासं व्यतिषंदहेन्नैवैनं ब्रूयुः पितृहासीति न मातृहासीति न भ्रातृहासीति न स्वसृहासीति नाचार्य-

हासीति न ब्राह्मणहासीति ॥३॥

अथैनानेव उत्क्रान्तप्राणांस्त्यक्तदेहनाथान् यद्यपि शूलेन समासं समस्य व्यतिषंदहेत्यत्यग्न्य संदहेत एवमप्यतिक्रूरं कर्म समासव्यत्यासादिप्रकारेण दहनलक्षणं तंदहसंबद्धमेव कुर्वाणं नैवैनं ब्रूयुः पितृहेत्यादि । तस्मादन्वयव्यतिरेकाभ्यामवगम्यते एतत्पित्राद्याख्योऽपि प्राण एवेति ॥

प्राणो ह्येवैतानि सर्वाणि भवति स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति तं चेद्ब्रूयुरतिवाद्यसीत्यतिवाद्यस्मीति ब्रूयान्नापन्हुवीत ॥४॥ इति पंचदशः खंडः ॥

तस्मात्प्राणो ह्येवैतानि पित्रादीनि सर्वाणि भवति चलानि स्थिराणि च । स वा एष प्राणविदेवं यथोक्तप्रकारेण पश्यन्फलतोऽनुभवन्नेवं मन्वान उपपत्तिभिश्चिंतयन्नेवं विजानन्नुपपत्तिभिः संयोज्यैवमेवेति निश्चयं कुर्वन्नित्यर्थ । मननविज्ञानाभ्यां हि संभूतः शास्त्रार्थो निश्चितो दृष्टो भवेत । अत एवं पश्यन्नतिवादी भवति नामाद्याशातमतीत्य वदनशीलो भवतीत्यर्थः । तं चेत ब्रूयुरतं यद्येवमतिवादिनं सर्वदा सर्वे शब्दैर्नामाद्याशान्तमतीत्य वर्तमानं प्राणमेवं वदन्तमेवं पश्यन्तमतिवदनशीलमतिवादिनं ब्रह्मादिस्तंबपर्यंतस्य हि जगत प्राण आत्माऽहमिति ब्रुवाणं यदि ब्रूयुरतिवाद्यसीति । बाढमतिवाद्यस्मीति ब्रूयान्नापन्हुवीत । कस्माद्धयसावपह्नुवीत । यत्प्राणं सर्वेश्वरमयमहमस्मीत्यात्मत्वेनोपगत ॥ इति पंचदशः खंड ॥ ७.१५ —

स एष नारदः सर्वातिशयं प्राणं स्वमात्मानं सर्वात्मानं श्रुत्वा नात परमस्तीत्युपरराम । न पूर्ववत्किमस्ति भगव. प्राणात् भूय इति पप्रच्छ यतस्तमेवं विकारानृतब्रह्मविज्ञानेन परितुष्टमकृतार्थं परमार्थसत्यातिवादिनमात्मानं मन्यमानं योग्यं शिष्यं मिथ्याग्रहविशेषाद्विप्रत्यवयन्नाह भगवान्सनत्कुमार —

एष तु वा अतिवदति यः सत्येनातिवदति सोऽहं भगवः सत्येनातिवदानीति सत्यं त्वेव विजिज्ञासितव्यमिति सत्यं भगवो विजिज्ञास इति ॥१॥ इति षोडशः खंडः ॥

एष तु वा अतिवदति यमहं वक्ष्यामि, न प्राणविदतिवादी परमार्थतः । नामाद्यपेक्षं तु तस्यातिवादित्वम् । यस्तु भूमाख्यं सर्वातिक्रान्तं तत्त्वं परमार्थसत्यं वेद सोऽतिवादीत्यत आह— एष तु वा अतिवदति य. सत्येन परमार्थसत्य-

विज्ञानवत्तया अतिवदति । सोऽहं त्वां प्रपन्नो भगवन्सत्येनातिवदानि । तथा मां नियुनक्तु भगवान्यथाहं सत्येनातिवदानीत्यभिप्रायः । यद्येवं सत्येनाति-वदितुमिच्छसि सत्यमेव तु तावद्विजिज्ञासितव्यमित्युक्त आह नारद. । तथास्तु तर्हि सत्यं भगवो विजिज्ञासे विशेषेण ज्ञातुमिच्छेयं त्वत्तोऽहमिति ॥ इति षोडश खंड ॥ ७.१६.—

यदा वै विजानात्यथ सत्यं वदति नाविजानन्सत्यं वदति विजा-नन्नेव सत्यं वदति विज्ञानं त्वेव विजिज्ञासितव्यमिति विज्ञानं भगवो विजिज्ञास इति ॥१॥ इति सप्तदशः खंडः ॥

यदा वै सत्यं परमार्थतो विजानातीदं परमार्थत सत्यमिति, ततोऽनृतं विकारजातं वाचारंभणं हित्वा सर्वविकारावस्थं सदेवैकं सत्यमिति तदेवाथ वदति यद्वदति । ननु विकारोऽपि सत्यमेव । 'नामरूपे सत्य ताभ्यामयं प्राणश्छन्न' 'प्राणा वै सत्यं तेषामेष सत्यम' इति श्रुत्यंतरात् । सत्यमुक्तं सत्यत्वं श्रुत्यंतरे विकारस्य, न तु परमार्थापेक्षमुक्तम । किं तर्हि ? इंद्रियाविषयत्वापेक्षं सच त्यच्चेति सत्यमित्युक्तं तद्ब्रह्मणे च परमार्थसत्यस्य उपलब्धिर्वक्ष्यतीति । 'प्राणा वै सत्यं तेषामेष सत्यं' इति चोक्तम । उदाहृतं तदिष्टमेव । इह तु प्राणविषया-त्परमार्थसत्यविज्ञानाभिमानात व्युत्थाप्य नारदं यत्सदेव सत्यं परमार्थतो भूमाख्यं तद्विज्ञापयिष्यामीत्येव विशेषतो विवक्षितोऽर्थ । नाविजानन्सत्यं वदति यस्त्व-विजानन्वदति सोऽन्यादिशब्देन अन्यादीन्परमार्थसद्रूपान्मन्यमानो वदति, न तु ते रूपत्रयव्यतिरेकेण परमार्थत सन्ति । तथा तान्यपि रूपाणि सदपेक्षया नैव सन्तीत्यतो नाविजानन्सत्यं वदति । विजानन्नेव सत्य वदति । न च तत्सत्यविज्ञानं अविजिज्ञासितमप्रार्थितं ज्ञायत इत्याह— विज्ञानं त्वेव विजिज्ञासितव्यमिति । यद्येवं विज्ञानं भगवो विजिज्ञास इति । एवं सत्यादीनां चोत्तरोत्तराणां कर्मेत्यंतानां पूर्वपूर्वहेतुत्वं व्याख्येयम ॥ इति सप्तदशः खंड. ॥

यदा वै मनुतेऽथ विजानाति नामत्वा विजानाति मत्वैव विजानाति मतिस्त्वेव विजिज्ञासितव्येति मतिं भगवो विजिज्ञास इति ॥१॥ इति अष्टादशः खंडः ॥

यदा वै मनुत इति । मतिर्मननं तर्कः ॥ इति अष्टादश खंड ॥

यदा वै श्रद्दधात्यथ मनुते नाश्रद्दधन्मनुते श्रद्दधदेव मनुते श्रद्धा

त्वेव विजिज्ञासितव्येति श्रद्धां भगवो विजिज्ञास इति ॥१॥ इति एकोनविंशतितम खंडः ॥

मतव्यविषये आदर. आस्तिक्यबुद्धि श्रद्धा ॥ ७.१९.—

यदा वै निस्मिष्टत्यथ श्रद्दधाति नानिस्मिष्टन्श्रद्दधाति निस्मिष्टन्नेव श्रद्दधाति निष्ठा त्वेव विजिज्ञासितव्येति निष्ठां भगवो विजिज्ञास इति ॥१॥ इति विशतितमः खंडः ॥

निष्ठा गुरुशुश्रूषादितत्परत्व ब्रह्मविज्ञानाय ॥ ७.२० —

यदा वै करोत्यथ निस्मिष्टति नाकृत्वा निस्मिष्टति कृत्वैव निस्मिष्टति कृतिस्त्वेव विजिज्ञासितव्येति कृति भगवो विजिज्ञास इति ॥१॥ इति एकविंश खंडः ॥

यदा वै करोति । कृतिरिंद्रियसयमश्चित्तैकाग्रताकरणं च । सत्या हि तस्या निष्ठादीनि यथोक्तानि भवन्ति विज्ञानावसानानि ॥ इति एकविश खंड ॥ —

यदा वै सुखं लभतेऽथ करोति नासुख लब्ध्वा करोति सुखमेव लब्ध्वा करोति सुखं त्वेव विजिज्ञासितव्यमिति सुखं भगवो विजिज्ञास इति ॥१॥ इति द्वाविंशः खंड ॥

सापि कृतिर्यदा सुखं लभते सुखं निरतिशय वक्ष्यमाणं लब्धव्यं मयेति मन्यते तदा भवतीत्यर्थ । यथा दृष्टफलमुत्वा कृतिस्तथेहापि नासुखं लब्ध्वा करोति । भविष्यदपि फलं लब्धेत्युच्यते । तदुद्दिश्य प्रवृत्त्युपपत्तेः । अथेदानीं कृत्यादिपक्षेषु सत्सु सत्यं स्वयमेव परिभासत इति न तद्विज्ञानाय पृथगयत्नः कार्य इति प्राप्तम् । तत इदमुच्यते, सुखं त्वेव विजिज्ञासितव्यमित्यादि । सुखं भगवो विजिज्ञास इत्यभिमुख्याभूताह ॥ इति द्वाविश. खंड ॥ ७.२२.—

यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञास इति ॥१॥ इति त्रयोविंश. खंडः ॥

यो वै भूमा महत्निरतिशयं बृंहति पर्यायास्तत्सुखम् । ततोऽर्वाक्सातिशयत्वादल्पम् । अतस्तस्मिन्नल्पे सुखं नास्ति । अल्पस्याधिकतृष्णाहेतुत्वात् । तृष्णा च दुःखबीजम् । न हि दु खबीजं सुखं दृष्टं ज्वरादि लोके । तस्माद्युक्तं नाल्पे सुखमस्तीति । अतो भूमैव सुखम । तृष्णादिदुःखबीजत्वासंभवात भूम्न ॥ इति त्रयोविंश खंड ॥ ७.२३.—

यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमाथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पं यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यं स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि यदि वा न महिम्नीति ॥१॥

किंलक्षणोऽसौ भूमेत्याह--- यत्र यस्मिन्भूम्नि तत्त्वं नान्यत् द्रष्टव्यमन्येन करणेन द्रष्टाऽन्यो विभक्तो दृश्यात्पश्यति । तथा नान्यच्छृणोति । नामरूपयोरेवान्तर्भावात् विषयभेदस्य तद्ग्राहकयोरेवेह दर्शनश्रवणयोर्ग्रहणमन्येषां चोपलक्षणार्थत्वेन । मननं त्वत्रोक्तं द्रष्टव्यं नान्यन्मनुत इति । प्रायशो मननपूर्वकत्वाद्विज्ञानस्य । तथा नान्यद्विजानाति । एवंलक्षणो य स भूमा । किमत्र प्रसिद्धान्यदर्शनाभावो भूम्न्युच्यते नान्यत्पश्यतीत्यादिना । अथान्यन्न पश्यत्यात्मानं पश्यतीत्येतत् । किंचात । यद्यन्यदर्शनाद्यभावमात्रमित्युच्यते, तदा द्वैतसंव्यवहारविलक्षणो भूमेत्युक्तं भवति । अथान्यदर्शनविशेषप्रतिषेधेन आत्मानं पश्यतीत्युच्यते, तदैकस्मिन्नेव क्रियाकारकफलभेदोऽभ्युपगतो भवेत । यद्येवं को दोषः स्यात् । नन्वयमेव दोष संसारानिवृत्ति । क्रियाकारकफलभेदो हि संसार इति । आत्मैकत्वे एव क्रियाकारकफलभेद संसारविलक्षण इति चेत् । न । आत्मनो निर्विशेषैकत्वाभ्युपगमे दर्शनादिक्रियाकारकफलभेदाभ्युपगमस्य शब्दमात्रत्वात् । अन्यदर्शनाद्यभावोक्तिपक्षेऽपि यत्र इति अन्यन्न पश्यतीति च विशेषणे अनर्थके स्यातामिति चेत् । दृश्यते हि लोके यत्र शून्ये गृहेऽन्यन्न पश्यतीत्युक्ते स्तंभादीनात्मानं च न न पश्यतीति गम्यते । एवमिहापीति चेत । न । तत्त्वमसीत्येकत्वोपदेशात् अधिकरणाधिकर्तव्यभेदानुपपत्ते । तथा सदेकमेवाद्वितीयं सत्यमिति षष्ठे निर्धारितत्वात । 'अदृश्येऽनात्म्ये' 'न संदृशे तिष्ठति रूपमस्य' 'विज्ञातारमरे केन विजानीयात' इत्यादिश्रुतिभ्यः स्वात्मनि दर्शनाद्यनुपपत्तिः । यत्रेति विशेषणमनर्थकं प्राप्तमिति चेत् । न । अविद्याकृतभेदापेक्षत्वात् । यथा सत्यैकत्वाद्वितीयत्ववुद्धि प्रकृतामपेक्ष्य सदेकमेवाद्वितीयमिति संख्याद्यनर्हमप्युच्यते । एवं भूम्न्येकस्मिन्नेव यत्रेति विशेषणम् । अविद्यावस्थायां अन्यदर्शनानुवादेन च भूम्नस्तदभावत्वलक्षणस्य विवक्षितत्वात् नान्यत्पश्यतीति विशेषणम् । तस्मात्संसारव्यवहारो भूम्नि नास्तीति समुदायार्थः । अथ यत्राविद्याविषयेऽन्योऽन्येनान्यत्पश्यतीति तदल्पं अविद्याकालभावीत्यर्थः । यथा स्वप्नदृश्यं

वस्तु प्राक् प्रबोधात्तत्कालभावीति तद्वत । तत एव तन्मर्त्यं विनाशि स्वप्नवस्तुवदेव । तद्विपरीतो भूमा यस्तदमृतम । तच्छब्दोऽमृतत्वपर । स तर्ह्यवलक्षणो भूमा हे भगवन्कस्मिन्प्रतिष्ठित इत्युक्तवन्तं नारदं प्रत्याह सनत्कुमार । स्वे महिम्नीति स्वे आत्मीये महिम्नि माहात्म्ये विभूतौ प्रतिष्ठितो भूमा । यदि प्रतिष्ठामिच्छास कचिद्यदि वा परमार्थमेव पृच्छसि, न महिम्न्यपि प्रतिष्ठित इति ब्रूम । अप्रतिष्ठितोऽनाश्रितो भूमा क्वचिदपील्यर्थ ॥

गाअश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायतनानीति नाहमेवं ब्रवीमि ब्रवीमीति होवाचान्यो ह्यन्यस्मिन्प्रतिष्ठित इति ॥२॥ इति चतुर्विंशः खंडः ॥

यदि स्वमहिम्नि प्रतिष्ठितो भूमा कथं तर्ह्यप्रतिष्ठ उच्यते । शृणु । गोअश्वादीह महिमेत्याचक्षते । गावश्चाश्वाश्च गाअश्वं द्वंद्वैकवद्भाव । सर्वत्र गवाश्वादि महिमेति प्रसिद्धम । तदाश्रितस्तत्प्रतिष्ठश्चैत्रो भवति यथा, नाहमेवं स्वतोऽन्यं महिमानमाश्रितो भूमा चैत्रवदिति ब्रवीमि. अत्र हेतुत्वेनान्यो ह्यन्यस्मिन्प्रतिष्ठित इति व्यवहितेन संबंध । किंत्वेव ब्रवीमीति होवाच स एवेत्यादि ॥ इति चतुर्विंश. खंड ॥ ७.२४.—

स एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तात्स दक्षिणत स उत्तरतः स एवेदं सर्वमित्यथातोऽहंकारादेश एवाहमेवाधस्तादहमुपरिष्टादहं पश्चादहं पुरस्तादहं दक्षिणतोऽहमुत्तरतोऽहमेवेदं सर्वमिति ॥१॥

कस्मात्पुन क्वचिन्न प्रतिष्ठित इत्युच्यते— यस्मात्स एव भूमा अधस्ताच्च तद्व्यतिरेकेणान्याद्विद्यते यस्मिन्प्रतिष्ठित स्यात् । तथोपरिष्टादित्यादि समानम् । सति भूम्नोऽन्यस्मिन्भूमा हि प्रतिष्ठित स्यान्न तु तदस्ति । स एव तु सर्वम् । अतस्तस्मादसौ न क्वचित्प्रतिष्ठितः । 'यत्र नान्यत्पश्यति' इत्यधिकरणाधिकर्तव्यतानिर्देशात्स एवाधस्तादिति च परोक्षनिर्देशात् द्रष्टुर्जीवादन्यो भूमा स्यादित्याशंका कस्यचिन्मा भूदित्यथातोऽनंतरं अहंकारादेशोऽहंकारेणादिश्यत इत्यहंकारादेश । द्रष्टुरनन्यत्वदर्शनार्थं भूमैव निर्दिश्यतेऽहंकारेण अहमेवाधस्तादित्यादिना ॥

अथात आत्मादेश एवात्मैवाधस्तादात्मोपरिष्टादात्मा पश्चादात्मा पुरस्तादात्मा दक्षिणत आत्मोत्तरत आत्मैवेदं सर्वमिति स वा एष एवं

पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानंदः स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति। अथ येऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति तेषां सर्वेषु लोकेष्वकामचारो भवति ॥२॥ इति पंचविंशः खंडः ॥

अहंकारेण देहादिसंघातोऽप्यादिश्यतेऽविवेकिभि इत्यतस्तदाशंका मा भूदित्यथानंतरं आत्मादेश आत्मनैव केवलेन सत्स्वरूपेण शुद्धेनादिश्यते। आत्मैव सर्वत सर्वमित्येवमेकमजं सर्वतो व्योमवत्पूर्णमन्यशून्यं पश्यन्स वा एष विद्वान्मननविज्ञानाभ्या आत्मरतिरात्मन्येव रती रमणं यस्य सोऽयमात्मरतिः। तथात्मक्रीड । देहमात्रसाधना रतिर्बाह्यसाधना क्रीडा। लोके स्त्रीभि सखिभिश्च क्रीडतीति दर्शनात। न तथा विदुष . किं तर्हि, आत्मविज्ञानानिमित्तमेवोभयं भवतीत्यर्थ.। मिथुनं द्वंद्वजनितं सुखं तदपि द्वंद्वानिरपेक्षं यस्य विदुष। तथात्मानंद , शब्दादिनिमित्त आनंदोऽविदुषा, न तथास्य विदुष किं तर्ह्यात्मनिमित्तमेव सर्व सर्वदा सर्वप्रकारेण च । देहजीवितभोगादिनिमित्तबाह्यवस्तुनिरपेक्ष इत्यर्थ । स एवंलक्षणो विद्वान्जीवन्नेव स्वाराज्येऽभिषिक्त पतितेऽपि देहे स्वराडेव भवति। यत एव भवति तत एव तस्य सर्वेषु लोकेषु कामचारो भवति। प्राणादिषु पूर्वभूमिषु 'तत्रास्य' इति तावन्मात्रपरिच्छिन्नकामचारत्वमुक्तम। अन्यराजत्वं चार्थप्राप्त सातिशयत्वात्। यथाप्राप्तस्वाराज्यकामचारत्वानुवादेन तत्तन्निवृत्तिरिहोच्यते स स्वराडित्यादिना। अथ पुनर्येऽन्यथा अत उक्तदर्शनादन्यथा वैपरीत्येन यथोक्तमेव वा सम्यङ्न विदु , तेऽन्यराजानो भवन्ति अन्य परो राजा स्वामी येषा तेऽन्यराजानस्ते। किंच क्षय्यलोका क्षय्यो लोको येषा ते क्षय्यलोका । भेददर्शनस्याल्पविषयत्वात्। अल्पं च तन्मर्त्यमित्यवोचाम। तस्माद्ये द्वैतदर्शिनस्ते क्षय्यलोका स्वदर्शनानुरूप्येणैव भवन्त्यत एव तेषा सर्वेषु लोकेष्वकामचारो भवति ॥ इति पंचविंश खंड ॥ ७.२५ —

तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राण आत्मत आशात्मत स्मर आत्मत आकाश आत्मतस्तेज आत्मत आप आत्मत आविर्भावतिरोभावावात्मतोऽन्नमात्मतो बलमात्मतो विज्ञानमात्मतो ध्यानमात्मतश्चित्तमात्मत. संकल्प आत्मतो मन आत्मतो वागात्मतो नामात्मतो मंत्रा आत्मतः कर्माण्यात्मत एवेदं सर्वमिति ॥१॥

तस्य ह वा एतस्येत्यादि स्वाराज्यं प्राप्तस्य प्रकृतस्य विदुष इत्यर्थः । प्राक्सदात्मविज्ञानात स्वात्मनोऽन्यस्मात्सत प्राणादेर्नामान्तस्योत्पत्तिप्रलयावभूताम् । सदात्मविज्ञाने तु सर्वादानां स्वात्मत एव संवृत्तौ । तथा सर्वोऽप्यन्यो व्यवहार आत्मत एव विदुष ॥

तदेष श्लोको न पश्यो मृत्युं पश्यति न रोगं नोत दुःखतां सर्वं ह पश्य. पश्यति सर्वमाप्नोति सर्वश इति स एकधा भवति त्रिधा भवति पंचधा सप्तधा नवधा चैव पुनश्चैकादश· स्मृत शतं च दश चैकश्च सहस्राणि च विंशतिराहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः स्मृतिलंभे सर्वग्रंथीनां विप्रमोक्षस्तस्मै मृदितकषायाय तमसस्पारं दर्शयति भगवान्सनात्कुमारस्तं स्कंद इत्याचक्षते तं स्कंद इत्याचक्षते ॥२॥ इति षड्विंशः खंडः ॥ इति सप्तमोऽध्यायः ॥

किच तदेतस्मिन्नर्थ एष श्लोको मंत्रोऽपि भवति । न पश्य पश्यतीति पश्यो यथोक्तदर्शी विद्वानित्यर्थ । मृत्युं मरणं रोगं ज्वरादि दुःखता दुःखभावं चापि न पश्यति । सर्व ह सर्वमेव स पश्य पश्यत्यात्मानमेव । सर्व ततः सर्वमाप्नोति सर्वशः सर्वप्रकारेरिति । किच स विद्वान्प्राक्सृष्टिप्रभेदादेकधैव भवति, एकधैव च संस्त्रिधादिभेदैरनंतभेदप्रकारो भवति सृष्टिकाले । पुन संहारकाले मूलमेव स्वं पारमार्थिकमेकधाभावं प्रतिपद्यते स्वतंत्र एवेति विद्या फलेन प्रोचयन्स्तौति । अथेदानी यथोक्ताया विद्याया सम्यगवभासकारणं मुखावभासकारणमेव आदर्शस्य विशुद्धिकारणं साधनमुपदिश्यते— आहारशुद्धौ । आहियत इत्याहार शब्दादिविषयविज्ञानं भोक्तुर्भोगायाहियते । तस्य विषयोपलब्धिलक्षणस्य विज्ञानस्य शुद्धिराहारशुद्धौ रागद्वेषमोहदोषैरसंसृष्टं विषयविज्ञानमित्यर्थ. । तस्यामाहारशुद्धौ सत्या तद्वतोऽन्तःकरणस्य सत्त्वस्य शुद्धिर्नैर्मल्यं भवति । सत्त्वशुद्धौ च सत्यां यथावगते भूमात्मनि ध्रुवा अविच्छिन्ना स्मृतिरविस्मरणं भवति । तस्यां च लब्धायां स्मृतिलंभे सति सर्वेषा अविद्याकृतानर्थपाशरूपाणां अनेकजन्मान्तरानुभवभावनाकठिनीकृतानां हृदयाश्रयाणां ग्रंथीना विप्रमोक्षो विशेषेण प्रमोक्षणं विनाशो भवतीति । यत एतदुत्तरोत्तरं यथोक्तमाहारशुद्धिमूलं तस्मात्सा कार्येत्यर्थः । सर्व शास्त्रार्थमशेषत उक्त्वा आख्यायिकामुपसंहरति श्रुतिः— तस्मै मृदितकषायाय वार्क्षादिरिव कषायो रागद्वेषादि-

दोषः सत्त्वस्य रंजनारूपत्वात्स ज्ञानवैराग्याभ्यासरूपक्षारेण क्षालितो मृदितो विनाशितो यस्य नारदस्य, तस्मै योग्याय मृदितकषायाय तमसोऽविद्यालक्षणात्पारं परमार्थतत्त्वं दर्शयति दर्शितवानित्यर्थः । कोऽसौ, भगवान् "उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥" एवंधर्मा सनात्कुमार । तमेव सनात्कुमारं देव स्कंद इत्याचक्षते कथयन्ति तद्विदः । द्विर्वचनमध्यायपरिसमाप्त्यर्थम् ॥ इति सप्तमोऽध्यायः ॥

॥ अष्टमोऽध्यायः ॥

यद्यपि दिग्देशकालादिभेदशून्यं ब्रह्म 'सदेकमेवाद्वितीयं आत्मैवेदं सर्वं' इति षष्ठसप्तमयोरधिगतं, तथापीह मंदबुद्धीना दिग्देशादिभेदवद्ब्रह्मित्येवं भाविता बुद्धिर्न शक्यते सहसा परमार्थविषया कर्तुमित्यनधिगम्य च ब्रह्म न पुरुषार्थसिद्धिरिति तदधिगमाय हृदयपुंडरीकदेश उपदेष्टव्यः । यद्यपि सत्सम्यक्प्रत्ययैकविषयं निर्गुणं चात्मतत्त्वं, तथापि मंदबुद्धीना गुणवत्त्वस्येष्टत्वात सत्यकामाद्गुणवत्त्वं च वक्तव्यम् । तथा यद्यपि ब्रह्मविदा स्त्र्यादिविषयेभ्य स्वयमेवोपरमो भवति तथाप्यनेकजन्मविषयसेवाभ्यासजनिता विषयविषया तृष्णा न सहसा निवर्तयितुं शक्यत इति ब्रह्मनर्यादिसाधनविशेषो विधातव्य । तथा यद्यप्यात्मैकत्वविदा गंतृगमनगंतव्याभावात अविद्यादिशर्म्मस्थितिनिमित्तक्षये गगन इव विद्युदुद्गत इव वायुर्दग्धेंधन इवाग्नि स्वात्मन्येव निवृत्ति, तथापि गंतृगमनादिवासितबुद्धीना हृदयदेशगुणविशिष्टब्रह्मोपासकाना मूर्धन्यया नाड्या गतिर्वक्तव्येत्यष्टमः प्रपाठक आरभ्यते । दिग्देशगुणगतिफलभेदशून्यं हि परमार्थसदद्वयं ब्रह्म मंदबुद्धीनामसदिव प्रतिभाति । सन्मार्गमश्रान्तावद्भवन्तु तत शनैः परमार्थसदपि ग्राहयिष्यामीति मन्यते श्रुति —

ॐ । अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोऽस्मिन्नंतराकाशस्तस्मिन्यदंतस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति ॥१॥

अथानंतरं यदिदं वक्ष्यमाणं दहरमल्पं पुंडरीकं पुंडरीकसदृशं वेश्मेव वेश्म द्वारपालादिमत्त्वात् । अस्मिन्ब्रह्मपुरे ब्रह्मणः परस्य पुरं, राज्ञोऽनेकप्रकृतिमद्यथा पुरं, तथेदमनेकेंद्रियमनोबुद्धिभिः स्वामर्थकारिभिर्युक्तमिति ब्रह्मपुरम् । पुरे च वेश्म राज्ञो यथा, तथा तस्मिन्ब्रह्मपुरे शरीरे दहरं वेश्म, ब्रह्मण उपलब्ध्यधिष्ठान-

मित्यर्थः । यथा तथा विष्णोः शालग्रामः । अस्मिन् हि स्वविकारशुंगे देहे नामरूपव्याकरणाय प्रविष्टं सदाख्यं ब्रह्म जीवेनात्मनेत्युक्तम् । तस्मादस्मिन्हृदयपुंडरीके वेश्मनि उपसंहृतकरणैर्बाह्यविषयविरक्तैः विशेषतो ब्रह्मचर्यसत्यसाधनाभ्यां युक्तैः वक्ष्यमाणगुणवद्ध्यायमानैर्ब्रह्मोपलभ्यत इति प्रकरणार्थः । दहरोऽल्पतरोऽस्मिन् दहरे वेश्मनि वेश्मनोऽल्पत्वात्तदंतर्वर्तिनोऽल्पतरत्वं वेश्मनः । अंतराकाश आकाशाख्यं ब्रह्म । 'आकाशो वै नाम इति हि वक्ष्यति । आकाश इवाशरीरत्वात् सूक्ष्मत्वात्सर्वगतत्वसामान्याच्च । तस्मिन्नाकाशाख्ये यदंतर्मध्ये तदन्वेष्टव्यम । तद्भाव तदेव च विशेषेण जिज्ञासितव्यं गुर्वाश्रयश्रवणाद्युपायैरन्विष्य च साक्षात्करणीयमित्यर्थः ॥

तं चेद्ब्रूयुर्यदिदमस्मिन्ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोऽस्मिन्नंतराकाशः किं तदत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमिति स ब्रूयात् ॥२॥

तं चेदेवमुक्तवन्तमाचार्यं यदि ब्रुयुरेतेवासिनः चोदयेयुः, कथं, यदिदमस्मिन्ब्रह्मपुरे परिच्छिन्नेऽन्तर्दहरं पुंडरीकं वेश्म, ततोऽयंतरल्पतर एवाकाशः । पुंडरीक एव वेश्मनि तावत्कि स्यात । किं ततोऽल्पतरे यं यद्भवदित्याहुः । दहरोऽस्मिन्नंतराकाश किं तदत्र विद्यते, न किंचन विद्यत इत्यभिप्राय । यदि नाम बदरमात्रं किमपि विद्येत, किं तस्यान्वेषणेन विजिज्ञासनेन वा फलं विजिज्ञासितु स्यात । अतो यत्तत्रान्वेष्टव्यं विजिज्ञासितव्यं वा न तेन प्रयोजनमित्युक्तवत स आचार्यो ब्रूयादिति श्रुतेर्वचनम ॥

यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन्द्यावापृथिवी अंतरेव समाहिते उभावग्निश्च वायुश्च सूर्याचंद्रमसावुभौ विद्युन्नक्षत्राणि यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन्समाहितमिति ॥३॥

शृणुत । तत्र यत ब्रूथ पुंडरीकात स्थस्य वेश्मनोऽल्पत्वात्तन्मध्यमल्पतरं स्यादिति । तदसत् । न हि सर्वं पुंडरीकवेश्मगतं पुंडरीकादल्पतरं मत्वाऽवोचं दहरोऽस्मिन्नंतराकाश इति । किं तर्हि, पुंडरीकमल्पं तदनुविधायि तत्स्थमंत करणं पुंडरीकाकाशपरिच्छिन्नं तस्मिन्विशुद्धे संहृतकरणानां योगिना स्वच्छ इवोदके प्रतिबिंबरूपमादर्श इव च शुद्धे स्वच्छं विज्ञानज्योतिः स्वरूपावभासं तावन्मात्रं ब्रह्मोपलभ्यत इति दहरोऽस्मिन्नंतराकाश इत्यवोचाम अंतःकरणोपाधिनिमित्तम ।

स्वतस्तु यावान्वै प्रसिद्ध परिमाणतोऽयमाकाशो भौतिक , तावानेषोऽन्तर्हृदय आकाशो यस्मिन्नन्वेष्टव्यं विजिज्ञासितव्यं चावोचाम । नाप्याकाशतुल्यपरिमाणत्वमभिप्रेत्य तावानित्युच्यते । किं तर्हि ब्रह्मणोऽनुरूपस्य दृष्टान्तान्तरस्याभावात् । कथं पुनर्नाकाशसंमेमेव ब्रह्मेत्यवगम्यते 'येनावृतं खं च दिवं महीं च' 'तस्माद्वा एतस्मादात्मन आकाश. संभूतः' 'एतस्मिन्नु खल्वक्षरे गार्ग्याकाश.' इत्यादिश्रुतिभ्यः । किं चोभे अस्मिन्द्यावापृथिवी ब्रह्माकाशे बुद्ध्युपाधिविशिष्टे अंतरेव समाहिते सम्यगाहिते स्थिते । 'यथा वा अरा नाभौ' इत्युक्तं हि । तथोभौ अग्निश्च वायुश्चेत्यादि समानम् । यच्चास्यात्मन आत्मीयत्वेन देहवतोऽस्ति विद्यत इह लोके । तथा यच्चात्मीयत्वेन न विद्यते । नष्टं भविष्यच्च नास्तीत्युच्यते । न ह्यत्यंतमेवासत् । तस्य हृद्याकाशे समाधानानुपपत्तेः ॥

तं चेद्ब्रूयुरस्मिंश्चेदिदं ब्रह्मपुरे सर्वं समाहितं सर्वाणि च भूतानि सर्वे च कामा यदैतज्जरा वाप्नोति प्रध्वंसते वा किं ततोऽतिशिष्यत इति ॥४॥

तं चेदेवमुक्तवन्तं ब्रूयु. पुनरंतेवासिनः— अस्मिंश्चेद्यथोक्ते चेत्यादि ब्रह्मपुरे ब्रह्मपुरोपलक्षितान्तकाराशे इत्यर्थः । इदं सर्वं समाहितं सर्वाणि च भूतानि सर्वे च कामाः । कथमाचार्येणानुक्ता कामा अंतेवासिभिरुच्यन्ते । नैष दोषः । यच्चास्येहास्ति यच्च नास्तीत्युक्ता एव ह्याचार्येण कामाः । अपि च सर्वशब्देन चोक्ता एव कामाः । यदा यस्मिन्काले एतच्छरीरं ब्रह्मपुराख्यं जरा वलीपलितादिलक्षणा वयोहानिर्वा आप्नोति, शस्त्रादिना वा व्रणं प्रध्वंसते विस्रंसते विनश्यति, किं ततोऽन्यदतिशिष्यते ? घटाश्रितस्फारदधिस्नेहादिवत् घटनाशे देहनाशेऽपि देहाश्रयमुत्तरोत्तरं पूर्वपूर्वनाशान्नश्यतीत्यभिप्रायः । एवं प्राप्ते नाशे किं ततोऽन्यद्यथोक्तादतिशिष्यतेऽवतिष्ठते, न किंचनावतिष्ठत इत्यभिप्रायः ॥

स ब्रूयान्नास्य जरयैतज्जीर्यति न वधेनास्य हन्यत एतत्सत्यं ब्रह्मपुरमस्मिन्कामाः समाहिता एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पो यथा ह्येवेह प्रजा अन्वाविशन्ति यथानुशासनं यं यमंतमभिकामा भवन्ति यं जनपदं यं क्षेत्रभागं तं तमेवोपजीवन्ति ॥५॥

एवमंतेवासिभिश्चोदितः स आचार्यो ब्रूयात्तन्मतिमपनयन् । कथम् । अस्य देहस्य जरयैतद्यथोक्तमंतराकाशाख्यं ब्रह्म यस्मिन्सर्वं समाहितं न जीर्यति

देहवन्न विक्रियत इत्यर्थः । न चास्य वधेन शस्त्रादिघातेनैतद्धन्यते यथाकाशं, किमु ततोऽपि सूक्ष्मतरमशब्दमस्पर्शं ब्रह्म देहेंद्रियादिदोषैर्न स्पृश्यत इत्यर्थः । कथं देहेंद्रियादिदोषैर्न स्पृश्यते इत्येतस्मिन्नवसरे वक्तव्यं प्राप्तं, तत्प्रकृतव्यासंगो मा भूदिति नोच्यते । इंद्रविरोचनाख्यायिकायां उपरिष्टाद्वक्ष्यामो युक्तितः । एतत्सत्यमवितथं ब्रह्मपुरं ब्रह्मैव पुरं ब्रह्मपुरं, शरीराख्यं तु ब्रह्मपुरं ब्रह्मोपलक्षणार्थत्वात् । तत्त्वनृतमेव । 'वाचारंभणं विकारो नामधेयम्' इति श्रुतेः । तद्विकारेऽनृतेऽपि देहशुंगे ब्रह्मोपलब्धत इति ब्रह्मपुरमित्युक्तं व्यावहारिकम् । सत्यं तु ब्रह्मपुरमेतदेव ब्रह्म । सर्वव्यवहारास्पदत्वात् । अतोऽस्मिन्पुंडरीकोपलक्षिते ब्रह्मपुरे सर्वे कामा, ये बहिर्मनद्विधः प्रार्थ्यन्ते, तेऽस्मिन्नेव स्वात्मनि समाहिताः । अतस्तत्प्राप्त्युपायमेवानुतिष्ठत बाह्यविषयतृष्णा त्यजतेत्यभिप्रायः । एष आत्मा भवता स्वरूपम् । शृणुत तस्य लक्षणम् । अपहतपाप्मा अपहतः पाप्मा धर्माधर्माख्यो यस्य सोऽयमपहतपाप्मा । तथा विजरो विगतजरो विमृत्युश्च । तदुक्तं पूर्वमेव न वधेनास्य हन्यत इति । किमर्थं पुनरुच्यते । यद्यपि देहसंबंधिभ्यो जरामृत्युभ्यो न संबध्यते, अन्यथापि संबंधस्ताभ्यां स्यादित्याशंकानिवृत्त्यर्थम् । विशोको विगतशोकः । शोको नामेष्टादिवियोगनिमित्तो मानसः संतापः । विजिघत्सो विगताशनेच्छः । अपिपासोऽपानेच्छः । ननु अपहतपाप्मत्वेन जरादयः शोकान्ता प्रतिषिद्धा एव भवन्ति । कारणप्रतिषेधात् । धर्माधर्मकार्या हि ते इति । जरादिप्रतिषेधेन वा धर्माधर्मयोः कार्याभावे विद्यमानयोरप्यसत्समत्वमिति पृथक्प्रतिषेधोऽनर्थकः स्यात् । सत्यमेवं, तथापि धर्मकार्यानंदव्यतिरेकेण स्वाभाविकानंदो यथेश्वरे 'विज्ञानमानंदं ब्रह्म' इति श्रुतेः, तथाऽधर्मकार्यजरादिव्यतिरेकेणापि जरादिदुःखस्वरूपं स्वाभाविकं स्यादित्याशंक्येत । अतो युक्तस्तन्निवृत्तये जरादीना धर्माधर्माभ्यां पृथक्प्रतिषेधः । जरादिग्रहणं सर्वदुःखोपलक्षणार्थम् । पापनिमित्तानां तु दुःखानामानंत्यात्प्रत्येकं च तत्प्रतिषेधस्याशक्यत्वात् सर्वदुःखप्रतिषेधार्थं युक्तमेवापहतपाप्मत्ववचनम् । सत्या अवितथाः कामा यस्य सोऽयं सत्यकामः । वितथा हि संसारिणां कामाः । ईश्वरस्य तद्विपरीताः । तथा कामहतवः संकल्पा अपि सत्या यस्य स सत्यसंकल्पः । संकल्पाः कामाश्च शुद्धसत्त्वोपाधिनिमित्ता ईश्वरस्य । चित्रगुवत् । न स्वतो 'नेति नेति' इत्युक्तत्वात् । यथोक्तलक्षण एवात्मा विज्ञेयो गुरुभ्यः शास्त्र-

तश्च आत्मसंवेद्यतया च स्वाराज्यकामे. । न चेद्विज्ञायते को दोप. स्यादिति, शृणुतात्र दोषं दृष्टान्तेन । यथा ह्येवेह लोके प्रजा अन्वाविशन्त्यनुवर्तन्ते यथानुशासनं, यथेह प्रजा अन्यं स्वामिनं मन्यमानाः तस्य स्वामिनो यथा यथानुशासनं तथा तथान्वाविशन्ति । किम् । यं यमंतं प्रत्यंतं जनपदं क्षेत्रभागं चाभिकामा अर्थिन्यो भवन्त्यात्मबुद्धयनुरूपं, तं तमेव च प्रत्यंतादिमुपजीवन्तीति । एष दृष्टान्तोऽस्यातंत्र्यदोषं प्रति पुण्यफलोपभोगे ॥

तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोक क्षीयते तद्य इहात्मानमननुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेष्वकामचारो भवत्यथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति ॥६॥ इति प्रथमः खंडः ॥

अथान्यो दृष्टान्तस्तत्प्रत्यं प्रति तद्यथेहेत्यादि । तत्तत्र यथेह लोके तासामेव स्वाम्यनुशासनानुवर्तिनीनां प्रजाना मेवादिजितो लोक परार्ध्योपभोगः क्षीयतेऽन्तवान्भवति । अथेदानीं दार्ष्टान्तिकमुपसंहरति- एवमेवामुत्र अग्निहोत्रादिपुण्यजितो लोक परार्ध्योपभोग. क्षीयत एवेति । उक्तो दोष एषामिति विषयं दर्शयति तद्य इत्यादिना । तत्तत्र ये इहाग्निलोके ज्ञानकर्मणोरविद्वता योग्याः सन्त आत्मानं यथोक्तलक्षणं शास्त्राचार्योपदिष्टमननुविद्य यथोपदेशमनु स्वसंवेद्यतामकृत्वा व्रजन्ति देहादस्मात्प्रयान्ति, य एताश्च यथोक्तान्सत्यान सत्यसंकल्पकार्याश्च स्वात्मस्थान्कामाननुविद्य व्रजन्ति, तेषा सर्वेषु लोकेष्वकामचारोऽस्वतंत्रता भवति । यथा राजानुशासनानुवर्तिनीना प्रजानामित्यर्थ । अथ येऽन्य इह लोक आत्मानं शास्त्राचार्योपदेशमनुविद्य स्वात्मसंवेद्यतामापाद्य व्रजन्ति यथोक्तांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति, राज इव सार्वभौमस्येह लोके ॥ इति प्रथमः खंड. ॥ ८.१.—

स यदि पितृलोककामो भवति संकल्पादेवास्य पितर समुत्तिष्ठन्ति तेन पितृलोकेन संपन्नो महीयते ॥१॥

कथं सर्वेषु लोकेषु कामचारो भवतीति, उच्यते— य आत्मानं यथोक्तलक्षणं हृदि साक्षात्कृतवान् वक्ष्यमाणब्रह्मचर्यादिसाधनसंपन्न. संस्तत्स्थांश्च सत्यान्कामान्स त्यक्तदेहो यदि पितृलोककामः, पितरो जनयितारस्त एव सुखहेतुत्वेन भोग्यत्वाल्लोका उच्यन्ते तेषु कामो यस्य तै पितृभि. संबंधेच्छा यस्य

भवति तस्य संकल्पमात्रादेव पितरः समुत्तिष्ठन्त्यात्मसंबंधितामापद्यन्ते । विशुद्धसत्त्वतया सत्यसंकल्पत्वादीश्वरस्येव । तेन पितृलोकेन भोगेन संपन्नः संपत्तिरिष्टप्राप्तिस्तया समृद्धो महीयते पूज्यते वर्धते वा महिमानमनुभवति ॥

अथ यदि मातृलोककामो भवति संकल्पादेवास्य मातरः समुत्तिष्ठन्ति तेन मातृलोकेन संपन्नो महीयते ॥२॥ अथ यदि भ्रातृलोककामो भवति संकल्पादेवास्य भ्रातरः समुत्तिष्ठन्ति तेन भ्रातृलोकेन संपन्नो महीयते ॥३॥ अथ यदि स्वसृलोककामो भवति संकल्पादेवास्य स्वसारः समुत्तिष्ठन्ति तेन स्वसृलोकेन संपन्नो महीयते ॥४॥ अथ यदि सखिलोककामो भवति संकल्पादेवास्य सखायः समुत्तिष्ठन्ति तेन सखिलोकेन संपन्नो महीयते ॥५॥ अथ यदि गंधमाल्यलोककामो भवति संकल्पादेवास्य गंधमाल्ये समुत्तिष्ठतस्तेन गंधमाल्यलोकेन संपन्नो महीयते ॥६॥ अथ यद्यन्नपानलोककामो भवति संकल्पादेवास्यान्नपाने समुत्तिष्ठतस्तेनान्नपानलोकेन संपन्नो महीयते ॥७॥ अथ यदि गीतवादित्रलोककामो भवति संकल्पादेवास्य गीतवादित्रे समुत्तिष्ठतस्तेन गीतवादित्रलोकेन संपन्नो महीयते ॥८॥ अथ यदि स्त्रीलोककामो भवति संकल्पादेवास्य स्त्रियः समुत्तिष्ठन्ति तेन स्त्रीलोकेन संपन्नो महीयते ॥९॥

समानमन्यत् । मातरो जनयित्र्योऽर्तोता. सुखहेतुभूता. सामर्थ्यात् । न हि दुःखहेतुभूतासु ग्रामसूकरादिजन्मनिमित्तासु मातृषु विशुद्धसत्त्वस्य योगिन इच्छा तत्संबंधो वा युक्त ॥

यं यमंतमभिकामो भवति यं कामं कामयते सोऽस्य संकल्पादेव समुत्तिष्ठति तेन संपन्नो महीयते ॥ इति द्वितीयः खंडः ॥

यं यमंतं प्रदेशमभिकामो भवति, यं च कामं कामयते यथोक्तव्यतिरेकेणापि, सोऽस्यातः प्राप्तुमिष्टः कामश्च संकल्पादेव समुत्तिष्ठत्यस्य । तेनेच्छाविघाततया अभिप्रेतार्थप्राप्त्या च संपन्नो महीयत इत्युक्तार्थम् ॥ ८.२.—

त इमे सत्याः कामा अनृतापिधानास्तेषां सत्यानां सतामनृतमपिधानं यो यो ह्यस्येतः प्रैति न तमिह दर्शनाय लभते ॥१॥

यथोक्तात्मध्यानसाधनानुष्ठानं प्रति साधकानां उत्साहजननार्थमनुक्रोशन्न्याह— कष्टमिदं खलु वर्तते यत्खात्मस्थाः शक्यप्राप्या अपि त इमे सत्याः

कामा अनृतापिधानाः तेषामात्मस्थाना स्वाश्रयाणामेव सतामनृतं बाह्यविषयेषु स्त्र्यन्नभोजनाच्छादनादिषु तृष्णा तन्निमित्तं च स्वेच्छाप्रचारत्वं मिथ्याज्ञाननिमित्तत्वादनृतमित्युच्यते । तान्निमित्तं सत्यानां कामानामप्राप्तिरिति अपिधानमिवापिधानम् । कथमनृतापिधाननिमित्तं तेषामलाभ इति, उच्यते— यो यो हि यस्मादस्य जंतोः पुत्रो भ्राता वेष्टः इतोऽस्माल्लोकात्प्रेति प्रगच्छति म्रियते, तमिष्टं पुत्रं भ्रातरं वा स्वहृदयाकाशे विद्यमानमपीह पुनर्दर्शनायेच्छन्नपि न लभते ॥

अथ ये चास्येह जीवा ये च प्रेता यच्चान्यदिच्छन्न लभते सर्वं तदत्र गत्वा विंदतेऽत्र ह्यस्यैते सत्याः कामा अनृतापिधानास्तद्यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तो न विंदेयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विंदन्त्यनृतेन हि प्रत्यूढाः ॥२॥

अथ पुनर्ये चास्य विदुषो जंतोर्जीवा जीवन्तीह पुत्रा भ्रात्रादयो वा, ये च प्रेता मृता इष्टाः संबंधिनो, यच्चान्यदिह लोके वस्त्रान्नपानादि रत्नादि वा वस्त्विच्छन्न लभते, तत्सर्वमत्र हृदयाकाशाख्ये ब्रह्मणि गत्वा यथोक्तेन विधिना विदते लभते । अत्रास्मिन्हार्दाकाशे हि यस्मादस्यैते यथोक्ता सत्या. कामा वर्तन्तेऽनृतापिधानाः । कथमिव तदन्याप्यमित्युच्यते— तत्तत्र यथा हिरण्यनिधिं हिरण्यमेव पुनर्ग्रहणाय निधातृभिर्निर्धायत इति निधिस्तं हिरण्यनिधिं निहितं भूमेरधस्तान्निक्षिप्तमक्षेत्रज्ञा निधिशास्त्रैर्निधिक्षेत्रमजानन्तः ते निधेरुपर्युपरि संचरन्तोऽपि निधिं न विदेयुः शक्यवेदनमपि । एवमेवेमा अविद्यावत्यः सर्वा इमाः प्रजा यथोक्तं हृदयाकाशाख्यं ब्रह्मलोकं ब्रह्मैव लोको ब्रह्मलोकस्तमहरहः प्रत्यहं गच्छन्त्योऽपि सुषुप्तकाले न विदन्ति न लभन्ते, एषोऽहं ब्रह्मलोकभावमापन्नोऽस्म्यद्येति । अनृतेन हि यथोक्तेन हि यस्मात्प्रत्यूढा हता. स्वरूपादविद्यादिदोषैर्बहिरपकृष्टा इत्यर्थः । अतः कष्टमिदं वर्तते जंतूनां यत्स्वायत्तमपि ब्रह्म न लभ्यत इत्यभिप्रायः ॥

स वा एष आत्मा हृदि तस्यैतदेव निरुक्तं हृद्ययमिति तस्माद्धृदयमहरहर्वा एवंवित्स्वर्गं लोकमेति ॥३॥

स वै य 'आत्मापहतपाप्मा' इति प्रकृतो वैशब्देन तं स्मारयति । एष विवक्षित आत्मा हृदि हृदयपुंडरीक आकाशशब्देनाभिहितः । तस्यैतस्य हृदयस्यैतदेव निरुक्तं निर्वचनं नान्यत् । हृद्ययमात्मा वर्तत इति यस्मात्तस्मात् हृदयं

हृदयनामनिर्वचनप्रसिद्ध्यापि स्वहृदय आत्मेत्यवगंतव्यमित्यभिप्राय । अहरहर्वै प्रत्यहमवंवित इत्ययमात्मेति जानन्स्वर्गं लोकं हार्द ब्रह्मेति प्रतिपद्यते । नन्वेनंवंविदाप सुषुप्तकाले हार्द ब्रह्म प्रतिपद्यत एव, 'सता सोम्य तदा संपन्न ' इत्युक्तत्वात् । बाढमेवं तथाप्यस्ति विशेष । यथा जानन्नजानंश्च सर्वो जंतु सद्ब्रह्मैव, तथापि तत्त्वमसीति प्रतिबोधितो विद्वान्त्सदेव नान्योऽस्मीति जानन्त्सदेव भवति । एवमेव विद्वानविद्वांश्च सुषुप्ते यद्यपि सत्संपद्यते तथाप्येवंविदेव स्वर्गं लोकमेतीत्युच्यते । देहपातेऽपि विद्याफलस्यावश्यंभावित्वादित्येष विशेष· ॥

अथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति ॥४॥

सुषुप्तकाले स्वेनात्मना सता संपन्न· सन्सम्यक्प्रसादतीति जाग्रत्स्वप्नयो विषयेंद्रियसंयोगजातं कालुष्यं जहातीति संप्रसादशब्दो यद्यपि सर्वजंतूना साधारण· तथाप्येवंवित्स्वर्गं लोकमेतीति प्रकृतत्वादेष संप्रसाद इति सोंनिहितवद्यत्नविशेषात्सोऽर्थेदं शरीरं हित्वास्माच्छरीरात्समुत्थाय शरीरात्मभावना परित्यज्येत्यर्थ । न त्वासनादिव सुमुत्थायेतीह युक्तम् । स्वेन रूपेणेति विशेषणात् । न ह्यन्यत उत्थाय स्वरूपं संपत्तव्यम् । स्वरूपमेव हि तन्न भवति प्रतिपत्तव्यं चेत्स्यात् । परं परमात्मलक्षणं विज्ञानस्वभावं ज्योतिरुपसंपद्य स्वास्थ्यमुपगम्येत्येतत् । स्वेनात्मायेन रूपेणाभिनिष्पद्यते, प्रागेतस्या स्वरूपसंपत्तेरविद्यया देहमेवापरं रूपमात्मत्वेनोपगत इति तदपेक्षयेदमुच्यते स्वेन रूपेणेति । अशरीरता ह्यात्मनः स्वरूपम् । यत्स्वं परं ज्योति स्वरूपमापद्यते सप्रसाद एष आत्मेति होवाच । स नृणादिति य· श्रुत्या नियुक्तोऽन्तेवासिभ्य । किंचैतदमृतमविनाशि भूमा 'यो वै भूमा तदमृतं' इत्युक्तम् । अत एवाभयं भूम्नो द्वितायाभावात् । अत एतद्ब्रह्मेति । तस्य ह वा एतस्य ब्रह्मणो नामाभिधानम् । किं तत्सत्यमिति । सत्यं ह्यवितथ ब्रह्म । 'तत्सत्यं स आत्मा' इति युक्तम् । अथ किमर्थमिदं नाम पुनरुच्यते । तदुपासनविधिस्तुत्यर्थम् ॥

तानि ह वा एतानि त्रीण्यक्षराणि सतीयमिति तद्यत्सत्तदमृतमथ यत्ति तन्मर्त्यमथ यद्यं तेनोभे यच्छति यदनेनोभे यच्छति तस्माद्यमहरहर्वा एवंवित्स्वर्गं लोकमेति ॥५॥ इति तृतीयः खंडः ॥

तानि ह वा एतानि ब्रह्मणो नामाक्षराणि त्रीण्येतानि सतीयमिति, सकारस्तकारो यमिति च। ईकारस्तकारे उच्चारणार्थोऽनुबंधः। ह्रस्वेनैवाक्षरेण पुनः प्रतिनिर्देशात्। तेषा तत्तत्र यत्सत्सकारस्तदमृतं सद्ब्रह्म अमृतवाचकत्वादमृत एव सकारस्तकारान्तो निर्दिष्टः। अथ यत्ति तकारस्तन्मर्त्यम्। अथ यद्यमक्षरं तेनाक्षरेणामृतमर्त्याख्ये पूर्वे उभे अक्षरे यच्छति नियमयति वशीकरोत्यात्मनेत्यर्थः। यद्यस्मादनेन यमित्येतेनोभे यच्छति तस्माद्यम्। संयते इव ह्येतेन यमा लक्ष्येते। ब्रह्मनामाक्षरस्यापि इदममृतत्वादिधर्मवत्त्वं महाभाग्यं किमुत नामवत, इत्युपास्यत्वाय स्तूयते ब्रह्म नामनिर्वचनेन। एवं नामवतो वेत्तेवंवित्। अहरहर्वा एवंवित्स्वर्गं लोकमेतीत्युक्तार्थम्॥ इति तृतीयः खंडः॥ ८.३.—

अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय नैतं सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतं सर्वे पाप्मानोऽतो निवर्तन्तेऽपहतपाप्मा ह्येष ब्रह्मलोकः॥ ४॥

अथ य आत्मेति। उक्तलक्षणो यः संप्रसादस्तस्य स्वरूपं वक्ष्यमाणैरुक्तैरनुक्तैश्च गुणैः पुनः स्तूयते, ब्रह्मचर्यसाधनसंबंधार्थम्। य एष यथोक्तलक्षण आत्मा स सेतुरिव सेतुः। विधृतिर्विधरणः। अनेन हि सर्वं जगत् वर्णाश्रमादिक्रियाकारकफलादिभेदनियमः कर्तुरनुरूपं विदधता विधृतम्। अविधियमाणं ह्यीश्वरेणेदं विश्वं विनश्येद्यत तस्मात्स सेतुर्विधृतिः। किमर्थं स सेतुरित्याह— एषां भूरादीनां लोकानां कर्तृकर्मफलाश्रयाणामसंभेदायाविदारणाय अविनाशायेत्येतत्। किविशिष्टश्चासौ सेतुरित्याह— नैतं सेतुमात्मानमहोरात्रे सर्वस्य जनितमः परिच्छेदके सती नैतं तरतः। यथान्ये संसारिणः कालेन अहोरात्रादिलक्षणेन परिच्छेद्या, न तथायं कालपरिच्छेद्य इत्यभिप्रायः। 'यस्मादर्वाक्संवत्सरोऽहोभिः परिवर्तते' इति श्रुत्यंतरात्। अत एवैनं न जरा तरति न प्राप्नोति। तथा न मृत्युर्न शोको न सुकृतं न दुष्कृतं सुकृतदुष्कृते धर्माधर्मौ। प्राप्तिरत्र तरणशब्देनाभिप्रेता नातिक्रमणम्। कारणं ह्यात्मा। न शक्यं हि कारणातिक्रमणं कर्तुं कार्येण। अहोरात्रादि च सर्वं सत कार्यम्। अन्येन ह्यन्यस्य प्राप्तिरतिक्रमणं वा क्रियेत, नतु तेनैव तस्य। न हि घटेन मृत्प्राप्येतेऽतिक्रम्यते वा। यद्यपि पूर्वं 'य आत्मापहतपाप्मा' इत्यादिना पाप्मादिप्रतिषेध उक्त एव, तथापीहायं विशेषो, न तरतीति प्राप्तिविषयत्वं प्रतिषिध्यते। तत्राविशेषेण जराद्यभावमात्र-

मुक्तम्। अहोरात्राद्या उक्ता अनुक्ताश्चान्ये सर्वे पाप्मान उच्यन्ते। अतोऽस्मादात्मनः सेतोर्निवर्तन्तेऽप्राप्यैवेत्यर्थ। अपहतपाप्मा ह्येष ब्रह्मैव लोको ब्रह्मलोक उक्तः॥

तस्माद्वा एतं सेतुं तीर्त्वान्धः सन्ननंधो भवति विद्धः सन्नविद्धो भवत्युपतापी सन्ननुपतापी भवति तस्माद्वा एतं सेतुं तीर्त्वापि नक्तमहरेवाभिनिष्पद्यते सकृद्विभातो ह्येवैष ब्रह्मलोकः॥१॥

यस्माच्च पाप्मकार्यमांध्यादि शरीरवत स्यान्न त्वशरीरस्य, तस्माद्वा एतमात्मानं सेतुं तीर्त्वा प्राप्यानंधो भवति देहवत्त्वे पूर्वमंधोऽपि सन्। तथा विद्धः सन्देहवत्त्वे स देहवियोगे सेतुं प्राप्याविद्धो भवति। तथोपतापी रोगाद्युपतापवान्सन्ननुपतापी भवति। किंच यस्मादहोरात्रे न स्तः सेतौ, तस्माद्वा एतं सेतुं तीर्त्वा प्राप्य नक्तमपि तमोरूपं रात्रिरूपि सर्वमहरेवाभिनिष्पद्यते। विज्ञाप्यात्मज्योतिःस्वरूपं अहरिवाहः सदैकरूपं विदुषः संपद्यत इत्यर्थ। सकृद्विभातः सदा विभातः सदैकरूपः स्वेन रूपेणैष ब्रह्मलोकः॥

तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविंदन्ति तेषामेवैष ब्रह्मलोकस्तेषां सर्वेषु लोकेषु कामचारो भवति॥२॥ इति चतुर्थः खंडः॥

तत्तत्रैवं सत्येतं यथोक्तं ब्रह्मलोकं ब्रह्मचर्येण स्त्रीविषयतृष्णात्यागेन शास्त्राचार्योपदेशमनुविदन्ति स्वात्मसंवेद्यतामापादयन्ति ये तेषामेव ब्रह्मचर्यसाधनवतां ब्रह्मविदामेष ब्रह्मलोकः, नान्येषां स्त्रीविषयसंपर्कजाततृष्णानां ब्रह्मविदामपीत्यर्थः। तेषां सर्वेषु लोकेषु कामचारो भवतीत्युक्तार्थम्। तस्मात्परममेतत्साधनं ब्रह्मचर्यं ब्रह्मविदामित्यभिप्रायः॥ इति चतुर्थः खंडः॥ ८.४.—

य आत्मा सेतुत्वादिगुणैः स्तुतः तत्प्राप्तये ज्ञानसहकारिसाधनान्तरं ब्रह्मचर्याख्यं विधातव्यमित्याह। यज्ञादिर्मिश्रं तत्स्तौतीति कर्तव्यार्थम्—

अथ यद्यज्ञ इत्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येव यो ज्ञानं तं विंदतेऽथ यदिष्टमित्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येवेष्ट्वात्मानमनुविंदते॥१॥

अथ यद्यज्ञ इत्याचक्षते लोके परमपुरुषार्थसाधनं कथयन्ति शिष्टाः, तद्ब्रह्मचर्यमेव। यज्ञस्यापि यत्फलं तद्ब्रह्मचर्यवाँल्लभते, अतो यज्ञोऽपि ब्रह्मचर्यमेवेति प्रतिपत्तव्यम्। कथं ब्रह्मचर्यं यज्ञ इत्याह— ब्रह्मचर्येणैव हि यस्माद्यो

ज्ञाता स तं ब्रह्मलोकं यज्ञस्यापि पारंपर्येण फलभूतं विदते लभते ततो यज्ञोऽपि ब्रह्मचर्यमेवेति । यो ज्ञाता इत्यक्षरानुवृत्तेर्यज्ञो ब्रह्मचर्यमेव । अथ यदिष्टमित्याचक्षते ब्रह्मचर्यमेव तत् । कथम् । ब्रह्मचर्येणैव साधनेन तमीश्वरमिष्ट्वा पूजयित्वा अथवैषणामात्मविषयां कृत्वा तमात्मानमनुविदते । एषणादिष्टमपि ब्रह्मचर्यमेव ॥

अथ यत्सत्त्रायणमित्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येव सत आत्मनस्त्राणं विंदतेऽथ यन्मौनमित्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येवात्मानमनुविद्य मनुते ॥२॥

अथ यत्सत्त्रायणमित्याचक्षते ब्रह्मचर्यमेव तत्तथा सतः परस्मादात्मन आत्मनस्त्राणं रक्षण ब्रह्मचर्यसाधनेन विदते । अतः सत्त्रायणशब्दमपि ब्रह्मचर्यमेव तत् । अथ यन्मौनमित्याचक्षते ब्रह्मचर्यमेव तत्, ब्रह्मचर्येणैव साधनेन युक्त सन्नात्मानं शास्त्राचार्याभ्यामनुविद्य पश्चान्मनुते ध्यायति । अतो मौनशब्दमपि [मौनशब्दोऽपि ?] ब्रह्मचर्यमेव ॥

अथ यदनाशकायनमित्याचक्षते ब्रह्मचर्यमेव तदेष ह्यात्मा न नश्यति यं ब्रह्मचर्येणानुविंदतेऽथ यदरण्यायनमित्याक्षते ब्रह्मचर्यमेव तदरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि तदैरं मदीयं सरस्तदश्वत्थ सोमसवनस्तदपराजिता पूर्ब्रह्मणः प्रभुविमितं हिरण्मयम् ॥३॥

अथ यदनाशकायनमित्याचक्षते ब्रह्मचर्यमेव तत् । यमात्मानं ब्रह्मचर्येणानुविदते स एष ह्यात्मा ब्रह्मचर्यसाधनवतो न नश्यति, तस्मादनाशकायनमपि ब्रह्मचर्यमेव । अथ यदरण्यायनमित्याचक्षते ब्रह्मचर्यमेव तत् । अरण्यशब्दयोः अर्णवयो ब्रह्मचर्यवतोऽयनान अरण्यायनं ब्रह्मचर्यम् । यो ज्ञानाद्यज्ञ एषणादिष्टं सतस्त्राणात्सत्त्रायणं मननान्मौनं अनशनादनाशकायनं अरण्ययोर्गमनादरण्यायनमित्यादिनिर्महद्भि पुरुषार्थसाधनै स्तुतत्वाद्ब्रह्मचर्य परमं ज्ञानस्य सहकारिकारण साधनमित्यतो ब्रह्मविदा यत्नतो रक्षणीयमित्यर्थः । तत्तत्र हि ब्रह्मलोके अरश्च ह वै प्रसिद्धौ ण्यश्चार्णवौ समुद्रौ समुद्रोपमे वा सरसी तृतीयस्यां भुवमंतरिक्षं चोपक्ष्य तृतीया द्यौस्तस्यां तृतीयस्यामितोऽस्माल्लोकादारभ्य गण्यमानाया दिवि । तत्तत्रैव चैरमिरा अन्नं तन्मय ऐरो मंडस्तेन पूर्णमैरं मदीयं तदुपयोगिनां मदकरं हर्षोत्पादकं सरः । तत्रैव चाश्वत्थो वृक्षः सोमसवनो नामतः सोमोऽमृतं तन्निःस्रवोऽमृतस्रव इति वा । तत्रैव च ब्रह्मलोके ब्रह्मचर्यसाधनरहितैः ब्रह्मचर्य-

साधनवद्भ्येऽन्यैर्न जीयत इत्यपराजिता नाम पू पुरी ब्रह्मणो हिरण्यगर्भस्य । ब्रह्मणा च प्रभुणा विशेषेण मितं निर्मितं तच्च हिरण्मयं सौवर्णं प्रभुविमितं मंडपमिति वाक्यशेषः ॥

तद्य एवंतावरं च एयं चार्णवौ ब्रह्मलोके ब्रह्मचर्येणानुविंदन्ति तेषामेवैष ब्रह्मलोकस्तेषां सर्वेषु लोकेषु कामचारो भवति ॥४॥

तत्तत्र ब्रह्मलोके एतावर्णवौ यावरण्याख्यावुक्तौ ब्रह्मचर्येण साधनेनानुविदन्ति ये तेषामेवैष यो व्याख्यातो ब्रह्मलोकः । तेषां च ब्रह्मचर्यसाधनवतां ब्रह्मविदां सर्वेषु लोकेषु कामचारो भवति । नान्येषामब्रह्मचर्यपराणां बाह्यविषयासक्तबुद्धीना कदाचिदपीत्यर्थः ।

नन्वत्र 'त्वमिद्रस्त्वं यमस्त्वं वरुण' इत्यादिभिर्यथा कश्चित्स्तूयते महार्ह, एवमिष्टादिभिः शब्दैर्न स्त्र्यादिविषयतृष्णानिवृत्तिमात्रं स्तुत्यर्ह, किं तर्हि, ज्ञानस्य मोक्षसाधनत्वात्तदेवेष्टादिभिः स्तूयत इति केचित् । न । स्त्र्यादिबाह्यविषयतृष्णापहृतचित्तानां प्रत्यगात्मविवेकविज्ञानानुपपत्तेः । 'परांचि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यति नान्तरात्मन' इत्यादिश्रुतिस्मृतिशतेभ्य । ज्ञानसहकारिकारणं स्त्र्यादिविषयतृष्णानिवृत्तिसाधनं विधातव्यमेवेति युक्तैव तत्स्तुतिः । ननु च यज्ञादिभि स्तुतं ब्रह्मचर्यमिति यज्ञादीना पुरुषार्थसाधनत्वं गम्यते । सत्यं गम्यते, न त्विह ब्रह्मलोकं प्रति यज्ञादीना साधनत्वमभिप्रेत्य यज्ञादिभिर्ब्रह्मचर्यं स्तूयते । किं तर्हि, तेषा प्रसिद्धं पुरुषार्थसाधनत्वमपेक्ष्य । यथा इंद्रादिभि राजा न तु यत्रेंद्रादीना व्यापारस्तत्रैव राज्ञ इति, तद्वत् ॥

य इमेऽर्णवादयो ब्राह्मलौकिका. संकल्पजाश्च पित्रादयो भोगा, ते किं पार्थिवा आप्याश्च यथेह लोके दृश्यन्ते तद्वदर्णववृक्षपूःस्वर्णमंडपानि, आहोस्विन्मानसप्रत्ययमात्राणीति । किंचात, यदि पार्थिवा आप्याश्च स्थूला. स्युर्हृद्याकाशे समाधानानुपपत्तिः । पुराणे च मनोमयानि ब्रह्मलोके शरीरादीनीति वाक्यं विरुध्येत । "अशोकमहिमम" इत्याद्याश्च श्रुतय. । ननु समुद्राः सरित सरासि वाप्य कूपा यज्ञा वेदा मंत्रादयश्च मूर्तिमन्तो ब्रह्माणमुपतिष्ठन्ते इति मानसत्वे विरुध्येत पुराणस्मृतिः । न । मूर्तिमत्त्वे प्रसिद्धरूपाणामेव तत्र गमनानुपपत्तेः । तस्मात्प्रसिद्धमूर्तिव्यतिरेकेण सागरादीनां मूर्त्यंतरं सागरादिभिरुपात्तं ब्रह्मलोकगंतृ कल्पनीयम् । तुल्यायां च कल्पनायां यथाप्रसिद्धा एव मानस्य आकारवत्यः

पुंस्त्र्याद्या मूर्तयो युक्ताः कल्पयितुं, मानसदेहानुरूप्यसंबंधोपपत्तेः । दृष्टा हि मानस्यः एवाकारवत्यः पुंस्त्र्याद्या मूर्तयः स्वप्ने । ननु ता अनृता एव । 'त इमे सत्याः कामा' इति श्रुतिस्तथा सति विरुध्येत । न । मानसप्रत्ययस्य सत्त्वोपपत्तेः । मानसा हि प्रत्ययाः स्त्रीपुरुषाद्याकाराः स्वप्ने दृश्यन्ते । ननु जाग्रद्वासनारूपाः स्वप्नदृश्या न तु तत्र स्त्र्यादयः स्वप्ने विद्यन्ते । अल्पमिदमुच्यते । जाग्रद्विषया अपि मानसप्रत्ययाभिनिर्वृत्ता एव, सदीक्षाभिनिर्वृत्ततेजोबन्नमयत्वात् जाग्रद्विषयाणाम् । संकल्पमूला हि लोका इति चोक्तं 'समकल्पतां द्यावापृथिवी' इत्यत्र । सर्वश्रुतिषु च प्रत्यगात्मन उत्पत्तिः प्रलयश्च तत्रैव स्थितिश्च 'यथा वा अरा नाभौ' इत्यादिनोच्यते । तस्मान्मानसानां बाह्यानां च विषयाणां इतरेतरकार्यकारणत्वं इष्यते एव बीजांकुरवत । यद्यपि बाह्याः एव मानसाः मानसा एव च बाह्या, नानृतत्वं तेषां कदाचिदपि स्वात्मनि भवति । ननु स्वप्ने दृष्टाः प्रतिबुद्धस्यानृता भवन्ति विषयाः । सत्यमेव । जाग्रद्बोधापेक्षं तु तदनृतत्वं न स्वतः । तथा स्वप्नबोधापेक्षं च जाग्रद्दृष्टविषयानृतत्वं न स्वतः । विशेषाकारमात्रं तु सर्वेषां मिथ्याप्रत्ययनिमित्तमिति वाचारंभणं विकारो नामधेयमनृतं त्रीणि रूपाणीत्येव सत्यम् । तान्यप्याकारविशेषतोऽनृतं स्वतः सन्मात्ररूपतया सत्यम् । प्राक्स्वदात्मप्रतिबोधात्स्वविषयेऽपि सर्वं सत्यमेव स्वप्नदृश्या इवेति न कश्चिद्विरोधः । तस्मान्मानसा एव ब्राह्मलौकिका अरण्याद्यः संकल्पजाश्च पित्राद्यः कामाः । बाह्यविषयभोगवत् अशुद्धिरहितत्वात् शुद्धसत्त्वसंकल्पजन्या इति निरतिशयसुखाः सत्याश्चेश्वराणां भवन्तीत्यर्थः । सत्सत्यात्मप्रतिबोधेऽपि रज्ज्वामिव कल्पिताः सर्पाद्यः सदात्मस्वरूपतामेव प्रतिपद्यन्ते इति सदात्मना सत्या एव भवन्ति ॥ इति पंचमः खंडः ॥ ८.५.—

यस्तु हृदयपुंडरीकगतं यथोक्तगुणविशिष्टं ब्रह्म ब्रह्मचर्यादिसाधनसंपन्नः त्यक्तबाह्यविषयानृततृष्णः सदुपास्ते तस्येयं मूर्धन्यया नाड्या गतिर्वक्तव्येति नाडीखंड आरभ्यते—

अथ या एता हृदयस्य नाड्यस्ताः पिंगलस्याणिम्नाभितिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः पिंगल एष शुक्ल एष नील एष पीत एष लोहितः ॥१॥

अथ या एता वक्ष्यमाणा हृदयस्य पुंडरीकाकारस्य ब्रह्मोपासनस्थानस्य

संबंधिन्यो नाड्यो हृदयमांसपिंडात्सर्वतो विनिसृता आदित्यमंडलादिव रश्मयः ताश्चैताः पिंगलस्य वर्णविशेषविशिष्टस्याणिम्नः सूक्ष्मरसस्य रसेन पूर्णास्तदाकारा एव तिष्ठन्ति वर्तन्त इत्यर्थः। तथा शुक्लस्य नीलस्य पीतस्य लोहितस्य च रसस्य पूर्णा इति सर्वत्राध्याहार्यम्। सौरेण तेजसा पित्ताख्येन पाकाभिनिर्वृत्तेन कफेनाल्पेन संपर्कात्पिंगलं भवति सारं तेज पित्ताख्यम्। तदेव च वातभूयस्त्वान्नीलं भवति। तदेव च कफभूयस्त्वाच्छुक्लम्। कफेन समतायां पीतम्। शोणितबाहुल्येन लोहितम्। वैद्यकाद्वा वर्णविशेषा अन्वेष्टव्या कथं भवन्तीति। श्रुतिस्त्वाह— आदित्यसंबंधादेव तत्तेजसो नाडीष्वनुगतस्यैते वर्णविशेषा इति। कथम्। असौ वा आदित्य पिंगलो वर्णत एष आदित्य. शुक्लोऽप्येष नील एष पीत एष लोहित आदित्य एव॥

तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमं चामुं चैवमेवैता आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीमं चामुं चामुष्मादादित्यात्प्रतायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ताः॥

तस्याध्यात्मं नाडीभि. कथं संबंध इत्यत्र दृष्टान्तमाह— तत्तत्र यथा लोके महान्विस्तीर्णः पंथा महापथ आततो व्याप्त उभौ ग्रामौ गच्छतीमं च संनिहितमामुं च विप्रकृष्टं दूरस्थमेवं यथा दृष्टान्तो महापथ उभौ ग्रामौ प्रविष्ट, एवमेवैता आदित्यस्य रश्मय उभौ लोकावमुं चादित्यमंडलं, इमं च पुरुषं, गच्छन्त्युभयत्र प्रविष्टा। यथा महापथः। कथम्। अमुष्मादादित्यमंडलात्प्रतायन्ते संतता भवन्ति। ता अध्यात्ममासु पिंगलादिवर्णासु यथोक्तासु नाडीषु सृप्ता गता प्रविष्टा इत्यर्थ.। आभ्यो नाडीभ्यः प्रतायन्ते प्रवृत्ताः संतानभूता. सत्यस्तेऽमुष्मिन। रश्मीनामुभयलिंगत्वात्ते इत्युच्यते॥

तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्यासु तदा नाडीषु सृप्तो भवति तं न कश्चन पाप्मा स्पृशति तेजसा हि तदा संपन्नो भवति॥

तत्तत्रैवं सति यत्र यस्मिन्काले एतत्स्वपनमयं जीवः सुप्तो भवति। स्वापस्य द्विप्रकारत्वाद्विशेषणं समस्त इति। उपसंहृतसर्वकरणवृत्तिरित्येतत्। अतो बाह्यविषयसंपर्कजनितकालुष्याभावात् सम्यक् प्रसन्नः संप्रसन्नो भवति। अत एव स्वप्नं विषयाकाराभासं मानसं स्वप्नप्रत्ययं न विजानाति नानुभवतीत्यर्थः। यदैवं सुप्तो भवत्यासु सौरतेजःपूर्णासु यथोक्तासु नाडीषु तदा सृप्तः

प्रविष्टो नाडीभिर्द्वारभूताभिः हृदयाकाशं गतो भवतीत्यर्थः । न ह्यन्यत्र सत्संपत्तेः स्वप्नादर्शनमस्तीति सामर्थ्यान्नाडीष्विति सप्तमी तृतीयया परिणम्यते । तं सता संपन्नं न कथन न कश्चिदपि धर्माधर्मरूपः पाप्मा स्पृशतीति स्वरूपावस्थितत्वात्तदा आत्मनः । देहेंद्रियविशिष्टं हि सुखदुःखकार्यप्रदानेन पाप्मा स्पृशतीति, नतु सत्संपन्नं स्वरूपावस्थं कश्चिदपि पाप्मा स्प्रष्टुमुत्सहेत । अविषयत्वात् । अन्यो ह्यन्यस्य विषयो भवति न त्वन्यत्वं कैनचित्कुतश्चिदपि सत्संपन्नस्य । स्वरूपप्रच्यवनं त्वात्मनो जाग्रत्स्वप्नावस्था प्रति गमनं बाह्यविषयप्रतिबोधो अविद्याकामकर्मबीजस्य ब्रह्मविद्याहुताशादाहानिमित्तमित्येवोचाम षष्ठ एव । तदिहापि प्रत्येतव्यम् । यदैवं सुप्तः सौरेण तेजसा हि नाड्यंतर्गतेन सर्वतः संपन्नो व्याप्तो भवति । अतो विशेषेण चक्षुरादिनाडीद्वारैः बाह्यविषयभोगायाप्रसृतानि करणान्यस्य तदा भवन्ति । तस्मादयं करणानां निरोधात्स्वात्मन्येवावस्थितः स्वप्नं न विजानातीति युक्तम् ॥

अथ यत्रैतदबलिमानं नीतो भवति तमभित आसीना आहुर्जानासि मां जानासि मामिति स यावदस्माच्छरीरादनुत्क्रान्तो भवति तावज्जानाति ॥४॥

तत्रैवं सति अथ यत्र यस्मिन्काले ऽबलिमानमबलभावं देहस्य रोगादिनिमित्तं जरादिनिमित्तं वा कृशीभावमेतन्नयनं नीतः प्रापितो देवदत्तो भवति मुमूर्षुर्यदा भवतीत्यर्थः । तमभितः सर्वतो वेष्टयित्वासीना ज्ञातय आहुर्जानासि मा तव पुत्रं जानासि मां पितरं चेत्यादि । स मुमूर्षुर्यावदस्माच्छरीरादनुत्क्रान्तोऽनिर्गतो भवति तावत्पुत्रादीञ्जानाति ॥

अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते स ओमिति वा होद्वा मीयते स यावत्क्षिप्येन्मनस्तावदादित्यं गच्छत्येतद्वै खलु लोकद्वारं विदुषां प्रपदनं निरोधोऽविदुषाम् ॥५॥

अथ यत्र यदा, एतत्क्रियाविशेषणमिति, अस्माच्छरीरादुत्क्रामति । अथ तदैतैरेव यथोक्ताभी रश्मिभिरूर्ध्वमाक्रमते यथाकर्मजितं लोकं प्रत्यविद्वान् । इतरस्तु विद्वान्यथोक्तसाधनसंपन्नः स ओमित्योंकारेण आत्मानं ध्यायन्यथापूर्वं वा हैव, उद्वोर्ध्वं वा विद्वांश्चेत् इतरस्तिर्यङ्वेत्यभिप्रायः । मीयते प्रमीयते गच्छतीत्यर्थः । स विद्वानुत्क्रमिष्यन्यावत्क्षिप्येन्मनो यावता कालेन मनसः क्षेपः स्या-

त्तावता कालेनादित्यं गच्छति प्राप्नोति क्षिप्रं गच्छतीत्यर्थः । न तु तावतैव कालेनेति विवक्षितम् । किमर्थमादित्यं गच्छतीत्युच्यते— एतद्वै खलु प्रसिद्धं ब्रह्मलोकस्य द्वारं य आदित्यः, तेन द्वारभूतेन ब्रह्मलोकं गच्छति विद्वान् । अतो विदुषां प्रपदनं, प्रपद्यते ब्रह्मलोकमनेन द्वारेणेति प्रपदनम् । निरोधनं निरोधोऽस्मादादित्यादविदुषा भवतीति निरोध । सौरेण तेजसा देह एव निरुद्धा सन्तो मूर्धन्यया नाड्या नोत्क्रमन्त एवेत्यर्थ. । 'विष्वङ्ङन्या' इति श्रौकात ॥

तदेष श्लोक । शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्त्युत्क्रमणे भवन्ति ॥६॥ इति षष्ठ खंडः ॥

तदेतस्मिन्यथोक्तेऽर्थे एष श्लोको मंत्रो भवति । शतं चैका चैकोत्तरशतं नाड्यो हृदयस्य मांसपिंडभूतस्य संबंधिन्यः प्रधानतो भवन्ति । आनंत्याद्देहनाडीनाम् । तासामेका मूर्धानमभिनिःसृता विनिर्गता । तयोर्ध्वमायन्गच्छन्नमृतत्वममृतभावमेति । विष्वङनानागतयस्त्वर्यग्विसर्पिण्य ऊर्ध्वगाश्चान्या नाड्यो भवन्ति संसारगमनद्वारभूता , न त्वमृतत्वाय । किं तर्हि, उत्क्रमण एवोत्क्रान्त्यर्थमेव भवन्तीत्यर्थ । द्विरभ्यास प्रकरणसमाप्त्यर्थ ॥ इति षष्ठ खंड ॥ ८ ६ —

'अथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्म' इत्युक्तम । तत्र कोऽसौ संप्रसाद , कथं वा तस्याधिगमो यथा सोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते ? येन स्वरूपेणाभिनिष्पद्यते स किंलक्षण आत्मा ? संप्रसादस्य च देहसंबंधीनि पररूपाणि ततो यदन्यत्कथंस्वरूपम ? इति एतेऽर्था वक्तव्या इत्युत्तरो ग्रंथ आरभ्यते । आख्यायिका तु विद्याग्रहणसंप्रदानविधिप्रदर्शनार्था विद्यास्तुत्यर्था च, राजसेवितं पानीयमितिवत् ।

य आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच ॥१॥

य आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकाम. सत्यसंकल्पः । यस्योपासनायोपलब्ध्यर्थं हृदयपुंडरीकमभिहितं यस्मि-

न्कामा समाहिता. सत्या अनृतापिधाना, यदुपासनसहभावि ब्रह्मचर्य साधनमुक्तं उपासनफलभूतकामप्रतिपत्तये च मूर्धन्यया नाड्या गतिराभिहिता, सोऽन्वेष्टव्यः शास्त्राचार्योपदेशैर्ज्ञातव्य· स विशेषेण ज्ञातुमेष्टव्यो विजिज्ञासितव्य· स्वसंवेद्यतामापादयितव्य । किं तस्यान्वेषणाद्विजिज्ञासनाच्च स्यादित्युच्यते— स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान यस्तमात्मानं यथोक्तिन प्रकारेण शास्त्राचार्योपदेशेनान्विष्य विजानाति स्वसंवेद्यतामापादयति । तस्यैतत्सर्वलोककामावाप्ति· सर्वात्मता फलं भवतीति ह किल प्रजापतिरुवाच । अन्वेष्टव्यो विजिज्ञासितव्य इति चैष नियमाविधिरेव नापूर्वविधि । एवमन्वेष्टव्यो विजिज्ञासितव्य इत्यर्थः । दृष्टार्थत्वादन्वेषणविजिज्ञासनयो । दृष्टार्थत्वं च दर्शयिष्यति 'नाहमत्र भोग्यं पश्यामि' इत्यनेनासकृत् । परमरूपेण च देहादिधर्मैः अवगम्यमानस्यात्मन. स्वरूपाधिगमे विपरीताधिगमनिवृत्तिर्दृष्टं फलमिति नियमार्थतैवास्य विधेर्युक्ता, न त्वग्निहोत्रादीनामिव अपूर्वविधित्वमिह संभवति ॥

तद्धोभये देवासुरा अनुबुबुधिरे ते होचुर्हन्त तमात्मानमन्विच्छामो यमात्मानमन्विष्य सर्वांश्च लोकानाप्नोति सर्वांश्च कामानितींद्रो हैव देवानामभिप्रवव्राज विरोचनोऽसुराणां तौ हासंविदानावेव समित्पाणी प्रजापतिसकाशमाजग्मतुः ॥२॥

तद्धोभये इत्याद्याख्यायिकाप्रयोजनमुक्तम् । तद्ध किल प्रजापतेर्वचनं उभये देवासुरा देवाश्चासुराश्च देवासुरा अनु परंपरागतं स्वकर्णगोचरापन्नमनुबुबुधिरेऽनुबुद्धवन्त । ते चैतत्प्रजापतिवचो बुद्ध्वा किमकुर्वन्नित्युच्यते—ते होचुरुक्तवन्तोऽन्योन्यं देवा· स्वपरिषद्यसुराश्च, हंत यद्यनुमतिर्भवता प्रजापतिनोक्तं तमात्मानमन्विच्छामोऽन्वेषणं कुर्मो यमात्मानमन्विष्य सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् । इत्युक्त्वेंद्रो हैव राजैव स्वयं देवानामितरान्देवाश्च भोगपरिच्छदं च सर्वं स्थापयित्वा शरीरमात्रेणैव प्रजापतिं प्रत्यभिप्रवव्राज प्रगतवांस्तथा विरोचनोऽसुराणाम् । विनयेन गुरवोऽभिगंतव्या इत्येतदृर्शयति । त्रैलोक्यराज्याच्च गुरुतरा विद्येति । यतो देवासुरराजौ महार्हभोगार्हौ सन्तौ तथा गुरुमन्युपगतवन्तौ । तौ ह किलासंविदानावेवान्योन्यं संविदमकुर्वाणौ विद्याफलं प्रत्यन्योन्यमीर्ष्यां दर्शयन्तौ समित्पाणी समिद्धारहस्तौ प्रजापतिसकाशमाजग्मतुरागतवन्तौ ॥

तौ ह द्वात्रिंशतं वर्षाणि ब्रह्मचर्यमूषतुस्तौ ह प्रजापतिरुवाच किमिच्छन्तावावास्तमिति तौ होचतुर्य आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानमनुविद्य विजानातीति भगवतो वचो वेदयन्ते तमिच्छन्तावावास्तमिति ॥३॥

तौ ह गत्वा द्वात्रिंशतं वर्षाणि शुश्रूषापरौ भूत्वा ब्रह्मचर्यमूषतुरुषितवन्तौ। अभिप्रायज्ञः प्रजापतिस्तावुवाच— किमिच्छन्तौ किं प्रयोजनमभिप्रेत्य इच्छन्तावावास्तमुषितवन्तौ युवामिति । इत्युक्तौ तौ होचतुः— य आत्मेत्यादि भगवतो वचो वेदयन्ते शिष्टा अतस्तमात्मान ज्ञातुमिच्छन्तावावास्तमिति । यद्यपि प्राक्प्रजापतेः समीपागमनादन्योन्यमार्ष्यायुक्तावभूता तथापि विद्याप्राप्तिप्रयोजनगौरवात् त्यक्तरागद्वेषमोहेर्ष्यादिदोषावेव भूत्वोपतुर्ब्रह्मचर्यं प्रजापतौ । तेनेदं प्रख्यापितमात्मविद्यागौरवम ॥

तौ ह प्रजापतिरुवाच य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेत्यथ योऽयं भगवोऽप्सु परिख्यायते यश्चायमादर्शे कतम एष इत्येष उ एवैषु सर्वेष्वंतेषु परिख्यायत इति होवाच ॥४॥ इति सप्तमः खंडः ॥

तावेवं तपस्विनौ शुद्धकल्मषौ योग्यावुपलक्ष्य प्रजापतिरुवाच ह— य एषोऽक्षिणि पुरुषो निवृत्तचक्षुर्भिर्मृदितकषायैर्दृश्यते योगिभिर्द्रष्टा, एष आत्मापहतपाप्मादिगुणो, यमवोचं पुराहं, यद्विज्ञानात्सर्वलोककामावाप्तिः, एतदमृतं भूमाख्यमत एवाभयं, अत एव ब्रह्म बृद्धतममिति । अथैतत्प्रजापतिनोक्तमक्षिणि पुरुषो दृश्यत इति वचः श्रुत्वा छायारूपं पुरुषं जगृहतुः । गृहीत्वा च दर्ढीकरणाय प्रजापतिं पृष्टवन्तौ । अथ योऽयं हे भगवोऽप्सु परिख्यायते परि समंताज्ज्ञायते, यश्चायमादर्शे आत्मन प्रतिबिंबाकार परिख्यायते खड्गादौ च, कतम एष एषां भगवद्भिरुक्तः, किंवैक एव सर्वेष्विति । एवं पृष्ट प्रजापतिरुवाच— एष उ एव यश्चक्षुषि द्रष्टा मयोक्त इति । एतन्मनसि कृत्वैषु सर्वेष्वंतेषु मध्येषु परिख्यायत इति होवाच ॥

ननु कथं युक्तं शिष्ययोर्विपरीतग्रहणमनुज्ञातुं प्रजापतेः विगतदोषस्याचार्यस्य सतः । सत्यमेवं, नानुज्ञातम् । कथम् , आत्मन्यध्यारोपितपांडित्यमह-

त्त्वबोद्धृत्वाँ हि इंद्रविरोचनौ तथैव च प्रथितौ लोके । तौ यदि प्रजापतिना मूढौ युवा विपरीतग्राहिणावित्युक्तौ स्यातां ततस्तयोश्चित्ते दुःखं स्यात् तज्जनिताच्च चित्तावसादात्पुनःप्रश्नश्रवणग्रहणावधारणं प्रत्युत्साहविघातः स्यात् । अतो रक्षणीयौ शिष्याविति मन्यते प्रजापतिः । गृह्णाना तावत्तदुदशरावदृष्टान्तेन अपनेष्यामीति च । ननु न युक्तमेष उ एवेत्यनृतं वक्तुम् । न चानुतमुक्तम् । कथम् । आत्मनोक्तोऽक्षिपुरुषो मनसि संनिहिततर शिष्यगृहीताच्छायात्मनः । सर्वेषा चाभ्यंतरः 'सर्वान्तरः' इति श्रुतेः । तमेवावोचदेष उ एवेति । अतो न अनृतमुक्तं प्रजापतिना । तथा च तयोर्विपरीतग्रहणानिवृत्त्यर्थ ह्याह ॥ ८.७.—

उदशराव आत्मानमवेक्ष्य यदात्मनो न विजानीथस्तन्मे ब्रूतमिति तौ होदशरावेऽवेक्षांचक्राते तौ ह प्रजापतिरुवाच किं पश्यथ इति तौ होचतुः सर्वमेवेदमावां भगव आत्मानं पश्याव आ लोमभ्य आ नखेभ्यः प्रतिरूपमिति ॥१॥

उदशरावे उदकपूर्णे शरावादौ आत्मानमवेक्ष्यानंतरं यत्तत्रात्मानं पश्यन्तौ न विजानीथस्तन्मे मम ब्रूतमाचक्षीथामित्युक्तौ तौ ह तथैव उदशरावेऽवेक्षाचक्राते अवेक्षणं चक्रतुः । तथा कृतवन्तौ तौ ह प्रजापतिरुवाच किं पश्यथ इति । ननु तन्मे ब्रूतमित्युक्ताभ्यामुदशरावेऽवेक्षणं कृत्वा प्रजापतये न निवेदितमिदमावाभ्यां न विदितमिति । अनिवेदिते चाज्ञानहेतौ ह प्रजापतिरुवाच किं पश्यथ इति, तत्र कोऽभिप्राय इति । उच्यते— नैव तयोरिदमावयोरविदितमित्याशंकाऽभूत् छायात्मन्यात्मप्रत्ययो निश्चित एवासीत् । येन वक्ष्यति 'तौ ह शान्तहृदयौ प्रवव्रजतु.' इति । न ह्यनिश्चितेऽभिप्रतार्थे प्रशान्तहृदयत्वमुपपद्यते । तेन नोचतुरिदमावाभ्यामविदितमिति । विपरीतग्राहिणौ च शिष्यावनुपेक्षणीयाविति स्वयमेव पप्रच्छ किं पश्यथ इति । विपरीतनिश्चयापनयाय च वक्ष्यति साध्वलंकृतौ इत्येवमादि । तौ होचतुः— सर्वमेवेदमावा भगव आत्मानं पश्याव आ लोमभ्य. आ नखेभ्य प्रतिरूपमिति । यथैवावां हे भगवो लोमनखादिमन्तौ स्व एवमेवेद लोमनखादिसहितं आवयोः प्रतिरूपमुदशरावे पश्याव इति ॥

तौ ह प्रजापतिरुवाच साध्वलंकृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावेऽवेक्षेथामिति तौ ह साध्वलंकृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावेऽवेक्षां-

चक्राते तौ ह प्रजापतिरुवाच किं पश्यथ इति ॥२॥

तौ ह पुनः प्रजापतिरुवाच च्छायात्मनिश्चयापनयाय— साध्वलंकृतौ यथा स्वगृहे सुवसनौ महार्हवस्त्रपरिधानौ परिष्कृतौ च्छिन्नलोमनखौ च भूत्वा उदशरावे पुनरीक्षेथामिति । इह च नादिदेश यदज्ञातं तन्मे प्रब्रूतमिति । कथं पुनरनेन साध्वलंकारादि कृत्वोदशरावेऽवेक्षणेन तयोरच्छायात्मग्रहोऽपनीतः स्यात् । साध्वलंकारसुवसनादीनामागंतुकाना छायाकरत्वमुदशरावे यथा शरीरसंबद्धानामेवं शरीरस्यापि च्छायाकरत्वं पूर्व बभूवेति गम्यते । शरीरैकदेशाना च लोमनखादीना नित्यत्वेनाभिप्रेतानामखंडिताना छायाकरत्वं पूर्वमासात् । छिन्नेषु च नैव लोमनखादिच्छाया दृश्यतेऽतो लोमनखादिवच्छरीरस्याप्यागमापायित्वं सिद्धमित्युदशरावादौ दृश्यमानस्य तन्निमित्तस्य च देहस्यानात्मत्वं सिद्धम् । उदशरावादौ च्छायाकरत्वाद्देहसंबद्धालंकारादिवत् । न केवलमेतावदेतेन यावत्किंचिदात्मीयत्वाभिमतं सुखदुःखरागद्वेषमोहादि च कादाचित्कत्वान्नखलोमादिवदनात्मेति प्रत्येतव्यम् । एवमशेषमिथ्याग्रहापनयनिमित्तं साध्वलंकारादिदृष्टान्ते प्रजापतिनोक्ते श्रुत्वा तथा कृतवतोरपि च्छायात्मविपरीतग्रहो नापजगाम यस्मात्तस्मात्स्वदोषेणैव केनचित्प्रतिबद्धविवेकविज्ञानौ इंद्रविरोचनावभूतामिति गम्यते । तौ पूर्ववदेव दृढनिश्चयौ पप्रच्छ किं पश्यथ इति ॥

तौ होचतुर्यथैवेदमावां भगवः साध्वलंकृतौ सुवसनौ परिष्कृतौ स्व एवमेवेमौ भगव साध्वलंकृतौ सुवसनौ परिष्कृतावित्येष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति तौ ह शान्तहृदयौ प्रव्रव्रजतु ॥३॥

तौ तथैव प्रतिपन्नौ यथैवेदमिति पूर्ववत्, यथा साध्वलंकारादिविशिष्टौ आवां स्वः एवमेवेमौ छायात्मानाविति सुतरा विपरीतनिश्चयौ बभूवतुः । यस्यात्मनो लक्षण 'य आत्मापहतपाप्मा' इत्युक्त्वा पुनस्तद्विशेषमन्विष्यमाणयोः 'य एषोऽक्षिणि पुरुषो दृश्येत' इति साक्षादात्मनि निर्दिष्टे तद्विपरीतग्रहापनयाय उदशरावसाध्वलंकारदृष्टान्तेऽप्यभिहिते आत्मस्वरूपबोधाद्विपरीतग्रहो नापगतः । अतः स्वदोषेण केनचित्प्रतिबद्धविवेकविज्ञानसामर्थ्यादिति मत्वा यथाभिप्रेतमेवात्मानं मनसि निधायैष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति प्रजापतिः पूर्ववत् । न तु तदभिप्रेतमात्मानम् । 'य आत्मा' इत्याद्यात्मलक्षणश्रवणेनाक्षिपुरुषश्रुत्या चोदशरावाद्युपपत्त्या च संस्कृतौ तावत् । मद्वचनं सर्वं पुनः पुनः स्मरतोः

प्रतिबंधक्षयाच्च स्वयमेवात्मविषये विवेको भविष्यतीति मन्वान पुनर्ब्रह्मचर्यादिश च तयोश्चित्तदुःखोत्पत्ति परिजिहार्षन्कृतार्थबुद्धितया गच्छन्तावपुपेक्षितवान्प्रजापति । तौ ह इंद्रविरोचनौ शान्तहृदयौ तुष्टहृदयौ कृतार्थबुद्धी इत्यर्थ । न तु शम एव, शमश्चतयोर्जातो विपरीतग्रहो विगतोऽभविष्यत । प्रवव्रजतुर्गतवन्तौ ॥

तौ हान्वीक्ष्य प्रजापतिरुवाचानुपलभ्यात्मानमननुविद्य व्रजतो यतर एतदुपनिषदो भविष्यन्ति देवा वासुरा वा ते पराभविष्यन्तीति स ह शान्तहृदय एव विरोचनोऽसुराञ्जगाम तेभ्यो हैतामुपनिषदं प्रोवाचात्मैवेह महय्य आत्मा परिचर्य आत्मानमेवेह महयन्नात्मानं परिचरन्नुभौ लोकावाप्नोतीमं चामुं चेति ॥४॥

एवं तयोर्गतयोरिंद्रविरोचनयो राज्ञोर्भोगासक्तयो यथोक्तविस्मरणं स्यादित्याशंक्याप्रत्यक्षं प्रत्यक्षवचनेन च चित्तदुःखं परिजिहीर्षुस्तौ दूरं गच्छन्तावन्वीक्ष्य 'य आत्मापहतपाप्मा' इत्यादिवचनवदेतदध्ययनयो श्रवणगोचरत्वमेष्यतीति मत्वोवाच प्रजापति — अनुपलभ्य यथोक्तलक्षणमात्मानमननुविद्य स्वात्मप्रत्यक्षं चाकृत्वा विपरीतनिश्चयौ च भूत्वा इंद्रविरोचनावेतौ व्रजतो गच्छेयातां । अतो यतर देवा वासुरा वा कि विशेषेण, एतदुपनिषद आभ्यां या गृहीता आत्मविद्या सेयमुपनिषद्येषा देवानामसुराणां वा न एतदुपनिषद एवंविज्ञाना एतन्निश्चया भविष्यन्तीत्यर्थ । ते किं पराभविष्यन्ति श्रेयोमार्गात्पराभूता बहिर्भूता विनष्टा भविष्यन्तीत्यर्थ । स्वगृहं गच्छतो सुरासुरराजयोर्योऽसुरराजः स ह शान्तहृदय एव सन्विरोचनोऽसुराञ्जगाम । गत्वा च तेभ्योऽसुरेभ्य शरीरात्मबुद्धिर्या उपनिषत्तामेतामुपनिषदं प्रोवाचोक्तवान । देहमात्रमेवात्मा पित्रोक्तः इति । तस्मादात्मैव देह इह लोके महय्य पूजनीयस्तथा परिचर्य परिचरणीयः, तथात्मानमेवेह लोके देहं महयन्परिचरंश्चोभौ लोकावाप्नोतीमं चामुं च । इहलोकपरलोकयोरेव सर्वे लोका कामाश्चान्तर्भवन्तीति राज्ञोऽभिप्राय ॥

तस्मादप्यद्येहाददानमश्रद्दधानमयजमानमाहुरासुरो बतेत्यसुराणां ह्येषोपनिषत्प्रेतस्य शरीरं भिक्षया वसनेनालंकारेणेति संस्कुर्वन्त्येतेन ह्यमुं लोकं जेष्यन्तो मन्यन्ते ॥५॥ इति अष्टमः खंडः ॥

तस्मात्तत्संप्रदायोऽद्याप्यनुवर्तत इतीह लोकेऽददानं दानमकुर्वाणमविभागशीलमश्रद्दधानं सत्कार्येषु श्रद्धारहितं यथाशक्त्ययजमानमयजनस्वभावमाहुरा-

सुरः खल्वयं यत एवंस्वभावो बतेति खिद्यमाना आहुः शिष्टाः। असुराणां हि यस्मादश्रद्दधानतादिलक्षणेषोपनिषत्। तयोपनिषदा संस्कृताः सन्तः प्रेतस्य शरीरं कुणपं भिक्षया गंधमाल्यान्नादिलक्षणया वसनेन वस्त्रादिनाच्छादनादिप्रकारेणालंकारेण ध्वजपताकादिकरणेनेत्येवं संस्कुर्वन्ति। एतेन कुणपसंस्कारेणामुं प्रेत्य प्रतिपत्तव्यं लोकं जेष्यन्तो मन्यन्ते ॥ इति अष्टमः खंडः ॥ ८.८.—

अथ हेंद्रोऽप्राप्यैव देवानेतद्भयं ददर्श यथैव खल्वयमस्मिंछरीरे साध्वलंकृते साध्वलंकृतो भवति सुवसने सुवसनः परिष्कृते परिष्कृत एवमेवायमस्मिन्नंधेऽन्धो भवति स्रामे स्रामः परिवृक्णे परिवृक्णोऽस्यैव शरीरस्य नाशमन्वेष नश्यति नाहमत्र भोग्यं पश्यामीति ॥१॥

अथ ह किलेंद्रोऽप्राप्यैव देवान्दैव्याऽकौर्यादिसंपदा युक्तत्वात् गुरोर्वचनं पुनः पुनः स्मरन्नेव गच्छन्नेतद्वक्ष्यमाणं भयं स्वात्मग्रहणनिमित्तं ददर्श दृष्टवान्। उदशरावदृष्टान्तेन प्रजापतिना यदर्थो न्याय उक्तस्तदेकदेशो मघवत. प्रत्यभात् बुद्धौ, येन च्छायात्मग्रहणे दोषं ददर्श। कथम्। यथैव खल्वयमस्मिञ्छरीरे साध्वलंकृते छायात्मापि साध्वलंकृतो भवति सुवसने च सुवसनः परिष्कृते परिष्कृतो यथा नखलोमादिदेहावयवापगमे छायात्मापि परिष्कृतो भवति नखलोमादिरहितो भवति, एवमेवायं छायात्माप्यस्मिञ्छरीरे नखलोमादिभिर्देहावयवत्वस्य तुल्यत्वादंधे चक्षुषोऽपगमेऽन्धो भवति स्रामे स्रामः। स्रामः किलैकनेत्रः तस्याधत्वेन गतत्वात्। चक्षुर्नासिका वा यस्य सदा स्रवति स स्रामः। परिवृक्णश्छिन्नहस्तश्छिन्नपादो वा। स्रामे परिवृक्णे वा देहे छायात्मापि तथा भवति। तथास्य देहस्य नाशमन्वेष नश्यति। अतः नाहमत्र अस्मिंश्छायात्मदर्शने देहात्मदर्शने वा भोग्यं फलं पश्यामीति ॥

स समित्पाणिः पुनरेयाय तं ह प्रजापतिरुवाच मघवन्यच्छांतहृदयः प्राव्राजीः सार्ध विरोचनेन किमिच्छन्पुनरागम इति स होवाच यथैव खल्वयं भगवोऽस्मिञ्छरीरे साध्वलंकृते साध्वलंकृतो भवति सुवसने सुवसनः परिष्कृते परिष्कृत एवमेवायमस्मिन्नंधेऽन्धो भवति स्रामे स्रामः परिवृक्णे परिवृक्णोऽस्यैव शरीरस्य नाशमन्वेष नश्यति नाहमत्र भोग्यं पश्यामीति ॥२॥

एवं दोषं देहच्छायात्मदर्शनेऽध्यवस्य स समित्पाणिर्ब्रह्मचर्यं वस्तुं पुनरेयाय।

तं ह प्रजापतिरुवाच—मघवन्यच्छान्तहृदय. प्राव्राजीः प्रगतवानसि विरोचनेन सार्धं किमिच्छन्पुनरागम इति । विजानन्नपि पुनः पप्रच्छ इंद्राभिप्रायाभिव्यक्तये 'यद्वेत्थ तेन मोपसीद' इति यद्वत् । तथा च स्वाभिप्रायं प्रकटमकरोद्यथैव खल्वयमित्यादि । एवमेवेति चान्वमोदत प्रजापतिः ॥

ननु तुल्येऽक्षिपुरुषश्रवणे देहच्छायाभिद्रोऽग्रहीदात्मेति देहमेव तु विरोचन· । तत्किनिमित्तम् ? तत्र मन्यंत । यथेंद्रस्य उदशरावादिप्रजापतिवचनं स्मरतो देवानप्राप्तस्यैव आचार्योक्तबुद्धया छायात्मग्रहणं तत्र दोषदर्शनं चाभूत् । न तथा विरोचनस्य कि तर्हि, देह एवात्मदर्शनं, नापि तत्र दोषदर्शनं बभूव । तद्वदेव विद्याग्रहणसामर्थ्यप्रतिबंधदोषाल्पत्वबहुत्वापेक्षं इंद्रविरोचनयोश्छायात्मदेहयोर्ग्रहणम् । इंद्रोऽल्पदोषत्वात् 'दृश्यते' इति श्रुत्यर्थमेव श्रद्दधानतया जग्राह, इतरश्छायानिमित्तं देहं हित्वा श्रुत्यर्थं लक्षणया जग्राह प्रजापतिनोक्तोऽयमिति, दोषभूयस्त्वात् । यथा किल नीलानीलयोरादर्शे दृश्यमानयोर्वाससोर्यन्नीलं तन्महार्हमिति च्छायानिमित्तं वास एवोच्यते न च्छाया तद्वदिति विरोचनाभिप्रायः । स्वचित्तगुणदोषवशादेव हि शब्दार्थावधारणं तुल्येऽपि श्रवणे ख्यापितं 'दाम्यत दत्त दयध्वं' इति दकारमात्रश्रवणात् श्रुत्यंतरे । निमित्तान्यपि तदनुगुणान्येव सहकारीणि भवन्ति ॥

एवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोऽनुव्याख्यास्यामि वसापराणि द्वात्रिंशतं वर्षाणीति स हापराणि द्वात्रिंशतं वर्षाण्युवास तस्मै होवाच ॥३॥ इति नवमः खंडः ॥

एवमेवैष मघवन्सम्यक्त्वयाऽवगतं, न च्छायात्मा, इत्युवाच प्रजापतिः । यो मयोक्त आत्मा प्रकृत एतमेवात्मानं तु ते भूय· पूर्वं व्याख्यातमप्यनुव्याख्यास्यामि । यस्मात्सकृद्व्याख्यातं दोषरहितानामवधारणविषयं प्राप्तमपि नाग्रहीः, अतः केनचिद्दोषेण प्रतिबद्धग्रहणसामर्थ्यस्त्वम् । अतस्तत्क्षपणाय वसापराणि द्वात्रिंशतं वर्षाणीत्युक्त्वा तथोषितवते क्षपितदोषाय तस्मै होवाच ॥ इति नवमः खंडः ॥ ८.९.—

य एष स्वप्ने महीयमानश्चरत्येष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति स ह शान्तहृदयः प्रवव्राज स हाप्राप्यैव देवानेतद्धयं ददर्श तद्यद्यपीदं शरीरमंधं भवत्यनंधः स भवति यदि स्राममस्रामो नैवैषोऽस्य दोषेण

दुष्यति ॥१॥

य आत्मापहतपाप्मादिलक्षणो 'य एषोऽक्षिणि' इत्यादिना व्याख्यात एष स॰ । कोऽसौ ? य॰ स्वप्ने महीयमान॰ स्त्र्यादिभिः पूज्यमानश्चरति अनेकविधान्स्वप्नभोगाननुभवतीत्यर्थ॰ । एष आत्मेति होवाचेत्यादि समानम् । स हैवमुक्त इंद्र शान्तहृदय॰ प्रवव्राज । स ह्याप्यैव देवान्पूर्ववदात्मन्नप्यात्मनि भयं ददर्श । कथम् । तदिदं शरीरं यद्यप्यंधं भवति, स्वप्नात्मा योऽनंध॰ स भवति । यदि स्वाममिदं शरीरमस्वामश्च स भवति । नैवैष स्वप्नात्मास्य देहस्य दोषेण दुष्यति ॥

न वधेनास्य हन्यते नास्य स्वाम्येन स्वामो घ्नन्ति त्वेवैनं विच्छादयन्तीवाप्रियवेत्तेव भवत्यपि रोदितीव नाहमत्र भोग्यं पश्यामीति ॥२॥ स समित्पाणि पुनरेयाय तं ह प्रजापतिरुवाच मघवन्यच्छातहृदयः प्राव्राजीः किमिच्छन्पुनरागम इति स होवाच तद्यद्यपीदं भगव शरीरमंधं भवत्यनंधः स भवति यदि स्वाममस्वामो नैवैषोऽस्य दोषेण दुष्यति ॥३॥ न वधेनास्य हन्यते नास्य स्वाम्येन स्वामो घ्नन्ति त्वेवैन विच्छादयन्तीवाप्रियवेत्तेव भवत्यपि रोदितीव नाहमत्र भोग्यं पश्यामीत्येवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोऽनुव्याख्यास्यामि वसापराणि द्वात्रिंशतं वर्षाणीति स हापराणि द्वात्रिंशतं वर्षाण्युवास तस्मै होवाच ॥४॥ इति दशम॰ खंड॰ ॥

नाप्यस्य वधेन स हन्यते छायात्मवच्च चास्य स्वाम्येन स्वाम स्वप्नात्मा भवति । यदध्यायादौ आगममात्रेणोपन्यस्तं 'नास्य जरयैतज्जीर्यति' इत्यादि तदिह न्यायेनोपपादयितुमुपन्यस्तम् । न तावदयं छायात्मवद्देहदोषयुक्त किंतु घ्नन्ति त्वेवैनम । एवशब्द इवार्थे । घ्नन्तीवैनं केचनेति द्रष्टव्यम । न तु घ्नन्त्येवेति । उत्तरेषु सर्वेष्विवशब्ददर्शनात् । नास्य वधेन हन्यत इति विशेषणात् घ्नन्ति त्वेवेति चेत् । नैवम । प्रजापतिं प्रमाणीकुर्वतोऽनृतवादित्वापादनानुपपत्तेः । 'एतदमृतं' इत्येतत्प्रजापतिवचनं कथं मृषा कुर्यादिद्रस्तं प्रमाणीकुर्वन । ननु च्छायापुरुषे प्रजापतिनोक्ते 'अस्य शरीरस्य नाशमन्वेष नश्यति' इति दोषमभ्यधास्तथेहापि स्यात् । नैवम । कस्मात् ? 'य एषोऽक्षिणि पुरुषो दृश्यते' इति न च्छायात्मा प्रजापतिनोक्त इति मन्यते मघवान् । कथम । अपहतपाप्मादिलक्षणे पृष्टे यदि च्छायात्मा प्रजापतिनोक्त इति मन्यते, तदा कथं प्रजापतिं प्रमाणी-

कृत्य पुन श्रवणाय समित्पाणिर्गच्छेत्। जगाम च। तस्मान्न च्छायात्मा प्रजापतिनोक्त इति मन्यते। तथाच व्याख्यातं द्रष्टाक्षिणि दृश्यत इति। तथा विच्छादयन्तीव विद्रावयन्तीव, तथाच पुत्रादिमरणनिमित्तमप्रियवेत्तेव भवति। अपि च स्वयमपि रोदितीव। नन्वप्रियं वेत्त्येव, कथं वेत्तेवेति। उच्यते— नामृताभयत्ववचनानुपपत्ते.। 'ध्यायतीव' इति च श्रुत्यंतरात्। ननु प्रत्यक्षविरोध इति चेत्। न। शरीरात्मत्वप्रत्यक्षवद्भ्रान्तिसंभवात्। तिष्ठतु तावदप्रियवेत्तेव न वेति। नाहमत्र भोग्यं पश्यामि। स्वप्नात्मज्ञानेऽपीष्टं फलं नोपलभे इत्यभिप्रायः। एवमेवैष तवाभिप्रायेणेति वाक्यशेष। आत्मनोऽमृताभयगुणवत्त्वस्य अभिप्रेतत्वात्। द्विरुक्तमपि न्यायतो मया यथावन्नावधार्यति। तस्मात्पूर्ववदभ्याद्यापि प्रतिबंधकारणमस्तीति मन्वानस्तत्क्षपणाय वसापराणि द्वात्रिंशतं वर्षाणि ब्रह्मचर्यमित्यादिदेश प्रजापति। तथोषितवते क्षपितकल्मषायाह ॥ इति दशम खंड॰ ॥ —

तद्यत्रैतत्सुप्तः समस्त. संप्रसन्नः स्वप्नं न विजानात्येष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति स ह शान्तहृदयः प्रवव्राज स हाप्राप्यैव देवानेतद्धयं ददर्श नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति ॥१॥ स समित्पाणि. पुनरेयाय तं ह प्रजापतिरुवाच मघवन्यच्छान्तहृदयः प्राव्राजीः किमिच्छन्पुनरागम इति स होवाच नाह खल्वयं भगव एवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति ॥२॥

पूर्ववदेतं त्वेव त इत्याद्युक्त्वा तद्यत्रैतत्सुप इत्यादि व्याख्यातं वाक्यम। अक्षिणि यो द्रष्टा स्वप्ने च महीयमानश्चरति स एव सुप्त समस्त संप्रसन्न स्वप्नं न विजानात्येष आत्मेति होवाच एतदमृतमभयमेतद्ब्रह्मेति स्वाभिप्रेतमेव। मघवांस्तत्रापि दोषं ददर्श। कथम। नाह नैव सुषुप्तस्थोऽयात्मा खल्वयं संप्रति सम्यगिदानीं च आत्मानं जानाति नैवं जानाति। कथम। अयमहमस्मीति नो एवेमानि भूतानि चेति। यथा जाग्रति स्वप्ने वा। अतो विनाशमेव विनाशमिवेति पूर्ववत् द्रष्टव्यम। अपीतोऽपिगतो भवति, विनष्ट इव भवतीत्यभिप्रायः। ज्ञाने हि सति ज्ञातु. सद्भावोऽवगम्यते नासति ज्ञाने। न च सुषुप्तस्य ज्ञानं दृश्यतेऽतो विनष्ट इवेत्यभिप्रायः। न तु विनाशमेवात्मनो मन्यतेऽमृताभयवच-

नस्य प्रामाण्यमिच्छन् ॥

एवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोऽनुव्याख्यास्यामि नो एवान्यत्रैतस्माद्वसापराणि पंच वर्षाणीति स हापराणि पंच वर्षाण्युवास तान्येकशतं संपेदुरेतत्तद्यदाहुरेकशतं ह वै वर्षाणि मघवान्प्रजापतौ ब्रह्मचर्यमुवास तस्मै होवाच ॥३॥ इति एकादश. खंड ॥

पूर्ववदेवमेवेत्युक्त्वा आह— यो मयोक्तस्त्रिभिः पर्यायैस्तमेवैतं नो एवान्यत्रैतस्मादात्मनोऽन्यं कंचन, किं तर्ह्येतमेव व्याख्यास्यामि । स्वल्पस्तु दोषस्तवावशिष्टः तत्क्षपणाय वसापराण्यन्यानि पंच वर्षाणीत्युक्तः स तथा चकार । तस्मै मृदितकषायादिदोषाय स्थानत्रयदोषसंबंधरहितमात्मनः स्वरूपं अपहतपाप्मत्वादिलक्षणं मघवते तस्मै होवाच । तान्येकशतं वर्षाणि संपेदुः संपन्नानि बभूवुः । यदाहुर्लोके शिष्टा— एकशतं ह वै वर्षाणि मघवान्प्रजापतौ ब्रह्मचर्यमुवासेति । तदेतत् द्वात्रिंशतमित्यादिना दर्शितमित्याख्यायिकातोऽपसृत्य श्रुत्योच्यते । एवं किलैतदिद्रत्वादपि गुरुतरमिद्रेणापि महता यत्नेनैकोत्तरवर्षशतकृतायासेन प्राप्तमात्मज्ञानम् । अतो नात परं पुरुषार्थान्तरमस्तीत्यात्मज्ञानं स्तौति ॥ इति एकादश. खंडः ॥ ८.११.—

मघवन्मर्त्यं वा इदं शरीरमात्तं मृत्युना तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठानमात्तो वै सशरीरः प्रियाप्रियाभ्यां न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्त्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः ॥१॥

मघवन्मर्त्यं वै मरणधर्मीदं शरीरम् । यन्मन्यसेऽक्ष्याधारादिलक्षणं संप्रसादलक्षण आत्मा मयोक्तो विनाशमेवापीतो भवतीति, शृणु तत्र कारणम्— यदिदं शरीरं वै यत्पश्यसि तदेतन्मर्त्यं विनाशि । तच्चात्तं मृत्युना ग्रस्तं सततमेव । कदाचिदेव म्रियत इति मर्त्यमित्युक्ते न तथा संत्रासो भवति यथा ग्रस्तमेव सदा व्याप्तमेव मृत्युनेत्युक्ते, इति वैराग्यार्थ विशेष इत्युच्यते आत्तं मृत्युनेति । कथं नाम देहाभिमानतो विरक्त सन्निवर्तत इति । शरीरमित्यत्र सहेद्रियमनोभिरुच्यते । तच्छरीरमस्य संप्रसादस्य त्रिस्थानतया गम्यमानस्यामृतस्य मरणादिदेहेद्रियमनोधर्मवर्जितस्येत्येतत्, अमृतस्य इत्यनेनैवाशरीरत्वे सिद्धे पुनरशरीरस्य इति वचनं वाय्वादिवत्सावयवत्वमूर्तिमत्वे मा भूतामिति, आत्मनो भोगाधिष्ठानम् । आत्मनो वा सत ईक्षितुस्तेजोबन्नादिक्रमेणोत्पन्नमधिष्ठानम् । जीवरूपेण

प्राविश्य सदेवाधितिष्ठत्यस्मिन्निति वा अधिष्ठानम । यस्येदमीदृशं नित्यमेव मृत्युग्रस्तं धर्माधर्मजनितत्वात्प्रियाप्रियवदधिष्ठानं तदधिष्ठितस्तद्वान्सशरीरो भवति । अशरीरस्वभावस्यात्मनः तदेवाहं शरीरं शरीरमेव चाहमित्यविवेकात्मभावः सशरीरत्वं, अत एव सशरीरः सन्नात्मा ग्रस्त प्रियाप्रियाभ्याम् । प्रसिद्धमेतत् । तस्य च न वै सशरीरस्य सत प्रियाप्रिययोः बाह्यविषयसंयोगवियोगनिमित्तयोः बाह्यविषयसंयोगवियोगौ ममेति मन्यमानस्यापहतिर्विनाश उच्छेदः संततिरूपयोर्नास्तीति । तं पुनर्देहाभिमानात् अशरीरस्वरूपविज्ञानेन निवर्तिताविवेकं ज्ञानमशरीरं सन्तं प्रियाप्रिये न स्पृशतः । स्पृशिः प्रत्येकं संबध्यत इति प्रियं न स्पृशत्यप्रियं न स्पृशतीति वाक्यद्वयं भवति । न म्लेच्छाशुच्यधार्मिकैः सह संभाषेतेति यद्वत् । धर्माधर्मकार्ये हि ते, अशरीरता तु स्वरूपमिति तत्र धर्माधर्मयोरसंभवात्तत्कार्यभावो दूरत एवेत्यतो न प्रियाप्रिये स्पृशतः ॥

ननु यदि प्रियमप्यशरीरं न स्पृशतीति, यन्मघवतोक्तं सुषुप्तस्थो विनाशमेवापीतो भवतीति, तदेवहाप्यापन्नम । नैष दोषः । धर्माधर्मकार्ययोः शरीरसंबंधिनोः प्रियाप्रिययोः प्रतिषेधस्य विवक्षितत्वात् अशरीरं न प्रियाप्रिये स्पृशत इति । आगमापायिनोर्हि स्पर्शशब्दो दृष्टो, यथा शीतस्पर्श उष्णस्पर्श इति न त्वग्नेरुष्णप्रकाशयोः स्वभावभूतयोरग्निना स्पर्श इति भवति । तथाग्नेः सवितुर्वा उष्णप्रकाशवत्स्वरूपभूतस्यानंदस्य प्रियस्यापि नेह प्रतिषेधः 'विज्ञानमानंदं ब्रह्म' 'आनंदो ब्रह्म' इत्यादिश्रुतिभ्यः । इहापि भूमैव सुखमित्युक्तत्वात् ॥

ननु भूम्नः प्रियस्यैकत्वेऽसंवेद्यत्वात्स्वरूपेणैव वा नित्यसंवेद्यत्वान्निर्विशेषतेति नेद्रस्य तादिष्टम । 'नाह खल्वयं संप्रत्यात्मानं जानाल्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामि' इत्युक्तत्वात् । तद्धीन्द्रस्येष्टं यद्भूतानि चात्मानं च जानाति, न चाप्रियं किंचिद्वेत्ति, स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्येन ज्ञानेन । सत्यमेतदिष्टमिंद्रस्य इमानि भूतानि मत्तोऽन्यानि लोकाः कामाश्च सर्वे मत्तोऽन्येऽहमेषां स्वामीति । न त्वेतदिंद्रस्य हितम् । हितं चेंद्रस्य प्रजापतिना वक्तव्यम् । व्योमवदशरीरात्मतया सर्वभूतलोककामात्मत्वोपगमेन या प्राप्तिस्तद्धितमिंद्राय वक्तव्यमिति प्रजापतिनाभिप्रेतम् । न तु राज्ञो राज्यप्राप्तिवदन्यत्वेन । तत्रैवं सति कं केन विजानीयादात्मैकत्वे इमानि भूतान्यहमस्मीति । नन्वस्मिन्पक्षे 'स्त्रीभिर्वा यानैर्वा' 'स यदि

पितृलोककाम ' 'स एकधा भवति' इत्याद्यैश्वर्यश्रुतयोऽनुपपन्ना । न । सर्वात्मनः सर्वफलसंबंधोपपत्तेरविरोधात । मृद इव सर्वघटकरककुंडाद्यादि । ननु सर्वात्मत्वे दुःखसंबंधोऽपि स्यादिति चेत । न । दुःखस्याप्यात्मत्वोपगमादविरोधः । आत्मन्यविद्याकल्पनानिमित्तानि दुःखानि रज्ज्वामिव सर्पादिकल्पनानिमित्तानि । सा चाविद्या अशरीरात्मैकत्वस्वरूपदर्शनेन दुःखनिमित्तोच्छित्तेति दुःखसंबंधाशंका न संभवति । शुद्धसत्त्वसंकल्पनिमित्ताना तु कामानामीश्वरदेहसंबंध सर्वभूतेषु मानसाना पर एव सर्वसत्त्वोपाधिद्वारेण भोक्तेति सर्वाविद्याकृतसंव्यवहाराणां पर एवात्मा आम्पदं नान्योऽस्तीति वेदान्तसिद्धान्त ॥

'य एषोऽक्षिणि पुरुषो दृश्यते' इति च्छायापुरुष एव प्रजापतिनोक्त', स्वप्नसुषुप्तयोश्चान्य एव, न परोऽपहतपाप्मत्वादिलक्षणो, विरोधादिति केचिन्मन्यन्ते । च्छायाद्यात्मनां चोपदेशे प्रयोजनमाचक्षते । आदावेवोच्यमाने किल दुर्विज्ञेयत्वात्परमात्मन अत्यंतबाह्यविषयासक्तचेतस अत्यंतसूक्ष्मवस्तुश्रवणे व्यामोहो मा भूदिति । यथा किल द्वितीयाया सूक्ष्मं चंद्रं दिदर्शयिषुर्वृक्षं कंचित्प्रत्यक्षमादौ दर्शयति पश्यामुमेष चंद्र इति, ततोऽन्य ततोऽप्यन्यं गिरिमूर्धानं च चंद्रसमीपस्थमेष चंद्र इति, ततोऽसौ चंद्रं पश्यति एवमेतत 'य एषोऽक्षिणि' इत्याद्युक्तं प्रजापतिना त्रिभि पर्यायैर्न पर इति । चतुर्थे तु पर्याये देहान्मर्त्यात्समुत्थायाशरीरतामापन्नो ज्योति स्वरूपम । यस्मिन्नुत्तमपुरुषे स्त्र्यादिभिर्जक्षत क्रीडन्रममाणो भवति स उत्तम पुरुष पर उक्त इति चाहु ।

सत्यं. रमणाया तावदियं व्याख्या श्रोतुम । नन्वर्थोऽस्य ग्रंथस्येवं संभवति । कथम । अक्षिणि पुरुषो दृश्यते इत्युपन्यस्य शिष्याभ्या छायात्मानि गृहीते तयोस्तद्विपरीतग्रहणं मत्वा तदपनयायोदशरावोपन्यास कि पश्यथ इति च प्रश्न साध्वलंकारोपदेशश्चानर्थक स्यात यदि च्छायात्मैव प्रजापतिनाऽक्षिणि दृश्यत इत्युपदिष्ट । किच यदि स्वयमुपदिष्ट इति ग्रहणस्याप्यपनयकारणं वक्तव्यं स्यात् । स्वप्नसुषुप्तात्मग्रहणयोरपि तदपनयकारणं च स्वयं ब्रूयात् । न चोक्तं तेन । तेन मन्यामहे नाक्षिणि च्छायात्मा प्रजापतिनोपदिष्ट । किं चान्यदक्षिणि द्रष्टा चेत् दृश्यते इत्युपदिष्ट स्यात्तत इदं युक्तम । एतं त्वेव ते इत्युक्त्वा स्वप्नेऽपि द्रष्टुरेवोपदेश । स्वप्ने न द्रष्टोपदिष्ट इति चेत् । न । 'अपि रोदितीव' 'अप्रियवेत्तेव' इत्युपदेशात् । न च द्रष्टुरन्यः कश्चित्स्वप्ने महीयमानश्चरति । 'अ-

त्रायं पुरुष स्वयंज्योति ' इति न्यायत श्रुत्यंतरे सिद्धत्वात् । यद्यपि स्वप्ने सधीः भवति तथापि न धी स्वप्नभोगोपलब्धि प्रति करणत्वं भजते । कि तर्हि, पट-चित्रवज्जाग्रद्वासनाश्रया दृश्यैव धीर्भवतीति न द्रष्टु स्वयंज्योतिष्ट्वबाध· स्यात् । किचान्यत । जाग्रत्स्वप्नयोर्भूतानि चात्मानं च जानाति इमानि भूतान्ययमह-मस्मीति । प्राप्तौ सत्यां प्रतिषेधो युक्त स्यान्नाह खल्वयमित्यादि । तथा चेतनस्यैवा-विद्यानिमित्तयो सशरीरत्वे सति प्रियाप्रिययोरपहतिर्नास्त्यित्युक्त्वा तस्यैवा-शरीरस्य सतो विद्यायां सत्या सशरीरत्वे प्राप्तयोः प्रतिषेधो युक्तो 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत ' इति । एकश्चात्मा स्वप्नबुद्धान्तयोर्महामत्स्यवदसंगः संचरतीति श्रुत्यंतरे सिद्धम् ॥

यच्चोक्तं संप्रसादः शरीरात्समुत्थाय यस्मिन्स्त्र्यादिभी रममाणो भवति सोऽन्य संप्रसादादधिकरणनिर्दिष्ट उत्तम पुरुष इति । तदप्यसत् । चतुर्थेऽपि पर्याय 'एतं त्वेव ते' इति वचनात् । यदि ततोऽन्योऽभिप्रेत· स्यात्पूर्ववत् 'एतं त्वेव ते' इति न ब्रूयान्मृषा प्रजापति· । किचान्यत्तेजोबन्नादीना स्रष्टुः सतः स्वविकारदेहशुंगे प्रवेशं दर्शयित्वा प्रविश्य पुन तत्त्वमसीत्युपदेशो मृषा प्रस-ज्येत । तस्मिस्त्वं स्त्र्यादिभी रन्ता भविष्यसीति युक्त उपदेशोऽभविष्यद्यदि सं-प्रसादादन्य उत्तम पुरुषो भवेत् । तथा भूम्नि अहमेव इत्यादिश्य 'आत्मैवेदं सर्वं' इति नोपसमहरिष्यद्यदि भूमा जीवादन्योऽभविष्यत । 'नान्योऽतोऽस्ति द्रष्टा' इत्यादिश्रुत्यंतराच्च । सर्वश्रुतिषु च परस्मिन्नात्मशब्दप्रयोगो नाभविष्यत्प्र-त्यगात्मा चेत्सर्वजंतूनां पर आत्मा न भवेत् । तस्मादेक एवात्मा प्रकरणी सिद्धः ॥

न चात्मनः संसारित्वम् । अविद्याध्यस्तत्वादात्मनि संसारस्य । न हि रज्जुशुक्तिकागगनादिषु सर्परजतमलादानि मिथ्याज्ञानाध्यस्तानि तेषां भवन्तीति । एतेन सशरीरस्य प्रियाप्रिययोरपहतिर्नास्तीति व्याख्यातम् । यच्च स्थितमप्रिय-वेत्तैवेति सिद्धम् । एवं च सति सर्वपर्यायेषु 'एतदमृतमभयमेतद्ब्रह्म' इति प्रजा-पतेर्वचनम् । यदि वा प्रजापतिच्छद्मरूपाया श्रुतेर्वचनं, सत्यमेव भवेत् । न च तत्कुतर्कबुद्ध्या मृषा कर्तु युक्तम् । ततो गुरुतरस्य प्रमाणांतरस्यानुपपत्ते. । ननु प्रत्यक्षं दु.खाद्यप्रियवेतृत्वमव्यभिचार्यनुभूयत इति चेन्न । जरादिरहितो जीर्णोऽहं जातोऽहमायुष्मान्गौर· कृष्णो मृत इत्यादिप्रत्यक्षानुभववत्तदुपपत्तेः । सर्वमप्ये-तत्सत्यमिति चेदस्त्येवैतदेवं दुरवगमं येन देवराजाऽपि उदशरावादिदर्शीतावि-

नाशयुक्तिरपि मुमोहैवात्र 'विनाशमेवापीतो भवति' इति । तथा विरोचनो महाप्राज्ञः प्राजापत्योऽपि देहमात्रात्मदर्शनो बभूव । तथा इंद्रस्य आत्मविनाशभयसागरे एव वैनाशिका न्यमज्जन् । तथा सारूप्या द्रष्टारं देहादिव्यतिरिक्तमवगम्यापि त्यक्तागमप्रमाणत्वान्मृत्युविषय एवान्यत्वदर्शने तस्थुः । तथान्ये काणादादिदर्शनाः कषायरक्तमिव क्षारादिभिर्वस्त्रं नवभिरात्मगुणैर्युक्तमात्मद्रव्यं विशोधयितुं प्रवृत्ताः । तथान्ये कर्मिणो बाह्यविषयापहृतचेतसो वेदप्रमाणा अपि परमार्थसत्यमात्मैकत्वं विनाशमिव इंद्रवन्मन्यमाना घटीयंत्रवदारोहावरोहाद्यकारैः अनिशं बंभ्रमंति । किमन्ये क्षुद्रजंतवो विवेकहीनाः स्वभावत एव बहिर्विषयापहृतचेतसः । तस्मादिदं त्यक्तसर्वबाह्यैषणैरनन्यशरणैः परमहंसपरिव्राजकैः अत्याश्रमिभिर्वेदान्तविज्ञानपरैरेव वेदनीयं पूज्यतमैः प्राजापत्यं चेमं संप्रदायमनुसरद्भिरुपनिबद्धं प्रकरणचतुष्टयेन । तथानुशासत्यप्यपि 'त एव नान्ये' इति ॥

अशरीरो वायुरभ्रं विद्युत्स्तनयित्नुरशरीराण्येतानि तद्यथैतान्यमुष्मादाकाशात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यन्ते ॥२॥

तत्राशरीरस्य संप्रसादस्य अविद्यया शरीरेणाविशेषता सशरीरतामेव संप्राप्तस्य शरीरात्समुत्थाय स्वेन रूपेण यथाभिनिष्पत्तिस्तथा वक्तव्येति दृष्टान्त उच्यते— अशरीरो वायुरविद्यमानं शिरःपाण्यादिमच्छरीरमस्येत्यशरीरः । किं चाभ्रं विद्युत्स्तनयित्नुरित्येतानि चाशरीराणि । तत्तत्रैवं सति वर्षादिप्रयोजनावसाने यथा । अमुष्मादिति भूमिष्ठा श्रुतिः द्युलोकसंबंधिनमाकाशदेशं व्यपदिशति । एतानि यथोक्तान्याकाशसमानरूपतामापन्नानि स्वेन वाय्वादिरूपेण अगृह्यमाणान्याकाशाख्यतां गतानि, यथा संप्रसादोऽविद्यावस्थाया शरीरात्मभावमेवापन्नः, तानि च तथाभूतान्यमुष्मात् द्युलोकसंबंधिनः आकाशदेशात्समुत्तिष्ठन्ति वर्षणादिप्रयोजनाभिनिर्वृत्तये । कथम् । शिशिरापाये सावित्रं परं ज्योतिः प्रकृष्टं ग्रैष्मकमुपसंपद्य सावित्रमभितापं प्राप्येत्यर्थः । आदित्याभितापेन पृथग्भावमापादिताः सन्तः स्वेन स्वेन रूपेण पुरोवातादिवायुरूपेण स्तिमितभावं हित्वाऽभ्रमपि भूमिपर्वतहस्त्यादिरूपेण विद्युदपि स्वेन ज्योतिर्लतादिचपलरूपेण स्तनयित्नुरपि स्वेन गर्जिताशनिरूपेणेत्येवं प्रावृडागमे स्वेन स्वेन रूपेणाभिनिष्पद्यंते ॥

एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमपुरुषः स तत्र पर्येति जक्षत्क्रीडन्रममाणः स्त्री-

भिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनं स्मरन्निदं शरीरं स यथा प्रयोग्य आचरणे युक्त एवमेवायमस्मिञ्छरीरे प्राणो युक्त ॥३॥

यथायं दृष्टान्तो वाय्वादीनां आकाशादिसाम्यगमनवत अविद्यया संसारावस्थायां शरीरसाम्यमापन्नोऽहमस्य पुत्रो जातो जीर्णो मरिष्ये इत्येवंप्रकारं प्रजापतिनेव मघवान्यथोक्तेन क्रमेण, नासि त्वं देहेंद्रियादिधर्मा, तत्त्वमसीति प्रतिबोधितः सन्स एष संप्रसादो जीवोऽस्माच्छरीरादाकाशादिव वाय्वादयः समुत्थाय देहादिविलक्षणं आत्मनो रूपमवगम्य, देहात्मभावनां हित्वेत्येतत् । स्वेन रूपेण सदात्मनैवाभिनिष्पद्यत इति व्याख्यातं पुरस्तात् । स येन स्वेन रूपेण संप्रसादोऽभिनिष्पद्यते प्राक्प्रतिबोधात् तद्भ्रान्तिनिमित्तात्मपो भवति यथा रज्जु, पश्चात्कृतप्रकाशा रज्ज्वात्मना स्वेन रूपेणाभिनिष्पद्यते । एवं च स उत्तमपुरुष उत्तमश्चासौ पुरुषश्चेत्युत्तमपुरुषः स एवोत्तमपुरुषः । अक्षिस्थप्रपुरुषौ व्यक्ताव्यक्तश्च सुषुप्तः समस्तः संप्रसन्नोऽशरीरश्च स्वेन रूपेणेति । एषामेष स्वेन रूपेणावस्थितः क्षराक्षरौ व्याकृताव्याकृतौ अपेक्ष्योत्तमपुरुषः । कृतनिर्वचनो ह्ययं गीतासु । स संप्रसादः स्वेन रूपेण तत्र स्वात्मनि स्वस्थतया सर्वात्मभूत पर्येति क्वचिदिद्राद्यात्मना जक्षद्धसन्रमक्षयन्वा भक्ष्यानुच्चावचानाप्सितान क्वचिन्मनोमात्रे संकल्पादेव समुत्थितैर्ब्राह्मलौकिकैर्वा क्रीडन्स्त्र्यादिभी रममाणश्च मनसैव, नोपजनं, स्त्रीपुंसयोरन्योपगमेन जायत इत्युपजनं, आत्मभावेन वात्मसमीप्येन जायत इत्युपजनं, इदं शरीरं, तन्न स्मरन । तत्स्मरणे हि दुःखमेव स्यात् । दुःखात्मकत्वात्तस्य ॥

नन्वनुभूतं चेन्न स्मरेदसर्वज्ञत्वं मुक्तस्य । नैष दोषः । येन मिथ्याज्ञानादिना जनित तच्च मिथ्याज्ञानादि विद्ययोच्छेदित, अतस्तन्नानुभूतमेवेति न तदस्मरणे सर्वज्ञत्वहानि । न ह्युन्मत्तेन ग्रहगृहीतेन वा यदनुभूतं तदुन्मादाद्यपगमेऽपि स्मर्तव्य स्यात् । तथेहापि संसारिभिरविद्यादोषवद्भिर्यदनुभूयते तत्सर्वात्मानमशरीरं न स्पृशति । अविद्यानिमित्ताभावात् । ये तूच्छिन्नदोषैर्मृदितकषायैः मानसाः सत्याः कामा अनृतापिधाना अनुभूयन्ते विद्याभिव्यंग्यत्वात्त एव मुक्तेन सर्वात्मभूतेन संबध्यन्त इत्यात्मज्ञानस्तुतये निर्दिश्यन्ते । अतः साध्वेतद्विशिनष्टि — य एते ब्रह्मलोके इति । यत्र क्वचन भवन्तोऽपि ब्रह्मण्येव हि ते लोके भवन्तीति सर्वात्मत्वाद्ब्रह्मण उच्यन्ते ॥

ननु कथमेक सन्नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा कामांश्च ब्राह्मलौकिकान्पश्यन् रमत इति च विरुद्धम । यथैको यस्मिन्नेव क्षणे पश्यति तस्मिन्नेव क्षणे न पश्यति चेति । नैष दोष । श्रुत्यंतर परिहृतत्वात् । द्रष्टुर्दृष्टेरविपरिलोपात्पश्यन्नेव भवति । द्रष्टुरन्यत्वेन कामानामभावान्न पश्यति चेति । यद्यपि सुषुप्त तदुक्त मुक्तस्यापि सर्वैकत्वात्समानो द्वितीयाभाव । 'केन कं पश्येत' इति चोक्तमेव । अशरीरस्वरूपोऽपहतपाप्मादिलक्षण सन्कथमेष पुरुषोऽक्षिणि दृश्यत इत्युक्त प्रजापतिना ' तत्र यथाऽसावक्षिणि साक्षात् दृश्यते तद्वक्तव्यमिति इदमारभ्यते । तत्र कों हेतुरक्षिणि दर्शन इत्याह— स दृष्टान्तो यथा प्रयोग्यः प्रयोग्यपरो वा स-शब्द । प्रयुज्यत इति प्रयोग्योऽश्वो बलीवर्दो वा । यथा लोक आचरत्येनेनेत्याचरणो रथोऽनो वा तस्मिन्नाचरणे युक्तस्तदाकर्षणाय, एवमस्मिञ्छरीरे रथस्थानीये प्राण पंचवृत्तिरिंद्रियमनोबुद्धिसंयुक्त प्रज्ञात्मा विज्ञानक्रियाशक्तिद्वयसंमूर्छितात्मा युक्त स्वकर्मफलोपभोगनिमित्तं नियुक्त । 'कस्मिन्नु अहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामि' इति ईश्वरेण राज्ञेव सर्वाधिकारी दर्शनश्रवणचेष्टाव्यापारेऽधिकृत । तस्यैव तु मात्रा एकदेशश्चक्षुरिंद्रियं रूपोपलब्धिद्वारभूतम ॥

अथ यत्रैतदाकाशमनुविषण्णं चक्षुः स चाक्षुष. पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गंधाय घ्राणमथ यो वेदेदमभिव्याहराणीति स आत्माभिव्याहाराय वागथ यो वेदेदं शृणवानीति स आत्मा श्रवणाय श्रोत्रम् ॥४॥

अथ यत्र कृष्णतारोपलक्षितमाकाश देहच्छिद्रं अनुविषण्णमनुपक्तमनुगतं, तत्र स प्रकृतोऽशरीर आत्मा चाक्षुषश्चक्षुषि भव इति चाक्षुष , तस्य दर्शनाय रूपोपलब्धये चक्षु करणं, यस्य तेद्देहादिभि संहतत्वात्परस्य द्रष्टुरर्थे, सोऽत्र चक्षुषि दर्शनेन लिंगेन दृश्यते परोऽशरीरोऽसंहत. । 'अक्षिणि दृश्यत' इति प्रजापतिनोक्तं सर्वेन्द्रियद्वारोपलक्षणार्थम । सर्वविषयोपलब्धा हि स एवेति । स्फुटोपलब्धिहेतुत्वान्तु अक्षिणीति विशेषवचनं सर्वश्रुतिषु । 'अहमदर्शमिति तत्सत्यं भवति' इति च श्रुतेः । अथापि योऽस्मिन्देहे वेद । कथं ? इदं सुगंधि दुर्गंधि वा जिघ्राणीत्यस्य गंधं विजानीयामिति, स आत्मा, तस्य गंधाय गंधविज्ञानाय घ्राणम् । अथ यो वेदेदं वचनमभिव्याहराणीति वदिष्यामीति, स आत्मा अभिव्याह-

रणक्रियासिद्धये करणं वागिंद्रियम । अथ यो वेदेदं शृणवानीति स आत्मा, श्रवणाय श्रोत्रम ॥

अथ यो वेदेदं मन्वानीति स आत्मा मनोऽस्य दैवं चक्षु स वा एष एतेन दैवेन चक्षुषा मनसैतान्कामान्पश्यन्रमते य एते ब्रह्मलोके ॥५॥

अथ यो वेदेदं मन्वानीति मननव्यापारमिंद्रियासंस्पृष्टं केवलं मन्वानीति वेद, स आत्मा, मननाय मनः । यो वेद स आत्मेत्येवं सर्वत्र प्रयोगाद्वेदनमस्य स्वरूपमित्यवगम्यते । यथा यः पुरस्तात्प्रकाशयति स आदित्यो, यो दक्षिणतो यः पश्चाद्य उत्तरतो य ऊर्ध्वं प्रकाशयति स आदित्य, इत्युक्ते प्रकाशस्वरूपः इति गम्यते । दर्शनादिक्रियानिर्वृत्त्यर्थानि तु चक्षुरादिकरणानि । इदं चास्यात्मनः सामर्थ्यादवगम्यते । आत्मनः सत्तामात्र एव ज्ञानकर्तृत्वं, न तु व्यापृततया । यथा सवितुः सत्तामात्र एव प्रकाशनकर्तृत्वं, न तु व्यापृततयेति तद्वत् । मनोऽस्य आत्मनो दैवमप्राकृतं इतरेंद्रियैरसाधारणं चक्षुश्चष्टे पश्यत्यनेनेति चक्षु । वर्तमानकालविषयाणि चेंद्रियाण्यतोऽदैवानि तानि । मनस्तु त्रिकालविषयोपलब्धिकरणं मृदितदोषं च सूक्ष्मव्यवहितादिसर्वोपलब्धिकरणं चेति दैवं चक्षुरुच्यते । स वै मुक्तः स्वरूपापन्नोऽविद्याकृतदेहेंद्रियमनोवियुक्तः सर्वात्मभावमापन्न सन्नेष व्योमवद्विशुद्ध सर्वेश्वरो मनउपाधि सन्नेतेनैवेश्वरेण मनसा एतान्कामान् सवितृप्रकाशवन्नित्यप्रततेन दर्शनेन पश्यन्रमते । कान्कामानिति विशिनष्टि— य एते ब्रह्मणि लोके हिरण्यनिधिवत वाह्यविषयासंगानृतेनापिहिता संकल्पमात्रलभ्याः तानित्यर्थः॥

तं वा एतं देवा आत्मानमुपासते तस्मात्तेषां सर्वे च लोका आत्ताः सर्वे च कामाः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच प्रजापतिरुवाच ॥६॥ इति द्वादशः खंडः ॥

यस्मादेष इंद्राय प्रजापतिनोक्त आत्मा, तस्मात्तत श्रुत्वा तमात्मानमद्यत्वेऽपि देवा उपासते । तदुपासनाच्च तेषा सर्वे च लोका आत्ता प्राप्ताः सर्वे च कामा । यदर्थं हींद्र एकशतं वर्षाणि प्रजापतौ ब्रह्मचर्यमुवास तत्फलं प्राप्तं देवैरित्यभिप्रायः । तद्युक्तं देवानां महाभाग्यत्वात न त्विदानीं मनुष्याणामल्पजीवितत्वान्मंदतरप्रज्ञत्वाच्च संभवतीति प्राप्ते इदमुच्यते— स सर्वांश्च लोका-

नाप्नोति सर्वांश्च कामानिदानींतनोऽपि । कोऽसौ । इद्रादिवत् यस्तमात्मानमनुविद्य विजानातीति ह सामान्येन किल प्रजापतिरुवाच । अतः सर्वेषामात्मज्ञानं तत्फलप्राप्तिश्च तुल्यैव भवतीत्यर्थ । द्विर्वचनं प्रकरणसमाप्त्यर्थम् ॥ इति द्वादशः खंड ॥ ८.१२.—

श्यामाच्छबलं प्रपद्ये शबलाच्छ्यामं प्रपद्येऽश्व इव रोमाणि विधूय पापं चंद्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामीत्याभिसंभवामीति ॥१॥ इति त्रयोदशः खंडः ॥

श्यामाच्छबलं प्रपद्य इत्यादिमंत्रान्नाय पावनो जपार्थश्च ध्यानार्थो वा । श्यामो गंभीरो वर्ण श्याम इव श्यामो हार्द ब्रह्म अत्यंतदुरवगाह्यत्वात् तद्धार्दं ब्रह्म ज्ञात्वा ध्यानेन तस्माच्छ्यामाच्छबलं शबल इव शबलः अरण्याद्यनेककाममिश्रत्वाद्ब्रह्मलोकस्य शाबल्यं तं ब्रह्मलोकं शबलं प्रपद्ये मनसा शरीरपाताद्ऊर्ध्वं गच्छेयम । यस्मादहं शबलाद्ब्रह्मलोकात नामरूपव्याकरणाय श्यामं प्रपद्ये हार्दभावं प्रपन्नोऽस्मीत्यभिप्रायः । अतस्तमेव प्रकृतिस्वरूपमात्मानं शबलं प्रपद्य इत्यर्थः । कथं शबलं ब्रह्मलोकं प्रपद्य इत्युच्यते— अश्व इव स्वानि लोमानि विधूय कंपनेन श्रमं पांस्वादि च रोमतोऽपनीय यथा निर्मलो भवति, एवं हार्दब्रह्मज्ञानेन विधूय पापं धर्माधर्माख्यं चंद्र इव च राहुग्रस्तः, तस्माद्राहोर्मुखात्प्रमुच्य भास्वरो भवति यथा, एवं धूत्वा प्रहाय शरीरं सर्वानर्थाश्रयं इहैव ध्यानेन कृतात्मा कृत्यकृत्यः सन्नकृतं नित्यं ब्रह्मलोकमभिसंभवामीति । द्विर्वचनं मंत्रसमाप्त्यथम ॥ इति त्रयोदश खंडः ॥ ८.१३.—

आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदंतरा तद्ब्रह्म तदमृतं स आत्मा प्रजापतेः सभां वेश्म प्रपद्ये यशोऽहं भवामि ब्राह्मणानां यशो राज्ञां यशो विशां यशोऽहमनुप्रापत्सि स हाहं यशसां यशः श्येतमदत्कमदत्कं श्येतं लिंदु माभिगां लिंदु माभिगाम् ॥१॥ इति चतुर्दशः खंडः ॥

आकाशो वा इत्यादि ब्रह्मणो लक्षणनिर्देशार्थमाध्यानाय । आकाशो वै नाम श्रुतिषु प्रसिद्ध आत्मा । आकाश इवाशरीरत्वात्सूक्ष्मत्वाच्च । स चाकाशो नामरूपयोः स्वात्मस्थयोर्जगद्बीजभूतयोः सलिलस्येव फेनस्थानीययोः निर्वहिता निर्वोढा व्याकर्ता । ते नामरूपे यदंतरा यस्य ब्रह्मणोऽन्तरा मध्ये वर्तेते, तयोर्वा नामरूपयोरंतरा मध्येऽन्यन्नामरूपाभ्यामस्पृष्टं यदित्येतत् तत् ब्रह्म नामरूपविलक्षणं

नामरूपाभ्यामस्पृष्टं तथापि तयोर्निर्वोढृ एवंलक्षणं ब्रह्मेत्यर्थः । इदमेव मैत्रेयी-ब्राह्मणेनोक्तम् । चिन्मात्रानुगमात्सर्वत्र चित्स्वरूपतैवेति गम्यत एकवाक्यता । कथं तदवगम्यत इत्याह— स आत्मा । आत्मा हि नाम सर्वजंतूनां प्रत्यक्चेतनः स्वसंवेद्यः प्रसिद्धस्तेनैव स्वरूपेणोन्नीय अशरीरो व्योमवत्सर्वगत आत्मा ब्रह्मेत्यवगंतव्यम् । तच्चात्मा ब्रह्मामृतममरणधर्मा । अत ऊर्ध्वं मंत्रः । प्रजापतिश्चतुर्मुखस्तस्य सभां वेश्म प्रभुविमितं वेश्म प्रपद्ये गच्छेयम् । किंच यशोऽहं यशो नाम आत्माहं भवामि ब्राह्मणानाम् । ब्राह्मणा एव हि विशेषतस्तमुपासते ततस्तेषां यशो भवामि । तथा राज्ञां विशां च । तेऽप्यधिकृता एवेति तेषामप्यात्मा भवामि । तद्यशोऽहमनुप्राप्तास्मि अनुप्राप्तुमिच्छामि । स हाहं यशसामात्मना देहेंद्रियमनोबुद्धिलक्षणानामात्मा । किमर्थमहमेवं प्रपद्य इति, उच्यते— श्येतं वर्णतः पक्वबदरसमं रोहितम् । तथाऽदत्कं दंतरहितमप्यदत्कं भक्षयितृ स्त्री-व्यंजनं तत्सेविनां तेजोबलवीर्यविज्ञानधर्माणामपहंतृ विनाशयितृ इत्येतत् । यदेवंलक्षणं श्येतं लिदु पिच्छलं तन्माऽभिगा माभिगच्छेयम् । द्विर्वचनमत्यंतानर्थहेतुत्वप्रदर्शनार्थम् ॥ इति चतुर्दशः खंडः ॥ ८.१४.—

तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्य आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुंबे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान्विदधदात्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्याहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्यः स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते न च पुनरावर्तते ॥१॥ इति पंचदशः खंडः ॥ इति अष्टमोऽध्यायः समाप्तः ॥

तद्धैतदात्मज्ञानं सोपकरणमोमित्येतदक्षरमित्याद्यैः सहोपासनैस्तद्वाचकेन ग्रंथेनाष्टाध्यायीलक्षणेन सह ब्रह्मा हिरण्यगर्भः परमेश्वरो वा तद्द्वारेण प्रजापतये कश्यपायोवाच । असावपि मनवे स्वपुत्राय । मनुः प्रजाभ्यः । इत्येवं श्रुत्यर्थसंप्रदायपरंपरयागतं उपनिषद्विज्ञानमद्यापि विद्वत्स्ववगम्यते । यथेह षष्ठाद्यध्यायत्रये प्रकाशितात्मविद्या सफलावगम्यते तथा कर्मणा न कश्चनार्थ इति प्राप्ते, तदानर्थक्यप्राप्तिपरिजिहीर्षयेदं कर्मणो विद्वद्भिरनुष्ठीयमानस्य विशिष्टफलवत्वेनार्थवत्त्वमुच्यते— आचार्यकुलाद्वेदमधीत्य सहार्थतोऽध्ययनं कृत्वा, यथाविधानं यथास्मृत्युक्तैर्नियमैर्युक्तः सन्नित्यर्थः । सर्वस्यापि विधेः स्मृत्युक्तस्योपकुर्वाणकं

प्रति कर्तव्यत्वे गुरुशुश्रूषाया प्राधान्यप्रदर्शनार्थमाह— गुरौ कर्म यत्कर्तव्यं तत्कृत्वा कर्मशन्यो योऽतिशिष्ट कालस्तेन कालेन वेदमधीत्येत्यर्थः । एवं हि नियमवतार्धीतो वेद कर्मज्ञानफलप्राप्तये भवति, नान्यथेत्यभिप्राय. । अभिसमावृत्य धर्मजिज्ञासां समापयित्वा गुरुकुलान्निवृत्य न्यायतो दारानाहृत्य कुटुंबे स्थित्वा गार्हस्थ्ये विहिते कर्माणि तिष्ठन्नित्यर्थ । तत्रापि गार्हस्थ्यविहितानां कर्मणां स्वाध्यायस्य प्राधान्यप्रदर्शनार्थमुच्यते— शुचौ विविक्तेऽमेध्यादिरहिते देशे यथावदासीन स्वाध्यायमधीयानो नैत्यकमधिकं च यथाशक्ति ऋगाद्यभ्यासं च कुर्वन धार्मिकान्पुत्रान्शिष्यांश्च धर्मयुक्तान्विदधत् धार्मिकत्वेन तान्नियमयन्नात्मनि स्वहृदये हार्दे ब्रह्मणि सर्वेंद्रियाणि संप्रतिष्ठाप्योपसंहृत्य इंद्रियग्रहणात्कर्माणि च संन्यस्य अहिंसन्हिंसा परपीडामकुर्वन्सर्वभूतानि स्थावरजंगमानि भूतान्यपीडयन्नित्यर्थ. । भिक्षानिमित्तमटनादिनापि परपीडा स्यादित्यत आह— अन्यत्र तीर्थेभ्य । तीर्थ नाम शास्त्रानुज्ञाविषयस्ततोऽन्यत्रेत्यर्थ । सर्वाश्रमिणां चैतत्समानम् । तीर्थेभ्योऽन्यत्र अहिंसेत्यन्ये वर्णयन्ति कुटुंबे एवैतत्सर्वं कुर्वन्स खल्वधिकृतो, यावदायुषं यावज्जीवमेवं यथोक्तेन प्रकारेणैव वर्तयन्ब्रह्मलोकमभिसंपद्यते देहान्ते । न च पुनरावर्तते शरीरग्रहणाय । पुनरावृत्तेः प्राप्तायाः प्रतिषेधात । अर्चिरादिना मार्गेण कार्य ह्मलोकमभिसंपद्य यावद्ब्रह्मलोकस्थितिः तावत्तत्रैव तिष्ठति प्राक्ततो नावर्तन इत्यर्थ । द्विरभ्यास उपनिषद्विद्यापरिसमाप्त्यर्थः ॥

इति पंचदश खंड ॥ ८.१५.—

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीशंकरभगवतः कृतौ छांदोग्योपनिषद्भाष्यं समाप्तम् ॥

ॐ । आप्यायन्तु ममागानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिंद्रियाणि च सर्वाणि सर्वं ब्रह्मौपनिषदं माहं ब्रह्म निराकुर्या मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽस्तु । तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ॥ ॐ शान्ति शान्ति. शान्ति. ॥

इति सामवेदीया छांदोग्योपनिषत्समाप्ता ॥

॥ ॐ ॥

श्रीमच्छंकराचार्यविरचितभाष्ययुता

तैत्तिरीयोपनिषत् ।



॥ शिक्षाध्यायः ॥

यस्माज्जातं जगत्सर्वं यस्मिन्नेव प्रलीयते ।
येनेदं धार्यते चैव तस्मै ज्ञानात्मने नमः ॥१॥
यैरिमे गुरुभिः पूर्वं पदवाक्यप्रमाणतः ।
व्याख्याता. सर्ववेदान्तास्तान्नित्यं प्रणतोऽस्म्यहम् ॥२॥
तैत्तिरीयकसारस्य मयाचार्यप्रसादतः ।
विस्पष्टार्थरुचीनां हि व्याख्येयं संप्रणीयते ॥३॥

नित्यान्यधिगतानि कर्माण्युपात्तदुरितक्षयार्थानि, काम्यानि च फलार्थिना पूर्वस्मिन्ग्रंथे । इदानीं कर्मोपादानहेतुपरिहाराय ब्रह्मविद्या प्रस्तूयते । कर्महेतुः कामः स्यात् । प्रवर्तकत्वात् । आप्तकामानां हि कामाभावे स्वात्मन्यवस्थानात्प्रवृत्त्यनुपपत्तिः । आत्मकामत्वे चाप्तकामता । आत्मा हि ब्रह्म । तद्विदो हि परप्राप्तिं वक्ष्यति । अतोऽविद्यानिवृत्तौ स्वात्मन्यवस्थानं परप्राप्तिः । 'अभयं प्रतिष्ठां विंदते' 'एतमानंदमयमात्मानमुपसंक्रामति' इत्यादिश्रुतेः । काम्यप्रतिषिद्धयोरनारंभादारब्धस्य चोपभोगेन क्षयान्नित्यानुष्ठानेन च प्रत्यवायाभावात् अयत्नत एव स्वात्मन्यवस्थानं मोक्षः । अथवा निरतिशयायाः प्रीतेः स्वर्गशब्दवाच्यायाः कर्महेतुत्वात्कर्मभ्य एव मोक्ष इति चेत् । न । कर्मनिकत्वात् । अनेकानि ह्यारब्धफलान्यनारब्धफलानि चानेकजन्मान्तरकृतानि विरुद्धफलानि कर्माणि संभवन्ति । अतस्तेष्वनारब्धफलानामेकस्मिन्जन्मन्युपभोगेन क्षयासंभवात् शेषकर्मनिमित्तशरीरारंभोपपत्तेः, कर्मशेषसद्भावसिद्धिश्च । "तद्य इह रमणीयचरणाः" "तत शेषेण" इत्यादिश्रुतिस्मृतिशतेभ्यः । इष्टानिष्टफलानामनारब्धानां क्षयार्थानि नित्यानीति चेन्न । अकरणे प्रत्यवायश्रवणात् । प्रत्यवाय-

शब्दो ह्यनिष्टविषयः नित्याकरणनिमित्तस्य प्रत्यवायस्य दुःखरूपस्य आगामिनः परिहारार्थानि नित्यानीत्यभ्युपगमान्नानारब्धफलकर्मक्षयार्थानि । यदि नामानारब्धफलकर्मक्षयार्थानि नित्यानि कर्माणि, तथाप्यशुद्धमेव क्षपयेयुर्न शुद्धं विरोधाभावात । न हीष्टफलस्य कर्मणः शुद्धरूपत्वान्नित्यैर्विरोध उपपद्यते । शुद्धाशुद्धयोर्हि विरोधो युक्त । न च कर्महेतूना कामानां ज्ञानाभावे निवृत्त्यसंभवादशेषकर्मक्षयोपपत्ति । अनात्मविदो हि कामोऽनात्मफलविषयत्वात् स्वात्मनि च कामानुपपत्तिर्नित्यप्राप्तत्वात् स्वयं चात्मा परं ब्रह्मेत्युक्तम् । नित्यानां चाकरणमभावस्ततः प्रत्यवायानुपपत्तिरिति । अतः पूर्वोपचितदुरितेभ्यः प्राप्यमाणायाः प्रत्यवायक्रियाया नित्याकरणं लक्षणमिति शतृप्रत्ययस्य नानुपपत्तिः "अकुर्वन्विहितं कर्म" इति । अन्यथा अभावाद्भावोत्पत्तिरिति सर्वप्रमाणव्याकोप इति। अतो अयत्नतः स्वात्मन्यवस्थानमित्यनुपपन्नम् ॥

यच्चोक्तं निरतिशयप्रीतेः स्वर्गशब्दवाच्यायाः कर्मनिमित्तत्वात्कर्मारभ्य एव मोक्ष इति । तन्न । नित्यत्वान्मोक्षस्य । न हि नित्यं किंचिदारभ्यते । लोके यदारब्धं तदनित्यमिति । अतो न कर्मारभ्यो मोक्षः । विद्यासहितानां कर्मणां नित्यारंभसामर्थ्यमिति चेत् । न । विरोधात् । नित्यं चारभ्यत इति विरुद्धम् । यद्धि नष्टं तदेव नोपद्यत इति प्रध्वंसाभाववन्नित्योऽपि मोक्ष आरभ्य एवेति चेन्न । मोक्षस्य भावरूपत्वात् । प्रध्वंसाभावोऽप्यारभ्यत इति न संभवति, अभावस्य विशेषाभावाद्विकल्पमात्रमेतत् । भावप्रतियोगी ह्यभावः । यथा ह्यभिन्नोऽपि भावो घटपटादिभिर्विशेष्यते भिन्न इव घटभाव. पटभाव इति, एवं निर्विशेषोऽप्यभाव क्रियागुणयोगात् द्रव्यादिवद्विकल्प्यते । न ह्यभाव उत्पलादिवद्विशेषणसहभावी । विशेषणवत्त्वे भाव एव स्यात् । विद्याकर्मकर्तुर्नित्यत्वाद्विद्याकर्मसंतानजनितमोक्षनित्यत्वमिति चेन्न । गंगास्रोतोवत्कर्तृत्वस्य दुःखरूपत्वात् । कर्तृत्वोपरमे च मोक्षविच्छेदात् । तस्मात् अविद्याकामकर्मोपादानहेतुनिवृत्तौ स्वात्मन्यवस्थानं मोक्ष इति, स्वयं चात्मा ब्रह्म तद्विज्ञानादविद्यानिवृत्ति., इति ब्रह्मविद्यार्थोपनिषदारभ्यते ॥

उपनिषदिति विद्योच्यते । तत्सेविना गर्भजन्मजरादिनिशातनात्तदवसादनाद्वा, ब्रह्मणो वोपनिगमयितृत्वात्, उपनिषण्णं वास्यां परं श्रेय इति । तदर्थत्वात् ग्रंथोऽप्युपनिषत् ॥

ॐ। शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा। शं न इंद्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्। ॐ शान्तिः शान्तिः शान्तिः ॥ इति शिक्षाध्याये प्रथमोऽनुवाकः ॥१॥

शं सुखं प्राणवृत्तेरह्नश्चाभिमानी देवतात्मा मित्रो नोऽस्माकं भवतु। तथैवापानवृत्तेः रात्रेश्चाभिमानी देवतात्मा वरुणः। चक्षुष्यादित्ये चाभिमान्यर्यमा। बले इंद्रः। वाचि बुद्धौ च बृहस्पतिः। विष्णुरुरुक्रमो विस्तीर्णक्रमः पादयोरभिमानी। एवमध्यात्मदेवताः। शं नो भवत्विति सर्वत्रानुषंगः। तासु हि सुखकृत्सु विद्याश्रवणधारणोपयोगा अप्रतिबंधेन भविष्यन्तीति तत्सुखकर्तृत्वं प्रार्थ्यते— शं नो भवत्विति। ब्रह्म विविदिषुणा नमस्कारब्रह्मवदनक्रिये वायुविषये ब्रह्मविद्योपगर्गशांत्यर्थं क्रियेते। सर्वक्रियाफलानां तदधीनत्वात् ब्रह्म वायुस्तस्मै ब्रह्मणे नमः। प्रह्वीभावं करोमीति वाक्यशेषः। नमस्ते तुभ्यं हे वायो। नमस्करोमीति परोक्षप्रत्यक्षाभ्यां वायुरेवाभिधीयते। किंच त्वमेव चक्षुरायपेक्ष्य वाह्यं संनिकृष्टमव्यवहितं प्रत्यक्षं ब्रह्मासि यस्मात्तस्मात्त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं यथाशास्त्रं यथाकर्तव्यं बुद्धौ सुपरिनिश्चितमर्थं त्वदधीनत्वात्त्वामेव वदिष्यामि। सत्यमिति स एव वाक्कायाभ्यां संपाद्यमानः, सोऽपि त्वदधीन एव संपाद्यते इति त्वामेव सत्यं वदिष्यामि। तत्सर्वात्मकं वाय्वाख्यं ब्रह्म मयैवं स्तुतं सन्मां विद्यार्थिनमवतु विद्यासंयोजनेन। तदेव ब्रह्म वक्तारमाचार्यं च वक्तृत्वसामर्थ्यसंयोजनेनावतु। अवतु मामवतु वक्तारमिति पुनर्वचनमादरार्थम्। ॐ शान्तिः शान्तिः शान्तिरिति त्रिर्वचनमाध्यात्मिकाधिभौतिकाधिदैविकानां विद्याप्राप्त्युपसर्गाणां प्रशमार्थम् ॥

ॐ शीक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा बलम्। साम संतानः। इत्युक्तः शिक्षाध्यायः ॥ इति द्वितीयोऽनुवाकः ॥२॥

अर्थज्ञानप्रधानत्वादुपनिषदो ग्रंथपाठे यत्नोपरमो मा भूदिति शिक्षाध्याय आरभ्यते— शिक्षा शिक्ष्यतेऽनयेति वर्णाद्युच्चारणलक्षणम्। शिक्ष्यन्ते इति वा शिक्षा वर्णाद्यः। शिक्षैव शीक्षा। दैर्घ्यं छांदसम्। तां शीक्षां व्याख्यास्यामो विस्पष्टमा समंतात्प्रकथयिष्यामः। चक्षिङो वा ख्याञादिष्टस्य व्याङ्पूर्वस्य

व्यक्तत्वात्कर्मण एतद्रूपम् । तत्र वर्णोऽकारादि. । स्वर उदात्तादि· । मात्रा ह्रस्वाद्या । बलं प्रयत्नविशेष· । साम वर्णानां मध्यमवृत्त्योच्चारणं समता । संतानः संतति . संहितेत्यर्थः । एष हि शिक्षितव्योऽर्थ शिक्षा यस्मिन्नध्याये सोऽयं शिक्षाध्याय इत्येवमुक्त उदित । उक्त इत्युपसंहारार्थ. ॥

सह नौ यशः । सह नौ ब्रह्मवर्चसम् । अथातः संहिताया उपनिषदं व्याख्यास्यामः । पंचस्वधिकरणेषु । अधिलोकमधिज्यौतिषमधिविद्यमधिप्रजमध्यात्मम् । ता महासंहिता इत्याचक्षते । अथाधिलोकम् । पृथिवी पूर्वरूपम् । द्यौरुत्तररूपम् । आकाशः संधि ॥१॥

अधुना संहितोपनिषदुच्यते । तत्र संहिताद्युपनिषत्परिज्ञाननिमित्तं यद्यशः प्राप्यते तन्नावावयो शिष्याचार्ययो सहैवास्तु । तन्निमित्तं च यद्ब्रह्मवर्चसं तेजः तच्च सहैवास्त्विति शिष्यवचनमार्शा. । शिष्यस्य ह्यकृतार्थत्वात्प्रार्थनोपपद्यते, नाचार्यस्य । कृतार्थत्वात् । कृतार्थो ह्याचार्यो नाम भवति । अथानंतरमध्ययनलक्षणविधानस्य पूर्ववृत्तस्य, अत· यतोऽत्यर्थ ग्रंथभाविता बुद्धिर्न शक्यते सहसार्थज्ञानविषयेऽवतारयितुमित्यत. संहिताया उपनिषदं संहिताविषयं दर्शनमित्येतत् ग्रंथसंनिकृष्टामेव व्याख्यास्याम· । पंचस्वधिकरणेष्वाश्रयेषु ज्ञानविषयेष्वित्यर्थ । कानि तानीत्याह अधिलोकं लोकेष्वधि यद्दर्शनं तदधिलोकम् । तथाधिज्यौतिषं अधिविद्यमधिप्रजमध्यात्ममिति । ता एताः पंचविषया उपनिषदो लोकादिमहावस्तुविषयत्वात्संहिताविषयत्वाच्च महत्यश्च ता संहिताश्च महासंहिता इत्याचक्षते कथयन्ति वेदविद· । अथ तासां यथोपन्यस्तानां मध्ये अधिलोकं दर्शनमुच्यते । दर्शनक्रमविवक्षार्थोऽथशब्दः सर्वत्र । पृथिवी पूर्वरूपं, पूर्वो वर्णः पूर्वरूपम् । संहिताया पूर्वे वर्णे पृथिवीदृष्टि. कर्तव्येत्युक्तं भवति । तथा द्यौरुत्तररूपमाकाशोऽन्तरिक्षलोक· संधिर्मध्यं पूर्वोत्तररूपयोः संधीयते अस्मिन्पूर्वोत्तररूपे इति ॥

वायुः संधानम् । इत्यधिलोकम् । अथाधिज्यौतिषम् । अग्निः पूर्वरूपम् । आदित्य उत्तररूपम् । आपः संधिः । वैद्युतः संधानम् । इत्यधिज्यौतिषम् । अथाधिविद्यम् । आचार्यः पूर्वरूपम् ॥२॥ अंतेवास्युत्तररूपम् । विद्या संधिः । प्रवचनं संधानम् । इत्यधिविद्यम् । अथाधिप्रजम् । माता पूर्वरूपम् । पितोत्तररूपम् । प्रजा संधिः । प्रजननं संधानम् । इत्यधिप्रजम् ।

॥३॥ अथाध्यात्मम् । अधरा हनुः पूर्वरूपम् । उत्तरा हनुरुत्तररूपम् । वाक्संधिः । जिह्वा संधानम् । इत्यध्यात्मम् । इतीमा महासंहिताः । य एवमेता महासंहिता व्याख्याता वेद । संधीयते प्रजया पशुभिः । ब्रह्मवर्चसेनान्नाद्येन सुवर्ग्येण लोकेन ॥४॥ इति तृतीयोऽनुवाकः ॥३॥

वायु संधानम् । संधीयतेऽनेनेति संधानम् । इत्यधिलोकं दर्शनमुक्तम् । अथाधिज्यौतिषमित्यादि समानम । इतीमा इत्युक्ता उपप्रदर्श्यन्ते । यः कश्चिदेवमेता महासंहिता व्याख्याता वेदोपास्ते । वेदेत्युपासनं स्याद्विज्ञानाधिकारात् 'इति प्राचीनयोग्योपास्स्व' इति च वचनात् । उपासनं च यथाशास्त्रं तुल्यप्रत्ययसंततिरसंकीर्णा चातत्प्रत्ययं शास्त्रोक्तालंबनविषया च । प्रसिद्धश्चोपासनशब्दार्थो लोके गुरुमुपास्ते, राजानमुपास्त इति । यो हि गुर्वादीन्संतनमुपचरति स उपास्त इत्युच्यते । स च फलमाप्नोत्युपासनस्य । अतोऽत्रापि च य एवं वेद, संधीयते प्रजादिभिः स्वर्गान्ते । प्रजादिफलान्याप्नोतीत्यर्थ ॥

यश्छंदसामृषभो विश्वरूपः । छंदोभ्योऽध्यमृतात्संबभूव । स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देव धारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवम् । ब्रह्मणः कोशोऽसि मेधया पिहितः । श्रुतं मे गोपाय । आवहन्ती वितन्वाना ॥१॥ कुर्वाणाऽचीरमात्मनः । वासांसि मम गावश्च । अन्नपाने च सर्वदा । ततो मे श्रियमावह । लोमशां पशुभिः सह स्वाहा । आ मा यन्तु ब्रह्मचारिणः स्वाहा । वि माऽऽयन्तु ब्रह्मचारिणः स्वाहा । प्र माऽऽयन्तु ब्रह्मचारिणः स्वाहा । दमायन्तु ब्रह्मचारिणः स्वाहा । शमायन्तु ब्रह्मचारिणः स्वाहा ॥२॥ यशो जनेऽसानि स्वाहा । श्रेयान्वस्यसोऽसानि स्वाहा । तं त्वा भग प्रविशानि स्वाहा । स मा भग प्रविश स्वाहा । तस्मिन्त्सहस्त्रशाखे । नि भगाहं त्वयि मृजे स्वाहा । यथापः प्रवता यन्ति । यथा मासा अहर्जरम् । एवं मां ब्रह्मचारिणः । धातरायन्तु सर्वतः स्वाहा । प्रतिवेशोऽसि प्र मा भाहि प्र मा पद्यस्व ॥४॥ इति चतुर्थोऽनुवाकः ॥

यश्छंदसामिति मेधाकामस्य श्रीकामस्य च तत्प्राप्तिसाधनं जपहोमावुच्येते । 'स मेन्द्रो मेधया स्पृणोतु' 'ततो मे श्रियमावह' इति च लिंगदर्शनात् । यश्छंदसां वेदानामृषभ इवर्षभः प्राधान्यात् । विश्वरूपः, सर्वरूपः, 'तद्यथा शंकुना'

इत्यादिश्रुत्यंतरात् । अत एवर्षभत्वमोंकारस्य । ओंकारो ह्यत्रोपास्य इति ऋषभादिशब्दैः स्तुतिर्न्याय्यैवोंकारस्य । छंदोभ्यो वेदेभ्यो, वेदा ह्यमृतं, तस्मादमृतादधिसंबभूव । लोकदेववेदव्याहृतिभ्यः सारिष्टं जिघृक्षो प्रजापतेस्तपस्यत ओंकार. सारिष्टत्वेन प्रत्यभादित्यर्थ. । न हि नित्यस्योंकारस्यांजसैवोत्पत्तिरवकल्पते । स एवंभूत ओंकार इंद्रः सर्वकामेशः परमेश्वरो मा मा मेधया प्रज्ञया स्प्रृणोतु प्रीणयतु बलयतु वा । प्रज्ञाबलं हि प्रार्थ्यते । अमृतस्यामृतत्वहेतुभूतस्य ब्रह्मज्ञानस्य तदधिकारात, हे देव धारणो धारयिता भूयासं भवेयम् । किंच शरीरं मे मम विचर्षणं विचक्षणं योग्यमित्येतत् । भूयादिति प्रथमपुरुषविपरिणाम. । जिह्वा मे मधुमत्तमा मधुमत्यतिशयेन मधुरभाषिण्यित्यर्थ । कर्णाभ्यां श्रोत्राभ्यां भूरि बहु विश्रुवं व्यश्रवं, श्रोता भूयासमित्यर्थः । आत्मज्ञानयोग्यः कार्यकारणसंघातोऽस्त्विति वाक्यार्थः । मेधा च तदर्थमेव हि प्रार्थ्यते । ब्रह्मणः परमात्मनः कोशोऽसि । अर्सेरिवोपलब्ध्यधिष्ठानत्वात् । त्वं हि ब्रह्मणः प्रतीकं, त्वयि ब्रह्मोपलभ्यते । मेधया लौकिकप्रज्ञया पिहित आच्छादित· स त्वं सामान्यप्रज्ञैरविदिततत्त्व इत्यर्थः । श्रुतं श्रवणपूर्वकमात्मज्ञानादिकं विज्ञानं मे गोपाय रक्ष । तत्प्राप्त्यविस्मरणादिकं कुर्वित्यर्थः । जपार्था एते मंत्रा मेधाकामस्य । होमार्थास्त्वधुना श्रीकामस्य मंत्रा उच्यन्ते आवहन्त्यानयन्ती । वितन्वाना विस्तारयन्ती । तनोतेस्तत्कर्मत्वात् । कुर्वाणा निर्वर्तयन्ती अचीरमाचिरं क्षिप्रमेव । छान्दसो दीर्घ· । चिरं वा । आत्मनो मम, किमित्याह— वासांसि वस्त्राणि मम गावश्च गाश्चेति यावत् । अन्नपाने च सर्वदैवमादीनि कुर्वाणा श्रीर्या तां ततो मेधानिर्वर्तनात्परमावह आनय । अमेधसो हि श्रीरनर्थायैवेति । किंविशिष्टाम् । लोमशामजाव्यादियुक्तामन्यैश्च पशुभिः संयुक्तामावहेति । अधिकारादोंकार एवाभिसंबध्यते । स्वाहा, स्वाहाकारो होमार्थमंत्रान्तज्ञापनार्थः । आ मायन्त्विति । आयन्तु मामिति व्यवहितेन संबंध , ब्रह्मचारिणः । विमाऽऽयन्तु प्रमाऽऽयन्तु दमायन्तु शमायन्त्वित्यादि । यशो यशस्त्वी जने जनसमूहेऽसानि भवानि । श्रेयान्प्रशस्यतरो वस्यसो वसीयसो वसुतराद्वसुमत्तराद्वा तुल्यजातीयानां विशेषवान् धनवत्स्वजातीयपुरुषाद्विशेषवानहमसानीत्यर्थः । किंच तं ब्रह्मणः कोशभूतं त्वा त्वां हे भग भगवन्पूजार्ह प्रविशानि, प्रविश्य चानन्यस्त्वदात्मैव भवानीत्यर्थः । स त्वमपि मा मां भग भगवन्पूजावन्प्र-

विश आवयोरेकत्वमेवास्तु । तस्मिंस्त्वयि सहस्रशाखे बहुभेदे निमृजे शोधयाम्यहं पापकृत्याम् । यथा लोक आपः प्रवता प्रवणवता निम्नवता देशेन यन्ति गच्छन्ति । यथा च मासा अहर्जरं संवत्सरोऽहर्जरः । अहोभिः परिवर्तमानो लोकाञ्जरयतीति अहानि वाऽस्मिंजीर्यन्त्यंतर्भवन्तीत्यहर्जर । तं च यथा मासा यन्त्येवं मां ब्रह्मचारिणो हे धातः सर्वस्य विधातः, मामायन्त्वागच्छन्तु सर्वतः सर्वदिग्भ्यः । प्रतिवेश श्रमापनयनस्थानमासन्नं गृहमित्यर्थः । एवं त्वं प्रतिवेश इव प्रतिवेशस्त्वच्छीलिनां सर्वपापदुःखापनयनस्थानमसि । अतो मा मां प्रति प्रभाहि प्रकाशयात्मानं प्रपद्यस्व च मां, रसविद्धमिव लोहं त्वन्मयं त्वदात्मानं कुर्वित्यर्थ । श्रीकामोऽस्मिन्विद्याप्रकरणेऽभिधीयमानो धनार्थः । धनं च कर्मार्थम् । कर्म चोपात्तदुरितक्षयार्थम् । तत्क्षये हि विद्या प्रकाशते । तथा च स्मृतिः— "ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः । यथादर्शतले प्रख्ये पश्यन्त्यात्मानमात्मनि" इति ॥

भूर्भुवः सुवरिति वा एतास्तिस्रो व्याहृतयः । तासामु ह स्मैतां चतुर्थीम् । माहाचमस्यः प्रवेदयते । मह इति । तद्ब्रह्म । स आत्मा । अंगान्यन्या देवताः । भूरिति वा अयं लोकः । भुव इत्यंतरिक्षम् । सुवरित्यसौ लोकः ॥१॥ मह इत्यादित्यः । आदित्येन वाव सर्वे लोका महीयन्ते । भूरिति वा अग्निः । भुव इति वायुः । सुवरित्यादित्यः । मह इति चंद्रमाः । चंद्रमसा वाव सर्वाणि ज्योतींषि महीयन्ते । भूरिति वा ऋचः । भुव इति सामानि । सुवरिति यजूंषि ॥२॥ मह इति ब्रह्म । ब्रह्मणा वाव सर्वे वेदा महीयन्ते । भूरिति वै प्राणः । भुव इत्यपानः । सुवरिति व्यानः । मह इत्यन्नम् । अन्नेन वाव सर्वे प्राणा महीयन्ते । ता वा एताश्चतस्रश्चतुर्धा । चतस्रश्चतस्रो व्याहृतयः । ता यो वेद । स वेद ब्रह्म । सर्वेऽस्मै देवा बलिमावहन्ति ॥३॥ इति पंचमोनुवाकः ॥५॥

संहिताविषयमुपासनमुक्तं, तदनु मेधाकामस्य श्रीकामस्य च मंत्रा अनुक्रान्ताः ते च पारंपर्येण विद्योपयोगार्था एव । अनंतरं व्याहृत्यात्मनो ब्रह्मणोऽन्त रुपासनं स्वाराज्यफलं प्रस्तूयते । भूर्भुवः सुवरिति । इतीत्युक्तोपप्रदर्शनार्थः । एतास्तिस्र इति च प्रदर्शितानां परामर्शार्थः । परामृष्टाः स्मर्यन्ते वै इत्यनेन । तिस्र एताः प्रसिद्धा व्याहृतयः स्मर्यन्ते इति यावत् । तासामियं चतुर्थी व्याहृतिर्मह

इति । तामेता चतुर्धा महाचमस्यापत्यं माहाचमस्यः प्रवेदयते । उ ह स्म, इत्येतेषां वृत्तानुकथनार्थत्वाद्विदितवान्ददर्शेत्यर्थः । माहाचमस्यग्रहणमार्षानुस्मरणार्थम् । ऋषिस्मरणमप्युपासनांगमिति गम्यत इहोपदेशात् । येयं माहाचमस्येन दृष्टा व्याहृतिर्मह इति तद्ब्रह्म महद्धि ब्रह्म महश्च व्याहृति । किं पुनस्तत् ? स आत्मा । आप्नोतेर्व्याप्तिकर्मणः आत्मा । इतराश्च व्याहृतयो लोका देवा वेदाः प्राणाश्च मह इत्यनेन व्याहृत्यात्मनादित्यचंद्रब्रह्मान्नभूतेन व्याप्यन्ते यतः । अतोऽगान्यवयवा अन्या देवताः । देवताग्रहणमुपलक्षणार्थं लोकादीनाम् । मह इत्येतस्य व्याहृत्यात्मनो देवा लोकादयश्च सर्वेऽवयवभूता यत अत आह— आदित्यादिभिर्लोकादयो महीयन्त इति । आत्मनो ह्यंगानि महीयन्ते । महनं वृद्धिरुपचयो, महीयन्ते वर्धन्त इत्यर्थः । अयं लोकोऽग्निर्ऋग्वेद प्राण इति प्रथमा व्याहृतिर्भूरिति । अंतरिक्षं वायुः सामान्यपान इति द्वितीया व्याहृतिर्भुव । असौ लोक आदित्यो यजूंषि व्यान इति तृतीया व्याहृतिः सुवः । आदित्यश्चंद्रमा ब्रह्मान्नमिति चतुर्थी व्याहृतिः महः । इत्येवमेकैकाश्चतुर्धा भवन्ति । मह इति ब्रह्म, ब्रह्मेत्योंकारः शब्दाधिकारेऽन्यस्यासंभवात् । उक्तार्थमन्यत् । ता वा एताश्चतस्रश्चतुर्धेति । ता वै एता भूर्भुवःसुवर्मह इति चतस्र एकैकशश्चतुर्धा चतुःप्रकारा । धाशब्दः प्रकारवचन । चतस्रश्चतस्रः सत्यश्चतुर्धा भवन्तीत्यर्थः । तासां यथाकल्पानां पुनरुपदेशस्तथैवोपासननियमार्थः । ता यथोक्ताः व्याहृतीर्यो वेद स वेद विजानाति । किं तत ब्रह्म । ननु तद्ब्रह्म स आत्मेति ज्ञाते ब्रह्मणि न वक्तव्यमविज्ञातवत्स वेद ब्रह्मेति । न । तद्विशेषविवक्षुत्वादोषः । सत्यं विज्ञातं चतुर्थव्याहृत्यात्मा ब्रह्मेति, न तु तद्विशेषो हृदयान्तरुपलभ्यत्वं मनोमयत्वादिश्च । 'शान्तिसमृद्धम्' इत्येवमंतो विशेषणविशेष्यरूपो धर्मपूगो विज्ञायत इति तद्विवक्षु हि शास्त्रमविज्ञातमिव ब्रह्म मत्वा स वेद ब्रह्मेत्याह । अतो न दोषः । यो हि वक्ष्यमाणेन धर्मपूगेण विशिष्टं ब्रह्म वेद स वेद ब्रह्मेत्यभिप्रायः । अतो वक्ष्यमाणानुवाकेनैकवाक्यतास्य, उभयोर्ह्यनुवाकयोरेकमुपासनम् । लिंगाच्च । भूरित्यग्नौ प्रतितिष्ठतीत्यादिकं लिंगमुपासनैकत्वे । विधायकाभावाच्च । न हि वेद उपासितव्य इति विधायकः कश्चिच्छब्दोऽस्ति । व्याहृत्यनुवाके 'ता यो वेद' इति च वक्ष्यमाणार्थत्वान्नोपासनभेदकः । वक्ष्यमाणार्थत्वं च तद्विशेषविवक्षुत्वादित्यादिनोक्तम् । सर्वे देवा

अस्मा एवंविदुषे अंगभूता आवहन्त्यानयन्ति बलिं स्वाराज्यप्राप्तौ सत्यामित्यर्थः ।

भूर्भुवःसुवःस्वरूपा मह इत्येतस्य व्याहृत्यात्मनो ब्रह्मणोऽगान्यन्या देवता इत्युक्तम् । यस्य ता अंगभूतास्तस्यैतस्य ब्रह्मण साक्षादुपलब्ध्यर्थमुपासनार्थं च हृदयाकाशः स्थानमुच्यते शालग्राम इव विष्णो. । तस्मिन्हि तद्ब्रह्मोपास्यमानं मनोमयत्वादिधर्मविशिष्टं साक्षादुपलभ्यते, पाणाविवामलकम् । मार्गश्च सर्वात्मभावप्रतिपत्तये वक्तव्य इत्यनुवाक आरभ्यते—

स य एषोऽन्तर्हृदय आकाशः । तस्मिन्नयं पुरुषो मनोमयः । अमृतो हिरण्मयः । अंतरेण तालुके । य एष स्तन इवावलंबते । सेंद्रयोनिः । यत्रासौ केशान्तो विवर्तते । व्यपोह्य शीर्षकपाले । भूरित्यग्नौ प्रतितिष्ठति । भुव इति वायौ ॥१॥

स इति व्युत्क्रम्य 'अयं पुरुष' इत्यनेन संबध्यते । य एषोऽन्तर्हृदये हृदयस्यान्तः । हृदयमिति पुंडरीकाकारो मांसपिंडः प्राणायतनो अनेकनाडीसुषिर ऊर्ध्वनालोऽधोमुखो विशस्यमाने पशौ प्रसिद्ध उपलभ्यते । तस्यान्तर्य एष आकाशः प्रसिद्ध एव कारकाकाशवत् । तस्मिन्नोऽयं पुरुषः । पुरि शयनात्पूर्णा वा भूरादयो लोका येनेति पुरुषो मनोमयः । मनो विज्ञानम् । मनुतेर्ज्ञानकर्मणः तन्मयस्तत्प्रायस्तदुपलभ्यत्वात् । मनुतेऽनेनेति वा मनोऽन्तःकरणं, तदभिमानी तन्मयस्तल्लिंगो वा । अमृतोऽमरणधर्मा, हिरण्मयो ज्योतिर्मय. । तस्यैवंलक्षणस्य हृदयाकाशे साक्षात्कृतस्य विदुष आत्मभूतस्येश्वररूपप्रतिपत्तये मार्गोऽभिधीयते । हृदयाद्ऊर्ध्व प्रवृत्ता सुषुम्ना नाम नाडी योगशास्त्रेषु प्रसिद्धा । सा चान्तरेण मध्ये प्रसिद्धे तालुके तालुकयोर्गता । यश्चैष तालुकयोर्मध्ये स्तन इवावलंबते मांसखंडस्तस्य चांतरेणेत्येतत् । यत्र च केशान्तः केशानामंतोऽवसानं मूलं केशान्तो विवर्तते विभागेन वर्तते मूर्ध्वप्रदेश इत्यर्थः । तं देशं प्राप्य तत्र विनिःसृता । व्यपोह्य विभज्य विदार्य शीर्षकपाले शिरःकपाले विनिर्गता या सेंद्रयोनिरिंद्रस्य ब्रह्मणो योनिर्मार्गः स्वरूपप्रतिपत्तिद्वारमित्यर्थः । तयैवं विद्वान्मनोमयात्मदर्शी मूर्ध्नो विनिष्क्रम्यास्य लोकस्याधिष्ठाता भूरितिव्याहृतिरूपो योऽग्निर्महतो ब्रह्मणोंगभूतस्तस्मिन्नग्नौ प्रतितिष्ठत्यग्न्यात्मनेमं लोकं व्याप्नोतीत्यर्थः । तथा भुव इति द्वितीयव्याहृत्यात्मनि वायौ । प्रतितिष्ठतीत्यनुवर्तते ॥

सुवरित्यादित्ये । मह इति ब्रह्मणि । आप्नोति स्वाराज्यम् । आप्नोति

मनसस्पतिम् । वाक्पतिश्चक्षुष्पति· । श्रोत्रपतिर्विज्ञानपतिः । एतत्ततो भवति। आकाशशरीरं ब्रह्म । सत्यात्म प्राणारामं मनआनंदम् । शान्तिसमृद्ध-ममृतम् । इति प्राचीनयोग्योपास्स्व ॥२॥ इति षष्ठोऽनुवाकः ॥६॥

सुवरिति तृतीयव्याहृत्यात्मन्यादित्ये । मह इत्यंगिनि चतुर्थव्याहृत्या-त्मनि ब्रह्मणि प्रतितिष्ठति । तेज्वात्मभावेन स्थित्वाप्नोति ब्रह्मभूत. स्वाराज्यं स्वराड्भावं स्वयमेव राजाधिपतिर्भवति, अंगभूतानां देवानां यथा ब्रह्म । देवाश्च सर्वेऽस्मै बलिमावहन्त्यंगभूता यथा ब्रह्मणे । आप्नोति मनसस्पतिम् । सर्वेषां हि मनसां पति सर्वात्मकत्वाद्ब्रह्मणः । सर्वैर्हि मनोभिस्तन्मनुते । तदाप्नोत्येवं वि-द्वान् । किंच वाक्पति सर्वासां वाचां पतिर्भवति । तथैव चक्षुष्पतिश्चक्षुषा पति. । श्रोत्रपतिः श्रोत्राणां पति । विज्ञानपतिर्विज्ञानानां च पतिः । सर्वात्मकत्वा-त्सर्वप्राणिनां करणैस्तद्वान्भवतीत्यर्थ· । किंच ततोऽप्यधिकतरमेतद्भवति । किं तत् । उच्यते । आकाशशरीरमाकाश· शरीरमस्य आकाशवद्वा सूक्ष्मं शरीर-मस्येत्याकाशशरीरम् । किं तत् । प्रकृतं ब्रह्म । सत्यात्म सत्यं मूर्तामूर्तमवितथं स्वरूपं वात्मा स्वभावोऽस्य तदिदं सत्यात्म । प्राणारामं प्राणेष्वारमणमार्क्राडा यस्य तत्प्राणारामम् । प्राणानां वारामो यस्मिंस्तत्प्राणारामम् । मनआनंदम् । आनंदभूतं सुखक्रुदेव यस्य मनस्तन्मनआनंदम् । शान्तिसमृद्धं शान्तिरुपशम. शान्तिश्च तत्समृद्धं च शान्तिसमृद्धम । शान्त्या वा समृद्धं तदुपलभ्यत इति शान्तिसमृद्धम् । अमृतममरणधर्मि । एतच्चाधिकतरं विशेषणं तत्रैव मनोमय इत्यादौ द्रष्टव्यमिति । एवं मनोमयत्वादिधर्मैर्विशिष्टं यथोक्तं ब्रह्म हे प्राचीन-योग्य, उपास्स्वेत्याचार्यवचनोक्तिरादरार्था ॥

यदेतद्व्याहृत्यात्मकं ब्रह्मोपास्यमुक्तं तस्यैवेदानीं पृथिव्यादिपांक्तस्वरूपे-णोपासनमुच्यते । पंचसंख्यायोगात्पंक्तिच्छंद.संपत्तिः । ततः पांक्तत्वं सर्वस्य । पांक्तश्च यज्ञ· । "पंचपदा पंक्ति· । पांक्तो यज्ञ." इति श्रुतेः । तेन यत्सर्व लोकाद्यात्मान्तं च पांक्तं परिकल्पयति यज्ञमेव तत्परिकल्पयति । तेन यज्ञेन परिकल्पितेन पांक्तात्मकं प्रजापतिमभिसंपद्यते । तत्कथं पांक्तभिदं सर्वमि-त्यत आह—

पृथिव्यंतरिक्षं द्यौर्दिशोऽवान्तरदिशाः । अग्निर्वायुरादित्यश्चंद्रमा नक्षत्राणि । आप ओषधयो वनस्पतय आकाश आत्मा । इत्यधिभूतम् । अथाध्यात्मम् ।

प्राणो व्यानोऽपान उदानः समानः । चक्षुः श्रोत्रं मनो वाक्त्वक् । चर्म मांसं स्नावास्थि मज्जा । एतदधिविधाय ऋषिरवोचत् । पांक्तं वा इदं सर्वम् । पांक्तेनैव पांक्तं स्पृणोतीति ॥१॥ इति सप्तमोऽनुवाकः ॥७॥

पृथिव्यंतरिक्षं द्यौर्दिशोऽवान्तरदिशः इति लोकपांक्तम् । अग्निर्वायुरादित्यश्चंद्रमा नक्षत्राणीति देवतापांक्तम् । आप ओषधयो वनस्पतय आकाश आत्मेति भूतपांक्तम् । आत्मेति विराड्भूताधिकारात् । इत्यधिभूतामित्यधिलोकाधिदैवतपांक्तद्वयोपलक्षणार्थम् । लोकदेवतापाक्तयोश्चाभिहितत्वात् । अथानंतरमध्यात्मं पांक्तत्रयमुच्यते—प्राणादि वायुपांक्तम् । चक्षुरादीद्रियपाक्तम् । चर्मादि धातुपांक्तम् । एतावद्वीदं सर्वमध्यात्मम् । बाह्यं च पांक्तमेवेत्येतदेवमाधिविधाय परिकल्प्यर्षिर्वेद एतद्दर्शनसंपन्नो वा कश्चिद्दर्षिरवोचदुक्तवान् । किमित्याह—पांक्तं वा इदं सर्वं पाक्तेनैवाध्यात्मिकेन संख्यासामान्यात्पांक्तं बाह्यं स्पृणोति बलयति पूरयति । एकात्मतयोपलभ्यत इत्येतत् । एवं पांक्तमिदं सर्वमिति यो वेद स प्राजापत्यात्मैव भवतीत्यर्थः ॥

ओमिति ब्रह्म । ओमितीदं सर्वम् । ओमित्येतदनुकृतिर्ह स्म वा अप्यो श्रावयत्याश्रावयन्ति । ओमिति सामानि गायन्ति । ओं शोमिति शस्त्राणि शंसन्ति । ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति । ओमिति ब्रह्मा प्रसौति । ओमित्यग्निहोत्रमनुजानाति । ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति । ब्रह्मैवोपाप्नोति ॥१॥ इति अष्टमोऽनुवाकः ॥८॥

व्याहृत्यात्मनो ब्रह्मण उपासनमुक्तम् । अनंतरं च पांक्तस्वरूपेण तस्यैवोपासनमुक्तम् । इदानीं सर्वोपासनांगभूतस्योंकारस्योपासनं विधित्स्यते । परापरब्रह्मदृष्ट्या ह्युपास्यमान ओंकारः शब्दमात्रोऽपि परापरब्रह्मप्राप्तिसाधनं भवति । स हि आलंबनं ब्रह्मणः परस्यापरस्य च, प्रतिमेव विष्णोः । "एतेनैवायतनेनैकतरमन्वेति" इति श्रुतेः । ओमिति । इतिशब्दः स्वरूपपरिच्छेदार्थः । ओमित्येतच्छब्दरूपं ब्रह्मेति मनसा धारयेदुपासीत । यत ओमितीदं सर्वं हि शब्दरूपमोंकारेण व्याप्तम् । "तद्यथा शंकुना" इति श्रुत्यंतरात् । अभिधानतंत्रं ह्यभिधेयामित्यत इदं सर्वमोंकार इत्युच्यते । ओंकारस्तुत्यर्थमुत्तरो ग्रंथः । उपास्यत्वात्तस्य । ओमित्येतदनुकृतिरनुकरणम् । करोमि यास्यामि चेति कृतमुक्त ओमित्यनुकरोत्यन्यः । अत ओंकारोऽनुकृतिः । ह स्म वा इति प्रसि-

द्भावद्योतकाः । प्रसिद्धं ह्योंकारस्यानुकृतित्वम् । अपि च "ओ श्रावय" इति प्रैषपूर्वकमाश्रावयन्ति प्रतिश्रावयन्ति । तथोमिति सामानि गायन्ति सामगाः । ॐ ओमिति शस्त्राणि शंसन्ति शस्त्रशंसितारोऽपि । तथोमित्यध्वर्युः प्रतिगरं प्रतिगृणाति । ओमिति ब्रह्मा प्रसौत्यनुजानाति । ओमित्यग्निहोत्रमनुजानाति । जुहोमीत्युक्त ओमित्येवानुज्ञां प्रयच्छति । ओमित्येव ब्राह्मणः प्रवक्ष्यन्प्रवचनं करिष्यन्नध्येष्यमाण ओमित्येवाह ओमिति प्रतिपद्यतेऽध्येतुमित्यर्थः । ब्रह्म वेदमुपाप्नवानीति प्राप्नुयां ग्रहीष्यामीति उपाप्नोत्येव ब्रह्म । अथवा ब्रह्म परमात्मानमुपाप्नवानीत्यात्मानं प्रवक्ष्यन्प्रापयिष्यन्नोमित्येवाह । स च तेनोंकारेण ब्रह्म प्राप्नोत्येव । ओंकारपूर्वं प्रवृत्तानां क्रियाणां फलवत्त्वं यस्मात्तस्मादोंकारं ब्रह्मेत्युपासीतेति वाक्यार्थः ॥

ऋतं च स्वाध्यायप्रवचने च । सत्यं च स्वाध्यायप्रवचने च । तपश्च स्वाध्यायप्रवचने च । दमश्च स्वाध्यायप्रवचने च । शमश्च स्वाध्यायप्रवचने च । अग्नयश्च स्वाध्यायप्रवचने च । अग्निहोत्रं च स्वाध्यायप्रवचने च । अतिथयश्च स्वाध्यायप्रवचने च । मानुषं च स्वाध्यायप्रवचने च । प्रजा च स्वाध्यायप्रवचने च । प्रजनश्च स्वाध्यायप्रवचने च । प्रजातिश्च स्वाध्यायप्रवचने च । सत्यमिति सत्यवचा राथीतरः । तप इति तपोनित्यः पौरुशिष्टिः । स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः । तद्धि तपस्तद्धि तपः ॥१॥ इति नवमोऽनुवाकः ॥९॥

विज्ञानादेवाप्नोति स्वाराज्यमित्युक्तत्वाच्छ्रौतस्मार्तानां कर्मणामानर्थक्यं प्राप्तमित्येतन्मा प्रापदिति कर्मणां पुरुषार्थं प्रति साधनत्वप्रदर्शनार्थमिहोपन्यासः । ऋतमिति व्याख्यातम् । स्वाध्यायोऽध्ययनम् । प्रवचनमध्यापनं ब्रह्मयज्ञो वा । एतान्यृतादीन्यनुष्ठेयानीति वाक्यशेषः । सत्यं सत्यवचनं यथाव्याख्यातार्थं वा । तपः कृच्छ्रादि । दमो बाह्यकरणोपशमः । शमोऽन्तःकरणोपशमः । अग्नय आधातव्याः । अग्निहोत्रं च होतव्यम् । अतिथयश्च पूज्याः । मानुषमिति लौकिकः संव्यवहारः । तच्च यथाप्राप्तमनुष्ठेयम् । प्रजा चोत्पाद्या । प्रजनश्च प्रजननमृतौ भार्यागमनमित्यर्थः । प्रजातिः प्रौत्रोत्पत्तिः पुत्रो निवेशयितव्य इत्येतत् । सर्वैरेतैः कर्मभिर्युक्तस्यापि स्वाध्यायप्रवचने यत्नतोऽनुष्ठेये इत्येवमर्थं सर्वेण सह स्वाध्यायप्रवचनग्रहणम् । स्वाध्यायाधीनं ह्यर्थज्ञानम् । अर्थज्ञानायत्तं च परं श्रेयः । प्रवचनं

च तदविस्मरणार्थं धर्मप्रवृद्धयर्थं च । अतः स्वाध्यायप्रवचनयोरादरः कार्यः । सत्यमिति सत्यमेवानुष्ठातव्यमिति सत्यवचाः सत्यमेव वचो यस्य सोऽयं सत्यवचा, नाम वा तस्य । राथीतरो रथीतरगोत्रो राथीतर आचार्यो मन्यते । तप इति तप एव कर्तव्यमिति तपोनित्यस्तपसि नित्यस्तपःपरः तपोनित्य इति वा नाम । पौरुशिष्टिः पुरुशिष्टस्यापत्यं पौरुशिष्टिराचार्यो मन्यते । स्वाध्यायप्रवचने एवानुष्ठेये इति नाको नामतो मुद्गलस्यापत्यं मौद्गल्य आचार्यो मन्यते । तद्धि तपस्तद्धि तपः । हि यस्मात्स्वाध्यायप्रवचने एव तपस्तस्मात्ते एवानुष्ठेये इति । उक्तानामपि सत्यतपःस्वाध्यायप्रवचनाना पुनर्ग्रहणमादरार्थम् ॥

अहं वृक्षस्य रेरिवा । कीर्तिः पृष्ठं गिरेरिव । ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि । द्रविणं सवर्चसम् । सुमेधा अमृतोक्षितः । इति त्रिशंकोर्वेदानुवचनम् ॥१॥ इति दशमोऽनुवाकः ॥१०॥

अहं वृक्षस्य रेरिवेति स्वाध्यायार्थो मंत्राम्नायः । स्वाध्यायश्च विद्योत्पत्तये । प्रकरणात । विद्यार्थ हि इदं प्रकरणम् । न चान्यार्थत्वमवगम्यते । स्वाध्यायेन च विशुद्धसत्त्वस्य विद्योत्पत्तिरवकल्प्यते । अहं वृक्षस्योच्छेदात्मकस्य संसारवृक्षस्य रेरिवा प्रेरयिताऽन्तर्याम्यात्मना । कीर्तिः ख्यातिर्गिरेः पृष्ठमिवोच्छ्रिता मम । ऊर्ध्वपवित्र ऊर्ध्वं कारणं पवित्रं पावनं ज्ञानप्रकाश्यं परमं ब्रह्म यस्य सर्वात्मनो मम, सोऽहमूर्ध्वपवित्र. । वाजिनीव वाजवतीव । वाजमन्नं तद्वति सवितरीत्यर्थः । यथा सवितर्यमृतमात्मतत्त्वं विशुद्धं प्रसिद्धं श्रुतिस्मृतिशतेभ्यः, एवं स्वमृतं शोभनं विशुद्धमात्मतत्त्वमस्मि भवामि । द्रविणं धनं सवर्चसं दीप्तिमत्तेदेवात्मतत्त्वमस्मीत्यनुवर्तते । ब्रह्मज्ञानं वा आत्मतत्त्वप्रकाशकत्वात्सवर्चसम् । द्रविणमिव द्रविणं मोक्षसुखहेतुत्वात् । अस्मिन्पक्षे प्राप्तं मयेत्यध्याहारः कर्तव्यः । सुमेधाः शोभना मेधा सर्वज्ञलक्षणा यस्य मम सोऽहं सुमेधा. । संसारस्थित्युत्पत्तिसंहारकौशलयोगात्सुमेधस्त्वम् । अत एवामृतोऽमरणधर्माऽक्षितोऽक्षीणोऽव्ययः अक्षितो वा । अमृतेन वोक्षितः सिक्तः । "अमृतोक्षितोऽहम्" इत्यादि ब्राह्मणम् । इत्येवं त्रिशंकोर्ऋषेर्ब्रह्मभूतस्य ब्रह्मविदो वेदानुवचनं, वेदो वेदनमात्मैकत्वविज्ञानं, तस्य प्राप्तिमनु वचनं वेदानुवचनम् । आत्मनः कृतकृत्यताख्यापनार्थं वामदेववत्त्रिशंकुनार्षेण दर्शनेन दृष्टो मंत्राम्नाय आत्मविद्याप्रकाशक इत्यर्थः । अस्य च जपो विद्योत्पत्त्यर्थोऽवगम्यते । ऋतं चेत्या-

देधर्मोपन्यासादनंतरं च वेदानुवचनपाठोदेतदवगम्यते । एवं श्रौतस्मार्तेषु नित्येषु कर्मसु युक्तस्य निष्कामस्य परं ब्रह्म विविदिषोरार्षाणि दर्शनानि प्रादुर्भवन्त्यात्मादिविषयाणीति ॥

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति । सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातंतुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ॥१॥ देवपितृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि । तानि सेवितव्यानि नो इतराणि । यान्यस्माकं सुचरितानि । तानि त्वयोपास्यानि ॥२॥ नो इतराणि । ये के चास्मच्छ्रेयांसो ब्राह्मणाः । तेषां त्वयासनेन प्रश्वसितव्यम् । श्रद्धया देयम् । अश्रद्धयाऽदेयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम् । अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ॥३॥ ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामाः स्युः । यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः । अथाभ्याख्यातेषु । ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामाः स्युः । यथा ते तेषु वर्तेरन् । तथा तेषु वर्तेथाः । एष आदेशः । एष उपदेशः । एषा वेदोपनिषत् । एतदनुशासनम् । एवमुपासितव्यम् । एवमु चैतदुपास्यम् ॥४॥ इति एकादशोऽनुवाकः ॥११॥

वेदमनूच्येत्येवमादिकर्तव्यतोपदेशारंभः प्राग्ब्रह्मविज्ञानान्नियमेन कर्तव्यानि श्रौतस्मार्तकर्माणीत्येवमर्थः । अनुशासनश्रुतेः पुरुषसंस्कारार्थत्वात् । संस्कृतस्य हि विशुद्धसत्त्वस्यात्मज्ञानमंजसैवोत्पद्यते । "तपसा कल्मषं हन्ति विद्ययामृतमश्नुते" इति स्मृतिः । वक्ष्यति च 'तपसा ब्रह्म विजिज्ञासस्व' इति । अतो विद्योत्पत्त्यर्थमनुष्ठेयानि कर्माणि । अनुशास्तीत्यनुशासनशब्दादनुशासनातिक्रमे हि दोषोत्पत्तिः । प्रागुपन्यासाच्च कर्मणां केवलब्रह्मविद्यारंभाच्च पूर्वं कर्माण्युपन्यस्तानि । उदितायां च ब्रह्मविद्यायां "अभयं प्रतिष्ठां विदते" "न बिभेति कुतश्चन" "किमहं साधु नाकरवम्" इत्येवमादिना कर्मनैष्कर्म्यं दर्शयिष्यति । अतोऽवगम्यते पूर्वोपचितदुरितक्षयद्वारेण विद्योत्पत्त्यर्थानि

कर्माणीति । मंत्रवर्णाच्च— 'अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते' इति । ऋतादीनां पूर्वत्रोपदेशः आनर्थक्यपरिहारार्थः । इह तु ज्ञानोत्पत्त्यर्थत्वात्कर्तव्यनियमार्थः । वेदमनूच्याध्याप्याचार्योऽन्तेवासिनं शिष्यमनुशास्ति ग्रंथग्रहणादनु पश्चाच्छास्ति तदर्थ ग्राहयतीत्यर्थः । अतोऽवगम्यतेऽधीतवेदस्य धर्मजिज्ञासामकृत्वा गुरुकुलान्न समावर्तितव्यमिति । "बुद्ध्वा कर्माणि चारभेत्" इति स्मृतेश्च । कथमनुशास्तीत्याह— सत्यं वद यथाप्रमाणावगतं वक्तव्यं तद्वद । तद्वद्धर्मं चर । धर्म इत्यनुष्ठेयानां सामान्यवचनं, सत्यादिविशेषनिर्देशात् । स्वाध्यायादध्ययनान्मा प्रमदः प्रमादं मा कार्षीः । आचार्याय आचार्यार्थं प्रियमिष्टं धनमाहृत्यानीय दत्त्वा विद्यानिष्क्रयार्थं आचार्येण चानुज्ञातोऽनुरूपान्दारानाहृत्य प्रजातंतुं प्रजासंतानं मा व्यवच्छेत्सीः, प्रजासंततेर्विच्छित्तिर्न कर्तव्या । अनुत्पद्यमानेऽपि पुत्रे पुत्रकाम्यादिकर्मणा तदुत्पत्तौ यत्नः कर्तव्य इत्यभिप्रायः । प्रजाप्रजननप्रजातिव्रयनिर्देशसामर्थ्यात् । अन्यथा प्रजननश्चेत्येतदेकमेवावक्ष्यत् । सत्यान्न प्रमदितव्यं प्रमादो न कर्तव्यः । सत्याच्च प्रमदनमनृतप्रसंग । प्रमादशब्दसामर्थ्यात् । विस्मृत्याप्यनृतं न वक्तव्यमित्यर्थः । अन्यथा असत्यवदनप्रतिषेध एव स्यात् । धर्मान्न प्रमदितव्यम् । धर्मशब्दस्यानुष्ठेयविषयत्वादननुष्ठानं प्रमादः, स न कर्तव्यः, अनुष्ठातव्य एव धर्म इति यावत् । एवं कुशलादात्मरक्षार्थात्कर्मणो न प्रमदितव्यम् । भूतिर्विभूतिस्तस्यै भूत्यै भूत्यर्थान्मंगलयुक्तात्कर्मणो न प्रमदितव्यम । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । स्वाध्यायोऽध्ययनं प्रवचनमध्यापनं ताभ्यां न प्रमदितव्यम् । ते हि नियमेन कर्तव्ये इत्यर्थः । तथा देवपितृकार्याभ्यां न प्रमदितव्यम् । दैवपित्र्ये कर्मणी कर्तव्ये । मातृदेवो माता देवो यस्य स त्वं मातृदेवो भव स्याः । एवं पितृदेव आचार्यदेवोऽतिथिदेवो भव । देवतावदुपास्या एत इत्यर्थः । यान्यपि चान्यान्यनवद्यान्यनिंदितानि शिष्टाचारलक्षणानि कर्माणि तानि सेवितव्यानि कर्तव्यानि त्वया । नो न कर्तव्यानीतराणि सावद्यानि शिष्टकृतान्यपि । यान्यस्माकमाचार्याणां सुचरितानि शोभनचरितान्यान्नायाद्यविरुद्धानि तान्येव त्वयोपास्यान्यदृष्टार्थान्यनुष्ठेयानि, नियमेन कर्तव्यानीति यावत् । नो इतराणि विपरीतान्याचार्यकृतान्यपि । ये के च विशेषिता आचार्यत्वादिधर्मैरस्मदस्मत्तः श्रेयांसः प्रशस्यतरास्ते च ब्राह्मणा न क्षत्रियादयः तेषामासनेन आसनदानादिना त्वया प्रश्वसि-

तव्यम । प्रश्वसनं प्रश्वास· श्रमापनय· तेषां श्रमस्त्वयापनेतव्य इत्यर्थः । तेषां वा आसने गोष्ठीनिमित्ते समुदिते, तेषु न प्रश्वसितव्यं प्रश्वासोऽपि न कर्तव्य· । केवलं तदुक्तसारग्राहिणा भवितव्यम् । किंच यत्किंचिद्देयं तच्छ्रद्धयैव दातव्यम् । अश्रद्धया अदेयं न दातव्यम् । श्रिया विभूत्या देयं दातव्यम् । ह्रिया लज्जया च देयम । भिया भयेन च देयम । संविदा च । संविन्मित्रादिकार्यम । अथैवं वर्तमानस्य यदि कदाचित्ते तव श्रौते स्मार्ते वा कर्मणि वृत्ते वा आचारलक्षणे विचिकित्सा संशय स्यात् । ये तत्र तस्मिन्देशे काले वा ब्राह्मणास्तत्र कर्मादौ युक्ता इति व्यवहितेन संबंधः कर्तव्य । समर्शिनो विचारक्षमा । युक्ता अभियुक्ता. कर्मणि वृत्ते वा । आयुक्ता अपरप्रयुक्ता. । अलूक्षा अरूक्षा अक्रूरमतय· । धर्मकामा अदृष्टार्थिनोऽकामहता इत्येतत्स्युर्भवेयु । ते ब्राह्मणा यथा येन प्रकारेण तत्र तस्मिन्कर्मणि वृत्ते वा वर्तेरंस्तथा त्वमपि वर्तेथा । अथाभ्याख्यातेष्वभ्याख्याता अभ्युक्ता दोषेण संदिह्यमानेन संयोजिता केनचित्तेषु च, यथोक्तं सर्वमुपनयेयेत्येतत्रेत्यादि । एष आदेशो विधि । एष उपदेश पुत्रादिभ्यः पित्रादीनामपि । एषा वेदोपनिषद्वेदरहस्यं वेदार्थ इत्येतत् । एतदेवानुशासनमीश्वरवचनम् । आदेशवाक्यस्य विधेरुक्तत्वात् । सर्वेषां वा प्रमाणभूतानामनुशासनमेतत् । यस्मादेवं तस्मादेवं यथोक्तं सर्वमुपासितव्यं कर्तव्यम । एवमु चैतदुपास्यमुपास्यमेव चैतन्नानुपास्यमित्यादरार्थं पुनर्वचनम ॥

अत्रैतच्चिंत्यते विद्याकर्मणोर्विवेकार्थं– किं कर्मभ्य एव केवलेभ्यः परं श्रेय·, उत विद्यासंव्यपेक्षेभ्य, आहोस्विद्विद्याकर्मभ्यां संहताभ्यां, विद्याया वा कर्मापेक्षाया, उत केवलाया एव विद्याया इति । तत्र केवलेभ्य एव कर्मभ्यः स्यात् । समस्तवेदार्थज्ञानवत कर्माधिकारात । "वेद कृत्स्नोऽधिगंतव्य. सरहस्यो द्विजन्मना" इति स्मरणात् । अधिगमश्च सहोपनिषदर्थेनात्मज्ञानादिना । "विद्वान्यजते" "विद्वान्याजयति" इति च विदुष एव कर्मण्यधिकार. प्रदर्श्यते सर्वत्र । "ज्ञात्वा चानुष्ठानम्" इति च । कृत्स्नश्च वेदः कर्मार्थ इति हि मन्यन्ते केचित् । कर्मभ्यश्चेत्परं श्रेयो नावाप्यते वेदोऽनर्थक· स्यात् ॥

न । नित्यत्वान्मोक्षस्य । नित्यो हि मोक्ष इष्यते । कर्मकार्यस्य चानित्यत्वं प्रसिद्धं लोके, कर्मभ्यश्चेच्छ्रेयोऽनित्यं स्यात्तच्चानिष्टम् । ननु काम्यप्रतिषिद्धयोरनारंभादारब्धस्य च कर्मण उपभोगेनैव क्षयान्नित्यानुष्ठानाच्च प्रत्यवायानुप-

पत्तेः ज्ञाननिरपेक्ष एव मोक्ष इति चेत् । तच्च न । शेषकर्मसंभवात्तन्निमित्तशरीरान्तरोत्पत्तिः प्राप्नोतीति प्रत्युक्तम् । कर्मशेषस्य च नित्यानुष्ठानेनाविरोधात्क्षयानुपपत्तिरिति च । यदुक्तं समस्तवेदार्थज्ञानवतः कर्माधिकारादित्यादि, तच्च न । श्रुतज्ञानव्यतिरेकादुपासनस्य । श्रुतज्ञानमात्रेण हि कर्मण्यधिक्रियते नोपासनामपेक्षते । उपासनं च श्रुतज्ञानादर्थान्तरं विधीयते मोक्षफलं, अर्थान्तरप्रसिद्धेश्च स्यात् । "श्रोतव्यः" इत्युक्त्वा तद्व्यतिरेकेण "मन्तव्यो निदिध्यासितव्यः" इति यत्नान्तरविधानान्मनननिदिध्यासनयोश्च प्रसिद्धं श्रवणज्ञानादर्थान्तरत्वम् । एवं तर्हि विद्यासंव्यपेक्षेभ्यः कर्मभ्यः स्यान्मोक्षः । विद्यासहितानां च कर्मणां भवेत्कार्यांतरारंभसामर्थ्यम् । यथा खतो मरणज्वरादिकार्यारंभसमर्थानामपि विषदध्यादीना मंत्रशर्करादिसंयुक्ताना कार्यांतरारंभसामर्थ्य, एवं विद्यासहितैः कर्मभिर्मोक्ष आरभ्यत इति चेत । न । आरभ्यस्यानित्यत्वादित्युक्तो दोषः । वचनादारभ्योऽपि नित्य एवेति चेत् । न । ज्ञापकत्वाद्वचनस्य । वचनं नाम यथाभूतस्यार्थस्य ज्ञापकं विद्यमानस्य कर्तृ । न हि वचनशतेनापि नित्यमारभ्यत आरब्धं वा अविनाशि भवेत् । एतेन विद्याकर्मणोः संहतयोर्मोक्षारंभकत्वं प्रत्युक्तम् ॥

विद्याकर्मणा मोक्षप्रतिबंधहेतुनिवर्तके इति चेत । न । कर्मणः फलांतरदर्शनात् । उत्पत्तिसंस्कारविकारासयो हि फलं कर्मणो दृश्यते । उत्पत्त्यादिफलविपरीतश्च मोक्षः । गतिश्रुतेराप्य इति चेत् । 'सूर्यद्वारेण' 'तयोर्ध्वमायन्' इत्येवमादिगतिश्रुतिभ्यः प्राप्यो मोक्ष इति चेत् । न । सर्वगतत्वाद्गन्तृभ्यश्चानन्यत्वात् । आकाशादिकारणत्वात्सर्वगतं ब्रह्म । ब्रह्मव्यतिरिक्ताश्च सर्वे विज्ञानात्मानः । अतो नाप्यो मोक्षः । गन्तुरन्यद्विभिन्नं देशं प्रति भवति गंतव्यम् । न हि येनैवाव्यतिरिक्तं यत्तत्तेनैव गम्यते । तदनन्यत्वप्रसिद्धिश्च, 'तत्सृष्ट्वा तदेवानुप्राविशत्' 'क्षेत्रज्ञं चापि मां विद्धि' इत्येवमादिश्रुतिस्मृतिशतेभ्यः ॥

गत्यैश्वर्यादिश्रुतिविरोध इति चेत् । अथापि स्याद्यद्यप्राप्यो मोक्षस्तदा गतिश्रुतीनां 'स एकधा' 'स यदि पितृलोककामो भवति' "स्त्रीभिर्वा यानैर्वा" इत्यादिश्रुतीनां च कोपः स्यादिति चेत् । न । कार्यब्रह्मविषयत्वात्तासाम् । कार्ये हि ब्रह्मणि स्त्र्यादयः स्युर्न कारणे 'एकमेवाद्वितीयं' 'यत्र नान्यत्पश्यति' 'तत्केन कं पश्येत्' इत्यादिश्रुतिभ्यः । विरोधाच्च विद्याकर्मणोः समु-

च्चयानुपपत्तिः । प्रविलीनकर्त्रादिकारकविशेषतत्त्वविषया हि विद्या तद्विपरीतकारकसाध्येन कर्मणा विरुध्यते । न ह्येकं वस्तु परमार्थतः कर्त्रादिविशेषवत्तच्छून्यं चेत्युभयथा द्रष्टुं शक्यते । अवश्यं ह्यन्यतरन्मिथ्या स्यादन्यतरस्य च मिथ्यात्वप्रसंगे युक्तं यत्खाभाविकाज्ञानविषयस्य द्वैतस्य मिथ्यात्वम्, 'यत्र हि द्वैतमिव भवति' 'मृत्योः स मृत्युमाप्नोति' "अथ यत्रान्यत्पश्यति तदल्पम्" 'अन्योऽसावन्योऽहमस्मि' 'उदरमंतरं कुरुते अथ तस्य भयं भवति' इत्यादिश्रुतिशतेभ्यः । सत्यत्वं चैकत्वस्य 'एकधैवानुद्रष्टव्यं' 'एकमेवाद्वितीयं' 'ब्रह्मैवेदं सर्वम्' 'आत्मैवेदं सर्वम' इत्यादिश्रुतिभ्यः । न च संप्रदानादिकारकभेदादर्शने कर्मोपपद्यते । अन्यत्वदर्शनापवादाश्च विद्याविषये सहस्रशः श्रूयन्ते । अतो विरोधो विद्याकर्मणोः । अतश्च समुच्चयानुपपत्तिः ॥

तत्र यदुक्तं संहताभ्यां विद्याकर्मभ्यां मोक्ष इति । अनुपपन्नं तत् । विहितत्वात्कर्मणाम् । श्रुतिविरोध इति चेत् । यद्युपमृद्य कर्त्रादिकारकविशेषमात्मैकत्वविज्ञानं विधीयते । सर्पादिभ्रान्तिविज्ञानोपमर्दकरज्ज्वादिविषयविज्ञानवत्प्राप्त. कर्मविधिश्रुतीनां निर्विषयत्वाद्विरोधः । विहितानि च कर्माणि । स च विरोधो न युक्तः । प्रमाणत्वात् श्रुतीनामिति चेन्न, पुरुषार्थोपदेशपरत्वात् श्रुतीनाम् । विद्योपदेशपरा तावत् श्रुतिः संसारात्पुरुषो मोक्षर्थितव्य इति संसारहेतोरविद्याया विद्यया निवृत्तिः कर्तव्येति विद्याप्रकाशकत्वेन प्रवृत्तेति न विरोधः । एवमपि कर्त्रादिकारकसद्भावप्रतिपादनपरं शास्त्रं विरुध्यत एवेति चेन्न । यथाप्राप्तमेव कारकास्तित्वमुपादायोपात्तदुरितक्षयार्थं कर्माणि विदधच्छास्त्रं मुमुक्षूणां फलार्थिनां च फलसाधनं न कारकास्तित्वे व्याप्रियते । उपचितदुरितप्रतिबंधस्य हि विद्योत्पत्तिर्नावकल्पते । तत्क्षये च विद्योत्पत्तिः स्यात्ततश्चाविद्यानिवृत्तिस्तत आत्यंतिकः संसारोपरमः । अपि चानात्मदार्शनो ह्यनात्मविषयः कामः । कामयमानश्च करोति कर्माणि । ततस्तत्फलोपभोगाय शरीराद्युपादानलक्षणः संसारः । तद्व्यतिरेकेण आत्मैकत्वदार्शनो विषयाभावात्कामानुत्पत्तिरात्मनि चानन्यत्वात्कामानुत्पत्तौ स्वात्मन्यवस्थानं मोक्ष इत्यतोऽपि विद्याकर्मणोः विरोधः । विरोधादेव च विद्या मोक्षं प्रति न कर्माण्यपेक्षते । स्वात्मलाभे तु पूर्वोपचितदुरितप्रतिबंधापनयद्वारेण विद्याहेतुत्वं प्रतिपद्यन्ते कर्माणि नित्यानीति । अत एवास्मिन्प्रकरणे उपन्यस्तानि कर्माणीत्यवोचाम । एवं चाविरोधः कर्मवि-

धिश्रुतीनाम् । अतः केवलाया एव विद्यायाः परं श्रेय इति सिद्धम् ॥

एवं तर्ह्याश्रमांतरानुपपत्तिः, कर्मनिमित्तत्वाद्विद्योत्पत्तेः । गार्हस्थ्ये च विहितानि कर्माणीत्येकाश्रम्यमेव । अतश्च यावज्जीवादिश्रुतयोऽनुकूलतराः स्युः । न । कर्मानेकत्वात् । न ह्यग्निहोत्रादीन्येव कर्माणि । ब्रह्मचर्यं तपः सत्यवदनं शमो दमो अहिंसेत्येवमादीन्यपि कर्माणीतराश्रमप्रसिद्धानि विद्योत्पत्तौ साधकतमान्यसंकीर्णानि विद्यन्ते ध्यानधारणादिलक्षणानि च । वक्ष्यति च— 'तपसा ब्रह्म विजिज्ञासस्व' इति । जन्मांतरकृतकर्मभ्यश्च प्रागपि गार्हस्थ्याद्विद्योत्पत्तिसंभवात्कर्मार्थत्वाच्च गार्हस्थ्यप्रतिपत्तेः, कर्मसाध्यायां च विद्यायां सत्यां गार्हस्थ्यप्रतिपत्तिरनर्थिकैव । लोकार्थत्वाच्च पुत्रादीनाम् । पुत्रादिसाध्येभ्यश्चायं लोकः पितृलोको देवलोक इत्येतेभ्यो व्यावृत्तकामस्य नित्यसिद्धात्मदर्शिनः कर्मणि प्रयोजनमपश्यतः कथं प्रवृत्तिरुपपद्यते ? प्रतिपन्नगार्हस्थ्यस्यापि विद्योत्पत्तौ विद्यापरिपाकाद्विरक्तस्य कर्मसु प्रयोजनमपश्यतः कर्मभ्यो निवृत्तिरेव स्यात् । 'प्रव्रजिष्यन्वा अरेऽहमस्मात्स्थानादस्मि' इत्येवमादिश्रुतिलिंगदर्शनात् । कर्म प्रति श्रुतेर्यत्नाधिक्यदर्शनादयुक्तमिति चेत अग्निहोत्रादिकर्म प्रति श्रुतेरधिको यत्नो, महांश्च कर्मण्यायासोऽनेकसाधनसाध्यत्वादग्निहोत्रादीनाम् । तपोब्रह्मचर्यादीनां चेतराश्रमकर्मणा गार्हस्थ्येऽपि समानत्वादल्पसाधनापेक्षत्वाच्चेतरेषा न युक्तस्तुल्यवद्विकल्प आश्रमिभिस्तस्येति चेन्न । जन्मांतरकृतानुग्रहात् । यदुक्तं कर्मणि श्रुतेरधिको यत्न इत्यादि । नासौ दोषः । यतो जन्मांतरकृतमप्यग्निहोत्रादिलक्षणं कर्म ब्रह्मचर्यादिलक्षणं चानुग्राहकं भवति विद्योत्पत्ति प्रति । येन च जन्मनैव विरक्ता दृश्यन्ते केचिन । केचित्तु कर्मसु प्रवृत्ता अविरक्ता विद्याविद्वेषिणः । तस्मात् जन्मांतरकृतसंस्कारेभ्यो विरक्तानामाश्रमांतरप्रतिपत्तिरेवेष्यते । कर्मफलबाहुल्याच्च । पुत्रस्वर्गब्रह्मवर्चसादिलक्षणस्य कर्मफलस्यासंख्येयत्वात् तत्प्रति च पुरुषाणां कामबाहुल्यात्तदर्थः श्रुतेरधिको यत्नः कर्मसूपपद्यते । आशिषां बाहुल्यदर्शनादिदं मे स्यादिदं मे स्यादिति । उपायत्वाच्च । उपायभूतानि हि कर्माणि विद्यां प्रतीत्यवोचाम । उपायेऽधिको यत्नः कर्तव्यो नोपेये । कर्मनिमित्तत्वाद्विद्याया यत्नांतरानर्थक्यमिति चेत्कर्मभ्य एव पूर्वोपचितदुरितप्रतिबंधक्षयादेव विद्योत्पद्यते चेत्कर्मभ्यः पृथगुपनिषच्छ्रवणादियत्नोऽनर्थक इति चेत् । न । नियमाभावात् । न हि प्रतिबंधक्षयादेव विद्यो-

त्पद्यते न त्वीश्वरप्रसादतपोध्यानाद्यनुष्ठानादिति नियमोऽस्ति । अहिंसाब्रह्मचर्यादीनां च विद्यां प्रत्युपकारकत्वात्साक्षादेव च कारणत्वाच्छ्रवणमननिदिध्यासनादीनाम् । अतः सिद्धान्याश्रमांतराणि । सर्वेषां चाधिकारो विद्यायां, परं च श्रेयः केवलाया विद्याया एवेति सिद्धम् ॥

शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इंद्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्मावादिषम् । ऋतमवादिषम् । सत्यमवादिषम् । तन्मामावीत् । तद्वक्तारमावीत् । आवीन्माम् । आवीद्वक्तारम् । ॐ शान्तिः शान्तिः शान्तिः ॥१॥ इति द्वादशोऽनुवाकः ॥१२॥

अतीतविद्याप्राप्त्युपसर्गशमनार्थं शान्ति पठति शं नो मित्र इति । व्याख्यातमेतत्पूर्वम् ॥ इति शिक्षाध्यायः ॥

शं नो मित्रः शं वरुण । शं नो भवत्वर्यमा । शं न इंद्रो बृहस्पति । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् । ॐ शान्तिः शान्तिः शान्तिः ॥

॥ ब्रह्मानंदवल्ली ॥२॥

ॐ शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इंद्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ॥

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ॐ शान्तिः शान्तिः शान्तिः ॥

शं नो मित्र इत्याद्यतीतविद्याप्राप्त्युपसर्गप्रशमनार्था शान्तिः पठिता । इदानीं तु वक्ष्यमाणब्रह्मविद्याप्राप्त्युपसर्गोपशमनार्था शान्तिः पठ्यते शं नो मित्र इति सह नाववत्विति च । शं नो मित्र इत्यादि पूर्ववत्स्पष्टम् । सह नाववतु नौ शिष्याचार्यौ सहावावतु रक्षतु । सह नौ भुनक्तु ब्रह्म भोजयतु । सह वीर्यं विद्या-

दिनिमित्तं सामर्थ्यं करवावहै निर्वर्तयावहै । तेजस्वि नावावयोस्तेजस्विनोरधीतं स्वधीतमस्तु । अर्थज्ञानयोरयमस्त्वित्यर्थः । मा विद्विषावहै विद्याग्रहणनिमित्तं शिष्यस्याचार्यस्य वा प्रमादकृतादन्यायाद्विद्वेषः प्राप्तः, तच्छमनायेयमाशीः मा विद्विषावहा इति । मैवेतरेतरं विद्वेषमापद्यावहै । शान्तिः शान्तिः शान्तिरिति त्रिर्वचनमुक्तार्थम् । वक्ष्यमाणविद्याविघ्नप्रशमनार्था चेयं शान्तिः । अविघ्नेनात्मविद्याप्राप्तिराशास्यते तन्मूलं हि परं श्रेय इति ॥

ॐ ब्रह्मविदाप्नोति परम् । तदेषाभ्युक्ता । सत्यं ज्ञानमनंतं ब्रह्म । यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान्कामान्सह । ब्रह्मणा विपश्चितेति । तस्माद्वा एतस्मादात्मन आकाशः संभूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । अन्नात्पुरुषः । स वा एष पुरुषोऽन्नरसमयः । तस्येदमेव शिरः । अयं दक्षिणः पक्षः । अयमुत्तरः पक्षः । अयमात्मा । इदं पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ इति प्रथमोऽनुवाकः ॥१॥

संहितादिविषयाणि कर्मभिरविरुद्धान्युपासनान्युक्तानि । अनंतरं च अंतःसोपाधिकात्मदर्शनमुक्तं व्याहृतिद्वारेण स्वाराज्यफलम् । न चैतावताऽशेषतः संसारबीजस्योपमर्दनमस्तीत्यतो अशेषोपद्रवबीजस्याज्ञानस्य निवृत्त्यर्थं विधूतसर्वोपाधिविशेषात्मदर्शनार्थमिदमारभ्यते ब्रह्मविदाप्नोति परमित्यादि । प्रयोजनं चास्या ब्रह्मविद्याया अविद्यानिवृत्तिः ततश्चात्यंतिकः संसाराभावः । वक्ष्यति च– 'विद्वान्न बिभेति कुतश्चन' इति । संसारनिमित्ते च सति 'अभयं प्रतिष्ठां च विंदते' इत्यनुपपन्नम् । ''कृताकृते पुण्यपापे न तपतः'' इति च । अतोऽवगम्यतेऽस्माद्विज्ञानात्सर्वात्मब्रह्मविषयादात्यंतिकः संसाराभाव इति । स्वयमेव च प्रयोजनमाह ब्रह्मविदाप्नोति परमित्यादावेव संबंधप्रयोजनज्ञापनार्थम् । निर्ज्ञातयोर्हि संबंधप्रयोजनयोर्विद्याश्रवणग्रहणधारणाभ्यासार्थः प्रवर्तते । श्रवणादिपूर्वकं हि विद्याफलम् 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यादिश्रुत्यंतरेभ्यः । ब्रह्मवित् ब्रह्मेति वक्ष्यमाणलक्षणं, बृहत्त्वमत्वाद्ब्रह्म, तद्वेत्ति विजानातीति ब्रह्मवित् आप्नोति परं निरतिशयं, तदेव ब्रह्म परम् । न ह्यन्यस्य विज्ञानादन्यस्य प्राप्तिः । स्पष्टं च श्रुत्यंतरं ब्रह्मप्राप्तिमेव ब्रह्मविदो दर्शयति 'स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति' इत्यादि ॥

ननु सर्वगतं सर्वस्य चात्मभूतं ब्रह्म वक्ष्यति । अतो नाप्यं, आप्तिश्चान्यस्यान्येन परिच्छिन्नस्य च परिच्छिन्नेन दृष्टा । अपरिच्छिन्नं सर्वात्मकं च ब्रह्म इत्यतः परिच्छिन्नवदनात्मवच्च तस्याप्तिरनुपपन्ना । नायं दोष । कथम् । दर्शनादर्शनापेक्षत्वाद्ब्रह्मण आप्त्यनाप्त्योः । परमार्थतो ब्रह्मरूपस्यापि सतोऽस्य जीवस्य भूतमात्राकृतबाह्यपरिच्छिन्नान्नमयाद्यात्मदर्शिनस्तदासक्तचेतसः । प्रकृतसंख्यापूरणस्यात्मनोऽव्यवहितस्यापि बाह्यसंख्येयविषयासक्तचित्ततया स्वरूपाभावदर्शनवत्परमार्थब्रह्मस्वरूपाभावदर्शनलक्षणया अविद्यया अन्नमयादिर्बाह्याननात्मनः आत्मत्वेन प्रतिपन्नत्वादन्नमयाद्यनात्मभ्यो नान्योऽहमस्मीत्यभिमन्यते । एवमविद्यया आत्मभूतमपि ब्रह्मानाप्तं स्यात् । तस्यैवमविद्यया अनाप्तब्रह्मस्वरूपस्य प्रकृतसंख्यापूरणस्यात्मनोऽविद्ययाऽनाप्तस्य सतः केनचित्स्मारितस्य पुनस्तस्यैव विद्यया आप्तिर्यथा, तथा श्रुत्युपदिष्टस्य सर्वात्मब्रह्मण आत्मत्वदर्शनेन विद्यया तदाप्तिरुपपद्यत एव ॥

ब्रह्मविदाप्नोति परमिति वाक्यं सूत्रभूतं सर्वस्य वल्ल्यर्थस्य । ब्रह्मविदाप्नोति परमित्येनेन वाक्येन वेद्यतया सूत्रितस्य ब्रह्मणोऽनिर्धारितस्वरूपविशेषस्य सर्वतो व्यावृत्तस्वरूपविशेषसमर्पणसमर्थस्य लक्षणस्याभिधानेन स्वरूपनिर्धारणायाविशेषेण चोक्तवेदनस्य ब्रह्मणो वक्ष्यमाणलक्षणस्य विशेषेण प्रत्यगात्मतया अनन्यरूपेण विज्ञेयत्वाय, ब्रह्मविद्याफलं च ब्रह्मविदो यत्परब्रह्मप्राप्तिलक्षणमुक्तं, स सर्वात्मभावः सर्वसंसारधर्मातीतब्रह्मस्वरूपत्वेमेव नान्यत् इत्येतत्प्रदर्शनाय चैषा ऋगुदाहियते— तदेषाऽभ्युक्तेति । तत्तस्मिन्नेव ब्राह्मणवाक्योक्तेऽर्थ एषर्गभ्युक्ता आम्नाता । सत्यं ज्ञानमनंतं ब्रह्मेति ब्रह्मणो लक्षणार्थ वाक्यम् । सत्यादीनि हि त्रीणि विशेषणार्थानि पदानि विशेष्यस्य ब्रह्मणः । विशेष्यं ब्रह्म विवक्षितत्वाद्वेद्यतया । वेद्यत्वेन यतो ब्रह्म प्राधान्येन विवक्षितं, तस्माद्विशेष्यं विज्ञेयम् । अतः अस्मात् विशेषणविशेष्यत्वादेव सत्यादीन्येकविभक्त्यंतानि पदानि समानाधिकरणानि । सत्यादिभिस्त्रिभिर्विशेषणैर्विशेष्यमाणं ब्रह्म विशेष्यांतरेभ्यो निर्धार्यते । एवं हि तज्ज्ञातं भवति यदन्येभ्यो निर्धारितम् । यथा लोके नीलं महत्सुगंध्युत्पलमिति ॥

ननु विशेष्यं विशेषणांतरं व्यभिचरद्विशेष्यते, यथा नीलं रक्तं चोत्पलमिति । यदा ह्येकानि द्रव्याण्येकजातीयान्यनेकविशेषणयोगीनि, तदा विशे-

षणस्यार्थवत्त्वम् । न ह्येकस्मिन्नेव वस्तुनि विशेषणान्तरायोगात् यथासावेक आदित्य इति, तथैकमेव च ब्रह्म, न ब्रह्मान्तराणि येभ्यो विशेष्येत नीलोत्पलवत् । न । लक्षणार्थत्वाद्विशेषणानाम् । नायं दोषः । कस्मात् । यस्माल्लक्षणार्थप्रधानानि विशेषणानि, न विशेषणप्रधानान्येव । कः पुनर्लक्षणलक्ष्ययोर्विशेषणविशेष्ययोर्वा विशेष इति । उच्यते । समानजातीयेभ्य एव निवर्तकानि विशेषणानि विशेष्यस्य, लक्षणं तु सर्वत एव, यथावकाशप्रदात्राकाशमिति । लक्षणार्थं च वाक्यमित्यवोचाम ॥

सत्यादिशब्दा न परस्परं संबध्यन्ते, परार्थत्वात् विशेष्यार्था हि ते । अत एकैको विशेषणशब्दः परस्परं निरपेक्षो ब्रह्मशब्देन संबध्यते—सत्यं ब्रह्म ज्ञानं ब्रह्म अनंतं ब्रह्मेति । सत्यमिति यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरति, सत्सत्यम् । यद्रूपेण यन्निश्चितं तद्रूपं व्यभिचरदनृतमित्युच्यते । अतो विकारोऽनृतं 'वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं' एवं सदेव सत्यमित्यवधारणात् । अतः सत्यं ब्रह्मेति ब्रह्म विकारान्निवर्तयति । अतः कारणत्वं प्राप्तं ब्रह्मणः । कारणस्य च कारकत्वं, वस्तुत्वान्मृद्वदचिद्रूपता च प्राप्ता अत इदमुच्यते ज्ञानं ब्रह्मेति । ज्ञानं ज्ञप्तिरवबोधो—भावसाधनो ज्ञानशब्दो, न तु ज्ञानकर्तृ, ब्रह्मविशेषणत्वात्सत्यानंताभ्यां सह । न हि सत्यतानंतता च ज्ञानकर्तृत्वे सत्युपपद्येते । ज्ञानकर्तृत्वेन हि विक्रियमाणं कथं सत्यं भवेदनंतं च ? यद्धि न कुताश्चित्प्रविभज्यते तदनंतम् । ज्ञानकर्तृत्वे च ज्ञेयज्ञानाभ्यां प्रविभक्तमित्यनंतता न स्यात् । 'यत्र नान्यद्विजानाति स भूमा अथ यत्रान्यद्विजानाति तदल्पम्' इति श्रुत्यंतरात् । नान्यद्विजानातीति विशेषप्रतिषेधादात्मानं विजानातीति चेन्न । भूमलक्षणविधिपरत्वाद्वाक्यस्य । 'यत्र नान्यत्पश्यति' इत्यादि भूम्नो लक्षणविधिपरं वाक्यम् । यथा प्रसिद्धमेवान्योऽन्यत्पश्यतीत्येतदुपादाय यत्र तन्नास्ति स भूमेति भूमस्वरूपं तत्र ज्ञाप्यते । अन्यग्रहणस्य प्राप्तप्रतिषेधार्थत्वान्न स्वात्मनि क्रियास्तित्वपरं वाक्यम् । स्वात्मनि च भेदाभावाद्विज्ञानानुपपत्तिः । आत्मनश्च विज्ञेयत्वे ज्ञात्रभावप्रसंगः । ज्ञेयत्वेनैव विनियुक्तत्वात् ॥

एक एवात्मा ज्ञेयत्वेन ज्ञातृत्वेन चोभयथा भवतीति चेन्न । युगपदनंशत्वात् । नहि निरवयवस्य युगपज्ज्ञेयज्ञातृत्वोपपत्तिः । आत्मनश्च घटादिवद्विज्ञेयत्वे ज्ञानोपदेशानर्थक्यम् । नहि घटादिवत्प्रसिद्धस्य ज्ञानोपदेशोऽर्थवान् । तस्माज्ज्ञा

तृत्वे सत्यानंत्यानुपपत्तिः । सन्मात्रत्वं च अनुपपन्नं ज्ञानकर्तृत्वादिविशेषवत्त्वे सति । 'सन्मात्रत्वं च सत्यत्वम्' 'तत्सत्यं' इति श्रुत्यंतरात् । तस्मात्सत्यानंतशब्दाभ्यां सह विशेषणत्वेन ज्ञानशब्दस्य प्रयोगाद्भावसाधनो ज्ञानशब्दः । ज्ञानं ब्रह्मेति कर्तृत्वादि कारकनिवृत्त्यर्थं मृदादिवदचिद्रूपतानिवृत्त्यर्थं च प्रयुज्यते । ज्ञानं ब्रह्मेतिवचनान्प्राप्तमंतवत्त्वं, लौकिकस्य ज्ञानस्यांतवत्त्वदर्शनात् । अतः तन्निवृत्त्यर्थमाह— अनंतमिति । सत्यादीनामनृतादिधर्मनिवृत्तिपरत्वाद्विशेष्यस्य च ब्रह्मण उत्पलादिवदप्रसिद्धत्वात् । "मृगतृष्णांभसि स्नातः खपुष्पकृतशेखरः । एष वंध्यासुतो याति शशशृंगधनुर्धरः." इतिवच्छून्यार्थतैव प्राप्ता सत्यादिवाक्यस्येति चेत् । न । लक्षणार्थत्वात् । विशेषणत्वेऽपि सत्यादीनां लक्षणार्थप्राधान्यमित्यवोचाम । शून्ये हि लक्ष्येऽनर्थकं लक्षणवचनं, अतः लक्षणार्थत्वान्मन्यामहे न शून्यार्थतेति । विशेषणार्थत्वेऽपि च सत्यादानां स्वार्थापरित्याग एव । शून्यार्थत्वे हि सत्यादिशब्दानां विशेष्यनियंतृत्वानुपपत्तिः । सत्यार्थैरर्थवत्त्वे तु तद्विपरीतधर्मवद्भ्यो विशेष्येभ्यो ब्रह्मणो विशेष्यस्य नियंतृत्वमुपपद्यते । ब्रह्मशब्दोऽपि स्वार्थेनार्थवानेव । तत्रानंतशब्दो अंतवत्त्वप्रतिषेधद्वारेण विशेषणम् । सत्यज्ञानशब्दौ तु स्वार्थसमर्पणेनैव विशेषणे भवत ॥

तस्माद्वा एतस्मादात्मन इति ब्रह्मण्येवात्मशब्दप्रयोगाद्वेदितुरात्मैव ब्रह्म । एतमानंदमयमात्मानमुपसंक्रामतीति च आत्मनां दर्शयन्ति । तत्प्रवेशाच्च, तत्सृष्ट्वा तदेवानुप्राविशदिति च तस्यैव जीवरूपेण शरीरप्रवेशं दर्शयति । अतो वेदितुः स्वरूपं ब्रह्म । एवं तर्ह्यात्मत्वाज्ज्ञानकर्तृत्वं, आत्मा ज्ञातेति हि प्रसिद्धम् । सोऽकामयतेति च कामिनो ज्ञानकर्तृत्वप्रसिद्धिः । अतो ज्ञानकर्तृत्वाज्ज्ञप्तिर्ब्रह्मेत्ययुक्तं, अनित्यत्वप्रसंगाच्च । यदि नाम ज्ञप्तिर्ज्ञानमिति भावरूपता ब्रह्मणः तदाप्यनित्यत्वं प्रसज्येत, पारतंत्र्यं च । धात्वर्थानां कारकापेक्षत्वात् । ज्ञानं च धात्वर्थः । अतोऽस्यानित्यत्वं परतंत्रता च । न, स्वरूपाव्यतिरेकेण कार्यत्वोपचारात् । आत्मनः स्वरूपं ज्ञप्तिर्न ततो व्यतिरिच्यते अतो नित्यव । तथापि बुद्धेरुपाधिलक्षणायाश्चक्षुरादिद्वारैर्विषयाकारेण परिणामिन्या ये शब्दाद्याकारावभासाः ते आत्मविज्ञानस्य विषयभूता उत्पद्यमाना एव आत्मविज्ञानेन व्याप्ता उत्पद्यन्ते । तस्मादात्मविज्ञानावभास्याश्च ते विज्ञानशब्दवाच्याश्च धात्वर्थभूता आत्मन एव धर्मा विक्रियारूपा इत्यविवेकिभिः परिकल्प्यन्ते ॥

यत्तु ब्रह्मणो विज्ञानं तत्सवितृप्रकाशवदन्यगुणत्ववच्च ब्रह्मस्वरूपाव्यतिरिक्तं स्वरूपमेव तत्। न तत्कारणांतरसव्यपेक्षम्। नित्यस्वरूपत्वात् सर्वभावानां च तेनाविभक्तदेशकालत्वात्कालाकाशादिकारणत्वाच्च निरतिशयसूक्ष्मत्वाच्च। न तस्यान्यदविज्ञेयं सूक्ष्मं व्यवहितं विप्रकृष्टं भूतं भवद्भविष्यद्वास्ति। तस्मात्सर्वज्ञं तद्ब्रह्म। मंत्रवर्णाच्च—'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः। स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्' इति। 'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तदद्वितीयमस्ति' इत्यादिश्रुतेश्च। विज्ञातृस्वरूपाव्यतिरेकात्करणादिनिमित्तानपेक्षत्वाच्च ब्रह्मणो ज्ञानस्वरूपत्वेऽपि नित्यत्वप्रसिद्धिः। अतो नैव धात्वर्थस्तदक्रियारूपत्वात्। अत एव च न ज्ञानकर्तृ, तस्मादेव च न ज्ञानशब्दवाच्यमपि तद्ब्रह्म। तथापि तदाभासवाचकेन बुद्धिधर्मविषयेण ज्ञानशब्देन तल्लक्ष्यते, न तूच्यते, शब्दप्रवृत्तिहेतुजात्यादिधर्मरहितत्वात्। तथा सत्यशब्देनापि। सर्वविशेषप्रत्यस्तमितस्वरूपत्वाद्ब्रह्मणो वाच्यसत्तासामान्यविषयेण सत्यशब्देन लक्ष्यते सत्यं ब्रह्मेति। न तु सत्यशब्दवाच्यमेव ब्रह्म। एवं सत्यादिशब्दा इतरेतरसंनिधानादन्योन्यनियम्यनियामकाः सन्तः सत्यादिशब्दवाच्यात्तन्निवर्तका ब्रह्मणो, लक्षणार्थाश्च भवन्तीति। अतः सिद्धं 'यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह' 'आनिरुक्तेऽनिलयने' इति चावाच्यत्वं, नीलोत्पलवदवाक्यार्थत्वं च ब्रह्मणः॥

तद्यथाव्याख्यातं ब्रह्म यो वेद विजानाति निहितं स्थितं गुहायाम्। गूहतेः संवरणार्थस्य निगूढा अस्यां ज्ञानज्ञेयज्ञातृपदार्था इति गुहा बुद्धिः। गूढावस्यां भोगापवर्गौ पुरुषार्थाविति वा, तस्यां परमे प्रकृष्टे व्योमन्व्योम्न्याकाशेऽव्याकृताख्ये। तद्धि परमं व्योम 'एतस्मिन्खल्वक्षरे गार्ग्याकाशः' इत्यक्षरसंनिकर्षात्। गुहायां व्योम्नीति वा सामानाधिकरण्यादव्याकृताकाशमेव गुहा, तत्रापि निगूढा. सर्वे पदार्थास्त्रिषु कालेषु, कारणत्वात्सूक्ष्मतरत्वाच्च। तस्मिन्नंतर्निहितं ब्रह्म। हार्दमेव तु परमं व्योमेति न्याय्यं, विज्ञानांगत्वे व्योम्नो विवक्षितत्वात्। 'यो वै स बहिर्धा पुरुषादाकाशो यो वै सोऽन्तः पुरुष आकाशो योऽयमंतर्हृदय आकाशः' इति श्रुत्यंतरात्प्रसिद्धं हार्दस्य व्योम्नः परमत्वम्। तस्मिन्हार्दे व्योम्नि या बुद्धिर्गुहा तस्यां निहितं ब्रह्म तद्वृत्त्या विविक्ततयोपलभ्यत इति। न ह्यन्यथा विशिष्टदेशकालसंबंधोऽस्ति ब्रह्मणः सर्वगतत्वा-

न्निर्विशेषत्वाच्च । स एवं ब्रह्म विजानन्कामित्याह– अश्नुते भुंक्ते सर्वान्निरवशेषान्कामान्काम्यभोगानित्यर्थ । किमस्मदादिवत्पुत्रस्वर्गादीन्पर्यायेण ? नेत्याह सह युगपदेकक्षणेोपारूढानेव एकयोपलब्ध्या सवितृप्रकाशवन्नित्यया ब्रह्मस्वरूपाव्यतिरिक्तया, यामवोचाम सत्यं ज्ञानमनंतमिति । एतत्तदुच्यते— ब्रह्मणा सहेति । ब्रह्मभूतो विद्वान्ब्रह्मस्वरूपेणैव सर्वान्कामान्सहाश्नुते, न यथोपाधिकृतेन स्वरूपेणात्मनो जलसूर्यकादिवत्प्रतिबिंबभूतेन सांसारिकेण धर्मादिनिमित्तापेक्षांश्चक्षुरादिकरणापेक्षांश्च सर्वान्कामान्पर्यायेणाश्नुते लोक· । कथं तर्हि, यथोक्तेन प्रकारेण सर्वज्ञेन सर्वगतेन सर्वात्मना नित्यब्रह्मात्मस्वरूपेण धर्मादिनिमित्तानपेक्षांश्चक्षुरादिकरणानिरपेक्षांश्च सर्वान्कामान्सहैवाश्नुत इत्यर्थ. । विपश्चिता मेधाविना सर्वज्ञेन । तद्धि वैपश्चित्यं यत्सर्वज्ञत्वं, तेन सर्वज्ञस्वरूपेण ब्रह्मणाश्नुत इति । इतिशब्दो मंत्रपरिसमाप्त्यर्थः ॥

सर्व एव वल्लयर्थो ब्रह्मविदाप्नोति परमिति ब्राह्मणवाक्येन सूत्रितः । स च सूत्रितोऽर्थः संक्षेपतो मंत्रेण व्याख्यात. । पुनस्तस्यैव विस्तरेणार्थनिर्णयः कर्तव्य इत्युत्तरस्तद्विवृत्तिस्थानीयो ग्रंथ आरभ्यते– तस्माद्वा एतस्मादित्यादिः । तत्र च सत्यं ज्ञानमनंतं ब्रह्मेत्युक्तं मंत्रादौ, तत्कथं सत्यं अनंतं चेत्यत आह— तत्र त्रिविधं ह्यानंत्यं देशत. कालतो वस्तुतश्चेति । तद्यथा देशतोऽनंत आकाशो, न हि देशतस्तस्य परिच्छेदोऽस्ति । न तु कालतश्चानंत्यं वस्तुतश्चाकाशस्य । कस्मात् कार्यत्वात् । नैवं ब्रह्मण आकाशवत्कालतोऽप्यंतवत्त्वमकार्यत्वात् । कार्यं हि वस्तु कालेन परिच्छिद्यते । अकार्यं च ब्रह्म । तस्मात्कालतोऽप्यनंतम् । तथा वस्तुतः । कथं पुनर्वस्तुत आनंत्यं सर्वानन्यत्वात् । भिन्नं हि वस्तु वस्त्वंतरस्यांतो भवति । वस्त्वंतरबुद्धिर्हि प्रसक्ताद्वस्त्वंतरान्निवर्तते । यतो यस्य बुद्धेर्निवृत्तिः स तस्यांत· । तद्यथा गोत्वबुद्धिरश्वत्वाद्विनिवर्तत इत्यश्वत्वान्तं गोत्वमित्यंतवदेव भवति । स चांतो भिन्नेषु वस्तुषु दृष्टो, नैवं ब्रह्मणो भेदः । अतो वस्तुतोऽप्यानंत्यम् । कथं पुनः सर्वानन्यत्वं ब्रह्मण इत्युच्यते, सर्ववस्तुकारणत्वात् । सर्वेषां हि वस्तूनां कालाकाशादीनां कारणं ब्रह्म । कार्यापेक्षया वस्तुतोऽन्तवत्त्वमिति चेन्न । अनृतत्वात्कार्यवस्तुनः । न हि कारणव्यतिरेकेण कार्य नाम वस्तुतोऽस्ति । यतः कारणबुद्धिर्विनिवर्तेत । 'वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं' एवं सदेव सत्यमिति श्रुत्यंतरात् ।

तस्मादाकाशादिकारणत्वाद्देशतस्तावदनंतं ब्रह्म । आकाशो ह्यनंत इति प्रसिद्धं देशत., तस्य चेदं कारणं, तस्मान्सिद्धं देशत आत्मन आनंत्यम् । न ह्यसर्वगतात्सर्वगतमुत्पद्यमानं लोके किंचित् दृश्यते । अतो निरतिशयमात्मन आनंत्यं देशत , तथाऽकार्यत्वात्कालत , तद्धि नवस्त्वंतराभावाच्च वस्तुतः । अत एव निरतिशयसत्यत्वम ॥

तस्मादिति मूलवाक्यसूत्रितं ब्रह्म परामृश्यते । एतस्मादितिमंत्रवाक्येणानंतरं यथालक्षितम् । यद्ब्रह्मादौ ब्राह्मणवाक्येन सूत्रितं, यच्च सत्यं ज्ञानमनंतं ब्रह्मेत्यनंतरमेव लक्षितं, तस्मादेतस्माद्ब्रह्मण आत्मन आत्मशब्दवाच्यात् । आत्मा हि तत्सर्वस्य 'तत्सत्यं स आत्मा' इति श्रुत्यंतरात । अतो ब्रह्मात्मा । तस्मादेतस्माद्ब्रह्मण आत्मस्वरूपादाकाश संभूतः समुत्पन्न. । आकाशो नाम शब्दगुणोऽवकाशकरो मूर्तद्रव्याणाम् । तस्मादाकाशात्स्वेन स्पर्शगुणेन पूर्वेण च आकाशगुणेन शब्देन द्विगुणो वायुः । संभूत इत्यनुवर्तते । वायोश्च स्वेन रूपगुणेन पूर्वाभ्यां च त्रिगुणोऽग्निः संभूत· । अग्नेश्च स्वेन रसगुणेन पूर्वैश्च त्रिभिश्चतुर्गुणा आप. संभूताः । अद्भ्य. स्वेन गंधगुणेन पूर्वैश्च चतुर्भिः पंचगुणा पृथिवी संभूता । पृथिव्या ओषधय. । ओषधीभ्योऽन्नम । अन्नाद्रेतोरूपेण परिणतात्पुरुष शिरःपाण्याद्याकृतिमान् । स वा एष पुरुषोऽन्नरसमयोऽन्नरसविकारः, पुरुषाकृतिभावितं हि सर्वेभ्योऽङ्गेभ्यस्तेज.संभृतं रेतो बीजं, तस्माद्यो जायते सोऽपि तथा पुरुषाकृतिरेव स्यात् । सर्वजातिषु जायमानानां जनकाकृतिनियमदर्शनात् ॥

सर्वेषामप्यन्नरसविकारत्वे ब्रह्मवंशत्वे चाविशिष्टे कस्मात्पुरुष एव गृह्यते ? प्राधान्यात् । किं पुनः प्राधान्यम् ? कर्मज्ञानाधिकारः । पुरुष एव हि शक्तत्वादर्थित्वादपर्युदस्तत्वाच्चार्थी विद्वान्समर्थः कर्मज्ञानयोरधिक्रियते— "पुरुषे त्वेवाविस्तरामात्मा स हि प्रज्ञानेन संपन्नतमो विज्ञातं वदति विज्ञातं पश्यति वेद श्वस्तनं वेद लोकालोकौ मर्त्येनामृतमीक्षति इत्येवं संपन्नः । अथेतरेषा पशूनामशनापिपासे एवाभिविज्ञानं" इत्यादिश्रुत्यंतरदर्शनात् ॥

स हि पुरुष इह विद्यया आंतरतमं ब्रह्म संक्रामयितुमिष्टस्तस्य च बाह्याकारविशेषेष्वनात्मस्वात्मभाविता बुद्धिरनालंब्य विशेषं कंचित्सहसा आंतरतमप्रत्यगात्मविषया निरालंबना च कर्तुमशक्येति दृष्टशरीरात्मसामान्यकल्पनया शाखाचंद्रनिदर्शनवदंतः प्रवेशयन्नाह— तस्येदमेव शिरः । तस्यास्य पुरुषस्या-

न्नरसमयस्येदमेव शिर प्रसिद्धम । प्राणमयादिष्वशिरसां शिरस्त्वदर्शनादिहापि तत्प्रसंगो मा भूदितीदमेव शिर इत्युच्यते । एवं पक्षादिषु योजना । अयं दक्षिणो बाहु· पूर्वाभिमुखस्य दक्षिण पक्ष । अयं सव्यो बाहुरुत्तर· पक्षः । अयं मध्यमो देहभाग आत्मा अंगानाम् "मध्यं ह्येषामंगानामात्मा" इति श्रुते· । इदमिति नाभेरधस्ताद्यदंग तत्पुच्छं प्रतिष्ठा । प्रतितिष्ठत्यनयेति प्रतिष्ठा । पुच्छमिव पुच्छमधोलंबनसामान्यायथा गो पुच्छम् । एतत्प्रकृत्योत्तरेषां प्राणमयादीनां रूपकत्वसिद्धि., मृषानिषिक्तद्रुतनाम्रप्रतिमावत् । तदप्येष श्लोको भवति । तत्तस्मिन्नेवार्थे ब्राह्मणोक्तेऽन्नमयात्मप्रकाशके एष श्लोको मंत्रो भवति ॥ इति प्रथमोऽनुवाक ॥

अन्नाद्वै प्रजाः प्रजायन्ते । याः काश्च पृथिवीं श्रिताः । अथो अन्नेनैव जीवन्ति । अथैनदपि यन्त्यंततः । अन्नं हि भूतानां ज्येष्ठम् । तस्मात्सर्वौषधमुच्यते । सर्वं वै तेऽन्नमाप्नुवन्ति । येऽन्नं ब्रह्मोपासते । अन्नं हि भूतानां ज्येष्ठम् । तस्मात्सर्वौषधमुच्यते । अन्नाद्भूतानि जायन्ते । जातान्यन्नेन वर्धन्ते । अद्यतेऽत्ति च भूतानि । तस्मादन्नं तदुच्यत इति । तस्माद्वा एतस्मादन्नरसमयात् । अन्योऽन्तर आत्मा प्राणमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य प्राण एव शिरः । व्यानो दक्षिणः पक्षः । अपान उत्तरः पक्षः । आकाश आत्मा । पृथिवी पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ इति द्वितीयोऽनुवाकः ॥२॥

अन्नाद्वसादिभावगणितात् । वा इति स्मरणार्थः । प्रजाः स्थावरजंगमाः प्रजायन्ते । याः काश्चाविशिष्टा. पृथिवीं श्रिताः पृथिवीमाश्रितास्ताः सर्वा अन्नादेव प्रजायन्ते । अथो अपि जाता अन्नेनैव जीवन्ति प्राणान्धारयन्ति वर्धन्त इत्यर्थ· । अथाप्येनदन्नमपियन्त्यपिगच्छन्ति । अपिशब्दः प्रतिशब्दार्थे । अन्नं प्रति प्रलीयन्त इत्यर्थः । अंततोऽन्ते जीवनलक्षणाया वृत्तेः परिसमाप्तौ । कस्मात् । अन्नं हि यस्मात् भूताना प्राणिना ज्येष्ठं प्रथमजम् । अन्नमयादीनां हीतरेषां भूतानां कारणमन्नम् । अतोऽन्नप्रभवा अन्नजीवना अन्नप्रलयाश्च सर्वाः प्रजाः । यस्माच्चैवं तस्मात्सर्वौषधं सर्वप्राणिनां देहदाहप्रशमनमन्नमुच्यते ॥

अन्नब्रह्मविदः फलमुच्यते । सर्वं वै ते समस्तमन्नजातमाप्नुवन्ति । के । येऽन्नं ब्रह्म यथोक्तमुपासते । कथं ? अन्नजोऽन्नात्मान्नप्रलयोऽहं तस्मादन्नं

ब्रह्मेति । कुतः पुनः सर्वान्नप्राप्तिफलमन्नात्मोपासनमित्युच्यते— अन्नं हि भूतानां ज्येष्ठम् । भूतेभ्यः पूर्वं उत्पन्नत्वाज्ज्येष्ठं हि यस्मात्तस्मात्सर्वौषधमुच्यते । तस्मादुपपन्ना सर्वान्नात्मोपासकस्य सर्वान्नप्राप्तिः । अन्नात् भूतानि जायन्ते, जातान्यन्नेन वर्धन्त इत्युपसंहारार्थं पुनर्वचनम् । इदानीमन्ननिर्वचनमुच्यते— अद्यते भुज्यते चैव यत् भूतैः अत्ति च भूतानि स्वयं, तस्मात् भूतैर्भुज्यमानत्वात् भूतभोक्तृत्वाच्चान्नं तदुच्यते । इतिशब्दः प्रथमकोशपरिसमाप्त्यर्थः । अन्नमयादिभ्य आनंदमयांतेभ्य आत्मभ्योऽभ्यंतरतमं ब्रह्म विद्यया प्रत्यगात्मत्वेन दिदर्शयिषुः शास्त्रं अविद्याकृतपंचकोशापनयनेन अनेकतुषकोद्रववितुषीकरणेनेव तदंतर्गततंडुलान्प्रस्तौति, तस्माद्वा एतस्मादन्नरसमयादित्यादि । तस्मादेतस्माद्यथोक्तात् अन्नरसमयात्पिंडादन्यो व्यतिरिक्तोऽन्तरोऽभ्यंतर आत्मा पिंडवदेव मिथ्यापरिकल्पित आत्मत्वेन प्राणमयः, प्राणो वायुस्तन्मयस्तत्प्रायः । तेन प्राणमयेन एष अन्नरसमय आत्मा पूर्णो वायुनेव इति । स वा एष प्राणमय आत्मा पुरुषविध एव पुरुषाकार एव शिरःपक्षादिभिः । किं स्वत एव, नेत्याह । प्रसिद्धं तावदन्नरसमयस्यात्मनः पुरुषविधत्वम् । तस्यान्नरसमयस्य पुरुषविधतां पुरुषाकारताम् । अन्वयं प्राणमयः पुरुषविधो मूषानिषिक्तप्रतिमावन्न स्वत एव । एवं पूर्वस्य पूर्वस्य पुरुषविधता, तामनूत्तरोत्तरः पुरुषविधो भवति, पूर्वः पूर्वश्चोत्तरोत्तरेण पूर्णः । कथं पुनः पुरुषविधतास्येत्युच्यते— तस्य प्राणमयस्य प्राण एव शिरः प्राणमयस्य वायुविकारस्य प्राणो मुखनासिकानिःसरणो वृत्तिविशेषः शिर एव परिकल्प्यते, वचनात् । सर्वत्र वचनादेव पक्षादिकल्पना । व्यानो व्यानवृत्तिर्दक्षिणः पक्षः । अपान उत्तरः पक्षः । आकाश आत्मा, य आकाशस्थो वृत्तिविशेषः समानाख्यः स आत्मेव आत्मा प्राणवृत्त्यधिकारात् मध्यस्थत्वादितराः पर्यंता वृत्तीरपेक्ष्य आत्मा । "मध्यं ह्येषामंगानामात्मा" इति श्रुतिप्रसिद्धं मध्यस्थस्यात्मत्वम् । पृथिवी पुच्छं प्रतिष्ठा । पृथिवीति पृथिवीदेवता आध्यात्मिकस्य प्राणस्य धारयित्री स्थितिहेतुत्वात् । 'सैषा पुरुषस्यापानमवष्टभ्य' इति हि श्रुत्यंतरम् । अन्यथोदानवृत्त्योर्ध्वगमनं गुरुत्वात् पतनं वा स्याच्छरीरस्य । तस्मात्पृथिवी देवता पुच्छं प्रतिष्ठा प्राणमयस्यात्मनः । तत्तस्मिन्नेवार्थे प्राणमयात्मविषय एष श्लोको भवति ॥

प्राणं देवा अनु प्राणन्ति । मनुष्याः पशवश्च ये । प्राणो हि भूताना-

मायुः । तस्मात्सर्वायुषमुच्यते । सर्वमेव त आयुर्यन्ति । ये प्राणं ब्रह्मोपासते । प्राणो हि भूतानामायुः । तस्मात्सर्वायुषमुच्यत इति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य । तस्माद्वा एतस्मात्प्राणमयात् । अन्योऽन्तर आत्मा मनोमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य यजुरेव शिरः । ऋग्दक्षिणः पक्षः । सामोत्तरः पक्षः । आदेश आत्मा । अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ इति तृतीयोऽनुवाकः ॥३॥

प्राणं देवा अनु प्राणन्ति । देवा अग्न्यादयः प्राणं वाय्वात्मानं प्राणनशक्तिमन्तमनु तदात्मभूताः सन्तः प्राणन्ति प्राणनकर्म कुर्वन्ति, प्राणनक्रियया क्रियावन्तो भवन्ति । अध्यात्माधिकाराद्देवा इंद्रियाणि प्राणमनु प्राणन्ति मुख्यप्राणमनु चेष्टन्त इति वा । तथा मनुष्याः पशवश्च ये ते प्राणनकर्मणैव चेष्टावन्तो भवन्ति । अतश्च नान्नमयेनैव परिच्छिन्नेन आत्मना आत्मवन्त प्राणिनः । किं तर्हि? तदंतर्गतेन प्राणमयेनापि साधारणेनैव सर्वपिंडव्यापिना आत्मवन्तो मनुष्यादयः । एवं मनोमयादिभिः पूर्वपूर्वव्यापिभिरुत्तरोत्तरैः सूक्ष्मैरानंदमयान्तैराकाशादिभूतारब्धैरविद्याकृतैरात्मवन्तः सर्वे प्राणिनः । तथा स्वाभाविकेनाप्याकाशादिकारणेन नित्येनाविकृतेन सर्वगतेन सत्यज्ञानानंतलक्षणेन पंचकोशातिगेन सर्वात्मना आत्मवन्तः । स हि परमार्थत आत्मा सर्वेषामित्येतदप्यर्थादुक्तं भवति । प्राणं देवा अनु प्राणन्तीत्युक्तं तत्कस्मादित्याह— प्राणो हि यस्मात् भूतानां प्राणिनामायुर्जीवनम । "यावद्धयस्मिञ्शरीरे प्राणो वसति तावदायुः" इति श्रुत्यंतरात् । तस्मात्सर्वायुषम् । सर्वेषामायुः सर्वायुः सर्वायुरेव सर्वायुषमित्युच्यते । प्राणापगमे मरणप्रसिद्धेः । प्रसिद्धं हि लोके सर्वायुष्ट्वं प्राणस्य । अतोऽस्माद्वाद्यात् असाधारणादन्नमयात् आत्मनोऽपक्रम्य अंतः साधारणं प्राणमयमात्मानं ब्रह्मोपासते येऽहमस्मि प्राणः सर्वभूतानामात्मायुर्जीवनहेतुत्वादिति, ते सर्वमेवायुरस्मिँल्लोके यन्ति नापमृत्युना म्रियन्ते प्राक्प्राप्तादायुष इत्यर्थः । शतं वर्षाणीति तु युक्तं 'सर्वमायुरेति' इति श्रुतिप्रसिद्धेः । किं कारणं ? प्राणो हि भूतानामायुस्तस्मात्सर्वायुषमुच्यत इति । यो यद्गुणकं ब्रह्मोपास्ते स तद्गुणभाग्भवतीति विद्याफलप्राप्तेर्हेत्वर्थं पुनर्वचनं प्राणो हीत्यादि । **तस्य पूर्वस्यान्नमयस्यैष एव शरीरेऽन्नमये भवः शारीर आत्मा । कः । य एष प्राण-**

मयः । तस्माद्वा एतस्मादित्याद्युक्तार्थमन्यत् । अन्योऽन्तर आत्मा मनोमयः । मन इति संकल्पाद्यात्मकमंतःकरणं तन्मयो मनोमयो, सोऽयं प्राणमयस्याभ्यंतर आत्मा । तस्य यजुरेव शिरः । यजुरिति अनियताक्षरपादावसानो मंत्रविशेषः तज्जातीयवचनो यजुःशब्दस्तस्य शिरस्त्वं प्राधान्यात् । प्राधान्यं च यागादौ संनिपत्योपकारात् । यजुषा हि हविर्दीयते स्वाहाकारादिना । वाचनिकी वा शिरआदिकल्पना सर्वत्र । मनसो हि स्थानप्रयत्ननादस्वरवर्णपदवाक्याविषया तत्संकल्पात्मिका तद्भाविता वृत्ति श्रोत्रादिकरणद्वारा यजुःसंकेतविशिष्टा यजुरित्युच्यते । एवमृगेवं साम च । एवंच मनोवृत्तित्वे मंत्राणां वृत्तिरेवावर्त्यत इति मानसो जप उपपद्यते । अन्यथा अविषयत्वान्मंत्रो नावर्तयितुं शक्यो घटादिवदिति मानसो जपो नोपपद्यते । मंत्रावृत्तिश्च चोद्यते बहुश कर्मसु । अक्षरविषयस्मृत्यावृत्त्या मंत्रावृत्ति स्यादिति चेन्न । मुख्यार्थासंभवात् । "त्रिः प्रथमामन्वाह त्रिरुत्तमाम्" इति ऋगावृत्ति श्रूयते । तत्रचोऽविषयत्वे तद्विषयस्मृत्या आवृत्तौ च क्रियमाणाया त्रि प्रथमामन्वाहेति ऋगा वृत्तिर्मुख्योऽर्थश्चोदित. परित्यक्त स्यात् । तस्मान्मनोवृत्त्युपाधिपरिच्छिन्नं मनोवृत्तिनिष्ठमात्मचैतन्यं अनादिनिधनं यजु शब्दवाच्यमात्मविज्ञानं मंत्रा इति । एवं च नित्यत्वोपपत्तिर्वेदानाम् । अन्यथाविषयत्वे रूपादिवदनित्यत्वं च स्यात् । नैतद्युक्तम् । "सर्वे वेदा यत्रैकं भवन्ति स मानसीन आत्मा" इति च श्रुतिर्नित्यात्मनैकत्वं ब्रुवन्ती ऋगादीना नित्यत्वे समंजसा स्यात् । "ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदु." इति च मंत्रवर्णः । आदेशोऽत्र ब्राह्मणमादेष्टव्यविशेषानादिशतीति । अथर्वणांगिरसा च दृष्टा मंत्रा ब्राह्मणं च शांतिकपौष्टिकादिप्रतिष्ठाहेतुकर्मप्रधानत्वात् पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति मनोमयात्मप्रकाशकः पूर्ववत् ॥

यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनंदं ब्रह्मणो विद्वान् । न बिभेति कदाचनेति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य । तस्माद्वा एतस्मान्मनोमयात् । अन्योऽन्तर आत्मा विज्ञानमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य श्रद्धैव शिरः । ऋतं दक्षिणः पक्षः । सत्यमुत्तरः पक्षः । योग आत्मा । महः पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ इति चतुर्थोऽनुवाकः ॥४॥

यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेत्यादि । तस्य पूर्वस्य प्राणमयस्यैष एवात्मा शारीरः शरीरे प्राणमये भवः शारीरः । कः । य एष मनोमयः । तस्माद्वा एतस्मादित्यादि पूर्ववत् । अन्योऽन्तर आत्मा विज्ञानमयो मनोमयस्याभ्यंतरो विज्ञानमयः । मनोमयो वेदात्मोक्तः । वेदार्थविषया बुद्धिर्निश्चयात्मिका विज्ञानं, तच्चाध्यवसायलक्षणमंतःकरणस्य धर्मः । तन्मयो निश्चयविज्ञानैः प्रमाणस्वरूपैर्निर्वर्तित आत्मा विज्ञानमय । प्रमाणविज्ञानपूर्वको हि यज्ञादिस्तायते । यज्ञादिहेतुत्वं च वक्ष्यति श्लोकेन । निश्चयविज्ञानवतो हि कर्तव्येष्वर्थेषु पूर्वं श्रद्धोत्पद्यते । सा सर्वकर्तव्याना प्राग्भव्याच्छिर इव शिरः । ऋतसत्ये यथाव्याख्याते एव । योगो युक्तिः समाधानम् । आत्मेवात्मा । आत्मवतो हि युक्तस्य समाधानवतो अंगानीव श्रद्धादीनि यथार्थप्रतिपत्तिक्षमाणि भवन्ति । तस्मात्समाधानं योग आत्मा विज्ञानमयस्य । मह पुच्छं प्रतिष्ठा । मह इति महत्तत्त्वं प्रथमजम् । "महद्यक्षं प्रथमजं" इति श्रुत्यंतरात् । पुच्छं प्रतिष्ठा कारणत्वात् । कारणं हि कार्याणा प्रतिष्ठा । यथा वृक्षवीरुधा पृथिवी । सर्वविज्ञानानां च महत्तत्त्वं कारणम् । तेन तद्विज्ञानमयस्यात्मन. प्रतिष्ठा । तदप्येष श्लोको भवति पूर्ववत् । यथान्नमयादीना ब्राह्मणोक्ताना प्रकाशकः श्लोका, एवं विज्ञानमयस्यापि ॥

विज्ञानं यज्ञं तनुते । कर्माणि तनुतेऽपि च । विज्ञानं देवाः सर्वे । ब्रह्म ज्येष्ठमुपासते । विज्ञानं ब्रह्म चेद्वेद । तस्माच्चेन्न प्रमाद्यति । शरीरे पाप्मनो हित्वा । सर्वान्कामान्त्समश्नुत इति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य । तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योऽन्तर आत्मानंदमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य प्रियमेव शिरः । मोदो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः । आनंद आत्मा । ब्रह्म पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ इति पंचमोऽनुवाकः ॥५॥

विज्ञानं यज्ञं तनुते । विज्ञानवान्हि यज्ञं तनोति श्रद्धादिपूर्वकम् । अतो विज्ञानस्य कर्तृत्वं तनुत इति । कर्माणि च तनुते । तस्माद्विज्ञानकर्तृकं सर्वं तस्माद्युक्तं विज्ञानमय आत्मा ब्रह्मेति । किंच विज्ञानं ब्रह्म सर्वे देवा इंद्रादयो ज्येष्ठं प्रथमजत्वात्सर्वप्रवृत्तीनां वा तत्पूर्वकत्वात्प्रथमजं विज्ञानं ब्रह्मोपासते ध्या-

यन्ति, तस्मिन्विज्ञानमये ब्रह्मण्यभिमानं कृत्वोपासत इत्यर्थः । तस्मात्ते महतो ब्रह्मण उपासनज्ञानैश्वर्यवन्तो भवन्ति । तच्च विज्ञानं ब्रह्म चेद्यदि वेद विजानाति, न केवलं वेदैव तस्माद्ब्रह्मणश्चेन्न प्रमाद्यति, बाह्येष्वेवानात्मस्वात्मभावितः, तस्मात्प्राप्तं विज्ञानमये ब्रह्मण्यात्मभावनायाः प्रमदनं, तन्निवृत्त्यर्थमुच्यते—तस्माच्चेन्न प्रमाद्यतीति । अन्नमयादिष्वात्मभावं हित्वा केवले विज्ञानमये ब्रह्मण्यात्मत्वं भावयन्नास्ते चेदित्यर्थः । ततः किं स्यादित्युच्यते—शरीरे पाप्मनो हित्वा, शरीराभिमाननिमित्ता हि सर्वे पाप्मानस्तेषां च विज्ञानमये ब्रह्मण्यात्माभिमानाग्निमित्तापाये हानमुपपद्यते, छत्रापाय इव च्छायायाः । तस्माच्छरीराभिमाननिमित्तान्सर्वान्पाप्मनः शरीरप्रभवाच्छरीर एव हित्वा विज्ञानमयब्रह्मस्वरूपापन्नः तत्स्थान्सर्वान्कामान्विज्ञानमयेनैवात्मना समश्नुते सम्यग्भुंक्त इत्यर्थः । तस्य पूर्वस्य मनोमयस्यात्मैष एव शरीरे मनोमये भवः शारीरः । कः । य एष विज्ञानमयः । तस्माद्वा एतस्मादित्युक्तार्थम् । आनंदमय इति कार्यात्मप्रतीतिरधिकारान्मयटश्चाच्च । अन्नादिमया हि कार्यात्मानो भौतिका इहाधिकृताः । तदधिकारपतितश्चायमानंदमयः । मयट् चात्र विकारार्थे दृष्टो यथान्नमय इत्यत्र । तस्मात्कार्यात्मा आनंदमयः प्रत्येतव्यः । संक्रमणाच्च 'आनंदमयमात्मानमुपसंक्रामति' इति वक्ष्यति । कार्यात्मनां च संक्रमणमन्नात्मनां दृष्टम् । संक्रमणकर्मत्वेन चानंदमय आत्मा श्रूयते । यथान्नमयमात्मानमुपसंक्रामतीति । न चात्मन एवोपसंक्रमणम् । अधिकारविरोधादसंभवाच्च । न ह्यात्मनैवात्मन उपसंक्रमणं संभवति । स्वात्मनि भेदाभावात् । आत्मभूतं च ब्रह्म संक्रमितुः । शिरआदिकल्पनानुपपत्तेश्च । न हि यथोक्तलक्षण आकाशादिकारणेऽकार्यपतिते शिरआद्यवयवरूपकल्पनोपपद्यते । 'अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने' 'अस्थूलमनणु' 'नेति नेत्यात्मा' इत्यादिविशेषापोहश्रुतिभ्यश्च । मंत्रोदाहरणानुपपत्तेश्च । न हि प्रियशिरआद्यवयवविशिष्टे प्रत्यक्षतोऽनुभूयमाने आनंदमय आत्मनि ब्रह्मणि नास्ति ब्रह्मेत्याशंकाभावात् । 'असन्नेव स भवति असद्ब्रह्मेति वेद चेत्' इति मंत्रोदाहरणमुपपद्यते । ब्रह्म पुच्छं प्रतिष्ठेत्यपि चानुपपन्नं पृथग्ब्रह्मणः प्रतिष्ठात्वेन ग्रहणम् । तस्मात्कार्यपतित एवानंदमयो न पर एवात्मा । आनंद इति विद्याकर्मणोः फलम् । तद्विकार आनंदमयः । स च विज्ञानमयादांतरः । यज्ञादिहेतोर्विज्ञानमयादन्यांतरत्वश्रुतेः । ज्ञानकर्मणोर्हि

फलं भोक्त्रर्थत्वादंतरतमं स्यात् । अंतरतमश्चानंदमय आत्मा पूर्वेभ्यः । विद्याकर्मणोः प्रियाद्यर्थत्वाच्च । प्रियादिप्रयुक्ते हि विद्याकर्मणी । तस्मात्प्रियादीना फलरूपाणामात्मसंनिकर्षात् विज्ञानमयादस्याभ्यंतरत्वमुपपद्यते, प्रियादिवासनानिर्वर्तितो ह्यात्मा आनंदमयो विज्ञानमयाश्रितः स्वप्न उपलभ्यते । तस्यानंदमयस्यात्मनः इष्टपुत्रादिदर्शनजं प्रियं शिर इव शिरः प्राधान्यात् । मोद इति प्रियलाभनिमित्तो हर्षः । स एव च प्रकृष्टो हर्षः प्रमोदः । आनंद इति सुखसामान्यमात्मा प्रियादीनां सुखावयवाना तेष्वनुस्यूतत्वात् । आनंद इति परं ब्रह्म । तद्धि शुभकर्मणा प्रत्युपस्थाप्यमाने पुत्रमित्रादिविषयविशेषोपाधौ अंतःकरणवृत्तिविशेषे तमसा अप्रच्छाद्यमाने प्रसन्नेऽभिव्यज्यते । तद्विषयसुखमिति प्रसिद्धं लोके । तदुत्तिविशेषप्रत्युपस्थापकस्य कर्मणोऽनवस्थितत्वात्सुखस्य क्षणिकत्वम् । तद्यदंतःकरणं तपसा तमोघ्नेन विद्यया ब्रह्मचर्येण श्रद्धया च निर्मलत्वमापद्यते यावद्यावत्तावत्तावद्विविक्ते प्रसन्नेऽन्तःकरण आनंदविशेष उत्कृष्यते विपुलीभवति । वक्ष्यति च 'रसो वै सः । रसं ह्येवायं लब्ध्वानंदी भवति । एष ह्येवानंदयाति । एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुत्यंतरात् । एवं च कामोपशमोत्कर्षापेक्षया शतगुणोत्तरोत्तरोत्कर्ष आनंदस्य वक्ष्यते । एवं चोत्कृष्यमाणस्यानंदमयस्यात्मनः परमार्थब्रह्मविज्ञानापेक्षया ब्रह्म परमेव यत्प्रकृतं सत्यज्ञानानंतलक्षणं, यस्य च प्रतिपत्त्यर्थं पंचान्नादिमयाः कोशा उपन्यस्ताः यच्च तेभ्यो आभ्यंतरं, येन ते सर्वं आत्मवन्तः, तद्ब्रह्म पुच्छं प्रतिष्ठा । तदेव च सर्वस्य अविद्यापरिकल्पितस्य द्वैतस्यावसानभूतमद्वैतं ब्रह्म प्रतिष्ठा । आनंदमयस्यैकत्वावसानत्वात् । अस्ति तदेकमविद्याकल्पितस्य द्वैतस्यावसानभूतमद्वैतं ब्रह्म प्रतिष्ठा पुच्छम् । तदेतस्मिन्नप्यर्थ एष श्लोको भवति ॥

असन्नेव स भवति । असद्ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद्वेद । सन्तमेनं ततो विदुरिति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य । अथातोऽनुप्रश्नाः । उताविद्वानमुं लोकं प्रेत्य । कश्चन गच्छती३ । आहो विद्वानमुं लोकं प्रेत्य । कश्चित्समश्नुता३ उ । सोऽकामयत । बहु स्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । इदं सर्वमसृजत । यदिदं किंच । तत्सृष्ट्वा । तदेवानुप्राविशत् । तदनुप्रविश्य । सच्च त्यच्चाभवत् । निरुक्तं चानिरुक्तं च । निलयनं चानिलयनं च । विज्ञानं चाविज्ञानं च ।

सत्यं चानृतं च सत्यमभवत् । यदिदं किंच । तत्सत्यमित्याचक्षते । तदप्येष श्लोको भवति ॥ इति षष्ठोऽनुवाकः ॥६॥

असन्नेवासत्सम एव, यथाऽसन्नपुरुषार्थसंबंध्येवं स भवति अपुरुषार्थसंबंधी । कोऽसौ ? योऽसदविद्यमानं ब्रह्मेति वेद विजानाति चेद्यदि । तद्विपर्ययेण यत्सर्वविकल्पास्पदं सर्वप्रवृत्तिबीजं सर्वविशेषप्रत्यस्तमितमपि, अस्ति तद्ब्रह्मेति वेद चेत् । कुतः पुनराशंका तन्नास्तित्वे, व्यवहारातीतत्वं ब्रह्मण इति ब्रूमः । व्यवहारविषये हि वाचारंभणमात्रेऽस्तित्वभाविता बुद्धिस्तद्विपरीते व्यवहारातीते नास्तित्वमपि प्रतिपद्यते । यथा घटादिव्यवहारविषयतयोपपन्नः संस्तद्विपरीतोऽसन्निति प्रसिद्धम् । एवं तत्सामान्यादिहापि स्यात् ब्रह्मणो नास्तित्वं प्रत्याशंका । तस्मादुच्यते— अस्ति ब्रह्मेति चेद्वेदेति । किं पुनः स्यात्तदस्तीति विजानतस्तदाह— सन्तं विद्यमानं ब्रह्मस्वरूपेण परमार्थसदात्मापन्नमेवंविदं विदुर्ब्रह्मविदः । ततस्तस्मादस्तित्ववेदनात्सोऽन्येषां ब्रह्मवद्विज्ञेयो भवतीत्यर्थः । अथवा यो नास्ति ब्रह्मेति मन्यते स सर्वस्यैव सन्मार्गस्य वर्णाश्रमादिव्यवस्थालक्षणस्याश्रद्धानतया नास्तित्वं प्रतिपद्यतेऽब्रह्मप्रतिपत्त्यर्थत्वात्तस्य । अतो नास्तिकः सोऽसन्नसाधुरुच्यते लोके । तद्विपरीतः सन्योऽस्ति ब्रह्मेति चेद्वेद, स तद्ब्रह्मप्रतिपत्तिहेतुं सन्मार्गं वर्णाश्रमादिव्यवस्थालक्षणं श्रद्धानतया यथावत्प्रतिपद्यते यस्मात्ततस्तस्मात्सन्तं साधुमार्गस्थमेनं विदुः साधवः । तस्मादस्तीत्येव ब्रह्म प्रतिपत्तव्यमिति वाक्यार्थः ॥

तस्य पूर्वस्य विज्ञानमयस्यैष एव शरीरे विज्ञानमये भवः शारीर आत्मा । कोऽसौ । य एष आनंदमयः । तं प्रति नास्त्याशंका नास्तित्वे । अपोढसर्वविशेषत्वात्तु ब्रह्मणो नास्तित्वं प्रत्याशंका युक्ता । सर्वसामान्याच्च ब्रह्मणः । यस्मादेवं अतस्तस्मान्न अथानंतरं श्रोतुः शिष्यस्यानुप्रश्ना आचार्योक्तिमन्वेते प्रश्ना अनुप्रश्नाः—

सामान्यं हि ब्रह्म आकाशादिकारणत्वाद्विदुषोऽविदुषश्च । अतः अविदुषोऽपि ब्रह्मप्राप्तिराशंक्यते । उतापि अविद्वानमुं लोकं परमात्मानमितः प्रेत्य कश्चन, चनशब्दोऽप्यर्थे, अविद्वानपि गच्छति प्राप्नोति ? किंवा न गच्छतीति द्वितीयोऽपि प्रश्नो द्रष्टव्योऽनुप्रश्ना इति बहुवचनात् । विद्वांसं प्रत्यन्यौ प्रश्नौ-यद्यविद्वान्सामान्यं कारणमपि ब्रह्म न गच्छति, ततो विदुषोऽपि ब्रह्मागमनमाशं-

क्यते। अतस्तं प्रति प्रश्न आहो विद्वानिति। उकारं च वक्ष्यमाणमधस्तादपकृष्य तकारं च पूर्वस्मादुतशब्दाद्व्यासज्य आहो इत्येतस्मात्पूर्वमुतशब्दं संयोज्य पृच्छति उताहो विद्वानिति। विद्वान्ब्रह्मविदपि कश्चिदितः प्रेत्यामुं लोकं समश्नुते प्राप्नोति। समश्नुते उ इत्येवं स्थितेऽयादेशे यलोपे च कृतेऽकारस्य प्लुतिः समश्नुता३ उ इति। विद्वान्समश्नुतेऽमुं लोकम्। किंवा यथाऽविद्वानेवं विद्वानपि न समश्नुत इत्यपरः प्रश्नः। द्वावेव वा प्रश्नौ विद्वदविद्वद्विषयौ। बहुवचनं तु सामर्थ्यप्राप्तप्रश्नान्तरापेक्षया घटते। 'असद्ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद' इति श्रवणादस्ति नास्तीति संशयः। ततोऽर्थप्राप्तः किमस्ति नास्तीति प्रथमोऽनुप्रश्नः। ब्रह्मणोऽपक्षपातित्वादविद्वान्गच्छति न गच्छतीति द्वितीयः। ब्रह्मणः समत्वेऽप्यविदुष इव विदुषोऽप्यगमनमाशंक्य किं विद्वान्समश्नुते न समश्नुत इति तृतीयोऽनुप्रश्नः॥

एतेषां प्रतिवचनार्थमुत्तरग्रंथ आरभ्यते। तत्रास्तित्वमेव तावदुच्यते। यच्चोक्तं 'सत्यं ज्ञानमनंतं ब्रह्म' इति, तत्र कथं सत्यत्वमित्येतदुक्तव्यमितीदमुच्यते। सत्त्वोक्त्यैव सत्यत्वमुच्यते। उक्तं हि सदेव सत्यम् इति। तस्मात्सत्त्वोक्त्यैव सत्यत्वमुच्यते। कथमेवमर्थतावगम्यतेऽस्य ग्रंथस्य? शब्दानुगमात्। अनेनैव ह्यर्थेनान्वितान्युत्तराणि वाक्यानि। 'तत्सत्यमित्याचक्षते' 'यदेष आकाश आनंदो न स्यात्' इत्यादीनि॥

तत्रासदेव ब्रह्मेत्याशंक्यते। कस्मात्। यदस्ति तद्विशेषतो गृह्यते यथा घटादि। यन्नास्ति तन्नोपलभ्यते यथा शशविषाणादि। तथा नोपलभ्यते ब्रह्म। तस्माद्विशेषतोऽग्रहणान्नास्तीति। तन्न। आकाशादिकारणत्वाद्ब्रह्मणः न नास्ति ब्रह्म। कस्मात्। आकाशादि हि सर्वं कार्यं ब्रह्मणो जातं गृह्यते। यस्माच्च जायते किंचित्तदर्स्तीति दृष्टं लोके तथा घटाकुरादिकारणं मृद्बीजादि। तस्मादाकाशादिकारणत्वादस्ति ब्रह्म। न चासतो जातं किंचिद्गृह्यते लोके कार्यम्। असतश्चान्नामरूपादिकार्य निरात्मकत्वान्नोपलभ्येत। उपलभ्यते तु। तस्मादस्ति। ब्रह्म। असतश्चेत्कार्यं गृह्यमाणमप्यसदन्वितमेव स्यात्। न चैवं, तस्मादस्ति ब्रह्म। तत्र कथमसतः सज्जायेतेति श्रुत्यंतरमसतः सज्जन्मासंभवमन्वाचष्टे न्यायतः। तस्मात्सदेव ब्रह्मेति युक्तम्। तद्यदि मृद्बीजादिवत्कारणं स्यादचेतनं तर्हि। न। कामयितृत्वात्। न हि कामयित्रचेतनमस्ति लोके। सर्वज्ञं हि ब्रह्मेत्यवोचाम।

अतः कामयितृत्वोपपत्तिः । कामयितृत्वादस्मदादिवदनाप्तकाममिति चेत्, न । स्वातंत्र्यात् । यथान्यान्परवशीकृत्य कामादिदोषाः प्रवर्तयन्ति, न तथा ब्रह्मणः प्रवर्तकाः कामाः । कथं तर्हि, सत्यज्ञानलक्षणाः स्वात्मभूतत्वाद्विशुद्धाः । न तैर्ब्रह्म प्रवर्त्यते । तेषां तु तत्प्रवर्तकं ब्रह्म प्राणिकर्मापेक्षया । तस्मात्स्वातंत्र्यं कामेषु ब्रह्मणः । अतो नानाप्तकामं ब्रह्म । साधनान्तरानपेक्षत्वाच्च ॥

किंच यथान्येषामनात्मभूता धर्मादिनिमित्तापेक्षाः कामाः स्वात्मव्यतिरिक्तकार्यकरणसाधनान्तरापेक्षाश्च, न तथा ब्रह्मणो निमित्ताद्यपेक्षत्वम् । किं तर्हि, स्वात्मनोऽनन्या । तदेतदाह— सोऽकामयत । स आत्मा यस्मादाकाशः संभूतोऽकामयत कामितवान् । कथं, बहु स्यां बहु प्रभूतं स्यां भवेयम् । कथमेकस्यार्थान्तराननुप्रवेशे बहुत्वं स्यादित्युच्यते । प्रजायेयेत्यपेक्षय । न हि पुत्रोत्पत्तेरिवार्थान्तरविषयं बहुभवनम् । कथं तर्ह्यात्मस्थानभिव्यक्तनामरूपाभिव्यक्त्या । यदात्मस्थे अनभिव्यक्ते नामरूपे व्याक्रियेते, तदा नामरूपे आत्मस्वरूपापरित्यागेनैव ब्रह्मणाऽप्रविभक्तदेशकाले सर्वावस्थासु व्याक्रियेते । तदेतन्नामरूपव्याकरणं ब्रह्मणो बहुभवनम् । नान्यथा निरवयवस्य ब्रह्मणो बहुत्वापत्तिरुपपद्यतेऽल्पत्वं वा । यथाकाशस्याल्पत्वं बहुत्वं च वस्त्वंतरकृतमेव । अतस्तद्द्वारेणैवात्मा बहु भवति । न ह्यात्मनोऽन्यदनात्मभूतं तत्प्रविभक्तदेशकालं सूक्ष्मं व्यवहितं विप्रकृष्टं भूतं भवद्भविष्यद्वा वस्तु विद्यते । अतो नामरूपे सर्वावस्थे ब्रह्मणैवात्मवती । न ह्यब्रह्म तदात्मकम् । ते तत्प्रत्याख्याने न स्त एवेति तदात्मके उच्येते । ताभ्यां चोपाधिभ्यां ज्ञातृज्ञेयज्ञानशब्दार्थादिसर्वसंव्यवहारभाग्ब्रह्म ॥

स आत्मैवंकामः संस्तपोऽतप्यत । तप इति ज्ञानमुच्यते । 'यस्य ज्ञानमयं तपः' इति श्रुत्यंतरात् । आप्तकामत्वाच्चेतरस्यासंभव एव तपसः । तत्तपोऽतप्यत तप्तवान् । सृज्यमानजगद्रचनादिविषयामालोचनामकरोदात्मेत्यर्थः । स एवमालोच्य तपस्तप्त्वा प्राणिकर्मादिनिमित्तानुरूपमिदं सर्वं जगद्देशतः कालतो नाम्ना रूपेण च यथानुभवं सर्वैः प्राणिभिः सर्वावस्थैरनुभूयमानमसृजत सृष्टवान् । यदिदं किंच यत्किंचेदमविशिष्टम् । तदिदं जगत्सृष्ट्वा किमकरोदित्युच्यते— तदेव सृष्टं जगदनुप्राविशदिति ॥

तत्रैतच्चिंत्यं— कथमनुप्राविशदिति । किं, य स्रष्टा स तेनैवात्मनानुप्राविश-

दुतान्येनेति ? किं तावद्युक्तम् ? कृत्वाप्रत्ययश्रवणाद्य· स्रष्टा स एवानुप्राविशदिति। ननु न युक्तं मृद्वच्चेत्कारणं ब्रह्म, तदात्मकत्वात्कार्यस्य । कारणमेव हि कार्यात्मना परिणमते । अतोऽप्रविष्टस्यैव कार्योत्पत्तेरूर्ध्वं पृथक्कारणस्य पुन प्रवेशोऽनुपपन्न· । न हि घटपरिणामव्यतिरेकेण मृदो घटे प्रवेशोऽस्ति । यथा घटे चूर्णात्मना मृदोऽनुप्रवेशः, एवमेननात्मना नामरूपकार्येऽनुप्रवेश आत्मन इति चेत् श्रुत्यंतराच्च 'अनेन जीवेनात्मनानुप्राविश्य' इति, नैवं युक्तमेकत्वाद्ब्रह्मण· । मृदात्मनस्त्वेनकत्वात्मावयवत्वाच्च युक्तो घटे मृदश्चूर्णात्मनानुप्रवेशः । मृदश्चूर्णस्याप्रविष्टदेशवत्त्वाच्च । न त्वात्मन एकत्वे सति निरवयवत्वादप्रविष्टदेशाभावाच्च प्रवेश उपपद्यते । कथं तर्हि प्रवेश· स्यात् ? युक्तश्च प्रवेश·, श्रुतत्वात्तदेवानुप्राविशदिति । सावयवमेवास्तु । तर्हि सावयवत्वान्मुखे हस्तप्रवेशवन्नामरूपकार्ये जीवात्मनानुप्रवेशो युक्त एवेति चेन्न । अशून्यदेशत्वात । नहि कार्यात्मना परिणतस्य नामरूपकार्यदेशव्यतिरेकेणात्मशून्य· प्रदेशोऽस्ति यं प्रविशेज्जीवात्मना । कारणमेव चेत्प्रविशेज्जीवात्मत्वं जह्याद्यथा घटो मृत्प्रवेशे घटत्वं जहाति । तदेवानुप्राविशदिति च श्रुतेर्न कारणानुप्रवेशो युक्तः । कार्यान्तरमेव स्यादिति चेत् । तदेवानुप्राविशदिति । जीवात्मरूपं कार्यं नामरूपपरिणतं कार्यान्तरमेवापद्यत इति चेन्न । विरोधात् । न हि घटो घटान्तरमापद्यते, व्यतिरेकश्रुतिविरोधाच्च । जीवस्य नामरूपकार्यव्यतिरेकानुवादिन्यः श्रुतयो विरुध्येरन् । तदापत्तौ मोक्षासंभवाच्च । न हि यतो मुच्यमानस्तदेवापद्यते । न हि शृंखलापत्तिर्बद्धस्य तस्करादे· । बाह्यान्तरभेदेन परिणतमिति चेत् तदेव कारणं ब्रह्म शरीराद्याधारत्वेन तदंतर्जीवात्मना आधेयत्वेन च परिणतामिति चेन्न, बहिःष्टस्य प्रवेशोपपत्तेः । नहि यो यस्यान्त·स्थ· स एव तत्प्रविष्ट उच्यते । बहिःष्टस्यानुप्रवेशः स्यात्प्रवेशशब्दार्थस्यैवं दृष्टत्वात् । यथा गृहं कृत्वा प्राविशदिति । जलसूर्यकादिप्रतिबिंबवत्प्रवेश स्यादिति चेन्न । अपरिच्छिन्नत्वादमूर्तत्वाच्च । परिच्छिन्नस्य मूर्तस्यान्यस्यान्यत्र प्रसादस्वभावके जलादौ सूर्यकादिप्रतिबिंबोदयः स्यात् । न त्वात्मनः, अमूर्तत्वात् आकाशादिकारणस्यात्मनः व्यापकत्वात । तद्विप्रकृष्टदेशप्रतिबिंबाधारवस्त्वंतराभावाच्च प्रतिबिंबवत्प्रवेशो न युक्तः । एवं तर्हि नैवास्ति प्रवेशो, न च गत्यंतरमुपलभामहे । तदेवानुप्राविशत् इति श्रुतेः । श्रुतिश्च नोऽतींद्रियविषये विज्ञानोत्पत्तौ निमित्तम् । न

चास्माद्वाक्यायद्यवतामपि विज्ञानमुत्पद्यते । हंत तर्ह्यनर्थकत्वादपोद्यमेतद्वाक्यं तत्सृष्ट्वा तदेवानुप्राविशत् इति । न । अन्यार्थत्वात । किमर्थमस्थाने चर्चा? प्रकृतो ह्यन्यो विवक्षितोऽस्य वाक्यस्यार्थोऽस्ति, स स्मर्तव्यः, 'ब्रह्मविदाप्नोति परम्' 'सत्यं ज्ञानमनंतं ब्रह्म' 'यो वेद निहितं गुहायाम्' इति । तद्विज्ञानं च विवक्षितं, प्रकृतं च तत् । ब्रह्मस्वरूपावगमाय च आकाशाद्यन्नमयान्तं कार्यं प्रदर्शितं, ब्रह्मावगमश्चारब्धः । तत्रान्नमयादात्मनोऽन्योऽन्तर आत्मा प्राणमयः, तदंतर्मनोमयो विज्ञानमय इति विज्ञानगुहाया प्रवेशितः । तत्र चानंदमयो विशिष्ट आत्मा प्रदर्शितः । अतः परमानंदमयलिंगाधिगमद्वारेणानंदवित्र्ह्यवसान आत्मा । ब्रह्म पुच्छं प्रतिष्ठा सर्वविकल्पास्पदो निर्विकल्पोऽस्यामेव गुहायामधिगन्तव्य इति तत्प्रवेशः प्रकल्प्यते । न ह्यन्यत्रोपलभ्यते ब्रह्म निर्विशेषत्वात् । विशेषसंबंधो ह्युपलब्धिहेतुर्दृष्टः । यथा राहोश्चंद्रार्कविशेषसंबंधः । एवमन्तःकरणगुहात्मसंबंधो ब्रह्मण उपलब्धिहेतुः । संनिकर्षादवभासात्मकत्वाच्चांतःकरणस्य । यथा चालोकविशिष्टा घटाद्युपलब्धिरेवं बुद्धिप्रत्ययालोकविशिष्टा आत्मोपलब्धिः स्यात् । तस्मादुपलब्धिहेतौ गुहायां निहितमिति पक्वतमेव । तद्वृत्तिस्थानीये त्विह पुनस्तत्सृष्ट्वा तदेवानुप्राविशदित्युच्यते ॥

तदेवेदमाकाशादिकारणं कार्यं सृष्ट्वा तदनुप्रविष्टमिवान्तर्गुहायां बुद्धौ द्रष्टृ श्रोतृ मंतृ विज्ञात्रित्येवं विशेषवदुपलभ्यते । स एव तस्य प्रवेशः । तस्मादस्ति तत्कारणं ब्रह्म । अतोऽस्तित्वादस्तीत्येवोपलब्धव्यं तत् । तत्कार्यमनुप्रविश्य, किं, सच्च मूर्तं त्यच्चामूर्तमभवत् । मूर्तामूर्ते ह्यव्याकृतनामरूपे आत्मस्थे अंतर्गतेनात्मना व्याक्रियेते । व्याकृते च मूर्तामूर्तशब्दवाच्ये ते आत्मना त्वप्रविभक्तदेशकाले इति कृत्वा आत्मा ते अभवदित्युच्यते । किंच निरुक्तं चानिरुक्तं च, निरुक्तं नाम निष्कृष्य समानासमानजातीयेभ्यो देशकालविशिष्टतयेदं तदित्युक्तं, अनिरुक्तं तद्विपरीतम् । निरुक्तानिरुक्ते अपि मूर्तामूर्तयोरेव विशेषणे । यथा सच्च त्यच्च प्रत्यक्षपरोक्षे, तथा निलयनं चानिलयनं च । निलयनं नीडमाश्रयो मूर्तस्यैव धर्मः । अनिलयनं तद्विपरीतममूर्तस्यैव धर्मः । त्यदनिरुक्तानिलयनान्यमूर्तधर्मत्वेऽपि व्याकृतविषयाण्येव । सर्गोत्तरकालभावश्रवणात् । त्यदिति प्राणाद्यनिरुक्तं तदेवानिलयनं च । अतो विशेषणान्यमूर्तस्य व्याकृतविषयाण्येवैतानि । विज्ञानं अविज्ञानं तद्रहितमचेतनं पाषाणादि ।

सत्यं च व्यवहारविषयमधिकारान्न परमार्थसत्यम् । एकमेव हि परमार्थसत्यं ब्रह्म । इह पुनर्व्यवहारविषयमापेक्षिकं सत्यं, मृगतृष्णिकाद्यनृतापेक्षयोदकादि सत्यमुच्यते । अनृतं च तद्विपरीतम् । किं पुनरेतत्सर्वमभवत्? सत्यं परमार्थसत्यं, किं पुनस्तत्? ब्रह्म । सत्यं ज्ञानमनंतं ब्रह्मेति प्रकृतत्वात् ॥

यस्मात्सत्त्यदादिकं मूर्तामूर्तधर्मजातं यत्किंचेदं सर्वमविशिष्टं विकारजातं एकमेव सच्छब्दवाच्यं ब्रह्माभवत्तद्व्यतिरेकेणाभावान्नामरूपविकारस्य, तस्मात्तद्ब्रह्म सत्यमित्याचक्षते ब्रह्मविदः । अस्ति नास्तीत्यनुप्रश्नः प्रकृत., तस्य प्रतिवचनविषय एतदुक्तं—आत्माऽकामयत बहु स्यामिति । स यथाकामं चाकाशादिकार्यं सत्त्यदादिलक्षणं सृष्ट्वा तदनुप्रविश्य पश्यञ्शृण्वन्मन्वानो विजानन्बह्वभवत् । तस्मात्तदेवेदमाकाशादिकारणं कार्यस्थं परमे व्योमन्हृदयगुहायां निहितं तत्प्रत्ययावभासविशेषेणोपलभ्यमानं अस्तीत्येवं विजानीयादित्युक्तं भवति । तदेतस्मिन्नर्थे ब्राह्मणोक्त एष श्लोको मंत्रो भवति । यथा पूर्वेष्वन्नमयाद्यात्मप्रकाशकाः पंचस्वपि, एवं सर्वान्तरमात्मास्तित्वप्रकाशकोऽपि मंत्रः कार्यद्वारेण भवति ॥ इति षष्ठोऽनुवाकः ॥

असद्वा इदमग्र आसीत् । ततो वै सदजायत । तदात्मानं स्वयमकुरुत । तस्मात्तत्सुकृतमुच्यत इति । यद्वै तत्सुकृतम् । रसो वै सः । रसं ह्येवायं लब्ध्वाऽऽनंदी भवति । को ह्येवान्यात्कः प्राण्यात् । यदेष आकाश आनंदो न स्यात् । एष ह्येवानंदयाति । यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विंदते । अथ सोऽभयं गतो भवति । यदा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते । अथ तस्य भयं भवति । तत्त्वेव भयं विदुषोऽमन्वानस्य । तदप्येष श्लोको भवति ॥ इति सप्तमोऽनुवाकः ॥७॥

असद्वा इदमग्र आसीत् । असदिति व्याकृतनामरूपविशेषविपरीतरूपमविकृतं ब्रह्मोच्यते । न पुनरत्यंतमेवासत् । न ह्यसतः सज्जन्मास्ति । इदमिति नामरूपविशेषवद्व्याकृतं जगत् अग्रे पूर्वं प्रागुत्पत्तेर्ब्रह्मैवासच्छब्दवाच्यमासीत् । ततोऽसतो वै सत्प्रविभक्तनामरूपविशेषमजायतोत्पन्नम् । किं ततः प्रविभक्तं कार्यमिति पितुरिव पुत्रः? नेत्याह । तदसच्छब्दवाच्यं स्वयमेवात्मानमेवाकुरुत कृतवत् । यस्मादेवं तस्मात्तत् ब्रह्मैव सुकृतं स्वयं कर्तृच्यते । स्वयं कर्तृ ब्रह्मेति प्रसिद्धं लोके सर्वकारणत्वात् । यस्माद्वा स्वयमकरोत्सर्वं सर्वात्मना, तस्मा-

त्पुण्यरूपेणापि तदेव ब्रह्म कारणं सुकृतमुच्यते । सर्वथापि तु फलसंबंधादि-कारणं सुकृतशब्दवाच्यं प्रसिद्धं लोके । यदि पुण्यं यदि वान्यत्सा प्रसिद्धिः नित्ये चेतनवत्कारणे सत्युपपद्यते, तस्मादस्ति तद्ब्रह्म, सुकृतप्रसिद्धेः । इतश्चास्ति । कुतः । रसत्वात् । कुतो रसत्वप्रसिद्धिर्ब्रह्मणो इत्यतः आह—— यद्वै तत्सुकृतं रसो वै सः । रसो नाम तृप्तिहेतुरानंदकरो मधुराम्लादिः प्रसिद्धो लोके । रसमेव हि अयं लब्ध्वा प्राप्य आनंदी सुखी भवति । नासत आनंद-हेतुत्वं दृष्टं लोके । बाह्यानंदसाधनरहिता अप्यनीहा निरेषणा ब्राह्मणा बाह्य-रसलाभादिव सानंदा दृश्यन्ते विद्वांसः, नूनं ब्रह्मैव रसस्तेषाम् । तस्मादस्ति ततेषामानंदकारणं रसवद्ब्रह्म । इतश्चास्ति । कुतः ? प्राणनादिक्रियादर्शनात् । अयमपि हि पिंडो जीवत. प्राणेन प्राणित्यपानेनापानिति । एवं वायवीया ऐंद्रियकाश्च चेष्टाः संहतैः कार्यकरणैर्निर्वर्त्यमाना दृश्यन्ते । तच्चैकार्थवृत्ति-त्वेन संहननं नान्तरेण चेतनमसंहतं संभवति । अन्यत्रादर्शनात् । तदाह यद्यदि एष आकाशे परमे व्योम्नि गुहायां निहित आनंदो न स्यान्न भवेत्को ह्येव लोकेऽ-न्यादपानचेष्टां कुर्यादित्यर्थः । कः प्राण्यात्प्राणनं वा कुर्यात् । तस्मादस्ति तद्ब्रह्म । यदर्थाः कार्यकरणप्राणनादिचेष्टाः तत्कृत एव चानंदो लोकस्य । कुतः । एष ह्येव पर आत्मा आनंदयात्यानंदयति सुखयति लोकं धर्मानुरूपम् । स ए-वात्मानंदरूपोऽविद्यया परिच्छिन्नो विभाव्यते प्राणिभिरित्यर्थः । भयाभयहेतु-त्वाद्विद्वदविदुषोरस्ति तद्ब्रह्म । सद्वस्त्वाश्रयणेन ह्यभयं भवति । नासद्वस्त्वाश्रय-णेन भयनिवृत्तिरुपपद्यते । कथमभयहेतुत्वमित्युच्यते— यदा ह्येव यस्मादेष साधक एतस्मिन्ब्रह्मणि, किविशिष्टेऽदृश्ये, दृश्यं नाम द्रष्टव्यं विकारो दर्शनार्थ-त्वाद्विकारस्य । न दृश्यमदृश्यमविकार इत्यर्थः । एतस्मिन्नदृश्येऽविकारेऽविषय-भूतेऽनात्म्येऽशरीरे यस्मादृश्यं तस्मादनात्म्यं यस्मादनात्म्यं तस्मादनिरुक्तम् । विशेषो हि निरुच्यते । विशेषश्च विकारः । अविकारं च ब्रह्म । सर्वविकारहेतु-त्वात् । तस्मादनिरुक्तम् । यत एवं तस्मादनिलयनं निलयनं नीड आश्रयो न निलयनमनिलयनमनाधारं तस्मिन्नेतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने सर्व-कार्यधर्मविलक्षणे ब्रह्मणीति वाक्यार्थः । अभयमिति क्रियाविशेषणम् । अभ-यामिति वा लिंगांतरं परिणम्यते । प्रतिष्ठां स्थितिमात्मभावं विंदते लभते । अथ तदा स तस्मिन्नानात्वस्य भयहेतोरविद्याकृतस्यादर्शनादभयं गतो भवति ।

स्वरूपप्रतिष्ठो ह्यसौ यदा भवति, तदा नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति । अन्यस्य ह्यन्यतो भयं भवति, न आत्मन एवात्मनो भयं युक्तम् । तस्मादात्मैवात्मनोऽभयकारणम् । सर्वतो हि निर्भया ब्राह्मणा दृश्यन्ते सत्सु भयहेतुषु । तच्चायुक्तमसति भयत्राणे ब्रह्मणि । तस्मात्तेषामभयदर्शनादस्ति तदभयकारणं ब्रह्मेति । कदासौ अभयं गतो भवति साधकः ? यदा नान्यत्पश्यत्यात्मनि चान्तरं भेदं न कुरुते, तदाऽभयं गतो भवतीत्यभिप्रायः । यदा पुनरविद्यावस्थाया हि यस्मादेषोऽविद्यावानविद्यया प्रत्युपस्थापितं वस्तु तैमिरिकद्वितीयचंद्रवत्पश्यत्यात्मनि चैतास्मिन्ब्रह्मणि, उदपि, अरमल्पमपि अंतरं छिद्रं भेददर्शनं कुरुते । भेददर्शनमेव ह्यंतरकरणं अल्पमपि भेदं पश्यतीत्यर्थः । अथ तस्माद्भेददर्शनाद्धेतोः अस्य भेददर्शिन आत्मनो भयं भवति । तस्मादात्मैवात्मनो भयकारणमविदुष । तदेतदाह—तद्ब्रह्म त्वेव भयं भेददर्शिनो विदुष ईश्वरोऽन्यो मत्तोऽहमन्य. संसारीत्येवंविदुषो भेददृष्टमीश्वराख्यं तदेव ब्रह्माल्पमप्यंतरं कुर्वतो भयं भवत्येकत्वेनामन्वानस्य । तस्माद्विद्वानप्यविद्वानेवासौ योऽयमेकमभिन्नमात्मतत्त्वं न पश्यति । उच्छेदहेतुदर्शनाद्धि उच्छेद्याभिमतस्य भयं भवति । अनुच्छेद्यो ह्युच्छेदहेतु. । तत्रास्त्युच्छेदहेतावुच्छेद्ये न तद्दर्शनकार्यं भयं युक्तम् । सर्वं च जगद्भयवत् दृश्यते । तस्माज्जगतो भयदर्शनाद्रम्यते नूनं तदस्ति भयकारणमुच्छेदहेतुरनुच्छेद्यात्मकं यतो जगद्बिभेतीति । तदेतस्मिन्नप्यर्थ एष श्लोको भवति ॥ इति सप्तमोऽनुवाकः ॥

भीषास्माद्वातः पवते । भीषोदेति सूर्यः । भीषास्मादग्निश्चेंद्रश्च । मृत्युर्धावति पंचम इति । सैषानंदस्य मीमांसा भवति । युवा स्यात्साधुयुवाध्यायकः । आशिष्ठो दृढिष्ठो बलिष्ठः । तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् । स एको मानुष आनंदः । ते ये शतं मानुषा आनंदाः ॥१॥ स एको मनुष्यगंधर्वाणामानंदः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं मनुष्यगंधर्वाणामानंदाः । स एको देवगंधर्वाणामानंदः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवगंधर्वाणामानंदाः । स एकः पितृणां चिरलोकलोकानामानंदः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं पितृणां चिरलोकलोकानामानंदाः । स एक आजानजानां देवानामानंदः ॥२॥ श्रोत्रियस्य चाकामहतस्य । ते ये शतमाजानजानां देवानामानंदाः । स एकः कर्म-

देवानां देवानामानंदः । ये कर्मणा देवानपियन्ति । श्रोत्रियस्य चाकामहतस्य । ते ये शतं कर्मदेवानां देवानामानंदाः । स एको देवानामानंदः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवानामानंदाः । स एक इंद्रस्यानंदः ॥३॥ श्रोत्रियस्य चाकामहतस्य । ते ये शतमिंद्रस्यानंदाः । स एको बृहस्पतेरानंदः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं बृहस्पतेरानंदा. । स एक प्रजापतेरानंदः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं प्रजापतेरानंदाः । स एको ब्रह्मण आनंदः । श्रोत्रियस्य चाकामहतस्य ॥४॥

भीषा भयेनास्माद्वातः पवते । भीषेदेति सूर्यः । भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति । वातादयो हि महार्हाः स्वयमीश्वराः सन्त. पवनादिकार्येष्व.यासबहुलेषु नियताः प्रवर्तन्ते । तद्युक्तं प्रशास्तरि सति, यस्मात् नियमेन तेषा प्रवर्तनं, तस्मादस्ति भयकारणं तेषा प्रशास्तृ ब्रह्म । यतस्ते भृत्या इव राज्ञोऽस्मात् ब्रह्मणो भयेन प्रवर्तन्ते तच्च भयकारणमानंदं ब्रह्म । तस्यास्य ब्रह्मण आनंदस्यैषा मीमासा विचारणा भवति । किमानंदस्य मीमांस्यमित्युच्यते । किमानंदो विषयविषयिसंबंधजनितो लौकिकानंदवदाहोस्वित्स्वाभाविक, इत्येवमेषा आनंदस्य मीमांसा । तत्र लौकिक आनंदो बाह्याध्यात्मिकसाधनसंपत्तिनिमित्त उत्कृष्टः । स य एष निर्दिश्यते ब्रह्मानंदानुगमार्थम् । अनेन हि प्रसिद्धेनानंदेन व्यावृत्तविषयबुद्धिगम्य आनंदोऽनुगंतुं शक्यते । लौकिकोऽप्यानंदो ब्रह्मानंदस्यैव मात्रा अविद्यया तिरस्क्रियमाणे विज्ञान उत्कृष्यमाणाया चाविद्यायां ब्रह्मादिभिः कर्मवशाद्यथाविज्ञानं विषयादिसाधनसंबंधवशाच्च विभाव्यमानश्च लोकेऽनवस्थितो लौकिकः संपद्यते । स एवाविद्याकामकर्मापकर्षेण मनुष्यगंधर्वाद्युत्तरोत्तरभूमिष्वकामहतविद्वच्छ्रोत्रियप्रत्यक्षो विभाव्यते शतगुणोत्तरोत्तरोत्कर्षेण यावद्धिरण्यगर्भस्य ब्रह्मण आनंद इति । निरस्ते त्वविद्याकृते विषयविषयिविभागे विद्यया स्वाभाविकः परिपूर्ण एक आनंदोऽद्वैतो भवतीत्येतमर्थं विभावयिष्यन्नाह युवा प्रथमवयाः । साधुयुवेति साधुश्चासौ युवा चेति यूनो विशेषणम् । युवाप्यसाधुर्भवति साधुरप्ययुवा अतो विशेषणं युवा स्यात्साधुयुवेति । अध्यायकोऽधीतवेदः । आशिष्ठ आशास्तृतमः । दृढिष्ठो दृढतमः । बलिष्ठो बलवत्तमः । एवमाध्यात्मिकसाधनसंपन्नः । तस्येयं पृथिव्युर्वी सर्वा वित्तस्य वित्तेनोपभोगसाधनेन दृष्टार्थेनादृष्टार्थेन च कर्मसाधनेन संपन्ना पूर्णा,

राजा पृथिवीपतिरित्यर्थः । तस्य च य आनंदः स एको मानुषो मनुष्याणां प्रकृष्ट एक आनंदः । ते ये शतं मानुषा आनंदाः स एको मनुष्यगंधर्वाणामानंदः । मानुषानंदाच्छतगुणेनोत्कृष्टो मनुष्यगंधर्वाणामानंदो भवति । मनुष्या. सन्तः कर्मविद्याविशेषाद्गंधर्वत्वं प्राप्ता मनुष्यगंधर्वाः । ते ह्यंतर्धानादिशक्तिसंपन्नाः सूक्ष्मकार्यकरणाः । तस्मात्प्रतिघातात्पत्वं तेषा द्वंद्वप्रतिघातशक्तिः साधनसंपत्तिश्च । ततोऽप्रतिहन्यमानस्य प्रतिकारवतो मनुष्यगंधर्वस्य स्याच्चित्तप्रसाद । तत्प्रसादविशेषात्सुखविशेषाभिव्यक्तिः । एवं पूर्वस्याः पूर्वस्या भूमेरुत्तरस्यामुत्तरस्या भूमौ प्रसादविशेषत. शतगुणेनानंदोत्कर्ष उपपद्यते । प्रथमं त्वकामहतग्रहणं मनुष्यविषयभोगकामानभिहतस्य श्रोत्रियस्य मनुष्यानंदाच्छतगुणेनानंदोत्कर्षो मनुष्यगंधर्वेण तुल्यो वक्तव्य इत्येवमर्थम् । साधुयुवाध्यायक इति श्रोत्रियत्वावृजिनंत्वे गृह्येते । ते ह्यविशिष्टे सर्वत्र । अकामहतत्वं तु विषयोत्कर्षापकर्षत. सुखोत्कर्षापकर्षाय विशेष्यते । अतोऽकामहतग्रहणम्, तद्विशेषतः शतगुणसुखोत्कर्षोपलब्धेः अकामहतत्वस्य परमानंदप्राप्तिसाधनत्वविधानार्थम् । व्याख्यातमन्यत् । देवगंधर्वा जातित एव । चिरलोकलोकानामिति पितृणां विशेषणम । चिरकालस्थायी लोको येषा पितृणा ते चिरलोकलोका इति । आजान इति देवलोकस्तस्मिन्नाजाने जाता आजानजा देवाः, स्मार्तकर्मविशेषतो देवस्थानेषु जाताः । कर्मदेवा ये वैदिकेन कर्मणाग्निहोत्रादिना केवलेन देवानपियन्ति । देवा इति त्रयस्त्रिंशद्वर्विभुजः । इंद्रस्तेषा स्वामी । तस्याचार्यो बृहस्पतिः । प्रजापतिर्विराट् त्रैलोक्यशरीरो ब्रह्मा समष्टिव्यष्टिरूपः संसारमंडलव्यापी । यत्रैते आनंदभेदा एकतां गच्छन्ति धर्मश्च तन्निमित्तो ज्ञानं च तद्विषयमकामहतत्वं च निरतिशयं यत्र, स एष हिरण्यगर्भो ब्रह्मा तस्यैष आनंदः श्रोत्रियेणावृजिनेनाकामहतेन च सर्वतः प्रत्यक्षमुपलभ्यते । तस्मादेतानि त्रीणि साधनानीत्यवगम्यते । तत्र श्रोत्रियत्वावृजिनत्वे नियते, अकामहतत्वं तूत्कृष्यते इति प्रकृष्टसाधनता अवगम्यते । तस्याकामहतत्वप्रकर्षतश्चोपलभ्यमानः श्रोत्रियप्रत्यक्षो ब्रह्मण आनंदो यस्य परमानंदस्य मात्रैकदेशः । 'एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुत्यंतरात् । स एष आनंदो यस्य मात्रा समुद्रभस इव विप्रुषः प्रविभक्ता यत्रैकतां गता स एष परमानंदः स्वाभाविको अद्वैतत्वात् । आनंदानंदिनोश्चाविभागोऽत्र ॥

स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः । स य एवंवित् । अस्माल्लोकात्प्रेत्य । एतमन्नमयमात्मानमुपसंक्रामति । एतं प्राणमयमात्मानमुपसंक्रामति । एतं मनोमयमात्मानमुपसंक्रामति । एतं विज्ञानमयमात्मानमुपसंक्रामति । एतमानंदमयमात्मानमुपसंक्रामति । तदप्येष श्लोको भवति ॥५॥ इति अष्टमोऽनुवाक ॥८॥

तदेतन्मीमांसाफलमुपसंहियते— स यश्चायं पुरुष इति । यो गुहायां निहित परमे व्योम्न्याकाशादिकार्यं सृष्ट्वा अन्नमयान्तं, तदेवानुप्रविष्टः, स य इति निर्दिश्यते । कोऽसौ ? अयं पुरुषे । यश्चासावादित्ये यः परमानंदः श्रोत्रियप्रत्यक्षो निर्दिष्टो, यस्यैकदेशं ब्रह्मादीनि भूतानि मुखार्हाण्युपजीवन्ति, स यश्चासावादित्य इति निर्दिश्यते । स एको भिन्नप्रदेशस्थघटाकाशाकाशैकत्ववत् । ननु तन्निर्देशे स यश्चायं पुरुष इत्यविशेषतोऽध्यात्मं न युक्तो निर्देशो, 'यश्चायं दक्षिणेऽक्षन्निति तु युक्तः, प्रसिद्धत्वात् । न । पराधिकारात् । परो ह्यात्माऽधिकृतो 'अदृश्येऽनात्म्ये' 'भीषास्माद्वातः पवते' 'सैषानंदस्य मीमांसा' इति । न त्वकस्मादप्रकृतो युक्तो निर्देष्टुं, परमात्मविज्ञानं च विवक्षितम् । तस्मात्पर एव निर्दिश्यते स एक इति । नन्वानंदस्य मीमांसा प्रकृता तस्या अपि फलमुपसंहर्तव्यम् । अभिन्नः स्वाभाविक आनंदः परमात्मैव, न विषयविषयिसंबंधजनित इति । ननु तदनुरूप एवायं निर्देशः 'स यश्चायं पुरुषे यश्चासावादित्ये स एक' इति भिन्नाधिकरणस्थविशेषोपमर्देन । नन्वेवमादित्यविशेषग्रहणमनर्थकम् । नानर्थकम् । उत्कर्षापकर्षापोहार्थत्वात् । द्वैतस्य हि मूर्तामूर्तलक्षणस्य यः पर उत्कर्षः सवित्रभ्यंतर्गतः स चेत्पुरुषगतविशेषोपमर्देन परमानंदमपेक्ष्य समो भवति, न कश्चिदुत्कर्षोऽपकर्षो वा तां गतिं गतस्येत्यभयं प्रतिष्ठां विंदत इत्युपपन्नम् ॥**

अस्ति नास्तीत्यनुप्रश्नो व्याख्यातः । कार्यरसलाभप्राणनाभयप्रतिष्ठाभयदर्शनोपपत्तिभ्योऽस्त्येव तदाकाशादिकारणं ब्रह्मेत्यपाकृतोऽनुप्रश्न एकः, द्वावन्यावनुप्रश्नौ विद्वदविदुषोर्ब्रह्मप्राप्त्यप्राप्तिविषयौ । तत्र विद्वान्समश्नुते न समश्नुत इत्यनुप्रश्नोऽन्त्यः । तदपाकरणायोच्यते । मध्यमोऽनुप्रश्नो अंत्यापाकरणादेवापाकृत इति तदपाकरणाय न यत्यते । स यः कश्चिदेवं यथोक्तं ब्रह्मोत्सृज्योत्कर्षापकर्षमद्वैतं सत्यं ज्ञानमनंतमस्मीत्येवं वेत्तीत्येवंवित् । एवंशब्दस्य

प्रकृतपरामर्शार्थत्वात्। स किम्? अस्माल्लोकात्प्रेत्य, दृष्टादृष्टविषयसमुदायो ह्ययं लोकस्तस्मादस्माल्लोकात्प्रेत्य प्रत्यावृत्य निरपेक्षो भूत्वैतं यथाव्याख्यातमन्नमयं आत्मानमुपसंक्रामति, विषयजातमन्नमयात्पिण्डात्मनो व्यतिरिक्तं न पश्यति, सर्वं स्थूलभूतमन्नमयमात्मानं पश्यतीत्यर्थः। ततोऽभ्यंतरमेतं प्राणमयं सर्वान्नमयात्मस्थमविभक्तम्। अथैतं मनोमयं विज्ञानमयं आनंदमयमात्मानमुपसंक्रामति। अथादृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विंदते॥

तत्रैतच्चिंत्यम्। कोऽयमेवंवित्कथं वा संक्रामतीति। किं परस्मादात्मनोऽन्यः संक्रमणकर्ता प्रविभक्त उत स एवेति। किं तत्, यद्यन्यः स्यात् श्रुतिविरोधः। 'तत्सृष्ट्वा तदेवानुप्राविशत्' 'अन्योऽसावन्योऽहमस्मीति न स वेद' 'एकमेवाद्वितीयम्' 'तत्त्वमसि' इति। अथ स एव आनंदमयमात्मानमुपसंक्रामतीति, कर्मकर्तृत्वानुपपत्तिः। परस्यैव च संसारित्वं पराभावो वा। यद्युभयथा, प्राप्तो दोषो न परिहर्तुं शक्यत इति व्यर्था चिंता। अथान्यतरस्मिन्पक्षे दोषाप्राप्तिस्तृतीये वा पक्षेऽदुष्टे, स एव शास्त्रार्थ इति व्यर्थैव चिंता। न। तन्निर्धारणार्थत्वात्। सत्यं प्राप्तो दोषो न शक्यः परिहर्तुमन्यतरस्मिंस्तृतीये वा पक्षेऽदुष्टेऽवधृते व्यर्था चिंता स्यात् न तु सोऽवधृत इति तदवधारणार्थत्वात् अर्थवत्येवैषा चिंता। सत्यमर्थवती चिंता। शास्त्रार्थावधारणार्थत्वात्। चिंतयसि च त्वं न तु निर्णेष्यसि, किं न निर्णेतव्यमिति वेदवचनं? न, कथं तर्हि बहुप्रतिपक्षत्वात्। एकत्ववादी त्वं, वेदार्थपरत्वात्। बहवो हि नानात्ववादिनो वेदबाह्याः त्वत्प्रतिपक्षा अतो ममाशंका न निर्णेष्यसीति। एतदेव मे स्वस्त्ययनं—यन्मामेकयोगिनमनेकयोगिबहुप्रतिपक्षमाह्थ। अतो जेष्यामि सर्वानारभे च चिंताम्॥

स एव तु स्यान्नद्भावस्य विवक्षितत्वात्। तद्विज्ञानेन परमात्मभावो ह्यत्र विवक्षितो ब्रह्मविदाप्नोति परमिति। न ह्यन्यस्यान्यभावापत्तिरुपपद्यते। ननु तस्यापि तद्भावापत्तिरनुपपन्नैव। न। अविद्याकृतानात्मापोहार्थत्वात्। या हि ब्रह्मविद्यया स्वात्मप्राप्तिरुपादिश्यते साऽविद्याकृतस्य अन्नादिविशेषात्मनः आत्मत्वेनाध्यारोपितस्य अनात्मनोऽपोहार्था। कथमेवमवगम्यते, विद्यामात्रोपदेशात्। विद्यायाश्च दृष्टं कार्यमविद्यानिवृत्तिस्तच्चेह विद्यामात्रमात्मप्राप्तौ साधनमुपदिश्यते। मार्गविज्ञानोपदेशवदिति चेत्तदात्मत्वे विद्यामात्रसाधनोपदेशोऽ-

हेतुः । कस्मात् । देशान्तरप्राप्तौ मार्गविज्ञानोपदेशदर्शनात् । न हि ग्राम एव गंतेति चेत् । न, वैधर्म्यात् । तत्र हि ग्रामविषयं विज्ञानं नोपदिश्यते, तत्प्राप्तिमार्गविषयमेवोपदिश्यते विज्ञानं, न तथेह ब्रह्मविज्ञानव्यतिरेकेण साधनान्तरविषयं विज्ञानमुपदिश्यते । उक्तकर्मादिसाधनापेक्षं ब्रह्मविज्ञानं परप्राप्तौ साधनमुपदिश्यत इति चेत । न । नित्यस्वान्मोक्षस्येत्यादिना प्रत्युक्तत्वात । श्रुतिश्च 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति कार्यस्य तदात्मत्वं दर्शयति । अभयप्रतिष्ठोपपत्तेश्च यदि हि विद्यावान्स्वात्मनोऽन्यन्न पश्यति ततोऽभयं प्रतिष्ठा विदत इति स्याद्भयहेतोः परस्यान्यस्याभावात् । अन्यस्य चाविद्याकृतत्वे विद्यया अवस्तुत्वदर्शनोपपत्ति । तद्धि द्वितीयस्य चंद्रस्यासत्त्वं यदतैमिरिकेण चक्षुष्मता न गृह्यते । नैवं न गृह्यत इति चेन्न । सुप्तसमाहितयोरग्रहणात् । सुषुप्तेऽग्रहणमन्यासक्तवदिति चेत् न । सर्वाग्रहणात् । जाग्रत्स्वप्नयोरन्यस्य ग्रहणात्सत्त्वमेवेति चेत् । न । अविद्याकृतत्वाज्जाग्रत्स्वप्नयो. । यदन्यग्रहणं जाग्रत्स्वप्नयोस्तदविद्याकृतं विद्याभावेऽभावात । सुषुप्तेऽग्रहणमप्यविद्याकृतमिति चेत् । न । स्वाभाविकत्वात् । द्रव्यस्य हि तत्त्वमविक्रिया, परानपेक्षत्वात् । विक्रिया न तत्त्वं, परापेक्षत्वात् । नहि कारकापेक्षं वस्तुनस्तत्त्वं, सतो विशेषः कारकापेक्षो, विशेषश्च विक्रिया । जाग्रत्स्वप्नयोश्च ग्रहणं विशेष । यद्धि यस्य नान्यापेक्षं स्वरूपं, तत्तस्य तत्त्वं, यदन्यापेक्षं न तत्तत्त्वम् । अन्याभावेऽभावात् । तस्मात्स्वाभाविकत्वाज्जाग्रत्स्वप्नवन्न सुषुप्ते विशेष. ॥

येषां पुनरीश्वरोऽन्य आत्मनः कार्यं चान्यत्तेषां भयानिवृत्तिः, भयस्यान्यनिमित्तत्वात् सतश्चान्यस्यात्महानानुपपत्तिः । न चासत आत्मलाभः । सापेक्षस्यान्यस्य भयहेतुत्वमिति चेन्न । तस्यापि तुल्यत्वात् । यद्धर्माद्यनुसहायीभूतं नित्यमनित्यं वा निमित्तमपेक्ष्यान्यद्भयकारणं स्यात्, तस्यापि तथाभूतस्य आत्महानाभावाद्भयानिवृत्तिः आत्महाने वा सदसतोरितरेतरापत्तौ सर्वत्रानाश्वास एव । एकत्वपक्षे पुनः सनिमित्तस्य संसारस्याविद्याकल्पितत्वाददोषः । तैमिरिकदृष्टस्य हि द्वितीयचंद्रस्य नात्मलाभो नाशो वास्ति । विद्याविद्ययोस्तद्धर्मत्वमिति चेन्न । प्रत्यक्षत्वात् । विवेकाविवेकौ रूपादिवत्प्रत्यक्षावुपलभ्येते अंतःकरणस्थौ । नहि रूपस्य प्रत्यक्षस्य सतो द्रष्टृधर्मत्वम । अविद्या च स्वानुभवेन रूप्यते मूढोऽहमविविक्तं मम विज्ञानमिति । तथा विद्याविवेकोऽनुभूयते ।

उपदिशन्ति चान्येभ्य आत्मनो विद्यां बुधाः । तथा चान्येऽवधारयन्ति । तस्मान्नामरूपपक्षस्यैव विद्याविद्ये नामरूपे च, नात्मधर्मौ । "नामरूपयोर्निर्वहिता ते यदंतरा तद्ब्रह्म" इति श्रुत्यंतरात् । ते च पुनर्नामरूपे सवितर्यहोरात्रे इव कल्पिते न परमार्थतो विद्यमाने । अभेदे 'एतमानंदमयमात्मानमुपसंक्रामति' इति कर्मकर्तृत्वानुपपत्तिरिति चेन्न । विज्ञानमात्रत्वात्संक्रमणस्य । न जलूकादिवत्संक्रमणमिहोपदिश्यते, किं तर्हि विज्ञानमात्रं संक्रमणश्रुतेरर्थः । ननु मुख्यमेव संक्रमणं श्रूयते उपसंक्रामति इति चेत । न । अन्नमयेऽदर्शनात् । न ह्यन्नमयमुपसंक्रामतो बाह्यादस्माल्लोकाज्जलूकावत्संक्रमणं दृश्यतेऽन्यथा वा । मनोमयस्य बहिर्निर्गतस्य विज्ञानमयस्य वा पुनः प्रत्यावृत्त्या आत्मसंक्रमणमिति चेत् । न । स्वात्मनि क्रियाविरोधात् । अन्योऽन्नमयमन्यमुपसंक्रामतीति प्रकृत्य मनोमयो विज्ञानमयो वा स्वात्मानमेवोपसंक्रामतीति विरोधः स्यात् । तथा नानंदमयस्यात्मसंक्रमणमुपपद्यते । तस्मान्न प्राप्ति संक्रमणं, नाप्यन्नमयादीनामन्यतमकर्तृकं पारिशेष्यात् अन्नमयादि आनंदमयान्तात्मव्यतिरिक्तकर्तृकं ज्ञानमात्रं च संक्रमणमुपपद्यते । ज्ञानमात्रत्वे चानंदमयान्तःस्थस्यैव सर्वान्तरस्य आकाशाद्यन्नमयान्तं कार्यं सृष्ट्वानुप्रविष्टस्य हृदयगुहाभिसंबंधादन्नमयादिष्वनात्मस्वात्मविभ्रमः संक्रमणेनात्मविवेकविज्ञानोत्पत्त्या विनश्यति । तदेतस्मिन्नविद्याविभ्रमनाशे संक्रमणशब्द उपचर्यते, न ह्यन्यथा सर्वगतस्यात्मनः संक्रमणमुपपद्यते । वस्त्वंतराभावाच्च । न च स्वात्मन एव संक्रमणम् । नहि जलूका आत्मानमेव संक्रामति । तस्मात्सत्यं ज्ञानमनंतं ब्रह्मेति यथोक्तलक्षणात्मप्रतिपत्त्यर्थमेव बहुभवनसर्गप्रवेशरसलाभाभयसंक्रमणादि परिकल्प्यते ब्रह्मणि सर्वव्यवहारविषये, न तु परमार्थतो निर्विकल्पे ब्रह्मणि कश्चिदपि विकल्प उपपद्यते । तमेतं निर्विकल्पमात्मानमेवं क्रमेणोपसंकम्य विदित्वा न बिभेति कुतश्चन अभयं प्रतिष्ठां विंदत इत्येतस्मिन्नर्थेऽप्येष श्लोको भवति । सर्वस्यैवास्य प्रकरणस्यानंदवल्लयर्थस्य संक्षेपतः प्रकाशनायैष मंत्रो भवति ॥ इति अष्टमोऽनुवाकः ॥

यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनंदं ब्रह्मणो विद्वान् । न बिभेति कुतश्चनेति । एतं ह वाव न तपति । किमहं साधु नाकरवम् । किमहं पापमकरवमिति । स य एवं विद्वानेते आत्मानं स्पृणुते । उभे ह्येवैष एते आत्मानं स्पृणुते । य एवं वेद । इत्युपनिषत् । इति नवमोऽनुवाकः

॥९॥ इति ब्रह्मवल्ली ॥

यतो यस्मान्निर्विकल्पात् यथोक्तलक्षणात् अद्वयानंदादात्मनो, वाचोऽभिधानानि द्रव्यादिसविकल्पवस्तुविषयाणि वस्तुसामान्यान्निर्विकल्पेऽद्वयेऽपि ब्रह्मणि प्रयोक्तृभिः प्रकाशनाय प्रयुज्यमानानि, अप्राप्याप्रकाश्यैव निवर्तन्ते स्वसामर्थ्याद्धीयन्ते । मन इति प्रत्ययो विज्ञानम् । तच्च यत्राभिधानं प्रवृत्तमतीद्रियेऽप्यर्थे तदर्थे च प्रवर्तते प्रकाशनाय । यत्र च विज्ञानं तत्र वाचः प्रवृत्तिः । तस्मात्सहैव वाङ्मनसयोरभिधानप्रत्ययोः प्रवृत्तिः सर्वत्र । तस्मात् ब्रह्मप्रकाशनाय सर्वथा प्रयोक्तृभिः प्रयुज्यमाना अपि वाचो यस्मादप्रत्ययविषयात् अनभिधेयादृश्यादिविशेषणात्सहैव मनसा विज्ञानेन सर्वप्रकाशनसमर्थेन निवर्तन्ते, तं ब्रह्मण आनंदं श्रोत्रियस्याव्रजिनस्याकामहतस्य सर्वैषणाविनिर्मुक्तस्यात्मभूतं विषयविषयिसंबंधविनिर्मुक्तं स्वाभाविकं नित्यमविभक्तं परमानंदं ब्रह्मणो विद्वान्यथोक्तेन विधिना न बिभेति कुतश्चन निमित्ताभावात् । नहि तस्माद्विदुषोऽन्यद्वस्त्वंतरमस्ति भिन्नं यतो बिभेति । अविद्यया यदोदरमंतरं कुरुते अथ तस्य भयं भवतीति युक्तम् । विदुषश्चाविद्याकार्यस्य तैमिरिकदृष्टद्वितीयचंद्रवन्नाशाद्भयनिमित्तस्य न बिभेति कुतश्चनेति युज्यते । मनोमये चोदाहृतो मंत्रो मनसो ब्रह्मविज्ञानसाधनत्वात् । तत्र ब्रह्मत्वमध्यारोप्य तत्स्तुत्यर्थ न बिभेति कदाचनेति भयमात्रं प्रतिषिद्धम् । इहाद्वैतविषये न बिभेति कुतश्चनेति भयनिमित्तमेव प्रतिषिध्यते ॥

नन्वस्ति भयनिमित्तं साध्वकरणं पापक्रिया च । नैवम् । कथमित्युच्यते— एतं यथोक्तमेवंविदम् । ह वावेत्यवधारणार्थौ । न तपति नोद्वेजयति न संतापयति । कथं पुनः साध्वकरणं पापक्रिया च न तपतीत्युच्यते । किं कस्मात्साधु शोभनं कर्म नाकरवं न कृतवानस्मीति पश्चात्संतापो भवत्यासन्ने मरणकाले । तथा किं कस्मात्पापं प्रतिषिद्धं कर्माकरवं कृतवानस्मीति च नरकपतनादिदुःखभयात्तापो भवति । ते एते साध्वकरणपापक्रिये एवमेनं न तपतो, यथा अविद्वांसं तपतः । कस्मात्पुनर्विद्वांसं न तपत इत्युच्यते— स य एवंविद्वानेते साध्वसाधुनी तापहेतू इत्यात्मानं स्पृणुते प्रीणयति बलयति वा, परमात्मभावेनोभे पश्यतीत्यर्थः । उभे पुण्यपापे हि यस्मादेवमेष विद्वानेते आत्मानमात्मरूपेणैव पुण्यपापे स्वेन विशेषरूपेण शून्ये कृत्वा आत्मानं स्पृणुत एव । कः ? य एवं वेद यथो-

क्तमद्वैतमानंदं ब्रह्म वेद, तस्यात्मभावेन दृष्टे पुण्यपापे निर्वार्ये अतापके जन्मांतरारंभके न भवत । इतीयमेवं यथोक्ता अस्यां वल्ल्यां ब्रह्मविद्योपनिषत्सर्वाभ्यो विद्याभ्य परमरहस्यं दर्शितमित्यर्थ. । परं श्रेयोऽस्यां निषण्णमिति ॥ इति ब्रह्मवल्ल्यध्याय ॥

ॐ । सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥ ॐ शान्ति· शान्तिः शान्तिः ॥

॥ भृगुवल्ली ॥३॥

ॐ । सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥ ॐ शान्ति· शान्ति· शान्ति· ॥

'सत्यं ज्ञानमनंतं ब्रह्म' आकाशादिकार्यमन्नमयान्तं सृष्ट्वा तदेवानुप्रविष्टं विशेषवादिवोपलभ्यमानं यस्मात्तस्मात्सर्वकार्यविलक्षणं अदृश्यादिधर्मकमेवानंदं तदेवाहमिति विजानीयादनुप्रवेशस्य तदर्थत्वात् । तस्यैवं विजानत शुभाशुभे कर्मणी जन्मांतरारंभके न भवत· इत्येवमानंदवल्ल्यां विवक्षितोऽर्थ· । परिसमाप्ता च ब्रह्मविद्या । अत परं ब्रह्मविद्यासाधनं तपो वक्तव्यं, अन्नादिविषयाणि चोपासनान्यनुक्तानीत्यत इदमारभ्यते—

भृगुर्वै वारुणि· । वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तस्मा एतत्प्रोवाच । अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति । तं होवाच । यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ इति प्रथमोऽनुवाकः ॥

आख्यायिका विद्यास्तुतये, प्रियाय पुत्राय पित्रोक्तेति भृगुर्वै वारुणिः । वैशब्दः प्रसिद्धानुस्मारको, भृगुरित्येवंनामा प्रसिद्धोऽनुस्मार्यते । वारुणिर्वरुणस्यापत्यं वारुणिर्वरुणं पितरं ब्रह्म विजिज्ञासुरुपससारोपगतवान । अधीहि भगवो ब्रह्मेत्यनेन मंत्रेण । अधीहि अध्यापय कथय । स च पिता विधिवदुपसन्नाय तस्मै पुत्रायैतद्वचनं प्रोवाच । अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति । अन्नं शरीरं तदभ्यंतरं च प्राणमत्तारं उपलब्धिसाधनानि चक्षु· श्रोत्रं मनो वाचमि-

त्येतानि ब्रह्मोपलब्धौ द्वाराण्युक्तवान् । उक्त्वा च द्वारभूतान्येतान्यन्नादीनि तं भृगुं होवाच ब्रह्मणो लक्षणम् । किं तत् । यतो यस्माद्वा इमानि ब्रह्मादीनि स्तंबपर्यंतानि भूतानि जायन्ते । येन जातानि जीवन्ति प्राणान्धारयन्ति वर्धन्ते । विनाशकाले च यत्प्रयन्ति यद्ब्रह्म प्रतिगच्छन्ति, अभिसंविशन्ति तादात्म्यमेव प्रतिपद्यन्ते । उत्पत्तिस्थितिलयकालेषु यदात्मता न जहति भूतानि तदेतद्ब्रह्मणो लक्षणम् । तद्ब्रह्म विजिज्ञासस्व विशेषेण ज्ञातुमिच्छस्व । यदेवंलक्षणं ब्रह्म तदन्नादिद्वारेण प्रतिपद्यस्वेत्यर्थः । श्रुत्यंतरं च— 'प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुस्ते निचिक्युर्ब्रह्म पुराणमग्र्यम्' इति ब्रह्मोपलब्धौ द्वाराण्येतानीति दर्शयति । स भृगुर्ब्रह्मोपलब्धिद्वाराणि ब्रह्मलक्षणं च श्रुत्वा पितुः तपो ब्रह्मोपलब्धिसाधनत्वेनातप्यत तप्तवान् । कुतः पुनरनुपदिष्टस्यैव तपस. साधनत्वप्रतिपत्तिर्भृगो ? सावशेषोक्तेः । अन्नादिब्रह्मणः प्रतिपत्तौ द्वारं लक्षणं च यतो वा इमानीत्याद्युक्तवान् । सावशेषं हि तत्साक्षाद्ब्रह्मणोऽनिर्देशात् । अन्यथा हि स्वरूपेणैव ब्रह्म निर्देष्टव्यं जिज्ञासवे पुत्रायेदमित्थंरूपं ब्रह्मेति । न चैवं निरदिशत्किं तर्हि सावशेषमेवोक्तवान् । अतोऽवगम्यते नूनं साधनांतरमप्यपेक्षते पिता ब्रह्मविज्ञानं प्रतीति । तपोविशेषप्रतिपत्तिस्तु सर्वसाधकतमत्वात् । सर्वेषां हि नियतसाध्यविषयाणां साधनाना तप एव साधकतमं साधनमिति हि प्रसिद्धं लोके । तस्मात्पित्रा अनुपदिष्टमपि ब्रह्मविज्ञानसाधनत्वेन तप. प्रतिपेदे भृगुः । तच्च तपो बाह्यान्तःकरणसमाधानं, तद्द्वारकत्वाद्ब्रह्मप्रतिपत्तेः । "मनसश्चेंद्रियाणां च ह्यैकाग्र्यं परमं तपः । तज्ज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यते" इति स्मृतेः । स च तपस्तप्त्वा ॥

अन्नं ब्रह्मेति व्यजानात् । अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते । अन्नेन जातानि जीवन्ति । अन्नं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तं होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ इति द्वितीयोऽनुवाकः ॥२॥

अन्नं ब्रह्मेति व्यजानाद्विज्ञातवान् । तद्धि यथोक्तलक्षणोपेतम् । कथम् । अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते । अन्नेन जातानि जीवन्ति । अन्नं प्रयन्त्यभिसंविशन्तीति । तस्माद्युक्तमन्नस्य ब्रह्मत्वमित्यभिप्रायः । स एवं तपस्तप्त्वा

अन्नं ब्रह्मेति विज्ञाय लक्षणेनोपपत्त्या च पुनरेव संशयमापन्नो वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । क॰ पुनः संशयहेतुरस्येत्युच्यते— अन्नस्योत्पत्तिदर्शनात् । तपस॰ पुनः पुनरुपदेशः साधनातिशयत्वावधारणार्थः । यावद्ब्रह्मणो लक्षणं निरतिशयं न भवति यावच्च जिज्ञासा न निवर्तते तावत्तप एव ते साधनम् । तपसैव ब्रह्म विजिज्ञासस्वेत्यर्थः । ऋज्वन्यत् ॥

प्राणो ब्रह्मेति व्यजानात् । प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते । प्राणेन जातानि जीवन्ति । प्राणं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तं होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ इति तृतीयोऽनुवाकः ॥३॥

मनो ब्रह्मेति व्यजानात् । मनसो ह्येव खल्विमानि भूतानि जायन्ते । मनसा जातानि जीवन्ति । मनः प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तं होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ इति चतुर्थोऽनुवाकः ॥४॥

विज्ञानं ब्रह्मेति व्यजानात् । विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते । विज्ञानेन जातानि जीवन्ति । विज्ञानं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तं होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ इति पंचमोऽनुवाकः ॥५॥

आनंदो ब्रह्मेति व्यजानात् । आनंदाद्ध्येव खल्विमानि भूतानि जायन्ते । आनंदेन जातानि जीवन्ति । आनंदं प्रयन्त्यभिसंविशन्तीति । सैषा भार्गवी वारुणी विद्या । परमे व्योमन्प्रतिष्ठिता । स य एवं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान्भवति । प्रजया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या ॥ इति षष्ठोऽनुवाकः ॥६॥

एवं तपसा विशुद्धात्मा प्राणादिषु साकल्येन ब्रह्मलक्षणमपश्यन् शनैः शनैरंतरनुप्रविश्य अंतरतममानंदं ब्रह्म विज्ञातवांस्तपसैव साधनेन भृगुः । तस्माद्ब्रह्म विजिज्ञासुना बाह्यान्तःकरणसमाधानलक्षणं परमं तपः साधनमनुष्ठेयमिति

प्रकरणार्थः । अधुनाख्यायिकां चोपसंहृत्य श्रुतिः स्वेन वचनेनाख्यायिकानिर्वृत्तमर्थमाचष्टे— सैषा भार्गवी भृगुणा विदिता वरुणेन प्रोक्ता वारुणी विद्या परमे व्योमन्हृदयाकाशगुहायां परम आनंदेऽर्पिते प्रतिष्ठिता परिसमाप्ता अन्नमयादात्मनोऽभिप्रवृत्ता । य एवमन्योऽपि तपसैव साधनेनानेनैव क्रमेणानुप्रविश्यानंदं ब्रह्म वेद स एवं विद्याप्रतिष्ठानात्प्रतितिष्ठत्यानंदे परमे ब्रह्मणि, ब्रह्मैव भवतीत्यर्थः । दृष्टं च फलं तस्योच्यते—अन्नवान्प्रभूतमन्नमस्य विद्यत इत्यन्नवान् । सत्तामात्रेण तु सर्वो ह्यन्नवानिति विद्याया विशेषो न स्यात् । एवमन्नमत्तीत्यन्नादो दीप्ताग्निर्भवतीत्यर्थः । महान्भवति । केन महत्त्वमित्यत आह— प्रजया पुत्रादिना पशुभिर्गवाश्वादिभिर्ब्रह्मवर्चसेन शमदमज्ञानादिनिमित्तेन तेजसा । महान्भवति कीर्त्या ख्याल्या शुभाचारनिमित्तया ॥

अन्नं न निंद्यात् । तद्व्रतम् । प्राणो वा अन्नम् । शरीरमन्नादम् । प्राणे शरीरं प्रतिष्ठितम् । शरीरे प्राणः प्रतिष्ठितः । तदेतदन्नमन्ने प्रतिष्ठितम् । स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान्भवति । प्रजया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या ॥ इति सप्तमोऽनुवाकः ॥७॥

किंचान्नेन द्वारभूतेन ब्रह्म विज्ञातं यस्मात्तस्मात् गुर्वभवान्नं न निंद्यात् । तदस्यैवं ब्रह्मविदो व्रतमुपदिश्यते । व्रतोपदेशोऽन्नस्तुतये, स्तुतिभाक्त्वं चान्नस्य ब्रह्मोपलब्ध्युपायत्वात् । प्राणो वा अन्नम् । शरीरान्तर्भावात्प्राणस्य । यद्यस्यान्तः प्रतिष्ठितं भवति तत्तस्यान्नं भवतीति । शरीरे च प्राणः प्रतिष्ठितस्तस्मात्प्राणोऽन्नं शरीरमन्नादम् । तथा शरीरमप्यन्नं प्राणोऽन्नादः । कस्मात्प्राणे शरीरं प्रतिष्ठितम् ? तन्निमित्तत्वाच्छरीरस्थितेः । तस्मात्तदेतदुभयं शरीरं प्राणश्चान्नमन्नादश्च । येनान्योन्यस्मिन्प्रतिष्ठितं तेनान्नम् । येनान्योन्यस्य प्रतिष्ठा तेनान्नादः । तस्मात्प्राणः शरीरं चोभयमन्नमन्नादं च । स य एवमेतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठत्यन्नान्नादात्मनैव । किंचान्नवानन्नादो भवतीत्यादि पूर्ववत् ॥

अन्नं न परिचक्षीत । तद्व्रतम् । आपो वा अन्नम् । ज्योतिरन्नादम् । अप्सु ज्योतिः प्रतिष्ठितम् । ज्योतिष्यापः प्रतिष्ठिताः । तदेतदन्नमन्ने प्रतिष्ठितम् । स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या ॥ इति अष्टमोऽनुवाकः ॥८॥

अन्नं न परिचक्षीत न परिहरेत्। तद्व्रतं पूर्ववत्स्तुत्यर्थम्। तदेवं शुभाशुभकल्पनया अपरिहीयमाणं स्तुतं महीकृतमन्नं स्यात्। एवं यथोक्तमुत्तरेष्वप्यापो वा अन्नमित्यादिषु योजयेत्॥

अन्नं बहु कुर्वीत। तद्व्रतम्। पृथिवी वा अन्नम्। आकाशोऽन्नादः। पृथिव्यामाकाशः प्रतिष्ठितः। आकाशे पृथिवी प्रतिष्ठिता। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान्कीर्त्या॥ इति नवमोऽनुवाकः॥

अप्सु ज्योतिरित्यब्ज्योतिषोरन्नान्नादगुणत्वेनोपासकस्यान्नस्य बहुकरणं व्रतम्॥

न कंचन वसतौ प्रत्याचक्षीत। तद्व्रतम्। तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात्। अराध्यस्मा अन्नमित्याचक्षते। एतद्वै मुखतोऽन्नं राद्धम्। मुखतोऽस्मा अन्नं राध्यते। एतद्वै मध्यतोऽन्नं राद्धम्। मध्यतोऽस्मा अन्नं राध्यते। एतद्वा अंततोऽन्नं राद्धम्। अंततोऽस्मा अन्नं राध्यते॥१॥

तथा पृथिव्याकाशोपासकस्य वसतौ वसतिनिमित्तं कंचन कंचिदपि न प्रत्याचक्षीत वसत्यर्थमागतं न निवारयेदित्यर्थः। वासे च दत्तेऽवश्यं ह्यशनं दातव्यम्। तस्माद्यया कया च विधया येन केन च प्रकारेण बह्वन्नं प्राप्नुयाद्बह्वन्नसंग्रहं कुर्यादित्यर्थः। यस्मादन्नवन्तो विद्वांसोऽभ्यागतायान्नार्थिनेऽराधि संसिद्धमस्मा अन्नमित्याचक्षते, न नास्तीति प्रत्याख्यानं कुर्वन्ति, तस्माच्च हेतोर्बह्वन्नं प्राप्नुयादिति पूर्वेण संबंधः। अपि चान्नदानस्य माहात्म्यमुच्यते। यथा यत्कालं प्रयच्छत्यन्नं तथा तत्कालमेव प्रत्युपनमते। कथमिति तदेतदाह एतद्वै अन्नं मुखतो मुख्ये प्रथमे वयसि मुख्यया वा वृत्त्या पूजापुरःसरमभ्यागतायान्नार्थिने राद्धं संसिद्धं प्रयच्छतीति वाक्यशेषः। तस्य किं फलं स्यादित्युच्यते— मुखतः पूर्वे वयसि मुख्यया वा वृत्त्यास्मै अन्नदायान्नं राध्यते, यथादत्तमुपतिष्ठत इत्यर्थः। एवं मध्यतो मध्यमे वयसि मध्यमेन चोपचारेण। तथा अंततोऽन्ते वयसि जघन्येन चोपचारेण परिभवेन तथैवास्मै राध्यते संसिध्यत्यन्नम्॥

क्षेम इति वाचि। योगक्षेम इति प्राणापानयोः। कर्मेति हस्तयोः। गतिरिति पादयोः। विमुक्तिरिति पायौ। इति मानुषीः समाज्ञाः। अथ

दैवीः । तृप्तिरिति वृष्टौ । बलमिति विद्युति ॥२॥

य एवं वेद य एवमन्नस्य यथोक्तं माहात्म्यं वेद तदन्नस्य च फलं तस्य यथोक्तं फलमुपनमते । इदानीं ब्रह्मण उपासनप्रकार उच्यते— क्षेम इति वाचि । क्षेमो नामोपात्तपरिरक्षणम् । ब्रह्म वाचि क्षेमरूपेण प्रतिष्ठितमित्युपास्यम् । योगक्षेम इति, योगोऽनुपात्तस्योपादानम् । तौ हि योगक्षेमौ प्राणापानयोः सतोः भवतो यद्यपि, तथापि न प्राणापाननिमित्तावेव, किं तर्हि ब्रह्मनिमित्तौ । तस्माद्ब्रह्म योगक्षेमात्मना प्राणापानयोः प्रतिष्ठितमित्युपास्यम् । एवमुत्तरेष्वन्येषु तेन तेनात्मना ब्रह्मैवोपास्यम् । कर्मणो ब्रह्मनिर्वर्त्यत्वाद्धस्तयोः कर्मात्मना ब्रह्म प्रतिष्ठितमित्युपास्यम् । गतिरिति पादयोः । विमुक्तिरिति पायौ । इत्येता मानुषीर्मनुष्येषु भवा मानुष्यः समाज्ञा आध्यात्मिक्यः समाज्ञा ज्ञानानि विज्ञानान्युपासनानीत्यर्थः । अथानंतरं दैवीर्दैव्यो देवेषु भवाः समाज्ञा उच्यन्ते । तृप्तिरिति वृष्टौ । वृष्टेरन्नादिद्वारेण तृप्तिहेतुत्वाद्ब्रह्मैव तृप्त्यात्मना वृष्टौ व्यवस्थितमित्युपास्यम् । तथान्येषु तेन तेनात्मना ब्रह्मैवोपास्यम् । तथा बलरूपेण विद्युति ॥

यश इति पशुषु । ज्योतिरिति नक्षत्रेषु । प्रजातिरमृतमानंद इत्युपस्थे । सर्वमित्याकाशे । तत्प्रतिष्ठेत्युपासीत । प्रतिष्ठावान्भवति । तन्मह इत्युपासीत । महान्भवति । तन्मन इत्युपासीत । मानवान् भवति ॥३॥

यशोरूपेण पशुषु । ज्योतीरूपेण नक्षत्रेषु । प्रजातिरमृतममृतत्वप्राप्तिः पुत्रेण ऋणविमोक्षद्वारेणानंदः सुखमित्येतत्सर्वमुपस्थनिमित्तं ब्रह्मैवानेनात्मनोपस्थे प्रतिष्ठितमित्युपास्यम् । सर्वं ह्याकाशे प्रतिष्ठितमतो यत्सर्वमाकाशे तद्ब्रह्मेत्युपास्यम् । तच्चाकाशं ब्रह्मैव । तस्मात्तत्सर्वस्य प्रतिष्ठेत्युपासीत । प्रतिष्ठागुणोपासनात्प्रतिष्ठावान्भवति । एवं पूर्वेष्वपि यद्यत्राधिगतं फलं तद्ब्रह्मैव तदुपासनात्तद्वान्भवतीति द्रष्टव्यम् । श्रुत्यंतराच्च— 'तं यथा यथोपासते तदेव भवति' इति । तन्मह इत्युपासीत । महो महत्त्वगुणवत्तदुपासीत । महान्भवति । तन्मन इत्युपासीत । मननं मनः । मानवान्भवति मननसमर्थो भवति ॥

तन्नम इत्युपासीत । नम्यन्तेऽस्मै कामाः । तद्ब्रह्मेत्युपासीत । ब्रह्मवान्भवति । तद्ब्रह्मणः परिमर इत्युपासीत । पर्येणं म्रियन्ते द्विषन्तः सपत्नाः । परि येऽप्रिया भ्रातृव्याः । स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः ॥४॥

तन्नम इत्युपासीत । नमनं नमो नमनगुणवत्तदुपासीत । नम्यन्ते प्रह्वी-

भवन्त्यस्मा उपासित्रे कामा. काम्यन्त इति भोग्या विषया इत्यर्थ· । तद्ब्रह्मेत्युपासीत । ब्रह्म परिवृढतममित्युपासीत । ब्रह्मवांस्तद्भुणो भवति । तद्ब्रह्मणः परिमर इत्युपासीत । ब्रह्मणः परिमर. परिम्रियन्तेऽस्मिन्पंच देवता विद्युद्दृष्टिश्चंद्रमा आदित्योऽग्निरित्येता· । अतो वायु परिमर , श्रुत्यंतरप्रसिद्धे· । स एष एवायं वायुराकाशेनानन्य इत्याकाशो ब्रह्मण परिमर , तस्मादाकाशं वाय्वात्मानं ब्रह्मणः परिमर इत्युपासीत । पर्येनमेवंविदं प्रतिस्पर्धिनो द्विषन्तोऽद्विषन्तोऽपि सपत्ना यतो भवन्त्यतो विशेष्यन्ते द्विषन्त· सपत्ना इति । य एनं द्विषन्त सपत्ना. ते परिम्रियन्ते प्राणान जहति । किंच ये चाप्रिया अस्य भ्रातृव्या अद्विषन्तोऽपि ते च परिम्रियन्ते ॥

प्राणो वा अन्नं शरीरमन्नादमित्यारभ्याकाशान्तस्य कार्यस्यैवान्नान्नादत्वं उक्तम् । उक्तं नाम किं तेन, तेनैतत्सिद्धं भवति, कार्यविषय एव भोज्यभोक्तृत्वकृतः संसारो न त्वात्मनीति । आत्मनि तु भ्रान्त्यैवोपचर्यते । ननु आत्मापि परमात्मन· कार्यं ततो युक्तस्तस्य संसार इति । न । असंसारिण एव प्रवेशश्रुतेः । 'तत्सृष्ट्वा तदेवानुप्राविशत्' इत्याकाशादिकारणस्य ह्यसंसारिण एव परमात्मनः कार्येष्वनुप्रवेश. श्रूयते । तस्मात्कार्यानुप्रविष्टो जीव आत्मा पर एवासंसारी । सृष्ट्वानुप्राविशदिति समानकर्तृत्वोपपत्तेश्च । सर्गप्रवेशाक्रययोरेककर्तृत्वं तत. क्त्वाप्रत्ययो युक्तः । प्रविष्टस्य तु भावान्तरापत्तिरिति चेत् । न । प्रवेशस्यान्यार्थत्वेन प्रत्याख्यातत्वात् । अनेन जीवेनेति विशेषश्रुतेर्धर्मान्तरेणानुप्रवेश इति चेत् । न । तत्त्वमसीति पुनस्तद्भावोक्ते· । भावान्तरापन्नस्यैव तदपोहार्था संपदिति चेत् । न । तत्सत्यं स आत्मा तत्त्वमसीति सामानाधिकरण्यात । दृष्टं जीवस्य संसारित्वमिति चेत् । न । उपलब्धुरनुपलभ्यत्वात । संसारधर्मविशिष्ट आत्मोपलभ्यत इति चेत् । न । अधर्माणां धर्मिणोऽव्यतिरेकात्कर्मत्वानुपपत्ते. । उष्णप्रकाशयोर्दाह्यप्रकाश्यत्वानुपपत्तिवत् त्रासादिदर्शनात् दुःखित्वाद्यनुर्मायत इति चेत् । न । त्रासादेर्दुःखस्य चोपलभ्यमानत्वात्रोपलब्धृधर्मत्वम् । कापिलकाणादादितर्कशास्त्रविरोध इति चेत् । न । तेषा मूलाभावे वेदविरोधे च भ्रान्तत्वोपपत्तेः । श्रुत्युपपत्तिभ्यां च सिद्धमात्मनोऽसंसारित्वं, एकत्वाच्च । कथमेकत्वमित्युच्यते— स यश्चायं पुरुषे यश्चासावादित्ये स एकः इत्येवमादि पूर्ववत् सर्वम् ॥

स य एवंवित् । अस्माल्लोकात्प्रेत्य । एतमन्नमयमात्मानमुपसंक्रम्य ।

एतं प्राणमयमात्मानमुपसंक्रम्य । एतं मनोमयमात्मानमुपसंक्रम्य । एतं विज्ञानमयमात्मानमुपसंक्रम्य । एतमानंदमयमात्मानमुपसंक्रम्य । इमाँल्लोकान्कामान्नी कामरूप्यनुसंचरन् । एतत्साम गायन्नास्ते हा३वु हा३वु हा३वु ॥५॥

अन्नमयादिक्रमेण आनंदमयमात्मानमुपसंक्रम्यैतत्साम गायन्नास्ते । सत्यं ज्ञानमित्यस्या ऋचोऽर्थो व्याख्यातो विस्तरेण तद्विवरणभूतया आनंदवल्लया । 'सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता' इति तस्य फलवचनस्यार्थविस्तारो नोक्तः । के ते, किंविषया वा सर्वे कामाः, कथं वा ब्रह्मणा सह समश्नुते, इत्येतद्वक्तव्यमितीदमिदानीमारभ्यते । तत्र पितापुत्राख्यायिकाया पूर्वविद्याशेषभूतायां तपो ब्रह्मविद्यासाधनमुक्तम् । प्राणादेराकाशान्तस्य च कार्यस्यान्नान्नादत्वेन विनियोगश्चोक्तः । ब्रह्मविषयोपासनानि च । ये च सर्वे कामा प्रतिनियतानेकसाधनसाध्य आकाशादिकार्यभेदविषया एते दर्शिता । एकत्वे पुनः कामकामित्वानुपपत्तिः । भेदजातस्य सर्वस्यात्मभूतत्वात् । तत्र कथं युगपद्ब्रह्मस्वरूपेण सर्वान्कामानेवंवित्समश्नुत इत्युच्यते– सर्वात्मत्वोपपत्तेः । कथं सर्वात्मत्वोपपत्तिरित्याह— पुरुषादित्यस्यात्मैकत्वविज्ञानेनापोह्योत्कर्षापकर्षावन्नमयादीनात्मनो ऽविद्याकल्पितान्क्रमेण संक्रम्य आनंदमयान्तान्सत्यं ज्ञानमनंतं ब्रह्मादृश्यादिधर्मकं स्वाभाविकमानंदमजममृतमभयमद्वैतं फलभूतमापन्न इमाँल्लोकान्भूरादीननुसंचरन्निति व्यवहितेन संबंधः । कथमनुसंचरन् । कामान्नी कामतोऽन्नमस्येति कामान्नी । तथा कामतो रूपाण्यस्येति कामरूपी । अनुसंचरन्सर्वात्मनेमाँल्लोकानात्मत्वेनानुभवन् । किम्, एतत्साम गायन्नास्ते । समत्वात् ब्रह्मैव साम सर्वानन्यरूपं गायन शब्दयन्नात्मैकत्वं प्रख्यापयँल्लोकानुग्रहार्थं तद्विज्ञानफलं चातीव कृतार्थत्वं गायन्नास्ते निष्ठति । कथम् । हाऽवु हाऽवु हाऽवु । अहो इत्येतस्मिन्नर्थेऽत्यंतविस्मयख्यापनार्थम् ॥

अहमन्नमहमन्नमहमन्नम् । अहमन्नादोऽहमन्नादोऽहमन्नादः । अहं श्लोककृदहं श्लोककृदहं श्लोककृत् । अहमस्मि प्रथमजा ऋतास्य । पूर्वं देवेभ्यो अमृतस्य नाभायि । यो मा ददाति स इदेव माऽवाः । अहमन्नमन्नमदंतमाऽद्मि । अहं विश्वं भुवनमभ्यभवाम् । सुवर्न ज्योती. । य एवं वेदा इत्युपनिषत् ॥६॥ इति दशमोऽनुवाकः ॥ इति भृगुवल्ली ॥ इति तैत्तिरीयोपनिषत् ॥

कः पुनरसौ विस्मय इत्युच्यते— अद्वैत आत्मा निरंजनोऽपि सन्नहमेवान्नमन्नादश्च । किंचाहमेव श्लोककृत् । श्लोको नामान्नान्नादयोः संघातस्तस्य

कर्ता चेतनावान् । अन्नस्यैव वा परार्थस्यान्नादार्थस्य सतोऽनेकात्मकस्य पारार्थ्येन हेतुना संघातकृत् । त्रिरुक्तिर्विस्मयत्वख्यापनार्था । अहमस्मि भवामि । प्रथमजा· प्रथमजः प्रथमोत्पन्न· । ऋतस्य सत्यस्य मूर्तामूर्तस्यास्य जगतो देवेभ्यश्च पूर्वममृतस्य नाभिः अमृतत्वस्य नाभिर्मध्यं मत्संस्थममृतत्वं प्राणिनामित्यर्थ· । यः कश्चिन्मा मामन्नमन्नार्थिभ्यो ददाति प्रयच्छत्यन्नात्मना ब्रवीति स इदित्थमेवमविनष्टं यथाभूतं मामावा अवतीत्यर्थ· । य· पुनरन्यो मामदत्त्वा अर्थिभ्यः काले प्राप्तेऽन्नमत्ति तमन्नमदन्तं भक्षयन्तं पुरुषमहमन्नमेव संप्रत्यद्मि भक्षयामि । अत्राह—एवं तर्हि बिभेमि सर्वात्मत्वप्राप्तेर्मोक्षात् । अस्तु संसार एव यतो मुक्तोऽप्यहमन्नभूत अय· स्यामन्नस्य । एवं मा भैषीः संव्यवहारविषयत्वात्सर्वकामाशनस्य । अतीत्यायं संव्यवहारविषयं अन्नान्नादादिलक्षणमविद्याकृतं विद्यया ब्रह्मत्वमापन्नो विद्वांस्तस्य नैव द्वितीयं वस्त्वंतरमस्ति यतो बिभेत्यतो न भेतव्यं मोक्षात् । एवं तर्हि किमिदमाह अहमन्नमहमन्नाद इति, उच्यते । योऽयं अन्नान्नादादिलक्षण संव्यवहार. कार्यभूतः स संव्यवहारमात्रमेव, न परमार्थवस्तु । स एवंभूतोऽपि ब्रह्मनिमित्तो ब्रह्मव्यतिरेकेणासन्निति कृत्वा ब्रह्मविद्याकार्यस्य ब्रह्मभावस्य स्तुत्यर्थमुच्यते, अहमन्नमहमन्नमहमन्नं अहमन्नादोऽहमन्नादोऽहमन्नाद इत्यादि । अतो भयादिदोषगंधोऽपि अविद्यानिमित्तोऽविद्योच्छेदाद्ब्रह्मभूतस्य नास्तीति । अहं विश्वं समस्तं भुवनं भूतं· संभजनीयं ब्रह्मादिभिर्भवन्तीति वास्मिन्भूतानीति भुवनं अभ्यभवामभिभवामि परेणेश्वरेण स्वरूपेण । सुवर्न ज्योती. सुवरादित्यो, नकार उपमार्थे । आदित्य इव सकृद्विभातमस्मदीयं ज्योतीर्ज्योति. प्रकाश इत्यर्थ । इति वल्लीद्वयविहितोपनिषत्परमात्मज्ञानं, तामेतां यथोक्तामुपनिषदं शान्तो दान्त उपरतस्तितिक्षु. समाहितो भूत्वा भृगुवत्तपो महदास्थाय य एवं वेद तस्येदं फलं यथोक्तमोक्ष इति ॥

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ॐ शान्ति· शान्तिः शान्तिः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीशंकरभगवत· कृतौ तैत्तिरीयोपनिषद्भाष्यं समाप्तम् ॥

॥ ॐ ॥

श्रीमच्छंकराचार्यविरचितभाष्ययुता

प्रश्नोपनिषत् ।



ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरंगैस्तुष्टुवांसस्तनूभि. । व्यशेम देवहितं यदायुः ॥ ॐ शान्ति· शान्तिः शान्तिः ॥

॥ प्रथमः प्रश्नः ॥

मंत्रोक्तस्याथस्य विस्तरानुवादीदं ब्राह्मणमारभ्यते । ऋषिप्रश्नप्रतिवचनाख्यायिका तु विद्यास्तुतये । एवं संवत्सरब्रह्मचर्यसंवासादितपोयुक्तैर्ग्राह्या, पिप्पलादादिवत्सर्वज्ञकल्पैराचार्यै· वक्तव्या च न येन केनचित् इति विद्यां स्तौति । ब्रह्मचर्यादिसाधनसूचनाच्च तत्कर्तव्यता स्यात् ॥

ॐ । सुकेशा च भारद्वाजः शैब्यश्च सत्यकाम. सौर्यायणी च गार्ग्यः कौसल्यश्चाश्वलायनो भार्गवो वैदर्भिः कबंधी कात्यायनस्ते हैते ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणा एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः ॥१॥

सुकेशा च नामतः, भरद्वाजस्यापत्यं भारद्वाज· । शैब्यश्च शिबेरपत्यं शैब्यः, सत्यकामो नामत· । सौर्यायणी सूर्यस्यापत्यं सौर्यस्तस्यापत्यं सौर्यायणिः छान्दसः सौर्यायणी इति, गार्ग्यो गर्गगोत्रोत्पन्नः । कौसल्यश्च नामतोऽश्वलस्यापत्यमाश्वलायनः । भार्गवो भृगोर्गोत्रापत्यं भार्गवः वैदर्भिर्विदर्भेषु भवः । कबंधी नामतः, कत्यस्यापत्यं कात्यायन·, विद्यमान· प्रपितामहो यस्य स·, युवप्रत्ययः । ते हैते ब्रह्मपरा अपरं ब्रह्म परत्वेन गताः, तदनुष्ठाननिष्ठाश्च ब्रह्मनिष्ठाः, परं ब्रह्म अन्वेषमाणाः, किं तत् यन्नित्यं विज्ञेयमिति तत्प्राप्त्यर्थं यथाकामं यतिष्याम इत्येवं तदन्वेषणं कुर्वन्तः, तदधिगमायैष ह वै तत्सर्वं वक्ष्यतीत्याचार्यमुपजग्मुः । कथं । ते ह समित्पाणयः समिद्भारगृहीतहस्ता· सन्तो भगवन्तं पूजावन्तं पिप्पलादमाचार्यमुपसन्ना उपजग्मु· ॥

तान्ह स ऋषिरुवाच भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ यथाकामं प्रश्नान्पृच्छत यदि विज्ञास्यामः सर्वं ह वो वक्ष्याम इति ॥२॥

तानेवमुपगतान्ह स किल ऋषिरुवाच भूयः पुनरेव— यद्यपि यूयं पूर्वं तपस्विन एव तथापीह तपसेंद्रियसंयमेन विशेषतो ब्रह्मचर्येण श्रद्धया चास्तिक्यबुद्ध्या आदरवन्तः संवत्सरं कालं संवत्स्यथ सम्यग्गुरुशुश्रूषापराः सन्तो वत्स्यथ । ततो यथाकामं यो यस्य कामस्तमनतिक्रम्य यद्विषये यस्य जिज्ञासा तद्विषयान्प्रश्नान्पृच्छत । यदि तद्युष्मत्पृष्टं विज्ञास्याम । अनुद्धतत्वप्रदर्शनार्थो यदिशब्दो नाज्ञानसंशयार्थः प्रश्ननिर्णयादवसीयते । सर्वं ह वो व पृष्टं वक्ष्याम इति ॥

अथ कबंधी कात्यायन उपेत्य पप्रच्छ । भगवन्कुतो ह वा इमाः प्रजाः प्रजायन्त इति ॥३॥

अथ संवत्सरादूर्ध्वं कबंधी कात्यायन उपेत्योपगम्य पप्रच्छ पृष्टवान् । हे भगवन्कुतः कस्माद्ध वा इमा ब्राह्मणाद्याः प्रजाः प्रजायन्त उत्पद्यन्ते इति । अपरविद्याकर्मणोः समुच्चितयोर्यत्कार्यं या गतिस्तद्वक्तव्यमिति तदर्थोऽयं प्रश्नः ॥

तस्मै स होवाच प्रजाकामो वै प्रजापतिः स तपोऽतप्यत स तप्स्तप्त्वा स मिथुनमुत्पादयते । रयिं च प्राणं चेत्येतौ मे बहुधा प्रजाः करिष्यत इति ॥४॥

तस्मा एवं पृष्टवते स होवाच तदपाकरणायाह— प्रजाकामः प्रजा आत्मन सिसृक्षुर्वै प्रजापतिः सर्वात्मा सञ्जगत्स्रक्ष्यामीत्येवं विज्ञानवान्यथोक्तकारी तद्भावभावितः कल्पादौ निर्वृत्तो हिरण्यगर्भः, सृज्यमानाना प्रजानां स्थावरजंगमाना पतिः सन् जन्मान्तरभावितं ज्ञानं श्रुतिप्रकाशितार्थविषयं तपोऽन्वालोचयदतप्यत । अथ तु स एवं तपस्तप्त्वा श्रोतं ज्ञानमन्वालोच्य सृष्टिसाधनभूतं मिथुनमुत्पादयते मिथुनं द्वंद्वमुत्पादितवान् । रयिं च सोममन्नं प्राणं चाग्निमत्तारं इत्येतावन्नाग्नीषोमौ अन्नभूतौ मे मम बहुधाऽनेकधा प्रजाः करिष्यत इत्येवं संचित्यांडोत्पत्तिक्रमेण सूर्याचंद्रमसावकल्पयत् ॥

आदित्यो ह वै प्राणो रयिरेव चंद्रमा रयिर्वा एतत्सर्वं यन्मूर्तं चामूर्तं च तस्मान्मूर्तिरेव रयिः ॥५॥

तत्रादित्यो ह वै प्राणोऽत्ताऽग्नि । रयिरेव चंद्रमाः । रयिरेवान्नं सोम एव । तदेतदेकमत्ता अग्निश्चान्नं च प्रजापतिरेकं तु मिथुनम् । गुणप्रधानकृतो भेदः । कथम् । रयिर्वा अन्नमेव एतत्सर्वं, किं तद्यन्मूर्तं च स्थूलं चामूर्तं च सूक्ष्मं च । मूर्तामूर्ते अन्नरूपे अपि रयिरेव । तस्मात्प्रविभक्तादमूर्ताद्यदन्यन्मूर्तरूपं मूर्तिः सैव रयिरमूर्तेनाद्यमानत्वात् ॥

तथाऽमूर्तोऽपि प्राणोऽत्ता सर्वमेव यच्चाद्यम् । कथम्—

अथादित्य उदयन्यत्प्राचीं दिशं प्रविशति तेन प्राच्यान्प्राणान्रश्मिषु संनिधत्ते । यद्दक्षिणां यत्प्रतीचीं यदुदीचीं यदधो यदूर्ध्वं यदंतरा दिशो यत्सर्वं प्रकाशयति तेन सर्वान्प्राणान्रश्मिषु संनिधत्ते ॥६॥

अथादित्य उदयन्नुद्गच्छन्प्राणिना चक्षुर्गोचरमागच्छन्यत्प्राचीं दिशं स्वप्रकाशेन प्रविशति व्याप्नोति, तेन स्वात्मव्याप्त्या सर्वास्तस्थान्प्राणान्प्राच्यानंतर्भूतान्रश्मिषु स्वात्मावभासरूपेषु व्याप्तिमत्सु व्याप्तत्वात्प्राणिनः संनिधत्ते संनिवेशयति आत्मभूतान्करोतीत्यर्थः । तथैव यत्प्रविशति दक्षिणां यत्प्रतीचीं यदुदीचीमधः ऊर्ध्वं यत्प्रविशति यच्चांतरा दिशः कोणदिशोऽवान्तरदिशो यच्चान्यत्सर्वं प्रकाशयति तेन स्वप्रकाशव्याप्त्या सर्वान्सर्वदिक्स्थान्प्राणान्रश्मिषु संनिधत्ते ॥

स एष वैश्वानरो विश्वरूपः प्राणोऽग्निरुदयते । तदेतदृचाभ्युक्तम् ॥७॥

स एषोऽत्ता प्राणो वैश्वानरः सर्वात्मा विश्वरूपो विश्वात्मत्वाच्च प्राणोऽग्निश्च स एवात्तोदयते उद्गच्छति प्रत्यहं सर्वा दिश आत्मसात्कुर्वन् । तदेतदुक्तं वस्तु ऋचा मंत्रेणाप्यभ्युक्तम् ॥

विश्वरूपं हरिणं जातवेदसं परायणं ज्योतिरेकं तपन्तम् ।
सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः ॥८॥

विश्वरूपं सर्वरूपं हरिणं रश्मिवन्तं जातवेदसं जातप्रज्ञानं परायणं सर्वप्राणाश्रयं ज्योतिः सर्वप्राणिनां चक्षुर्भूतं एकमद्वितीयं तपन्तं तापक्रियां कुर्वाणं स्वात्मानं सूर्यं विज्ञातवन्तो ब्रह्मविदः । कोऽसौ यं विज्ञातवन्तः । सहस्ररश्मिरनेकरश्मिः शतधानेकधा प्राणिभेदेन वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः ॥

संवत्सरो वै प्रजापतिस्तस्यायने दक्षिणं चोत्तरं च । तद्ये ह वै तदिष्टापूर्ते कृतमित्युपासते ते चांद्रमसमेव लोकमभिजयन्ते । त एव पुनरावर्तन्ते तस्मादेत ऋषयः प्रजाकामा दक्षिणं प्रतिपद्यन्ते । एष ह वै रयिर्यः पितृयाणः ॥९॥

यश्चासौ चंद्रमा मूर्तिरन्नममूर्तिश्च प्राणोऽत्तादित्यस्तदेकमेतन्मिथुनं सर्वं कथं प्रजाः करिष्यत इति, उच्यते— तदेव काल संवत्सरो वै प्रजापतिस्तन्निर्वर्त्यत्वात्संवत्सरस्य । चंद्रादित्यनिर्वर्त्यतिथ्यहोरात्रसमुदायो हि संवत्सरस्तदन्नत्वाद्रयिप्राणमिथुनात्मक एवेत्युच्यते । तत्कथम् । तस्य संवत्सरस्य प्रजापतेरयने मार्गौ द्वौ दक्षिणं चोत्तरं च । द्वे प्रसिद्धे ह्ययने षण्मासलक्षणे याभ्यां दक्षिणेनोत्तरेण च याति सविता केवलकर्मिणां ज्ञानसंयुक्तकर्मवतां च लोकान्विदधत् । कथं, तत् तत्र च ब्राह्मणादिषु ये ह वै तदुपासत इति । क्रियाविशेषणो द्वितीयस्तच्छब्दः । इष्टं च पूर्तं चेष्टापूर्तं इत्यादि कृतमेवोपासते नाकृतं नित्यं, ते चांद्रमसं चंद्रमसि भवं प्रजापतेर्मिथुनात्मकस्यार्शं रयिमन्नभूतं लोकमभिजयन्ते कृतरूपत्वाच्चाद्रमसस्य । ते तत्रैव च कृतक्षयात्पुनरावर्तन्ते इमं लोकं हीनतरं वा विशन्तीति ह्युक्तम् । यस्मादेवं प्रजापतिमन्नात्मकं फलत्वेनाभिनिर्वर्तयन्ति चंद्रमिष्टापूर्तकर्मणंत ऋषयः स्वर्गद्वारः प्रजाकामा प्रजार्थिनो गृहस्थाः, तस्मात्स्वकृतमेव दक्षिणं दक्षिणायनेपलक्षितं चंद्रं प्रतिपद्यन्ते । एष ह वै रयिरन्नं य पितृयाणः पितृयाणोपलक्षितश्चंद्रः ॥

अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्विष्यादित्यमभिजयन्ते । एतद्वै प्राणानामायतनमेतदमृतमभयमेतत्परायणमेतस्मान्न पुनरावर्तन्त इत्येष निरोधः । तदेष श्लोकः ॥१०॥

अथोत्तरेणायनेन प्रजापतेरंशं प्राणमन्नारमादित्यमभिजयन्ते । केन । तपसेंद्रियजयेन । विशेषतो ब्रह्मचर्येण श्रद्धया विद्यया च प्रजापत्यात्मविषयया आत्मानं प्राणं सूर्यं जगतस्तस्थुषश्चान्विष्याहमस्मीति विदित्वा आदित्यमभिजयन्तेऽभिप्राप्नुवन्ति । एतद्वै आयतनं सर्वप्राणानां सामान्यमायतनमाश्रयः एतदमृतमविनाशि, अभयमत एव भयवर्जितं न चंद्रवत्क्षयवृद्धिभयवत् । एतत्परायणं परा गतिर्विद्यावतां कर्मिणां च ज्ञानवतामेतस्मान्न पुनरावर्तन्ते यथेतरे केवलकर्मिण इति यस्मादेषोऽविदुषा निरोधः । आदित्याद्धि निरुद्धा अविद्वांसः । नैते संवत्सरमादित्यमात्मानं प्राणमभिप्राप्नुवन्ति । स हि संवत्सरः कालात्मा अविदुषां निरोधः । तत्तत्रास्मिन्नर्थ एष श्लोको मंत्रः ॥

पंचपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम् ।
अथेमे अन्य उ परे विचक्षणं सप्तचक्रे षडर आहुरर्पितमिति ॥११॥

पंचपादं पंचर्तव· पादा इवाग्य संवत्सरात्मन आदित्यस्य, तैरसौ पादैरि-वर्तुभिरावर्तते । हेमंतशिशिरावेकीकृत्येयं कल्पना । पितर सर्वस्य जनयितृत्वा-त्पितृत्वं तस्य । तं द्वादशाकृति द्वादश मासा आकृतयोऽवयवा आकरणं वा अवयविकरणमस्य द्वादशमासैस्तं द्वादशाकृति, दिवो द्युलोकात्पर ऊर्ध्वेऽधे स्थाने तृतीयस्या दिवीत्यर्थ· । पुरीषिणं पुरीषवन्तमुदकवन्तमाहुः कालविद· । अथ तमेवान्य इम उ परे कालविदो विचक्षणं निपुणं सर्वज्ञं सप्तचक्रे सप्तहयरूपे चक्रे संततगतिमति कालात्मनि षडरे षड्तुमत्याहुः सर्वामिदं जगत्कथयन्ति । अर्पि-तमरा इव रथनाभौ निविष्टमिति । यदि पंचपादो द्वादशाकृतिर्यदि वा सप्तचक्रः षडर· सर्वथापि संवत्सर कालात्मा प्रजापतिश्चंद्रादित्यलक्षणो जगत· कारणम् ॥

मासो वै प्रजापतिस्तस्य कृष्णपक्ष एव रयिः शुक्लः प्राणस्तस्मादेत ऋषयः शुक्ल इष्टं कुर्वन्तीतर इतरस्मिन् ॥१२॥

यस्मिन्निदं श्रितं विश्वं स एव प्रजापतिः संवत्सराख्य· स्वावयवे मासे कृत्स्न· परिसमाप्यते । मासो वै प्रजापतिर्यथोक्तलक्षण एव मिथुनात्मक· । तस्य मासात्मन· प्रजापतेरेको भाग· कृष्णपक्षो रयिरन्नं चंद्रमा, अपरो भाग· शुक्ल· शुक्लपक्ष प्राण आदित्योऽन्नाग्नियस्माच्छुक्लपक्षात्मानं प्राणं सर्वमेव पश्यन्ति, तस्मात्प्राणदर्शिन एत ऋषय· कृष्णपक्षेऽपीष्टं यागं कुर्वन्त· शुक्लपक्ष एव कुर्व-न्ति । प्राणव्यतिरेकेण कृष्णपक्षस्तेन दृश्यते यस्मात् । इतरे तु प्राणं न पश्यन्ती-त्यदर्शनलक्षणं कृष्णात्मानमेव पश्यन्ति । इतर इतरस्मिन्कृष्णपक्ष एव कुर्वन्ति शुक्ले कुर्वन्तोऽपि ॥

अहोरात्रौ वै प्रजापतिस्तस्याहरेव प्राणो रात्रिरेव रयिः प्राणं वा एते प्रस्कंदन्ति ये दिवा रत्या संयुज्यन्ते ब्रह्मचर्यमेव तद्यद्रात्रौ रत्या संयुज्यन्ते ॥१३॥

सोऽपि मासात्मा प्रजापतिः स्वावयवेऽहोरात्रे परिसमाप्यते अहोरात्रो वै प्रजापति· पूर्ववत् । तस्याप्यहरेव प्राणोऽन्नाग्नी रात्रिरेव रयिः पूर्ववदेव, प्राणं अहरात्मानं वा एते प्रस्कंदन्ति निर्गमयन्ति शोषयन्ति वा स्वात्मनो विच्छि-द्यापनयन्ति । के । ये दिवाहनि रत्या रतिकारणभूतया सह स्त्रिया संयुज्यन्ते मैथुनमाचरन्ति मूढा । यत एवं तस्मात्तन्न कर्तव्यमिति प्रतिषेधः प्रासंगिकः । यद्रात्रौ संयुज्यन्ते रत्या ऋतौ ब्रह्मचर्यमेव तदिति प्रशस्तत्वाद्रात्रौ भार्यागमनं

कर्तव्यमिति । अयमपि प्रासंगिको विधिः । प्रकृतं तूच्यते सोऽहोरात्रात्मकः प्रजापतिर्व्रीहियवाद्यन्नात्मना व्यवस्थितः एवं क्रमेण परिणम्य ॥

अन्नं वै प्रजापतिस्ततो ह वै तद्रेतस्तस्मादिमाः प्रजाः प्रजायन्त इति ॥१४॥

तदन्नं वै प्रजापतिः । कथम् । ततस्तस्माद्ध वै रेतो नृबीजं तत्प्रजाकारणं तस्माद्योषिति सिक्तादिमा मनुष्यादिलक्षणाः प्रजाः प्रजायन्ते यत्पृष्टं कुतो ह वै प्रजाः प्रजायन्त इति । तदेवं चंद्रादित्यमिथुनादिक्रमेण अहोरात्रान्तेनान्नरेतोद्वारेणेमाः प्रजाः प्रजायन्त इति निर्णीतम् ॥

तद्ये ह वै तत्प्रजापतिव्रतं चरन्ति ते मिथुनमुत्पादयन्ते । तेषामेवैष ब्रह्मलोको येषां तपो ब्रह्मचर्यं येषु सत्यं प्रतिष्ठितम् ॥१५॥

तत्तत्रैवं सति ये गृहस्था 'ह वै' इति प्रसिद्धस्मरणार्थौ निपातौ । तत्प्रजापतेर्व्रतमृतौ भार्यागमनं चरन्ति कुर्वन्ति तेषां दृष्टं फलमिदम् । किम् । ते मिथुनं पुत्रं दुहितरं चोत्पादयन्ते । अदृष्टं च फलमिष्टापूर्तदत्तकारिणा तेषामेवैष यश्चांद्रमसो ब्रह्मलोकः पितृयाणलक्षणो, येषां तपः स्नातकव्रतादीनि, ब्रह्मचर्य ऋतावन्यत्र मैथुनासमाचरणं ब्रह्मचर्यम् । येषु च सत्यमनृतवर्जनं प्रतिष्ठितमव्यभिचारितया वर्तते नित्यमेव ॥

तेषामसौ विरजो ब्रह्मलोको न येषु जिह्ममनृतं न माया चेति ॥१६॥ इति प्रथमः प्रश्नः ॥

यस्तु पुनरादित्योपलक्षित उत्तरायणः प्राणात्मभावो विरज शुद्धो न चंद्रब्रह्मलोकवद्रजस्वलो वृद्धिक्षयादियुक्तोऽसौ तेषां केषामित्युच्यते– यथा गृहस्थानामनेकविरुद्धसंव्यवहारप्रयोजनवत्त्वाज्जिह्मं कौटिल्यं वक्रभावोऽवश्यंभावि तथा न येषु जिह्मम् । यथा च गृहस्थानां क्रीडानर्मादिनिमित्तमनृतमवर्जनीयं तथा न येषु तत्, तथा माया गृहस्थानामिव न येषु विद्यते । माया नाम बहिरन्यथात्मानं प्रकाश्यान्यथैव कार्यं करोति सा माया मिथ्याचाररूपा । मायेत्येवमाद्यो दोषा येष्वधिकारिषु ब्रह्मचारिवानप्रस्थभिक्षुषु निमित्ताभावान्न विद्यन्ते तत्साधनानुरूपेणैव तेषामसौ विरजो ब्रह्मलोक इत्येषा ज्ञानयुक्तकर्मवतां गतिः । पूर्वोक्तस्तु ब्रह्मलोकः केवलकर्मिणां चंद्रलक्षण इति ॥ इति प्रथमः प्रश्नः ॥

॥ द्वितीयः प्रश्नः ॥

प्राणोऽत्ता प्रजापतिरित्युक्तम् । तस्य प्रजापतित्वमत्तृत्वं चास्मिञ्शरीरेऽवधारयितव्यमित्ययं प्रश्न आरभ्यते—

अथ हैनं भार्गवो वैदर्भिः पप्रच्छ । भगवन्कत्येव देवाः प्रजां विधारयन्ते कतर एतत्प्रकाशयन्ते कः पुनरेषां वरिष्ठ इति ॥१॥

अथानंतरं ह किलैनं भार्गवो वैदर्भिः पप्रच्छ । हे भगवन्कत्येव देवाः प्रजां शरीरलक्षणा विधारयन्ते विशेषेण धारयन्ते । कतर उद्बुद्धीन्द्रियकर्मेन्द्रियविभक्तानामेतत्प्रकाशनं स्वमाहात्म्यप्रख्यापनं प्रकाशयन्ते कोऽसौ पुनरेषां वरिष्ठः प्रधानः कार्यकरणलक्षणानामिति ॥

तस्मै स होवाच । आकाशो ह वा एष देवो वायुरग्निरापः पृथिवी वाङ्मनश्चक्षुः श्रोत्रं च । ते प्रकाश्याभिवदन्ति वयमेतद्बाणमवष्टभ्य विधारयामः ॥२॥

एवं पृष्टवते तस्मै स होवाच । आकाशो ह वा एष देवो वायुरग्निरापः पृथिवीत्येतानि पंच महाभूतानि शरीरारंभकाणि वाङ्मनश्चक्षुः श्रोत्रमित्यादीनि कर्मेन्द्रियबुद्धीन्द्रियाणि च । कार्यलक्षणाः करणलक्षणाश्च ते देवा आत्मनो माहात्म्यं प्रकाश्याभिवदन्ति स्पर्धमाना अहंश्रेष्ठतायै । कथं वदन्ति । वयमेतद्बाणं कार्यकरणसंघातमवष्टभ्य प्रासादमिव स्तंभादयोऽविशिथिलीकृत्य विधारयामो विस्पष्टं धारयामः । मय्येवैकेनायं संघातो ध्रियत इत्येकैकस्याभिप्रायः ॥

तान्वरिष्ठः प्राण उवाच । मा मोहमापद्यथाहमेवैतत्पंचधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामीति तेऽश्रद्दधाना बभूवुः ॥३॥

तानेवमभिमानवतो वरिष्ठो मुख्यः प्राण उवाचोक्तवान् । मा मैवं मोहमापद्यथ अविवेकतया अभिमानं मा कुरुत यस्मादहमेवैतद्बाणमवष्टभ्य विधारयामि पंचधात्मानं प्रविभज्य प्राणादिवृत्तिभेदं स्वस्य कृत्वा विधारयामि इत्युक्तवति च तस्मिंस्तेऽश्रद्दधाना अप्रत्ययवन्तो बभूवुः कथमेतदेवमिति ॥

सोऽभिमानाद्ऊर्ध्वमुत्क्रामत इव तस्मिन्नुत्क्रामत्यथेतरे सर्व एवोत्क्रामन्ते तस्मिंश्च प्रतिष्ठमाने सर्व एव प्रातिष्ठन्ते । तद्यथा मक्षिका मधुकरराजानमुत्क्रामन्तं सर्वा एवोत्क्रामन्ते तस्मिंश्च प्रतिष्ठमाने सर्वा एव प्रातिष्ठन्त एवं

वाङ्मनश्चक्षुः श्रोत्रं च ते प्रीताः प्राणं स्तुन्वन्ति ॥४॥

स च प्राणस्तेषामश्रद्दधानतामालक्ष्य अभिमानादूर्ध्वमुत्क्रामत इवेदमुत्क्रान्तवानिव सरोषान्निरपेक्षः । तस्मिन्नुत्क्रामति यद्वृत्तं तत् दृष्टांतेन प्रत्यक्षीकरोति । तस्मिन्नुत्क्रामति सत्यथानंतरमेवेतरे सर्व एव प्राणाश्चक्षुरादय उत्क्रामन्त उच्चक्रमिरे । तस्मिंश्च प्राणे प्रतिष्ठमाने तूष्णीं भवत्यनुत्क्रामति सति सर्व एव प्रातिष्ठन्ते तूष्णीं व्यवस्थिता अभूवन् । तत्तत्र यथा लोके मक्षिका मधुकरा स्वराजानं मधुकरराजानमुत्क्रामन्तं प्रति सर्वा एवोत्क्रामन्ते तस्मिंश्च प्रतिष्ठमाने सर्वा एव प्रातिष्ठन्ते प्रतितिष्ठन्ति । यथायं दृष्टान्त एवं वाङ्मनश्चक्षु. श्रोत्रं चेत्यादयस्त उत्सृज्याश्रद्दधानतां, बुद्ध्वा प्राणमाहात्म्यं प्रीताः प्राणं स्तुन्वन्ति स्तुवन्ति ॥

एषोऽग्निस्तपत्येष सूर्य एष पर्जन्यो मघवानेष वायुः । एष पृथिवी रयिर्देवः सदसच्चामृतं च यत् ॥५॥

कथम्— एष प्राणोऽग्नि· संस्तपति ज्वलति । तथैष सूर्य· सन्प्रकाशते । तथैष पर्जन्य· सन्वर्षति । किंच मघवानिद्र· सन्प्रजा· पालयति जिघांसत्यसुररक्षांसि । एष वायुरावहप्रवहादिभेद कि चैषा पृथिवी रयिर्देव सर्वस्य जगत. सन्मूर्तमसदमूर्त चामृतं च यद्देवानां स्थितिकारणम् ॥

अरा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितम् ।
ऋचो यजूंषि सामानि यज्ञः क्षत्र ब्रह्म च ॥६॥

किंबहुना, अरा इव रथनाभौ श्रद्धादि नामान्तं सर्व स्थितिकाले प्राणे एव प्रतिष्ठितम् । तथर्चो यजूंषि सामानीति त्रिविधा मंत्रास्तत्सा·ध्यश्च यज्ञः क्षत्रं च सर्वस्य पालयितृ ब्रह्म च यज्ञादिकर्मकर्तृत्वेऽधिकृतं चैष एव प्राणः सर्वम् ॥

प्रजापतिश्चरसि गर्भे त्वमेव प्रतिजायसे । तुभ्यं प्राण प्रजास्त्विमा बलिं हरन्ति यः प्राणैः प्रतितिष्ठसि ॥७॥

किंच— यः प्रजापतिरपि स त्वमेव गर्भे चरसि, पितुर्मातुश्च प्रतिरूपः सन्प्रतिजायसे, प्रजापतित्वादेव प्रागेव सिद्धं तव मातृपितृत्वम् । सर्वदेहदेह्याकृतिच्छन्न· एकः प्राण. सर्वात्मासीत्यर्थः । तुभ्यं त्वदर्थं या इमा मनुष्याद्याः प्रजास्तु हे प्राण चक्षुरादिद्वारैर्बलि हरन्ति, यस्त्वं प्राणैश्चक्षुरादिभिः सह प्रतितिष्ठसि सर्वशरीरेषु अतस्तुभ्यं बलि हरन्तीति युक्तम् । भोक्तासि यतस्त्वं तवैवान्यत्सर्व भोज्यम् ॥

देवानामसि वह्नितमः पितृणां प्रथमा स्वधा। ऋषीणां चरितं सत्यमथर्वाङ्गिरसामसि ॥८॥

किंच देवानामिद्रादीनामसि भवसि त्वं वह्नितमो हविषां प्रापयितृतमः। पितृणां नांदीमुखे श्राद्धे या पितृभ्यो दीयते स्वधान्नं सा देवप्रदानमपेक्ष्य प्रथमा भवति। तस्या अपि पितृभ्यः प्रापयिता त्वमेवेत्यर्थः। किंचर्षीणा चक्षुरादीनां प्राणानामथर्वाङ्गिरसां अंगिरसभूतानामथर्वणा तेषामेव "प्राणो वाथर्वा" इति श्रुतेः। चरितं चेष्टितं सत्यमवितथं देहधारणाद्युपकारलक्षणं त्वमेवासि ॥

इंद्रस्त्वं प्राण तेजसा रुद्रोऽसि परिरक्षिता। त्वमंतरिक्षे चरसि सूर्यस्त्वं ज्योतिषा पतिः ॥९॥

किंच— इंद्रः परमेश्वरस्त्वं हे प्राण, तेजसा वीर्येण रुद्रोऽसि संहरञ्जगत्। स्थितौ च परि समंताद्रक्षिता पालयिता परिरक्षिता त्वमेव जगतः सौम्येन रूपेण। त्वमंतरिक्षेऽजस्रं चरसि उदयास्तमयाभ्यां सूर्यस्त्वमेव च सर्वेषां ज्योतिषां पतिः ॥

यदा त्वमभिवर्षस्यथेमाः प्राणते प्रजाः। आनंदरूपास्तिष्ठन्ति कामायान्नं भविष्यतीति ॥१०॥

यदा पर्जन्यो भूत्वाभिवर्षसि त्वमथ तदान्नं प्राप्येमाः प्रजाः प्राणते प्राणचेष्टां कुर्वन्तीत्यर्थः। अथवा हे प्राण ते तवेमाः प्रजाः स्वात्मभूताः त्वदन्नसंवर्धिताः त्वदभिवर्षणदर्शनमात्रेण चानंदरूपाः सुखं प्राप्ता इव सत्यास्तिष्ठन्ति। कामायेच्छातोऽन्नं भविष्यतीत्येवमभिप्रायः ॥

व्रात्यस्त्वं प्राणैकर्षिरत्ता विश्वस्य सत्पतिः। वयमाद्यस्य दातारः पिता त्वं मातरिश्व नः ॥११॥

किंच—प्रथमजत्वादन्यस्य संस्कर्तुरभावादसंस्कृतो व्रात्यस्त्वं, स्वभावत एव शुद्ध इत्यभिप्रायः। हे प्राणैकर्षिस्त्वमाथर्वणाना प्रसिद्ध एकर्षिनामाग्निः सन्नत्ता सर्वहविषाम्। त्वमेव विश्वस्य सर्वस्य सतो विद्यमानस्य पतिः सत्पतिः। साधुर्वा पतिः सत्पतिः। वयं पुनराद्यस्य तवादनीयस्य हविषो दातारः। त्वं पिता मातरिश्व हे मातरिश्वन्नोऽस्माकम्। अथवा मातरिश्वनो वायोः पिता त्वम्। अतश्च सर्वस्यैव जगतः पितृत्वं सिद्धम् ॥

या ते तनूर्वाचि प्रतिष्ठिता या श्रोत्रे या च चक्षुषि। या च मनसि संतता शिवां तां कुरु मोत्क्रमीः ॥१२॥

किं बहुना, या ते त्वदीया तनूर्वाचि प्रतिष्ठिता वक्तृत्वेन वदनचेष्टां कुर्वती । या श्रोत्रे या च चक्षुषि या च मनसि संकल्पादिव्यापारेण संतता समनुगता तनूः तां शिवां शान्तां कुरु, मोत्क्रमीरुत्क्रमणेनाशिवां मा कार्षीरित्यर्थः ॥

प्राणस्येदं वशे सर्वं त्रिदिवे यत्प्रतिष्ठितम् । मातेव पुत्रान्रक्षस्व श्रीश्च प्रज्ञां च विधेहि न इति ॥१३॥

किं बहुना— अस्मिंल्लोके प्राणस्यैव वशे सर्वमिदं यत्किंचिदुपभोगजातं त्रिदिवे तृतीयस्यां दिवि च यत्प्रतिष्ठितं देवाद्युपभोगलक्षणं तस्यापि प्राण एवेशिता रक्षिता । अतो मातेव पुत्रानस्मान् रक्षस्व पालयस्व । त्वन्निमित्ता हि ब्राह्मणः क्षत्र्यश्च श्रियस्तास्त्वं श्रीश्च श्रियश्च प्रज्ञा च त्वत्स्थितिनिमित्तां विधेहि नो विधत्स्वेत्यर्थः । इत्येवं सर्वात्मतया वागादिभिः प्राणैः स्तुत्या गमितमहिमा प्राणः प्रजापतिरेवेत्यवधृतम् ॥ इति द्वितीय प्रश्नः ॥

॥ तृतीयः प्रश्नः ॥

अथ हैनं कौसल्यश्चाश्वलायनः पप्रच्छ । भगवन्कुत एष प्राणो जायते कथमायात्यस्मिञ्शरीर आत्मानं वा प्रविभज्य कथं प्रातिष्ठते केनोत्क्रमते कथं बाह्यमभिधत्ते कथमध्यात्ममिति ॥१॥

अथ हैनं कौसल्यश्चाश्वलायनः पप्रच्छ । प्राणैः ह्येवं निर्धारिततत्त्वः उपलब्धमहिमापि संहतत्वात्स्यादस्य कार्यत्वं, अतः पृच्छामि । भगवन्कुतः कस्मात्कारणादेष यथावधृतः प्राणो जायते । जातश्च कथं केन वृत्तिविशेषेण आयात्यस्मिञ्शरीरे । किंनिमित्तकमस्य शरीरग्रहणमित्यर्थः । प्रविष्टश्च शरीर आत्मानं वा प्रविभज्य प्रविभागं कृत्वा कथं केन प्रकारेण प्रातिष्ठते प्रतितिष्ठति । केन वा वृत्तिविशेषेणास्माच्छरीरादुत्क्रमत उत्क्रामति । कथं बाह्यमधिभूतमधिदैवतं चाभिधत्ते धारयति, कथमध्यात्ममिति धारयतीति शेषः ॥

तस्मै स होवाचातिप्रश्नान्पृच्छसि ब्रह्मिष्ठोऽसीति तस्मात्तेऽहं ब्रवीमि ॥२॥

एवं पृष्टस्तस्मै स होवाच आचार्यः । प्राण एव तावत् दुर्विज्ञेयत्वाद्विषमप्रश्नार्हः, तस्यापि जन्मादि त्वं पृच्छसि, अतोऽतिप्रश्नान्पृच्छसि । ब्रह्मिष्ठोऽ-

सीत्यतिशयेन त्वं ब्रह्मविदतस्तुष्टोऽहं, तस्मात्ते तुभ्यं अहं ब्रवीमि यत्पृष्टं शृणु ॥

आत्मन एष प्राणो जायते । यथैषा पुरुषे छायैतस्मिन्नेतदाततं मनोकृतेनायात्यस्मिञ्शरीरे ॥३॥

आत्मनः परस्मात्पुरुषादक्षरात्सत्यादेष उक्तः प्राणो जायते । कथमित्यत्र दृष्टान्तः । यथा लोक एषा पुरुषे शिरःपाण्यादिलक्षणे निमित्ते छाया नैमित्तिकी जायते, तद्वदेतस्मिन्ब्रह्मण्येतत्प्राणाख्यं छायास्थानीयमनृतरूपं तत्त्वं सत्ये पुरुष आतनं समर्पितमित्येतत् । छायेव देहे मनोकृतेन मनः संकल्पेच्छादिनिष्पन्नकर्मनिमित्तेनेत्येतत् । वक्ष्यति हि 'पुण्येन पुण्यं' इत्यादि । 'तदेव सक्तः सह कर्मणेति' इति च श्रुत्यंतरात् । आयात्यागच्छत्यस्मिञ्शरीरे ॥

यथा सम्राडेवाधिकृतान्विनियुंक्त एतान्ग्रामानेतान्ग्रामानधितिष्ठस्वेत्येवमेवैष प्राण इतरान्प्राणान्पृथक्पृथगेव सं निधत्ते ॥४॥

यथा येन प्रकारेण लोके राजा सम्राडेव ग्रामादिष्वधिकृतान्विनियुंक्ते । कथम् । एतान्ग्रामानेतान्ग्रामानधितिष्ठस्वेति । एवमेव यथायं दृष्टान्तः । एष मुख्यः प्राण इतरान्प्राणाञ्चक्षुरादीनात्मभेदाश्च पृथक्पृथगेव यथास्थानं संनिधत्ते विनियुंक्ते ॥

पायूपस्थेऽपानं चक्षुःश्रोत्रे मुखनासिकाभ्यां प्राणः स्वयं प्रातिष्ठते मध्ये तु समानः । एष ह्येतद्धुतमन्नं समं नयति तस्मादेताः सप्तार्चिषो भवन्ति ॥५॥

तत्र विभागः— पायूपस्थे पायुश्चोपस्थश्च पायूपस्थं तस्मिन् । अपानमात्मभेदं मूत्रपुरीषाद्यपनयनं कुर्वंस्तिष्ठति संनिधत्ते । तथा चक्षुः श्रोत्रे चक्षुश्च श्रोत्रं च चक्षुःश्रोत्रं तस्मिंश्चक्षुःश्रोत्रे । मुखनासिकाभ्यां मुखनासिके मुखं च नासिका च ताभ्यां मुखनासिकाभ्यां निर्गच्छन्प्राणः स्वयं सम्राट्स्थानीयः प्रातिष्ठते प्रतितिष्ठति । मध्ये तु प्राणापानयोः स्थानयोर्नाभ्याम् । समानोऽशितं पीतं च समं नयतीति समानः । एष हि यस्माद्येतत् हुतं भुक्तं पीतं चात्माग्नौ प्रक्षिप्तमन्नं समं नयति, तस्मादशितपीतेधनादग्नेरादर्यात् हृदयदेशं प्राप्तादेताः सप्तसंख्याका अर्चिषो दीप्तयो निर्गच्छन्त्यो भवन्ति । शीर्षण्यप्राणद्वारा दर्शनश्रवणादिलक्षणरूपादिविषयप्रकाशा इत्यभिप्रायः ॥

हृदि ह्येष आत्मा । अत्रैतदेकशतं नाडीनां तासां शतं शतमेकैकस्या द्वासप्ततिर्द्वासप्ततिः प्रतिशाखानाडीसहस्राणि भवन्त्यासु व्यानश्चरति ॥६॥

हृदि ह्येष पुंडरीकाकारमांसपिंडपरिच्छिन्ने हृदयाकाश एष आत्मा आत्मना संयुक्तो लिंगात्मा जीवात्मेत्यर्थः । अत्रास्मिन्हृदय एतदेकशतमेकोत्तरशतं संख्यया प्रधाननाडीना भवति । तासां शतं शतमेकैकस्याः प्रधाननाड्या भेदाः पुनरपि द्वासप्ततिर्द्वासप्ततिर्द्वे द्वे सहस्रे अधिके सप्ततिश्च सहस्राणि, सहस्राणां द्वासप्ततिः, प्रतिशाखानाडीसहस्राणि प्रतिप्रतिनाडीशतं संख्यया प्रधाननाडीना सहस्राणि भवन्ति । आसु नाडीषु व्यानो वायुश्चरति । व्यानो व्यापनात् । आदित्यादिव रश्मयो हृदयात्सर्वतोगामिनीभिर्नाडीभिः सर्वदेहं संव्याप्य व्यानो वर्तते । संधिस्कंधमर्मदेशेषु विशेषेण प्राणापानवृत्त्योश्च मध्ये उद्धृतवृत्तिर्वीर्यवत्कर्मकर्ता भवति ।

अथैकयोर्ध्व उदानः पुण्येन पुण्यं लोकं नयति पापेन पापमुभाभ्यामेव मनुष्यलोकम् ॥७॥

अथ या तु तत्रैकशतानां नाडीनां मध्ये ऊर्ध्वगा सुषुम्नाख्या नाडी तयैकयोर्ध्वः सन्नुदानो वायुः आपादतलमस्तकवृत्तिः संचरन्पुण्येन कर्मणा शास्त्रविहितेन पुण्यं लोकं देवादिस्थानलक्षणं नयति प्रापयति । पापेन तद्विपरीतेन पापं नरकं तिर्यग्योन्यादिलक्षणम् । उभाभ्यां समप्रधानाभ्या पुण्यपापाभ्यामेव मनुष्यलोकं नयतीत्यनुवर्तते ॥

आदित्यो ह वै बाह्यः प्राण उदयत्येष ह्येनं चाक्षुषं प्राणमनुगृह्णानः । पृथिव्यां या देवता सैषा पुरुषस्यापानमवष्टभ्यांतरा यदाकाशः स समानो वायुर्व्यानः ॥८॥

आदित्यो ह वै प्रसिद्धो ह्यधिदैवतं बाह्यः प्राणः स एष उदयत्युद्गच्छति । एष ह्येनमाध्यात्मिकं चक्षुषि भवं चाक्षुषं प्राणं प्रकाशेनानुगृह्णानो रूपोपलब्धौ चक्षुष आलोकं कुर्वन्नित्यर्थः । तथा पृथिव्यामभिमानिनी या देवता प्रसिद्धा सैषा, पुरुषस्यापानमपानवृत्ति अवष्टभ्याकृष्य वशीकृत्याध एवापकर्षणेनानुग्रहं कुर्वती वर्तत इत्यर्थः । अन्यथा हि शरीरं गुरुत्वात्पेतत्सावकाशे वोद्गच्छेत । यदेतदंतरा मध्ये द्यावापृथिव्योर्य आकाशस्तत्स्थो वायुराकाश उच्यते । मंचस्थवत् । स समानः समानमनुगृह्णानो वर्तत इत्यर्थः । समानस्यान्तराकाशस्थत्वसामान्यात्

सामान्येन च यो बाह्यो वायुः स व्याप्तिसामान्याद्व्यानो व्यानमनुगृह्णानो वर्तत इत्यभिप्रायः ॥

तेजो ह वा उदानस्तस्मादुपशान्ततेजाः । पुनर्भवमिंद्रियैर्मनसि संपद्यमानैः ॥२॥

यद्वाव्यं ह वै प्रसिद्धं सामान्यं तेजस्तच्छरीर उदान उदानं वायुमनुगृह्णाति स्वेन प्रकाशेनेत्यभिप्रायः । यस्मात्तेज स्वभावो बाह्यतेजोऽनुगृहीतः उत्कार्तिकर्ता तस्मात्यदा लौकिक पुरुषः उपशान्ततेजा भवति । उपशान्तं स्वाभाविकं तेजो यस्य स । तदा तं क्षीणायुषं मुमूर्षुं विद्यात् । स पुनर्भवं शरीरान्तरं प्रतिपद्यते । कथं, सहेंद्रियैर्मनसि संपद्यमानैः प्रविशद्भिर्वागादिभिः ॥

यच्चित्तस्तेनैष प्राणमायाति प्राणस्तेजसा युक्तः । सहात्मना यथा-संकल्पितं लोकं नयति ॥१०॥

मरणकाले यच्चित्तो भवति तेनैष जीवः चित्तेन संकल्पेनेंद्रियैः सह प्राणं मुख्यप्राणवृत्तिमायाति । मरणकाले क्षीणेंद्रियवृत्तिः सन्मुख्यया प्राणवृत्त्यैवावतिष्ठत इत्यर्थः । तदा हि वदन्ति ज्ञातय उच्छ्वसिति जीवतीति । स च प्राणस्तेजसोदानवृत्त्या युक्तः सन्सहात्मना स्वामिना भोक्त्रा स एवमुदानवृत्त्यैव युक्तः प्राणस्तं भोक्तारं पुण्यपापकर्मवशाद्यथासंकल्पितं यथाभिप्रेतं लोकं नयति प्रापयति ॥

य एवं विद्वान्प्राणं वेद न हास्य प्रजा हीयतेऽमृतो भवति तदेष श्लोकः ॥११॥

यः कश्चिदेवं विद्वान्यथोक्तविशेषणैर्विशिष्टमुत्पत्त्यादिभिः प्राणं वेद जानाति तस्येदं फलमैहिकमामुष्मिकं चोच्यते । न हास्य नैवास्य विदुषः प्रजा पुत्रपौत्रादिलक्षणा हीयते च्छिद्यते । पतिते च शरीरे प्राणसायुज्यतया अमृतोऽमरणधर्मा भवति । तदेतस्मिन्नर्थे संक्षेपाभिधायक एष श्लोको मंत्रो भवति ॥

उत्पत्तिमायतिं स्थानं विभुत्वं चैव पंचधा । अध्यात्मं चैव प्राणस्य विज्ञायामृतमश्नुते विज्ञायामृतमश्नुत इति ॥१२॥ इति तृतीयः प्रश्नः ॥

उत्पत्तिं परमात्मनः प्राणस्यायतिमागमनं मनोकृतेनास्मिञ्शरीरे स्थानं स्थिति च पायूपस्थादिस्थानेषु विभुत्वं च स्वाम्यमेव सम्राडिव प्राणवृत्तिभेदानां

पंचधा स्थापनम्। बाह्यमादित्यादिरूपेणाध्यात्मं चैव चक्षुराद्याकारेणावस्थानं विज्ञायैवं प्राणममृतमश्नुत इति। विज्ञायामृतमश्नुत इति द्विर्वचनं प्रश्नार्थपरिसमाप्त्यर्थम्॥ इति तृतीय प्रश्नः॥

॥ चतुर्थः प्रश्नः ॥

अथ हैनं सौर्यायणी गार्ग्यः पप्रच्छ। भगवन्नेतस्मिन्पुरुषे कानि स्वपन्ति कान्यस्मिञ्जाग्रति कतर एष देवः स्वप्नान्पश्यति कस्यैतत्सुखं भवति कस्मिन्नु सर्वे संप्रतिष्ठिता भवन्तीति ॥१॥

अथ हैनं सौर्यायणी गार्ग्यः पप्रच्छ प्रश्नत्रयेणापरविद्यागोचरं सर्वं परिसमाप्य संसारं व्याकृतविषयं साध्यसाधनलक्षणमनित्यम्। अथेदानीं साध्यसाधनविलक्षणं अप्राणममनोगोचरमतींद्रियविषयं शिवं शान्तमविकृतमक्षरं सत्यं परविद्यागम्यं पुरुषाख्यं सबाह्याभ्यंतरमजं वक्तव्यमित्युत्तरं प्रश्नत्रयमारभ्यते। तत्र सुदीप्तादिवाग्नेः यस्मात्परादक्षरात्सर्वे भावा विस्फुलिंगा इव जायन्ते तत्र चैवापियन्तीत्युक्तं द्वितीये मुंडके। के ते सर्वे भावा अक्षराद्विस्फुलिंगा इव विभज्यन्ते। कथं वा विभक्ता सन्तस्तत्रैवापियन्ति। किलक्षणं वा तदक्षरमिति। एतद्विवक्षयाधुना प्रश्नानुद्घावयति—भगवन्नेतस्मिन्पुरुषे शिरःपाण्यादिमति कानि करणानि स्वपन्ति स्वापं कुर्वन्ति स्वव्यापारादुपरमन्ते। कानि चास्मिञ्जाग्रति जागरणमनिद्रावस्था स्वव्यापारं कुर्वन्ति। कतर कार्यकरणलक्षणयोरेष देवः स्वप्नान्पश्यति। स्वप्नो नाम जाग्रद्दर्शनान्निवृत्तस्य जाग्रद्वदंतःशरीरे यद्दर्शनम्। तत्किं कार्यलक्षणेन देवेन निर्वर्त्यते, किंवा करणलक्षणेन केनचिदित्यभिप्रायः। उपरते च जाग्रत्स्वप्नव्यापारे यत्प्रसन्नं निरायासलक्षणमनाबाधं सुखं कस्यैतद्भवति। तस्मिन्काले जाग्रत्स्वप्नव्यापारादुपरताः सन्तः कस्मिन्नु सर्वे सम्यगेकीभूताः संप्रतिष्ठिताः। मधुनि रसवत्समुद्रप्रविष्टनद्यादिवच्च विवेकानर्हा प्रतिष्ठिता भवन्ति संगताः संप्रतिष्ठिता भवन्तीत्यर्थः। ननु न्यस्तदात्रादिकरणवत्स्वव्यापारादुपरतानि पृथक्पृथगेव स्वात्मन्यवतिष्ठन्त इत्येतद्युक्तं, कुतः प्राप्तिः सुषुप्तपुरुषाणां करणानां कस्मिंश्चिदेकीभावगमनाशंकायाः प्रष्टुः? युक्तैव त्वाशंका। यतः संहतानि करणानि स्वाम्यर्थानि परतंत्राणि च जाग्रद्विषये। तस्मात्स्वापेऽपि

संहताना पारतंत्र्येणैव कस्मिंश्चित्संगतिर्न्याय्येति। तस्मादाशंक्यानुरूप एव प्रश्नोऽयम्। अत्र तु कार्यकरणसंघातो यस्मिंश्च प्रलीन. सुषुप्तप्रलयकालयोः तद्विशेषं बुभुत्सोः स को नु स्यादिति कस्मिन्सर्वे संप्रतिष्ठिता भवन्तीति॥

तस्मै स होवाच। यथा गार्ग्य मरीचयोऽर्कस्यास्तं गच्छतः सर्वा एतस्मिंस्तेजोमंडल एकीभवन्ति ताः पुनः पुनरुदयतः प्रचरन्त्येवं ह वै तत्सर्वं परे देवे मनस्येकी भवति। तेन तर्ह्येष पुरुषो न शृणोति न पश्यति न जिघ्रति न रसयते न स्पृशते नाभिवदते नादत्ते नानंदयते न विसृजते नेयायते स्वपितीत्याचक्षते॥२॥

तस्मै स होवाचाचार्यः। शृणु हे गार्ग्य यत्त्वया पृष्टम्। यथा मरीचयो रश्मयोऽर्कस्यादित्यस्य अस्तमदर्शनं गच्छतः सर्वा अशेषत एतस्मिंस्तेजोमंडले तेजोराशिरूपे एकीभवन्ति विवेकानर्हत्वमविशेषता गच्छन्ति, ताः मरीचयस्तस्यैवार्कस्य पुनः पुनरुदयत उद्गच्छतः प्रचरन्ति विकीर्यन्ते। यथायं दृष्टान्तः, एवं ह वै तत्सर्वं विषयेंद्रियादिजातं परे प्रकृष्टे देवे द्योतनवति मनसि, चक्षुरादिदेवानां मनस्तंत्रत्वात्परो देवो मनः तस्मिन्स्वप्नकाल एकीभवति, मंडले मरीचिवदविशेषतां गच्छति। जिजागरिषोश्च रश्मिवन्मंडलान्मनस एव प्रचरति स्वव्यापाराय प्रतिष्ठते। यस्मात्स्वप्नकाले श्रोत्रादीनि शब्दाद्युपलब्धिकरणानि मनस्येकीभूतानीव करणव्यापारादुपरतानि तेन तस्मात्तर्हि तस्मिन्स्वापकाले एष देवदत्तादिलक्षणः पुरुषो न शृणोति न पश्यति न जिघ्रति न रसयते न स्पृशते नाभिवदते नादत्ते नानंदयते न विसृजते न इयायते स्वपितीत्याचक्षते लौकिकाः॥

प्राणाग्नय एवैतस्मिन्पुरे जाग्रति। गार्हपत्यो ह वा एषोऽपानो व्यानोऽन्वाहार्यपचनो यद्गार्हपत्यात्प्रणीयते प्रणयनादाहवनीयः प्राण.॥३॥

सुप्तवत्सु श्रोत्रादिषु करणेष्वेतस्मिन्पुरे नवद्वारे देहे प्राणाग्नयः प्राणा एव पंच वायवोऽग्नय इवाग्नयो जाग्रति। अग्निसामान्यं हि आह— गार्हपत्यो ह वा एषोऽपानः। कथमित्याह— यस्माद्गार्हपत्यादग्नेरग्निहोत्रकाले इतरोऽग्निराहवनीयः प्रणीयते। प्रणयनात्प्रणीयतेऽस्मादिति प्रणयनो गार्हपत्योऽग्निः। तथा सुप्तस्यापानवृत्तेः प्रणीयते इव प्राणो मुखनासिकाभ्यां संचरत्यत आहवनीयस्थानीयः प्राणः। व्यानस्तु हृदयाद्दक्षिणसुषिरद्वारेण निर्गमाद्दक्षिणदिक्संबंधादन्वाहार्यपचनो दक्षिणाग्निः॥

यदुच्छ्वासनिःश्वासावेतावाहुती समं नयतीति स समानः। मनो ह वाव यजमानः। इष्टफलमेवोदानः स एनं यजमानमहरहर्ब्रह्म गमयति ॥४॥

अत्र च होता अग्निहोत्रस्य यद्यस्मादुच्छ्वासनिःश्वासावग्निहोत्राहुती इव नित्यं द्वित्वसामान्यादेव त्वेतावाहुती समं साम्येन शरीरास्थितिभावाय नयति यो वायुरग्निस्थानीयोऽपि होता चाहुत्योर्नेतृत्वात्। कोऽसौ ? स समानः। अतश्च विदुषः स्वापोऽप्यग्निहोत्रहवनमेव। तस्माद्विद्वान्नाकर्मात्मेवं मंतव्य इत्यभिप्रायः। सर्वदा सर्वाणि भूतानि विचिन्वन्त्यपि स्वपत इति हि वाजसनेयके। अत्र हि जाग्रत्सु प्राणाग्निषूपसंहृत्य बाह्यकरणानि विषयांश्चाग्निहोत्रफलमिव स्वर्गं ब्रह्म जिगमिषुर्मनो ह वाव यजमानो जागर्ति। यजमानवत्कार्यकरणेषु प्राधान्येन संव्यवहारात्स्वर्गमिव ब्रह्म प्रति प्रस्थितत्वाद्यजमानो मनः कल्प्यते। इष्टफलं यागफलमेवोदानो वायुः। उदाननिमित्तत्वादिष्टफलप्राप्तेः। कथं, स उदानो एनं मनआख्यं यजमानं स्वप्नवृत्तिरूपादपि प्रत्याव्य अहरहः सुषुप्तिकाले स्वर्गमिव ब्रह्माक्षरं गमयति। अतो यागफलस्थानीय उदानः॥ एवं विदुषः श्रोत्राद्युपरमकालादारभ्य यावत्सुप्तोत्थितो भवति तावत्सर्वयागफलानुभव एव, नाविदुषामिवानर्थायेति विद्वत्ता स्तूयते। न हि विदुष एव श्रोत्रादीनि स्वपन्ति प्राणाग्नयो वा जाग्रति। जाग्रत्स्वप्नयोर्मनः स्वातंत्र्यमनुभवदहरहः सुषुप्तं वा प्रतिपद्यते। समानं हि सर्वप्राणिनां पर्यायेण जाग्रत्स्वप्नसुषुप्तिगमनं, अतो विद्वत्तास्तुतिरवेयमुपपद्यते॥

अत्रैष देवः स्वप्ने महिमानमनुभवति। यत् दृष्टं दृष्टमनुपश्यति श्रुतं श्रुतमेवार्थमनुश्रृणोति देशदिगंतरैश्च प्रत्यनुभूतं पुनः पुनः प्रत्यनुभवति दृष्टं चादृष्टं च श्रुतं चाश्रुतं चानुभूतं चाननुभूतं च सच्चासच्च सर्वं पश्यति सर्वः पश्यति ॥५॥

यत्पृष्टं कतर एष देवः स्वप्नान्पश्यतीति तदाह— अत्रोपरतेषु श्रोत्रादिषु देहरक्षार्थं जाग्रत्सु प्राणादिवायुषु प्राक्सुषुप्तिप्रतिपत्तेः एतस्मिन्नंतराले एष देवोऽर्करश्मिवत्स्वात्मनि संहृतश्रोत्रादिकरण स्वप्ने महिमानं विभूति विषयविषयिलक्षणं अनेकात्मभावगमनं अनुभवति प्रतिपद्यते॥

ननु महिमानुभवने करणं मनोऽनुभवितुः, तत्कथं स्वातंत्र्येणानुभवतीत्युच्यते ? स्वतंत्रो हि क्षेत्रज्ञः। नैष दोषः। क्षेत्रज्ञस्य स्वातंत्र्यस्य मनउपाधिकृतत्वात्। न हि क्षेत्रज्ञः परमार्थतः स्वतः स्वपिति जागर्ति वा। मनउपाधि-

कृतमेव तस्य जागरणं स्वप्नश्च । उक्तं वाजसनेयके- 'स हि स्वप्नो भूत्वा ध्यायतीव लेलायतीव' इत्यादि । तस्मान्मनसो विभूत्यनुभवे स्वातंत्र्यवचनं न्याय्यमेव । मनउपाधिसहितत्वे स्वप्नकाले क्षेत्रज्ञस्य स्वयंज्योतिष्ट्वं बाध्येतेति केचित् । तन्न । श्रुत्यर्थापरिज्ञानकृता भ्रांतिस्तेषाम् । यस्मात् स्वयंज्योतिष्ट्वादिव्यवहारोऽपि आमोक्षान्त· सर्वोऽविद्याविषय एव मनआद्युपाधिजनित., 'यत्र वा अन्यदिव स्यात्तत्रान्योऽन्यत्पश्येन्मात्रासंसर्गस्त्वस्य भवति' 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' इत्यादिश्रुतिभ्यः । अतो मंदब्रह्मविदामेवेयमाशंका न त्वेकात्मविदाम् । नन्वेवं सति 'अत्रायं पुरुष· स्वयंज्योतिः' इति विशेषणमनर्थकं भवति । अत्रोच्यते । अत्यल्पमिदमुच्यते 'य एषोऽन्तर्हृदय आकाशस्तस्मिञ्शेते' इत्यंतर्हृदयपरिच्छेदे सुतरा स्वयंज्योतिष्ट्वं बाध्येत । सत्यमेवं, अयं दोषो यद्यपि स्यात्स्वप्ने केवलतया स्वयंज्योतिष्ट्वेनार्थ तावदपनीतं भारस्येति चेन्न । तत्रापि 'पुरीतति नाडीषु शेते' इति श्रुतेः पुरीतन्नाडीसंबंधादत्रापि पुरुषस्य स्वयंज्योतिष्ट्वेनार्थभारापनयाभिप्रायो मृषैव । कथं तर्हि 'अत्रायं पुरुषः स्वयंज्योतिः' इति । अन्यशाखात्वादनपेक्षा सा श्रुतिरिति चेन्न । अर्थैकत्वस्येष्टत्वात् । एको ह्यात्मा सर्ववेदान्तानामर्थो विजिज्ञापयिषितो बुभुत्सितश्च । तस्माद्युक्ता स्वप्न आत्मन. स्वयंज्योतिष्ट्वोपपत्तिर्वक्तुं, श्रुतेर्यथार्थतत्त्वप्रकाशकत्वात् । एवं तर्हि शृणु श्रुत्यर्थ हित्वा सर्वमभिमानं, नहि अभिमानेन वर्षशतेनापि श्रुत्यर्थो ज्ञातुं शक्यते सर्वैः पंडितंमन्यैः । यथा हृदयाकाशे पुरीतति नाडीषु च स्वपतस्तत्संबंधाभावात्ततो विविच्य दर्शयितुं शक्यत इत्यात्मनः स्वयंज्योतिष्ट्वं न बाध्यते, एवं मनसि अविद्याकामकर्मनिमित्तोज्झितवासनावति कर्मनिमित्ता वासना अविद्यया अन्यद्वस्त्वंतरमिव पश्यत. सर्वकार्यकरणेभ्यः प्रविविक्तस्य द्रष्टुर्वासनाभ्यो दृश्यरूपाभ्योऽन्यत्वेन स्वयंज्योतिष्ट्वं सुदर्शयितेनापि तार्किकेण न वारयितुं शक्यते । तस्मात्साधूक्तं मनसि प्रलीनेषु करणेष्वप्रलीने च मनसि मनोमयः स्वप्नान्पश्यतीति ॥

कथं महिमानमनुभवतीत्युच्यते । यन्मित्रं पुत्रादि वा पूर्वं दृष्टं तद्वासनावासितः पुत्रमित्रादिवासनासमुद्भूतं पुत्रं मित्रमिव वा अविद्यया पश्यतीत्येवं मन्यते । तथा श्रुतमर्थं तद्वासनया अनुशृणोतीव । देशदिगंतरैश्च देशांतरैर्दिगंतरैश्च प्रत्यनुभूतं पुनः पुनस्तत्प्रत्यनुभवतीवाविद्यया । तथा दृष्टं चास्मिञ्जन्मनि अदृष्टं च जन्मांतरदृष्टमित्यर्थः । अत्यंतादृष्टे वासनानुपपत्तेः । एवं श्रुतं चाश्रुतं

चानुभूतं चास्मिञ्जन्मनि केवलेन मनसा, अननुभूतं च मनसैव जन्मान्तरे अनुभूतमित्यर्थः । सच्च परमार्थोदकादि । असच्च मरीच्युदकादि । किं बहुना उक्तानुक्तं सर्वं पश्यति सर्वं पश्यति सर्वमनोवासनोपाधिः सन्नेवं सर्वकरणात्मा मनोदेवः स्वप्नान्पश्यति ॥

स यदा तेजसाभिभूतो भवति । अत्रैष देवः स्वप्नान्न पश्यत्यथतस्मिञ्शरीर एतत्सुखं भवति ॥६॥

स यदा मनोरूपो देवो यस्मिन्काले सौरेण पित्ताख्येन तेजसा नाडीशयेन सर्वतोऽभिभूतो भवति तिरस्कृतवासनाद्वारो भवति, तदा सह करणैर्मनसो रश्मयो हृद्युपसंहृता भवन्ति । यदा मनो दार्वग्निवदविशेषविज्ञानरूपेण कृत्स्नं शरीरं व्याप्यावतिष्ठते तदा सुषुप्तो भवति । अत्रैतस्मिन्काल एष मनआख्यो देवः स्वप्नान्न पश्यति दर्शनद्वारस्य निरुद्धत्वात्तेजसा । अथ तदैतस्मिञ्शरीर एतत्सुखं भवति यद्विज्ञानं निराबाधमविशेषेण शरीरव्यापकं प्रसन्नं भवतीत्यर्थः ॥

एतस्मिन्काले ऽविद्याकामकर्मनिबंधनानि कार्यकरणानि शान्तानि भवन्ति । तेषु शान्तेष्वात्मस्वरूपमुपाधिभिरन्यथा विभाव्यमानमद्वयमेकं शिवं शान्तं भवतीत्येतामेवावस्थां पृथिव्याद्यविद्याकृतमात्रानुप्रवेशेन दर्शयितुं दृष्टान्तमाह—

स यथा सोम्य वयांसि वासोवृक्षं संप्रतिष्ठन्ते । एवं ह वै तत्सर्वं पर आत्मनि संप्रतिष्ठते ॥७॥

स दृष्टान्तो यथा येन प्रकारेण सोम्य प्रियदर्शन वयांसि पक्षिणो वासार्थं वृक्षं वासोवृक्षं प्रति संप्रतिष्ठन्ते गच्छन्ति । एवं यथा दृष्टान्तो ह वै तद्वक्ष्यमाणं सर्वं पर आत्मन्यक्षरे संप्रतिष्ठते ॥

पृथिवी च पृथिवीमात्रा चापश्चापोमात्रा च तेजश्च तेजोमात्रा च वायुश्च वायुमात्रा चाकाशश्चाकाशमात्रा च चक्षुश्च द्रष्टव्यं च श्रोत्रं च श्रोतव्यं च घ्राणं च घ्रातव्यं च रसश्च रसयितव्यं च त्वक्च स्पर्शयितव्यं च वाक्च वक्तव्यं च हस्तौ चादातव्यं चोपस्थश्चानंदयितव्यं च पायुश्च विसर्जयितव्यं च पादौ च गंतव्यं च मनश्च मंतव्यं च बुद्धिश्च बोद्धव्यं चाहंकारश्चाहंकर्तव्यं च चित्तं च चेतयितव्यं च तेजश्च विद्योतयितव्यं च प्राणश्च विधारयितव्यं च ॥८॥

किं तत्सर्वं— पृथिवी च स्थूला पंचगुणा तत्कारणं च पृथिवीमात्रा

गंधतन्मात्रा । तथापश्चापोमात्रा च । तेजश्च तेजोमात्रा च । वायुश्च वायुमात्रा च । आकाशश्चाकाशमात्रा च । स्थूलानि च सूक्ष्माणि च भूतानीत्यर्थः । तथा चक्षुश्चेद्रियं रूपं च द्रष्टव्यं च । श्रोत्रं च श्रोतव्यं च । घ्राणं च घ्रातव्यं च । रसश्च रसयितव्यं च । त्वक्च स्पर्शयितव्यं च । वाक्च वक्तव्यं च । हस्तौ च आदातव्यं च । उपस्थश्च आनंदयितव्यं च । पायुश्च विसर्जयितव्यं च । पादौ च गंतव्यं च । बुद्धींद्रियाणि कर्मेंद्रियाणि तदर्थाश्चोक्ताः । मनश्च पूर्वोक्तम् । मंतव्यं च तद्विषय· । बुद्धिश्च निश्चयात्मिका । बोद्धव्यं च तद्विषय· । अहंकारश्चाभिमानलक्षणमंत करणम् । अहंकर्तव्यं च तद्विषयः । चित्तं च चेतनावदंतःकरणम् । चेतयितव्यं च तद्विषयः । तेजश्च त्वगिंद्रियव्यतिरेकेण प्रकाशविशिष्टा या त्वक् । तया निर्भास्यो विषयो वियोतयितव्यम् । प्राणश्च सूत्रं यदाचक्षते तेन विधारयितव्यं संग्रथनीयम् । सर्वं हि कार्यकरणजातं पारार्थ्येन संहतं नामरूपात्मकमेतावदेव ॥

एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मंता बोद्धा कर्ता विज्ञानात्मा पुरुषः । स परेऽक्षर आत्मनि संप्रतिष्ठते ॥९॥

अतः परं यदात्मरूपं जलसूर्यकादिवद्भोक्तृत्वकर्तृत्वेनेहानुप्रविष्टम्—एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मंता बोद्धा कर्ता विज्ञानात्मा, विज्ञानं विज्ञायतेऽनेनेति करणभूतं बुध्यादि, इदं तु विजानातीति विज्ञानं कर्तृकारकरूपं तदात्मा तत्स्वभावो विज्ञातृस्वभाव इत्यर्थः । पुरुषः कार्यकरणसंघातोक्तोपाधिपूरणात्पुरुषः । स च जलसूर्यकादिप्रतिबिंबस्य सूर्यादिप्रवेशवज्जगदाधारशेषे परेऽक्षर आत्मनि संप्रतिष्ठते ॥

परमेवाक्षरं प्रतिपद्यते स यो ह वै तदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सोम्य । स सर्वज्ञः सर्वो भवति तदेष श्लोकः ॥१०॥

तदेकत्वविद· फलमाह-- परमेवाक्षरं वक्ष्यमाणविशेषणं प्रतिपद्यत इति । एतदुच्यते– स यो ह वै तत्सर्वैषणाविनिर्मुक्तोऽच्छायं तमोवर्जितम् । अशरीरं नामरूपसर्वोपाधिशरीरवर्जितम् । अलोहितं लोहितादिसर्वगुणवर्जितम् । यत एवमतः शुभ्रं शुद्धं सर्वविशेषणरहितत्वात् । अक्षरं सत्यं पुरुषाख्यम् । अप्राणममनोगोचरं शिवं शान्तं सबाह्याभ्यंतरमजं वेदयते विजानाति यस्तु सर्वत्यागी सोम्य, स सर्वज्ञो न तेनाविदितं किंचित्संभवति । पूर्वमविद्यया असर्वज्ञ आसी-

त्पुनर्विद्ययाऽविद्यापनये सर्वो भवति । तदस्मिन्नर्थ एष श्लोको मंत्रो भवति उक्तार्थसंग्राहक· ॥

विज्ञानात्मा सह देवैश्च सर्वैः प्राणा भूतानि संप्रतिष्ठन्ति यत्र । तदक्षरं वेदयते यस्तु सोम्य स सर्वज्ञ· सर्वमेवाविवेशेति ॥११॥ इति चतुर्थः प्रश्नः ॥

विज्ञानात्मा, सह देवैश्चान्यादिभिः प्राणाश्चक्षुरादयो भूतानि पृथिव्यादीनि संप्रतिष्ठन्ति प्रविशन्ति यत्र यस्मिन्नक्षरे, तदक्षरं वेदयते यस्तु हे सोम्य प्रियदर्शन, स सर्वज्ञ· सर्वमेवाविवेश आविशतीत्यर्थ ॥ इति चतुर्थः प्रश्नः ॥

॥ पंचमः प्रश्नः ॥

अथ हैनं शैब्य· सत्यकाम· पप्रच्छ । अथेदानीं परापरब्रह्मप्राप्तिसाधनत्वेन ॐकारस्योपासनविधित्सया प्रश्न आरभ्यते—

अथ हैनं शैब्यः सत्यकामः पप्रच्छ । स यो ह वै तद्भगवन्मनुष्येषु प्रायणान्तमोंकारमभिध्यायीत । कतमं वाव स तेन लोकं जयतीति ॥१॥

स यः कश्चिद्ध वै भगवन्मनुष्येषु मनुष्याणां मध्ये तदद्भुतमिव प्रायणान्तं मरणान्त यावज्जीवमित्येतत् । ॐकारमभिध्यायीत आभिमुख्येन चिंतयेत् । बाह्यविषयेभ्य उपसंहृतकरण·, समाहितचित्तो भक्त्यावेशितब्रह्मभाव ओंकारे, आत्मप्रत्ययसंतानाविच्छेदो भिन्नजातीयप्रत्ययान्तराखिलीकृतो निर्वातस्थदीपशिखासमोऽभिध्यानशब्दार्थः । सत्यब्रह्मचर्याहिंसाऽपरिग्रहत्यागसंन्यासशौचसंतोषामायावित्त्वाद्यनेकयमनियमानुगृहीतः स एवं यावज्जीवव्रतधारणः । कतमं वाव अनेके हि ज्ञानकर्मभिर्जेतव्या लोकास्तिष्ठन्ति, तेषु तेनोंकाराभिध्यानेन कतमं स लोकं जयति ॥

तस्मै स होवाच । एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारः । तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेति ॥२॥

इति पृष्टवते तस्मै स होवाच पिप्पलाद· । एतद्वै सत्यकाम । एतद्ब्रह्म वै परं चापरं च ब्रह्म परं सत्यमक्षरं पुरुषाख्यमपरं च प्राणाख्यं प्रथमजं यत्तदोंकार एवोकारात्मकमोंकारप्रतीकत्वात् । परं हि ब्रह्म शब्दाद्युपलक्षणानर्ह सर्वधर्मविशेषवर्जितमतो न शक्यमतीन्द्रियगोचरत्वात्केवलेन मनसावगाहितुम् ।

ॐकारे तु विष्ण्वादिप्रतिमास्थानीये भक्त्यावेशितब्रह्मभावे ध्यायिनां तत्प्रसादतीत्यवगम्यते शास्त्रप्रामाण्यात्तथाऽपरं च ब्रह्म । तस्मात्परं चापरं च ब्रह्म यदोंकार इत्युपचर्यते । तस्मादेवं विद्वानेतेनैव आत्मप्राप्तिसाधनेनैव ॐकाराभिध्यानेनैकतरं परमपरं वा अन्वेति ब्रह्मानुगच्छति । नेदिष्ठं ह्यालंबनमोंकारो ब्रह्मणः ॥

स यद्येकमात्रमभिध्यायीत स तेनैव संवेदितस्तूर्णमेव जगत्यामभिसंपद्यते । तमृचो मनुष्यलोकमुपनयन्ते स तत्र तपसा ब्रह्मचर्येण श्रद्धया संपन्नो महिमानमनुभवति ॥३॥

स यद्यप्योंकारस्य सकलमात्राविभागज्ञो न भवति, तथाप्योंकाराभिध्यानप्रभावात् विशिष्टामेव गतिं गच्छति । एतदेकदेशज्ञानवैगुण्यतया ओंकारशरणः कर्मज्ञानोभयभ्रष्टो न दुर्गतिं गच्छति । किं तर्हि यद्यप्येवमोंकारमेव एकमात्राविभागज्ञं एव केवलोऽभिध्यायीतैकमात्रं सदा ध्यायीत, स तेनैव एकमात्राविशिष्टोंकाराभिध्यानेनैव संवेदितः संबोधितस्तूर्णं क्षिप्रमेव जगत्यां पृथिव्यामभिसंपद्यते । किं, मनुष्यलोकम् । अनेकानि हि जन्मानि जगत्यां संभवन्ति । तत्र तं साधकं जगत्यां मनुष्यलोकमेव उपनयन्ते उपनिगमयन्ति ऋचः । ऋग्वेदरूपा हि ओंकारस्य प्रथमैकमात्रा अभिध्याता । तेन स तत्र मनुष्यजन्मनि द्विजाढ्यः संस्तपसा ब्रह्मचर्येण श्रद्धया च संपन्नो महिमानं विभूतिमनुभवति न वीतश्रद्धो यथेष्टचेष्टो भवति । योगभ्रष्टः कदाचिदपि न दुर्गतिं गच्छति ॥

अथ यदि द्विमात्रेण मनसि संपद्यते सोऽन्तरिक्षं यजुर्भिरुन्नीयते सोमलोकम् । स सोमलोके विभूतिमनुभूय पुनरावर्तते ॥४॥

अथ पुनर्यदि द्विमात्राविभागज्ञो द्विमात्रेण विशिष्टमोंकारमभिध्यायीत स्वप्नात्मके मनसि मनर्नाम्नि यजुर्मये सोमदैवत्ये संपद्यत एकाग्रतया आत्मभावं गच्छति । स एवं संपन्नो मृतोऽन्तरिक्षमंतरिक्षाधारं द्वितीयमात्रारूपं द्वितीयमात्रारूपेरेव यजुर्भिरुन्नीयते सोमलोकं सौम्यं जन्म प्रापयन्ति तं यजूंष्यित्यर्थः । स तत्र विभूतिमनुभूय सोमलोके मनुष्यलोकं प्रति पुनरावर्तते ॥

यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये संपन्नः । यथा पादोदरस्त्वचा विनिर्मुच्यत एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते । तदेतौ श्लोकौ भवतः ॥५॥

यः पुनरेतमोकारं त्रिमात्रेण त्रिमात्राविषयविज्ञानविशिष्टेन ओमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत, तेनाभिध्यानेन प्रतीकत्वेन ह्यालंबनत्वं प्रकृतमोकारस्य, परं चापरं च ब्रह्मेत्यभेदश्रुतेः। ओकारमिति च द्वितीयानेकश्रुता बाध्येतान्यथा। यद्यपि तृतीयाभिधानत्वेन करणत्वमुपपद्यते तथापि प्रकृतानुरोधात्त्रिमात्रं परं पुरुषमिति द्वितीयैव परिणेया त्यजेदेकं कुलस्यार्थे इति न्यायेन। स तृतीयमात्रारूपे तेजसि सूर्ये संपन्नो भवति ध्यायमानो, मृतोऽपि सूर्यात्सोमलोकादिवन्न पुनरावर्तते, किंतु सूर्ये संपन्नमात्र एव। यथा पादोदरः सर्पस्त्वचा विनिर्मुच्यते जीर्णत्वग्विनिर्मुक्तः स पुनर्नवो भवति। एवं ह वा एष यथा दृष्टान्तः स पाप्मना सर्पत्वकस्थानीयेन अशुद्धिरूपेण विनिर्मुक्तः सामभिस्तृतीयमात्रारूपेरूर्ध्वमुन्नीयते ब्रह्मलोकं हिरण्यगर्भस्य ब्रह्मणो लोकं सत्याख्यम्। स हिरण्यगर्भः सर्वेषां संसारिणां जीवानां आत्मभूतः। स ह्येतदात्मा लिंगरूपेण सर्वभूतानां, तस्मिन्हि लिंगात्मनि संहताः सर्वे जीवाः। तस्मात्स जीवघनः। स विद्वान्त्रिमात्रोंकाराभिज्ञ एतस्माज्जीवघनाद्धिरण्यगर्भात्परात्परं परमात्माख्यं पुरुषमीक्षते पुरिशयं सर्वशरीरानुप्रविष्टं पश्यति ध्यायमानः। तदेतौ अस्मिन्नर्थोक्तार्थप्रकाशकौ श्लोकौ मंत्रौ भवतः॥

तिस्रो मात्रा मृत्युमत्यः प्रयुक्ता अन्योन्यसक्ता अनविप्रयुक्ताः।
क्रियासु बाह्याभ्यंतरमध्यमासु सम्यक्प्रयुक्तासु न कंपते ज्ञः॥६॥

तिसस्त्रिसंख्याका अकारोकारमकाराख्या ओंकारस्य मात्राः। मृत्युमत्यः, मृत्युर्यासां विद्यते ता मृत्युमत्यो मृत्युगोचरादनतिक्रांता मृत्युगोचरा एवेत्यर्थः। ता आत्मनो ध्यानक्रियासु प्रयुक्ताः। किंचान्योन्यसक्ता इतरेतरसंबद्धाः। अनविप्रयुक्ता विशेषेणैकैकविषये एव प्रयुक्ता विप्रयुक्ताः, न तथा विप्रयुक्ता अविप्रयुक्ता, नाविप्रयुक्ता अनविप्रयुक्ताः। किं तर्हि, विशेषेणैकस्मिन्ध्यानकाले तिसृषु क्रियासु बाह्याभ्यंतरमध्यमासु जाग्रत्स्वप्नसुषुप्तस्थानपुरुषाभिध्यानलक्षणासु योगक्रियासु युक्तासु सम्यक्प्रयुक्तासु सम्यग्ध्यानकाले प्रयोजितासु न कंपते न चलति ज्ञो योगी यथोक्तविभागज्ञ ओंकारस्येत्यर्थः। न तस्यैवंविदश्चलनमुपपद्यते। यस्माज्जाग्रत्स्वप्नसुषुप्तपुरुषाः सह स्थानैर्मात्रात्रयरूपेण ओंकारात्मरूपेण दृष्टाः, स ह्येवं विद्वान्सर्वात्मभूत ओंकारमयः कुतो वा चलेत्कस्मिन्वा॥

ऋग्भिरेतं यजुर्भिरंतरिक्षं सामभिर्यत्तत्कवयो वेदयन्ते । तमोंकारेणैवायतनेनान्वेति विद्वान्यत्तच्छान्तमजरममृतमभयं परं चेति ॥७॥ इति पंचमः प्रश्नः ॥

सर्वार्थसंग्रहार्थो द्वितीयो मंत्रः— ऋग्भिरेतं लोकं मनुष्योपलक्षितम् । यजुर्भिरंतरिक्षं सोमाधिष्ठितम् । सामभिर्यत्तद्ब्रह्मलोक इति तृतीयं कवयो मेधाविनो विद्यावन्त एव नाविद्वांसो वेदयन्ते । तं त्रिविधं लोकमोंकारेण साधनेनापरब्रह्मलक्षणं अन्वेत्यनुगच्छति विद्वान् । तेनैवोंकारेण यत्तत्परं ब्रह्माक्षरं सत्यं पुरुषाख्यं शान्तं विमुक्तं जाग्रत्स्वप्नसुषुप्त्यादिविशेषसर्वप्रपंचविवर्जितं, अत एवाजरं जरावर्जितममृतं मृत्युवर्जितमत एव । यस्माज्जराविक्रियारहितमतोऽभयम् । यस्मादेवाभयं तस्मात्परं निरतिशयम् । तदप्योंकारेणैवायतनेन गमनसाधनेनान्वेतीत्यर्थः । इतिशब्दो वाक्यपरिसमाप्त्यर्थः ॥ इति पंचमः प्रश्नः ॥

॥ षष्ठः प्रश्नः ॥

अथ हैनं सुकेशा भारद्वाजः पप्रच्छ । भगवन्हिरण्यनाभः कौसल्यो राजपुत्रो मामुपेत्यैतं प्रश्नमपृच्छत । षोडशकलं भारद्वाज पुरुषं वेत्थ । तमहं कुमारमब्रुवं नाहमिमं वेद यद्यहमिममवेदिषं कथं ते नावक्ष्यमिति । समूलो वा एष परिशुष्यति योऽनृतमभिवदति तस्मान्नार्हाम्यनृतं वक्तुम् । स तूष्णीं रथमारुह्य प्रवव्राज । तं त्वा पृच्छामि । क्वासौ पुरुष इति ॥१॥

अथ हैनं सुकेशा भारद्वाजः पप्रच्छ । समस्तं जगत्कार्यकारणलक्षणं सह विज्ञानात्मना परस्मिन्नक्षरे सुषुप्तिकाले संप्रतिष्ठत इत्युक्तम् । सामर्थ्यात्प्रलयेऽपि तस्मिन्नेवाक्षरे संप्रतिष्ठते जगत्तत एवोत्पद्यत इति च सिद्धं भवति । नहि अकारणे कार्यस्य संप्रतिष्ठानमुपपद्यते । उक्तं च— 'आत्मन एष प्राणो जायते' इति । जगतश्च यन्मूलं तत्परिज्ञानात्परं श्रेय इति सर्वोपनिषदां निश्चितोऽर्थः । अनंतरं चोक्तं 'स सर्वज्ञः सर्वो भवति' इति । वक्तव्यं च क्व तर्हि तदक्षरं सत्यं पुरुषाख्यं विज्ञेयमिति । तदर्थोऽयं प्रश्न आरभ्यते । वृत्तान्वाख्यानं च विज्ञानस्य दुर्लभत्वज्ञापनेन तल्लब्ध्यर्थं मुमुक्षूणां यत्नविशेषोपादानार्थम् । हे भगवन्हिरण्यनाभो नामतः कोसलायां भवः कौसल्यो राजपुत्रो जातितः क्षत्रियो मामुपेत्योपगम्य एतमुच्यमानं प्रश्नमपृच्छत । षोडशकलं षोडशसंख्याकाः कला अवयवा इवात्मन्यविद्याध्यारोपितरूपा यस्मिन्पुरुषे सोऽयं षोडशकलस्तं षोडशकलं हे भारद्वाज

पुरुषं वेत्थ विजानासि । तमहं राजपुत्रं कुमारं पृष्टवन्तमब्रवमुक्तवानस्मि, नाहमिमं वेद यं त्वं पृच्छसीति । एवमुक्तवत्यपि मय्यज्ञानमसंभावयन्तं तमज्ञानं कारणमवादिषम् । यदि कथंचिदहमिमं त्वया पृष्टं पुरुषमवेदिषं विदितवानस्मि, कथमत्यंतशिष्यगुणवतेऽर्थिने ते तुभ्यं नावक्ष्यं नोक्तवानस्मि न ब्रूयामित्यर्थः । भूयोऽयप्रत्ययभिवालक्ष्य प्रत्याययितुमब्रवम् । समूलः सह मूलेन वै एषोऽन्यथा सन्तमात्मानमन्यथा कुर्वन् योऽनृतमयथाभूतार्थमभिवदति स परिशुष्यति शोषमुपैति, इहलोकपरलोकाभ्यां विच्छिद्यते विनश्यति । यत एवं जानं तस्मान्नार्हाम्यहमनृतं वक्तुं मूढवत् । स राजपुत्र एवं प्रत्यायितस्तूष्णीं व्रीडितो रथमारुह्य प्रवव्राज प्रगतवान्यथागतमेव । अतो न्यायत उपसन्नाय योग्याय जानता विद्या वक्तव्यैव अनृतं च न वक्तव्यं सर्वास्वप्यवस्थास्वित्येतत्सिद्धं भवति । तं पुरुषं त्वा त्वा पृच्छामि मम हृदि विज्ञेयत्वेन शल्यमिव स्थितं, क्वासौ वर्तते विज्ञेयः पुरुष इति ॥

तस्मै स होवाच । इहैवान्तःशरीरे सोम्य स पुरुषो यस्मिन्नेताः षोडश कलाः प्रभवन्तीति ॥२॥

तस्मै स होवाच । इहैवान्तःशरीरे हृदयपुंडरीकाकाशमध्ये हे सोम्य स पुरुषो, न देशान्तरे विज्ञेयो, यस्मिन्नेता उच्यमानाः षोडश कलाः प्राणाद्याः प्रभवन्त्युत्पद्यन्त इति ॥

षोडशकलाभिरुपाधिभूताभिः सकल इव निष्कलः पुरुषो लक्ष्यतेऽविद्वयेति, यदुपाधिकलाध्यारोपापनयेन विद्यया स पुरुषः केवलो दर्शयितव्य इति कलानां तत्प्रभवत्वमुच्यते प्राणादीनाम् । अत्यंतनिर्विशेषे ह्यद्वये शुद्धे तत्त्वे न शक्योऽध्यारोपमंतरेण प्रतिपाद्यप्रतिपादनादिव्यवहारः कर्तुमिति कलानां प्रभवस्थित्यप्यया आरोप्यन्तेऽविद्याविषयाः । चैतन्याव्यतिरेकेणैव हि कला जायमानास्तिष्ठन्त्यः प्रलीयमानाश्च सर्वदा लक्ष्यन्ते । अत एव भ्रान्ताः केचित् । अग्निसंयोगात् घृतमिव घटाद्याकारेण चैतन्यमेव प्रतिक्षणं जायते नश्यतीति । तान्निरोधे शून्यमिव सर्वमित्यपरे । घटादिविषयं चैतन्यं चेतयितुर्नित्यस्यात्मनोऽनित्यं जायते विनश्यतीत्यपरे । चैतन्यं भूतधर्म इति लोकायतिकाः ॥

अनपायोपजनधर्मकचैतन्यमात्मैव नामरूपाद्युपाधिधर्मैः प्रत्यवभासते । 'सत्यं ज्ञानमनंतं ब्रह्म' 'प्रज्ञानं ब्रह्म' 'विज्ञानमानंदं ब्रह्म' 'विज्ञानघन एव'

इत्यादिश्रुतिभ्यः। स्वरूपव्यभिचारिषु पदार्थेषु चैतन्यस्याव्यभिचारात्यथा यथा यो यः पदार्थो ज्ञायते तथा तथा ज्ञायमानत्वादेव तस्य तस्य चैतन्यस्याव्यभिचारित्वम्। वस्तुतत्त्वं भवति किंचिन्न ज्ञायत इति चानुपपन्नम्। रूपं च दृश्यते न चास्ति चक्षुरिति यथा। व्यभिचरति तु ज्ञेयं, न ज्ञानं व्यभिचरति कदाचिदपि ज्ञेयम्। ज्ञेयाभावेऽपि ज्ञेयान्तरे भावाज्ज्ञानस्य। न हि ज्ञानेऽसति ज्ञेयं नाम भवति कस्यचित्। सुषुप्तेऽदर्शनाज्ज्ञानस्यापि सुषुप्तेऽभावाज्ज्ञेयवज्ज्ञानस्वरूपस्य व्यभिचार इति चेत्। न। ज्ञेयावभासकस्य ज्ञानस्यालोकवज्ज्ञेयाभिव्यंजकत्वात् स्वव्यंग्याभावे आलोकाभावानुपपत्तिवत् अप्रतीतेषु वस्तुषु सुषुप्ते विज्ञानाभावानुपपत्तेः। न ह्यंधकारे चक्षुषो रूपानुपलब्धौ चक्षुषोऽभावः शक्यः कल्पयितुं अवैनाशिकेन। वैनाशिको ज्ञेयाभावे ज्ञानाभावं कल्पयत्येवेति चेद्येन तदभावं कल्पयेत्तस्याभावः केन कल्प्यते इति वक्तव्यं वैनाशिकेन। तदा भावस्यापि ज्ञेयत्वाज्ज्ञानाभावे तदनुपपत्तेः। ज्ञानस्य ज्ञेयाव्यतिरिक्तत्वाज्ज्ञेयाभावे ज्ञानाभाव इति चेन्न। अभावस्यापि ज्ञेयत्वाभ्युपगमात्। अभावोऽपि ज्ञेयोऽभ्युपगम्यते वैनाशिकैर्नित्यश्च। तदव्यतिरिक्तं चेज्ज्ञानं नित्यं कल्पितं स्यात्। तदभावस्य च ज्ञानात्मकत्वादभावत्वं वाङ्मात्रमेव, न परमार्थतोऽभावत्वमनित्यत्वं च ज्ञानस्य। न च नित्यस्य ज्ञानस्याभावनाममात्राभ्यारोपे किंचिन्नश्छिन्नम्। अथाभावो ज्ञेयोऽपि सज्ज्ञानव्यतिरिक्त इति चेन्न तर्हि ज्ञेयाभावे ज्ञानाभावः। ज्ञेयं ज्ञानव्यतिरिक्तं, न तु ज्ञानं ज्ञेयव्यतिरिक्तमिति चेन्न। शब्दमात्रत्वाद्विशेषानुपपत्तेः। ज्ञेयज्ञानयोरेकत्वं चेदभ्युपगम्यते, ज्ञेयं ज्ञानव्यतिरिक्तं, न ज्ञेयव्यतिरिक्तं ज्ञानमिति तु शब्दमात्रमेव तत्— वह्निरग्निव्यतिरिक्तोऽग्निर्न वह्निव्यतिरिक्त इति यद्वत्— अभ्युपगम्यते। ज्ञेयव्यतिरेके तु ज्ञानस्य ज्ञेयाभावे ज्ञानाभावानुपपत्तिः सिद्धा। ज्ञेयाभावेऽदर्शनादभावो ज्ञानस्य इति चेन्न। सुषुप्ते ज्ञप्त्यभ्युपगमात्। वैनाशिकैरभ्युपगम्यते हि सुषुप्तेऽपि ज्ञानास्तित्वम्। तत्रापि ज्ञेयत्वमभ्युपगम्यते ज्ञानस्य स्वेनैवेति चेन्न। भेदस्य सिद्धत्वात्। सिद्धं ह्यभावविज्ञेयविषयस्य ज्ञानस्याभावज्ञेयव्यतिरेकाज्ज्ञेयज्ञानयोरन्यत्वम्। न हि तत्सिद्धं मृतमिवोज्जीवयितुं पुनरन्यथा कर्तुं शक्यते वैनाशिकशतैरपि। ज्ञानस्य स्वाज्ञेयत्वे तदप्यन्येन तदप्यन्येनेति त्वत्पक्षेऽतिप्रसंग इति चेन्न। तद्विभागोपपत्तेः सर्वस्य। यदा हि सर्वं ज्ञेयं कस्यचित्तदा तद्व्यतिरिक्तं ज्ञानं ज्ञानमेवेति द्वितीयो विभाग एवाभ्युपगम्यतेऽवैनाशिकैः, न

तृतीयस्तद्विषय इत्यनवस्थानुपपत्तिः । ज्ञानस्य स्वेनैवाविज्ञेयत्वे सर्वज्ञत्वहानिरिति चेत्सोऽपि दोषस्तस्यैवास्तु । किं तन्निबर्हणेनास्माकम् । अनवस्थादोषश्च ज्ञानस्य ज्ञेयत्वाभ्युपगमात् अवश्यं च वैनाशिकानां ज्ञानं ज्ञेयम् । स्वात्मना चाविज्ञेयत्वेनानवस्था अनिवार्या । समान एवार्थं दोष इति चेन्न । ज्ञानस्यैकत्वोपपत्ते. । सर्वदेशकालपुरुषाद्यवस्थमेकमेव ज्ञानं नामरूपाद्यनेकोपाधिभेदात् सवित्रादिजलादिप्रतिबिंबवत् अनेकधावभासत इति । नासौ दोष· । तथा चेहदमुच्यते ॥

ननु श्रुतेरिहैवातःशरीरे परिच्छिन्नः कुंडबदरवत्पुरुष इति, न । प्राणादिकलाकारणत्वात् । नहि शरीरमात्रपरिच्छिन्नस्य प्राणश्रद्धादीनां कलाना कारणत्वं प्रतिपत्तुं शक्नुयात् । कलाकार्यत्वाच्च शरारस्य । न हि पुरुषकार्याणा कलानां कार्यं सच्छरीरं कारणकारणं स्वस्य पुरुषं कुंडबदरमिवाभ्यंतरीकुर्यात्, बीजवृक्षादिवत्स्यादिति चेत् । यथा बीजकार्यं वृक्षस्तत्कार्यं च फलं स्वकारणकारणं बीजमभ्यंतरीकरोत्याम्रादि, तद्वत्पुरुषमभ्यंतरीकुर्याच्छरीरं स्वकारणकारणमपीति चेन्न । अन्यत्वात्सावयवत्वाच्च । दृष्टान्ते कारणबीजात् वृक्षफलसंवृत्तान्यन्यान्येव बीजानि, दार्ष्टान्तिके तु स्वकारणकारणभूत स एव पुरुषः शरीरेऽभ्यंतरीकृतः श्रूयते । बीजवृक्षादीना सावयवत्वाच्च स्यादाधाराधेयत्वं, निरवयवश्च पुरुष., सावयवाश्च कलाः शरीरं च । एतेनाकाशस्यापि शरीराधारत्वमनुपपन्नं, किमुत आकाशकारणस्य पुरुषस्य । तस्मादसमानो दृष्टान्त । किं दृष्टान्तेन, वचनात्स्यादिति चेत् । न । वचनस्याकारकत्वात् । न हि वचनं वस्तुतोऽन्यथाकरणे व्याप्रियते । किं तर्हि, यथाभूतार्थावद्योतने । तस्मादंत शरीर इत्येतद्वचनं 'अंडस्यान्तर्व्योम' इतिवच्च द्रष्टव्यम् । उपलब्धिनिमित्तत्वाच्च दर्शनश्रवणमननविज्ञानादिलिंगंरंत शरीरे परिच्छिन्न इव ह्युपलभ्यते पुरुष उपलभ्यते चात्र । अत उच्यतेऽन्तःशरीरे सोम्य स पुरुष इति । न पुनराकाशकारणः सन्कुंडबदरवच्छरीरपरिच्छिन्न इति मनसापीच्छति वक्तुं मूढोऽपि, किमुत प्रमाणभूता श्रुतिः ॥

यस्मिन्नेताः षोडश कलाः प्रभवन्तीत्युक्तः पुरुषविशेषणार्थः कलानां प्रभवः स चान्यार्थोऽपि श्रुतः केन क्रमेण स्यादित्यत इदमुच्यते—

स ईक्षांचक्रे कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति ॥३॥

चेतनपूर्विका च सृष्टिरित्येवमर्थं च पुरुषः षोडशकलः पृष्टो यो भारद्वाजेन

स ईक्षाचक्र ईक्षणं दर्शनं चक्रे कृतवानित्यर्थः सृष्टिफलकमादिविषयम् । कथमित्युच्यते, कस्मिन्कर्तृविशेषे देहादुत्क्रान्त उत्क्रान्तो भविष्याम्यहमेव, कस्मिन्वा शरीरे प्रतिष्ठितेऽहं प्रतिष्ठास्यामि प्रतिष्ठित स्यामित्यर्थः ॥

ननु आत्माऽकर्ता प्रधानं कर्तृ, अतः पुरुषार्थं प्रयोजनमुररीकृत्य प्रधानं प्रवर्तते महदाद्याकारेण । तत्रेदमनुपपन्नं पुरुषस्य स्वातंत्र्येणेक्षापूर्वकं कर्तृत्ववचनं, सत्त्वादिगुणसाम्ये प्रधाने प्रमाणोपपन्ने सृष्टिकर्तरि सर्ताश्वरेच्छानुवर्तिषु वा परमाणुषु सत्स्वात्मनोऽप्येकत्वेन कर्तृत्वे साधनाभावादात्मन आत्मन्यनर्थकर्तृत्वानुपपत्तेश्च । न हि चेतनावान्बुद्धिपूर्वकारी आत्मनोऽनर्थं कुर्यात् । तस्मात्पुरुषार्थेन प्रयोजनेनेक्षापूर्वकमिव नियतक्रमेण प्रवर्तमानेऽचेतने प्रधाने चेतनवदुपचारोऽयं स ईक्षांचक्र इत्यादिः । यथा राज्ञः सर्वार्थकारिणि भृत्ये राजेति तद्वत । न आत्मनो भोक्तृत्ववत्कर्तृत्वोपपत्तेः । यथा सांख्यस्य चिन्मात्रस्यापरिणामिनोऽप्यात्मनो भोक्तृत्वं, तद्वद्वेदवादिनामीक्षापूर्वकं जगत्कर्तृत्वमुपपन्नं श्रुतिप्रामाण्यात् । तत्त्वान्तरपरिणामात् आत्मनोऽनित्यत्वाशुद्धत्वानेकत्वनिमित्तं चिन्मात्रस्वरूपविक्रियात, पुरुषस्य स्वात्मन्येव भोक्तृत्वे चिन्मात्रस्वरूपविक्रिया न दोषाय । भवता पुनर्वेदवादिना सृष्टिकर्तृत्वे तत्त्वान्तरपरिणाम एवेत्यात्मनोऽनित्यत्वादिसर्वदोषप्रसंग इति चेन्न । एकस्याप्यात्मनोऽविद्याविषयनामरूपोपाध्यनुपाधिकृतविशेषाभ्युपगमात् । अविद्याकृतनामरूपोपाधिकृतो हि विशेषोऽभ्युपगम्यत आत्मनो बंधमोक्षादिशास्त्रकृतसंव्यवहाराय । परमार्थतोऽनुपाधिकृतं च तत्त्वमेकमेवाद्वितीयमुपादेयं सर्वतार्किकबुद्ध्यनवगम्यं ह्यजमभयं शिवमिष्यते । न तत्र कर्तृत्वं भोक्तृत्वं वा क्रियाकारकफलं वा स्यादद्वैतत्वात्सर्वभावानाम् । सांख्यास्त्वविद्याध्यारोपितमेव पुरुषे कर्तृत्वं क्रियाकारकं फलं चेति कल्पयित्वा आगमबाह्यत्वात्पुनस्ततस्तस्यन्त परमार्थत एव भोक्तृत्वं पुरुषस्येच्छन्ति । तत्त्वान्तरं च प्रधानं पुरुषात परमार्थवस्तुभूतमेव कल्पयन्तोऽन्यतार्किककृतबुद्धिविषया सन्तो विहन्यन्ते । तथेतरे तार्किकाः साख्यैः । इत्येवं परस्परविरुद्धार्थकल्पनात आमिषार्थिन इव प्राणिनोऽन्योन्यविरुद्धमानार्थदर्शित्वात्परमार्थतत्त्वात् दूरमेवापकृष्यन्ते । अतस्तन्मतमनादृत्य वेदान्तार्थतत्त्वमेकत्वदर्शनं प्रत्यादरवन्तो मुमुक्षवः स्युरिति तार्किकमतदोषप्रदर्शनं किंचिदुच्यतेऽस्माभिः, न तु तार्किकवत्तात्पर्येण । तथैतदुक्तम्— "विवदत्स्वेव निक्षिप्य विरोधोद्भवकारणम् । तैः संरक्षितसद्बुद्धिः सुखं निर्वाति वेदवित् ॥"

किंच भोक्तृत्वकर्तृत्वयोर्विक्रिययोर्विशेषानुपपत्तिः । का नामासौ कर्तृत्वाज्ज्यायंतरभूता भोक्तृत्वविशिष्टा विक्रिया, यतो भोक्तैव पुरुषः कल्प्यते न कर्ता, प्रधानं तु कर्त्रैव न भोक्त्रिति । ननूक्तं पुरुषश्चिन्मात्र एव, स च स्वात्मस्थो विक्रियेत भुजानो न तत्त्वान्तरपरिणामेन । प्रधानं तु तत्त्वान्तरपरिणामेन विक्रियते । अतोऽनेकमशुद्धमचेतनं चेत्यादिधर्मवत् तद्विपरीतः पुरुषः । नासौ विशेषो वाङ्मात्रत्वात् । प्राग्भोगोत्पत्तेः केवलचिन्मात्रस्य पुरुषस्य भोक्तृत्वं नाम विशेषो भोगोत्पत्तिकाले चेज्जायते, निवृत्ते च भोगे पुनस्तद्विशेषादपेतश्चिन्मात्र एव भवतीति चेत्, महदाद्याकारेण च परिणम्य प्रधानं ततोऽपेत्य पुनः प्रधानस्वरूपेणावतिष्ठत इत्यस्यां कल्पनायां न कश्चिद्विशेष इति वाङ्मात्रेण प्रधानपुरुषयोर्विशिष्टविक्रिया कल्प्यते । अथ भोगकालेऽपि चिन्मात्र एव प्राग्वत्पुरुष इति चेत्, न तर्हि परमार्थतो भोगः पुरुषस्य । अथ भोगकाले चिन्मात्रस्य विक्रिया परमार्थैव तेन भोगः पुरुषस्येति चेत् । न । प्रधानस्यापि भोगकाले विक्रियावत्त्वाद्भोक्तृत्वप्रसंगः । चिन्मात्रस्यैव विक्रिया भोक्तृत्वमिति चेत् औष्ण्याद्यसाधारणधर्मवतां अग्न्यादीनामभोक्तृत्वे हेत्वनुपपत्तिः । प्रधानपुरुषयोर्द्वयोर्युगपद्भोक्तृत्वमिति चेन्न । प्रधानस्य पारार्थ्यानुपपत्तेः । न हि भोक्त्रोर्द्वयोरितरेतरगुणप्रधानभाव उपपद्यते । प्रकाशयोरिवेतरेतरप्रकाशने । भोगधर्मवति सत्त्वांगिनि चेतसि पुरुषस्य चैतन्यप्रतिबिंबोदयादविक्रियस्य पुरुषस्य भोक्तृत्वमिति चेन्न । पुरुषस्य विशेषाभावे भोक्तृत्वकल्पनानर्थक्यात् । भोगरूपश्चेदनर्थः पुरुषस्य नास्ति सदा निर्विशेषत्वात्पुरुषस्य, कस्यापनयनार्थं मोक्षसाधनं शास्त्रं प्रणीयते ? अविद्याध्यारोपितानर्थापनयनाय शास्त्रप्रणयनमिति चेत् परमार्थतः पुरुषो भोक्तैव, न कर्ता, प्रधानं कर्त्रैव न भोक्तृ, परमार्थसद्वस्त्वंतरं पुरुषाच्च इतीयं कल्पना आगमबाह्या व्यर्था निर्हेतुका चेति नादर्तव्या मुमुक्षुभिः । एकत्वेऽपि शास्त्रप्रणयनाद्यानर्थक्यमिति चेन्न । अभावात् । सत्सु हि शास्त्रप्रणेत्रादिषु तत्फलार्थिषु च शास्त्रस्य प्रणयनमनर्थकं सार्थकं वेति विकल्पना स्यात् । न ह्यात्मैकत्वे शास्त्रप्रणेत्रादयस्ततो भिन्नाः सन्ति । तदभावे एवं विकल्पनैवानुपपन्ना । अभ्युपगते आत्मैकत्वे प्रमाणार्थश्चाभ्युपगतो भवता यदात्मैकत्वमभ्युपगच्छता । तदभ्युपगमे च विकल्पानुपपत्तिमाह शास्त्रं 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' इत्यादि । शास्त्रप्रणयनाद्युपपत्तिं चाहान्यत्र परमार्थवस्तुस्वरूपादविद्याविषये, 'यत्र हि द्वैतमिव भवति' इत्यादि

विस्तरतो वाजसनेयके। अत्र च विभक्ते विद्याविद्ये परापरे इत्यादावेव शास्त्रस्य। अतो न तार्किकवादभटप्रवेशो वेदान्तराजप्रमाणबाहुगुप्ते इहात्मैकत्वविषये इति। एतेन अविद्याकृतनामरूपाद्युपाधिकृतानेकशक्तिसाधनकृतभेदवत्त्वात् ब्रह्मणः सृष्टयादिकर्तृत्वे साधनाद्यभावो दोषः प्रत्युक्तो वेदितव्यः, परैरुक्त आत्मानर्थकर्तृत्वादिदोषश्च। यस्तु दृष्टान्तो राज्ञः सर्वार्थकारिणि कर्तारि भृत्ये उपचारात् राजा कर्तेति सोऽत्रानुपपन्नः। स ईक्षांचक्र इति श्रुतेर्मुख्यार्थबाधनात्प्रमाणभूतायाः। तत्र हि गौणी कल्पना शब्दस्य यत्र मुख्यार्थो न संभवति। इह तु अचेतनस्य मुक्तबद्धपुरुषविशेषापेक्षया कर्तृकर्मदेशकालनिमित्तापेक्षया च बंधमोक्षादिफलार्था नियता पुरुषं प्रति प्रवृत्तिर्नोपपद्यते। यथोक्तसर्वज्ञेश्वरकर्तृत्वपक्षे तु उपपन्ना॥

स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनः। अन्नमन्नाद्वीर्यं तपो मंत्राः कर्म लोका लोकेषु च नाम च ॥४॥

ईश्वरेणैव सर्वाधिकारी प्राणः पुरुषेण सृज्यते। कथं, स पुरुष उक्तप्रकारेणेक्षित्वा प्राणं हिरण्यगर्भाख्यं सर्वप्राणिकरणाधारं अंतरात्मानमसृजत सृष्टवान्। ततः प्राणाच्छ्रद्धा सर्वप्राणिनां शुभकर्मप्रवृत्तिहेतुभूताम्। ततः कर्मफलोपभोगसाधनाधिष्ठानानि कारणभूतानि महाभूतान्यसृजत। खं शब्दगुणम्। वायुः स्वेन स्पर्शगुणेन शब्दगुणेन च विशिष्टः द्विगुणः। तथा ज्योतिः स्वेन रूपेण पूर्वाभ्यां च विशिष्टं त्रिगुणं शब्दस्पर्शाभ्याम्। तथा आपो रसेन गुणेनासाधारणेन पूर्वगुणानुप्रवेशेन च चतुर्गुणाः। तथा गंधगुणेन पूर्वगुणानुप्रवेशेन च पंचगुणा पृथिवी। तथा तैरेव भूतैरारब्धमिंद्रियं द्विप्रकारं बुद्ध्यर्थं कर्मार्थं च दशसंख्यम्। तस्य चेश्वरमंतःस्थं संशयविकल्पादिलक्षणं मनः। एवं प्राणिनां कार्यं कारणं च सृष्ट्वा तत्स्थित्यर्थं व्रीहियवादिलक्षणमन्नं, ततश्चान्नादयमानाद्वीर्यं सामर्थ्यं बलं सर्वकर्मप्रवृत्तिसाधनं तद्वीर्यवतां च प्राणिनां तपो विशुद्धिसाधनं संकीर्यमाणानाम्। मंत्रास्तपोविशुद्धान्तर्बहिःकरणेभ्यः कर्मसाधनभूता ऋग्यजुःसामाथर्वांगिरस। ततः कर्माग्निहोत्रादिलक्षणम्। ततो लोकाः कर्मणां फलम्। तेषु च लोकेषु सृष्टानां प्राणिनां नाम च देवदत्तो यज्ञदत्त इत्यादि। एवमेताः कलाः प्राणिनामविद्यादिदोषबीजापेक्षया सृष्टास्तैमिरिकदृष्टिसृष्टा इव द्विचंद्रमशकमक्षिकाद्याः स्वप्नदृक्सृष्टा इव च सर्वपदार्थाः पुनस्तस्मिन्नेव पुरुषे प्रलीयन्ते हित्वा नामरूपादिविभागम्॥

स यथेमा नद्य स्यंदमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति भिद्येते तासां नामरूपे समुद्र इत्येवं प्रोच्यते। एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति भिद्येते चासां नामरूपे पुरुष इत्येवं प्रोच्यते स एषोऽकलोऽमृतो भवति तदेष श्लोकः ॥५॥

कथं ? स दृष्टान्तः। यथा लोके इमा नद्यः स्यंदमानाः स्रवन्त्यः समुद्रायणाः, समुद्रोऽयनं गतिरात्मभावो यासां ताः समुद्रायणाः, समुद्रं प्राप्योपगम्यास्तं अदर्शनं नामरूपतिरस्कारं गच्छन्ति। तासां चास्तं गतानां भिद्येते विनश्येते नामरूपे गंगायमुनेत्यादिलक्षणे। तदभेदेन समुद्र इत्येवं प्रोच्यते तद्वस्तूदकलक्षणं, एवं यथायं दृष्टान्तः, उक्तलक्षणस्य प्रकृतस्यास्य पुरुषस्य परिद्रष्टुः पारं समन्तात् द्रष्टुर्दर्शनस्य कर्तुः स्वरूपभूतस्य। यथार्कः स्वात्मप्रकाशस्य कर्ता सर्वतस्तद्वदिमाः षोडश प्राणाद्या उक्ताः कलाः पुरुषायणाः, नदीनामिव समुद्रः पुरुषोऽयनमात्मभावगमनं यासां कलानां ताः पुरुषायणाः, पुरुषं प्राप्य पुरुषात्मभावमुपगम्य तथैवास्तं गच्छन्ति। भिद्येते चासां नामरूपे कलानां प्राणाद्याख्या रूपं च यथास्वम्। भेदे च नामरूपयोर्यदनष्टं तत्त्वं तत् पुरुष इत्येवं प्रोच्यते ब्रह्मविद्भिः। य एवं विद्वान्गुरुणा प्रदर्शितकलाप्रलयमार्गः स एष विद्यया प्रविलापितासु अविद्याकामकर्मजनितासु प्राणादिकलास्वकलो अविद्याकृतकलानिमित्तो हि मृत्युः, तदपगमेऽकलत्वादेवामृतो भवति। तदेतस्मिन्नर्थे एष श्लोकः ॥

अरा इव रथनाभौ कला यस्मिन्प्रतिष्ठिताः। तं वेद्यं पुरुषं वेद यथा मा वो मृत्युः परिव्यथा इति ॥६॥

अरा इव रथचक्रपरिवारा इव रथनाभौ रथचक्रस्य नाभौ यथाप्रवेशिताः तदाश्रया भवन्ति यथा तथेत्यर्थः। कलाः प्राणाद्या यस्मिन्पुरुषे प्रतिष्ठिता उत्पत्तिस्थितिलयकालेषु, तं पुरुषं कलानामात्मभूतं वेद्यं वेदनीयं पूर्णत्वात्पुरुषं पुरि शयनाद्वा वेद जानाति। यथा हे शिष्या मा वो युष्मान्मृत्युः परिव्यथा मा परिव्यथयतु। न चेद्विज्ञायेत पुरुषो मृत्युनिमित्ता व्यथामापन्ना दुःखिन एव यूयं स्थ। अतस्तन्मा भूत् युष्माकमित्यभिप्रायः ॥

तान्होवाचैतावदेवाहमेतत्परं ब्रह्म वेद। नातः परमस्तीति ॥७॥

तानेवमनुशिष्य शिष्यास्तान्होवाच पिप्पलादः किल– एतावदेव वेद्यं परं ब्रह्म वेद विजानाम्यहमेतत्। नातोऽस्मात्परमस्ति प्रकृष्टतरं वेदितव्यम्। इत्येव-

मुक्तवान शिष्याणां अविदितशेषास्तित्वाशंकानिवृत्तये कृतार्थबुद्धिजननार्थं च ॥

ते तमर्चयन्तस्त्वं हि न पिता योऽस्माकमविद्यायाः परं पारं तारयसीति । नमः परमऋषिभ्यो नमः परमऋषिभ्य ॥८॥ इति षष्ठः प्रश्नः ॥

ततस्ते शिष्या गुरुणानुशिष्टास्तं गुरुं कृतार्था सन्तो विद्यानिष्क्रयमपश्यन्तः किं कृतवन्त इत्युच्यते— अर्चयन्तः पूजयन्तः पादयोः पुष्पांजलिप्रकिरणेन प्रणिपातेन च शिरसा । किं ऊचुरित्याह— त्वं हि नोऽस्माकं पिता ब्रह्मशरीरस्य विद्यया जनयितृत्वान्नित्यस्याजरामरणस्याभयस्य । यस्त्वमेवास्माकमविद्यायाः विपरीतज्ञानात् जन्मजरामरणरोगदुःखादिग्राहादपारादविद्यामहोदधेर्विद्याप्लवेन परं अपुनरावृत्तिलक्षणं मोक्षाख्यं महोदधेरिव पारं तारयस्यस्मान्नित्यतः पितृत्वं तवास्मान्प्रत्युपपन्नमितरस्मात् । इतरोऽपि हि पिता शरीरमात्रं जनयति तथापि स पूज्यतमो लोके । किमु वक्तव्यमात्यंतिकाभयदातुरित्यभिप्रायः । नमः परमऋषिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यः । नमः परमऋषिभ्य इति द्विर्वचनमादरार्थम् ॥ इति षष्ठः प्रश्नः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीशंकरभगवतः कृतौ प्रश्नोपनिषद्भाष्यं समाप्तम् ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरंगैस्तुष्टुवांसस्तनूभिः । व्यशेम देवहितं यदायुः ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

॥ इति अथर्ववेदीया प्रश्नोपनिषत्समाप्ता ॥

॥ ॐ ॥

श्रीमच्छंकराचार्यविरचितभाष्ययुता

गौडपादीयकारिकासहिता

मांडूक्योपनिषत् ।

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरंगैस्तुष्टुवाꣳसस्तनूभिर्व्यशेम देवहितं यदायुः ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

प्रज्ञानाशुप्रतानैः स्थिरचरनिकरव्यापिभिर्व्याप्य लोकान्
भुक्त्वा भोगान्स्थविष्ठान्पुनरपि धिषणोद्भासितान्कामजन्यान् ॥
पीत्वा सर्वान्विशेषान्स्वपिति मधुरभुङ्मायया भोजयन्नो
मायासंख्यातुरीयं परममृतमजं ब्रह्म यत्तन्नतोऽस्मि ॥१॥
यो विश्वात्मा विधिजविषयान्प्राश्य भोगान्स्थविष्ठान्
पथ्याच्चान्यान्स्वमतिविभवाज्ज्योतिषा स्वेन सृक्ष्मान ॥
सर्वानेतान्पुनरपि शनैः स्वात्मनि स्थापयित्वा
हित्वा सर्वान्विशेषान्विगतगुणगणः पात्वसौ नस्तुरीयः ॥२॥

ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानम् । वेदान्तार्थसारसग्रहभूतमिद प्रकरणचतुष्टयमोमित्येतदक्षरमित्याद्यारभ्यते । अत एव न पृथक्संबधाभिधेय-प्रयोजनानि वक्तव्यानि । यान्येव तु वेदान्ते संबधाभिधेयप्रयोजनानि तान्येवेह भवितुमर्हन्ति । तथापि प्रकरणव्याचिख्यासुना सक्षेपतो वक्तव्यानि ॥

तत्र प्रयोजनवत्साधनाभिव्यंजकत्वेनाभिधेयसंबद्धं शास्त्रं पारंपर्येण विशिष्ट-संबंधाभिधेयप्रयोजनवद्भवति । किं पुनस्तत्प्रयोजनमित्युच्यते— रोगार्तस्येव रोग-निवृत्तौ स्वस्थता । तथा दुःखात्मकस्यात्मनो द्वैतप्रपंचोपशमे स्वस्थता । अद्वैतभावः प्रयोजनम् । द्वैतप्रपंचस्याविद्याकृतत्वाद्विद्यया तदुपशमः स्यादिति ब्रह्मविद्या-प्रकाशनाय अस्यारंभः क्रियते । 'यत्र हि द्वैतमिव भवति' 'यत्र वा अन्यदिव

स्यात्तत्रान्योऽन्यत्पश्येदन्योऽन्यद्विजानीयात्' 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्केन कं विजानीयात्' इत्यादिश्रुतिभ्योऽस्यार्थस्य सिद्धिः । तत्र तावदोंकारनिर्णयाय प्रथमं प्रकरणमागमप्रधानं आत्मतत्त्वप्रतिपत्त्युपायभूतम् । यस्य द्वैतप्रपंचस्योपशमेऽद्वैतप्रतिपत्ती रज्ज्वामिव सर्पादिविकल्पोपशमे रज्जुतत्त्वप्रतिपत्तिः, तस्य द्वैतस्य हेतुतो वैतथ्यप्रतिपादनाय द्वितीयं प्रकरणम् । तथा अद्वैतस्यापि वैतथ्यप्रसंगप्राप्तौ युक्तितस्तथात्वदर्शनाय तृतीयं प्रकरणम् । अद्वैतस्य तथात्वप्रतिपत्तिप्रतिपक्षभूतानि यानि वादान्तराण्यवैदिकानि सन्ति, तेषामन्योन्यविरोधित्वादतथार्थत्वेन तदुपपत्तिभिरेव निराकरणाय चतुर्थं प्रकरणम् ॥

आगमप्रकरणम् ॥१॥

कथं पुनरोंकारनिर्णय आत्मतत्त्वप्रतिपत्त्युपायत्वं प्रतिपद्यत इति । उच्यते—'ओमित्येतत्' 'एतदालंबनम्' 'एतद्वै सत्यकाम' 'ओमित्यात्मानं युंजीत' 'ओमिति ब्रह्म' 'ओंकार एवेदं सर्वम्' इत्यादिश्रुतिभ्यः । रज्ज्वादिरिव सर्पादिविकल्पस्यास्पदं अद्वय आत्मा परमार्थः सन्प्राणादिविकल्पस्यास्पदं यथा, तथा सर्वोऽपि वाक्प्रपंचः प्राणाद्यात्मविकल्पविषय ओंकार एव । स चात्मस्वरूपमेव । तदभिधायकत्वात् । ओंकारविकारशब्दाभिधेयश्च सर्वः प्राणादिरात्मविकल्पोऽभिधानव्यतिरेकेण नास्ति । 'वाचारंभणं विकारो नामधेयं' ''तदस्येदं वाचा तंत्या नामभिर्दामभिः सर्वं सितम्'' ''सर्वं ह्येदं नामनि'' इत्यादिश्रुतिभ्यः । अत आह—

हरिः ॐ । ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोंकार एव । यच्चान्यत्त्रिकालातीतं तदप्योंकार एव ॥१॥

ओमित्येतदक्षरमिदं सर्वमिति । यदिदमर्थजातमभिधेयभूतं तस्याभिधानाव्यतिरेकात् । अभिधानस्य चोकाराव्यतिरेकादोंकार एवेदं सर्वम् । परं च ब्रह्माभिधानाभिधेयोपायपूर्वकमवगम्यत इत्योंकार एव । तस्यैतस्य परापरब्रह्मरूपस्य अक्षरस्य ओमित्येतस्योपव्याख्यानम् । ब्रह्मप्रतिपत्त्युपायत्वाद्ब्रह्मसमीपतया विस्पष्टं प्रकथनमुपव्याख्यानं, प्रस्तुतं वेदितव्यमिति वाक्यशेषः । भूतं भवद्भविष्यदिति कालत्रयपरिच्छेद्यं यत्तदप्योंकार एवोक्तन्यायतः । यच्चान्यत्त्रिकालातीतं कार्याधिगम्यं कालापरिच्छेद्यमव्याकृतादि तदप्योंकार एव ॥

अभिधानाभिधेययोरेकत्वेऽप्यभिधानप्राधान्येन निर्देशः कृतः ओमित्येतदक्षरमिदं सर्वमित्यादि । अभिधानप्राधान्येन निर्दिष्टस्य पुनरभिधेयप्राधान्येन निर्देशो अभिधानाभिधेययोरेकत्वप्रतिपत्त्यर्थ. । इतरथा ह्यभिधानतंत्राभिधेयप्रतिपत्तिरिति अभिधेयस्याभिधानत्वं गौणमित्याशंका स्यात । एकत्वप्रतिपत्तेश्च प्रयोजनमभिधानाभिधेययोः एकेनैव प्रयत्नेन युगपत्प्रविलापयंस्तद्विलक्षणं ब्रह्म प्रतिपद्येतेति । तथा च वक्ष्यति 'पादा मात्रा मात्राश्च पादा' इति । तदाह—

सर्वं ह्येतद्ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात् ॥२॥

सर्वं ह्येतद्ब्रह्मेति । सर्वं यदुक्तमोंकारमात्रमिति तदेतद्ब्रह्म । तच्च ब्रह्म परोक्षाभिहितं प्रत्यक्षतो विशेषेण निर्दिशति— अयमात्मा ब्रह्मेति । अयमिति चतुष्पात्त्वेन प्रविभज्यमानं प्रत्यगात्मतयाऽभिनयेन निर्दिशति अयमात्मेति । सोऽयमात्मा ओंकाराभिधेय परापरत्वेन व्यवस्थितश्चतुष्पात्कार्षापणवन्न गौरिव । त्रयाणां विश्वादीना पूर्वपूर्वप्रविलापनेन तुर्यायस्य प्रतिपत्तिरिति करणसाधन. पादशब्द । तुर्यायस्य तु पद्यत इति कर्मसाधन पादशब्दः ॥

कथं चतुष्पात्त्वमित्याह–

जागरितस्थानो बहिःप्रज्ञः सप्तांग एकोनविंशतिमुख स्थूलभुग्वैश्वानरः प्रथमः पादः ॥३॥

जागरितं स्थानमस्येति जागरितस्थानः । बहिःप्रज्ञ. स्वात्मव्यतिरिक्ते विषये प्रज्ञा यस्य स बहि.प्रज्ञो बहिर्विषयेव प्रज्ञा यस्य अविद्याकृतावभासत इत्यर्थः । तथा सप्तांगान्यस्य 'तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूप' प्राण. पृथग्वर्त्मात्मा संदेहो बहुलो बस्तिरेव रयि पृथिव्येव पादौ इत्यग्निहोत्रकल्पनाशेषत्वेन आहवनीयोऽग्निरस्य मुखत्वेनोक्त इत्येवं सप्तांगानि यस्य स सप्तागः । तथैकोनविंशतिर्मुखान्यस्य । बुद्धीद्रियाणि कर्मेंद्रियाणि च दश, वायवश्च प्राणादयः पंच, मनो बुद्धिरहंकारश्चित्तमिति, मुखानीव मुखानि तान्युपलब्धिद्वाराणीत्यर्थः । स एवंविशिष्टो वैश्वानरो यथोक्तैर्द्वारैः शब्दादीन्स्थूलान्विषयान्भुंक्त इति स्थूलभुक् । विशेषा नराणामनेकधा नयनात् वैश्वानरः । यद्वा विश्वश्चासौ नरश्चेति विश्वानरो, विश्वानर एव वैश्वानरः । सर्वपिंडात्मा अनन्यत्वात् । स प्रथमः पादः । एतत्पूर्वकत्वादुत्तरपादाधिगमस्य प्राथम्यमस्य । कथं 'अयमात्मा ब्रह्म' इति प्रत्यगात्मनोऽस्य चतुष्पात्त्वे प्रकृते

द्युलोकादीनां मूर्धाद्यंगत्वमिति ? नैष दोषः । सर्वस्य प्रपंचस्य साधिदैविकस्य अनेनात्मना चतुष्पात्त्वस्य विवक्षितत्वात् । एवं च सति सर्वप्रपंचोपशमेऽद्वैतसिद्धि । सर्वभूतस्थश्चात्मैको दृष्ट. स्यात् । सर्वभूतानि चात्मनि । 'यस्तु सर्वाणि भूतानि' इत्यादिश्रुत्यर्थ उपसंहृतश्चैवं स्यात् । अन्यथा हि स्वदेहपरिच्छिन्न एव प्रत्यगात्मा सांख्यादिभिरिव दृष्ट. स्यात । तथा च सत्यद्वैतमिति श्रुतिकृतो विशेषो न स्यात । सांख्यादिदर्शनेनाविशेषात् । इष्यते च सर्वोपनिषदा सर्वात्मैक्यप्रतिपादकत्वम् । अतो युक्तमेवास्य आध्यात्मिकस्य पिंडात्मनो द्युलोकाद्यंगत्वेन विराडात्मनाधिदैविकेनैकत्वमभिप्रेत्य सप्तागत्ववचनम् । 'मूर्धा ते व्यपतिष्यत्' इत्यादिलिंगदर्शनाच्च । विराजैकत्वमुपलक्षणार्थं हिरण्यगर्भाव्याकृतात्मनो । उक्तं चैतन्मधुब्राह्मणे— 'यश्चायमस्या पृथिव्या तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मम्' इत्यादि । सुषुप्ताव्याकृतयोस्त्वेकत्वं सिद्धमेव । निर्विशेषत्वात । एवं च सत्येतत्सिद्धं भविष्यति— सर्वद्वैतोपशमे चाद्वैतमिति ॥

स्वप्नस्थानोऽन्तःप्रज्ञः सप्तांग एकोनविंशतिमुखः प्रविविक्तभुक्तैजसो द्वितीयः पादः ॥४॥

स्वप्न. स्थानमस्य तैजसस्येति स्वप्नस्थानः । जाग्रत्प्रज्ञा अनेकसाधना बहिर्विषयेवावभासमाना मन स्पंदनमात्रा सती तथाभूतं संस्कारं मनस्याधत्ते । तन्मनः तथा संस्कृतं चित्रित इव पटो बाह्यसाधनानपेक्षं अविद्याकामकर्मभिः प्रेर्यमाणं जाग्रद्वदवभासते । तथा चोक्तं– 'अस्य लोकस्य सर्वावतो मात्रामपादाय' इति । तथा 'परे देवे मनस्येकी भवति' इति प्रस्तुत्य 'अत्रैष देव स्वप्ने महिमानमनुभवति' इत्याथर्वणे । इंद्रियोपक्षयाऽन्तस्थत्वान्मनस तद्वासनारूपा च स्वप्ने प्रज्ञा यस्य इत्यंतःप्रज्ञः । विषयशून्यायां प्रज्ञायां केवलप्रकाशस्वरूपायां विषयित्वेन भवतीति तैजसः । विश्वस्य सविषयत्वेन प्रज्ञाया. स्थूलाया भोज्यत्वम् । इह पुनः केवला वासनामात्रा प्रज्ञा भोज्येति प्रविविक्तो भोग इति । समानमन्यत् । द्वितीयः पादस्तैजसः ॥

यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति तत्सुषुप्तम् । सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानंदमयो ह्यानंदभुक्चेतोमुखः प्राज्ञस्तृतीयः पादः ॥५॥

दर्शनादर्शनवृत्त्योः तत्त्वाप्रबोधलक्षणस्य स्वापस्य तुल्यत्वात्सुषुप्तिग्रहणार्थं यत्र

सुप्त इत्यादि विशेषणम्। अथवा, त्रिष्वपि स्थानेषु तत्त्वाप्रतिबोधलक्षणः स्वापोऽविशिष्ट इति पूर्वाभ्यां सुषुप्तं विभजते। यत्र यस्मिन्स्थाने काले वा सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति। न हि सुषुप्ते पूर्वयोरिव अन्यथाग्रहणलक्षणं स्वप्नदर्शनं कामो वा कश्चन विद्यते। तदेतत्सुषुप्तं स्थानमस्येति सुषुप्तस्थानः। स्थानद्वयप्रविभक्तं मनःस्पंदितं द्वैतजातम्। तथा रूपापरित्यागेनाविवेकापन्नं नैशतमोग्रस्तमिवाहः सप्रपंचकमेकीभूतमित्युच्यते। अत एव स्वप्नजाग्रन्मनःस्पंदनानि प्रज्ञानानि घनीभूतानीव। सेयमवस्थाऽविवेकरूपत्वात्प्रज्ञानघन उच्यते। यथा रात्रौ नैशेन तमसाऽविभज्यमानं सर्वं घनमिव, तद्वत्प्रज्ञानघन एव। एवशब्दान्न जाड्यांतरं प्रज्ञानव्यतिरेकेणास्तीत्यर्थः। मनसो विषयविषय्याकारस्पंदनायासदुःखाभावात् आनंदमय आनंदप्रायो नानंद एव। अनात्यंतिकत्वात्। यथा लोके निरायासस्थितः सुख्यानंदभुगुच्यते। अत्यंतानायासरूपा ह्ययं स्थितिरनेनात्मनानुभूयत इत्यानंदभुक्। 'एषोऽस्य परम आनंदः' इति श्रुतेः। स्वप्नादिप्रतिबोधं चेतः प्रति द्वारीभूतत्वाच्चेतोमुखः। बोधलक्षणं वा चेतः द्वारं मुखमस्य स्वप्नाद्यागमनं प्रतीति चेतोमुखः। भूतभविष्यज्ज्ञातृत्वं सर्वविषयज्ञातृत्वमस्यैवेति प्राज्ञः। सुषुप्तोऽपि हि भूतपूर्वगत्या प्राज्ञ उच्यते। अथवा प्रज्ञप्तिमात्रमस्यैवासाधारणं रूपमिति प्राज्ञः। इतरयोर्विशिष्टमपि विज्ञानमस्ति इति सोऽयं प्राज्ञस्तृतीयः पादः॥

एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् ॥६॥

एष हि स्वरूपावस्थः सर्वेश्वरः साधिदैविकस्य भेदजातस्य सर्वस्येश्वर ईशिता, नैतस्माज्जाड्यांतरभूतोऽन्येषामिव। 'प्राणबंधनं हि सोम्य मनः' इति श्रुतेः। अयमेव हि सर्वस्य सर्वभेदावस्थो ज्ञातृत्वेष सर्वज्ञः, एषोऽन्तर्यामी अंतरनुप्रविश्य सर्वेषा भूताना यमयिता नियंताऽप्येष एव। अत एव यथोक्तं सभेदं जगत्प्रसूयत इत्येष योनिः सर्वस्य। यत एवं, प्रभवश्चाप्ययश्च प्रभवाप्ययौ हि भूतानामेष एव॥

अत्रैते श्लोका भवन्ति—

अथ गौडपादीयकारिकाः ।

बहिःप्रज्ञो विभुर्विश्वो ह्यंतःप्रज्ञस्तु तैजसः ।
घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृत. ॥१॥

अत्र एतस्मिन्यथोक्तेऽर्थे एते श्लोका भवन्ति । बहिःप्रज्ञ इति । पर्यायेण त्रिस्थानत्वात्सोऽहमिति स्मृत्या प्रतिसंधानाच्च स्थानत्रयव्यतिरिक्तत्वमेकत्वं शुद्धत्वमसंगत्वं च सिद्धमित्यभिप्राय. । महामत्स्यादिदृष्टान्तश्रुतेः ॥

दक्षिणाक्षिमुखे विश्वो मनस्यंतस्तु तैजसः ।
आकाशे च हृदि प्राज्ञस्त्रिधा देहे व्यवस्थित· ॥२॥

जागरितावस्थायामेव विश्वादीना त्रयाणामनुभवप्रदर्शनार्थोऽयं श्लोक.–दक्षिणाक्षीति । दक्षिणमक्ष्येव मुख, तस्मिन्प्राधान्येन द्रष्टा स्थूलाना विश्वोऽनुभूयते । 'इंधो ह वै नामैष योऽयं दक्षिणेऽक्षन्पुरुषः' इति श्रुते. । इंधो दीप्तिगुणो वैश्वानर आदित्यान्तर्गतो वैराज आत्मा चक्षुषि च द्रष्टेक. । नन्वन्यो हिरण्यगर्भ. क्षेत्रज्ञो दक्षिणेऽक्षण्यक्ष्णोर्नियंता द्रष्टा चान्यो देहस्वामी । न । स्वतो भेदानभ्युपगमात् । "एको देवः सर्वभूतेषु गूढः" इति श्रुतेः । "क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत" । 'अविभक्तं च भूतेषु विभक्तमिव च स्थितम्' इति स्मृतेश्च । सर्वेषु करणेष्वविशेषेऽपि दक्षिणाक्षण्युपलब्धिपाटवदर्शनान्तत्र विशेषेण निर्देशो विश्वस्य । दक्षिणाक्षिगतो रूपं दृष्ट्वा निमीलिताक्षस्तदेव स्मरन्मनस्यंतः स्वप्न इव तदेव वासनारूपाभिव्यक्तं पश्यति । यथाऽत्र तथा स्वप्ने । अतो मनस्यंतस्तु तैजसोऽपि विश्व एव । आकाशे च हृदि स्मरणाख्यव्यापारोपरमे प्राज्ञ एकीभूतो घनप्रज्ञ एव भवति । मनोव्यापाराभावात् । दर्शनस्मरणे एव हि मनःस्पंदितं तदभावे ह्येवाविशेषेण प्राणात्मनावस्थानम् । 'प्राणो ह्येवैतान्सर्वान्संवृंक्ते' इति श्रुते. । तैजसो हिरण्यगर्भो मनःस्थत्वात् । 'लिंगं मन.' 'मनोमयोऽयं पुरुष·' इत्यादिश्रुतिभ्यः । ननु व्याकृतः प्राणः सुषुप्ते, तदात्मकानि करणानि भवन्ति, कथमव्याकृतता ? नैष दोषः । अव्याकृतस्य देशकालविशेषाभावात् । यद्यपि प्राणाभिमाने सति व्याकृततैव प्राणस्य, तथापि पिंडपरिच्छिन्नविशेषाभिमाननिरोधः प्राणे भवतीत्यव्याकृत एव प्राणः सुषुप्ते परिच्छिन्नाभिमानवताम् । यथा प्राणलये परिच्छिन्नाभिमानिनां प्राणोऽव्याकृतः, तथा प्राणाभिमानिनोऽप्यविशेषा-

पत्तावव्याकृतता समाना प्रसवबीजात्मकत्वं च । तदध्यक्षश्चैकोऽव्याकृतावस्थः । परिच्छिन्नाभिमानिनामध्यक्षाणां च तेनैकत्वमिति पूर्वोक्तं विशेषणमेकीभूतः प्रज्ञानघन इत्याद्युपपन्नम् । तस्मिन्नेतस्मिन्नुक्तहेतुसत्त्वाच्च । कथं प्राणशब्दत्वमव्याकृतस्य ? 'प्राणबंधनं हि सोम्य मनः' इति श्रुतेः । ननु तत्र 'सदेव सोम्य' इति प्रकृतं सद्ब्रह्म प्राणशब्दवाच्यम् । नैष दोषः । बीजात्मकत्वाभ्युपगमात्सतः । यद्यपि सद्ब्रह्म प्राणशब्दवाच्यं तत्र तथापि जीवप्रसवबीजात्मकत्वमपरित्यज्यैव प्राणशब्दत्वं सतः सच्छब्दवाच्यता च । यदि हि निर्बीजरूपं विवक्षितं ब्रह्म अभविष्यत 'नेति नेति' 'यतो वाचो निवर्तन्ते' 'अन्यदेव तद्विदितादथो अविदितात्' इत्यवक्ष्यत् । "न सत्तन्नासदुच्यते" इति स्मृतेः । निर्बीजतयैव चेत्सति प्रलीनाना संपन्नाना सुषुप्तिप्रलययोः पुनरुत्थानानुपपत्ति स्यात् । मुक्ताना च पुनरुत्पत्तिप्रसंगः । बीजाभावाविशेषात् । ज्ञानदाह्यबीजाभावे च ज्ञानानर्थक्यप्रसंगः । तस्मात्सर्वबीजत्वाभ्युपगमेनैव सतः प्राणत्वव्यपदेशः, सर्वश्रुतिषु च कारणत्वव्यपदेशः । अत एव 'अक्षरात्परतः परः' 'सवाह्याभ्यंतरो ह्यज' 'यतो वाचो निवर्तन्ते' 'नेति नेति' इत्यादिना बीजत्वापनयनेन व्यपदेशः । तामबीजावस्था तस्यैव प्राज्ञशब्दवाच्यस्य तुर्यायत्वेन देहादिसंबंधरहितां पारमार्थिकीं पृथग्वक्ष्यति । बीजावस्थापि न किंचिदवेदिषमित्युत्थितस्य प्रत्ययदर्शनाद्धेहेऽनुभूयत एवेति त्रिधा देहे व्यवस्थित इत्युच्यते ॥

विश्वो हि स्थूलभुङ्नित्यं तैजसः प्राविविक्तभुक् ।
आनंदभुक्तथा प्राज्ञस्त्रिधा भोगं निबोधत ॥३॥
स्थूलं तर्पयते विश्वं प्राविविक्तं तु तैजसम् ।
आनंदश्च तथा प्राज्ञं त्रिधा तृप्तिं निबोधत ॥४॥

उक्तार्थौ श्लोकौ ॥

त्रिषु धामसु यद्भोज्यं भोक्ता यश्च प्रकीर्तितः ।
वेदैतदुभयं यस्तु स भुंजानो न लिप्यते ॥५॥

त्रिषु धामसु जाग्रदादिषु स्थूलप्राविविक्तानंदाख्यं भोज्यमेकं त्रिधाभूतम् । यश्च विश्वतैजसप्राज्ञाख्यो भोक्तैकः सोऽहमित्येकत्वेन प्रतिसंधानात् द्रष्टृत्वाविशेषाच्च प्रकीर्तितः । यो वेदैतदुभयं भोज्यभोक्तृतयाऽनेकधा भिन्नं स भुंजानो न लिप्यते । भोज्यस्य सर्वस्यैकस्य भोक्तुर्भोज्यत्वात् । न हि यस्य यो विषयः स

तेन हीयते वर्धते वा । न ह्यग्नि. स्वविषयं दग्ध्वा काष्ठादि तद्वत् ॥

प्रभवः सर्वभावानां सतामिति विनिश्चय· ।
सर्वं जनयति प्राणश्चेतोशून्पुरुष पृथक् ॥६॥

सता विद्यमानाना स्वेन अविद्याकृतनामरूपमायास्वरूपेण सर्वभावानां विश्व-तैजसप्राज्ञभेदाना प्रभव उत्पत्ति । वक्ष्यति च— 'वंध्यापुत्रो न तत्त्वेन मायया वापि जायते" इति । यदि ह्यसतोभव जन्म स्याद्ब्रह्मणोऽव्यवहार्यस्य ग्रहणद्वारा-भावादसत्त्वप्रसंगः । दृष्टं च रज्जुसर्पादीना अविद्याकृतमायाबीजोत्पन्नाना रज्ज्वा-द्यात्मना सत्त्वम् । न हि निरास्पदा रज्जुसर्पमृगतृष्णिकादय क्वचिदुपलभ्यन्ते केनचित् । यथा रज्ज्वा प्राक्सर्पोत्पत्ते रज्ज्वात्मना सर्पः सन्नेवासीत्, एवं सर्व-भावानामुत्पत्ते प्राक्प्राणबीजात्मनैव सत्त्वम् । इत्यत श्रुतिरपि वक्ति— 'ब्रह्म-वेदम्' 'आत्मैवेदमग्र आसीत्' इति । अत सर्व जनयति प्राणश्चेतोशूनंशव इव रवेश्चिदात्मकस्य पुरुषस्य चेतोरूपा जलार्कसमाः प्राज्ञतैजसविश्वभेदेन देवमनुष्य-तिर्यगादिदेहभेदेषु विभाव्यमानाश्चेतोशवो ये तान्पुरुष. पृथक्सृजति विषयभाव-विलक्षणानग्निविस्फुलिंगवत्सलक्षणाञ्जलार्कवच्च जीवलक्षणास्त्वतरान्सर्वभावा-न्प्राणो बीजात्मा जनयति, 'यथोर्णनाभि.' 'यथाऽग्नेर्विस्फुलिंगा.' इत्यादिश्रुतेः ॥

विभूतिं प्रसवं त्वन्ये मन्यन्ते सृष्टिचिंतकाः ।
स्वप्नमायासरूपेति सृष्टिरन्यैर्विकल्पिता ॥७॥

विभूतिर्विस्तार ईश्वरस्य सृष्टिरिति सृष्टिचिंतका मन्यन्ते न तु परमार्थचित-कानां सृष्टावादर इत्यर्थः । 'इंद्रो मायाभिः पुरुरूप ईयते' इति श्रुते· । न हि मायाविनं सूत्रमाकाशे निक्षिप्य तेन सायुधमारुह्य चक्षुर्गोचरतामतीत्य युद्धेन खंडशश्छिन्नं पतितं पुनरुत्थितं च पश्यता तत्कृतमायादिसतत्त्वचिंतायामादरो भवति । तथैवायं मायाविनः सूत्रप्रसारणसमः सुषुप्तस्वप्नादिविकास·, तदारूढ-मायाविसमश्च तत्स्थ. प्राज्ञतैजसादि·, सूत्रतदारूढाभ्यामन्य· परमार्थमायावी । स एव भूमिष्ठा मायाच्छन्नोऽदृश्यमान एव स्थितो यथा तथा तुर्याख्यं परमार्थ-तत्त्वम् । अतस्तच्चिंतायामेवादरो मुमुक्षूणामार्याणां, न निष्प्रयोजनायां सृष्टौ आदर इत्यतः सृष्टिचिंतकानामेवैते विकल्पा इत्याह— स्वप्नमायासरूपेति । स्वप्नसरूपा मायासरूपा चेति ॥

इच्छामात्रं प्रभोः सृष्टिरिति सृष्टौ विनिश्चिताः ।
कालात्प्रसूतिं भूतानां मन्यन्ते कालचिंतकाः ॥८॥

इच्छामात्रं प्रभोः सत्यसंकल्पत्वात्सृष्टिर्घटादिः संकल्पनामात्रं न संकल्पनातिरिक्तम् । कालादेव सृष्टिरिति कैश्चित् ॥

भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे ।
देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा ॥९॥ इति ।

भोगार्थं क्रीडार्थमिति चान्ये सृष्टिं मन्यन्ते । अनयोः पक्षयोर्दूषणं देवस्यैष स्वभावोऽयमिति । देवस्य स्वभावपक्षमाश्रित्य सर्वेषां वा पक्षाणामाप्तकामस्य का स्पृहेति । न हि रज्ज्वादीनामविद्यास्वभावव्यतिरेकेण सर्पाद्याभासत्वे कारणं शक्यं वक्तुम् ॥

उपनिषत् ।

नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम् । अदृश्यमव्यवहार्यमग्राह्यमलक्षणमचिंत्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपंचोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ॥७॥

चतुर्थः पादः क्रमप्राप्तो वक्तव्य इत्याह— नान्तःप्रज्ञमित्यादिना । सर्वशब्दप्रवृत्तिनिमित्तशून्यत्वात्तस्य शब्दानभिधेयत्वमिति विशेषप्रतिषेधेनैव तुरीयं निर्दिदिक्षति । शून्यमेव तर्हि तत् । न । मिथ्याविकल्पस्य निर्निमित्तत्वानुपपत्तेः । नहि रजतसर्पपुरुषमृगतृष्णिकादिविकल्पाः शुक्तिकारज्जुस्थाणूषरादिव्यतिरेकेणावस्त्वास्पदाः शक्याः कल्पयितुम् । एवं तर्हि प्राणादिसर्वविकल्पास्पदत्वात्तुरीयस्य शब्दवाच्यत्वमिति न प्रतिषेधैः प्रत्याय्यत्वमुदकाधारादेरिव घटादेः । न प्राणादिविकल्पस्यासत्त्वाच्छुक्तिकादिष्विव रजतादेः । न हि सदसतोः संबंधः शब्दप्रवृत्तिनिमित्तभाक् अवस्तुत्वात् । नापि प्रमाणान्तरविषयत्वं स्वरूपेण गवादिवत् । आत्मनो निरुपाधिकत्वात् गवादिवन्नापि जातिमत्त्वं अद्वितीयत्वेन सामान्यविशेषाभावात् । नापि क्रियावत्त्वं पाचकादिवदविक्रियत्वात् । नापि गुणवत्त्वं नीलादिवन्निर्गुणत्वात् । अतो नाभिधानेन निर्देशमर्हति । शशविषाणादिसमत्वान्निरर्थकत्वं तर्हि । न । आत्मत्वावगमे तुरीयस्यानात्मतृष्णाव्यावृत्तिहेतुत्वाच्छुक्तिकावगम इव रजततृष्णायाः । नहि तुरीयस्यात्मत्वावगमे सत्यविद्या-

तृष्णादिदोषाणां संभवोऽस्ति । न च तुरीयस्यात्मत्वानवगमे कारणमस्ति । सर्वोपनिषदां तादर्थ्येनोपक्षयात् । 'तत्त्वमसि' 'अयमात्मा ब्रह्म' 'तत्सत्यम् । स आत्मा' 'यत्साक्षादपरोक्षाद्ब्रह्म' 'सबाह्याभ्यंतरो ह्यजः' 'आत्मैवेदं सर्वम्' इत्यादीनाम् । सोऽयमात्मा परमार्थापरमार्थरूपश्चतुष्पादित्युक्तः । तस्यापरमार्थरूपमविद्याकृतं रज्जुसर्पादिसममुक्तं पादत्रयलक्षणं बीजांकुरस्थानीयम् । अथेदानीमबीजात्मकं परमार्थस्वरूपं रज्जुस्थानीयं सर्पादिस्थानीयोक्तस्थानत्रयनिराकरणेनाह— नान्तःप्रज्ञमित्यादि ॥

नन्वात्मनश्चतुष्पात्त्वं प्रतिज्ञाय पादत्रयकथनेनैव चतुर्थस्यान्तःप्रज्ञादिभ्यो अन्यत्वे सिद्धे नान्तःप्रज्ञमित्यादिप्रतिषेधोऽनर्थकः । न । सर्पादिविकल्पप्रतिषेधेनैव रज्जुस्वरूपप्रतिपत्तिवत् व्यवस्थस्यैवात्मनस्तुर्यात्वेन प्रतिपिपादयिषितत्वात् । 'तत्त्वमसि' इतिवत् । यदि हि व्यवस्थात्माविलक्षणं तुरीयमन्यत्तत्प्रतिपत्तिद्वाराभावाच्छास्त्रोपदेशानर्थक्यं शून्यतापत्तिर्वा । रज्जुरिव सर्पादिभिर्विकल्प्यमाना स्थानत्रयेऽप्यात्मैक एवान्तःप्रज्ञादित्वेन विकल्प्यते यदा, तदा अंतःप्रज्ञादित्वप्रतिषेधविज्ञानप्रमाणसमकालमेव आत्मन्यनर्थप्रपंचनिवृत्तिलक्षणफलं पारिसमाप्तमिति तुरीयाधिगमे प्रमाणान्तरं साधनान्तरं वा न मृग्यम् । रज्जुसर्पविवेकसमकाल इव रज्ज्वां सर्पनिवृत्तिफले सति रज्ज्वधिगमस्य । येषां पुनस्तमोपनयव्यतिरेकेण घटाधिगमे प्रमाणं व्याप्रियते तेषां छेद्यावयवसंबंधवियोगव्यतिरेकेण अन्यतरावयवेऽपि च्छिदिर्व्याप्रियत इत्युक्तं स्यात् । यदा पुनर्घटतमसोः विवेककरणे प्रवृत्तं प्रमाणमनुपादित्सिततमोनिवृत्तिफलावसानं छिदिरिवच्छेद्यावयवसंबंधविवेककरणे प्रवृत्ता तदवयवद्वैधीभावफलावसाना, तदा नांतरीयकं घटविज्ञानं न तत्प्रमाणफलम् । नच तद्वदप्यात्मन्यध्यारोपितान्तःप्रज्ञत्वादिविवेककरणे प्रवृत्तस्य प्रतिषेधविज्ञानप्रमाणस्य अनुपादित्सितान्तःप्रज्ञत्वादिनिवृत्तिव्यतिरेकेण तुरीये व्यापारोपपत्तिः । अंतःप्रज्ञत्वादिनिवृत्तिसमकालमेव प्रमातृत्वादिभेदनिवृत्तेः । तथा च वक्ष्यति— "ज्ञाते द्वैतं न विद्यते" इति । ज्ञानस्य द्वैतनिवृत्तिक्षणव्यतिरेकेण क्षणान्तरानवस्थानात् । अवस्थाने चानवस्थाप्रसंगात् द्वैतानिवृत्तिः । तस्मात्प्रतिषेधविज्ञानप्रमाणव्यापारसमकालेव आत्मन्यध्यारोपितान्तःप्रज्ञत्वाद्यनर्थनिवृत्तिरिति सिद्धम् ॥

नान्तःप्रज्ञमिति तैजसप्रतिषेधः । न बहिःप्रज्ञमिति विश्वप्रतिषेधः । नोभयतःप्रज्ञमिति जागरितस्वप्नयोरंतरालावस्थाप्रतिषेधः । न प्रज्ञानघनमिति सुषुप्तावस्थाप्रतिषेधः । बीजभावाविवेकरूपत्वात् । न प्रज्ञमिति युगपत्सर्वविषयप्रज्ञातृत्वप्रतिषेधः । नाप्रज्ञमित्यचेतन्यप्रतिषेधः । कथं पुनरंतःप्रज्ञत्वादीनामात्मनि गम्यमानानां रज्ज्वादौ सर्पादिवत्प्रतिषेधादसत्त्वं गम्यत इत्युच्यते । ज्ञस्वरूपाविशेषेऽपि इतरेतरव्यभिचारादसत्यत्वं रज्ज्वादाविव सर्पधारादिविकल्पितभेदवत् । सर्वत्राव्यभिचाराज्ज्ञस्वरूपस्य सत्यत्वम् । सुषुप्ते व्यभिचरतीति चेन्न । सुषुप्तस्यानुभूयमानत्वात् । 'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते' इति श्रुतेः । अत एवादृश्यम् । यस्मादृदृश्यं तस्मादव्यवहार्यम् । अग्राह्यं कर्मेन्द्रियैः । अलक्षणमलिंगमित्येतदननुमेयमित्यर्थः । अतएवाचिंत्यम् । अत एवाव्यपदेश्यं शब्देः । एकात्मप्रत्ययसारं जाग्रदादिस्थानेष्वेक एवायमात्मेत्यव्यभिचारी यः प्रत्ययस्तेनानुसरणीयम् । अथवा एक आत्मप्रत्यय सारं प्रमाणं यस्य तुरीयस्याधिगमे तत्तुरीयमेकात्मप्रत्ययसारम् । 'आत्मेत्येवोपासीत' इति श्रुतेः । अंतःप्रज्ञत्वादिस्थानिधर्मप्रतिषेधः कृतः । प्रपंचोपशममिति जाग्रदादिस्थानधर्माभाव उच्यते । अत एव शान्तं शिवं यतोऽद्वैतं भेदविकल्परहितं चतुर्थं तुरीयं मन्यन्ते । प्रतीयमानपादत्रयरूपवैलक्षण्यात् । स आत्मा स विज्ञेय इति । प्रतीयमानसर्पभूच्छिद्रदंडादिव्यतिरिक्ता यथा रज्जुस्तथा 'तत्त्वमसि' इत्यादिवाक्यार्थ आत्मा 'अदृष्टो द्रष्टा' 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' इत्यादिभिरुक्तो यः स विज्ञेय इति भूतपूर्वगत्या । ज्ञाते द्वैताभावः ॥७॥

अत्रैते श्लोका भवन्ति—

कारिकाः ।

निवृत्तेः सर्वदुःखानामीशानः प्रभुरव्ययः ।
अद्वैतः सर्वभावानां देवस्तुर्यो विभुः स्मृतः ॥१०॥

प्राज्ञतैजसविश्वलक्षणानां सर्वदुःखानां निवृत्तेरीशानस्तुरीय आत्मा । ईशान इत्यस्य पदस्य व्याख्यानं प्रभुरिति । दुःखनिवृत्ति प्रति प्रभुर्भवतीत्यर्थः । तद्विज्ञाननिमित्तत्वात् दुःखनिवृत्तेः । अव्ययो न व्येति स्वरूपान्न व्यभिचरति न च्यवते इत्येतत् । कुतः । यस्मादद्वैतः सर्वभावानां रज्जुसर्पवन्मृषात्वात् । एष देवो द्योतनात्तुरीयश्चतुर्थो विभुर्व्यापी स्मृतः ॥

कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ ।
प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्ये न सिध्यतः ॥११॥

विश्वादीनां सामान्यविशेषभावो निरूप्यते तुर्ययाथात्म्यावधारणार्थम् । कार्यं क्रियत इति फलभावः । कारणं करोतीति बीजभावः । तत्त्वाग्रहणान्यथाग्रहणाभ्यां बीजफलभावाभ्यां तौ यथोक्तौ विश्वतैजसौ बद्धौ संगृहीताविष्येते । प्राज्ञस्तु बीजभावेनैव बद्धः । तत्त्वाप्रतिबोधमात्रमेव हि बीजं प्राज्ञत्वे निमित्तम् । ततो द्वौ तौ बीजफलभावौ तत्त्वाग्रहणान्यथाग्रहणे तुर्ये न सिध्यतो न विद्येते न संभवत इत्यर्थः ॥

नात्मानं न परं चैव न सत्यं नापि चानृतम् ।
प्राज्ञः किंचन संवेत्ति तुर्यं तत्सर्वदृक्सदा ॥१२॥

कथं पुनः कारणबद्धत्वं प्राज्ञस्य तुरीये वा तत्त्वाग्रहणान्यथाग्रहणलक्षणौ बंधौ न सिध्यत इति? यस्मादात्मानं विलक्षणमविद्याबीजप्रसूतं वेद्यं बाह्यं द्वैतं प्राज्ञो न किंचन संवेत्ति, यथा विश्वतैजसौ, ततश्चासौ तत्त्वाग्रहणेन तमसा अन्यथाग्रहणबीजभूतेन बद्धो भवति । यस्मात्तुरीयं तत्सर्वदृक्सदा तुरीयादन्यस्याभावात् सर्वदा सदैवेति भवति । सर्वं च तत् दृक्चेति सर्वदृक्तस्मान्न तत्त्वाग्रहणलक्षणं बीजम् । तत्र तत्प्रसूतस्यान्यथाग्रहणस्याप्यत एवाभावः । न हि सवितरि सदा प्रकाशात्मके तद्विरुद्धमप्रकाशनमन्यथाप्रकाशनं वा संभवति । 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' इति श्रुतेः । अथवा जाग्रत्स्वप्नयोः सर्वभूतावस्थः सर्ववस्तुदृगाभासस्तुरीय एवेति सर्वदृक्सदा । 'नान्यदतोऽस्ति द्रष्टृ' इत्यादिश्रुतेः ॥

द्वैतस्याग्रहणं तुल्यमुभयोः प्राज्ञतुर्ययोः ।
बीजनिद्रायुतः प्राज्ञः सा च तुर्ये न विद्यते ॥१३॥

निमित्तान्तरप्राप्ताशंकानिवृत्त्यर्थोऽयं श्लोकः । कथं द्वैताग्रहणस्य तुल्यत्वात् कारणबद्धत्वं प्राज्ञस्यैव न तुरीयस्येति प्राप्ता आशंका निवर्त्यते । यस्माद्बीजनिद्रायुतः, तत्त्वाप्रतिबोधो निद्रा । सैव च विशेषप्रतिबोधप्रसवस्य बीजम् । सा बीजनिद्रा । तया युतः प्राज्ञः । सदा दृक्स्वभावत्वात्तत्त्वाप्रतिबोधलक्षणा बीजनिद्रा तुर्ये न विद्यते । अतो न कारणबंधस्तस्मिन्नित्यभिप्रायः ॥

स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्ननिद्रया ।
न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः ॥१४॥

स्वप्नोऽन्यथाग्रहणं सर्प इव रज्ज्वाम् । निद्रोक्ता तत्त्वाप्रतिबोधलक्षणं तम इति । ताभ्यां स्वप्ननिद्राभ्यां युक्तौ विश्वतैजसौ । अतस्तौ कार्यकारणबद्धौ इत्युक्तौ । प्राज्ञस्तु स्वप्नवर्जितया केवलयैव निद्रया युत इति कारणबद्ध इत्युक्तम् । नोभयं पश्यन्ति तुरीये निश्चिता ब्रह्मविदो विरुद्धत्वात्सवितरीव तमः । अतो न कार्यकारणबद्ध इत्युक्तस्तुरीयः ॥

अन्यथा गृह्णतः स्वप्नो निद्रा तत्त्वमजानतः ।
विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते ॥१५॥

कदा तुरीये निश्चितो भवतीत्युच्यते— स्वप्नजागरितयोरन्यथा रज्ज्वां सर्प इव गृह्णतस्तत्त्वं स्वप्नो भवति । निद्रा तत्त्वमजानतास्तिसृष्ववस्थासु तुल्या । स्वप्ननिद्रयोः तुल्यत्वाद्विश्वतैजसयोरेकरूपित्वम । अन्यथाग्रहणप्राधान्याच्च गुणभूता निद्रेति तास्मिन्विपर्यास स्वप्नः । तृतीये तु स्थाने तत्त्वाज्ञानलक्षणो निद्रैव केवला विपर्यासः । अतस्तयोः कार्यकारणस्थानयोः अन्यथाग्रहणाग्रहणलक्षणविपर्यास कार्यकारणबंधरूपे परमार्थतत्त्वप्रतिबोधतः क्षीणे तुरीयं पदमश्नुते । तदोभयलक्षणं बंधनं तत्रापश्यंस्तुरीये निश्चितो भवतीत्यर्थः ॥

अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥१६॥

योऽयं संसारी जीवः स उभयलक्षणेन तत्त्वाप्रतिबोधरूपेण बीजात्मना अन्यथाग्रहणलक्षणेन चानादिकालप्रवृत्तेन मायालक्षणेन स्वप्नेन, ममायं पिता पुत्रोऽयं नप्ता क्षेत्रं गृहं पशवोऽहमेषां स्वामी सुखी दुःखी क्षयितोऽहमनेन वर्धितश्चानेनेत्येवंप्रकारान्स्वप्नान् स्थानद्वयेऽपि पश्यन्सुप्तो, यदा वेदान्तार्थतत्त्वाभिज्ञेन परमकारुणिकेन गुरुणा 'नास्येवं त्वं हेतुफलात्मकः किं तु तत्त्वमसि' इति प्रतिबोध्यमानो तदैवं प्रतिबुध्यते । कथं? नास्मिन्बाह्याभ्यंतरं वा जन्मादिभावविकारोऽस्त्यतोऽजं 'सबाह्याभ्यंतरो ह्यजः' इति श्रुतेः । सर्वभावविकारवर्जितमित्यर्थः । यस्माज्जन्मादिकारणभूतं नास्मिन्नविद्यातमोबीजं निद्रा विद्यत इत्यनिद्रम । अनिद्रं हि तत्तुरीयम् । अत एवास्वप्नम् । तन्निमित्तत्वादन्यथाग्रहणस्य । यस्माच्चानिद्रमस्वप्न तस्मादजमद्वैतं तुरीयमात्मानं बुध्यते तदा ॥

प्रपंचो यदि विद्येत निवर्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥१७॥

प्रपंचनिवृत्त्या चेत्प्रतिबुध्यतेऽनिवृत्ते प्रपंचे कथमद्वैतमिति । उच्यते— सत्यमेवं स्यात्प्रपंचो यदि विद्येत । रज्ज्वां सर्प इव कल्पितत्वान्न तु स विद्यते । विद्यमानश्चेन्निवर्तेत, न संशयः । न हि रज्ज्वां भ्रांतिबुद्धया कल्पितः सर्पो विद्यमानः सन्विवेकतो निवृत्तः । नैव माया मायाविना प्रयुक्ता तद्दर्शिनां चक्षुर्बंधापगमे विद्यमाना सती निवृत्ता । तथेदं प्रपंचाख्यं मायामात्रं द्वैतं रज्जुवन्मायाविवच्चाद्वैतं परमार्थतः । तस्मान्न कश्चित्प्रपंचः प्रवृत्तो निवृत्तो वास्तीत्यभिप्रायः ॥

विकल्पो विनिवर्तेत कल्पितो यदि केनचित् ।
उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते ॥१८॥

ननु शास्ता शास्त्रं शिष्य इति विकल्पः कथं निवृत्त इत्युच्यते—विकल्पो विनिवर्तेत यदि केनचित्कल्पितः स्यात् । यथायं प्रपंचो मायारज्जुसर्पवत्तथायं शिष्यादिभेदविकल्पोऽपि प्राक्प्रतिबोधादेवोपदेशनिमित्तः । अत उपदेशादयं वादः— शिष्यः शास्ता शास्त्रमिति । उपदेशकार्ये तु ज्ञाने निवृत्ते ज्ञाते परमार्थतत्त्वे, द्वैतं न विद्यते ॥

उपनिषत् ।

सोऽयमात्माध्यक्षरमोंकारोऽधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकार इति ॥८॥

अभिधेयप्रधान ओंकारश्चतुष्पादात्मेति व्याख्यातो यः सोऽयमात्मा अध्यक्षरमक्षरमधिकृत्याभिधानप्राधान्येन वर्ण्यमानोऽध्यक्षरम् । किं पुनस्तदक्षरमित्याह । ओंकारः । सोऽयमोंकारः पादशः प्रविभज्यमानोऽधिमात्रं मात्रामधिकृत्य वर्तत इत्यधिमात्रम् । कथं? आत्मनो ये पादाः ते ओंकारस्य मात्राः । कास्ताः । अकारः उकारो मकार इति ॥

जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्राप्तेरादिमत्त्वाद्वाप्नोति ह वै सर्वान्कामानादिश्च भवति य एवं वेद ॥९॥

तत्र विशेषनियमः क्रियते । जागरितस्थानो वैश्वानरो यः स ओंकारस्याकारः प्रथमा मात्रा । केन सामान्येनेत्याह— आप्तेः । आप्तिर्व्याप्तिः, अकारेण सर्वा वाग्व्याप्ता । "अकारो वै सर्वा वाक्" इति श्रुतेः । तथा वैश्वानरेण जगत् । "तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाः"

इत्यादिश्रुते·। अभिधानाभिधेययोरेकत्वं चावोचाम। आदिरस्य विद्यते इत्यादिमत्। यथैवादिमदकाराख्यमक्षरं तथैव वैश्वानरः। तस्माद्वा सामान्यादकारत्वं वैश्वानरस्य। तदेकत्वविद· फलमाह—आप्नोति ह वै सर्वान्कामानादिः प्रथमश्च भवति महतां, य एवं वेद, यथोक्तमेकत्वं वेदेत्यर्थः॥

स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रोत्कर्षादुभयत्वाद्वोत्कर्षति ह वै ज्ञानसंततिं समानश्च भवति नास्याब्रह्मवित्कुले भवति य एवं वेद ॥१०॥

स्वप्नस्थानस्तैजसो य· स ओकारस्योकारो द्वितीया मात्रा। केन सामान्येनेत्याह—उत्कर्षात्। अकारादुत्कृष्ट इव ह्युकारः। तथा तैजसो विश्वादुभयत्वाद्वा। अकारमकारयोर्मध्यस्थ उकारस्तथा विश्वप्राज्ञयोर्मध्ये तैजसोऽत उभयभाक्त्वसामान्यात्। विद्वत्फलमुच्यते—उत्कर्षति ह वै ज्ञानसंततिम्। विज्ञानसंतति वर्धयतीत्यर्थः। समानस्तुल्यश्च मित्रपक्षस्येव शत्रुपक्षाणामप्यप्रद्वेष्यो भवति। अब्रह्मविदस्य कुले न भवति य एवं वेद॥

सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मितेरपीतेर्वा मिनोति ह वा इदं सर्वमपीतिश्च भवति य एवं वेद ॥११॥

सुषुप्तस्थानः प्राज्ञो य· स ओकारस्य मकारस्तृतीया मात्रा। केन सामान्येनेत्याह, सामान्यमिदमत्र। मितेः। मितिर्मानं, मीयेते इव हि विश्वतैजसौ प्राज्ञेन प्रलयोत्पत्त्यो· प्रवेशनिर्गमाभ्या प्रस्थेनेव यवा·। तथोकारसमाप्तौ पुनः प्रयोगे च प्रविश्य निर्गच्छत इवाकारोकारौ मकारे। अपीतेर्वा। अपीतिरप्यय एकीभावः। ओकारोच्चारणे हि अंत्येऽक्षरे एकीभूताविवाकारोकारौ। तथा विश्वतैजसौ सुषुप्तकाले प्राज्ञे। अतो वा सामान्यादेकत्वं प्राज्ञमकारयो·। विद्वत्फलमाह। मिनोति ह वा इदं सर्वं जगद्याथात्म्यं जानातीत्यर्थः। अपीतिश्च जगत्कारणात्मा च भवतीत्यर्थः। अत्रावान्तरफलवचनं प्रधानसाधनस्तुत्यर्थम्॥

अत्रैते श्लोका भवन्ति—

कारिकाः।

विश्वस्यात्वविवक्षायामादिसामान्यमुत्कटम्।
मात्रासंप्रतिपत्तौ स्यादादित्यसामान्यमेव च ॥१९॥

विश्वस्य अत्वमकारमात्रत्वं यदा विवक्ष्यते तदा आदित्वसामान्यमुत्कन्यायेनोत्कटमुद्भूतं दृश्यत इत्यर्थः। अत्वविवक्षायामित्यस्य व्याख्यानं मात्रासंप्रति-

पत्ताविति। विश्वस्याकारमात्रत्वं यदा संप्रतिपद्यत इत्यर्थः। आप्तिसामान्यमेव चोत्कटमित्यनुवर्तते चशब्दात् ॥

तैजसस्योत्वविज्ञान उत्कर्षो दृश्यते स्फुटम्।
मात्रासंप्रतिपत्तौ स्यादुभयत्वं तथाविधम् ॥२०॥

तैजसस्य उत्वविज्ञाने उकारत्वविवक्षायामुत्कर्षो दृश्यते स्फुटं स्पष्टं इत्यर्थः। उभयत्वं च स्फुटमेवेति। पूर्ववत्सर्वम् ॥

मकारभावे प्राज्ञस्य मानसामान्यमुत्कटम्।
मात्रासंप्रतिपत्तौ तु लयसामान्यमेव च ॥२१॥

मकारत्वे प्राज्ञस्य मितिलयावुत्कृष्टे सामान्ये इत्यर्थः ॥

त्रिषु धामसु यस्तुल्यं सामान्यं वेत्ति निश्चितः।
स पूज्यः सर्वभूतानां वंद्यश्चैव महामुनिः ॥२२॥

यथोक्तस्थानत्रये यः तुल्यमुक्तं सामान्यं वेत्त्येवमेवैतदिति निश्चितो यः स पूज्यो वंद्यश्च ब्रह्मविल्लोके भवति ॥

अकारो नयते विश्वमुकारश्चापि तैजसम्।
मकारश्च पुनः प्राज्ञं नामात्रे विद्यते गतिः ॥२३॥ इति।

यथोक्तैः सामान्यैरात्मपादानां मात्राभिः सहैकत्वं कृत्वा यथोक्तोकारं प्रतिपद्य यो ध्यायति तमकारो नयते विश्वं प्रापयति। अकारालंबनमोकारं विद्वान्वैश्वानरो भवतीत्यर्थः। तथा उकारस्तैजसम्। मकारश्चापि पुनः प्राज्ञं, चशब्दान्नयत इत्यनुवर्तते। क्षीणे तु मकारे बीजभावक्षयादमात्र ओकारे गतिर्न विद्यते क्वचिदित्यर्थः ॥

उपनिषत्।

अमात्रश्चतुर्थोऽव्यवहार्यः प्रपंचोपशमः शिवोऽद्वैत एवमोंकार आत्मैव संविशत्यात्मनात्मानं य एवं वेद ॥१२॥ इति मांडूक्योपनिषत्समाप्ता ॥

अमात्रो मात्रा यस्य न सन्ति सोऽमात्र ओकारश्चतुर्थस्तुर्याय आत्मैव केवलोभिधानाभिधेयरूपयोर्वाङ्मनसयोः क्षीणत्वादव्यवहार्यः। प्रपंचोपशमः शिवोऽद्वैतः संवृत्त एवं यथोक्तविज्ञानवता प्रयुक्त ओकारस्त्रिमात्रस्त्रिपादः आत्मैव संविशत्यात्मना स्वेनैव स्वं पारमार्थिकमात्मानं य एवं वेद। परमार्थदर्शनात्

ब्रह्मवित् तृतीयं बीजभावं दग्ध्वात्मानं प्रविष्ट इति न पुनर्जायते तुरीयस्यार्बीजत्वात्। न हि रज्जुसर्पयोर्विवेके रज्ज्वां प्रविष्टः सर्पो बुद्धिसंस्कारात्पुनः पूर्ववत्तद्विवेकिनामुत्थास्यति। मंदमध्यमधियां तु प्रतिपन्नसाधकभावानां सन्मार्गगामिनां संन्यासिनां मात्राणां पादानां च क्लृप्तसामान्यविदां यथावदुपास्यमान ओंकारो ब्रह्मप्रतिपत्तये आलंबनीभवति। तथा च वक्ष्यति— "आश्रमास्त्रिविधा हीनाः" इत्यादि॥

इति मांडूक्यमूलमंत्रभाष्यं समाप्तम्॥

अत्रेते श्लोका भवन्ति—

कारिकाः।

ओंकारं पादशो विद्यात्पादा मात्रा न संशयः।
ओंकारं पादशो ज्ञात्वा न किंचिदपि चिंतयेत्॥२४॥

यथोक्तैः सामान्यैः पादा एव मात्रा, मात्राश्च पादाः, तस्मादोंकारं पादशो विद्यादित्यर्थः। एवमोंकारे ज्ञाते दृष्टार्थमदृष्टार्थं वा न किंचिदपि प्रयोजनं चिंतयेत्कृतार्थत्वादित्यर्थः॥

युंजीत प्रणवे चेतः प्रणवो ब्रह्म निर्भयम्।
प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित्॥२५॥

युंजीत समाद्ध्याद्यथाव्याख्याते परमार्थरूपे प्रणवे चेतो मनः। यस्मात्प्रणवो ब्रह्म निर्भयम्। न हि तत्र सदायुक्तस्य भयं विद्यते क्वचित 'विद्वान्न बिभेति कुतश्चन' इति श्रुतेः॥

प्रणवो ह्यपरं ब्रह्म प्रणवश्च परं स्मृतः।
अपूर्वोऽनंतरोऽबाह्योऽनपरः प्रणवोऽव्ययः॥२६॥

परापरे ब्रह्मणी प्रणवः, परमार्थतः क्षीणेषु मात्रापादेषु पर एवात्मा ब्रह्मेति। न पूर्वं कारणमस्य विद्यत इत्यपूर्वः। नास्यान्तरं भिन्नजातीयं किंचिद्विद्यत इत्यनंतरः। तथा बाह्यमन्यन्न विद्यत इत्यबाह्यः। अपरं कार्यमस्य न विद्यत इत्यनपरः। सबाह्याभ्यंतरो ह्यजः सैन्धवघनवत्प्रज्ञानघन इत्यर्थः॥

सर्वस्य प्रणवो ह्यादिर्मध्यमंतस्तथैव च।
एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनंतरम्॥२७॥

आदिमध्यान्ता उत्पत्तिस्थितिप्रलयाः सर्वस्य प्रणव एव । मायाहस्तिरज्जु-सर्पमृगतृष्णिकास्वप्नादिवदुत्पद्यमानस्य वियदादिप्रपंचस्य यथा मायाव्यादयः । एवं हि प्रणवमात्मानं मायाव्यादिस्थानीयं ज्ञात्वा तत्क्षणादेव तदात्मभावं व्यश्नुते इत्यर्थः ॥

प्रणवं हीश्वरं विद्यात्सर्वस्य हृदि संस्थितम् ।
सर्वव्यापिनमोंकारं मत्वा धीरो न शोचति ॥२८॥

सर्वप्राणिजातस्य स्मृतिप्रत्ययास्पदे हृदये स्थितमीश्वरं प्रणवं विद्यात्सर्व-व्यापिनं व्योमवदोंकारमात्मानमसंसारिणं धीरो बुद्धिमान आत्मतत्त्वं मत्वा ज्ञात्वा न शोचति । शोकनिमित्तानुपपत्तेः । 'तरति शोकमात्मवित्' इत्यादिश्रुतिभ्यः ॥

अमात्रोऽनंतमात्रश्च द्वैतस्योपशमः शिवः ।
ओंकारो विदितो येन स मुनिर्नेतरो जनः ॥२९॥

अमात्रस्तुरीय ओंकारो, मीयतेऽनयेति मात्रा परिच्छित्तिः, साऽनंता यस्य सोऽनंतमात्रः । नैतावत्त्वमस्य परिच्छेत्तुं शक्यत इत्यर्थः । सर्वद्वैतोप-शमत्वादेव शिवः । ओंकारो यथाव्याख्यातो विदितो येन स एव परमार्थतत्त्वस्य मननान्मुनिः । नेतरो जनः शास्त्रविदर्पात्यर्थः ॥

इति गौडपादीयकारिकासहितमांडूक्योपनिषद्भाष्ये प्रथममागमप्रकरणम् ॥

वैतथ्यप्रकरणम् ॥२॥

वैतथ्यं सर्वभावानां स्वप्न आहुर्मनीषिणः ।
अंतःस्थानात्तु भावानां संवृतत्वेन हेतुना ॥१॥

'ज्ञाते द्वैतं न विद्यते' इत्युक्तम् । 'एकमेवाद्वितीयं' इत्यादिश्रुतिभ्यः । आगममात्रं तत् । तत्रोपपत्त्यापि द्वैतस्य वैतथ्यं शक्यतेऽवधारयितुमिति द्वितीयं प्रकरणमारभ्यते— वैतथ्यमित्यादिना । वितथस्य भावो वैतथ्यम् । असत्यत्व-मित्यर्थः । कस्य? सर्वेषां बाह्याध्यात्मिकाना भावानां पदार्थानां स्वप्ने उपलभ्य-मानानाम् । आहुः कथयन्ति मनीषिणः प्रमाणकुशलाः । वैतथ्ये हेतुमाह— अंतःस्थानात् । अंतः शरीरस्य मध्ये स्थानं येषाम् । तत्र हि भावा उपलभ्यन्ते पर्वतहस्त्यादयो, न बहिः शरीरात् । तस्मात्ते वितथा भवितुमर्हन्ति । ननु

अपवरकाद्यंतरुपलभ्यमानैर्घटादिभिरनैकान्तिको हेतुरित्याशंक्याह— संवृतत्वेन हेतुनेति । अंतः संवृतस्थानादित्यर्थः । न ह्यंतः संवृते देहान्तर्नाडीषु पर्वतहस्त्यादीनां संभवोऽस्ति । न हि देहे पर्वतोऽस्ति ॥

अदीर्घत्वाच्च कालस्य गत्वा देशान्न पश्यति ।
प्रतिबुद्धश्च वै सर्वस्तस्मिन्देशे न विद्यते ॥२॥

स्वप्नदृश्यानां भावानामन्तः संवृतस्थानमित्येतदसिद्धम् । यस्मात्प्राच्येषु सुप्त उदक्षु स्वप्नान्पश्यन्निव दृश्येत । इत्येतदाशंक्याह । न देहाद्बहिर्देशान्तरं गत्वा स्वप्नान्पश्यति । यस्मात्सुप्तमात्र एव देहदेशाद्योजनशतान्तरिते मासमात्रप्राप्ये देशे स्वप्नान्पश्यन्निव दृश्यते । नच तद्देशप्राप्तेः आगमनस्य च दीर्घः कालोऽस्ति । अतो अदीर्घत्वाच्च कालस्य न स्वप्नदृग्देशान्तरं गच्छति । किंच, प्रतिबुद्धश्च वै सर्वः स्वप्नदृक्स्वप्नदर्शनदेशे न विद्यते । यदि च स्वप्ने देशान्तरं गच्छेद्यस्मिन्देशे स्वप्नान्पश्येत्तत्रैव प्रतिबुध्येत । न चैतदस्ति । रात्रौ सुप्तोऽहनीव भावान्पश्यति, बहुभिः संगतो भवति यैश्च संगतो तैर्गृह्येत । न च गृह्यते । गृहीतश्चेत्त्वामद्य तत्रोपलब्धवन्तो वयमिति ब्रूयु । न चैतदस्ति । तस्मान्न देशान्तरं गच्छति स्वप्ने ॥

अभावश्च रथादीनां श्रूयते न्यायपूर्वकम् ।
वैतथ्यं तेन वै प्राप्तं स्वप्न आहुः प्रकाशितम् ॥३॥

इतश्च स्वप्नदृश्या भावा वितथाः । यतोऽभावश्च रथादीनां स्वप्नदृश्यानां श्रूयते, न्यायपूर्वकं युक्तितः श्रुतौ 'न तत्र रथाः' इत्यत्र । तेन अंतःस्थानसंवृतत्वादिहेतुना प्राप्तं वैतथ्यं तदनुवादिन्या श्रुत्या स्वप्ने स्वयंज्योतिष्ट्वप्रतिपादनपरया प्रकाशितमाहुर्ब्रह्मविदः ॥

अंतःस्थानात्तु भेदानां तस्माज्जागरिते स्मृतम् ।
यथा तत्र तथा स्वप्ने संवृतत्वेन भिद्यते ॥४॥

जाग्रद्दृश्यानां भावानां वैतथ्यमिति प्रतिज्ञा । दृश्यत्वादिति हेतुः । स्वप्नदृश्यभाववदिति दृष्टान्तः । यथा तत्र स्वप्ने दृश्यानां भावानां वैतथ्यं तथा जागरितेऽपि दृश्यत्वमविशिष्टमिति हेतूपनयः । तस्माज्जागरितेऽपि वैतथ्यं स्मृतमिति निगमनम् । अंतःस्थानात्संवृतत्वेन च स्वप्नदृश्यानां भावानां जाग्रद्दृश्येभ्यो भेदः । दृश्यत्वमसत्यत्वं चाविशिष्टमुभयत्र ॥

स्वप्नजागरिते स्थाने ह्येकमाहुर्मनीषिणः ।
भेदानां हि समत्वेन प्रसिद्धेनैव हेतुना ॥५॥

प्रसिद्धेनैव भेदानां ग्राह्यग्राहकत्वेन हेतुना समत्वेन स्वप्नजागरितस्थानयोरेकत्वमाहुर्विवेकिनः इति पूर्वप्रमाणसिद्धस्यैव फलम् ॥

आदावंते च यन्नास्ति वर्तमानेऽपि तत्तथा ।
वितथैः सदृशाः सन्तोऽवितथा इव लक्षिताः ॥६॥

इतश्च वैतथ्यं जाग्रद्दृश्यानां भेदानामाद्यंतयोरभावात् यदादावंते च नास्ति वस्तु मृगतृष्णिकादि, तन्मध्येऽपि नास्तीति निश्चितं लोके । तथेमे जाग्रद्दृश्या भेदाः । आद्यंतयोरभावाद्वितथैरेव मृगतृष्णिकादिभिः सदृशत्वाद्वितथा एव तथाप्यवितथा इव लक्षिता मूढैरनात्मविद्भिः ॥

सप्रयोजनता तेषां स्वप्ने विप्रतिपद्यते ।
तस्मादाद्यंतवत्त्वेन मिथ्यैव खलु ते स्मृताः ॥७॥

स्वप्नदृश्यवज्जागरितदृश्यानामपि असत्त्वमिति यदुक्तं तदयुक्तम् । यस्माज्जाग्रद्दृश्या अन्नपानवाहनादयः क्षुत्पिपासादिनिवृत्तिं कुर्वन्तो गमनागमनादिकार्यं च सप्रयोजना दृष्टाः । न तु स्वप्नदृश्यानां तदस्ति । तस्मात्स्वप्नदृश्यवत् जाग्रद्दृश्यानामसत्त्वं मनोरथमात्रमिति । तन्न । कस्मात्? यस्मात्सप्रयोजनता दृष्टा या अन्नपानादीनां सा स्वप्ने विप्रतिपद्यते । जागरिते हि भुक्त्वा पीत्वा च तृप्तो विनिवर्तिततृट् सुप्तमात्र एव क्षुत्पिपासाद्यार्तमहोरात्रोपोषितमभुक्तवन्तमात्मानं मन्यते । यथा स्वप्ने भुक्त्वा पीत्वा चातृप्तोत्थितस्तथा । तस्माज्जाग्रद्दृश्यानां स्वप्ने विप्रतिपत्तिर्दृष्टा । अतो मन्यामहे तेषामप्यसत्त्वं स्वप्नदृश्यवदनाशंकनीयामिति । तस्मादाद्यंतवत्त्वमुभयत्र समानामिति मिथ्यैव खलु ते स्मृताः ॥

अपूर्वं स्थानिधर्मो हि यथा स्वर्गनिवासिनाम् ।
तानयं प्रेक्षते गत्वा यथैवेह सुशिक्षितः ॥८॥

स्वप्नजाग्रद्भेदयोः समत्वाज्जाग्रद्भेदानामसत्त्वमिति यदुक्तं तदसत् । कस्मात्? दृष्टान्तस्यासिद्धत्वात् । कथम्? न हि जाग्रद्दृश्या ये ते एव भेदाः स्वप्ने दृश्यन्ते । किं तर्हि? अपूर्वं स्वप्ने पश्यति चतुर्दंतगजमारूढ-

मष्टभुजमात्मानम् । अन्यदप्येवंप्रकारमपूर्वं पश्यति स्वप्ने । तन्नान्येनासता समभिति सदेव । अतो दृष्टान्तो असिद्धः । तस्मात्स्वप्नवज्जागरितस्यासत्त्वमित्ययुक्तम् । तन्न । स्वप्ने दृष्टमपूर्वं यन्मन्यसे न तत्स्वतः सिद्धम् । किं तर्हि ? अपूर्वं स्थानिधर्मो हि, स्थानिनो द्रष्टुरेव हि स्वप्नस्थानवतो धर्मः । यथा स्वर्गनिवासिनामिन्द्रादीनां सहस्राक्षत्वादि, तथा स्वप्नदृशोऽपूर्वोऽयं धर्मः । न स्वतःसिद्धो द्रष्टुः स्वरूपवत् । तानेवंप्रकारानपूर्वान् स्वचित्तविकल्पानयं स्थानी यः स्वप्नदृक्स्वप्नस्थानं गत्वा प्रेक्षते । यथैवेह लोके सुशिक्षितो सुशिक्षितदेशान्तरमार्गस्तेन मार्गेण देशान्तरं गत्वा तान्पदार्थान्पश्यति तद्वत् । तस्माद्यथा स्थानिधर्माणां रज्जुसर्पमृगतृष्णिकादीनामसत्त्वं, तथा स्वप्नदृश्यानामप्यपूर्वाणां स्थानिधर्मत्वमेवेत्यसत्त्वम् । अतो न स्वप्नदृष्टान्तस्यासिद्धत्वम् ॥

स्वप्नवृत्तावपि त्वंतश्चेतसा कल्पितं त्वसत् ।
बहिश्चेतोगृहीतं सद्दृष्टं वैतथ्यमेतयोः ॥९॥

अपूर्वत्वाशंकां निराकृत्य स्वप्नदृष्टान्तस्य पुनः स्वप्नतुल्यतां जाग्रद्भेदानां प्रपंचयन्नाह— स्वप्नवृत्तावपि स्वप्नस्थानेऽप्यंतश्चेतसा मनोरथसंकल्पितमसत् । संकल्पानंतरसमकालमेवादर्शनात् । तत्रैव स्वप्ने बहिश्चेतसा गृहीतं चक्षुरादिद्वारेण उपलब्धं घटादि सदित्येवमसत्यमिति निश्चितेऽपि सदसद्विभागो दृष्टः । उभयोरप्यंतर्बहिश्चेतःकल्पितयोर्वैतथ्यमेव दृष्टम् ॥

जाग्रद्वृत्तावपि त्वंतश्चेतसा कल्पितं त्वसत् ।
बहिश्चेतोगृहीतं सद्युक्तं वैतथ्यमेतयोः ॥१०॥

सदसतोर्वैतथ्यं युक्तम् । अंतर्बहिश्चेतःकल्पितत्वाविशेषादिति । व्याख्यातमन्यत् ॥

उभयोरपि वैतथ्यं भेदानां स्थानयोर्यदि ।
क एतान्बुध्यते भेदान्को वै तेषां विकल्पकः ॥११॥

चोदकश्चाह— स्वप्नजाग्रत्स्थानयोर्भेदानां यदि वैतथ्यं, क एतानंतर्बहिश्चेतःकल्पितान्बुध्यते । को वै तेषां विकल्पकः । स्मृतिज्ञानयोः क आलंबनमित्यभिप्रायः । न चेन्निरात्मवाद इष्टः ॥

कल्पयत्यात्मनात्मानमात्मा देवः स्वमायया ।
स एव बुध्यते भेदानिति वेदान्तनिश्चयः ॥१२॥

स्वयं स्वमायया स्वमात्मानमात्मा देवः आत्मन्येव वक्ष्यमाणं भेदाकारं कल्पयति, रज्ज्वादाविव सर्पादीन् । स्वयमेव च तान्बुध्यते भेदान् तद्वदेवेत्येवं वेदान्तनिश्चयः । नान्योऽस्ति ज्ञानस्मृत्याश्रयः । न च निरास्पदे एव ज्ञानस्मृती वैनाशिकानामिवेत्यभिप्रायः ॥

विकरोत्यपरान्भावानंतश्चित्ते व्यवस्थितान् ।
नियतांश्च बहिश्चित्त एवं कल्पयते प्रभुः ॥१३॥

संकल्पयन्केन प्रकारेण कल्पयतीत्युच्यते । विकरोति नाना करोत्यपरांल्लौकिकान्भावान्पदार्थाञ्शब्दार्दानन्यांश्च अंतश्चित्ते वासनारूपेण व्यवस्थितान अव्याकृतान्नियतांश्च पृथ्व्यादीननियतांश्च कल्पनाकालान्बहिश्चित्तः सन्, तथा अंतश्चित्तो मनोरथादिलक्षणानित्येवं कल्पयति । प्रभुरीश्वरः आत्मेत्यर्थः ॥

चित्तकाला हि येऽन्तस्तु द्वयकालाश्च ये बहिः ।
कल्पिता एव ते सर्वे विशेषो नान्यहेतुकः ॥१४॥

स्वप्नवच्चित्तपरिकल्पितं सर्वमित्येतदाशंक्यते । यस्माच्चित्तपरिकल्पितं मनोरथादिलक्षणं चित्तपरिच्छेद्यवैलक्षण्यं बाह्यानामन्योन्यपरिच्छेद्यत्वमिति सा न युक्ता आशंका । चित्तकाला हि येऽन्तस्तु चित्तपरिच्छेद्याः । नान्यश्चित्तकालव्यतिरेकेण परिच्छेदकः कालो येषां, ते चित्तकालाः । कल्पनाकाल एवोपलभ्यन्त इत्यर्थः । द्वयकालाश्च भेदकाला अन्योन्यपरिच्छेद्याः । यथा आगोदोहनमास्ते । यावदास्ते तावद्गा दोग्धि, यावद्गां दोग्धि तावदास्ते । तावानयमेतावान्स इति परस्परपरिच्छेद्यपरिच्छेदकत्वं बाह्यानां भेदानां, ते द्वयकालाः । अंतश्चित्तकाला बाह्याश्च द्वयकालाः कल्पिता एव ते सर्वे । न बाह्यो द्वयकालत्वविशेष कल्पितत्वव्यतिरेकेणान्यहेतुकः । अत्रापि हि स्वप्नदृष्टान्तो भवत्येव ॥

अव्यक्ता एव येऽन्तस्तु स्फुटा एव च ये बहिः ।
कल्पिता एव ते सर्वे विशेषस्त्विंद्रियांतरे ॥१५॥

यदप्यंतरव्यक्तत्वं भावानां मनोवासनामात्राभिव्यक्तानां स्फुटत्वं वा बहिश्चक्षुरादींद्रियांतरे विशेषो, नासौ भेदानामस्तित्वकृतः, स्वप्नेऽपि तथा दर्शनात् । किं तर्हि ? इंद्रियान्तरकृत एव । अतः कल्पिता एव जाग्रद्भावा अपि स्वप्नभाववदिति सिद्धम् ॥

जीवं कल्पयते पूर्वं ततो भावान्पृथग्विधान् ।
बाह्यानाध्यात्मिकांश्चैव यथाविद्यस्तथास्मृतिः ॥१६॥

बाह्याध्यात्मिकाना भावानां इतरेतरनिमित्तनैमित्तिकतया कल्पनायाः किं मूलं इत्युच्यते— जीवं हेतुफलात्मकम् । अहं करोमि मम सुखदुःखे इत्येवंलक्षणम् । अनेवंलक्षण एव शुद्ध आत्मनि रज्ज्वामिव सर्प कल्पयते पूर्वम् । ततस्तादर्थ्येन क्रियाकारकफलभेदेन प्राणादीन्नानाविधान्भावान्बाह्यानाध्यात्मिकांश्चैव कल्पयते । तत्र कल्पनाया को हेतुरित्युच्यते— योऽसौ स्वयं कल्पितो जीवः सर्वकल्पनायामधिकृतः, स यथाविद्यो यादृशी विद्या विज्ञानमस्येति यथाविद्य, तथाविधैव स्मृतिस्तस्येति तथास्मृतिर्भवति स इति । अतो हेतुकल्पनाविज्ञानात्फलविज्ञानं, ततो हेतुफलस्मृतिः, ततस्तद्विज्ञानं, ततः तदर्थक्रियाकारकतत्फलभेदविज्ञानानि, तेभ्यस्तत्स्मृतिः, तत्स्मृतेश्च पुनस्तद्विज्ञानानि, इत्येवं बाह्यानाध्यात्मिकाश्च इतरेतरनिमित्तनैमित्तिकभावेनानेकधा कल्पयते ॥

अनिश्चिता यथा रज्जुरंधकारे विकल्पिता ।
सर्पधारादिभिर्भावैस्तद्वदात्मा विकल्पितः ॥१७॥

तत्र जीवकल्पना सर्वकल्पनामूलमित्युक्तं, सैव जीवकल्पना किंनिमित्तेति दृष्टान्तेन प्रतिपादयति— यथा लोके स्वेन रूपेणानिश्चिताऽनवधारिता एवमेवेति रज्जुर्मदाधकारे किं सर्प उदकधारा दंड इति वाऽनेकधा विकल्पिता भवति पूर्वं स्वरूपानिश्चयनिमित्तम् । यदि हि पूर्वमेव रज्जुः स्वरूपेण निश्चिता स्यात् न सर्पादिविकल्पोऽभविष्यत् । यथा स्वप्नसांगुल्यादिषु । एष दृष्टान्तः । तद्वद्धेतुफलादिसंसारधर्मानर्थविलक्षणतया स्वेन विशुद्धविज्ञप्तिमात्रसत्ताद्वयरूपेण अनिश्चितत्वाज्जीवप्राणाद्यनंतभावभेदैरात्मा विकल्पितः इत्येष सर्वोपनिषदां सिद्धान्तः ॥

निश्चितायां यथा रज्ज्वां विकल्पो विनिवर्तते ।
रज्जुरेवेति चाद्वैतं तद्वदात्मविनिश्चयः ॥१८॥

रज्जुरेवेति निश्चये सर्वविकल्पनिवृत्तौ रज्जुरेवेति चाद्वैतं यथा, तथा 'नेति नेति' इति सर्वसंसारधर्मशून्यप्रतिपादकशास्त्रजनितविज्ञानसूर्यालोककृतात्मविनिश्चयः 'आत्मैवेदं सर्वम्' 'अपूर्वोऽनपरोऽनंतरोऽबाह्यः' 'सबाह्याभ्यंतरो ह्यजः' 'अजरोऽमरोऽमृतोऽभय एक एवाद्वयः' इति ॥

प्राणादिभिरनंतैस्तु भावैरेतैर्विकल्पितः ।
मायैषा तस्य देवस्य ययायं मोहितः स्वयम् ॥१९॥

यद्यात्मैक एवेति निश्चयः, कथं प्राणादिभिरनंतैर्भावैरेतैः संसारलक्षणैर्विकल्पित इति? उच्यते शृणु । मायैषा तस्यात्मनो देवस्य । यथा मायाविना विहिता माया गगनमतिविमलं कुसुमितैः सपलाशैस्तरुभिराकीर्णमिव करोति, तथेयमपि देवस्य माया ययाऽयं स्वयमपि मोहित इव मोहितो भवति । "मम माया दुरत्यया" इत्युक्तम् ॥

प्राण इति प्राणविदो भूतानीति च तद्विदः ।
गुणा इति गुणविदस्तत्त्वानीति च तद्विदः ॥२०॥

पादा इति पादविदो विषया इति तद्विदः ।
लोका इति लोकविदो देवा इति च तद्विदः ॥२१॥

वेदा इति वेदविदो यज्ञा इति च तद्विदः ।
भोक्तेति च भोक्तृविदो भोज्यमिति च तद्विदः ॥२२॥

सूक्ष्म इति सूक्ष्मविदः स्थूल इति च तद्विदः ।
मूर्त इति मूर्तविदोऽमूर्त इति च तद्विदः ॥२३॥

काल इति कालविदो दिश इति च तद्विदः ।
वादा इति वादविदो भुवनानीति तद्विदः ॥२४॥

मन इति मनोविदो बुद्धिरिति च तद्विदः ।
चित्तमिति चित्तविदो धर्माधर्मौ च तद्विदः ॥२५॥

पंचविंशक इत्येके षड्विंश इति चापरे ।
एकत्रिंशक इत्याहुरनंत इति चापरे ॥२६॥

लोकाँल्लोकविदः प्राहुराश्रमा इति तद्विदः ।
स्त्रीपुंनपुंसकं लैंगाः परापरमथापरे ॥२७॥

सृष्टिरिति सृष्टिविदो लय इति च तद्विदः ।
स्थितिरिति स्थितिविदः सर्वे चेह तु सर्वदा ॥२८॥

प्राणः प्राज्ञो बीजात्मा, तत्कार्यभेदा हीतरे स्मर्त्यंताः । अन्ये च सर्वे लौकिकाः सर्वप्राणिपरिकल्पिता भेदा रज्ज्वामिव सर्पादयः । तच्छून्ये आत्म-

न्यात्मस्वरूपानिश्चयहेतोरविद्यया कल्पिता इति पिंडीकृतोऽर्थः । प्राणादिश्लोकानां प्रत्येकं पदार्थव्याख्याने फलुप्रयोजनत्वात्सिद्धपदार्थत्वाच्च यत्नो न कृतः ॥

यं भावं दर्शयेद्यस्य तं भावं स तु पश्यति ।
तं चावति स भूत्वासौ तद्ग्रहः समुपैति तम् ॥२९॥

किं बहुना ? प्राणादीनामन्यतममुक्तमनुक्तं वा अन्यं यं भावं पदार्थं दर्शयेद्यस्याचार्योऽन्यो वा आप्तः इदमेव तत्त्वमिति, स तं भावमात्मभूतं पश्यत्यय-महमिति वा ममेति वा, तं च द्रष्टारं स भावोऽवति यो दर्शितो भावोऽसौ स भूत्वा रक्षति । स्वेनात्मना सर्वतो निरुणद्धि । तस्मिन्ग्रहस्तद्ग्रहः तदभिनिवेशः । इदमेव तत्त्वमिति स तं ग्रहीतारमुपैति । तस्यात्मभावं निगच्छतीत्यर्थः ॥

एतैरेषोऽपृथग्भावैः पृथगेवेति लक्षितः ।
एवं यो वेद तत्त्वेन कल्पयेत्सोऽविशंकितः ॥३०॥

एतैः प्राणादिभिः आत्मनोऽपृथग्भूतैरपृथग्भावैरेष आत्मा रज्जुरिव सर्पादिविकल्पनारूपैः पृथगेवेति लक्षितोऽभिलक्षितो निश्चितो मूढैरित्यर्थः । विवेकिनां तु रज्ज्वामिव कल्पिताः सर्पादयोनात्मव्यतिरेकेण प्राणादयः सन्तीत्याभिप्रायः । 'इदं सर्वं यदयमात्मा' इति श्रुतेः । एवमात्मव्यतिरेकेणासत्त्वं रज्जुसर्पवदात्मनि कल्पितानामात्मानं च केवलं निर्विकल्पं यो वेद तत्त्वेन श्रुतितो युक्तितश्च, सोऽविशंकितो वेदार्थं विभागतः कल्पयेत्कल्पयतीत्यर्थः । इदमेवंपरं वाक्यमदोऽन्यपरमिति । न ह्यनध्यात्मविद्वेदाञ्ज्ञातुं शक्नोति तत्त्वतः । "न ह्यनध्यात्मवित्कश्चित्क्रियाफलमुपाश्नुते" इति हि मानवं वचनम् ॥

स्वप्नमाये यथा दृष्टे गंधर्वनगरं यथा ।
तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः ॥३१॥

यदेतत् द्वैतस्यासत्त्वमुक्तं युक्तितः, तदेतद्वेदान्तप्रमाणावगतमित्याह । स्वप्नश्च माया च स्वप्नमाये असद्वस्त्वात्मिके असत्यौ सत्यौ सद्वस्त्वात्मिके इव लक्ष्येते अविवेकिभिः । यथा च प्रसारितपण्यापणगृहप्रासादस्त्रीपुंजनपदव्यवहारार्कार्णमिव गंधर्वनगरं दृश्यमानमेव सदकस्मादभावतां गतं दृष्टम् । यथा च स्वप्नमाये दृष्टे असद्रूपे, तथा विश्वमिदं द्वैतं समस्तमसत् दृष्टम् । केष्वाह । वेदान्तेषु । 'नेह नानास्ति किंचन' 'इंद्रो मायाभिः' 'आत्मैवेदमग्र आसीत्' 'ब्रह्मवेदमग्र आसीत्' 'द्वितीयाद्वै भयं भवति' 'न तु तदूद्वितीयमस्ति' 'यत्र

त्वस्य सर्वमात्मैवाभूत्' इत्यादिषु। विचक्षणैर्निपुणतरवस्तुदर्शिभिः पंडितैरित्यर्थः। "तमः श्वभ्रनिभं दृष्टं वर्णबुद्बुदसंनिभम। नाशप्रायं सुखार्द्धानं नाशोत्तरमभावगम ॥" इति व्यासस्मृतेः ॥

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥३२॥

प्रकरणार्थोपसंहारार्थोऽयं श्लोकः। यदा वितथं द्वैतमात्मैवैकः परमार्थतः संस्तदेदं निष्पन्नं भवति– सर्वोऽयं लौकिको वैदिकश्च व्यवहारोऽविद्याविषय एवेति। तदा न निरोधः। निरोधनं निरोधः प्रलयः, उत्पत्तिर्जननं, बद्धः संसारी जीवः, साधकः साधनान्मोक्षस्य, मुमुक्षुर्मोचनार्थी, मुक्तो विमुक्तबंधः। उत्पत्तिप्रलययोरभावात् बद्धादयो न सन्तीत्येषा परमार्थता। कथमुत्पत्तिप्रलययोरभाव इत्युच्यते– द्वैतस्यासत्त्वात्। 'यत्र हि द्वैतमिव भवति' 'य इह नानेव पश्यति' 'आत्मैवेदं सर्वं' 'ब्रह्मैवेदं सर्वम्' 'एकमेवाद्वितीयम्' 'इदं सर्वं यदयमात्मा' इत्यादिनानाश्रुतिभ्यो द्वैतस्यासत्त्वं सिद्धम्। सतो ह्युत्पत्तिः प्रलयो वा स्यान्नासतः शशविषाणादेः। नाप्यद्वैतमुत्पद्यते प्रलीयते वा। अद्वयं च, उत्पत्तिप्रलयवच्चेति विप्रतिषिद्धम्। यस्तु पुनर्द्वैतसंव्यवहारः स रज्जुसर्पवदात्मनि प्राणादिलक्षणः कल्पित इत्युक्तम्। न हि मनोविकल्पनाया रज्जुसर्पादिलक्षणाया रज्ज्वां प्रलय उत्पत्तिर्वा। न च मनसि रज्जुसर्पस्योत्पत्तिः प्रलयो वा, न चोभयतो वा। तथा मानसत्वाविशेषात् द्वैतस्य। नहि नियते मनसि सुषुप्ते वा द्वैतं गृह्यते। अतो मनोविकल्पनामात्रं द्वैतमिति सिद्धम्। तस्मात्सूक्तं— द्वैतस्यासत्त्वान्निरोधाद्यभावः परमार्थतेति। यद्येवं द्वैताभावे शास्त्रव्यापारो, नाद्वैते, विरोधात्। तथा च सति अद्वैतस्य वस्तुत्वे प्रमाणाभावाच्छून्यवादप्रसंगः। द्वैतस्य चाभावात्। न, रज्जुसर्पादिकल्पनाया निरास्पदत्वेऽनुपपत्तिरिति प्रत्युक्तमेतत्कथमुज्जीवसीत्याह— रज्जुरपि सर्पविकल्पस्यास्पदभूता कल्पितैवेति दृष्टान्तानुपपत्तिः। न। विकल्पनाक्षयेऽविकल्पितस्याविकल्पितत्वादेव सत्त्वोपपत्तेः। रज्जुसर्पवदसत्त्वमिति चेत्। न। एकान्तेनाविकल्पितत्वात् अविकल्पितरज्ज्वंशवत्प्राक्सर्पाभावाविज्ञानात्। विकल्पयितुश्च प्राग्विकल्पनोत्पत्तेः सिद्धत्वाभ्युपगमादेवासत्त्वानुपपत्तिः।

कथं पुनः स्वरूपे व्यापाराभावे शास्त्रस्य द्वैतविज्ञाननिवर्तकत्वम्? नैष

दोषः । रज्ज्वां सर्पादिवदात्मनि द्वैतस्याविद्याध्यस्तत्वात् । कथं सुख्यहं दुःखी मूढो जातो मृतो जीर्णो देहवान्पश्यामि व्यक्तोऽव्यक्त कर्ता फली संयुक्तो वियुक्तः क्षीणो वृद्धोऽहं ममेति इत्येवमादय सर्वे आत्मन्यध्यारोप्यन्ते । आत्मा एतेष्वनुगतः सर्वत्राव्यभिचारात् । यथा सर्पधारादिभेदेषु रज्जुः । यदा चैवं विशेष्यस्वरूपप्रत्ययस्य सिद्धत्वान्न कर्तव्यत्वं शास्त्रेण । अकृतकर्तृ च शास्त्रं कृतानुकारित्वेऽप्रमाणम् । यतः अविद्याध्यारोपितसुखित्वादिविशेषप्रतिबंधादेव आत्मनः स्वरूपेणानवस्थानं, स्वरूपावस्थानं च श्रेय इति सुखित्वादिनिवर्तकं शास्त्रमात्मन्यसुखित्वादिप्रत्ययकरणेन नेति नेत्यस्थलादिवाक्यं आत्मस्वरूपवदसुखित्वाद्यपि सुखित्वादिभेदेषु नानुवृत्तोऽस्ति धर्मः । यद्यनुवृत्त स्यात् नाध्यारोपितसुखित्वादिलक्षणो विशेष । यथोष्णत्वगुणविशेषवत्यग्नौ शीतता । तस्मान्निर्विशेष एवात्मनि सुखित्वादयो विशेषाः कल्पिता । यत्त्वसुखित्वादिशास्त्रमात्मनः, तत्सुखित्वादिविशेषनिवृत्त्यर्थमेवेति सिद्धम् । 'सिद्धं तु निवर्तकत्वात्' इत्यागमविदां सूत्रम् ॥३२॥

भावैरसद्भिरेवायमद्वयेन च कल्पित ।
भावा अप्यद्वयेनैव तस्मादद्वयता शिवा ॥३३॥

पूर्वश्लोकार्थस्य हेतुमाह— यथा रज्ज्वामसद्भि सर्पधारादिभिरद्वयेन च रज्जुद्रव्येण सता अयं सर्प इयं धारा, दंडोऽयमिति वा रज्जुद्रव्यमेव कल्प्यते, एवं प्राणादिभिरनंतैरसद्भिरेवाविद्यमानै , न परमार्थतः । न ह्यप्रचलिते मनसि कश्चिद्भाव उपलक्षयितुं शक्यते केनचित् । न चात्मनः प्रचलनमस्ति । प्रचलितस्यैवोपलभ्यमाना भावा न परमार्थतः सन्तः कल्पयितुं शक्याः । अतोऽसद्भिरेव प्राणादिभावैरद्वयेन च परमार्थसता आत्मना रज्जुवत्सर्वविकल्पास्पदभूतेनायं स्वयमेवात्मा कल्पित सदेकस्वभावोऽपि सन् । ते च प्राणादिभावा अप्यद्वयेनैव सता आत्मना विकल्पिता । न हि निरास्पदा काचित्कल्पनोपपद्यते । अतः सर्वकल्पनास्पदत्वात्स्वेनात्मना अद्वयस्य अव्यभिचारात्कल्पनावस्थायामप्यद्वयता शिवा । कल्पना एव त्वशिवाः । रज्जुसर्पादिवत्त्रासादिकारिण्यो हि ताः । अद्वयता अभया । अतः सैव शिवा ॥

नात्मभावेन नानेदं न स्वेनापि कथंचन ।
न पृथङ्नापृथक्किंचिदिति तत्त्वविदो विदुः ॥३४॥

कुतश्चाद्वयता शिवा । नानाभूतं पृथक्त्वमन्यस्यान्यस्माद्यत्र दृष्टं तत्राशिवं भवेत् । नत्वत्राद्वये परमार्थसत्यात्मनि प्राणादिसंसारजातमिदं जगदात्मभावेन परमार्थस्वरूपेण निरूप्यमाणं नाना वस्त्वंतरभूतं भवति । यथा रज्जुस्वरूपेण प्रकाशेन निरूप्यमाणो न नानाभूतः कल्पितः सर्पोऽस्ति तद्वत् । नापि स्वेन प्राणाद्यात्मनेदं विद्यते कदाचिदपि, रज्जुसर्पवत्कल्पितत्वादेव । तथा अन्योन्यं न पृथक्प्राणादि वस्तु, यथा अश्वान्महिषः पृथग्विद्यते एवम् । अतोऽसत्त्वान्नापृथग्विद्यतेऽन्योन्यं परेण वा किंचिदिति । एवं परमार्थतत्त्वमात्मविदो ब्राह्मणा विदुः । अतोऽशिवहेतुत्वाभावादद्वयतैव शिवेत्यभिप्रायः ॥

वीतरागभयक्रोधैर्मुनिभिर्वेदपारगैः ।
निर्विकल्पो ह्ययं दृष्टः प्रपंचोपशमोऽद्वयः ॥३५॥

तदेतत्सम्यग्दर्शनं स्तूयते— विगतरागभयक्रोधादिसर्वदोषैः सर्वदा मुनिभिर्मननशीलैर्विवेकिभिः वेदपारगैः अवगतवेदान्तार्थतत्त्वैर्ज्ञानिभिर्निर्विकल्पः सर्वविकल्पशून्योऽयमात्मा दृष्टः उपलब्धो वेदान्तार्थतत्परैः । प्रपंचोपशमः प्रपंचो द्वैतभेदविस्तारः तस्योपशमोऽभावो यस्मिन्स आत्मा प्रपंचोपशमः । अत एवाद्वयः । विगतदोषैरेव पंडितैर्वेदान्तार्थतत्परैः संन्यासिभिः अयमात्मा द्रष्टुं शक्यो, नान्यैः रागादिकलुषितचेतोभिः स्वपक्षपातिदर्शनैः तार्किकादिभिरित्यभिप्रायः ॥

तस्मादेवं विदित्वैनमद्वैते योजयेत्स्मृतिम् ।
अद्वैतं समनुप्राप्य जडवल्लोकमाचरेत् ॥३६॥

यस्मात्सर्वानर्थप्रशमरूपत्वादद्वयं शिवमभयं, अत एवं विदित्वैनमद्वैते स्मृतिं योजयेत् । अद्वैतावगमायैव स्मृतिं कुर्यादित्यर्थः । तच्चाद्वैतमवगम्य अहमस्मि परं ब्रह्मेति विदित्वाऽशनायाद्यतीतं साक्षादपरोक्षादजमात्मानं सर्वलोकव्यवहारातीतं जडवल्लोकमाचरेत् । अप्रख्यापयन्नात्मानमहमेवंविध इत्यभिप्रायः ॥

निस्तुतिर्निर्नमस्कारो निःस्वधाकार एव च ।
चलाचलनिकेतश्च यतिर्यादृच्छिको भवेत् ॥३७॥

कया चर्यया लोकमाचरेदित्याह— स्तुतिनमस्कारादिसर्वकर्मवर्जितः त्यक्तसर्वबाह्यैषणः प्रतिपन्नपरमहंसपारिव्राज्य इत्यभिप्रायः । 'एतं वै तमात्मानं विदित्वा' इत्यादिश्रुतेः । "तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः" इत्यादि-

स्मृतेश्च । चलं शरीरं, प्रतिक्षणमन्यथाभावात् । अचलमात्मतत्त्वम् । यदा कदाचिद्भोजनादिव्यवहारनिमित्तमाकाशवदचलं स्वरूपमात्मतत्त्व आत्मनो निकेतमाश्रयमात्मस्थिति विस्मृत्याहमिति मन्यते यदा, तदा चलो देहो निकेतो यस्य सोऽयमेवं चलाचलनिकेतो विद्वान्न पुनर्बाह्यविषयाश्रय. । स च यादृच्छिको भवेत् । यदृच्छाप्राप्तकौपीनाच्छादनग्रासमात्रदेहस्थितिरित्यर्थः ॥

तत्त्वमाध्यात्मिकं दृष्ट्वा तत्त्वं दृष्ट्वा तु बाह्यतः ।
तत्त्वीभूतस्तदारामस्तत्त्वादप्रच्युतो भवेत् ॥३८॥

इति गौडपादीयकारिकासु वैतथ्याख्यं द्वितीयं प्रकरणम् ॥

बाह्यं पृथिव्यादि तत्त्वमाध्यात्मिकं च देहादिलक्षणं रज्जुसर्पादिवत्स्वप्नमायादिवच्चासत । 'वाचारंभणं विकारो नामधेयम्' इत्यादिश्रुतेः । आत्मा च सबाह्याभ्यंतरो ह्यजोऽपूर्वोऽनपरोऽनंतरोऽबाह्य· कृत्स्न आकाशवत्सर्वगतः सूक्ष्मोऽचलो निर्गुणो निष्कलो निष्क्रियः 'तत्सत्यं स आत्मा तत्त्वमसि' इति श्रुतेः । इत्येवं तत्त्वं दृष्ट्वा तत्त्वीभूतस्तदारामो न बाह्यरमणः । यथाऽतत्त्वदर्शी कश्चिच्चित्तमात्मत्वेन प्रतिपन्नश्चित्तचलनमनु चलितमात्मानं मन्यमानस्तत्त्वाच्चलितं देहादिभूतमात्मान कदाचिन्मन्यते प्रच्युतोऽहमात्मतत्त्वादिदानींमिति । समाहिते तु मनसि कदाचित्तत्त्वभूतं प्रसन्नात्मानं मन्यत इदानींमस्मि तत्त्वीभूत इति । न तथा आत्मविद्भवेत् । आत्मन एकरूपत्वात्स्वरूपप्रच्यवनासंभवाच्च । सदैव ब्रह्मास्मीत्यप्रच्युतो भवेत्तत्त्वात् । सदाऽप्रच्युतात्मतत्त्वदर्शनो भवेदित्यभिप्रायः । "शुनि चैव श्वपाके च" "समं सर्वेषु भूतेषु" इत्यादिस्मृते. ॥

इति वैतथ्याख्यं द्वितीयं प्रकरणम् ॥

अद्वैतप्रकरणम् ॥३॥

उपासनाश्रितो धर्मो जाते ब्रह्मणि वर्तते ।
प्रागुत्पत्तेरजं सर्वं तेनासौ कृपणः स्मृतः ॥१॥

ओंकारनिर्णये उक्तः प्रपंचोपशमः शिवोऽद्वैत आत्मेति प्रतिज्ञामात्रेण । 'जाते द्वैतं न विद्यते' इति च । तत्र द्वैताभावस्तु वैतथ्यप्रकरणेन स्वप्नमायागंधर्वनगरादिदृष्टान्तै· दृश्यत्वाद्यंतत्वादिहेतुभिस्तर्केण च प्रतिपादितः । अद्वैतं किमाग-

ममात्रेण प्रतिपत्तव्यं आहोस्वित्तर्केणापीत्यत आह– शक्यते तर्केणापि ज्ञातुम् । तत्कथमित्यद्वैतप्रकरणमारभ्यते । उपास्योपासनादिभेदजातं सर्वं वितथं, केवलश्चात्मा अद्वयः परमार्थः इति स्थितमतीति प्रकरणे । यत उपासनाश्रितः उपासनामात्मनो मोक्षसाधनत्वेन गत उपासकोऽहं ममोपास्यं ब्रह्म । तदुपासनं कृत्व जाते ब्रह्मणीदानीं वर्तमानोऽजं ब्रह्म शरीरपातादूर्ध्वं प्रतिपत्स्ये प्रागुत्पत्तेश्चाजमिदं सर्वमहं च । यदात्मकोऽहं प्रागुत्पत्तेरिदानीं जातो जाते ब्रह्मणि च वर्तमान उपासनया पुनस्तदेव प्रतिपत्स्ये इत्येवमुपासनाश्रितो धर्मः साधको येनैवं क्षुद्रब्रह्मवित् । तेनासौ कारणेन कृपणो दीनोऽल्पकः स्मृतो नित्याजब्रह्मदर्शिभिः इत्यभिप्रायः । 'यद्वाचानभ्युदितं येन वागभ्युद्यते । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' इत्यादिश्रुतेस्तलवकाराणाम् ॥

अतो वक्ष्याम्यकार्पण्यमजाति समतां गतम् ।
यथा न जायते किंचिज्जायमानं समंततः ॥२॥

सबाह्याभ्यंतरमजमात्मानं प्रतिपत्तुमशक्नुवन्नविद्यया दीनमात्मानं मन्यमानो जातोऽहं जाते ब्रह्मणि वर्ते तदुपासनाश्रितः सन्ब्रह्म प्रतिपत्स्ये इत्येवं प्रतिपन्नः कृपणो भवति यस्मात्, अतो वक्ष्याम्यकार्पण्यमकृपणभावमजं ब्रह्म । तद्धि कार्पण्यास्पदम् 'यत्रान्योऽन्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पं' 'मर्त्यमसत्' 'वाचारंभणं विकारो नामधेयम्' इत्यादिश्रुतिभ्यः । तद्विपरीतं सबाह्याभ्यंतरमजमकार्पण्यं भूमाख्यं ब्रह्म । यत्प्राप्य अविद्याकृतसर्वकार्पण्यनिवृत्तिः तदकार्पण्यं वक्ष्यामीत्यर्थः । तदजाति, अविद्यमाना जातिरस्य । समता गतं सर्वसाम्यं गतम् । कस्मात् ? अवयववैषम्याभावात् । यद्धि सावयवं वस्तु तदवयववैषम्यं गच्छज्जायत इत्युच्यते । इदं तु निरवयवत्वात्समता गतमिति न कैश्चिदवयवैः स्फुटति । अतोऽजात्यकार्पण्यम् । समंततः समंताद्यथा न जायते किंचिदल्पमपि न स्फुटति रज्जुसर्पवदविद्याकृतदृष्ट्या जायमानं येन प्रकारेण न जायते सर्वतोऽजमेव ब्रह्म भवति, तथा तं प्रकारं श्रुत्यिवत्यर्थः ॥

आत्मा ह्याकाशवज्जीवैर्घटाकाशैरिवोदितः ।
घटादिवच्च संघातैर्जातावेतन्निदर्शनम् ॥३॥

अजाति ब्रह्माकार्पण्यं वक्ष्यामीति प्रतिज्ञातं, तत्सिद्धयर्थं हेतुं दृष्टान्तं च वक्ष्यामीत्याह— आत्मा परो हि यस्मादाकाशवत्सूक्ष्मो निरवयवः सर्वगत आ-

काशवदुक्तो जीवैः क्षेत्रज्ञैर्घटाकाशैरिव घटाकाशतुल्यैः उदित उक्तः । स एव आकाशसमः पर आत्मा । अथवा घटाकाशैर्यथा आकाश उदित उत्पन्नस्तथा परो जीवात्माभिरुत्पन्नः । जीवात्मनां परस्मादात्मनः उत्पत्तिर्या श्रूयते वेदान्तेषु सा महाकाशात् घटाकाशोत्पत्तिसमा न परमार्थत इत्यभिप्रायः । तस्मादेवाकाशात घटादयः संघाता यथोत्पद्यन्ते एवमाकाशस्थानीयात्परमात्मनः पृथिव्यादिभूतसंघाता आध्यात्मिकाश्च कार्यकरणलक्षणा रज्जुसर्पवद्विकल्पिता जायन्ते । अत उच्यते— घटादिवच्च संघातैरुदित इति । यदा मंदबुद्धिप्रतिपिपादयिषया श्रुत्या आत्मनो जातिरुच्यते जीवादीना, तदा जातावुपगम्यमानायामेतन्निदर्शनं दृष्टान्तो यथोदिताकाशवदित्यादिः ॥

घटादिषु प्रलीनेषु घटाकाशादयो यथा ।
आकाशे संप्रलीयन्ते तद्वज्जीवा इहात्मनि ॥४॥

यथा घटाद्युत्पत्त्या घटाकाशाद्युत्पत्तिः, यथा च घटादिप्रलये घटाकाशादि प्रलयः, तद्वदेहादिसंघातोत्पत्त्या जीवोत्पत्तिस्तत्प्रलये च जीवानामिह आत्मनि प्रलयो न स्वत इत्यर्थः ॥

यथैकस्मिन्घटाकाशे रजोधूमादिभिर्युते ।
न सर्वे संप्रयुज्यन्ते तद्वज्जीवाः सुखादिभिः ॥५॥

सर्वदेहेष्वात्मैकत्वे एकस्मिन्ननमरणसुखदुःखादिमत्यात्मनि सर्वात्मना तत्संबंध क्रियाफलसांकर्यं च स्यादिति ये आहुर्द्वैतिनस्तान्प्रतीदमुच्यते— यथैकस्मिन्घटाकाशे रजोधूमादिभिर्युते संयुक्ते न सर्वे घटाकाशादय तद्वज्जोधूमादिभिः संयुज्यन्ते तद्वज्जीवाः सुखादिभिः ॥

नन्वेक एव आत्मा । बाढम् । ननु न श्रुतं त्वया आकाशवत्सर्वसंघातेष्वेक एवात्मेति ? यद्येक एवात्मा तर्हि सर्वत्र सुखी दुःखी च स्यात् । न चेदं सांख्यचोद्यं संभवति । न हि सांख्य आत्मनः सुखदुःखादिमत्त्वमिच्छति, बुद्धिसमवायाभ्युपगमात्सुखदुःखादीनाम् । न चोपलब्धिस्वरूपस्यात्मनो भेदकल्पनायां प्रमाणमस्ति । भेदाभावे प्रधानस्य पारार्थ्यानुपपत्तिरिति चेत् । न । प्रधानकृतस्यार्थस्य आत्मन्यसमवायात् । यदि हि प्रधानकृतो बंधो मोक्षो वा अर्थः पुरुषेषु भेदेन समवैति ततः प्रधानस्य पारार्थ्यमात्मैकत्वे नोपपद्यते इति युक्ता पुरुषभेदकल्पना । न च सांख्यैर्बंधो मोक्षो वार्थः पुरुषसमवेतोऽभ्युपगम्यते ।

निर्विशेषाश्च चेतनमात्रा आत्मानोऽभ्युपगम्यन्ते । अतः पुरुषसत्तामात्रप्रयुक्तमेव प्रधानस्य पारार्थ्यं सिद्धं, न तु पुरुषभेदप्रयुक्तमिति । अतः पुरुषभेदकल्पनायां न प्रधानस्य पारार्थ्यं हेतुः । न चान्यत्पुरुषभेदकल्पनाया प्रमाणमस्ति सांख्यानाम् । परसत्तामात्रमेव चेतनन्निमित्तीकृत्य स्वयं बध्यते मुच्यते च प्रधानम् । परश्चोपलब्धिमात्रसत्तास्वरूपेण प्रधानप्रवृत्तौ हेतुर्न केनचिद्विशेषेणेति, केवलमूढतयैव पुरुषभेदकल्पना वेदार्थपरित्यागश्च । ये त्वाहुर्वैशेषिकादयः इच्छादय आत्मसमवायिन इति । तदप्ययुक्तम् । स्मृतिहेतूनां संस्काराणामप्रदेशत्वात्मन्यसमवायात् । आत्ममनःसंयोगाच्च स्मृत्युत्पत्तेः स्मृतिनियमानुपपत्तिः । युगपद्वा सर्वस्मृत्युत्पत्तिप्रसंगः । न च भिन्नजातीयानां स्पर्शादिहीनानामात्मनां मनआदिभिः संबंधो युक्तः । न च द्रव्याद्गुणाः कर्मसामान्यविशेषसमवाया वा भिन्नाः सन्ति परेषाम् । यदि ह्ययुतसिद्धाभिन्ना एव द्रव्यात्स्युरिच्छादयश्चात्मन तथा च सति द्रव्येण तेषां संबंधानुपपत्तिः । अयुतसिद्धानां समवायलक्षणः संबंधो न विरुध्यत इति चेत् । न । इच्छादिभ्योऽनित्येभ्य आत्मनो नित्यस्य पूर्वसिद्धत्वान्नायुतसिद्धत्वोपपत्तिः । आत्मना अयुतसिद्धत्वे च इच्छादीनामात्मगतमहत्त्ववन्नित्यत्वप्रसंगः । स चानिष्टः । आत्मनोऽनिर्मोक्षप्रसंगात् ॥

समवायस्य च द्रव्यादन्यत्वे सति द्रव्येण संबंधान्तरं वाच्यं, यथा द्रव्यगुणयोः । समवायो नित्यसंबंध एवेति न वाच्यमिति चेत् । तथा सति समवायसंबंधवता नित्यसंबंधप्रसंगात्पृथक्त्वानुपपत्तिः । अत्यंतपृथक्त्वे च द्रव्यादीनां स्पर्शवदस्पर्शद्रव्ययोरिव पृथग्वर्थानुपपत्तिः । इच्छाद्युपजनापायवद्गुणवत्त्वे च आत्मनोऽनित्यत्वप्रसंगः । देहफलादिवत्सावयवत्वं विक्रियावत्त्वं च देहादिवदेवेति दोषावपरिहार्यौ । यथा त्वाकाशस्य अविद्याध्यारोपितघटाद्युपाधिकृतरजोधूममलवत्त्वादिदोषवत्त्वं तथात्मनः अविद्याध्यारोपितबुद्ध्याद्युपाधिकृतसुखदुःखादिदोषवत्त्वे बंधमोक्षादयो व्यावहारिका न विरुध्यन्ते । सर्ववादिभिरविद्याकृतव्यवहाराभ्युपगमात परमार्थानभ्युपगमाच्च । तस्मादात्मभेदपरिकल्पना वृथैव तार्किकैः क्रियत इति ॥

रूपकार्यसमाख्याश्च भिद्यन्ते तत्र तत्र वै ।
आकाशस्य न भेदोऽस्ति तद्वज्जीवेषु निर्णयः ॥६॥

कथं पुनरात्मभेदनिमित्त एव व्यवहार एकस्मिन्नात्मन्यविद्याकृत उपपद्यत

इति । उच्यते । यथेहाकाशे एकस्मिन् घटकरकाषवरकाद्याकाशानां अल्पत्वमहत्त्वादिरूपाणि भिद्यन्ते, तथा कार्यमुदकाहरणधारणशयनादि, समाख्याश्च घटाकाशकरकाकाश इत्याद्यास्तत्कृताश्च भिन्ना दृश्यन्ते । तत्र तत्र वै व्यवहारविषये इत्यर्थः । सर्वोऽयमाकाशे रूपादिभेदकृतो व्यवहारो अपरमार्थ एव । परमार्थतस्त्वाकाशस्य न भेदोऽस्ति । न चाकाशभेदनिमित्तो व्यवहारोऽस्त्यंतरेण परोपाधिकृतं द्वारम् । यथैतत् तद्वद्देहोपाधिभेदकृतेषु जीवेषु घटाकाशस्थानीयेष्वात्मसु निरूपणात्कृतो बुद्धिमद्भिर्निर्णयो निश्चय इत्यर्थः ॥

नाकाशस्य घटाकाशो विकारावयवौ यथा ।
नैवात्मनः सदा जीवो विकारावयवौ तथा ॥७॥

ननु तत्र परमार्थकृत एव घटाकाशादिषु रूपकार्यादिभेदव्यवहार इति । नैतदस्ति । यस्मात्परमार्थाकाशस्य घटाकाशो न विकारः । यथा सुवर्णस्य रुचकादिः यथा वा अपां फेनबुद्बुदहिमादिः । नाप्यवयवो, यथा वृक्षस्य शाखादिः । न तथा आकाशस्य घटाकाशो विकारावयवौ यथा, तथा नैवात्मनः परस्य परमार्थसतो महाकाशस्थानीयस्य घटाकाशस्थानीयो जीवः सदा सर्वदा यथोक्तदृष्टान्तवन्न विकारो, नाप्यवयव । अतः आत्मभेदकृतो व्यवहारो मृषेत्यर्थः ॥

यथा भवति बालानां गगनं मलिनं मलैः ।
तथा भवत्यबुद्धानामात्मापि मलिनो मलैः ॥८॥

यस्माद्यथा घटाकाशादिभेदबुद्धिनिबंधनो रूपकार्यादिभेदव्यवहारः, तथा देहोपाधिजीवभेदकृतो जन्ममरणादिव्यवहारः । तस्मात्तत्कृतमेव क्लेशकर्मफलमलवत्त्वमात्मनो न परमार्थतः, इत्येतमर्थं दृष्टान्तेन प्रतिपिपादयिषन्नाह– यथा भवति लोके बालानामविवेकिनां गगनमाकाशं घनरजोधूमादिमलैर्मलिनं मलवन्न गगनयाथात्म्यविवेकिनाम्, तथा भवत्यात्मा परोऽपि यो विज्ञाता प्रत्यक्क्लेशकर्मफलमलैर्मलिनोऽबुद्धानां प्रत्यगात्मविवेकरहितानां नात्मविवेकवताम् । नहि ऊषरदेशः तृड्वत्प्राण्यध्यारोपितोदकफेनतरंगादिमांस्तथा नात्मा अबुधारोपितक्लेशादिमलैर्मालिनो भवतीत्यर्थः ॥

मरणे संभवे चैव गत्यागमनयोरपि ।
स्थितौ सर्वशरीरेषु चाकाशेनाविलक्षणः ॥९॥

पुनरप्युक्तमेवार्थं प्रपंचयति— घटाकाशजन्ममनाशगमनागमनस्थितिवत्सर्वशरीरेष्वात्मनो जन्ममरणादिराकाशेनाविलक्षणः प्रत्येतव्य इत्यर्थः ॥

संघाताः स्वप्नवत्सर्व आत्ममायाविसर्जिताः ।
आधिक्ये सर्वसाम्ये वा नोपपत्तिर्हि विद्यते ॥१०॥

घटादिस्थानीयास्तु देहादिसंघाताः स्वप्नदृश्यदेहादिवन्मायाविकृतदेहादिवच्च आत्ममायाविसर्जिता., आत्मनो मायाऽविद्या तया प्रत्युपस्थापिता·, न परमार्थत· सन्तीत्यर्थः । यद्याधिक्यमाधिकभाव· तिर्यग्देहाद्यपेक्षया देवादिकार्यकारणसंघातानां, यदि वा सर्वेषां समतैव, तेषां न उपपत्तिसंभव· सद्भावप्रतिपादको हेतुर्विद्यते नास्ति । हि यस्मात । तस्मादविद्याकृता एव, न परमार्थत सन्तीत्यर्थः ॥

रसादयो हि ये कोशा व्याख्यातास्तैत्तिरीयके ।
तेषामात्मा परो जीवः खं यथा संप्रकाशितः ॥११॥

उत्पत्त्यादिवर्जितस्य अद्वयस्यास्य आत्मतत्त्वस्य श्रुतिप्रमाणकत्वप्रदर्शनार्थं वाक्यान्युपन्यस्यन्ते । रसादयोऽन्नरसमय· प्राणमय इत्येवमादयः कोशा इव कोशा अस्यादेः, उत्तरोत्तरापेक्षया बहिर्भावात्पूर्वपूर्वस्य व्याख्याता विस्पष्टमाख्यातास्तैत्तिरीयके तैत्तिरीयकशाखोपनिषद्ब्राह्मण्या, तेषां कोशानामात्मा येनात्मना पंचापि कोशा आत्मवन्तोऽन्तरतमेन । स हि सर्वेषां जीवननिमित्तत्वाज्जीवः । कोऽसावित्याह— पर एवात्मा यः पूर्वम् 'सत्यं ज्ञानमनंतं ब्रह्म' इति प्रकृतः । यस्मादात्मन· स्वप्नमायादिवदाकाशादिक्रमेण रसादयः कोशलक्षणाः संघाता आत्ममायाविसर्जिता इत्युक्तम । स आत्माऽस्माभिर्यथा खं तथेति संप्रकाशितः, 'आत्मा ह्याकाशवत्' इत्यादिश्लोकैः । न तार्किकपरिकल्पितात्मवत्पुरुषबुद्धिप्रमाणगम्य इत्यभिप्रायः ॥

द्वयोर्द्वयोर्मधुज्ञाने परं ब्रह्म प्रकाशितम् ।
पृथिव्यामुदरे चैव यथाकाशः प्रकाशितः ॥१२॥

किं चाधिदैवमध्यात्मं च तेजोमयोऽमृतमयः पुरुषः पृथिव्याद्यंतर्गतो यो विज्ञाता पर एवात्मा ब्रह्म सर्वमिति द्वयोर्द्वयोः आद्वैतक्षयात्परं ब्रह्म प्रकाशितम् । केत्याह । ब्रह्मविद्याख्यं मध्वमृतं अमृतत्वं मोदनहेतुत्वात् तद्विज्ञायते यस्मिन्निति

मधुज्ञानं मधुब्राह्मणं तस्मिन्नित्यर्थः । किमिवेत्याह— पृथिव्यामुदरे चैव यथैक आकाशोऽनुमानेन प्रकाशितो लोके तद्वदित्यर्थः ॥

जीवात्मनोरनन्यत्वमभेदेन प्रशस्यते ।
नानात्वं निंद्यते यच्च तदेवं हि समंजसम् ॥१३॥

यद्युक्तिश्रुतिसिद्धं निर्धारितं जीवस्य परस्य चात्मनो जीवात्मनोरनन्यत्वमभेदेन प्रशस्यते स्तूयते शास्त्रेण व्यासादिभिश्च । यच्च सर्वप्राणिसाधारणं स्वाभाविकं शास्त्रबहिर्मुखैः कुतार्किकैर्विरचितं नानात्वदर्शनं निंद्यते 'न तु तदद्वितीयमस्ति' 'द्वितीयाद्वै भयं भवति' 'उदरमंतरं कुरुते । अथ तस्य भयं भवति' 'इदं सर्वं यदयमात्मा' 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इत्यादिवाक्येश्चान्यैश्च ब्रह्मविद्भिः । यच्चैतत्तदेवं हि समंजसमृज्ववबोधं न्याय्यमित्यर्थः । यास्तु तार्किकपरिकल्पिता कुदृष्टयस्ता अनृज्व्यो निरूप्यमाणा न घटनां प्राचन्तीत्यभिप्रायः ॥

जीवात्मनोः पृथक्त्वं यत्प्रागुत्पत्तेः प्रकीर्तितम् ।
भविष्यद्वृत्त्या गौणं तन्मुख्यत्वं हि न युज्यते ॥१४॥

ननु श्रुत्यापि जीवपरमात्मनो पृथक्त्वं यत्प्रागुत्पत्तेः उत्पत्त्यर्थोपनिषद्वाक्येभ्य पूर्वं प्रकीर्तितं कर्मकांडे । अनेकशः कामभेदतः इदंकामोऽदःकाम इति । परश्च "स दाधार पृथिवा द्याम्" इत्यादिमंत्रवर्णे । तत्र कथं कर्मज्ञानकांडवाक्यविरोधे ज्ञानकांडवाक्यार्थस्यैवैकत्वस्य सामंजस्यमवधार्यत इति । अत्रोच्यते— 'यतो वा इमानि भूतानि जायन्ते' 'यथाग्नेः क्षुद्रा विस्फुलिंगाः' 'तस्माद्वा एतस्मादात्मन आकाशः संभूत' 'तदैक्षत तत्तेजोऽसृजत' इत्याद्युत्पत्त्यर्थोपनिषद्वाक्येभ्यः प्राक्पृथक्त्वं कर्मकांडे प्रकीर्तितं यत्तन्न परमार्थम् । किं तर्हि ? गौणम् । महाकाशघटाकाशादिभेदवत । यथेदं पचतीति भविष्यद्वृत्त्या तद्वत । न हि भेदवाक्यानां कदाचिदपि मुख्यभेदार्थत्वमुपपद्यते । स्वाभाविकाविद्यावत्प्राणिभेददृष्टयनुवादित्वात् आत्मभेदवाक्यानाम् । इह चोपनिषत्सु उत्पत्तिप्रलयादिवाक्यैः जीवपरमात्मनोरेकत्वमेव प्रतिपिपादयिषितम् । 'तत्त्वमसि' 'अन्योऽसावन्योऽहमस्मीति न स वेद' इत्यादिभिः । अत उपनिषत्स्वेकत्वं श्रुत्या प्रतिपिपादयिषितं भविष्यतीति भाविनामेकवृत्तिमाश्रित्य लोके भेददृष्टयनुवादो गौण एवेत्यभिप्रायः । अथवा 'तदैक्षत' 'तत्तेजोऽसृजत' इत्याद्युत्पत्तेः प्राक् 'एक-

मेवाद्वितीयम्' इत्येकत्वं प्रकीर्तितम् । तदेव च 'तत्सत्य स आत्मा तत्त्वमसि' इत्येकत्वं भविष्यतीति तां भविष्यद्वृत्तिमपेक्ष्य यज्जीवात्मनो. पृथक्त्वं यत्र क्वचिद्वाक्ये गम्यमानं, तद्वैणम् । यथौदनं पचतीति तद्वत् ॥

मृल्लोहविस्फुलिंगाद्यैः सृष्टिर्या चोदितान्यथा ।
उपायः सोऽवताराय नास्ति भेदः कथंचन ॥१५॥

ननु यद्युत्पत्तेः प्रागजं सर्वमेकमेवाद्वितीयं तथाप्युत्पत्तिरूर्ध्वं जातमिदं सर्वं जीवाश्च भिन्ना इति । मैवम् । अन्यार्थत्वादुत्पत्तिश्रुतीनाम् । पूर्वमपि परिहृत एवायं दोष । स्वप्नवदात्ममायाविसर्जिताः संघाता घटाकाशोत्पत्तिभेदादिवर्जीवानामुत्पत्तिभेदादीरिति । इत एवोत्पत्तिभेदादिश्रुतिभ्य आकृष्येह पुनरुत्पत्तिश्रुतीना ऐदंपर्यप्रतिपिपादयिषयोपन्यास । मृल्लोहविस्फुलिंगादिदृष्टान्तोपन्यासैः सृष्टिर्या चोदिता प्रकाशिता कल्पिता अन्यथान्यथा च, स सर्व सृष्टिप्रकारो जीवपरमात्मैकत्वबुद्ध्यवताराय उपायोऽस्माकम् । यथा प्राणसंवाद वागाद्यासुरपाप्मसंवधाद्याख्यायिका कल्पिता प्राणवैशिष्ट्यबोधावताराय, तदप्यसिद्धमिति चेत् । न । शाखाभेदेष्वन्यथान्यथा च प्राणादिसंवादश्रवणात् । यदि हि संवादः परमार्थ एवाभेदैकरूप एव संवाद. सर्वशाखास्वश्रोष्यत विरुद्धानेकप्रकारेण नाश्रोष्यत । श्रयते तु । तस्मान्न तादर्थ्यं संवादश्रुतीनाम् । तथोत्पत्तिवाक्यानि प्रत्येतव्यानि । कल्पसर्गभेदात्संवादश्रुतीना उत्पत्तिश्रुतीना च प्रतिसर्गमन्यथात्वमिति चेन्न । निष्प्रयोजनत्वाद्यथोक्तबुद्ध्यवतारप्रयोजनव्यतिरेकेण । न ह्यन्यप्रयोजनवत्त्वं संवादोत्पत्तिश्रुतीनां शक्यं कल्पयितुम् । तथात्वप्रतिपत्तेर्ध्यानार्थमिति चेत् । न । कलहोत्पत्तिप्रलयाना प्रतिपत्तेरानिष्टत्वात । तस्मादुत्पत्त्यादिश्रुतयः आत्मैकत्वबुद्ध्यवतारायैव नान्यार्था· कल्पयितुं युक्ता । अतो नास्त्युत्पत्त्यादिकृतो भेद कथंचन ॥

आश्रमास्त्रिविधा हीनमध्यमोत्कृष्टदृष्टयः ।
उपासनोपदिष्टेयं तदर्थमनुकंपया ॥१६॥

यदि पर एवात्मा नित्यशुद्धबुद्धमुक्तस्वभाव एक· परमार्थः सन 'एकमेवाद्वितीयम्' इत्यादिश्रुतिभ्यः, अग्रदन्यत्किमर्थेयमुपासनोपदिष्टा ? 'आत्मा वा अरे द्रष्टव्य·' 'य आत्मापहतपाप्मा' 'स क्रतुं कुर्वीत' 'आत्मेत्येवोपासीत' इत्यादिश्रुतिभ्य· ? कर्माणि चाग्निहोत्रादीनि ? शृणु तत्र कारणम । आश्रमा आश्र-

मिणोऽधिकृताः । वर्णिनश्च मार्गगाः । आश्रमशब्दस्य प्रदर्शनार्थत्वात्त्रिविधाः । कथम् ? हीनमध्यमोत्कृष्टदृष्टयः । हीना निकृष्टा मध्यमोत्कृष्टा च दृष्टिर्दर्शनसामर्थ्यं येषां ते, मंदमध्यमोत्तमबुद्धिसामर्थ्योपेता इत्यर्थः । उपासनोपदिष्टेयं तदर्थं मंदमध्यमदृष्ट्याश्रमाद्यर्थं कर्माणि च । न चात्मैक एवाद्वितीय इति निश्चितोत्तमदृष्ट्यर्थम् । दयालुना वेदेनानुकंपया सन्मार्गगाः सन्तः कथमिमामुत्तमामेकत्वदृष्टिं प्राप्नुयुरिति । 'यन्मनसा न मनुते येनाहुर्मनो मतम् । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥' 'तत्त्वमसि' 'आत्मैवेदं सर्वम्' इत्यादिश्रुतिभ्यः ॥

स्वसिद्धान्तव्यवस्थासु द्वैतिनो निश्चिता दृढम् ।
परस्परं विरुध्यन्ते तैरयं न विरुध्यते ॥१७॥

शास्त्रोपपत्तिभ्यामबधार्यतत्वात् अद्वयात्मदर्शनं सम्यग्दर्शनं तद्विपर्यत्वान्मिथ्यादर्शनमन्यत् । इतश्च मिथ्यादर्शनं द्वैतिनां रागद्वेषादिदोषाम्पदत्वात् । कथं ? स्वसिद्धान्तव्यवस्थासु स्वसिद्धान्तरचनानियमेषु कपिलकणादवुद्धार्हतादिदृष्टयनुसारिणो द्वैतिनो निश्चिता । एवमेवैष परमार्थो नान्यथेति तत्र तत्रानुरक्ताः प्रतिपक्षं चान्मनः पश्यन्तस्तं द्विषन्त इत्येवं रागद्वेषोपेताः स्वसिद्धान्तदर्शननिमित्तमेव परस्परमन्योन्यं विरुध्यन्ते । तैरन्योन्यविरोधिभिः अस्मदीयोऽयं वैदिकः सर्वानन्यत्वादात्मैकत्वदर्शनपक्षो न विरुध्यते, यथा स्वहस्तपादादिभिः । एवं रागद्वेषादिदोषानास्पदत्वात् आत्मैकत्वबुद्धिरेव सम्यग्दर्शनमित्यभिप्रायः ॥

अद्वैतं परमार्थो हि द्वैतं तद्भेद उच्यते ।
तेषामुभयथा द्वैतं तेनायं न विरुध्यते ॥१८॥

केन हेतुना तैर्न विरुध्यत इत्युच्यते— अद्वैतं परमार्थो हि यस्मात् द्वैतं नानात्वं तस्माद्वैतस्य भेदः तद्भेदः, तस्य कार्यमित्यर्थः । 'एकमेवाद्वितीयम्' 'तत्तेजोऽसृजत' इति श्रुतेः । उपपत्तेश्च । स्वचित्तस्पंदनाभावे समाधौ मूर्छायां सुषुप्तौ चाभावात् । अतस्तद्भेद उच्यते द्वैतम् । द्वैतिनां तु तेषां परमार्थतश्चापरमार्थतश्च उभयथापि द्वैतमेव । यदि च तेषां भ्रान्तानां द्वैतदृष्टिः अस्माकमद्वैतदृष्टिरभ्रान्तानाम् । तेनायं हेतुनाऽस्मत्पक्षो न विरुध्यते तैः । 'इंद्रो मायाभिः पुरुरूप ईयते' 'न तु तद्द्वितीयमस्ति'इति श्रुतेः । यथा मत्तगजारूढ उन्मत्तं भूमिष्ठं प्रति गजारूढोऽहं वाहय मां प्रतीति ब्रुवाणमपि तं प्रति न

वाहयत्यविरोधबुद्ध्या, तद्वत् । ततः परमार्थतो ब्रह्मविदात्मैव द्वैतिनाम । तेनायं हेतुना अस्मत्पक्षो न विरुध्यते तैः ॥

मायया भिद्यते ह्येतन्नान्यथाजं कथंचन ।
तत्त्वतो भिद्यमाने हि मर्त्यतामृतं व्रजेत् ॥१९॥

द्वैतमद्वैतभेद इत्युक्ते द्वैतमप्यद्वैतवत्परमार्थसदिति स्यात्कस्यचिदाशंकेत्यत आह--- यत्परमार्थसदद्वैतं, मायया भिद्यते ह्येतत्तैमिरिकानेकचंद्रवद्रज्जुः सर्पधारादिभिर्भेदैरिव । न परमार्थतो, निरवयवत्वादात्मन. । सावयवं ह्यवयवान्यथात्वेन भिद्यते । यथा मृद् घटादिभेदैः । तस्मान्निरवयवमजं नान्यथा कथंचन केनचिदपि प्रकारेण न भिद्यते इत्यभिप्राय. । तत्त्वतो भिद्यमानं ह्यमृतमजमद्वयं स्वभावतः सन्मर्त्यतां व्रजेत । यथाग्निः शीतताम् । तच्चानिष्टं स्वभाववैपरीत्यगमनम् । सर्वप्रमाणविरोधात् । अजमव्ययमात्मतत्त्वं माययैव भिद्यते न परमार्थतः । तस्मान्न परमार्थसत द्वैतम् ॥

अजातस्यैव भावस्य जातिमिच्छन्ति वादिनः ।
अजातो ह्यमृतो भावो मर्त्यतां कथमेष्यति ॥२०॥

ये तु पुन केचिदुपनिषद्व्याख्यातारो ब्रह्मवादिनो वावदूकाः अजातस्यैव आत्मतत्त्वस्यामृतस्य स्वभावतो जातिमुत्पत्तिमिच्छन्ति परमार्थत एव, तेषां जातं चेत्तदेव मर्त्यतामेष्यत्यवश्यम् । स चाजातो ह्यमृतो भावः स्वभावतः सन्नात्मा कथं मर्त्यतामेष्यति? न कथंचन मर्त्यत्वं स्वभाववैपरीत्यमेष्यतीत्यर्थः ॥

न भवत्यमृतं मर्त्यं न मर्त्यममृतं तथा ।
प्रकृतेरन्यथाभावो न कथंचिद्भविष्यति ॥२१॥

यस्मान्न भवत्यमृतं मर्त्यं लोके नापि मर्त्यममृतं तथा । ततः प्रकृतेः स्वभावस्यान्यथाभावः स्वतः प्रच्युतिर्न कथंचिद्भविष्यति । अग्नेरिवौष्ण्यस्य ॥

स्वभावेनामृतो यस्य भावो गच्छति मर्त्यताम् ।
कृतकेनामृतस्तस्य कथं स्थास्यति निश्चलः ॥२२॥

यस्य पुनर्वादिनः स्वभावेन अमृतो भावो मर्त्यतां गच्छति परमार्थतो जायते, तस्य प्रागुत्पत्तेः स भावः स्वभावतोऽमृत इति प्रतिज्ञा मृषैव । कथं तर्हि? कृतकेनामृतस्तस्य स्वभावः कृतकेनामृतः स कथं स्थास्यति निश्चलः?

अमृतस्वभावतया न कथंचित्म्रास्यति । आत्मजातिवादिन सर्वदा अजं नाम नास्त्येव । सर्वमेतन्मर्त्यम् । अतोऽनिर्मोक्षप्रसंग इत्यभिप्राय· ॥

भूततोऽभूततो वापि सृज्यमाने समा श्रुतिः ।
निश्चितं युक्तियुक्तं च यत्तद्भवति नेतरत् ॥२३॥

ननु अजातिवादिन. सृष्टिप्रतिपादिका श्रुतिर्न संगच्छते प्रामाण्यम । बाढं, विद्यते सृष्टिप्रतिपादिका श्रुति । सा त्वन्यपरा । 'उपाय सोऽवतारायं' इत्यवोचाम । इदानीमुक्तेऽपि परिहारे पुनश्चोद्यपरिहारो विवक्षितार्थ प्रति सृष्टिश्रुत्यक्षराणा आनुलोम्यविरोधाशंकामात्रपरिहारार्थो । भूतत परमार्थत. सृज्यमाने वस्तुनि, अभूततो मायया वा मायाविनेव सृज्यमाने वस्तुनि समा तुल्या सृष्टिश्रुति । ननु गौणमुख्ययोर्मुख्ये शब्दार्थप्रतिपात्तिर्युक्ता । न । अन्यथा सृष्टेर प्रसिद्धत्वान्निष्प्रयोजनत्वाच्च इत्यवोचाम । अविद्यासृष्टिविषयैव सर्वा गौणी मुख्या च सृष्टिर्न परमार्थत । 'सबाह्याभ्यंतरो ह्यज·' इति श्रुतेः । तस्मात श्रुत्या निश्चितं यदेकमेवाद्वितीयमजमसृतमिति, युक्तियुक्तं च युक्त्या च संपन्नं, तदेवेत्यवोचाम पूर्वैर्ग्रंथैः । तदेव श्रुत्यर्थो भवति नेतरत्कदाचिदपि क्वचिदपि ॥

नेह नानेति चाम्नायादिंद्रो मायाभिरित्यपि ।
अजायमानो बहुधा मायया जायते तु स ॥२४॥

कथं श्रुतिनिश्चय इत्याह— यदि हि भूतत एव सृष्टि. स्यात्तत. सत्यमेव नानावस्त्विति तदभावप्रदर्शनार्थ आम्नायो न स्यात् । अस्ति च 'नेह नानास्ति किंचन' इत्यादिराम्नाय द्वैतभावप्रतिषेधार्थ । तस्मादात्मैकत्वप्रतिपत्त्यर्था कल्पिता सृष्टिरभूतैव प्राणसंवादवत् । 'इंद्रो मायाभिः' इत्यभूतार्थप्रतिपादकेन मायाशब्देन व्यपदेशात् । ननु प्रज्ञावचनो मायाशब्दः । सत्यम । इंद्रियप्रज्ञाया अविद्यामयत्वेन मायात्वाभ्युपगमादोष । मायाभिरिंद्रियप्रज्ञाभिः अविद्यारूपाभिरित्यर्थ. । 'अजायमानो बहुधा विजायते' इति श्रुतेः । तस्मान्माययैव जायते तु सः । तुशब्दोऽवधारणार्थः मायय्यैवेति । न ह्यजायमानत्वं बहुधा जन्म चैकत्र संभवति । अग्नाविव शैत्यमौष्ण्यं च । फलवत्त्वाच्च आत्मैकत्वदर्शनमेव श्रुतिर्निश्चितोऽर्थः । 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' इत्यादिमंत्रवर्णात् । 'मृत्यो स मृत्युमाप्नोति' इति निंदितत्वाच्च सृष्ट्यादिभेददृष्टे. ॥

संभूतेरपवादाच्च संभवः प्रतिषिध्यते ।
को न्वेनं जनयेदिति कारणं प्रतिषिध्यते ॥२५॥

'अंधं तमः प्रविशन्ति ये संभूतिमुपासते' इति संभूतेः उपास्यत्वापवादात्संभव प्रतिषिध्यते । न हि परमार्थसद्भूतायां संभूतौ तदपवाद उपपद्यते । ननु विनाशेन संभूतेः समुच्चयविधानार्थ संभूत्यपवादः । यथा 'अंधं तम प्रविशन्ति येऽविद्यामुपासते' इति । सत्यमेव देवतादर्शनस्य संभूतिविषयस्य विनाशशब्दवाच्यस्य च कर्मणः समुच्चयविधानार्थ. संभूत्यपवादः । तथापि विनाशाख्यस्य कर्मण· स्वाभाविकाज्ञानप्रवृत्तिरूपस्य मृत्योरतितरणार्थत्ववत् देवतादर्शनकर्मसमुच्चयस्य पुरुषसंस्कारार्थस्य कर्मफलरागप्रवृत्तिरूपस्य साध्यसाधनैषणाद्वयलक्षणस्य मृत्योरतितरणार्थत्वम् । एवं ह्येषणाद्वयरूपान्मृत्यो अशुद्धेर्वियुक्तः पुरुषः संस्कृतः स्यात् । अतो मृत्योरतितरणार्था देवतादर्शनकर्मसमुच्चयलक्षणा ह्यविद्या । एवमेव एषणालक्षणाविद्याया मृत्योरतितीर्णस्य विरक्तस्य उपनिषच्छास्त्रार्थालोचनपरस्य नान्तरीयकी परमात्मैकत्वविद्योत्पत्तिरिति पूर्वभाविनामविद्यामपेक्ष्य पश्चाद्भाविनी ब्रह्मविद्या अमृतत्वसाधना एकेन पुरुषेण संबध्यमाना अविद्यया समुच्चीयत इत्युच्यते । अतोऽन्यार्थत्वादमृतत्वसाधनं ब्रह्मविद्यामपेक्ष्य, निदार्थ एव भवति संभूत्यपवादः, यद्यपि अशुद्धिवियोगहेतु. अतन्निष्ठत्वात्। अत एव संभूतेरपवादात्संभूतेः आपेक्षिकमेव सत्त्वमिति परमार्थसदात्मैकत्वमपेक्ष्य अमृताख्यः संभवः प्रतिषिध्यते । एवं मायानिर्मितस्यैव जीवस्याविद्यया प्रत्युपस्थापितस्य अविद्यानाशे स्वभावरूपत्वात्परमार्थत. को न्वेनं जनयेत ' न हि रज्ज्वामविद्याध्यारोपितं सर्प पुनर्विवेकतो नष्टं जनयेत्कश्चित । तथा न कश्चिदेनं जनयेदिति । को न्वित्याक्षेपार्थत्वात्कारणं प्रतिषिध्यते । अविद्योद्भूतस्य नष्टस्य जनयितृ कारणं न किंचिदस्तीत्यभिप्रायः । 'नायं कुतश्चिन्न बभूव कश्चिन्' इति श्रुतेः ॥

स एष नेति नेतीति व्याख्यातं निह्नुते यतः ।
सर्वमग्राह्यभावेन हेतुनाऽजं प्रकाशते ॥२६॥

सर्वविशेषप्रतिषेधेन 'अथात आदेशो नेति नेति' इति प्रतिपादितस्य आत्मनो दुर्बोधत्वं मन्यमाना श्रुतिः पुनः पुन. उपायान्तरत्वेन तस्यैव प्रतिपिपादयिषया यद्यद्व्याख्यातं तत्सर्व निह्नुते । ग्राह्यं जनिमद्बुद्धिविषयमपलपत्यर्थात्

'स एष नेति नेति' इत्यात्मनोऽदृश्यतां दर्शयन्ती श्रुतिः । उपायस्योपेयनिष्ठताम-जानतः उपायत्वेन व्याख्यातस्य उपेयवद्ग्राह्यता मा भूदित्यग्राह्यभावेन हेतुना कारणेन निह्नुत इत्यर्थः । ततश्च एवमुपायस्योपेयनिष्ठतामेव जानत उपेयस्य च नित्यैकरूपत्वमिति तस्य सबाह्याभ्यंतरमजमात्मतत्त्वं प्रकाशते स्वयमेव ॥

सतो हि मायया जन्म युज्यते न तु तत्त्वतः ।
तत्त्वतो जायते यस्य जातं तस्य हि जायते ॥२७॥

एवं हि श्रुतिवाक्यशतैः सबाह्याभ्यंतरमजं आत्मतत्त्वमद्वयं न ततोऽन्य-दस्तीति निश्चितमेतत् । युक्त्या चाधुनैतदेव पुनर्निर्धार्यत इत्याह -तत्रैतत्स्यात्स-दाऽग्राह्यमेव चेदसदेव आत्मतत्त्वमिति । तन्न । कार्यग्रहणात् । यथा सतो मायाविनो मायया जन्म कार्यम् । एवं जगतो जन्म कार्यं गृह्यमाणं मायाविनं इव परमार्थसन्तमात्मानं जगज्जन्म मायास्पदमेव गमयति । यस्मात्सतो हि विद्यमानात्कारणान्मायानिर्मितस्य हस्त्यादिकार्यस्येव जगज्जन्म युज्यते, नासतः कारणात् । न तु तत्त्वत एव आत्मनो जन्म युज्यते । अथवा सतो विद्यमानस्य वस्तुनो रज्ज्वादे सर्पादिवन्मायया जन्म युज्यते न तु तत्त्वतो यथा, तथा-ऽग्राह्यस्यापि सत एवात्मनो रज्जुसर्पवज्जगद्रूपेण मायया जन्म युज्यते । न तु तत्त्वत एव अजस्यात्मनो जन्म । यस्य पुनः परमार्थसदजमात्मतत्त्वं जगद्रूपेण जायते वादिनो, न हि तस्याजं जायत इति शक्यं वक्तुम् । विरोधात् । ततः तस्यार्थाज्जातं जायत इत्यापन्नम् । ततश्च अनवस्था जाताज्जायमानत्वेन । तस्मादजमेकमेव आत्मतत्त्वमिति सिद्धम् ॥

असतो मायया जन्म तत्त्वतो नैव युज्यते ।
वंध्यापुत्रो न तत्त्वेन मायया वापि जायते ॥२८॥

असद्वादिनामसतो भावस्य मायया तत्त्वतो वा न कथंचन जन्म युज्यते । अदृष्टत्वात् । न हि वंध्यापुत्रो मायया तत्त्वतो वा जायते । तस्मादत्रासद्वादो दूरत एवानुपपन्न इत्यर्थः ॥

यथा स्वप्ने द्वयाभासं स्पंदते मायया मनः ।
तथा जाग्रद्द्वयाभासं स्पंदते मायया मनः ॥२९॥

कथं पुनः सतो माययैव जन्मेत्युच्यते— यथा रज्ज्वां विकल्पितः सर्पो रज्जुरूपेणावेक्ष्यमाणः सन्, एवं मनः परमार्थदृष्ट्या आत्मरूपेणावेक्ष्यमाणं सत्

ग्राह्यग्राहकरूपेण द्वयाभासं स्पंदते स्वप्ने मायया रज्ज्वामिव सर्पः । तथा तद्वदेव जाग्रज्जागरिते स्पंदते मायया मनः, स्पंदत इत्यर्थः ॥

अद्वयं च द्वयाभासं मनः स्वप्ने न संशयः ।
अद्वयं च द्वयाभासं तथा जाग्रन्न संशयः ॥३०॥

रज्जुरूपेण सर्प इव परमार्थतः आत्मरूपेणाद्वयं सत् द्वयाभासं मनः स्वप्ने, न संशयः । न हि स्वप्ने हस्त्यादि ग्राह्यं तद्ग्राहकं वा चक्षुरादि, द्वयं विज्ञानव्यतिरेकेणास्ति । जाग्रदपि तथैवेत्यर्थः । परमार्थसद्विज्ञानमात्राविशेषात् ॥

मनोदृश्यमिदं द्वैतं यत्किंचित्सचराचरम् ।
मनसो ह्यमनीभावे द्वैतं नैवोपलभ्यते ॥३१॥

रज्जुसर्पवद्विकल्पनारूपं द्वैतरूपेण मन एवेत्युक्तम् । तत्र किं प्रमाणमिति अन्वयव्यतिरेकलक्षणमनुमानमाह । कथं ? तेन हि मनसा विकल्प्यमानेन दृश्यं मनोदृश्यमिदं द्वैतं सर्वं मन इति प्रतिज्ञा । तद्भावे भावात्तदभावे चाभावात् । मनसो ह्यमनीभावे निरुद्धे विवेकदर्शनाभ्यासवैराग्याभ्यां रज्ज्वामिव सर्पे लयं गते वा सुषुप्ते द्वैतं नैवोपलभ्यत इत्यभावात्सिद्धं द्वैतस्यासत्त्वमित्यर्थः ॥

आत्मसत्यानुबोधेन न संकल्पयते यदा ।
अमनस्तां तदा याति ग्राह्याभावे तदग्रहम् ॥३२॥

कथं पुनरमनीभाव इति । उच्यते— आत्मैव सत्यमात्मसत्यं, मृत्तिकावत् 'वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इति श्रुतेः । तस्य शास्त्राचार्योपदेशमन्ववबोध आत्मसत्यानुबोधः । तेन संकल्प्याभावात् तन्न संकल्पयते दाह्याभावे ज्वलनमिवाग्निः यदा यस्मिन्काले, तदा तस्मिन्कालेऽमनस्तां अमनोभावं याति, ग्राह्याभावे तन्मनोऽग्रहं ग्रहणविकल्पनावर्जितमित्यर्थः ॥

अकल्पकमजं ज्ञानं ज्ञेयाभिन्नं प्रचक्षते ।
ब्रह्म ज्ञेयमजं नित्यमजेनाजं विबुध्यते ॥३३॥

यद्यसदिदं द्वैतं केन समंजसमात्मतत्त्वं विबुध्यते इति, उच्यते— अकल्पकं सर्वकल्पनावर्जितं, अत एवाजं ज्ञानं ज्ञप्तिमात्रं ज्ञेयेन परमार्थसता ब्रह्मणाऽभिन्नं प्रचक्षते कथयन्ति ब्रह्मविदः । 'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते' अग्न्युष्णवत् । 'विज्ञानमानंदं ब्रह्म' 'सत्यं ज्ञानमनंतं ब्रह्म' इत्यादिश्रुतिभ्यः । तस्यैव विशेषणं— ब्रह्म ज्ञेयं यस्य, स्वस्थं तदिदं ब्रह्म ज्ञेयं

औष्ण्यस्येवाग्निवदभिन्नम् । तेनात्मस्वरूपेणाजेन ज्ञानेन अजं ज्ञेयमात्मतत्त्वं स्वयमेव विबुध्यतेऽवगच्छति । नित्यप्रकाशस्वरूप इव सविता । नित्यविज्ञानैकरसघनत्वान्न ज्ञानान्तरमपेक्षते इत्यर्थ ॥

निगृहीतस्य मनसो निर्विकल्पस्य धीमतः ।
प्रचारः स तु विज्ञेयः सुषुप्तेऽन्यो न तत्समः ॥३४॥

आत्मसत्यानुबोधेन संकल्पमकुर्वद्ग्राह्यविषयाभावे निरिंधनाग्निवत्प्रशान्त निगृहीतं निरुद्धं मनो भवतीत्युक्तम् । एवं च मनसो ह्यमनीभावे द्वैताभावश्चोक्त । तस्यैवं निगृहीतस्य निरुद्धस्य मनसो निर्विकल्पस्य सर्वकल्पनावर्जितस्य धीमतो विवेकवत प्रचरणं प्रचारो यः, स तु प्रचारो विशेषेण ज्ञेयो विज्ञेयो योगिभि । ननु सर्वप्रत्ययाभावे यादृश सुषुप्तस्थस्य मनस प्रचार., तादृश एव निरुद्धस्या पि, प्रत्ययाभावाविशेषात् । किं तत्र विज्ञेयमिति । अत्रोच्यते— नैवम । यस्मात्सुषुप्तेऽन्यः प्रचारोऽविद्यामोहतमोग्रस्तस्य अंतर्लीनानेकानर्थप्रवृत्तिबीजवासनावतो मनस आत्मसत्यानुबोधहुताशविप्लुष्टाविद्यानर्थप्रवृत्तिबीजस्य निरुद्धस्यान्य एव प्रशान्तसर्वक्लेशरजस स्वतंत्रः प्रचार । अतो न तत्सम । तस्माद्युक्त स विज्ञातुमित्यभिप्राय. ॥

लीयते हि सुषुप्तौ तन्निगृहीतं न लीयते ।
तदेव निर्भयं ब्रह्म ज्ञानालोकं समंततः ॥३५॥

प्रचारभेदे हेतुमाह— लीयते सुषुप्तौ हि यस्मात्सर्वाभि अविद्यादिप्रत्ययबीजवासनाभि सह तमोरूपमविशेषरूपं बीजभावमापद्यते तद्विवेकविज्ञानपूर्वकं निगृहीतं निरुद्धं सन्न लीयते तमोबीजभावं नापद्यते । तस्माद्युक्त प्रचारभेदः सुषुप्तस्थ समाहितस्य मनस. । यदा ग्राह्यग्राहकविद्याकृतमलद्वयवर्जितं तदा परमद्वयं ब्रह्मैव तत्संवृत्तमित्यतः तदेव निर्भयम् । द्वैतग्रहणस्य भयनिमित्तस्याभावात् । शान्तमभयं ब्रह्म यद्विद्वान्न बिभेति कुतश्चन । तदेव विशेष्यते— ज्ञप्तिर्ज्ञानं आत्मस्वभावचैतन्यं, तदेव ज्ञानमालोकः प्रकाशो यस्य, तद्ब्रह्म ज्ञानालोकं विज्ञानैकरसघनमित्यर्थ । समंतत समंतात्सर्वतो व्योमवन्निरंतरेण व्यापकमित्यर्थ. ॥

अजमनिद्रमस्वप्नमनामकमरूपकम् ।
सकृद्विभातं सर्वज्ञं नोपचारः कथंचन ॥३६॥

जन्मानिमित्ताभावात्सबाह्याभ्यंतरं अजम् । अविद्यानिमित्तं हि जन्म रज्जु-सर्पवदित्यवोचाम । सा चाविद्या आत्मग्रयानुबंधेन निरुद्धा यत , अतोऽजं, अत एवानिद्रम् । अविद्यालक्षणनादिमायानिद्रास्वापात प्रबुद्धं अद्वयस्वरूपेण आत्मना । अतोऽस्वप्नम् । अप्रबोधकृते ह्यस्य नामरूपे, प्रबोधाच्च ते रज्जुसर्प-वद्विनष्टे, इति न नाम्नाऽभिधीयते ब्रह्म, रूप्यते वा न केनचित्प्रकारेण, इत्य-नामकमरूपकं च तत् । 'यतो वाचो निवर्तन्ते' इत्यादिश्रुते । किंच, सकृ-द्विभातं सदैव विभातं सदा भारूपं, अग्रहणान्यथाग्रहणाविर्भावतिरोभाववर्जि-तत्वात् । ग्रहणाग्रहणे हि रात्र्यहनी । तमश्चाविद्यालक्षणं सदाऽप्रभातत्वे कार-णम् । तदभावान्नित्यचैतन्यभारूपत्वाच्च युक्तं सकृद्विभातमिति । अत एव सर्व च तज्ज्ञप्तिस्वरूपं चेति सर्वज्ञम् । नेह ब्रह्मण्येवंविधे उपचरणमुपचार. कर्तव्यः । यथाऽन्येषा आत्मस्वरूपव्यतिरेकेण समाधानाद्युपचार । नित्यशुद्धबुद्धमुक्त-स्वभावत्वाद्ब्रह्मणः कथंचन न कथंचिदपि कर्तव्यसंभवोऽविद्यानाशे इत्यर्थः ॥

सर्वाभिलापविगतः सर्वचिंतासमुत्थितः ।
सुप्रशान्त सकृज्ज्योतिः समाधिरचलोऽभयः ॥३७॥

अनामकत्वाद्युक्तार्थसिद्धये हेतुमाह— अभिलप्यतेऽनेनेत्यभिलापो वाकरणं सर्वप्रकारस्याभिधानस्य । तस्माद्विगत. । वागग्रेपलक्षणार्था । सर्वबाह्यकरण-वर्जित इत्येतत् । तथा सर्वचिंतासमुत्थितः । चिन्त्यतेऽनयेति चिंता बुद्धिः तस्याः समुत्थितोऽन्त करणवर्जित इत्यर्थः । 'अप्राणो ह्यमना शुभ्र' 'अक्षरात्प-रतः परः ।' इत्यादिश्रुतेः । यस्मात्सर्वविषयवर्जितोऽत सुप्रशान्त । सकृ-ज्ज्योतिः सदैव ज्योतिरात्मचैतन्यस्वरूपेण । समाधिः समाधिनिमित्तप्रज्ञावगम्य-त्वात् । समाधीयतेऽस्मिन्निति वा समाधि । अचलोऽविक्रिय । अत एवाभयो विक्रियाभावात् ॥

ग्रहो न तत्र नोत्सर्गश्चिंता यत्र न विद्यते ।
आत्मसंस्थं तदा ज्ञानमजाति समतां गतम् ॥३८॥

यस्माद्ब्रह्मैव "समाधिरचलोऽभय" इत्युक्तं, अतो न तत्र तस्मिन्ब्रह्मणि ग्रहो ग्रहणमुपादानं, नोत्सर्गः उत्सर्जनं हानं वा विद्यते । यत्र हि विक्रिया तद्वि-षयत्वं वा, यत्र हानोपादाने स्यातां, न तत् द्वयमिह ब्रह्मणि संभवति । विकार-हेतोरन्यस्याभावान्निरवयवत्वाच्च । अतो न तत्र हानोपादाने संभवत । चिंता

यत्र न विद्यते । सर्वप्रकारेव चिता न संभवति यत्र अमनस्त्वात्कुतस्त्रा हानोपादाने इत्यर्थः । यदैव आत्मसत्यानुबोधो जातः तदैव आत्मसंस्थं विषयाभावादग्न्युष्णवदात्मन्येव स्थितं ज्ञानम् । अजाति जातिवर्जितम् । समतां गतं परं साम्यमापन्न भवति । यदादौ प्रतिज्ञातं "अतो वक्ष्याम्यकार्पण्यमजाति समतां गतं" इतीदं तदुपपत्तितः शास्त्रतश्चोक्तमुपसंहियते । अजाति समतां गतमित्येतस्मादात्मसत्यानुबोधात् कार्पण्यविषयमन्यत । 'यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपण' इति श्रुतेः । प्राप्यैतत्सर्वं कृतकृत्यो ब्राह्मणो भवतीत्यभिप्रायः ॥

अस्पर्शयोगो वै नाम दुर्दर्शः सर्वयोगिभिः ।
योगिनो बिभ्यति ह्यस्मादभये भयदर्शिनः ॥३९॥

यद्यपादमित्थं परमार्थतत्त्वम् । अस्पर्शयोगो नामाय सर्वसंबंधाख्यस्पर्शवर्जितत्वादस्पर्शयोगो नाम वै स्मर्यते प्रसिद्ध उपनिषत्सु । दुःखेन दृश्यत इति दुर्दर्शः सर्वैर्योगिभिः, वेदान्तविज्ञानरहितैः । सर्वयोगिभिः आत्मसत्यानुबोधायासलभ्य एवेत्यर्थः । योगिनो बिभ्यति ह्यस्मात्सर्वभयवर्जितादपि आत्मनाशरूपमिमं योगं मन्यमाना भयं कुर्वन्ति अभयेऽस्मिन्भयदर्शिनो, भयनिमित्तात्मनाशदर्शनशीला अविवेकिनः इत्यर्थः ॥

मनसो निग्रहायत्तमभयं सर्वयोगिणाम् ।
दुःखक्षयः प्रबोधश्चाप्यक्षया शान्तिरेव च ॥४०॥

येषां पुनर्ब्रह्मस्वरूपव्यतिरेकेण रज्जुसर्पवत्कल्पितमेव मनः इंद्रियादि च न परमार्थतो विद्यते, तेषां ब्रह्मस्वरूपाणामभयं मोक्षाख्या चाक्षया शान्तिः स्वभावत एव सिद्धा, नान्यायत्ता । "नोपचारः कथंचन" इत्यवोचाम । ये त्वतोऽन्ये योगिनो मार्गगा हीनमध्यमदृष्टयो मनोऽन्यदात्मव्यतिरिक्तमात्मसंबंधि पश्यन्ति, तेषामात्मसत्यानुबोधरहितानां मनसो निग्रहायत्तमभयं सर्वेषां योगिनाम् । किं च दुःखक्षयोऽपि । न ह्यात्मसंबंधिनि मनसि प्रचलिते दुःखक्षयोऽस्त्यविवेकिनाम् । किंच आत्मप्रबोधोऽपि मनोनिग्रहायत्त एव । तथा अक्षयापि मोक्षाख्या शान्तिस्तेषां मनोनिग्रहायत्तैव ॥

उत्सेक उदधेर्यद्वत्कुशाग्रेणैकबिंदुना ।
मनसो निग्रहस्तद्वन्नेवेदपरिखेदतः ॥४१॥

मनोनिग्रहोऽपि तेषामुदधेः कुशाग्रेणैकबिंदुना उत्सेचनेन शोषणव्यवसायवत् व्यवसायवतां अनवसन्नान्तःकरणानां अनिर्वेदादपरिखेदतो भवतीत्यर्थः ॥

उपायेन निगृह्णीयाद्विक्षिप्तं कामभोगयोः ।
सुप्रसन्नं लये चैव यथा कामो लयस्तथा ॥४२॥

किं अपरिखिन्नव्यवसायमात्रमेव मनोनिग्रहे उपाय ? नेत्युच्यते । अपरिखिन्नव्यवसायवान्सन् वक्ष्यमाणेनोपायेन कामभोगविषयेषु विक्षिप्तं मनो निगृह्णीयान्निरुध्यादात्मन्येवेत्यर्थः । किंच, लीयतेऽस्मिन्निति सुषुप्तो लयः । तस्मिंल्लये च सुप्रसन्नं आयासवर्जितमपीत्येतत् निगृह्णीयादित्यनुवर्तते । सुप्रसन्नं चेत्कस्मान्निगृह्यत इति । उच्यते— यस्मात्यथा कामोऽनर्थहेतुस्तथा लयोऽपि । अतः कामविषयस्य मनसो निग्रहवल्लयादपि निरोद्धव्यमित्यर्थः ॥

दुःखं सर्वमनुस्मृत्य कामभोगान्निवर्तयेत् ।
अजं सर्वमनुस्मृत्य जातं नैव तु पश्यति ॥४३॥

कः स उपाय इति । उच्यते— सर्वं द्वैतमविद्याविजृंभितं दुःखमेवेत्यनुस्मृत्य कामभोगात्, कामनिमित्तो भोगः इच्छाविषयस्तस्मात्, विप्रसृतं मनो निवर्तयेद्वैराग्यभावनयेत्यर्थः । अजं ब्रह्म सर्वं इत्येतच्छास्त्राचार्योपदेशतोऽनुस्मृत्य तद्विपरीतं द्वैतजातं नैव तु पश्यति । अभावात् ॥

लये संबोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः ।
सकषायं विजानीयात्समप्राप्तं न चालयेत् ॥४४॥

एवमनेन ज्ञानाभ्यासवैराग्यद्वयोपायेन लये सुषुप्ते लीनं संबोधयेन्मनः । आत्मविवेकदर्शनेन योजयेत् । चित्तं मन इत्यनर्थान्तरम् । विक्षिप्तं च कामभोगेषु शमयेत्पुनः । एवं पुनः पुनरभ्यस्यतो लयात्संबोधितं विषयेभ्यश्च व्यावर्तितं, नापि साम्यापन्नमंतरालावस्थं सकषायं सरागं बीजसंयुक्तं मन इति विजानीयात् । ततोऽपि यत्नतः साम्यमापादयेत् । यदा तु समप्राप्तं भवति, समप्राप्त्यभिमुखीभवतीत्यर्थः । ततस्तन्न चालयेद्विषयाभिमुखं न कुर्यादित्यर्थः ॥

नास्वादयेत्सुखं तत्र निःसंगः प्रज्ञया भवेत् ।
निश्चलं निश्चरच्चित्तमेकीकुर्यात्प्रयत्नतः ॥४५॥

समाधित्सतो योगिनो यत्सुखं जायते तन्नास्वादयेत् । तत्र न रज्येतेत्यर्थः । कथं तर्हि ? निःसंगो निस्पृहः प्रज्ञया विवेकबुद्धया यदुपलभ्यते सुखं, तद-

विद्यापरिकल्पित मृषैवेति विभावयेत । ततोऽपि मुखरागान्निगृह्णीयादित्यर्थः । यदा पुन मुखरागान्निवृत्तं निश्चलस्वभावं सन्निश्चरद्बृहिर्निर्गच्छद्भवति चित्तं, ततस्ततो नियम्योक्तोपायेन आत्मन्येवैकीकुर्यात्प्रयत्नतः । चित्स्वरूपसत्तामात्रमेव आपादयेदित्यर्थः ॥

यदा न लीयते चित्तं न च विक्षिप्यते पुनः ।
अनिंगनमनाभासं निष्पन्नं ब्रह्म तत्तदा ॥४६॥

यथोक्तोपायेन निगृहीतं चित्तं यदा सुषुप्ते न लीयते, न च पुनर्विषयेषु विक्षिप्यते । अनिंगनमचलं निवातप्रदीपकल्पम् । अनाभासं न केनचित्कल्पितेन विषयभावेनावभासते इति । यदेवंलक्षणं चित्तं, तदा निष्पन्नं ब्रह्म । ब्रह्मस्वरूपेण निष्पन्नं चित्तं भवतीत्यर्थः ॥

स्वस्थं शान्तं सनिर्वाणमकथ्यं सुखमुत्तमम् ।
अजमजेन ज्ञेयेन सर्वज्ञं परिचक्षते ॥४७॥

यथोक्तं परमार्थसुखमात्मसत्यानुबोधलक्षणं स्वस्थं स्वात्मनि स्थितम् । शान्तं सर्वानर्थोपशमरूपम् । सनिर्वाणं, निर्वृतिर्निर्वाणं कैवल्यं, सह निर्वाणेन वर्तते । तच्चाकथ्यं न शक्यते कथयितुम् । अत्यंतासाधारणविषयत्वात् । सुखमुत्तमं निरतिशयं हि तद्योगिप्रत्यक्षमेव । न जातमित्यजं, यथा विषयविषयम् । अजेनानुत्पन्नेन ज्ञेयेनाव्यतिरिक्तं सत्त्वेन सर्वज्ञरूपेण सर्वज्ञं ब्रह्मैव सुखं परिचक्षते कथयन्ति ब्रह्मविदः ॥

न कश्चिज्जायते जीवः संभवोऽस्य न विद्यते ।
एतत्तदुत्तमं सत्यं यत्र किंचिन्न जायते ॥४८॥
इति अद्वैताख्यं तृतीयं प्रकरणम् ॥

सर्वोऽयं मनोनिग्रहादिः मृल्लोहादिवत्सृष्टिरुपासना चोक्ता परमार्थस्वरूपप्रतिपत्त्युपायत्वेन, न परमार्थसत्येति । परमार्थसत्यं तु न कश्चिज्जायते जीवः कर्ता भोक्ता च नोत्पद्यते केनचिदपि प्रकारेण । अतः स्वभावतोऽजस्यास्य एकस्यात्मनः संभवः कारणं न विद्यते नास्ति । तस्मान्न विद्यतेऽस्य कारणं, तस्मान्न कश्चिज्जायते जीव इत्येतत् । पूर्वेषु उपायत्वेनोक्तानां सत्यानामेतदुत्तमं सत्यं यस्मिन्सत्यस्वरूपे ब्रह्मणि अणुमात्रमपि किंचिन्न जायत इति ॥

इति तृतीयं अद्वैतप्रकरणम् ॥

अलातशांतिप्रकरणम् ॥४॥

ज्ञानेनाकाशकल्पेन धर्मान्यो गगनोपमान् ।
ज्ञेयाभिन्नेन संबुद्धस्तं वंदे द्विपदां वरम् ॥१॥

ओंकारनिर्णयद्वारेण आगमत. प्रतिज्ञातस्याद्वैतस्य बाह्यविषयभेदवैतथ्याच्च सिद्धस्य पुनरद्वैते शास्त्रयुक्तिभ्या साक्षान्निर्धारितस्य एतदुत्तमं सत्यमित्युपसंहारः कृतः अंते । तस्यैतस्यागमार्थस्य अद्वैतदर्शनस्य प्रतिपक्षभूता द्वैतिनो वैनाशिकाश्च । तेषां चान्योन्यविरोधात् रागद्वेषादिक्लेशास्पदं दर्शनमिति मिथ्यादर्शनत्वं सूचितम् । क्लेशानास्पदत्वात् सम्यग्दर्शनं इत्यद्वैतदर्शनं स्तूयते । तदिह विस्तरेण अन्योन्यविरुद्धतया असम्यग्दर्शनत्वं प्रदर्श्य तत्प्रतिषेधेन अद्वैतदर्शनसिद्धिरुपसंहर्तव्या आवीतन्यायेन इति अलातशान्तिप्रकरणमारभ्यते । तत्राद्वैतदर्शनसंप्रदायकर्तु अद्वैतस्वरूपेणैव नमस्कारार्थोऽयमाद्यश्लोक । आचार्यपूजाभिप्रेतार्थसिद्ध्यर्था इष्यते शास्त्रारंभे । आकाशेन ईषदसमासं आकाशकल्पं आकाशतुल्यमेतत् । तेन आकाशकल्पेन ज्ञानेन । किम् ? धर्मानात्मन । किंविशिष्टान् ? गगनोपमान् गगनमुपमा येषां ते गगनोपमास्तानात्मनो धर्मान । ज्ञानस्यैव पुनर्विशेषणम्— ज्ञेयैर्धर्मैरात्मभिरभिन्नं अग्न्युष्णवत्सवितृप्रकाशवच्च यत् ज्ञानं तेन ज्ञेयाभिन्नेन ज्ञानेन आकाशकल्पेन ज्ञेयात्मस्वरूपाव्यतिरिक्तेन, गगनोपमान्धर्मान्यः संबुद्धः संबुद्धवान्नित्यमेवेश्वरो यो नारायणाख्यस्तं वन्देऽभिवादये । द्विपदां वरं द्विपदोपलक्षितानां पुरुषाणां वरं प्रधानं, पुरुषोत्तममित्यभिप्राय । उपदेष्टृनमस्कारमुखेण ज्ञानज्ञेयज्ञातृभेदरहितं परमार्थतत्त्वदर्शनमिह प्रकरणे प्रतिपिपादयिषितं प्रतिपक्षप्रतिषेधद्वारेण प्रतिज्ञातं भवति ॥

अस्पर्शयोगो वै नाम सर्वसत्त्वसुखो हित ।
अविवादोऽविरुद्धश्च देशितस्तं नमाम्यहम् ॥२॥

अधुना अद्वैतदर्शनयोगस्य नमस्कार तत्स्तुतये । स्पर्शनं स्पर्श. संबंधो न विद्यते यस्य योगस्य केनचित्कदाचिदपि, सोऽस्पर्शयोगो ब्रह्मस्वभाव एव, वै नामेति । ब्रह्मविदामस्पर्शयोग इत्येवं प्रसिद्ध इत्यर्थः । स च सर्वसत्त्वसुखो भवति । कश्चिदत्यंतसुखसाधनविशिष्टोऽपि दुःखरूपः, यथा तपः । अयं तु न तथा । किं तर्हि ? सर्वसत्त्वानां सुखः । तथेह भवति कश्चिद्विषयोपभोगः सुखो न हितः । अयं तु सुखो हितश्च । नित्यमप्रचलितस्वभावत्वात् । कि चाविवादो,

विरुद्धं वदनं विवादः पक्षप्रतिपक्षपरिग्रहेण यस्मिन्न विद्यते सोऽविवादः । कस्मात्? यतोऽविरुद्धश्च । य ईदृशो योगो देशितः उपदिष्टः शास्त्रेण, तं नमाम्यहं प्रणमामीत्यर्थः ॥

भूतस्य जातिमिच्छन्ति वादिन केचिदेव हि ।
अभूतस्यापरे धीरा विवदन्तः परस्परम् ॥३॥

कथं द्वैतिनः परस्परं विरुध्यन्त इति । उच्यते— भूतस्य विद्यमानस्य वस्तुनो जातिमुत्पत्तिमिच्छन्ति वादिनः केचिदेव हि सांख्याः । न सर्व एव द्वैतिनः । यस्मादभूतस्याविद्यमानस्यापरे वैशेषिका नैयायिकाश्च धीरा धीमंतः प्राज्ञाभिमानिन इत्यर्थः । विवदन्तो विरुद्धं वदन्तो हि अन्योन्यमिच्छन्ति जेतुमित्यभिप्रायः ॥

भूतं न जायते किंचिदभूतं नैव जायते ।
विवदन्तोऽद्वया ह्येवमजातिं ख्यापयन्ति ते ॥४॥

तैरेवं विरुद्धवदनेन अन्योन्यपक्षप्रतिषेधं कुर्वद्भिः किं ख्यापितं भवतीति । उच्यते— भूतं विद्यमानं वस्तु न जायते किंचिद्विद्यमानत्वादेव आत्मवदित्येवं वदन्नसद्वादी सांख्यपक्षं प्रतिषेधति सज्जन्म । तथा अभूतमविद्यमानं अविद्यमानत्वान्नैव जायते शशविषाणवदित्येवं वदन्सांख्योऽपि असद्वादिपक्षं असज्जन्म प्रतिषेधति । विवदन्तो विरुद्धं वदन्तो अद्वया अद्वैतिनोऽप्येते अन्योन्यस्य पक्षौ सदसतोर्जन्मनी प्रतिषेधन्तोऽजातिमनुत्पत्तिमर्थात्ख्यापयन्ति प्रकाशयन्ति ते॥

ख्याप्यमानामजातिं तैरनुमोदामहे वयम् ।
विवदामो न तैः सार्धमविवादं निबोधत ॥५॥

तैरेवं ख्याप्यमानां अजाति एवमस्त्वित्यनुमोदामहे केवलं, न तैः सार्धं विवदामः पक्षप्रतिपक्षग्रहणेन । यथा तेऽन्योन्यमित्यभिप्रायः । अतः तमविवादं विवादरहितं परमार्थदर्शनमनुज्ञातं अस्माभिर्निबोधत हे शिष्याः ॥

अजातस्यैव धर्मस्य जातिमिच्छन्ति वादिनः ।
अजातो ह्यमृतो धर्मो मर्त्यतां कथमेष्यति ॥६॥

सदसद्वादिनः सर्वेऽपीति । पुरस्तात्कृतभाष्यः श्लोकः ॥

न भवत्यमृतं मर्त्यं न मर्त्यममृतं तथा ।
प्रकृतेरन्यथाभावो न कथंचिद्भविष्यति ॥७॥

स्वभावेनामृतो यस्य धर्मो गच्छति मर्त्यताम् ।
कृतकेनामृतस्तस्य कथं स्थास्यति निश्चलः ॥८॥

उक्तार्थानां श्लोकानां इहोपन्यासः परवादिपक्षाणां अन्योन्यविरोधाख्यापितानुमोदनप्रदर्शनार्थः ॥

सांसिद्धिकी स्वाभाविकी सहजा अकृता च या ।
प्रकृतिः सेति विज्ञेया स्वभावं न जहाति या ॥९॥

यस्मात्लौकिक्यपि प्रकृतिर्न विपर्येति, काऽसावित्याह-- सम्यक्सिद्धिः संसिद्धिस्तत्र भवा सांसिद्धिकी । यथा योगिनां सिद्धानामणिमाद्यैश्वर्यप्राप्तिः प्रकृतिः सा भूतभविष्यत्कालयोरपि योगिनां न विपर्येति, तथैव सा । तथा स्वाभाविकी द्रव्यस्वभावत एव सिद्धा, यथाऽग्न्यादीनां उष्णप्रकाशादिलक्षणा । सापि न कालान्तरं व्यभिचरति देशान्तरं वा । तथा सहजा आत्मना सहैव जाता यथा पक्ष्यादीनामाकाशगमनादिलक्षणा । अन्याऽपि या काचिदकृता केनचिन्न कृता, यथापां निम्नदेशगमनादिलक्षणा । अन्यापि या काचित्स्वभावं न जहाति सा सर्वा प्रकृतिरिति विज्ञेया लोके । मिथ्याकल्पितेषु लौकिकेष्वपि वस्तुषु प्रकृतिर्नान्यथा भवति । किमुताजस्वभावेषु परमार्थवस्तुषु ? अमृतत्वलक्षणा प्रकृतिर्नान्यथा भवतीत्यभिप्रायः ॥

जरामरणनिर्मुक्ताः सर्वे धर्माः स्वभावतः ।
जरामरणमिच्छन्तश्च्यवन्ते तन्मनीषया ॥१०॥

किंविषया पुनः सा प्रकृतिर्यस्या अन्यथाभावो वादिभिः कल्प्यते ? कल्पनायां वा को दोष ? इत्याह—जरामरणनिर्मुक्ताः । जरामरणादिसर्वविक्रियावर्जिता इत्यर्थः । के ? सर्वे धर्माः सर्व आत्मान इत्येतत्स्वभावतः प्रकृतितः एव । अतः एवंस्वभावाः सन्तो धर्मा जरामरणमिच्छन्त इच्छन्त इवेच्छन्तो रज्ज्वामिव सर्पमात्मनि कल्पयन्तश्च्यवन्ते स्वभावतश्चलन्तीत्यर्थः । तन्मनीषया जन्ममरणचित्तया तद्भावभावितत्वदोषेणेत्यर्थः ॥

कारणं यस्य वै कार्यं कारणं तस्य जायते ।
जायमानं कथमजं भिन्नं नित्यं कथं च तत् ॥११॥

कथं सज्जातिवादिभिः सांख्यैरनुपपन्नमुच्यत इत्याह वैशेषिकः । कारणं मृद्द्रव्यादानलक्षणं यस्य वादिनो वै कार्यं, कारणमेव कार्याकारेण परिणमते यस्य

वादिन इत्यर्थः । तस्याजमेव सत्प्रधानादि कारणं महदादि कार्यरूपेण जायत इत्यर्थ । महदाद्याकारेण चेज्जायमानं प्रधानं कथमजमुच्यते तैः? विप्रतिषिद्धं चेदं जायतेऽजं चेति । नित्यं च तैरुच्यते । प्रधानं भिन्नं विदीर्ण, स्फुटितमेकदेशेन सत्कथं नित्यं भवेदित्यर्थः । न हि सावयवं घटादि एकदेशस्फुटनधर्मि नित्यं दृष्टं लोके इत्यर्थ । विदीर्णं च स्यादेकदेशेनाजं नित्यं च, इति एताद्विप्रतिषिद्धं तैरभिधीयत इत्यभिप्राय ॥

कारणाद्यनन्यत्वमतः कार्यमजं तव ।
जायमानाद्धि वै कार्यात्कारणं ते कथं ध्रुवम् ॥१२॥

उक्तस्यैवार्थस्य स्पष्टीकरणार्थमाह— कारणादजात्कार्यस्य यदि अनन्यत्वमिष्टं त्वया, ततः कार्यमप्यजमिति प्राप्तम् । इदं चान्यद्विप्रतिषिद्धं कार्यमजं चेति तव । किं चान्यत्, कार्यकारणयोरनन्यत्वे जायमानाद्धि वै कार्यात्कारणमनन्यन्नित्यं ध्रुवं च ते कथं भवेत्? न हि कुक्कुट्या एकदेशः पच्यते, एकदेशः प्रसवाय कल्प्यते ॥

अजाद्धि जायते यस्य दृष्टान्तस्तस्य नास्ति वै ।
जातात्च जायमानस्य न व्यवस्था प्रसज्यते ॥१३॥

किं चान्यत्, यदजादनुत्पन्नाद्वस्तुनो जायते यस्य वादिनः कार्यं, दृष्टान्तस्तस्य नास्ति वै । दृष्टान्ताभावेऽर्थादजान्न किंचिज्जायते इति सिद्धं भवतीत्यर्थः । यदा पुनर्जाताज्जायमानस्य वस्तुनोऽभ्युपगमः, तदप्यन्यस्माज्जातात्तदप्यन्यस्मादिति न व्यवस्था प्रसज्येत । अनवस्था स्यादित्यर्थः ॥

हेतोरादिः फलं येषामादिर्हेतुः फलस्य च ।
हेतोः फलस्य चानादिः कथं तैरुपवर्ण्यते ॥१४॥

'यत्र त्वस्य सर्वमात्मैवाभूत्' इति परमार्थतो द्वैताभावः श्रुत्योक्तः । तमाश्रित्याह— हेतोर्धर्माधर्मादेरादिः कारणं देहादिसंघातः फलं येषां वादिनाम् । तथा आदिः कारणम् । हेतुर्धर्माधर्मादि । फलस्य च देहादिसंघातस्य । एवं हेतुफलयोरितरेतरकार्यकारणत्वेन आदिमत्त्वं ध्रुवाद्धिः एवं हेतोः फलस्य चानादित्वं कथं तैरुपवर्ण्यते विप्रतिषिद्धमित्यर्थः । न हि नित्यस्य कूटस्थस्यात्मनो हेतुफलात्मकता संभवति ॥

हेतोरादिः फलं येषामादिर्हेतुः फलस्य च ।
तथा जन्म भवेत्तेषां पुत्राज्जन्म पितुर्यथा ॥१५॥

कथं तर्हि विरुद्धमभ्युपगम्यत इति । उच्यते । हेतुजन्यादेव फलाद्धेतोर्जन्माभ्युपगच्छतां तेषामीदृशो विरोध उक्तो भवति, यथा पुत्राज्जन्म पितुः ॥

संभवे हेतुफलयोरेषितव्यः क्रमस्त्वया ।
युगपत्संभवे यस्मादसंबंधो विषाणवत् ॥१६॥

यथोक्तो विरोधो न युक्तोऽभ्युपगंतुमिति चेन्मन्यसे, संभवे उत्पत्तौ हेतुफलयोः क्रम एषितव्योऽन्वेष्टव्यस्त्वया, हेतुः पूर्वं पश्चात्फलं चेति । इतश्च युगपत्संभवे यस्माद्धेतुफलयोः कार्यकारणत्वेन असंबंधः । यथा युगपत्संभवतोः सव्येतरगोविषाणयोः ॥

फलादुत्पद्यमानः सन्न ते हेतुः प्रसिध्यति ।
अप्रसिद्ध कथं हेतुः फलमुत्पादयिष्यति ॥१७॥

कथमसंबंध इत्याह— जन्यात्स्वतोऽलब्धात्मकात्फलादुत्पद्यमानः सञ्शशविषाणादिरिव असतो न हेतुः प्रसिध्यति जन्म न लभते । अलब्धात्मकोऽप्रसिद्धः सञ्शशविषाणादिकल्पस्तव स कथं फलमुत्पादयिष्यति ? न हि इतरेतरापेक्षसिद्धयोः शशविषाणकल्पयोः कार्यकारणभावेन संबंध क्वचित् दृष्टः, अन्यथा वा इत्यभिप्रायः ॥

यदि हेतोः फलात्सिद्धिः फलसिद्धिश्च हेतुतः ।
कतरत्पूर्वनिष्पन्नं यस्य सिद्धिरपेक्षया ॥१८॥

असंबंधतादोषेणापोदितेऽपि हेतुफलयोः कार्यकारणभावे, यदि हेतुफलयोः अन्योन्यसिद्धिरभ्युपगम्यत एव त्वया, कतरत्पूर्वनिष्पन्नं हेतुफलयोः ? यस्य पश्चाद्भाविनः सिद्धिः स्यात्पूर्वसिद्धयपेक्षया, तन्न ब्रूहीत्यर्थः ॥

अशक्तिरपरिज्ञानं क्रमकोपोऽथ वा पुनः ।
एवं हि सर्वथा बुद्धैरजातिः परिदीपिता ॥१९॥

अथैतन्न शक्यते वक्तुमिति मन्यसे, सेयमशक्तिरपरिज्ञानं तत्त्वाविवेको, मूढतेत्यर्थः । अथवा योऽयं त्वयोक्तः क्रमो हेतोः फलस्य सिद्धिः फलाच्च हेतोः सिद्धिरिति, इतरेतरानंतर्यलक्षणः, तस्य कोपो विपर्यासोऽन्यथाभावः स्यादित्यभिप्रायः । एवं हेतुफलयोः कार्यकारणभावानुपपत्तेः अजातिः सर्वस्यानुत्पत्तिः परिदीपिता प्रकाशिता अन्योन्यपक्षदोषं ब्रुवद्भिर्वादिभिः बुद्धैः पंडितैरित्यर्थः ॥

बीजांकुराख्यो दृष्टान्तः सदा साध्यसमो हि सः ।
न हि साध्यसमो हेतुः सिद्धौ साध्यस्य युज्यते ॥२०॥

ननु हेतुफलयोः कार्यकारणभावः इत्यस्माभिरुक्तं शब्दमात्रमाश्रित्य च्छलमिदं त्वयोक्तं, पुत्राज्जन्म पितुर्यथा, विषाणवच्चासंबंधः, इत्यादि । न ह्यस्माभिरसिद्धाद्धेतोः फलसिद्धिः, असिद्धाद्वा फलाद्धेतुसिद्धिरभ्युपगता । किं तर्हि ? बीजांकुरवत्कार्यकारणभावोऽभ्युपगम्यत इति । अत्रोच्यते— बीजांकुराख्यो दृष्टान्तो यः स साध्येन समः तुल्यो ममेत्यभिप्रायः । ननु प्रत्यक्षः कार्यकारणभावो बीजांकुरयोरनादिः । न पूर्वस्य पूर्वस्यापरभावादादिमत्त्वाभ्युपगमात् । यथा इदानीमुत्पन्नोऽपरोकुरो बीजादादिमान्बीजं चापरमन्यस्मादंकुरादिति क्रमेणोत्पन्नत्वादादिमत् । एवं पूर्वः पूर्वोऽकुरो बीजं च पूर्वं पूर्वमादिमदेवेति प्रत्येकं सर्वस्य बीजांकुरजातस्य आदिमत्त्वात्कस्यचिदप्यनादित्वानुपपत्तिः । एवं हेतुफलयोः । अथ बीजांकुरसन्ततेरनादिमत्त्वमिति चेत् । न । एकत्वानुपपत्तेः । न हि बीजांकुरव्यतिरेकेण बीजांकुरसंततिर्नामैकाऽभ्युपगम्यते हेतुफलसंततिर्वा तदनादित्ववादिभिः । तस्मात्सूक्तं "हेतोः फलस्य चानादिः कथं तैरुपवर्ण्यते" इति । तथा च अन्यदप्यनुपपत्तेर्न च्छलमित्यभिप्रायः । न च लोके साध्यसमो हेतुः साध्यस्य सिद्धौ सिद्धिनिमित्तं युज्यते प्रयुज्यते प्रमाणकुशलैरित्यर्थः । हेतुरिति दृष्टान्तोऽत्राभिप्रेतो गमकत्वात् । प्रकृतो हि दृष्टान्तो न हेतुरिति ॥

पूर्वापरापरिज्ञानमजातेः परिदीपकम् ।
जायमानाद्धि वै धर्मात्कथं पूर्वं न गृह्यते ॥२१॥

कथं बुद्धेरजाति परिदीपितेत्याह— यदेतद्धेतुफलयोः पूर्वापरापरिज्ञानं, तच्चैतदजातेः परिदीपकमवबोधकमित्यर्थः । जायमानो हि चेत् धर्मो गृह्यते, कथं तस्मात्पूर्वं कारणं न गृह्यते ? अवश्यं हि जायमानस्य ग्रहीत्रा तज्जनकं ग्रहीतव्यम् । जन्यजनकयोः संबंधस्यानपेतत्वात् । तस्मादजातिपरिदीपकं तदित्यर्थः ॥

स्वतो वा परतो वापि न किंचिद्वस्तु जायते ।
सदसत्सदसद्वापि न किंचिद्वस्तु जायते ॥२२॥

इतश्च न जायते किंचित् । यज्जायमानं वस्तु स्वतः परतः उभयतो वा सदसत्सदसद्वा न जायते, न तस्य केनचिदपि प्रकारेण जन्म संभवति । न

तावत्स्वयमेवापरिनिष्पन्नात्स्वत स्वरूपात्स्वयमेव जायते, यथा घटस्तस्मादेव घटात् । नापि परतोऽन्यस्मादन्यो, यथा घटात्पटः पटात्पटान्तरम् । तथा नोभयतः । विरोधात् । यथा घटपटाभ्यां घट· पटो वा न जायते । ननु मृदो घटो जायते पितुश्च पुत्रः । सत्यम् । अस्ति जायत इति प्रत्ययः शब्दश्च मूढानाम् । तावेव तु शब्दप्रत्ययौ विवेकिभि· परीक्ष्येते— किं सत्येव तावुत मृषेति । यावता परीक्ष्यमाणे शब्दप्रत्ययविषये वस्तु घटपुत्रादिलक्षणं शब्दमात्रमेव तत् । 'वाचारंभणं' इतिश्रुतेः । सच्चेन्न जायते, सत्त्वात् मृत्पिण्डादिवत् । यद्यसत्, तथापि न जायते, असत्त्वादेव, शशविषाणादिवत् । अथ सदसत्, तथापि न जायते विरुद्धस्यैकस्यासंभवात् । अतो न किंचिद्वस्तु जायत इति सिद्धम् । येषां पुनर्जनिरेव जायत इति क्रियाकारकफलैकत्वमभ्युपगम्यते क्षणिकत्वं च वस्तुन·, ते दूरत एव न्यायापेता· । इदमित्थमित्यवधारणक्षणान्तरानवस्थानात अननुभूतस्य स्मृत्यनुपपत्तेश्च ॥

हेतुर्न जायतेऽनादेः फलं चापि स्वभावत ।
आदिर्न विद्यते यस्य तस्य ह्यादिर्न विद्यते ॥२३॥

किंच हेतुफलयोः अनादित्वमभ्युपगच्छता त्वया बलाद्धेतुफलयोरजन्मैवाभ्युपगतं स्यात् । तत्कथम् ? अनादेरादिरहितात्फलाद्धेतुर्न जायते । न ह्यनुत्पन्नादनादेः फलाद्धेतोर्जन्मेष्यते त्वया । फलं च आदिरहितादनादेर्हेतो. अजात्स्वभावत एव निर्निमित्तं जायत इति नाभ्युपगम्यते । तस्मादनादित्वमभ्युपगच्छता त्वया हेतुफलयोरजन्मैवाभ्युपगम्यते । यस्मादनादि· कारणं न विद्यते यस्य लोके, तस्य ह्यादिः पूर्वोक्ता जातिर्न विद्यते । कारणवत एव ह्यादिरभ्युपगम्यते नाकारणवतः ॥

प्रज्ञप्तेः सनिमित्तत्वमन्यथा द्वयनाशतः ।
संक्लेशस्योपलब्धेश्च परतंत्रास्थिता मता ॥२४॥

उक्तस्यैवार्थस्य दृढीकरणचिकीर्षया पुनराक्षिपति— प्रज्ञानं प्रज्ञप्तिः शब्दादिप्रतीतिस्तस्याः सनिमित्तत्वम् । निमित्तं कारणं विषय इत्येतत्सनिमित्तत्वं सविषयत्वं स्वात्मव्यतिरिक्तविषयतेत्येतत् प्रतिजानीमहे । न हि निर्विषया प्रज्ञप्तिः शब्दादिप्रतीतिः स्यात् । तस्याः सनिमित्तत्वात् । अन्यथा निर्विषयत्वे शब्दस्पर्शनीलपीतलोहितादिप्रत्ययवैचित्र्यस्य द्वयस्य नाशतो नाशोऽभावः.

प्रसज्येतेत्यर्थ । न च प्रत्ययवैचित्र्यस्य द्वयस्याभावोऽस्ति, प्रत्यक्षत्वात् । अतः प्रत्ययवैचित्र्यस्य द्वयस्य दर्शनात् । परेषां तंत्रं परतंत्रमित्यन्यशास्त्रं, तस्य परतंत्रस्य परतंत्राश्रयस्य बाह्यार्थस्य प्रज्ञानव्यतिरिक्तस्यास्तिता मताऽभिप्रेता । न हि प्रज्ञप्तेः प्रकाशमात्रस्वरूपाया नीलपीतादिबाह्यालंबनवैचित्र्यमंतरेण स्वभावभेदेन एतद्वैचित्र्यं संभवति । स्फटिकस्येव नीलाद्युपाध्याश्रयेणा वैचित्र्यं न घटत इत्यभिप्रायः । इतश्च परतंत्राश्रयस्य बाह्यार्थस्य ज्ञानव्यतिरिक्तस्यास्तिता । संक्लेशनं संक्लेशो दुःखमित्यर्थ । उपलभ्यते हि अग्निदाहादिनिमित्तं दुःखम् । यद्यन्यादिबाह्यं दाहादिनिमित्तं विज्ञानव्यतिरिक्तं न स्यात्ततो दाहादिदुःखं नोपलभ्येत । उपलभ्यते तु । अतस्तेन मन्यामहे अस्ति बाह्योऽर्थ इति । न हि विज्ञानमात्रे संक्लेशो युक्त । अन्यत्रादर्शनादित्यभिप्रायः ॥

प्रज्ञप्तेः सनिमित्तत्वमिष्यते युक्तिदर्शनात् ।
निमित्तस्यानिमित्तत्वमिष्यते भूतदर्शनात् ॥२५॥

अत्रोच्यते—बाढमेवं प्रज्ञप्तेः सनिमित्तत्वं द्वयसंक्लेशोपलब्धियुक्तिदर्शनादिष्यते त्वया । स्थिरीभव तावत्त्वं युक्तिदर्शनं वस्तुनस्तथात्वाभ्युपगमे कारणमित्यत्र । ब्रूहि किं तत इति । उच्यते— निमित्तस्य प्रज्ञप्त्यालंबनाभिमतस्य तव घटादेरनिमित्तत्वमनालंबनत्वं वैचित्र्यहेतुत्वमिष्यतेऽस्माभिः । कथं ? भूतदर्शनात् । परमार्थदर्शनादित्येतत् । न हि घटो यथाभूतमृद्रूपदर्शने सति तद्व्यतिरेकेणास्ति । यथाऽश्वान्महिष , पटो वा तंतुव्यतिरेकेण । तंतवश्चाशुव्यतिरेकेण इत्येवमुत्तरोत्तरभूतदर्शने आ शब्दप्रत्ययनिरोधान्नैव निमित्तमुपलभामहे इत्यर्थः । अथवा अभूतदर्शनाद्बाह्यार्थस्यानिमित्तत्वमिष्यते, रज्ज्वादाविव सर्पादेरित्यर्थ । भ्रान्तिदर्शनविषयत्वाच्च निमित्तस्यानिमित्तत्वं भवेत् । तदभावेऽभावात् । न हि सुषुप्तसमाहितमुक्तानां भ्रान्तिदर्शनाभावे आत्मव्यतिरिक्तो बाह्योऽर्थ उपलभ्यते । न ह्युन्मत्तावगतं वस्तु अनुन्मत्तैरपि तथाभूतं गम्यते । एतेन द्वयदर्शनं संक्लेशोपलब्धिश्च प्रत्युक्ता ॥

चित्तं न संस्पृशत्यर्थं नार्थाभासं तथैव च ।
अभूतो हि यतश्चार्थो नार्थाभासस्ततः पृथक् ॥२६॥

यस्मान्नास्ति बाह्यं निमित्तं अतश्चित्तं न स्पृशत्यर्थं बाह्यालंबनविषयम् । नाप्यर्थाभासं, चित्तत्वात्स्वप्नचित्तवत् । अभूतो हि जागरितेऽपि स्वप्नार्थवदेव

बाह्यः शब्दाद्यर्थो यत उक्तहेतुत्वाच्च । नाप्यर्थाभासश्चित्तात्पृथक् । चित्तमेव हि घटाद्यर्थवदवभासते यथा स्वप्ने ॥

निमित्तं न सदा चित्त संस्पृशत्यध्वसु त्रिषु ।
अनिमित्तो विपर्यासः कथं तस्य भविष्यति ॥२७॥

ननु विपर्यासस्तर्ह्यसति घटादौ घटाद्याभासता चित्तस्य । तथा च सति अविपर्यासः क्वचिद्वक्तव्य इति । अत्रोच्यते— निमित्तं विषयं अतीतानागतवर्तमानाध्वसु त्रिष्वपि सदा चित्तं न संस्पृशेदेव हि । यदि हि क्वचिन्संस्पृशेत्सोऽविपर्यासः परमार्थत इति । अतस्तदपेक्षयाऽसति घटे घटाभासता विपर्यास स्यान्न तु तदस्ति कदाचिदपि चित्तस्यार्थसंस्पर्शनम् । तस्मादनिमित्तो विपर्यास कथं तस्य चित्तस्य भविष्यति ? न कथंचिद्विपर्यासोऽस्तीत्यभिप्राय । अयमेव हि स्वभावश्चित्तस्य, यदुतासति निमित्ते घटादौ तद्वदवभासनम् ॥

तस्मान्न जायते चित्तं चित्तदृश्यं न जायते ।
तस्य पश्यन्ति ये जातिं खे वै पश्यन्ति ते पदम् ॥२८॥

"प्रज्ञप्ते. सनिमित्तत्वं" इत्याद्येतदंतं विज्ञानवादिनो बौद्धस्य वचनं बाह्यार्थवादिपक्षप्रतिषेधपरं आचार्येणानुमोदितम् । तदेव हेतुं कृत्वा तत्पक्षप्रतिषेधाय तदिदमुच्यते— तस्मादित्यादि । यस्मादसत्येव घटादौ घटाद्याभासता चित्तस्य विज्ञानवादिनाऽभ्युपगता, तदनुमोदितमस्माभिरपि भूतदर्शनात । तस्मात्तस्यापि चित्तस्य जायमानाऽवभासता असत्येव जन्मनि युक्ता भवितुमित्यतो न जायते चित्तम् । यथा चित्तदृश्यं न जायतेऽतस्तस्य चित्तस्य ये जातिं पश्यन्ति विज्ञानवादिनः क्षणिकत्ववदु·खित्वशून्यत्वानात्मत्वादि च, तेनैव चित्तेन चित्तस्वरूपं द्रष्टुमशक्यं पश्यन्तः खे वै पश्यन्ति ते पदं पश्यादीनाम् । अत इतरेभ्योऽपि द्वैतिभ्योऽत्यंतसाहसिका इत्यर्थः । येऽपि शून्यवादिन. पश्यन्त एव सर्वशून्यता स्वदर्शनस्यापि शून्यतां प्रतिजानते ते ततोऽपि साहसिकतरा· खं मुष्टिनापि जिघृक्षन्ति ॥

अजातं जायते यस्मादजातिः प्रकृतिस्ततः ।
प्रकृतेरन्यथाभावो न कथंचिद्भविष्यति ॥२९॥

उक्तैर्हेतुभिरजमेकं ब्रह्मेति सिद्धम् । यत्पुनरादौ प्रतिज्ञात तत्फलोपसंहारार्थोऽयं श्लोकः । अजातं यच्चित्तं ब्रह्मैव जायत इति वादिभिः परिकल्प्यते,

तदजातं जायते यस्मादजाति. प्रकृतिस्तस्य । ततस्तस्मादजातरूपाया· प्रकृतेः अन्यथाभावो जन्म न कथंचिद्भविष्यति ॥

अनादेरंतवत्त्वं च संसारस्य न सेत्स्यति ।
अनंतता चादिमतो मोक्षस्य न भविष्यति ॥३०॥

अयं चापर आत्मनः संसारमोक्षयो. परमार्थसद्भाववादिनां दोष उच्यते । अनादेः अतीतकोटिरहितस्य संसारस्यातवत्त्वं समाप्तिर्न सेत्स्यति युक्तितः सिद्धिं नोपयास्यति । न ह्यनादिः सन्नंतवान्कश्चित्पदार्थो दृष्टो लोके । बीजाकुरसंबंधनैरंतर्यविच्छेदो दृष्ट इति चेत् । न । एकवस्त्वभावेनापादितत्वात् । तथा अनंततापि विज्ञानप्राप्तिकालप्रभवस्य मोक्षस्य आदिमतो न भविष्यति । घटादिष्वदर्शनात् । घटादिविनाशवदवस्तुत्वाददोष इति चेत् । तथा च मोक्षस्य परमार्थसद्भावप्रतिज्ञाहानि· । असत्त्वादेव शशविषाणस्येव आदिमत्त्वाभावश्च ॥

आदावंते च यन्नास्ति वर्तमानेऽपि तत्तथा ।
वितथैः सदृशाः सन्तोऽवितथा इव लक्षिताः ॥३१॥

सप्रयोजनता तेषां स्वप्ने विप्रतिपद्यते ।
तस्मादाद्यंतवत्त्वेन मिथ्यैव खलु ते स्मृता. ॥३२॥

वैतथ्ये कृतव्याख्यानौ श्लोकाविह संसारमोक्षाभावप्रसंगेन पठितौ ॥

सर्वे धर्मा मृषा स्वप्ने कायस्यान्तर्निदर्शनात् ।
संवृतेऽस्मिन्प्रदेशे वै भूतानां दर्शनं कुतः ॥३३॥

"निमित्तस्यानिमित्तत्वमिष्यते भूतदर्शनात" इत्ययमर्थः प्रपंच्यत एतैः श्लोकैः ॥

न युक्तं दर्शनं गत्वा कालस्यानियमाद्गतौ ।
प्रतिबुद्धश्च वै सर्वस्तस्मिन्देशे न विद्यते ॥३४॥

जागरिते गत्यागमनकालो नियतो देशः प्रमाणतो यः तस्यानियमान्नियमस्याभावात्स्वप्ने न देशान्तरगमनमित्यर्थः ॥

मित्राद्यैः सह संमंत्र्य संबुद्धो न प्रपद्यते ।
गृहीतं चापि यत्किंचित्प्रतिबुद्धो न पश्यति ॥३५॥

मित्राद्यैः सह संमंत्र्य तदेव मंत्रणं प्रतिबुद्धो न प्रपद्यते । गृहीतं च यत्किंचिद्धिरण्यादि न प्राप्नोति । ततश्च न देशान्तरं गच्छति स्वप्ने ॥

स्वप्ने चावस्तुकः कायः पृथगन्यस्य दर्शनात् ।
यथा कायस्तथा सर्वं चित्तदृश्यमवस्तुकम् ॥३६॥

स्वप्ने चाटन्दृश्यते यः कायः, सोऽवस्तुकस्ततोऽन्यस्य स्वापदेशस्थस्य पृथक्कायान्तरस्य दर्शनात् । यथा स्वप्नदृश्यः कायोऽसंस्तथा सर्वं चित्तदृश्यमवस्तुकं जागरितेऽपि चित्तदृश्यत्वादित्यर्थ । स्वप्नसमत्वादसज्जागरितमपीति प्रकरणार्थः ॥

ग्रहणाज्जागरितवत्तद्धेतुः स्वप्न इष्यते ।
तद्धेतुत्वात्तु तस्यैव सज्जागरितमिष्यते ॥३७॥

इतश्चासत्त्वं जाग्रद्वस्तुनो जागरितवज्जागरितस्येव ग्रहणात् ग्राह्यग्राहकरूपेण स्वप्नस्य, तज्जागरितं हेतुरस्य स्वप्नस्य स स्वप्नस्तद्धेतुर्जागरितकार्यमिष्यते । तद्धेतुत्वाज्जागरितकार्यत्वात्तस्यैव स्वप्नदृश एव सज्जागरितं, न त्वन्येषाम् । यथा स्वप्न इत्यभिप्रायः । यथा स्वप्नः स्वप्नदृश एव सन्साधारणविद्यमानवस्तुवदवभासते तथा तत्कारणत्वात्साधारणविद्यमानवस्तुवदवभासमानं, न तु साधारणं विद्यमानवस्तु स्वप्नवदेवेत्यभिप्रायः ॥

उत्पादस्याप्रसिद्धत्वादजं सर्वमुदाहृतम् ।
न च भूतादभूतस्य संभवोऽस्ति कथंचन ॥३८॥

ननु स्वप्नकारणत्वेऽपि जागरितवस्तुनो न स्वप्नवदवस्तुत्वम् । अत्यंतचलो हि स्वप्नो जागरितं तु स्थिरं लक्ष्यते । सत्यमेवमविवेकिनां स्यात् । विवेकिनां तु न कस्यचिद्वस्तुनः उत्पादः प्रसिद्धः । अतोऽप्रसिद्धत्वादुत्पादस्य आत्मैव सर्वमित्यजं सर्वमुदाहृतं वेदान्तेषु 'सबाह्याभ्यंतरो ह्यजः' इति । यद्यपि मन्यसे जागरितात्सतोऽसत्स्वप्नो जायत इति, तदसत् । न भूताद्विद्यमानादभूतस्यासत संभवोऽस्ति लोके । न ह्यसत शशविषाणादे संभवो दृष्ट कथंचिदपि ॥

असज्जागरिते दृष्ट्वा स्वप्ने पश्यति तन्मयः ।
असत्स्वप्नेऽपि दृष्ट्वा च प्रतिबुद्धो न पश्यति ॥३९॥

ननूक्तं त्वयैव स्वप्नो जागरितकार्यमिति । तत्कथमुत्पादोऽप्रसिद्ध इत्युच्यते? शृणु तत्र यथा कार्यकारणभावोऽस्माभिरभिप्रेत इति । असदविद्यमानं रज्जुसर्पवद्विकल्पितं वस्तु जागरिते दृष्ट्वा तद्भावभावितस्तन्मयः स्वप्नेऽपि जागरितवद्ग्राह्यग्राहकरूपेण विकल्पयन्पश्यति, तथा असत्स्वप्नेऽपि दृष्ट्वा च प्रतिबुद्धो

न पश्यत्यविकल्पयन्। च-शब्दात्। तथा जागरितेऽपि दृष्ट्वा स्वप्ने न पश्यति कदाचिदित्यर्थः। तस्माज्जागरितं स्वप्नहेतुरित्युच्यते न तु परमार्थसदिति कृत्वा ॥

नास्त्यसद्धेतुकमसत्सदसद्धेतुकं तथा ।
सच्च सद्धेतुकं नास्ति सद्धेतुकमसत्कुतः ॥४०॥

परमार्थतस्तु न कस्यचित्केनचिदपि प्रकारेण कार्यकारणभाव उपपद्यते। कथम्? नास्त्यसद्धेतुकं असच्छशविषाणादि हेतु कारणं यस्यासतः एव स्वकुसुमादेः, तदसद्धेतुकमसन्न विद्यते। तथा सदपि घटादिवस्तु असद्धेतुकं शशविषाणादिकार्यं नास्ति। तथा सच्च विद्यमानं घटादि वस्त्वंतरकार्यं नास्ति। सत्कार्यमसत्कुत एव संभवति? न चान्यः कार्यकारणभावः संभवति शक्यो वा कल्पयितुम्। अतो विवेकिनामसिद्ध एव कार्यकारणभावः कस्यचिदित्यभिप्रायः ॥

विपर्यासाद्यथा जाग्रदचित्यान्भूतवत्स्पृशेत ।
तथा स्वप्ने विपर्यासाद्धर्मांस्तत्रैव पश्यति ॥४१॥

पुनरपि जाग्रत्स्वप्नयोरसतोरपि कार्यकारणभावाशंकामपनयन्नाह। विपर्यासादविवेकतो यथा जाग्रज्जागरितेऽचित्यान्भावान अशक्यचिंतनीयान्रज्जुसर्पादीन्भूतवत्परमार्थवत्स्पृशेत् स्पृशन्निव विकल्पयेदित्यर्थः। कश्चिद्यथा, तथा स्वप्ने विपर्यासाद्धस्त्यादीन्धर्मान्पश्यन्निव विकल्पयति। तत्रैव पश्यति, न तु जागरितादुत्पद्यमानानित्यर्थः ॥

उपलंभात्समाचारादस्तिवस्तुत्ववादिनाम् ।
जातिस्तु देशिता बुद्धैरजातेस्त्रसतां सदा ॥४२॥

यद्यपि बुद्धैरद्वैतवादिभिर्जातिर्देशितोपदिष्टा। उपलंभनमुपलंभस्तस्मादुपलब्धेरित्यर्थः। समाचाराद्वर्णाश्रमादिधर्मसमाचरणात्। ताभ्यां हेतुभ्यामस्तिवस्तुत्ववादिना अस्ति वस्तुभाव इत्येवंवदनशीलानां दृढाग्रहवतां श्रद्दधानानां मंदविवेकिनामर्थोपायत्वेन सा देशिता जातिः। ता गृह्णन्तु तावत्। वेदान्ताभ्यासिनां तु स्वयमेव अजाद्वयात्मविषयो विवेको भविष्यतीति। न तु परमार्थबुद्ध्या। ते हि श्रोत्रियाः स्थूलबुद्धित्वादजातेरजातिवस्तुनः सदा त्रस्यन्त्यात्मनाशं मन्यमाना अविवेकिन इत्यर्थः। "उपायः सोऽवताराय" इत्युक्तम् ॥

अजातेस्त्रसतां तेषामुपलंभाद्भियन्ति ये ।
जातिदोषा न सेत्स्यन्ति दोषोऽप्यल्पो भविष्यति ॥४३॥

ये चैवमुपलंभात्समाचाराच्च अजातेरजातिवस्तुनः त्रसन्तोऽस्ति वस्त्वित्यद्वयादात्मनो, वियन्ति विरुद्धं यन्ति द्वैतं प्रतिपद्यन्ते इत्यर्थः । तेषामजातेस्त्रसता श्रद्दधानानां सन्मार्गावलंबिनां जातिदोषा जात्युपलंभकृता दोषा न मेस्स्यन्ति सिद्धि नोपयास्यन्ति । विवेकमार्गप्रवृत्तत्वात । यद्यपि कश्चिद्दोषः स्यात् सोऽप्यल्प एव भविष्यति । सम्यग्दर्शनाप्रतिपत्तिहेतुक इत्यर्थः ॥

उपलंभात्समाचारान्मायाहस्ती यथोच्यते ।
उपलंभात्समाचारादस्ति वस्तु तथोच्यते ॥४४॥

ननु उपलंभसमाचारयोः प्रमाणत्वादस्त्येव द्वैतं वास्त्विति । न । उपलंभसमाचारयोर्व्यभिचारात् । कथं व्यभिचार इत्युच्यते । उपलभ्यते हि मायाहस्ती हस्तीव, हस्तिनमिवात्र समाचरन्ति बंधनारोहणादिहस्तिसंबंधिभिर्धर्मैः । हस्तीति चोच्यतेऽसन्नपि यथा तथैवोपलंभात्समाचारात् द्वैतं भेदरूपमास्ति वस्त्वित्युच्यते । तस्मान्नोपलंभसमाचारौ द्वैतवस्तुसद्भावे हेतू भवत इत्यभिप्रायः ॥

जात्याभासं चलाभासं वस्त्वाभासं तथैव च ।
अजाचलमवस्तुत्वं विज्ञानं शान्तमद्वयम् ॥४५॥

किं पुनः परमार्थसद्वस्तु यदास्पदा जात्याद्यसद्बुद्धय इत्याह— अजाति सज्जातिवदवभासत इति जात्याभासम् । तद्यथा देवदत्तो जायत इति । चलाभासं चलमिवाभासत इति । यथा स एव देवदत्तो गच्छतीति । वस्त्वाभासं वस्तु द्रव्यं धर्मि तद्वदवभासत इति वस्त्वाभासम् । यथा स एव देवदत्तो गौरो दीर्घ इति । जायते देवदत्तः स्पंदते दीर्घो गौर इत्येवमवभासते । परमार्थतस्तु अजमचलमवस्तुत्वमद्रव्यं च । किं तदेवंप्रकारं ? विज्ञानं विज्ञप्तिः । जात्यादिरहितत्वाच्छान्तम । अत एवाद्वयं च तदित्यर्थः ॥

एवं न जायते चित्तमेवं धर्मा अजाः स्मृताः ।
एवमेव विजानन्तो न पतन्ति विपर्यये ॥४६॥

एवं यथोक्तेभ्यो हेतुभ्यो न जायते चित्तम् । एवं धर्मा आत्मानोऽजाः स्मृता ब्रह्मविद्भिः । धर्मा इति बहुवचनं देहभेदानुविधायित्वाद्द्वयस्यैव उपचारतः । एवमेव यथोक्तं विज्ञानं जात्यादिरहितमद्वयमात्मतत्त्वं विजानन्तः त्यक्तबाह्यैषणाः पुनर्न पतन्त्यविद्याध्वान्तसागरे विपर्यये । 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' इत्यादिमंत्रवर्णात ॥

ऋजुवक्रादिकाभासमलातस्पंदितं यथा ।
ग्रहणग्राहकाभासं विज्ञानस्पंदितं तथा ॥४७॥

यथोक्तं परमार्थदर्शनं प्रपंचयिष्यन्नाह— यथा हि लोके ऋजुवक्रादिप्रकाराभासं अलातस्पंदितमुल्काचलनं तथा ग्रहणग्राहकाभासं विषयिविषयाभासमित्यर्थः । किं तत्? विज्ञानस्पंदितम् । स्पंदितमिव स्पंदितमविद्यया । न ह्यचलस्य विज्ञानस्य स्पंदनमस्ति । अजाचलमिति ह्युक्तम् ॥

अस्पंदमानमलातमनाभासमजं यथा ।
अस्पंदमानं विज्ञानमनाभासमजं तथा ॥४८॥

अस्पंदमानं स्पंदनवर्जितं तदेवालातं ऋज्वाद्याकारेण अजायमानं अनाभासमजं यथा, तथाऽविद्यया स्पंदमानमविद्योपरमेऽस्पंदमानं जाल्याद्याकारेण अनाभासमजमचलं भविष्यतीत्यर्थः ॥

अलाते स्पंदमाने वै नाभासा अन्यतोभुवः ।
न ततोऽन्यत्र निस्पंदान्नालातं प्रविशन्ति ते ॥४९॥

किं च तस्मिन्नेवालाते स्पंदमाने ऋजुवक्राद्याभासा अलातादन्यत कुतश्चिदागत्यालाते नैव भवन्तीति नान्यतोभुवः । न च तस्मान्निस्पंदादलातादन्यत्र निर्गता । न च निस्पंदमलातमेव प्रविशन्ति ते ॥

न निर्गता अलातात्ते द्रव्यत्वाभावयोगतः ।
विज्ञानेऽपि तथैव स्युराभासस्याविशेषतः ॥५०॥

किंच न निर्गता अलातात्ते आभासा गृहादिव द्रव्यत्वाभावयोगत । द्रव्यस्य भावो द्रव्यत्वम । तदभावो द्रव्यत्वाभावः । द्रव्यत्वाभावयोगतो द्रव्यत्वाभावयुक्तेर्वस्तुन्वाभावादित्यर्थः । वस्तुनो हि प्रवेशादि संभवति, नावस्तुन । विज्ञानेऽपि जाल्याद्याभासास्तथैव स्युः आभासस्याविशेषतस्तुल्यत्वात ॥

कथं तुल्यत्वमित्याह—

विज्ञाने स्पंदमाने वै नाभासा अन्यतोभुवः ।
न ततोऽन्यत्र निस्पंदान्न विज्ञानं विशन्ति ते ॥५१॥
न निर्गतास्ते विज्ञानाद्द्रव्यत्वाभावयोगतः ।
कार्यकारणताभावाद्यतोऽचिंत्याः सदैव ते ॥५२॥

अलातेन समानं सर्वं विज्ञानस्य । सदाऽचलत्वं तु विज्ञानस्य विशेष ।

जात्याद्याभासा विज्ञानेऽचले किंकृता इत्याह । कार्यकारणताभावात् जन्यजनकत्वानुपपत्तेरभावरूपत्वात् अचिन्त्यास्ते यत सदैव । यथाऽसत्स्वप्नज्वाद्याभासेषु ऋज्वादिबुद्धिर्दृष्टा अलातमात्रे, तथा असत्स्वेव जात्यादिषु विज्ञानमात्रे जात्यादिबुद्धिर्मृषैवेति समुदायार्थः ॥

द्रव्यं द्रव्यस्य हेतुः स्यादन्यदन्यस्य चैव हि ।
द्रव्यत्वमन्यभावो वा धर्माणां नोपपद्यते ॥५३॥

अजमेकमात्मतत्त्वमिति स्थितम् । तत्र यैरपि कार्यकारणभावः कल्प्यते तेषा द्रव्यं द्रव्यस्यान्यस्यान्यद्धेतु. कारणं स्यात् न तु तस्यैव तत । नाप्यद्रव्यं कस्यचित्कारणं स्वतंत्रं दृष्टं लोके । न च द्रव्यत्वं धर्माणामात्मना उपपद्यतेऽन्यत्वं वा कुतश्चिद्येनान्यस्य कारणत्वं कार्यत्वं वा प्रतिपद्येत । अतोऽद्रव्यत्वादनन्यत्वाच्च न कस्यचित्कार्यं कारणं वा आत्मेत्यर्थः ॥

एवं न चित्तजा धर्माश्चित्तं वापि न धर्मजम् ।
एवं हेतुफलाजातिं प्रविशन्ति मनीषिणः ॥५४॥

एवं यथोक्तेभ्यो हेतुभ्य आत्मविज्ञानस्वरूपमेव चित्तमिति, न चित्तजा बाह्यधर्मा., नापि बाह्यधर्मजं चित्तम् । विज्ञानस्वरूपाभासमात्रत्वात्सर्वधर्माणाम् । एवं न हेतो. फलं जायते, नापि फलाद्धेतुरिति हेतुफलयो. अजाति हेतुफलाजाति प्रविशन्त्यध्यवस्यन्ति । आत्मनि हेतुफलयोरभावमेव प्रतिपद्यन्ते ब्रह्मविद इत्यर्थ ॥

यावद्धेतुफलावेशस्तावद्धेतुफलोद्भव. ।
क्षीणे हेतुफलावेशे नास्ति हेतुफलोद्भवः ॥५५॥

ये पुनर्हेतुफलयोरभिनिविष्टास्तेषां किं स्यादित्युच्यते— धर्माधर्माख्यस्य हेतोरहं कर्ता मम धर्माधर्मौ तत्फलं कालान्तरे क्वचित्प्राणिनिकाये जातो भोक्ष्य इति यावद्धेतुफलयोरावेशो हेतुफलाग्रहः आत्मन्यध्यारोपणं तच्चित्ततेत्यर्थ । तावद्धेतुफलयोरुद्भवो धर्माधर्मयोस्तत्फलस्य चानुच्छेदेन प्रवृत्तिरित्यर्थ. । यदा पुनर्मन्त्रौषधिवीर्येणेव ग्रहावेशो यथोक्तोद्वेतदर्शनेन अविद्योद्भूतहेतुफलावेशोऽपनीतो भवति, तदा तस्मिन्क्षीणे नास्ति हेतुफलोद्भवः ॥

यावद्धेतुफलावेशः संसारस्तावदायत. ।
क्षीणे हेतुफलावेशे संसारं न प्रपद्यते ॥५६॥

यदि हेतुफलोद्भव, तदा को दोष इत्युच्यते— यावत्सम्यग्दर्शनेन हेतुफलावेशो न निवर्ततेऽक्षीणः संसारस्तावदायतो दीर्घो भवतीत्यर्थ । क्षीणे पुनर्हेतुफलावेशे संसारं न प्रपद्यते, कारणाभावात् ॥

संवृत्या जायते सर्वं शाश्वतं नास्ति तेन वै ।
सद्भावेन ह्यजं सर्वमुच्छेदस्तेन नास्ति वै ॥५७॥

नन्वजादात्मनोऽन्यन्नास्त्येव । तत्कथं हेतुफलयोः संसारस्य चोत्पत्तिविनाशावुच्येते त्वया? शृणु । संवृत्या संवरणं संवृतिरविद्याविषयो लौकिको व्यवहारस्तया संवृत्या जायते सर्वं, तेनाविद्याविषये शाश्वतं नित्यं नास्ति वै । अत उत्पत्तिविनाशलक्षणः संसार आयत इत्युच्यते । परमार्थसद्भावेन त्वजं सर्वमात्मैव यस्मात् । अतो जात्यभावादुच्छेदस्तेन नास्ति वै कस्यचिद्धेतुफलादेः इत्यर्थः ॥

धर्मा य इति जायन्ते जायन्ते ते न तत्त्वतः ।
जन्म मायोपमं तेषां सा च माया न विद्यते ॥५८॥

येऽप्यात्मानोऽन्ये च धर्मा जायन्त इति कल्प्यन्ते, ते इत्येवंप्रकारा यथोक्ता संवृतिर्निर्दिश्यत इति संवृत्यैव धर्मा जायन्ते । न ते तत्त्वतः परमार्थतो जायन्ते । यत्पुनस्तत्संवृत्या जन्म तेषा धर्माणा यथोक्तानां यथा मायया जन्म तथा तन्मायोपमं प्रत्येतव्यम् । माया नाम वस्तु तर्हि । नैवम् । सा च माया न विद्यते । मायेत्यविद्यमानस्याख्या इत्यभिप्रायः ॥

यथा मायामयाद्बीजाज्जायते तन्मयोऽकुरः ।
नासौ नित्यो न चोच्छेदी तद्वद्धर्मेषु योजना ॥५९॥

कथं मायोपमं तेषा धर्माणा जन्मेत्याह— यथा मायामयादाम्रादिबीजाज्जायते तन्मयो मायामयोऽकुरो, नासावंकुरो नित्यो न चोच्छेदी विनाशी वा । अभूतत्वादेव धर्मेषु जन्मनाशादियोजना युक्तिः । न तु परमार्थतो धर्माणां जन्म नाशो वा युज्यत इत्यर्थः ॥

नाजेषु सर्वधर्मेषु शाश्वताशाश्वताभिधा ।
यत्र वर्णा न वर्तन्ते विवेकस्तत्र नो यते ॥६०॥

परमार्थतस्त्वात्मसु अजेषु नित्यैकरसविज्ञप्तिमात्रसत्ताकेषु शाश्वतोऽशाश्वत इति वा नाभिधा नाभिधानं प्रवर्तत इत्यर्थः । यत्र येषु वर्ण्यन्ते यैरर्थास्ते

वर्णाः शब्दा न वर्तन्तेऽभिधातुं प्रकाशयितुं न प्रवर्तन्ते इत्यर्थः । इदमेवामिति विवेको विविक्तता तत्र नित्योऽनित्य इति नोच्यते । 'यतो वाचो निवर्तन्ते' इति श्रुतेः ॥

यथा स्वप्ने द्वयाभासं चित्तं चलति मायया ।
तथा जाग्रद्द्वयाभासं चित्तं चलति मायया ॥६१॥
अद्वयं च द्वयाभासं चित्तं स्वप्ने न संशयः ।
अद्वयं च द्वयाभासं तथा जाग्रन्न संशयः ॥६२॥

यत्पुनर्वाग्गोचरत्वं परमार्थतोऽद्वयस्य विज्ञानमात्रस्य, तन्मनस· स्पंदनमात्रं न परमार्थत् इति । उक्तार्थो श्लोकौ ॥

स्वप्नदृक्प्रचरन्स्वप्ने दिक्षु वै दशसु स्थितान् ।
अंडजान्स्वेदजान्वापि जीवान्पश्यति यान्सदा ॥६३॥

इतश्च वाग्गोचरस्याभावो द्वैतस्य । स्वप्नान्पश्यतीति स्वप्नदृक्प्रचरन्पर्यटन्स्वप्ने स्वप्नस्थाने दिक्षु वै दशसु स्थितान्वर्तमानाञ्जीवान्प्राणिन. अंडजान्स्वेदजान्वा यान्सदा पश्यतीति ॥

यद्येवं तत. किम् ? उच्यते—

स्वप्नदृक्चित्तदृश्यास्ते न विद्यन्ते तत· पृथक् ।
तथा तद्दृश्यमेवेदं स्वप्नदृक्चित्तमिष्यते ॥६४॥

स्वप्नदृशश्चित्तं स्वप्नदृक्चित्तम् । तेन दृश्यास्ते जीवाः । ततस्तस्मात्स्वप्नदृक्चित्तात्पृथङ्न विद्यन्ते न सन्तीत्यर्थ. । चित्तमेव ह्यनेकजीवादिभेदाकारेण विकल्प्यते तथा तदपि स्वप्नदृक्चित्तमिदं तद्दृश्यमेव, तेन स्वप्नदृशा दृश्यं तद्दृश्यम् । अतः स्वप्नदृग्व्यतिरेकेण चित्तं नाम नास्तीत्यर्थ ॥

चरञ्जागरिते जाग्रद्दिक्षु वै दशसु स्थितान् ।
अंडजान्स्वेदजान्वापि जीवान्पश्यति यान्सदा ॥६५॥
जाग्रच्चित्तक्षणीयास्ते न विद्यन्ते ततः पृथक् ।
तथा तद्दृश्यमेवेदं जाग्रतश्चित्तमिष्यते ॥६६॥

जाग्रतो दृश्या जीवास्तच्चित्ताव्यतिरिक्ताः चित्तक्षणीयत्वात् । स्वप्नदृक्चित्तक्षणीयजीववत् । तच्च जीवक्षणात्मकं चित्तं द्रष्टृव्यतिरिक्तं द्रष्टृदृश्यत्वात्स्वप्नचित्तवत् । उक्तार्थमन्यत् ॥

उभे ह्यन्योन्यदृश्ये ते किं तदस्तीति चोच्यते ।
लक्षणाशून्यमुभयं तन्मतेनैव गृह्यते ॥६७॥

जीवचित्ते उभे चित्तंचैत्त्ये ते अन्योन्यदृश्ये इतरेतरगम्ये । जीवादिविषयापेक्षं हि चित्तं नाम भवति । चित्तापेक्षं हि जीवादि दृश्यम् । अतस्ते अन्योन्यदृश्ये । तस्मान्न किंचिदस्तीति चोच्यते चित्तं वा चित्तेक्षणीयं वा । किं तदस्तीति विवेकिनोच्यते । नहि स्वप्ने हस्ती हस्तिचित्तं वा विद्यते, तथेहापि विवेकिनामित्यभिप्रायः । कथम् ? लक्षणाशून्यं, लक्ष्यतेऽनयेति लक्षणा प्रमाणं, प्रमाणशून्यमुभयं चित्तं चैत्त्यं द्वयं यतस्तन्मतेनैव तच्चित्ततयैव तद्गृह्यते । नहि घटमति प्रत्याख्याय घटो गृह्यते, नापि घटं प्रत्याख्याय घटमतिः । नहि तत्र प्रमाणप्रमेयभेदः शक्यते कल्पयितुमित्यभिप्रायः ॥

यथा स्वप्नमयो जीवो जायते म्रियतेऽपि च ।
तथा जीवा अमी सर्वे भवन्ति न भवन्ति च ॥६८॥
यथा मायामयो जीवो जायते म्रियतेऽपि च ।
तथा जीवा अमी सर्वे भवन्ति न भवन्ति च ॥६९॥
यथा निर्मितको जीवो जायते म्रियतेऽपि च ।
तथा जीवा अमी सर्वे भवन्ति न भवन्ति च ॥७०॥

मायामयो मायाविना यः कृतो निर्मितको मंत्रौषध्यादिभिर्निष्पादितः । स्वप्नमायानिर्मितका अंडजादयो जीवा यथा जायन्ते म्रियन्ते च, तथा मनुष्यादिलक्षणा अविद्यमाना एव चित्तविकल्पनामात्रा इत्यर्थः ॥

न कश्चिज्जायते जीवः संभवोऽस्य न विद्यते ।
एतत्तदुत्तमं सत्यं यत्र किंचिन्न जायते ॥७१॥

व्यवहारसत्यविषये जीवानां जन्ममरणादिः स्वप्नादिजीववदित्युक्तम् । उत्तमं तु परमार्थसत्यं न कश्चिज्जायते जीव इति । उक्तार्थमन्यत् ॥

चित्तस्पंदितमेवेदं ग्राह्यग्राहकवद्द्वयम् ।
चित्तं निर्विषयं नित्यमसंगं तेन कीर्तितम् ॥७२॥

सर्वं ग्राह्यग्राहकवच्चित्तस्पंदितमेव द्वयम् । चित्तं परमार्थत आत्मैवेति निर्विषयं, तेन निर्विषयत्वेन नित्यमसंगं कीर्तितम् । 'असंगो ह्ययं पुरुषः' इति श्रुतेः । सविषयस्य हि विषये संगः । निर्विषयत्वाच्चित्तमसंगमित्यर्थः ॥

योऽस्ति कल्पितसंवृत्या परमार्थेन नास्त्यसौ ।
परतंत्राभिसंवृत्या स्यान्नास्ति परमार्थतः ॥७३॥

ननु निर्विषयत्वेन चेदसंगत्वं, चित्तस्य न निःसंगता भवति, यस्माच्छास्ता शास्त्रं शिष्यश्चेत्येवमादेर्विषयस्य विद्यमानत्वात् । नैष दोषः । कस्मात् ? यः पदार्थः शास्त्रादिर्विद्यते स कल्पितसंवृत्या । कल्पिता च सा परमार्थप्रतिपत्त्युपायत्वेन संवृतिश्च सा तया योऽस्ति परमार्थेन, नास्त्यसौ न विद्यते । "ज्ञातं द्वैतं न विद्यते' इत्युक्तम् । यश्च परतंत्राभिसंवृत्या परशास्त्रव्यवहारेण स्यात्पदार्थः, स परमार्थतो निरूप्यमाणो नास्त्येव । तेन युक्तमुक्तं "असंगं तेन कीर्तितं" इति ॥

अज कल्पितसंवृत्या परमार्थेन नाप्यजः ।
परतंत्राभिनिष्पत्त्या संवृत्या जायते तु सः ॥७४॥

ननु शास्त्रादीनां संवृतित्वेऽज इतीयमपि कल्पना संवृतिः स्यात । सत्यमेवम् । शास्त्रादिकल्पितसंवृत्यैव अज इत्युच्यते । परमार्थेन नाप्यजः । यस्मात्परतंत्राभिनिष्पत्त्या परशास्त्रसिद्धिमपेक्ष्य योऽज इत्युक्तः स संवृत्या जायते । अतोऽज इतीयमपि कल्पना परमार्थविषये नैव क्रमत इत्यर्थः ॥

अभूताभिनिवेशोऽस्ति द्वयं तत्र न विद्यते ।
द्वयाभावं स बुद्ध्वैव निर्निमित्तो न जायते ॥७५॥

यस्मादसद्विषयस्तस्मादसत्यभूते द्वैतेऽभिनिवेशोऽस्ति केवलम् । अभिनिवेश आग्रहमात्रम् । द्वयं तत्र न विद्यते । मिथ्याभिनिवेशमात्रं च जन्मनः कारणं यस्मात् तस्मात द्वयाभावं बुद्ध्वा निर्निमित्तो निवृत्तमिथ्याद्वयाभिनिवेशो यः स न जायते ॥

यदा न लभते हेतूनुत्तमाधममध्यमान् ।
तदा न जायते चित्तं हेत्वभावे फलं कुतः ॥७६॥

जात्याश्रमविहिता आशीर्वादैरनुष्ठीयमाना धर्मा देवत्वादिप्राप्तिहेतव उत्तमाः केवलाश्च । धर्माः अधर्मव्यामिश्रा मनुष्यत्वादिप्राप्त्यर्था मध्यमाः । तिर्यगादिप्राप्तिनिमित्ता अधर्मलक्षणाः प्रवृत्तिविशेषाश्चाधमाः । तानुत्तममध्यमाधमान अविद्यापरिकल्पितान्यदा एकमेवाद्वितीयमात्मतत्त्वं सर्वकल्पनावर्जितं जानन्न लभते न पश्यति, यथा बालैर्दृश्यमानं गगने मलं विवेकी न पश्यति

तद्वत्, तदा न जायते नोत्पद्यते चित्तं देवाद्याकारैः उत्तमाधममध्यमफलरूपेण । न ह्यसति हेतौ फलमुत्पद्यते बीजाद्यभाव इव सस्यादि ॥

अनिमित्तस्य चित्तस्य यानुत्पत्तिः समाऽद्वया ।
अजातस्यैव सर्वस्य चित्तदृश्यं हि तद्यतः ॥७७॥

हेत्वभावे चित्तं नोत्पद्यत इति ह्युक्तम् । सा पुनरनुत्पत्तिश्चित्तस्य कीदृशी इत्युच्यते । परमार्थदर्शनेन निरस्तधर्माधर्माख्योत्पत्तिनिमित्तस्य अनिमित्तस्य चित्तस्येति या मोक्षाख्याऽनुत्पत्ति सा सर्वदा सर्वावस्थासु समा निर्विशेषाऽद्वया च । पूर्वमप्यजातस्यैवानुत्पन्नस्य चित्तस्य सर्वस्यादृश्यस्येत्यर्थ । यस्मात्प्रागपि विमानाच्चित्तं दृश्यं तत दृश्यं जन्म च, तस्मादजातस्य सर्वस्य सर्वदा चित्तस्य समाऽद्वयैवानुत्पत्तिर्न पुनः कदाचिद्भवति, कदाचिद्वा न भवति । सर्वदा एकरूपेवेत्यर्थः ॥

बुद्ध्वाऽनिमित्ततां सत्यां हेतुं पृथगनाप्नुवन् ।
वीतशोकं तथा काममभयं पदमश्नुते ॥७८॥

यथोक्तेन न्यायेन जन्मनिमित्तस्य द्वयस्य अभावादनिमित्ततां च सत्यां परमार्थरूपा बुद्ध्वा हेतुं धर्मादिकारणं देवादियोनिप्राप्तये पृथगनाप्नुवन्ननुपाददानः त्यक्तबाह्यैषण सन्कामशोकादिवर्जितं अविद्यादिरहितं अभयं पदमश्नुते । पुनर्न जायत इत्यर्थ ॥

अभूताभिनिवेशाद्धि सदृशे तत्प्रवर्तते ।
वस्त्वभावं स बुद्ध्वैव निःसंगं विनिवर्तते ॥७९॥

यस्मादभूताभिनिवेशादस्ति द्वयेऽद्वयास्तित्वनिश्चयोऽभूताभिनिवेशः, तस्मादविद्याव्यामोहरूपाद्धि सदृशे तदनुरूपे तच्चित्तं प्रवर्तते । तस्य द्वयस्य वस्तुनोऽभावं यदा बुद्ध्वांस्तदा तस्मान्निःसंगं निरपेक्षं सद्विनिवर्तते अभूताभिनिवेशविषयात ॥

निवृत्तस्याप्रवृत्तस्य निश्चला हि तदा स्थितिः ।
विषयः स हि बुद्धानां तत्साम्यमजमद्वयम् ॥८०॥

निवृत्तस्य द्वैतविषयाद्विषयान्तरे चाप्रवृत्तस्य अभावदर्शनेन चित्तस्य निश्चला चलनवर्जिता ब्रह्मस्वरूपैव तदा स्थितिः, यैषा ब्रह्मस्वरूपा स्थितिश्चित्तस्य अद्वयविज्ञानैकरसघनलक्षणा । स हि यस्माद्विषयो गोचरः परमार्थदर्शिनां बुद्धानां, तस्मात्तत्साम्यं परं निर्विशेषमजमद्वयं च ॥

अजमनिद्रमस्वप्नं प्रभातं भवति स्वयम् ।
सकृद्विभातो ह्येवैष धर्मो धातुस्वभावतः ॥८१॥

पुनरपि कीदृशश्चासौ बुद्धानां विषय इत्याह— स्वयमेव तत्प्रभातं भवति नादित्याद्यपेक्षं, स्वयंज्योतिःस्वभावमित्यर्थः । सकृद्विभातः सदैव विभात इत्येतत् । एष एवंलक्षणः आत्माख्यो धर्मो धातुस्वभावतो वस्तुस्वभावतः इत्यर्थः ॥

सुखमाव्रियते नित्यं दुःखं विव्रियते सदा ।
यस्य कस्य च धर्मस्य ग्रहेण भगवानसौ ॥८२॥

एवं बहुशः उच्यमानमपि परमार्थतत्त्वं कस्माल्लौकिकैर्न गृह्यत इत्युच्यते— यस्माद्यस्य कस्यचित् द्रव्यवस्तुनो धर्मस्य ग्रहेण ग्रहणावेशेन मिथ्याभिनिविष्टतया सुखमाव्रियतेऽनायासेनाच्छाद्यत इत्यर्थः । द्रव्योपलब्धिनिमित्तं हि तत्र आवरणं न यत्नान्तरमपेक्षते । दुःखं च विव्रियते प्रकटीक्रियते । परमार्थज्ञानस्य दुर्लभत्वात् । भगवानसौ आत्माऽद्वयो देव इत्यर्थः । अतो वेदान्तैराचार्यैश्च बहुश उच्यमानोऽपि नैव ज्ञातुं शक्य इत्यर्थः । 'आश्चर्यो वक्ता कुशलोऽस्य लब्धा' इति श्रुतेः ॥

अस्ति नास्त्यस्ति नास्तीति नास्ति नास्तीति वा पुनः ।
चलस्थिरोभयाभावैरावृणोत्येव बालिशः ॥८३॥

अस्ति नास्तीत्यादिसूक्ष्मविषया अपि पंडितानां ग्रहा भगवतः परमात्मन आवरणा एव । किमुत मूढजनानां बुद्धिलक्षणा इत्येवमर्थं प्रदर्शयन्नाह— अस्तीति । अस्त्यात्मेति वादी कश्चित्प्रतिपद्यते । नास्तीत्यपरो वैनाशिकः । अस्ति नास्तीत्यपरोऽर्धवैनाशिकः सदसद्वादी दिग्वासाः । नास्ति नास्तीत्यत्यंतशून्यवादी । तत्रास्तिभावश्चलः, घटाद्यनित्याविलक्षणत्वात् । नास्तिभावः स्थिरः सदाविशेषत्वात् । उभयं चलस्थिरविषयत्वात्सदसद्भावः । अभावोऽत्यंताभावः । प्रकारचतुष्टयस्यापि तैरेतैश्चलस्थिरोभयाभावैः सदसदादिवादी सर्वोऽपि भगवन्तमावृणोत्येव बालिशोऽविवेकी । यद्यपि पंडितो बालिश एव परमार्थतत्त्वानवबोधात्, किमु स्वभावमूढो जन इत्यभिप्रायः ॥

कोट्यश्चतस्र एतास्तु ग्रहैर्यासां सहावृतः ।
भगवानाभिरस्पृष्टो येन दृष्टः स सर्वदृक् ॥८४॥

कीदृक्पुनः परमार्थतत्त्वं यदवबोधादबालिशः पंडितो भवतीत्याह— कौत्स्यः प्रावादुकशास्त्रनिर्णयान्ता एता उक्ताः अस्ति नास्तीत्याद्याश्चतस्रो, यासां कोटीना ग्रहैर्ग्रहणैरुपलब्धिनिश्चयैः सदा सर्वदा आवृत आच्छादितस्तेषामेव प्रावादुकाना यः, स भगवानाभिः अस्ति-नास्तीत्यादिकोटिभिः चतसृभिरप्यस्पृष्टः अस्त्यादिविकल्पनावर्जित इत्येतत् । येन मुनिना दृष्टो ज्ञातो वेदान्तेष्वौपनिषदः पुरुष स सर्वदृक्सर्वज्ञः परमार्थपंडित इत्यर्थः ॥

प्राप्य सर्वज्ञतां कृत्स्नां ब्राह्मण्यं पदमद्वयम् ।
अनापन्नादिमध्यान्तं किमतः परमीहते ॥८५॥

प्राप्येतां यथोक्तां कृत्स्ना समस्तां सर्वज्ञतां ब्राह्मण्यं पदं 'स ब्राह्मणः' 'एष नित्यो महिमा ब्राह्मणस्य' इति श्रुतेः । अनापन्नादिमध्यान्तं आदिमध्यान्ता उत्पत्तिस्थितिलया अनापन्ना अप्राप्ता यस्याद्वयस्य पदस्य न विद्यन्ते, तदनापन्नादिमध्यान्तं ब्राह्मण्यं पदम् । तदेव प्राप्य लब्ध्वा किमतः परमस्मादात्मलाभादूर्ध्वमीहते चेष्टते, निष्प्रयोजनमित्यर्थः । "नैव तस्य कृतेनार्थः" इत्यादिस्मृतेः ॥

विप्राणां विनयो ह्येष शमः प्राकृत उच्यते ।
दमः प्रकृतिदान्तत्वादेवं विद्वाञ्शमं व्रजेत् ॥८६॥

विप्राणां ब्राह्मणानां विनयो विनीतत्वं स्वाभाविकं यदेतदात्मस्वरूपेणावस्थानम् । एष विनयः शमोऽप्येष एव प्राकृतः स्वाभाविकोऽकृतक उच्यते । दमोऽप्येष एव प्रकृतिदान्तत्वात्स्वभावत एव चोपशान्तरूपत्वाद्ब्रह्मणः । एवं यथोक्तं स्वभावोपशान्तं ब्रह्म विद्वाञ्शममुपशान्ति स्वाभाविकं ब्रह्मस्वरूपा व्रजेद्ब्रह्मस्वरूपेणावतिष्ठेत इत्यर्थः ॥

सवस्तु सोपलंभं च द्वय लौकिकमिष्यते ।
अवस्तु सोपलंभं च शुद्धं लौकिकमिष्यते ॥८७॥

एवमन्योन्यविरुद्धत्वात् संसारकारणानि रागद्वेषदोषास्पदानि प्रावादुकाना दर्शनानि । अतो मिथ्यादर्शनानि तानीति तद्युक्तिभिरेव दर्शयित्वा चतुष्कोटिबीजितत्वात् रागादिदोषानास्पदं स्वभावशान्तमद्वैतदर्शनमेव सम्यग्दर्शनमित्युपसंहृतम् । अथेदानीं स्वप्रक्रियाप्रदर्शनार्थं आरंभः— सवस्तु संवृतिसता वस्तुना सह वर्तत इति सवस्तु । तथा चोपलब्धिरुपलंभः । तेन सह वर्तत इति सोपलंभं च शास्त्रादिसर्वव्यवहारास्पदं ग्राह्यग्राहकलक्षणं द्वयं लौकिकं लोकादनपेतं

लौकिकं जागरितमित्येतत् । एवंलक्षणं जागरितमिष्यते वेदान्तेषु । अवस्तु संव्रेतरप्यभावात् । सोपलंभं वस्तुवदुपलंभनमुपलंभोऽसत्यपि वस्तुनि, तेन सह वर्तत इति सोपलंभं च । शुद्धं केवलं प्रविभक्तं जागरितात्स्थूलाल्लौकिकं सर्वप्राणिसाधारणत्वादिष्यते स्वप्न इत्यर्थः ॥

अवस्त्वनुपलंभं च लोकोत्तरमिति स्मृतम् ।
ज्ञानं ज्ञेयं च विज्ञेयं सदा बुद्धैः प्रकीर्तितम् ॥८८॥

अवस्त्वनुपलंभं च ग्राह्यग्रहणवर्जितमित्येतल्लोकोत्तरम् । अत एव लोकातीतम् । ग्राह्यग्रहणविषयो हि लोकः, तदभावात्सर्वप्रवृत्तिबीजं सुषुप्तमित्येतत् । एवं स्मृतं सोपायं परमार्थतत्त्वं लौकिकम् । शुद्धलौकिकं लोकोत्तरं क्रमेण येन ज्ञानेन ज्ञायते, तज्ज्ञानं ज्ञेयमेतान्येव त्रीणि । एतद्व्यतिरेकेण ज्ञेयानुपपत्तेः । सर्वप्रावादुककल्पितवस्तुनोऽत्रैवान्तर्भावात् । विज्ञेयं परमार्थसत्यं तुर्याख्यमद्वयमजमात्मतत्त्वं इत्यर्थः । सदा सर्वदैव, तल्लौकिकादिविज्ञेयान्तं बुद्धैः परमार्थदर्शिभिर्ब्रह्मविद्भिः प्रकीर्तितम् ॥

ज्ञाने च त्रिविधे ज्ञेये क्रमेण विदिते स्वयम् ।
सर्वज्ञता हि सर्वत्र भवतीह महाधिय ॥८९॥

ज्ञाने च लौकिकादिविषये । ज्ञेये च लौकिकादौ त्रिविधे । पूर्वं लौकिकं स्थूलम् । तदभावेन पश्चाच्छुद्धं लौकिकम् । तदभावेन लोकोत्तरमित्येवं क्रमेण स्थानत्रयाभावेन परमार्थसत्ये तुर्येऽद्वयेऽजेऽभये विदिते, स्वयमेव आत्मस्वरूपमेव सर्वज्ञता सर्वश्चासौ ज्ञश्च सर्वज्ञस्तद्भावः सर्वज्ञता । इहास्मिल्लोके भवति महाधियो महाबुद्धेः । सर्वलोकातिशयवस्तुविषयबुद्धित्वादेवंविद सर्वत्र सर्वदा भवति । सर्वद्विदिते स्वरूपे व्यभिचाराभावादित्यर्थः । न हि परमार्थविदो ज्ञानिनः ज्ञानाद्भवाभिभवौ स्तो यथाऽन्येषां प्रावादुकानाम् ॥

हेयज्ञेयाप्यपाक्यानि विज्ञेयान्यग्रयाणतः ।
तेषामन्यत्र विज्ञेयादुपलंभस्त्रिषु स्मृतः ॥९०॥

लौकिकादीनां क्रमेण ज्ञेयत्वेन निर्देशादस्तित्वाशंका परमार्थतो मा भूत् इत्याह— हेयानि च लौकिकादीनि त्रीणि जागरितस्वप्नसुषुप्तानि आत्मन्यसत्त्वेन रज्ज्वां सर्पवद्धातव्यानीत्यर्थः । ज्ञेयमिह चतुष्कोटिवर्जितं परमार्थतत्त्वम् । आप्यान्याप्तव्यानि त्यक्तव्यैषणात्रयेण भिक्षुणा पांडित्यबाल्यमौनाख्यानि साध-

नानि । पाक्यानि रागद्वेषमोहादयो दोषाः कषायाख्यानि पक्तव्यानि । सर्वाण्येतानि हेयज्ञेयाप्यपाक्यानि विज्ञेयानि भिक्षुणोपायत्वेनेत्यर्थः। अग्रयाणतः प्रथमत । तेषा हेयादीनामन्यत्र विज्ञेयात्परमार्थसत्यं विज्ञेयं ब्रह्मैकं वर्जयित्वा । उपलंभनं उपलंभोऽविद्याकल्पनामात्रम् । हेयाप्यपाक्येषु त्रिष्वपि स्मृतो ब्रह्मविद्भिर्न परमार्थसत्यता त्रयाणामित्यर्थः ॥

प्रकृत्याकाशवज्ज्ञेयाः सर्वे धर्मा अनादयः ।
विद्यते न हि नानात्वं तेषां क्वचन किंचन ॥९१॥

परमार्थतस्तु प्रकृत्या स्वभावतः आकाशवदाकाशतुल्याः सूक्ष्मनिरंजनसर्वगतत्वै. सर्वे धर्मा आत्मानो ज्ञेया मुमुक्षुभिरनादयो नित्याः । बहुवचनकृतभेदाशंकां निराकुर्वन्नाह— क्वचन क्वचिदपि किंचन किंचिदणुमात्रमपि तेषां न विद्यते नानात्वमिति ॥

आदिबुद्धा· प्रकृत्येव सर्वे धर्माः सुनिश्चिताः ।
यस्यैवं भवति क्षान्तिः सोऽमृतत्वाय कल्पते ॥९२॥

ज्ञेयतापि धर्माणां संवृत्येव, न परमार्थतः, इत्याह— यस्मादादौ बुद्धा आदिबुद्धा प्रकृत्यैव स्वभावत एव यथा नित्यप्रकाशस्वरूपः सविता, एवं नित्यबोधस्वरूपा इत्यर्थः । सर्वे धर्मा. सर्व आत्मान· । न च तेषां निश्चय· कर्तव्यो नित्यनिश्चितस्वरूपा इत्यर्थः । न संदिह्यमानस्वरूपा एवं नवं वेति । यस्य मुमुक्षोरेवं यथोक्तप्रकारेण सर्वदा बोधनिश्चयनिरपेक्षता आत्मार्थे परार्थे वा । यथा सविता नित्यं प्रकाशान्तरनिरपेक्षः स्वार्थे परार्थे वेत्येवं भवति क्षान्तिर्बोधकर्तव्यतानिरपेक्षता सर्वदा स्वात्मनि, सोऽमृतत्वायामृतभावाय कल्पते । मोक्षाय समर्थो भवतीत्यर्थः ॥

आदिशान्ता ह्यनुत्पन्नाः प्रकृत्यैव सुनिर्वृताः ।
सर्वे धर्माः समाभिन्ना अजं साम्यं विशारदम् ॥९३॥

तथा नापि शान्तिकर्तव्यता आत्मनीत्याह— यस्मादादिशान्ता नित्यमेव शान्ता अनुत्पन्ना अजाश्च प्रकृत्यैव सुनिर्वृताः सुष्ठूपरतस्वभावा नित्यमुक्तस्वभावा. इत्यर्थः । सर्वे धर्मा· समाश्चाभिन्नाश्च समाभिन्ना अजं साम्यं विशारद विशुद्धमात्मतत्त्वं यस्मात्तस्माच्छान्तिर्मोक्षो वा नास्ति कर्तव्य इत्यर्थः । न हि नित्यैकस्वभावस्य कृतं किंचिदर्थवत्स्यात ॥

वैशारद्यं तु वै नास्ति भेदे विचरतां सदा ।
भेदनिघ्नाः पृथग्वादास्तस्मात्ते कृपणाः स्मृताः ॥९४॥

ये यथोक्तं परमार्थतत्त्वं प्रतिपन्नाः ते एवाकृपणा लोके । कृपणा एवान्य इत्याह— यस्माद्भेदनिघ्ना भेदानुयायिनः संसारानुगा इत्यर्थः । के ? पृथग्वादाः पृथङ्नाना वस्त्वित्येवं वदनं येषां ते पृथग्वादा द्वैतिन इत्यर्थः । तस्मात्ते कृपणाः क्षुद्राः स्मृताः, यस्माद्वैशारद्यं विशुद्धिर्नास्ति तेषां भेदे विचरता द्वैतमार्गेऽविद्याकल्पिते सर्वदा वर्तमानानामित्यर्थः । अतो युक्तमेव तेषां कार्पण्यं इत्यभिप्रायः ॥

अजे साम्ये तु ये केचिद्भविष्यन्ति सुनिश्चिताः ।
ते हि लोके महाज्ञानास्तच्च लोको न गाहते ॥९५॥

यदिदं परमार्थतत्त्वं अमहात्मभिरपंडितैर्वेदान्तबहिष्टै क्षुद्रैरल्पप्रज्ञैः अनवगाह्यमित्याह— अजे साम्ये परमार्थतत्त्वे एवमेवेति ये केचित्स्त्र्यादयोऽपि सुनिश्चिता भविष्यन्ति चेत् ते एव हि लोके महाज्ञाना निरतिशयतत्त्वविषयज्ञानाः इत्यर्थः । तच्च तेषां वर्त्म तेषां विदितं परमार्थतत्त्वं सामान्यबुद्धिरन्यो लोकः न गाहते नावतरति न विषयीकरोतीत्यर्थः । "सर्वभूतात्मभूतस्य सर्वभूतहितस्य च । देवा अपि मार्गे मुह्यन्त्यपदस्य पदैषिणः । शकुनानामिवाकाशे गतिर्नैवोपलभ्यते" इत्यादिस्मरणात् ॥

अजेष्वजमसंक्रान्तं धर्मेषु ज्ञानमिष्यते ।
यतो न क्रमते ज्ञानमसंगं तेन कीर्तितम् ॥९६॥

कथं महाज्ञानत्वमित्याह— अजेष्वनुत्पन्नेष्वचलेषु धर्मेष्वात्मसु अजमचलं च ज्ञानमिष्यते सवितरीवौष्ण्यं प्रकाशश्च यतः, तस्मादसंक्रान्तं अर्थान्तरे ज्ञानमर्जामिष्यते । यस्मान्न क्रमतेऽर्थान्तरे ज्ञानं, तेन कारणेन असंगं तत्कीर्तितं आकाशकल्पमित्युक्तम् ॥

अणुमात्रेऽपि वैधर्म्ये जायमानेऽविपश्चितः ।
असंगता सदा नास्ति किमुतावरणच्युतिः ॥९७॥

इतोऽन्येषां वादिनां अणुमात्रेऽल्पेऽपि वैधर्म्ये वस्तुनि बहिरंतर्वा जायमाने उत्पाद्यमानेऽविपश्चितोऽविवेकिनोऽसंगता असंगत्वं सदा नास्ति । किमुत वक्तव्यमावरणच्युतिः बंधनाशो नास्तीति ॥

अलब्धावरणाः सर्वे धर्माः प्रकृतिनिर्मलाः ।
आदौ बुद्धास्तथा मुक्ता बुध्यन्त इति नायकाः ॥९८॥

तेषामावरणच्युतिर्नास्तीति ब्रुवतां स्वसिद्धान्तेऽभ्युपगतं तर्हि धर्माणामावरणम् । नेत्युच्यते । अलब्धावरणा. । अलब्धमप्राप्तमावरणं अविद्यादिबंधनं येषां ते धर्मा अलब्धावरणा बंधनरहिता इत्यर्थ· । प्रकृतिनिर्मला· स्वभावशुद्धा आदौ बुद्धास्तथा मुक्ता यस्मान्नित्यशुद्धबुद्धमुक्तस्वभावा· । यद्येवं कथं तर्हि बुध्यन्त इत्युच्यते— नायकाः स्वामिनः समर्था बोदधुं बोधशक्तिमत्स्वभावा इत्यर्थ· । यथा नित्यप्रकाशस्वरूपोऽपि सन् सविता प्रकाशत इत्युच्यते, यथा वा नित्यनिवृत्तगतयोऽपि नित्यमेव शैलास्तिष्ठन्तीत्युच्यते, तद्वत् ॥

क्रमते न हि बुद्धस्य ज्ञानं धर्मेषु तायिन. ।
सर्वे धर्मास्तथा ज्ञानं नैतद्बुद्धेन भाषितम् ॥९९॥

यस्मान्न हि क्रमते बुद्धस्य परमार्थदर्शिनो ज्ञानं विषयान्तरेषु धर्मेषु धर्मसंस्थे सवितरीव प्रभा । तायिन , तायोऽस्यास्तीति तायी, संतानवतो निरन्तरस्य आकाशकल्पस्येत्यर्थ· । पूजावतो वा प्रज्ञावतो वा सर्वे धर्मा आत्मानोऽपि तथा ज्ञानवदेव आकाशकल्पत्वान्न क्रमन्ते क्वचिदप्यर्थान्तर इत्यर्थ· । यदादावुपन्यस्तं "ज्ञानेनाकाशकल्पेन" इत्यादि, तदिदमाकाशकल्पस्य तायिनो बुद्धस्य तदनन्यत्वादाकाशकल्पं ज्ञानं न क्रमते क्वचिदप्यर्थान्तरे । तथा धर्मा इति । आकाशमिवाचलमविक्रियं निरवयवं नित्यमद्वितीयमसंगमदृश्यमग्राह्यमशनायाद्यतीतं ब्रह्मात्मतत्त्वम । 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' इति श्रुते· । ज्ञानज्ञेयज्ञातृभेदरहितं परमार्थतत्त्वमद्वयमेतन्न बुद्धेन भाषितम । यद्यपि बाह्यार्थनिराकरणं ज्ञानमात्रकल्पना च अद्वयवस्तुसामीप्यमुक्तम् । इदं तु परमार्थतत्त्वमद्वैतं वेदान्तेष्वेव विज्ञेयमित्यर्थः ॥

दुर्दर्शमतिगंभीरमज साम्यं विशारदम् ।
बुद्ध्वा पदमनानात्वं नमस्कुर्मो यथाबलम् ॥१००॥

इति श्रीगौडपादाचार्यविरचिता· मांडूक्यकारिकाः समाप्ताः ॥

शास्त्रसमाप्तौ परमार्थतत्त्वस्तुत्यर्थं नमस्कार उच्यते— दुर्दर्शं दुःखेन दर्शनमस्येति दुर्दर्शम् । अस्ति नास्तीति चतुष्कोटिवर्जितत्वात् दुर्विज्ञेयमित्यर्थः । अत एवातिगंभीरं दुष्प्रवेशं महासमुद्रवदकृतप्रज्ञैः । अजं साम्यं विशारदम् ।

ईदृक्पदमनानात्वं नानात्ववर्जितं बुद्ध्वा अवगम्य तद्भूता. सन्तो नमस्कुर्मस्तस्मै पदाय । अव्यवहार्यमपि व्यवहारगोचरमापाद्य यथाबलं यथाशक्त्यर्थः ॥

अजमपि जनियोगं प्रापदैश्वर्ययोगा-
दगति च गतिमतां प्रापदेकं त्वनेकम् ।
विविधविषयधर्मग्राहिमुग्धेक्षणानां
प्रणतभयविहंतृ ब्रह्म यत्तन्नतोऽस्मि ॥१॥
प्रज्ञावैशाखवेधक्षुभितजलनिधेर्वेदनाम्नोऽन्तरस्थं
भूतान्यालोक्य मग्नान्यविरतजननग्राहघोरे समुद्रे ।
कारुण्यादुद्दधारामृतमिदममरैर्दुर्लभं भृतहेतो-
र्यस्तं पूज्याभिपूज्यं परमगुरुममुं पादपातैर्नतोऽस्मि ॥२॥
यत्प्रज्ञालोकभासा प्रतिहतिमगमत्स्वान्तमोहान्धकारो
मज्जोन्मज्जच्च घोरे त्वसकृदुपजनोदन्वति त्रासने मे ।
यत्पादावाश्रितानां श्रुतिशमविनयप्राप्तिरध्रा त्वमोघा
तत्पादौ पावनार्यौ भवभयविनुदौ सर्वभावैर्नमस्ये ॥३॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीशंकरभगवत कृतौ मांडूक्योपनिषत्कारिकाभाष्यं समाप्तम् ॥

॥ ॐ ॥

श्रीमच्छंकराचार्यविरचितभाष्ययुता

मुंडकोपनिषत् ।

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥
ॐ शान्तिः शान्तिः शान्तिः ॥

प्रथममुंडके प्रथमः खंडः ।

ॐ 'ब्रह्मा देवाना' इत्याद्याथर्वणोपनिषत् । अस्याश्च विद्यासंप्रदायकर्तृपारंपर्यलक्षणं संबंधं आदावेवाह स्वयमेव स्तुत्यर्थम्— एवं हि महाद्भिः परमपुरुषार्थसाधनत्वेन गुरुणा आयासेन लब्धा विद्येति । श्रोतृबुद्धिप्ररोचनाय विद्यां महीकरोति । स्तुत्या प्ररोचितायां हि विद्यायां सादरा प्रवर्तेरन्निति । प्रयोजनेन तु विद्याया साध्यसाधनलक्षणं संबंधं उत्तरत्र वक्ष्यति— 'भिद्यते हृदयग्रंथिः' इत्यादिना । अत्र च अपरशब्दवाच्यायाः ऋग्वेदादिलक्षणाया विधिप्रतिषेधमात्रपराया विद्याया संसारकारणाविद्यादिदोषनिवर्तकत्वं नास्तीति स्वयमेवोक्त्वा परापरेति विद्याभेदकरणपूर्वकं 'अविद्यायामंतरे वर्तमाना' इत्यादिना । तथा परप्राप्तिसाधन सर्वसाधनसाध्यविषयवैराग्यपूर्वकं गुरुप्रसादलभ्या ब्रह्मविद्यामाह— 'परीक्ष्य लोकान' इत्यादिना । प्रयोजनं चासकृद्भवति 'ब्रह्म वेद ब्रह्मैव भवति' इति । 'परामृताः परिमुच्यन्ति सर्वे' इति च । ज्ञानमात्रे यद्यपि सर्वाश्रमिणामधिकारः तथापि संन्यासनिष्ठैव ब्रह्मविद्या मोक्षसाधनं न कर्मसहितेति 'भैक्ष्यचर्या चरन्तः' 'संन्यासयोगात्' इति च द्रुवन्दर्शयति । विद्याकर्मविरोधाच्च । नहि ब्रह्मात्मैकत्वदर्शनेन सह कर्म स्वप्नेऽपि संपादयितुं शक्यम । विद्यायाः कालविशेषाभावादनियतनिमित्तत्वाच्च कालसंकोचानुपपत्तेः । यत्तु गृहस्थेषु ब्रह्मविद्यासंप्रदायकर्तृत्वादि लिंगं न तस्थितं न्यायं बाधितुमुत्सहते । नहि विधिशतेनापि तमः-

प्रकाशयोरेकत्र सद्भावः शक्यते कर्तु, किमुत लिंगैः केवलैरिति । एवं उक्तसंबंधप्रयोजनाया उपनिषदोऽल्पाक्षरं ग्रंथविवरणमारभ्यते । य इमां ब्रह्मविद्यामुपयन्त्यात्मभावेन श्रद्धाभक्तिपुरःसराः सन्तः, तेषां गर्भजन्मजरारोगाद्यनर्थपूगं निशातयति परं वा ब्रह्म गमयत्यविद्यादिसंसारकारणं वा अत्यंतमवसादयति विनाशयतीत्युपनिषत् । उपनिपूर्वस्य सदेरेवमर्थस्मरणात् ॥

ॐ ॥ ब्रह्मा देवानां प्रथमः संबभूव विश्वस्य कर्ता भुवनस्य गोप्ता ।
स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह ॥१॥

ब्रह्मा परिवृढो महान्धर्मज्ञानवैराग्यैश्वर्यः सर्वानन्यानतिशेत इति । देवानां द्योतनवतामिंद्रादीनां प्रथमो गुणैः प्रधानः सन्प्रथमोऽग्रे वा संबभूवाभिव्यक्तः सम्यक्स्वातंत्र्येणेत्यभिप्रायः । न तथा यथा धर्माधर्मवशात्संसारिणोऽन्ये जायन्ते । "योऽसावतींद्रियोऽग्राह्यः" इत्यादिस्मृते । विश्वस्य सर्वस्य जगतः कर्तोत्पादयिता । भुवनस्योत्पन्नस्य गोप्ता पालयितेति विशेषणं ब्रह्मणो विद्यास्तुतये । स एवं प्रख्यातमहत्त्वो ब्रह्मा ब्रह्मविद्या ब्रह्मणः परमात्मनो विद्यां ब्रह्मविद्याम् 'येनाक्षरं पुरुषं वेद सत्यम्' इति विशेषणात् । परमात्मविषया हि सा । ब्रह्मणा वा अग्रजेनोक्तेति ब्रह्मविद्या । तां ब्रह्मविद्यां सर्वविद्याप्रतिष्ठां सर्वविद्याभिव्यक्तिहेतुत्वात्सर्वविद्याश्रयामित्यर्थः । सर्वविद्यावेद्यं वा वस्त्वनयैव विज्ञायत इति । 'येनाश्रुतं श्रुतं भवति अमतं मतमविज्ञातं विज्ञातम्' इति श्रुतेः । सर्वविद्याप्रतिष्ठामिति च स्तौति विद्याम् । अथर्वाय ज्येष्ठपुत्राय प्राह । ज्येष्ठश्चासौ पुत्रश्चानेकेषु ब्रह्मणः सृष्टिप्रकारेष्वन्यतमस्य सृष्टिप्रकारस्य प्रमुखे पूर्वमथर्वा सृष्ट इति ज्येष्ठः । तस्मै ज्येष्ठपुत्राय प्राह प्रोक्तवान् ॥

अथर्वणे यां प्रवदेत ब्रह्माऽथर्वा तां पुरोवाचांगिरे ब्रह्मविद्याम् ।
स भारद्वाजाय सत्यवहाय प्राह भारद्वाजोऽगिरसे परावराम् ॥२॥

यामेतामथर्वणे प्रवदेतावदद्ब्रह्मविद्यां ब्रह्मा, तामेव ब्रह्मणः प्राप्तामथर्वा पुरा पूर्वं उवाचोक्तवान् अंगिरे अंगानांनम्ने ब्रह्मविद्याम् । स चांगीर्भारद्वाजाय भरद्वाजगोत्राय सत्यवहाय सत्यवहनाम्ने प्राह प्रोक्तवान् । भारद्वाजोऽगिरसे स्वशिष्याय पुत्राय वा परावरां परस्मात्परस्मादवरेण प्राप्तेति परावरा परावरसर्वविद्याविषयव्याप्तेर्वा, तां परावरामंगिरसे प्राहेत्यनुषंगः ॥

शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ । कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति ॥३॥

शौनकः शुनकस्यापत्यं महाशालो महागृहस्थ अंगिरसं भारद्वाजशिष्यमाचार्यं विधिवद्यथाशास्त्रमित्येतत् । उपसन्न उपगतः सन्पप्रच्छ पृष्टवान । शौनकांगिरसो संबंधादवाप्तविधावद्विशेषणाभावात उपसदनविधेः पूर्वेषामनियम इति गम्यते । मर्यादाकरणार्थं, मध्यदीपिकान्यायार्थं वा विशेषणम् । अस्मदादिष्वपि उपसदनविधेरिष्टत्वात । किमित्याह— कस्मिन्नु भगवो विज्ञाते, नु इति वितर्के, भगवो हे भगवन, सर्वं यदिदं विज्ञेयं विज्ञातं विशेषेण ज्ञातमवगतं भवतीति 'एकस्मिञ्ज्ञाते सर्वविद्भवति' इति शिष्टप्रवादं श्रुतवाञ्शौनकः तद्विशेषं विज्ञातुकामः सन्कस्मिन्निति वितर्कयन्पप्रच्छ । अथवा, लोकसामान्यदृष्ट्या ज्ञात्वैव पप्रच्छ । सन्ति लोके सुवर्णादिशकलभेदाः सुवर्णत्वाद्येकत्वविज्ञानेन विज्ञायमाना लौकिकैः । तथा किन्वास्ति सर्वस्य जगद्भेदस्यैकं कारणं यदेकस्मिन्विज्ञाते सर्वं विज्ञातं भवतीति । नन्वविदिते हि कस्मिन्निति प्रश्नोऽनुपपन्नः । किमस्ति तदिति तदा प्रश्नो युक्तः । सिद्धे ह्यस्तित्वे कस्मिन्निति स्यात । यथा कस्मिन्विधेयामिति । न । अक्षरबाहुल्यात आयासभीरुत्वात्प्रश्नः संभवत्येव— किं न्वस्ति तद्यस्मिन्नेकस्मिन्विज्ञाते सर्ववित्स्यादिति ॥

तस्मै स होवाच । द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च ॥४॥

तस्मै शौनकाय आंगिरा ह किलोवाच । किमित्युच्यते— द्वे विद्ये वेदितव्ये इति । एवं ह स्म किल यत ब्रह्मविदो वेदार्थाभिज्ञाः परमार्थदर्शिनो वदन्ति । के ते इत्याह— परा च परमात्मविद्या । अपरा च धर्माधर्मसाधनतत्फलविषया । ननु कस्मिन्विदिते सर्वविद्भवतीति शौनकेन पृष्टं, तस्मिन्वक्तव्येऽपृष्टमाहांगिरा द्वे विद्ये इत्यादि । नैष दोषः । क्रमापेक्षत्वात्प्रतिवचनस्य । अपरा हि विद्या अविद्या सा निराकर्तव्या । तद्विषये हि विदिते न किंचित्तत्त्वतो विदितं स्यादिति । निराकृत्य हि पूर्वपक्षं पश्चान्सिद्धान्तो वक्तव्यो भवतीति न्यायात् ॥

तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छंदो ज्योतिषमिति । अथ परा यया तदक्षरमधिगम्यते ॥५॥

तत्र का अपरेत्युच्यते । ऋग्वेदो यजुर्वेद सामवेदोऽथर्ववेद इत्येते चत्वारो वेदाः । शिक्षा कल्पो व्याकरणं निरुक्तं छंदो ज्योतिषमित्येतानि षट् । एषाऽपरा विद्या । अथेदानीमियं परा विद्योच्यते, यया तदक्ष्यमाणविशेषणमक्षरं अधिगम्यते प्राप्यते । अधिपूर्वस्य गमे प्रायशः प्राप्त्यर्थत्वात । न च परप्राप्तेः अवगमार्थस्य च भेदोऽस्ति । अविद्याया अपाय एव हि परप्राप्तिर्नाथान्तरम । ननु ऋग्वेदादिवाह्या तर्हि सा कथं परा विद्या स्यान्मोक्षसाधनं च । "या वेदबाह्या स्मृतयो या काश्च कुदृष्टय" इति हि स्मरन्ति । कुदृष्टित्वान्निष्फलत्वादनादेया स्यात् । उपनिषदां च ऋग्वेदादिबाह्यत्वं स्यात् । ऋग्वेदादित्वे तु पृथक्करणमनर्थकम । अथ कथ परेति । न । वेद्यविषयविज्ञानस्य विवक्षितत्वात । उपनिषद्वेद्याक्षरविषयं हि विज्ञानमिह परा विद्येति प्राधान्येन विवक्षितं, नोपनिषच्छब्दराशिः । वेदशब्देन तु सर्वत्र शब्दराशिर्विवक्षितः । शब्दराश्यधिगमेऽपि यत्नान्तरमंतरेण गुर्वभिगमनादिलक्षणं वैराग्यं च नाक्षराधिगम संभवतीति पृथक्करणं ब्रह्मविद्याया परा विद्येति ॥

यत्तदद्रेश्यमग्राह्यमगोत्रमवर्ण-
मचक्षुःश्रोत्रं तदपाणिपादम् ।
नित्यं विभुं सर्वगतं सुसूक्ष्मं
तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः ॥६॥

यथा विधिविषये कर्त्राद्यनेककारकोपसंहारद्वारेण वाक्यार्थज्ञानकालादन्यत्र अनुष्ठेयोऽर्थोऽस्त्यग्निहोत्रादिलक्षणो, न तथेह परविद्याविषये वाक्यार्थज्ञानसमकाल एव तु पर्यवसितो भवति । केवलशब्दप्रकाशितार्थज्ञानमात्रनिष्ठाव्यतिरिक्ताभावात । तस्मादिह परा विद्या सविशेषणेनाक्षरेण विशिनष्टि— यत्तदद्रेश्यमित्यादिना । वक्ष्यमाणं बुद्धौ संहृत्य सिद्धवत्परामृश्यते— यत्तदिति । अद्रेश्यमदृश्यं सर्वेषां बुद्धींद्रियाणां अगम्यमित्येतत् । दृशेर्बहिःप्रवृत्तस्य पंचेंद्रियद्वारकत्वात् । अग्राह्यं कर्मेंद्रियाविषयमित्येतत् । अगोत्रं गोत्रमन्वयो मूलमित्यनर्थान्तरम । अगोत्रमनन्वयमित्यर्थः । न हि तस्य मूलमस्ति येनान्वितं स्यात् । वर्ण्यन्त इति वर्णा द्रव्यधर्माः स्थूलत्वादयः शुक्लत्वादयो वा । अविद्यमाना वर्णा यस्य तदवर्णमक्षरम । अचक्षुःश्रोत्रं, चक्षुश्च श्रोत्रं च नामरूपविषये करणे सर्वजंतूनां, ते अविद्यमाने यस्य तदचक्षुःश्रोत्रम् । 'यः सर्वज्ञः सर्ववित्' इत्यादिचेतनावत्त्व-

विशेषणात्प्राप्तं संसारिणामिव चक्षु-श्रोत्रादिभिः करणैरर्थसाधकत्वं, तदिह अचक्षुः-श्रोत्रमिति वार्यते । 'पश्यत्यचक्षु. स शृणोत्यकर्ण' इत्यादिदर्शनात् । किंच तदपाणिपादं कर्मेंद्रियरहितमित्येतत् । यत एवमग्राह्यमग्राहकं च अतो नित्यं अविनाशि । विभुं विविधं ब्रह्मादिस्थावरान्तप्राणिभेदैर्भवतीति विभुम् । सर्वगतं व्यापकमाकाशवत्सुसूक्ष्मम् । शब्दादिस्थूलत्वकारणरहितत्वात् । शब्दादयो ह्याकाशवाय्वादीनामुत्तरोत्तरं स्थूलत्वकारणानि । तदभावात्सुसूक्ष्मम् । किंच, तदव्ययं उक्तधर्मत्वादेव न व्येतीत्यव्ययम् । न ह्यनंगस्य स्वांगापचयलक्षणो व्ययः संभवति शरीरस्येव । नापि कोशापचयलक्षणो व्ययः संभवति राज्ञ इव । नापि गुणद्वारको व्ययः संभवत्यगुणत्वात्सर्वात्मकत्वाच्च । यदेवंलक्षणं भूतयोनिं भूतानां कारणं पृथिवीव स्थावरजंगमानां परिपश्यन्ति सर्वत आत्मभूतं सर्वस्याक्षरं पश्यन्ति धीरा धीमन्तो विवेकिनः । ईदृशमक्षरं यया विद्ययाऽधिगम्यते सा परा विद्येति समुदायार्थः ॥

यथोर्णनाभि सृजते गृह्णते च
यथा पृथिव्यामोषधयः संभवन्ति ॥
यथा सतः पुरुषात्केशलोमानि
तथाऽक्षरात्संभवतीह विश्वम् ॥७॥

भूतयोनिरक्षरमित्युक्तम् । तत्कथं भूतयोनिर्वमित्युच्यते प्रसिद्धदृष्टान्तैः । यथा लोके प्रसिद्धम् । ऊर्णनाभिर्लूतार्काटः किंचित्कारणान्तरमनपेक्ष्य स्वयमेव सृजते स्वशरीराव्यतिरिक्तानेव तंतून्बहिः प्रसारयति, पुनस्तानेव गृह्णते च गृह्णाति स्वात्मभावमेव आपादयति । यथा च पृथिव्यामोषधयो ब्रह्मादिस्थावरान्ता इत्यर्थः । स्वात्माव्यतिरिक्ता एव प्रभवन्ति । यथा च सतो विद्यमानाज्जीवतः पुरुषात्केशलोमानि केशाश्च लोमानि च संभवन्ति विलक्षणानि । यथैते दृष्टान्ताः तथा विलक्षणं सलक्षणं च निमित्तान्तरानपेक्षाद्यथोक्तलक्षणात् अक्षरात्संभवति समुत्पद्यते इह संसारमंडले विश्वं समस्तं जगत् । अनेकदृष्टान्तोपादानं तु सुखावबोधनार्थम् ॥

यद्ब्रह्मण उत्पद्यमानं विश्वं तदनेन क्रमेणोत्पद्यते न युगपद्वदरमुष्टिप्रक्षेपवदिति । क्रमनियमविवक्षार्थोऽयं मंत्र आरभ्यते—

तपसा चीयते ब्रह्म ततोऽन्नमभिजायते ।
अन्नात्प्राणो मनः सत्यं लोकाः कर्मसु चामृतम् ॥८॥

तपसा ज्ञानेन उत्पत्तिर्विधिज्ञतया भूतयोन्यक्षरं ब्रह्म चीयत उपचीयते उत्पिपादयिषादिदं जगदंकुरमिव बीजमुच्छ्रनता गच्छति पुत्रमिव पिता हर्षेण । एवं सर्वज्ञतया सृष्टिस्थितिसंहारशक्तिविज्ञानवत्तयोपचितात्ततो ब्रह्मणोऽन्नमद्यते भुज्यत इत्यन्नमव्याकृतं साधारणं कारणं संसारिणा व्याचिकीर्षितावस्थारूपेण अभिजायते उत्पद्यते । ततश्च अव्याकृताद्याचिकीर्षितावस्थातोऽन्नात्प्राणो हिरण्यगर्भो ब्रह्मणो ज्ञानक्रियाशक्त्यधिष्ठितो जगत्साधारणो अविद्याकामकर्मभूतसमुदायबीजांकुरो जगदात्माऽभिजायत इत्यनुषंगः । तस्माच्च प्राणान्मनो मनआख्यं संकल्पविकल्पसंशयनिर्णयाद्यात्मकमभिजायते । ततोऽपि संकल्पाद्यात्मकान्मनसः सत्यं सत्याख्यं आकाशादिभूतपंचकमभिजायते । तस्मात्सत्याख्यात् भूतपंचकादंडकमेण सप्त लोका भूरादय । तेषु मनुष्यादिप्राणिवर्णाश्रमक्रमेण कर्माणि । कर्मसु च निमित्तभूतेष्वमृतं कर्मजं फलम् । यावत्कर्माणि कल्पकोटिशतैरपि न विनश्यन्ति, तावत्फलं न विनश्यतीत्यमृतम् ॥

यः सर्वज्ञः सर्ववित्स्य ज्ञानमयं तपः ।
तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते ॥९॥
इति मुंडकोपनिषदि प्रथममुंडके प्रथमः खंडः ॥

उक्तमेवार्थमुपसंजिहीर्षुर्मंत्रो वक्ष्यमाणार्थमाह— यः उक्तलक्षणोऽक्षराख्यः सर्वज्ञः सामान्येन सर्वं जानातीति सर्वज्ञः । विशेषेण सर्वं वेत्तीति सर्ववित् । यस्य ज्ञानमयं ज्ञानविकारमेव सार्वज्ञ्यलक्षणं तपो अनायासलक्षणं, तस्माद्यथोक्तात्सर्वज्ञादेतदुक्तं कार्यलक्षणं ब्रह्म हिरण्यगर्भाख्यं जायते । किंच नामासौ देवदत्तो यज्ञदत्त इत्यादिलक्षणम् । रूपमिदं शुक्लं नीलमित्यादि । अन्नं च व्रीहियवादिलक्षणम् । जायते पूर्वमंत्रोक्तक्रमेण इत्यविरोधो द्रष्टव्यः ॥

इति मुंडकोपनिषद्भाष्ये प्रथममुंडके प्रथम खंडः ॥

प्रथममुंडके द्वितीयः खंडः ।

तदेतत्सत्यं मंत्रेषु कर्माणि कवयो यान्यपश्यं-
स्तानि त्रेतायां बहुधा संततानि ।

तान्याचरथ नियतं सत्यकामा
एष व. पंथाः सुकृतस्य लोके ॥१॥

सांगा वेदा अपरा विद्योक्ता 'ऋग्वेदो यजुर्वेद' इत्यादिना । 'यत्तदद्रेश्यं' इत्यादिना, 'नाम रूपमन्नं च जायते' इत्येतेन ग्रंथेनोक्तलक्षणमक्षरं यया विद्ययाऽधिगम्यत इति परा विद्या सविशेषणोक्ता । अतः परमनयोर्विद्ययोर्विषयौ विवेक्तव्यौ संसारमोक्षावित्युत्तरो ग्रंथ आरभ्यते । तत्रापरविद्याविषयः कर्त्रादिसाधनक्रियाफलभेदरूपः संसारोऽनादिरनंतो दुःखस्वरूपत्वाद्धातव्यः प्रत्येकं शरीरिभिः । स मत्स्येन नदीस्रोतोवदविच्छेदरूपसंबंधः तदुपशमलक्षणो मोक्षः परविद्याविषयो अनाद्यनंतोऽजरोऽमरोऽमृतोऽभयः शुद्धः प्रसन्नः स्वात्मप्रतिष्ठालक्षणः परमानंदोऽद्वय इति । पूर्वं तावदपरविद्याया विषयप्रदर्शनार्थमारंभ । तद्दर्शने हि तन्निर्वेदोपपत्ति । तथाच वक्ष्यति—'परीक्ष्य लोकान्कर्मचितान्' इत्यादिना । न ह्यप्रदर्शिते परीक्षोपपद्यते इति तत्प्रदर्शयन्नाह तदेतत्सत्यमवितथम । किं तत्? मंत्रेष्वृग्वेदाद्याख्येषु कर्माण्यग्निहोत्रादीनि मंत्रैरेव प्रकाशितानि कवयो मेधाविनो वसिष्ठादयो यान्यपश्यन्दृष्टवन्तः । तत्तदेतत्सत्यं एकान्तपुरुषार्थसाधनत्वात्तानि च वेदविहितानि ऋषिदृष्टानि कर्माणि त्रेतायां त्रय्यामेयोगलक्षणायां हौत्राध्वर्यवौद्गात्रप्रकारायां अधिकरणभूतायां बहुधा बहुप्रकारं संततानि प्रवृत्तानि कर्मिभिः क्रियमाणानि त्रेतायां वा युगे प्रायशः प्रवृत्तानि । अतो यूयं तान्याचरथ निर्वर्तयत नियतं नित्यं सत्यकामा यथाभूतकर्मफलकामाः सन्तः । एष वो युष्माकं पंथा मार्गः सुकृतस्य स्वयं निर्वर्तितस्य कर्मणो लोके फलनिमित्तं लोक्यते दृश्यते भुज्यत इति कर्मफलं लोक उच्यते । तदर्थं तत्प्राप्तय एष मार्ग इत्यर्थः । यानि एतान्यग्निहोत्रादीनि त्रय्यां विहितानि कर्माणि, तान्येष पंथा अवश्यफलप्राप्तिसाधनमित्यर्थः ॥

यदा लेलायते ह्यर्चिः समिद्धे हव्यवाहने ।
तदाज्यभागावंतरेणाहुतीः प्रतिपादयेत् ॥२॥

तत्राग्निहोत्रमेव तावत्प्रथमं प्रदर्शनार्थमुच्यते, सर्वकर्मणां प्राथम्यात् । तत्कथम्? यदैव इंधनैरभ्याहितैः सम्यगिद्धे समिद्धे दीप्ते हव्यवाहने लेलायते चलत्यर्चिः, तदा तस्मिन्काले लेलायमाने चलत्यर्चिष्याज्यभागौ आज्यभागयोरंतरेण मध्ये आवापस्थाने आहुतीः प्रतिपादयेत्प्राक्षिपेद्देवतामुद्दिश्य । अनेकाह-

प्रयोगापेक्षया आहुतीरिति बहुवचनम् । एष सम्यगाहुतिप्रक्षेपादिलक्षणः कर्ममार्गो लोकप्राप्तये पंथाः । तस्य च सम्यक्करणं दुष्करम् । विपत्तयस्त्वनेका भवन्ति ॥

यस्याग्निहोत्रमदर्शमपौर्णमासमचातुर्मास्यमनाग्रयणमतिथिवर्जितं च ।
अहुतमवैश्वदेवमविधिना हुतमासप्तमांस्तस्य लोकान्हिनस्ति ॥३॥

कथं? यस्याग्निहोत्रिणोऽग्निहोत्रं अदर्शं दर्शाख्येन कर्मणा वर्जितम् । अग्निहोत्रिणोऽवश्यकर्तव्यत्वाद्दर्शस्य । अग्निहोत्रिसंबन्ध्यग्निहोत्रविशेषणमिव भवति । तदक्रियमाणमित्येतत् । तथाऽपौर्णमासमित्यादिष्वप्यग्निहोत्रविशेषणत्वं द्रष्टव्यम् । अग्निहोत्रांगत्वस्याविशिष्टत्वात् । अपौर्णमासं पौर्णमासकर्मवर्जितम् । अचातुर्मास्यं चातुर्मास्यकर्मवर्जितम् । अनाग्रयणं आग्रयणं शरदादिकर्तव्यं तच्च न क्रियते यस्य तत् । तथाऽतिथिवर्जितं च अतिथिपूजनं चाहन्यहनि अक्रियमाणं यस्य । स्वयं सम्यगग्निहोत्रकालेऽहुतम् । अदर्शादिवदवैश्वदेवं वैश्वदेवकर्मवर्जितम् । हूयमानमप्यविधिना हुतं न यथाहुतमित्येतत् । एवं दुःसंपादितं असंपादितमग्निहोत्राद्युपलक्षितं कर्म किं करोतीत्युच्यते — अप्तप्तमान्सप्तसंख्याहितास्तस्य कर्तुर्लोकान्हिनस्ति हिनस्तीव आयासमात्रफलत्वात् । सम्यक्क्रियमाणेषु हि कर्मसु कर्मपरिणामानुरूपेण भूरादय सत्यान्ता सप्त लोकाः फलं प्राप्यन्ते । ते लोका एवंभूतेनाग्निहोत्रादिकर्मणा त्वप्राप्यत्वादिस्यन्त इव आयासमात्रं त्वव्यभिचारीत्यतो हिनस्तीत्युच्यते । पिंडदानाद्यनुग्रहेण वा संबध्यमानाः पितृपितामहप्रपितामहा पुत्रपौत्रप्रपौत्राः स्वात्मोपकारा सप्त लोका उक्तप्रकारेणाग्निहोत्रादिना न भवन्तीति हिंस्यन्त इत्युच्यते ॥

काली कराली च मनोजवा च
सुलोहिता या च सुधूम्रवर्णा ।
स्फुलिंगिनी विश्वरुची च देवी
लेलायमाना इति सप्त जिह्वाः ॥४॥

काली करालीं च मनोजवां च सुलोहितां या च सुधूम्रवर्णां । स्फुलिंगिनीं विश्वरुचीं च देवीं लेलायमानां इति सप्त जिह्वाः । काल्याद्या विश्वरुच्यंता लेलायमाना अग्नेर्हविराहुतिग्रसनार्था एताः किल सप्त जिह्वा ॥

एतेषु यश्चरते भ्राजमानेषु
यथाकालं चाहुतयो ह्याददायन् ।

तं नयन्त्येताः सूर्यस्य रश्मयो
यत्र देवानां पतिरेकोऽधिवास· ॥५॥

एतेष्वग्निजिह्वाभेदेषु योऽग्निहोत्री चरते कर्माचरत्यग्निहोत्रादिकं भ्राजमानेषु दीप्यमानेषु । यथाकालं च यस्य कर्मणो यः कालः तं कालं अनतिक्रम्य यथाकालं यजमानमाददायन्नाददाना आहुतयो यजमानेन निर्वर्तितास्तं नयन्ति प्रापयन्ति । एता आहुतयो या इमा अनेन निर्वर्तिताः सूर्यस्य रश्मयो भूत्वा, रश्मिद्वारैरित्यर्थ· । यत्र यस्मिन्स्वर्गे देवाना पतिरिद्र एकः सर्वानुपरि आधवसर्तान्यधिवास· ॥

एह्येहीति तमाहुतयः सुवर्चसः
सूर्यस्य रश्मिभिर्यजमानं वहन्ति ।
प्रियां वाचमभिवदन्त्योऽर्चयन्त्य
एष वः पुण्यः सुकृतो ब्रह्मलोकः ॥६॥

कथं सूर्यस्य रश्मिभिर्यजमानं वहन्तीत्युच्यते । एह्येहीत्याह्वयन्त्य· । तं यजमानं आहुतय· सुवर्चसो दीप्तिमत्यः । किच प्रियामिष्टा वाचं स्तुत्यादिलक्षणा अभिवदन्त्य उच्चारयन्त्योऽर्चयन्त्य. पूजयन्त्यः, एष वो युष्माकं पुण्यः सुकृतः पंथा ब्रह्मलोक. फलरूप· । एवं प्रियां वाचमभिवदन्त्यो वहन्तीत्यर्थ । ब्रह्मलोक. स्वर्ग· प्रकरणात् ॥

प्लवा ह्येते अदृढा यज्ञरूपा
अष्टादशोक्तमवरं येषु कर्म ।
एतच्छ्रेयो येऽभिनंदन्ति मूढा
जरामृत्युं ते पुनरेवापि यन्ति ॥७॥

एतच्च ज्ञानरहितं कर्म एतावत्फलमविद्याकामकर्मकार्यमतोऽसारं दुःखमूलमिति निंद्यते । प्लवा विनाशिन इत्यर्थः । हि यस्मादेतेऽदृढा अस्थिरा यज्ञरूपा यज्ञस्य रूपाणि यज्ञरूपा यज्ञनिर्वर्तका अष्टादशाष्टादशसंख्याकाः, षोडशार्त्विजः पत्नी यजमानश्चेत्यष्टादश । एतदाश्रयं कर्मोक्तं कथितं शास्त्रेण । येष्वष्टादशस्ववरं केवलं ज्ञानवर्जितं कर्म । अतस्तेषां अवरकर्माश्रयाणां अष्टादशानामदृढतया प्लवत्वात्प्लवते सह फलेन तत्साध्यं कर्म । कुंडविनाशादिव क्षीरदध्यादीनां तत्स्थानां नाशः । यत एवमेतत्कर्म श्रेयः श्रेयःकरणमिति येऽभिनंदन्त्यभिहृष्य-

न्त्यविवेकिनो मूढा, अतस्ते जरां च मृत्युं च जरामृत्युं कंचित्कालं स्वर्गे स्थित्वा पुनरेवापि यन्ति भूयोऽपि गच्छन्ति ॥

अविद्यायामंतरे वर्तमानाः
स्वयं धीराः पंडितं मन्यमानाः ।
जंघन्यमानाः परियन्ति मूढा
अंधेनैव नीयमाना यथांधाः ॥८॥

किंच अविद्यायामंतरे मध्ये वर्तमाना अविवेकप्राया· स्वयं वयमेव धीरा धीमन्त. पंडिता विदितवेदितव्याश्चेति मन्यमाना आत्मानं संभावयन्त·, ते च जंघन्यमाना जरारोगाद्यनेकानर्थव्रातैर्हन्यमाना भृशं पीड्यमानाः परियन्ति विभ्रमन्ति मूढा । दर्शनवर्जितत्वादंधेनैव अचक्षुष्केणैव नीयमाना प्रदर्श्यमाणमार्गाः यथा लोकेऽन्धा अक्षिरहिता गर्तकंटकादौ पतन्ति तद्वत् ॥

अविद्यायां बहुधा वर्तमाना
वयं कृतार्था इत्यभिमन्यन्ति बालाः ।
यत्कर्मिणो न प्रवेदयन्ति रागा-
त्तेनातुराः क्षीणलोकाश्च्यवन्ते ॥९॥

किंच अविद्याया बहुधा बहुप्रकारं वर्तमाना वयमेव कृतार्था. कृतप्रयोजना इत्येवमभिमन्यन्त्यभिमन्यन्ते अभिमानं कुर्वन्ति बाला अज्ञानिनः । यत यस्मादेवं कर्मिणो न प्रवेदयन्ति तत्त्वं न जानन्ति रागात्कर्मफलरागाभिभवनिमित्तं तेन कारणेनातुरा दुःखार्ता सन्त. क्षीणलोका. क्षीणकर्मफलाः स्वर्गलोकाच्च्यवन्ते॥

इष्टापूर्तं मन्यमाना वरिष्ठं
नान्यच्छ्रेयो वेदयन्ते प्रमूढाः ।
नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वा
इमं लोकं हीनतरं वा विशन्ति ॥१०॥

इष्टापूर्तम् । इष्टं यागादि श्रौतं कर्म । पूर्तं वापीकूपतडागादि स्मार्तं मन्यमाना एतदेवातिशयेन पुरुषार्थसाधनं वरिष्ठं प्रधानमिति चिन्तयन्तः, अन्यदात्मज्ञानाख्यं श्रेयःसाधनं न वेदयन्ते न जानन्ति प्रमूढा· पुत्रपशुबांधवादिषु प्रमत्ततया मूढाः । ते च नाकस्य स्वर्गस्य पृष्ठे उपरिस्थाने सुकृते भोगायतने

अनुभूत्वाऽनुभूय कर्मफलं पुनरिमं लोकं मानुषमम्माद्धीनतरं वा तिर्यङ्नरकादिलक्षणं यथाकर्मशेषं विशन्ति ॥

तपःश्रद्धे ये ह्युपवसन्त्यरण्ये
शान्ता विद्वांसो भैक्ष्यचर्यां चरन्तः ।
सूर्यद्वारेण ते विरजाः प्रयान्ति
यत्रामृतः स पुरुषो ह्यव्ययात्मा ॥११॥

ये पुनस्तद्विपरीता ज्ञानयुक्ता वानप्रस्थाः संन्यासिनश्च, तपःश्रद्धे हि, तपः स्वाश्रमविहितं कर्म, श्रद्धा हिरण्यगर्भादिविषया विद्या, ते तपःश्रद्धे उपवसन्ति सेवन्तेऽरण्ये वर्तमाना सन्तः । शान्ता उपरतकरणग्रामाः । विद्वांसो गृहस्थाश्च ज्ञानप्रधाना इत्यर्थः । भैक्ष्यचर्यां चरन्त परिग्रहाभावादुपवसन्त्यरण्य इति संबंधः । सूर्यद्वारेण सूर्योपलक्षितेनोत्तरायणेन पथा ते विरजा विरजस्काः क्षीणपुण्यपापकर्माण सन्त इत्यर्थः । प्रयान्ति प्रकर्षेण यान्ति यत्र यस्मिन्सत्यलोकादावमृत स पुरुषः प्रथमजो हिरण्यगर्भो ह्यव्ययात्माऽव्ययस्वभावो यावत्संसारस्थायी । एतदेतास्तु संसारगतयोऽपरविद्यागम्याः । ननु— एतं मोक्षमिच्छन्ति केचित् । न, 'इहैव सर्वे प्रविलीयन्ति कामाः' 'ते सर्वगं सर्वत प्राप्य धीरा युक्तात्मानः सर्वमेवाविशन्ति' इत्यादिश्रुतिभ्यः । अप्रकरणाच्च । अपरविद्याप्रकरणे हि प्रवृत्ते न ह्यकस्मान्मोक्षप्रसंगोऽस्ति । विरजस्त्वं त्वापेक्षिकं, समस्तं अपरविद्याकार्यं साध्यसाधनलक्षण क्रियाकारकफलभेदभिन्नं द्वैतम् । एतावदेव यद्धिरण्यगर्भप्राप्त्यवसानम् । तथा च मनुनोक्तं स्थावराद्यां संसारगतिमनुक्रामता— "ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च । उत्तमां सात्त्विकीमेतां गतिमाहुर्मनीषिणः ॥" इति ॥

परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन ।
तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥१२॥

अथेदानीं अस्मात्साध्यसाधनरूपात्सर्वस्मात्संसाराद्विरक्तस्य परम्या विद्यायामधिकारप्रदर्शनार्थमिदमुच्यते— परीक्ष्य यदेतदृग्वेदाद्यपरविद्याविषयं स्वाभाविकाविद्याकामकर्मदोषवत्पुरुषानुष्ठेयं अविद्यादिदोषवन्तमेव पुरुषं प्रति विहितत्वात्तदनुष्ठानकार्यभूताश्च लोका ये दक्षिणोत्तरमार्गलक्षणाः फलभूताः, ये च विहिताकरणप्रतिषेधातिक्रमदोषसाध्या नरकतिर्यक्प्रेतलक्षणाः, तानेतान्परीक्ष्य

प्रत्यक्षानुमानोपमानागमैः सर्वतो याथात्म्येनावधार्य लोकान्संसारगतिभूतान व्यक्तादिस्थावरान्तान् व्याकृताव्याकृतलक्षणान् बीजाकुरवदितरेतरोत्पत्तिनिमित्तान अनेकानर्थशतसहस्रसंकुलान कदलीगर्भवदसारान् मायामरीच्युदकगंधर्वनगराकारस्वप्नजलबुद्बुदफेनसमान प्रतिक्षणप्रध्वंसान्पृष्ठत कृत्वा अविद्याकामदोषप्रवर्तितकर्मचितान्धर्माधर्मनिर्वर्तितानित्येतत । ब्राह्मण ब्राह्मणस्यैव विशेषतोऽधिकार सर्वत्यागेन ब्रह्मविद्यायामिति ब्राह्मणग्रहणम् । परीक्ष्य लोकान्कि कुर्यादित्युच्यते— निर्वेदं, निःपूर्वो विदिरत्र वैराग्यार्थे । वैराग्यमायान्कुर्यादित्येतत । स वैराग्यप्रकारः प्रदर्श्यते- इह संसारे नास्ति कश्चिदप्यकृतः पदार्थः । सर्व एव हि लोकाः कर्मचिताः कर्मकृतत्वाच्चानित्याः । न नित्यं किंचिदस्तीत्यभिप्रायः । सर्वं तु कर्मानित्यस्यैव साधनम् । यस्माच्चतुर्विधमेव हि सर्वं कर्म कार्यं उत्पाद्यमाप्यं संस्कार्यं विकार्यं वा । नात परं कर्मणो विशेषोऽस्ति । अहं च नित्येनामृतेनाभयेन कूटस्थेनाचलेन ध्रुवेणार्थेनार्थो, न तद्विपरीतेन । अतः किं कृतेन कर्मणा आयासबहुलेन अनर्थसाधनेनेत्येवं निर्विण्णोऽभयं शिवमकृतं नित्यं पदं यत्तद्विज्ञानार्थं विशेषेण आधिगमार्थं स निर्विण्णो ब्राह्मणो गुरुमेवाचार्यं शमदमादिसंपन्नमभिगच्छेत् । शास्त्रज्ञोऽपि स्वार्तत्र्येण ब्रह्मज्ञानान्वेषणं न कुर्यादित्येतत् गुरुमेवेत्यवधारणफलम् । समित्पाणिः समिद्धारगृहीतहस्तः श्रोत्रियं अध्ययनश्रुतार्थसंपन्नं ब्रह्मनिष्ठं हित्वा सर्वकर्माणि केवलेऽद्वये ब्रह्मणि निष्ठा यस्य सोऽयं ब्रह्मनिष्ठो, जपनिष्ठस्तपोनिष्ठ इति यद्वत् । नहि कर्मिणो ब्रह्मनिष्ठता संभवति कर्मात्मज्ञानयोर्विरोधात् । स तं गुरुं विधिवदुपसन्नः प्रसाद्य पृच्छेदक्षरं पुरुषं सत्यम् ॥

तस्मै स विद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय शमान्विताय । येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ॥१३॥

इति प्रथममुंडके द्वितीयः खंडः ॥ इति प्रथममुंडकम् ॥

तस्मै स विद्वान्गुरुर्ब्रह्मविदुपसन्नायोपगताय । सम्यग्यथाशास्त्रमित्येतत् । प्रशान्तचित्ताय उपरतदर्पादिदोषाय । शमान्विताय बाह्येन्द्रियोपरमेण च युक्ताय । सर्वतो विरक्तायेत्येतत । येन विज्ञानेन यया विद्यया च परया अक्षरमद्रेश्यादिविशेषणं तदेवाक्षरं पुरुषशब्दवाच्यं पूर्णत्वात्पुरि शयनाच्च, सत्यं तदेव परमार्थस्वाभाव्यादव्ययं, अक्षरं चाक्षरणादक्षतत्वादक्षयत्वाच्च, वेद विजानाति तां

ब्रह्मविद्यां तत्त्वतो यथावत्प्रोवाच प्रब्रूयादित्यर्थः । आचार्यस्याप्ययमेव नियमो यन्न्यायप्राप्तसच्छिष्यनिस्तारणं अविद्यामहोदधेः ॥ इति द्वितीयः खंडः ॥

इति मुंडकोपनिषद्भाष्ये प्रथममुंडकं समाप्तम् ॥

द्वितीयमुंडके प्रथमः खंडः ॥

अपरविद्यायाः सर्वं कार्यमुक्तम् । स च संसारो यत्सारो यस्मान्मूलादक्षरात् संभवति यस्मिंश्च प्रलीयते, तदक्षरं पुरुषाख्यं सत्यम् । यस्मिन्विज्ञाते सर्वमिदं विज्ञातं भवति, तत्परायाः ब्रह्मविद्यायाः विषयः । स वक्तव्य इत्युत्तरो ग्रंथ आरभ्यते—

तदेतत्सत्यं यथा सुदीप्तात्पावकाद्विस्फुलिंगाः
सहस्रशः प्रभवन्ते सरूपाः ।
तथाऽक्षराद्विविधाः सोम्य भावाः
प्रजायन्ते तत्र चैवापि यन्ति ॥१॥

यदपरविद्याविषयं कर्मफललक्षणं सत्यं तदपेक्षिकम् । इदं तु परविद्याविषयं परमार्थसल्लक्षणत्वात् । तदेतत्सत्यं यथाभूतं विद्याविषयम् । अविद्याविषयत्वाच्चानृतमितरत् । अत्यंतपरोक्षत्वात्कथं नाम प्रत्यक्षवत्सत्यमक्षरं प्रतिपद्येरन्निति दृष्टान्तमाह— यथा सुदीप्तात्सुष्ठु दीप्तादिद्धात्पावकादग्नेर्विस्फुलिंगा अग्न्यवयवाः सहस्रशोऽनेकशः प्रभवन्ते निर्गच्छन्ति सरूपा अग्निसलक्षणा एव, तथा उक्तलक्षणादक्षराद्विविधा नानादेहोपाधिभेदं अनुविधीयमानत्वाद्विविधाः, हे सोम्य भावा जीवा आकाशादिवत् घटादिपरिच्छिन्नाः सुषिरभेदा घटाद्युपाधिप्रभेदमनु भवन्ति । एवं नानानामरूपकृतदेहोपाधिप्रभवमनु प्रजायन्ते तत्र चैव तस्मिन्नेवाक्षरेऽपियन्ति देहोपाधिविलयमनु विलीयन्ते घटादिविलयमन्विव सुषिरभेदाः । यथा आकाशस्य सुषिरभेदोत्पत्तिप्रलयनिमित्तत्वं घटाद्युपाधिकृतमेव, तद्वदक्षरस्यापि नामरूपकृतदेहोपाधिनिमित्तमेव जीवोत्पत्तिप्रलयनिमित्तत्वम् ॥

दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यंतरो ह्यजः ।
अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः ॥२॥

नामरूपबीजभूतात् अव्याकृताख्यात् स्वविकारापेक्षया परादक्षरात्परं यत्सर्वोपाधिभेदवर्जितमक्षरस्यैव स्वरूपमाकाशस्येव सर्वमूर्तिवर्जितं नेति नेती-

त्यादिविशेषणं विवक्षन्नाह । दिव्यो द्योतनवान्स्वयंज्योतिष्ट्वात् । दिवि वा स्वात्मनि भवोऽलौकिको वा । हि यस्मादमूर्तः सर्वमूर्तिवर्जितः पुरुषः पूर्णः पुरिशयो वा, दिव्यो ह्यमूर्त· पुरुषः, सबाह्याभ्यंतर. सह बाह्याभ्यंतरेण वर्तत इति । अजो न जायते कुतश्चित्स्वतोऽन्यस्य जन्मनिमित्तस्य चाभावात् । यथा जलबुद्बुदादेर्वाय्वादि । यथा नभःसुषिरभेदाना घटादि सर्वभावविकाराणां जनिमूलत्वात् तत्प्रतिषेधेन सर्वे प्रतिषिद्धा भवन्ति । सबाह्याभ्यंतरो ह्यजः अतः अजरः अमृतोऽक्षरो ध्रुवोऽभय इत्यर्थः । यद्यपि देहाद्युपाधिभेददृष्टीनां अविद्यावशात् देहभेदेषु सप्राणः समनाः सेन्द्रियः सविषय इव प्रत्यवभासते तलमलादिमदिवाकाशं, तथापि तु स्वतः परमार्थदृष्टीना अप्राणोऽविद्यमानः क्रियाशक्तिभेदवांश्चलनात्मको वायुर्यस्मिन्नसावप्राणः । तथा अमना अनेकज्ञानशक्तिभेदवत्संकल्पाद्यात्मकं मनोऽप्यविद्यमानं यस्मिन्सोऽयममना. । अप्राणो ह्यमनाश्चेति प्राणादिवायुभेदाः कर्मेन्द्रियाणि तद्विषयाश्च तथा च बुद्धिमनसी बुद्ध्यादियाणि तद्विषयाश्च प्रतिषिद्धा वेदितव्याः । यथा श्रुत्यंतरे— 'ध्यायतीव लेलायतीव' इति । यस्माच्चैवं प्रतिषिद्धोपाधिद्वयस्तच्छुभ्र· शुद्धः । अत. अक्षरान्नामरूपबीजोपाधिलक्षितस्वरूपात् सर्वकार्यकरणबीजत्वेनोपलक्ष्यमाणत्वात्परं तत्त्वं तदुपाधिलक्षणं अव्याकृताख्यमक्षरं सर्वविकारेभ्य· तस्मात्परतोऽक्षरात्परो निरुपाधिकः पुरुष इत्यर्थः । यस्मिंस्तदाकाशाख्यमक्षरं सव्यवहारविषयमोतं प्रोतं च । कथं पुनरप्राणादिमत्त्वं तस्येत्युच्यते । यदि हि प्राणादयः प्रागुत्पत्ते. पुरुष इव स्वेनात्मना सन्ति, तदा पुरुषस्य प्राणादिना विद्यमानेन प्राणादिमत्त्वं भवेत् । न तु ते प्राणादयः प्रागुत्पत्ते. पुरुष इव स्वेनात्मना सन्ति । अतोऽप्राणादिमान्परः पुरुष. । यथाऽनुत्पन्ने पुत्रेऽपुत्रो देवदत्तः ॥

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥३॥

कथं ते न सन्ति प्राणादय इत्युच्यते— यस्मादेतस्मादेव पुरुषान्नामरूपबीजोपाधिलक्षिताज्जायते उत्पद्यतेऽविद्याविषयो विकारभूतो नामधेयोऽनृतात्मकः प्राणः, 'वाचारंभणं विकारो नामधेयं' 'अनृतम्' इति श्रुत्यंतरात् । न हि तेनाविद्याविषयेणानृतेन प्राणेन सप्राणत्वं परस्य स्यादपुत्रस्य स्वप्नदृष्टेनेव पुत्रेण सपुत्रत्वम् । एवं मनः सर्वाणि चेंद्रियाणि विषयाश्चैतस्मादेव जायन्ते । तस्मात्सिद्ध-

मस्य निरुपचरितं अप्राणादिमत्त्वमित्यर्थः । यथा च प्रागुत्पत्तेः परमार्थतोऽसन्तस्तथा प्रलीनाश्चेति द्रष्टव्याः । यथा करणानि मनश्चेन्द्रियाणि च, तथा शरीरविषयकारणानि भूतानि । खमाकाशं वायुरंतर्बाह्य आवहादिभेदः । ज्योतिरग्निः । आप उदकम् । पृथिवी धारित्री विश्वस्य सर्वस्य धारिणी । एतानि च शब्दस्पर्शरूपरसगंधोत्तरोत्तरगुणानि पूर्वपूर्वगुणसहितान्येतस्मादेव जायन्ते ॥

संक्षेपतः परविद्याविषयमक्षरं निर्विशेषं पुरुषं सत्यं 'दिव्यो ह्यमूर्त' इत्यादिना मंत्रेणोक्त्वा, पुनस्तदेव सविशेषं विस्तरेण वक्तव्यमिति प्रवर्तते, संक्षेपविस्तरोक्तो हि पदार्थः सुखाधिगम्यो भवति सूत्रभाष्योक्तिवदिति—

अग्निर्मूर्धा चक्षुषी चंद्रसूर्यौ
दिशः श्रोत्रे वाग्विवृताश्च वेदाः ।
वायुः प्राणो हृदयं विश्वमस्य
पद्भ्यां पृथिवी ह्येष सर्वभूतांतरात्मा ॥४॥

यो हि प्रथमजात्प्राणाद्धिरण्यगर्भाज्जायतेऽण्डस्यान्तर्विराट्, स तत्त्वान्तरितत्वेन लक्ष्यमाणोऽप्येतस्मादेव पुरुषाज्जायते एतन्मयश्च इत्येतदर्थमाह । तं च विशिनष्टि । अग्निर्द्युलोकः 'असौ वाव लोको गौतमाग्निः' इति श्रुतेः । मूर्धा यस्योत्तमांगं शिरः । चक्षुषी चंद्रसूर्यौ । चंद्रश्च सूर्यश्चेति । यस्येति सर्वत्रानुषंगः कर्तव्यः । अस्येत्यस्य पदस्य वक्ष्यमाणस्य यस्येति विपरिणामं कृत्वा । दिशः श्रोत्रे यस्य । वाग्विवृता उद्घाटिता प्रसिद्धा वेदा यस्य । वायुः प्राणो यस्य । हृदयमंतःकरणं विश्वं समस्तं जगदस्य यस्येत्येतत् । सर्वं ह्येतःकरणविकारमेव जगन्मनस्येव सुषुप्ते प्रलयदर्शनात् । जागरितेऽपि तत एव अग्निविस्फुलिंगवद्विप्रतिष्ठानात् । यस्य च पद्भ्यां जाता पृथिवी । एष देवो विष्णुरनंतः प्रथमशरीरी त्रैलोक्यदेहोपाधिः सर्वेषां भूतानामंतरात्मा ॥

स हि सर्वभूतेषु द्रष्टा श्रोता मन्ता विज्ञाता सर्वकारणात्मा, पंचाग्निद्वारेण च याः संसरन्ति प्रजास्ता अपि तस्मादेव पुरुषात्प्रजायन्त इत्युच्यते—

तस्मादग्निः समिधो यस्य सूर्यः
सोमात्पर्जन्य ओषधयः पृथिव्याम् ।
पुमान्रेतः सिंचति योषितायां
बह्वीः प्रजाः पुरुषात्संप्रसूताः ॥५॥

तस्मात्परस्मात्पुरुषात्प्रजावस्थानविशेषरूपोऽग्निः । स विशेष्यते— समिधो यस्य सूर्यः, समिध इव समिधः । सूर्येण हि द्युलोकः समिध्यते । ततो हि द्युलोकाग्नेः निष्पन्नात्सोमात्पर्जन्यो द्वितीयोऽग्निः संभवति । तस्माच्च पर्जन्यादोषधयः पृथिव्यां संभवन्ति । ओषधिभ्यः पुरुषाग्नौ हुताभ्य उपादानभूताभ्यः पुमानग्नौ रेतः सिचति योषितायां योषिति योषाग्नौ स्त्रियामिति । एवं क्रमेण बह्वीर्बह्वयः प्रजा ब्राह्मणाद्याः पुरुषात्परस्मात्संप्रसूताः समुत्पन्नाः ॥

तस्मादृचः साम यजूंषि दीक्षा
यज्ञाश्च सर्वे क्रतवो दक्षिणाश्च ।
संवत्सरश्च यजमानश्च लोकाः
सोमो यत्र पवते यत्र सूर्यः ॥६॥

किंच कर्मसाधनानि फलानि च तस्मादेवेत्याह । कथं ? तस्मात्पुरुषादृचो नियताक्षरपादावसाना गायत्र्यादिच्छंदोविशिष्टा मंत्राः । साम पांचभौतिकं साप्तभक्तिकं च स्तोभादिगीतविशिष्टम् । यजूंष्यनियताक्षरपादावसानानि वाक्यरूपाणि । एवं त्रिविधा मंत्राः । दीक्षाः मौञ्जीदिलक्षणाः कर्तृनियमविशेषाः । यज्ञाश्च सर्वेऽग्निहोत्रादयः । क्रतवः सयूपाः । दक्षिणाश्च एकगवाद्या अपरिमितसर्वस्वान्ताः । संवत्सरश्च कालः कर्मांगः । यजमानश्च कर्ता । लोकास्तस्य कर्मफलभूताः । ते विशेष्यन्ते— सोमो यत्र येषु लोकेषु पवते पुनाति लोकान्यत्र च येषु सूर्यस्तपति । ते च दक्षिणायनोत्तरायणमार्गद्वयगम्या विद्वदविद्वत्कर्तृफलभूताः ॥

तस्माच्च देवा बहुधा संप्रसूताः ।
साध्या मनुष्याः पशवो वयांसि ॥
प्राणापानौ व्रीहियवौ तपश्च ।
श्रद्धा सत्यं ब्रह्मचर्यं विधिश्च ॥७॥

तस्माच्च पुरुषात्कर्मांगभूता देवा बहुधा वस्वादिगणभेदेन संप्रसूताः सम्यक्प्रसूताः । साध्या देवविशेषाः । मनुष्याः कर्माधिकृताः । पशवो ग्राम्यारण्याः । वयांसि पक्षिणः । जीवनं च मनुष्यादीनां प्राणापानौ, व्रीहियवौ हविरर्थौ । तपश्च कर्मांगं पुरुषसंस्कारलक्षणं स्वतंत्रं च फलसाधनम् । श्रद्धा यत्पूर्वकः सर्वपुरुषार्थसाधनप्रयोगः चित्तप्रसाद आस्तिक्यबुद्धिः । तथा सत्यमनृतवर्जनं यथा-

भूतार्थवचनं चापीडाकरम् । ब्रह्मचर्यं मैथुनासमाचारः । विधिश्चेतिकर्तव्यता ॥

सप्त प्राणाः प्रभवन्ति तस्मात्
सप्तार्चिषः समिधः सप्त होमाः ।
सप्त इमे लोका येषु चरन्ति प्राणा
गुहाशया निहिताः सप्त सप्त ॥८॥

किंच सप्त शीर्षण्याः प्राणाः तस्मादेव पुरुषात्प्रभवन्ति । तेषां च सप्तार्चिषो दीप्तयः स्वविषयावद्योतनानि । तथा सप्त समिधः सप्त विषयाः । विषयैर्हि समिध्यन्ते प्राणाः । सप्त होमास्तद्विषयविज्ञानानि 'यदस्य विज्ञानं तज्जुहोति' इति श्रुत्यंतरात् । किंच सप्तेमे लोका इंद्रियस्थानानि येषु चरन्ति संचरन्ति प्राणाः । प्राणा येषु चरन्तीति प्राणानां विशेषणमिदं प्राणापानादिनिवृत्त्यर्थम् । गुहायां शरीरे हृदये वा स्वापकाले शेरत इति गुहाशयाः । निहिताः स्थापिता धात्रा सप्त सप्त प्रतिप्राणिभेदम् । यानि च आत्मयाजिनां विदुषां कर्माणि कर्मफलानि चाविदुषां च कर्माणि तत्साधनानि कर्मफलानि च सर्वं चैतन्यरस्मादेव पुरुषात्सर्वज्ञात्प्रसृतमिति प्रकरणार्थः ॥

अतः समुद्रा गिरयश्च सर्वेऽ-
स्मात्स्यंदन्ते सिंधवः सर्वरूपाः ।
अतश्च सर्वा ओषधयो रसश्च
येनैष भूतैस्तिष्ठते ह्यंतरात्मा ॥९॥

अतः पुरुषात्समुद्राः सर्वे क्षाराद्याः । गिरयश्च हिमवदादयोऽस्मादेव पुरुषात्सर्वे । स्यंदन्ते स्रवन्ति गंगाद्याः सिंधवो नद्यः सर्वरूपा बहुरूपाः । अस्मादेव पुरुषात्सर्वा ओषधयो व्रीहियवाद्याः । रसश्च मधुरादिः षड्विधो येन रसेन भूतैः पंचभिः स्थूलैः परिवेष्टितस्तिष्ठते तिष्ठति ह्यंतरात्मा लिंगं सूक्ष्मं शरीरम् । तद्धयंतराले शरीरस्य आत्मनश्च आत्मवद्वर्तते इत्यंतरात्मा ॥

पुरुष एवेदं विश्वं कर्म
तपो ब्रह्म परामृतम् ।
एतद्यो वेद निहितं गुहायां
सोऽविद्याग्रंथिं विकिरतीह सोम्य ॥१०॥

इति द्वितीयमुंडके प्रथमः खंडः ॥

एवं पुरुषात्सर्वमिदं संप्रसृतम् । अतो वाचारंभणं विकारो नामधेयं अनृतं पुरुष इत्येव सत्यम् । अतः पुरुष एवेदं विश्वं सर्वम् । न विश्वं नाम पुरुषादन्यत्किंचिदस्ति । अतो यदुक्तं तदेतदभिहितं 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति' इति । एतस्मिन्हि परस्मिन्नात्मनि सर्वकारणे पुरुषे विज्ञाते पुरुष एवेदं विश्वं नान्यदस्तीति विज्ञातं भवतीति । किं पुनरिदं विश्वमित्युच्यते-कर्माग्निहोत्रादिलक्षणम् । तपो ज्ञानं तत्कृतं फलमन्यदेतावद्धादं सर्वम् । तच्चेतद्ब्रह्मणः कार्यम् । तस्मात्सर्वं ब्रह्म परामृतं परममृतमहमेवेति यो वेद निहितं स्थितं गुहाया हृदि सर्वप्राणिना, स एवं विज्ञानादविद्याग्रंथि ग्रंथिमिव दृढीभूता अविद्यावासना विकिरति विधिपति विनाशयति इह जीवन्नेव, न मृतः सन हे सोम्य प्रियदर्शन ॥ इति द्वितीयमुंडके प्रथमः खंड ॥

द्वितीयमुंडके द्वितीयः खंडः ।

आविः संनिहितं गुहाचरं नाम महत्पदमत्रैतत्समर्पितम् । एजत्प्राण-न्निमिषच्च यदेतज्जानथ सदसद्वरेण्यं परं विज्ञानाद्यद्वरिष्ठं प्रजानाम् ॥१॥

अरूपं तदक्षरं केन प्रकारेण विज्ञेयमित्युच्यते— आविः प्रकाशं संनिहितं रागाद्युपाधिभिर्ज्वलति भ्राजतीति श्रुत्यंतराच्छब्दादानुपलभमानवदवभासते । दर्शनश्रवणमननविज्ञानाद्युपाधिधर्मैराविर्भूतं सन्नक्ष्यते हृदि सर्वप्राणिनाम् । यदेतदाविर्भूतं ब्रह्म संनिहितं सम्यक्स्थितं हृदि तत गुहाचरं नाम गुहाया चरतीति दर्शनश्रवणादिप्रकारैर्गुहाचरमिति प्रख्यातम् । महत्सर्वमहत्त्वात्पदं पद्यते सर्वैरिति, सर्वपदार्थास्पदत्वात । कथं तन्महत्पदमित्युच्यते— यतोऽत्रास्मिन ब्रह्मण्येतत्सर्वं समर्पितं प्रवेशितं रथनाभाविवारा, एजच्चलत्पक्ष्यादि, प्राणत्प्राणितीति प्राणापानादिमन्मनुष्यपश्वादि, निमिषच्च यन्निमेषादिक्रियावत्, यच्चानिमिषत् । चशब्दात्समस्तमेतदत्रैव ब्रह्मणि समर्पितम् । एतद्यदास्पदं सर्वं जानथ हे शिष्याः, अवगच्छथ तदात्मभूतं भवतां, सदसत्स्वरूपम् । सदसतोर्मूर्तामूर्तयोः स्थूलसूक्ष्मयोस्तद्व्यतिरेकेणाभावात् । वरेण्यं वरणीयं तदेव हि सर्वस्य नित्यत्वात्प्रार्थनीयम् । परं व्यतिरिक्तं विज्ञानात्प्रजानामिति व्यवहितेन संबंधः । यल्लौकिकविज्ञानागोचरमित्यर्थः । यद्वरिष्ठं वरतमं सर्वपदार्थेषु वरेषु, तद्धयेकं ब्रह्म अतिशयेन वरं सर्वदोषरहितत्वात् ॥

यदर्चिमद्यदणुभ्योऽणु च यस्मिल्लोका निहिता लोकिनश्च ।
तदेतदक्षरं ब्रह्म स प्राणस्तदु वाङ्मनः ।
तदेतत्सत्यं तदमृतं तद्वेद्धव्यं सोम्य विद्धि ॥२॥

किंच यदर्चिमद्दीप्तिमत् । तद्दीप्त्या आदित्यादि दीप्यत इति दीप्तिमद्ब्रह्म । किंच यदणुभ्यः श्यामाकादिभ्योऽप्यणु च सूक्ष्मम् । चशब्दात्स्थूलेभ्योऽप्यतिशयेन स्थूलं पृथिव्यादिभ्यः । यस्मिल्लोका भूरादयो निहिताः स्थिताः । ये च लोकिनो लोकनिवासिनो मनुष्यादयः, चैतन्याश्रया हि सर्वे प्रसिद्धाः । तदेतत्सर्वाश्रयं अक्षरं ब्रह्म स प्राणस्तदु वाङ्मनो वाक्च मनश्च सर्वाणि च करणानि, तदु अंतश्चैतन्यं, चैतन्याश्रयो हि प्राणेंद्रियादिसर्वसंघातः 'प्राणस्य प्राणं' इति श्रुत्यंतरात् । यत्प्राणादीनामंतश्चैतन्यमक्षरं तदेतत्सत्यमवितथम् । अतोऽमृतमविनाशि तद्वेद्धव्यं मनसा ताडयितव्यम् । तस्मिन्मनःसमाधानं कर्तव्यमित्यर्थः । यस्मादेवं हे सोम्य विद्धयक्षरे चेतः समाधत्स्व ॥

धनुर्गृहीत्वौपनिषदं महास्त्रं
शरं ह्युपासानिशितं संदधीत ।
आयम्य तद्भावगतेन चेतसा
लक्ष्यं तदेवाक्षरं सोम्य विद्धि ॥३॥

कथं वेद्धव्यमित्युच्यते— धनुरिष्वासनं गृहीत्वाऽऽदाय औपनिषदमुपनिषत्सु भवं प्रसिद्धं महास्त्रं, महच्च तदस्त्रं च महास्त्रं धनुस्तस्मिञ्शरम् । किविशिष्टमित्याह । उपासानिशितं संततामिध्यानेन तनूकृतं संस्कृतमित्येतत् । संदधीत संधानं कुर्यात् । संधाय च आयम्याकृष्य सद्रियमंतःकरणं स्वविषयाद्विनिवर्त्य लक्ष्य एवार्जितं कृत्वेत्यर्थः । न हि हस्तेनैव धनुष आयमनमिह संभवति । तद्भावगतेन तस्मिन्ब्रह्मण्यक्षरे लक्ष्ये भावना भावस्तद्गतेन चेतसा लक्ष्यं तदेव यथोक्तलक्षणमक्षरं सोम्य विद्धि ॥

प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥४॥

यदुक्तं धनुरादि तदुच्यते—प्रणव ओंकारो धनुः । यथा इष्वासनं लक्ष्ये शरस्य प्रवेशकारणं, तथा आत्मशरस्याक्षरे लक्ष्ये प्रवेशकारणमोंकारः । प्रणवेन ह्यभ्यस्यमानेन संस्क्रियमाणः तदालंबनोऽप्रतिबंधेनाक्षरेऽवतिष्ठते । यथा धनुषा

आस्ते इषुर्लक्ष्ये । अतः प्रणवो धनुरिव धनुः । शरो ह्यात्मा उपाधिलक्षणः पर एव जले सूर्यादिवदिह प्रविष्टो देहे सर्वबोद्धप्रत्ययसाक्षितया । स शर इव स्वात्मन्येवार्पितोऽक्षरे ब्रह्मणि । अतो ब्रह्म तल्लक्ष्यमुच्यते लक्ष्य इव मनः समाधित्सुभिरात्मभावेन लक्ष्यमाणत्वात् । तत्रैवं सति अप्रमत्तेन बाह्यविषयोपलब्धितृष्णाप्रमादवर्जितेन सर्वतो विरक्तेन जितेन्द्रियेणैकाग्रचित्तेन वेद्धव्यं ब्रह्म लक्ष्यम् । ततस्तद्वेधनादूर्ध्वं शरवत्तन्मयो भवेत् । यथा शरस्य लक्ष्यैकात्मत्वं फलं भवति । तथा देहाद्यात्मप्रत्ययतिरस्करणेन अक्षरैकात्मत्वं फलमापादयेदित्यर्थः ॥

यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः ।
तमेवैकं जानथ आत्मानमन्या वाचो विमुंचथामृतस्यैष सेतुः ॥५॥

अक्षरस्यैव दुर्लक्षत्वात्पुनः पुनर्वचनं सुलक्षणार्थम् । यस्मिन्नक्षरे पुरुषे द्यौः पृथिवी चान्तरिक्षं चोतं समर्पितं मनश्च सह प्राणैः करणैरन्यैः सर्वैः, तमेव सर्वाश्रयमेकमद्वितीयं जानथ जानीत हे शिष्या । आत्मानं प्रत्यक्स्वरूपं युष्माकं सर्वप्राणिनां च ज्ञात्वा चान्या वाचोऽपरविद्यारूपा विमुंचथ विमुंचत परित्यजत । तत्प्रकाश्यं च सर्वं कर्म ससाधनम् । यतोऽमृतस्यैष सेतुः एतदात्मज्ञानममृतस्यामृतत्वस्य मोक्षस्य प्राप्तये सेतुरिव सेतुः । संसारमहोदधेरुत्तरणहेतुत्वात् । तथा च श्रुत्यंतरम्— 'तमेव विदित्वाऽति मृत्युमेति नान्यः पंथा विद्यतेऽयनाय' इति ॥

अरा इव रथनाभौ संहता यत्र नाड्यः
स एषोऽन्तश्चरते बहुधा जायमानः ।
ओमित्येवं ध्यायथ आत्मानं
स्वस्ति वः पाराय तमसः परस्तात् ॥६॥

किंच, अरा इव । यथा रथनाभौ समर्पिता अरा एवं संहताः संप्रविष्टा यत्र यस्मिन्हृदये सर्वतो देहव्यापिन्यो नाड्यः, तस्मिन्हृदये बुद्धिप्रत्ययसाक्षिभूतः स एष प्रकृत आत्मा अंतर्मध्ये चरते चरति वर्तते । पश्यञ्शृण्वन्मन्वानो विजानन्बहुधाऽनेकधा क्रोधहर्षादिप्रत्ययैर्जायमानः इव जायमानः अंतःकरणोपाध्यनुविधायित्वात् । वदन्ति लौकिका हृष्टो जातः क्रुद्धो जात इति । तमात्मानं ओमित्येवं ओंकारालंबनाः सन्तो यथोक्तकल्पनया ध्यायथ चिंतयत । उक्तं वक्तव्यं च शिष्येभ्य आचार्येण जानता । शिष्याश्च ब्रह्मविद्याविविदिषुत्वान्निवृत्तक-

र्माणो मोक्षपथे प्रवृत्ताः । तेषां निर्विघ्नतया ब्रह्मप्राप्तिमाशास्त्याचार्यः— स्वस्ति निर्विघ्नमस्तु वो युष्माकं पाराय परकूलाय । परस्तात् कस्मात् ? अविद्यातमसः । अविद्यारहितब्रह्मात्मस्वरूपगमनायेत्यर्थः ॥

यः सर्वज्ञः सर्वविद्यस्यैष महिमा भुवि ।
दिव्ये ब्रह्मपुरे ह्येष व्योमन्यात्मा प्रतिष्ठितः ॥७॥

योऽसौ तमसः परस्तात्संसारमहोदधि तीर्त्वा गंतव्यः परविद्याविषयः श्रुतः स कस्मिन्वर्तत इत्याह— यः सर्वज्ञः सर्वविद्याख्यातः । तं पुनर्विशिनष्टि । यस्य एष प्रसिद्धो महिमा विभूतिः । कोऽसौ महिमा ? यस्येमे द्यावापृथिव्यौ शासने विधृते तिष्ठतः । सूर्याचंद्रमसौ यस्य शासनेऽलातचक्रवदजस्रं भ्रमतः । यस्य शासने सरितः सागराश्च स्वगोचरं नातिक्रामन्ति । तथा स्थावरं जंगमं च यस्य शासने नियतम् । तथा चतुर्वोऽयने अब्दाश्च यस्य शासनं नातिक्रामन्ति । तथा कर्तारः कर्माणि फलं च यच्छासनात्स्वं स्वं कालं नातिवर्तन्ते । स एष महिमा भुवि लोके यस्य स एष सर्वज्ञ एवंमहिमा देव. । दिव्ये द्योतनवति सर्वबोद्धप्रत्ययकृतद्योतने ब्रह्मपुरे । ब्रह्मणोऽत्र चैतन्यस्वरूपेण नित्याभिव्यक्तत्वात् । ब्रह्मणः पुरं हृदयपुंडरीकं तस्मिन्व्योम तस्मिन्व्योमन्याकाशे हृत्पुंडरीकमध्यस्थे प्रतिष्ठित इवोपलभ्यते । न हि आकाशवत्सर्वगतस्य गतिरागतिः प्रतिष्ठा वान्यथा संभवति ॥

मनोमयः प्राणशरीरनेता
प्रतिष्ठितोऽन्ने हृदयं संनिधाय ।
तद्विज्ञानेन परिपश्यन्ति धीरा
आनंदरूपममृतं यद्विभाति ॥८॥

स ह्यात्मा तत्रस्थो मनोवृत्तिभिरेव विभाव्यत इति मनोमयो, मनउपाधित्वात् । प्राणशरीरनेता प्राणश्च शरीरं च प्राणशरीरं तस्यायं नेता स्थूलाच्छरीराच्छरीरान्तरं प्रति । प्रतिष्ठितोऽवस्थितोऽन्ने भुज्यमानान्नविपरिणामे प्रतिदिनमुपचीयमानेऽपचीयमाने च पिंडरूपान्ने हृदयं बुद्धिं पुंडरीकच्छिद्रे संनिधाय समवस्थाप्य । हृदयावस्थानमेव ह्यात्मनः स्थितिर्न ह्यात्मनः स्थितिरन्ने । तदात्मतत्त्वं विज्ञानेन विशिष्टेन शास्त्राचार्योपदेशजनितेन ज्ञानेन शमदमध्यानसर्वत्यागवैराग्योद्भूतेन परिपश्यन्ति सर्वतः पूर्णं पश्यन्त्युपलभन्ते धीरा विवेकिनः । आनं-

दरूपं सर्वानर्थदुःखायासप्रहीणं सुखरूपं अमृतं यद्विभाति विशेषेण स्वात्मन्येव भाति सर्वदा ॥

भिद्यते हृदयग्रंथिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥९॥

अस्य परमात्मज्ञानस्य फलमिदमभिधीयते । भिद्यते हृदयग्रंथिरविद्यावासनाप्रचयो बुद्ध्याश्रयः कामः 'कामा येऽस्य हृदि श्रिताः' इति श्रुत्यंतरात् । हृदयाश्रयोऽसौ नात्माश्रयः । भिद्यते भेदं विनाशमायाति । छिद्यन्ते सर्वे ज्ञेयविषयाः संशया लौकिकानां आमरणात गंगास्रोतोवत्प्रवृत्ता विच्छेदमायान्ति । अस्य विच्छिन्नसंशयस्य निवृत्ताविद्यस्य यानि विज्ञानोत्पत्तेः प्राक्तनानि जन्मान्तरे चाप्रवृत्तफलानि ज्ञानोत्पत्तिसहभावीनि च क्षीयन्ते कर्माणि । न त्वेतज्जन्मारंभकाणि प्रवृत्तफलत्वात् । तस्मिन्सर्वज्ञेऽसंसारिणि परावरे परं च कारणात्मना अवरं च कार्यात्मना तस्मिन्परावरे साक्षादहमस्मीति दृष्टे संसारकारणोच्छेदान्मुच्यत इत्यर्थः ॥

हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम् ।
तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः ॥१०॥

उक्तस्यैवार्थस्य संक्षेपाभिधायका उत्तरे मंत्रास्त्रयोऽपि हिरण्मये ज्योतिर्मये बुद्धिविज्ञानप्रकाशे परे कोशे कोश इवावेष्टः । आत्मस्वरूपोपलब्धिस्थानत्वात्परं तत्सर्वाभ्यंतरत्वात् तस्मिन्विरजं अविद्याद्यशेषदोषरजोमलवर्जितं ब्रह्म सर्वमहत्त्वात्सर्वात्मत्वाच्च निष्कलं निर्गताः कला यस्मात्तन्निष्कलं निरवयवमित्यर्थः । यस्माद्विरजं निष्कलं च, अतस्तच्छुभ्रं शुद्धं ज्योतिषां सर्वप्रकाशात्मनामग्न्यादीनामपि तज्ज्योतिरवभासकम् । अग्न्यादीनामपि ज्योतिष्ट्वं अंतर्गतब्रह्मात्मचैतन्यज्योतिर्निमित्तमित्यर्थः । तद्धि परं ज्योतिर्यदन्यानवभास्यं आत्मज्योतिः तद्यदात्मविद आत्मानं स्वं शब्दादिविषयबुद्धिप्रत्ययसाक्षिणं ये विवेकिनो विदुर्विजानन्ति, ते आत्मविदस्तद्विदुरात्मप्रत्ययानुसारिणः । यस्मात्परं ज्योतिस्तस्मान्न एव तद्विदुर्नेतरे बाह्यार्थप्रत्ययानुसारिणः ॥

न तत्र सूर्यो भाति न चंद्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः ।

तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति ॥११॥

कथं तज्ज्योतिषां ज्योतिरित्युच्यते— न तत्र तस्मिन्स्वात्मभूते ब्रह्मणि सर्वावभासकोऽपि सूर्यो भाति । तद्ब्रह्म न प्रकाशयतीत्यर्थः । स हि तस्यैव भासा सर्वमन्यदनात्मजातं प्रकाशयति । न तु तस्य स्वतः प्रकाशनसामर्थ्यम् । तथा न चंद्रतारकं, नेमा विद्युतो भान्ति । कुतोऽयमग्निरस्मद्गोचरः ? किं बहुना । यदिदं जगद्भाति तत्तमेव परमेश्वरं स्वतो भारूपत्वाद्भान्तं दीप्यमानमनुदीप्यते । यथा जलोल्मुकाद्यग्निसंयोगादग्निं दहन्तमनुदहति न स्वतः । तद्वत्तस्यैव भासा दीप्त्या सर्वमिदं सूर्यादि जगद्विभाति । यत एवं तदेव ब्रह्म भाति च विभाति च कार्यगतेन विविधेन भासा, अतस्तस्य ब्रह्मणो भारूपत्वं स्वतोऽवगम्यते । न हि स्वतोऽविद्यमानं भासनमन्यस्य कर्तुं शक्नोति । घटादीनां अन्यावभासकत्वादर्शनाद्भारूपाणां चादित्यादीना तद्दर्शनात् ॥

ब्रह्मैवेदममृतं पुरस्ता-
द्ब्रह्म पश्माद्ब्रह्म दक्षिणतश्चोत्तरेण ।
अधश्चोर्ध्वं च प्रसृतं
ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥१२॥

इति द्वितीयमुंडके द्वितीयः खंडः ॥

यत्तज्ज्योतिषां ज्योतिर्ब्रह्म तदेव सत्यं, सर्वं तद्विकारः वाचारंभणं विकारो नामधेयमात्रमनृतमितरदित्येतमर्थं विस्तरेण हेतुतः प्रतिपादितं निगमनस्थानीयेन मंत्रेण पुनरुपसंहरति । ब्रह्मैवोक्तलक्षणं इदं यत्पुरस्तादग्रे ब्रह्मैवाविद्यादृष्टीनां प्रत्यवभासमानं तथा पश्माद्ब्रह्म तथा दक्षिणतश्च तथोत्तरेण तथैवाधस्तादूर्ध्वं च सर्वतोऽन्यदिव कार्याकारेण प्रसृतं प्रगतं नामरूपवदवभासमानम् । किं बहुना, ब्रह्मैवेदं विश्वं समस्तमिदं जगद्वरिष्ठं वरतमम् । अब्रह्मप्रत्ययः सर्वोऽविद्यामात्रो रज्ज्वामिव सर्पप्रत्ययः । ब्रह्मैवैकं परमार्थसत्यमिति वेदानुशासनम् ॥

इति मुंडकोपनिषद्भाष्ये द्वितीयं मुंडकं समाप्तम् ॥

तृतीयमुंडके प्रथमः खंडः ।

परा विद्योक्ता यया तदक्षरं पुरुषाख्यं सत्यमधिगम्यते । यदधिगमे हृदयग्रंथ्यादिसंसारकारणस्य आत्यंतिकविनाशः स्यात् । तद्दर्शनोपायश्च योगो धनुराद्युपादानकल्पनयोक्तः । अथेदानीं तत्सहकारीणि सत्यादिसाधनानि वक्तव्यानीति तदर्थ उत्तरग्रंथारंभः । प्राधान्येन तत्त्वनिर्धारणं च प्रकारान्तरेण क्रियते । अत्यंतदुरवगाहत्वात्कृतमपि तत्र सूत्रभूतो मंत्रः परमार्थवस्त्ववधारणार्थमुपन्यस्यते—

द्वा सुपर्णा सयुजा सखाया
समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्ति
अनश्नन्नन्यो अभिचाकशीति ॥१॥

द्वा द्वौ सुपर्णा सुपर्णौ शोभनपतनौ सुपर्णौ, पक्षिसामान्याद्वा सुपर्णौ, सयुजा सयुजौ सहैव सर्वदा युक्तौ, सखाया सखायौ समानाख्यानौ समानाभिव्यक्तिकारणौ, एवंभूतौ सन्तौ समानं अविशेषमुपलब्ध्याधिष्ठानतया, एकं वृक्षं वृक्षमिवोच्छेदनसामान्याच्छरीरं वृक्षं परिषस्वजाते परिष्वक्तवन्तौ । सुपर्णाविवैकं वृक्षं फलोपभोगार्थम् । अयं हि वृक्षः ऊर्ध्वमूलोऽवाक्शाखोऽश्वत्थोऽव्यक्तमूलप्रभव क्षेत्रसंज्ञकः सर्वप्राणिकर्मफलाश्रयः, तं परिष्वक्तवन्तौ सुपर्णाविव अविद्याकामकर्मवासनाश्रयलिंगोपाध्यात्मेश्वरौ । तयोः परिष्वक्तयोरन्य एकः क्षेत्रज्ञो लिंगोपाधिवृक्षमाश्रितः पिप्पलं कर्मनिष्पन्नं सुखदुःखलक्षणं फलं स्वादु अनेकविचित्रवेदनास्वादरूपं स्वाद्वत्ति भक्षयत्युपभुंक्तेऽविवेकतः । अनश्नन्य इतर ईश्वरो नित्यशुद्धबुद्धमुक्तस्वभावः सर्वज्ञः सर्वसत्त्वोपाधिरीश्वरो नाश्नाति । प्रेरयिता ह्यसौ उभयोर्भोज्यभोक्त्रोः नित्यसान्निध्यसत्तामात्रेण । स त्वनश्नन्योऽभिचाकशीति पश्यत्येव केवलम् । दर्शनमात्रं हि तस्य प्रेरयितृत्वं राजवत् ॥

समाने वृक्षे पुरुषो निमग्नो-
ऽनीशया शोचति मुह्यमानः ।
जुष्टं यदा पश्यत्यन्यमीश-
मस्य महिमानमिति वीतशोकः ॥२॥

तत्रैवं सति समाने वृक्षे यथोक्ते शरीरे पुरुषो भोक्ता जीवो अविद्याकामकर्मफलरागादिगुरुभाराक्रान्तो अलाबुरिव सामुद्रे जले निमग्नो निश्चयेन देहात्म-

भावमापन्नोऽयमेवाहममुष्य पुत्रोऽस्य नप्ता कृशः स्थूलो गुणवान्निर्गुणः सुखी दुःखीत्येवंप्रत्ययो नास्त्यन्योऽस्मादिति जायते म्रियते संयुज्यते वियुज्यते च संबंधिबांधवैः । अतोऽनाशया, न कस्यांचित्समर्थोऽहं पुत्रो मम विनष्टो मृता मे भार्या कि मे जीवितेन इत्येवं दीनभावोऽनाशा, तया शोचति संतप्यते मुह्यमानोऽनेकैरनर्थप्रकारैरविवेकतया चितामापद्यमानः स एवं प्रेततिर्यङ्मनुष्यादियोनिष्वाजवं जर्वीभावमापन्नः कदाचिदनेकजन्मसु शुद्धधर्मसंचितानिमित्ततः केनचित्परमकारुणिकेन दर्शितयोगमार्गः अहिंसासत्यब्रह्मचर्यसर्वत्यागशमदमादिसंपन्न समाहितात्मा सन् जुष्टं सेवितमनेकैर्योगमार्गैः कर्मिभिश्च यदा यस्मिन्काले पश्यति ध्यायमानोऽन्यं वृक्षोपाधिलक्षणाद्विलक्षणमीशं असंसारिणं अशनायापिपासाशोकमोहजरामृत्वतीतमीशं सर्वस्य जगतोऽयमहमस्म्यात्मा सर्वस्य समः सर्वभूतस्थो नेतरो अविद्याजनितोपाधिपरिच्छिन्नो मायात्मेति विभूतिं महिमानं च जगद्रूपमस्यैव मम परमेश्वरस्येति यदैवं द्रष्टा, तदा वीतशोको भवति सर्वस्माच्छोकसागराद्विप्रमुच्यते, कृतकृत्यो भवतीत्यर्थः ॥

यदा पश्यः पश्यते रुक्मवर्णं
कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान्पुण्यपापे विधूय
निरंजनः परमं साम्यमुपैति ॥३॥

अन्योऽपि मंत्र इममेवार्थमाह सविस्तरम् । यदा यस्मिन्काले पश्यः पश्यतीति विद्वान्साधक इत्यर्थः । पश्यते पश्यति पूर्ववत् रुक्मवर्ण स्वयंज्योतिःस्वभावं रुक्मस्येव वा ज्योतिरस्याविनाशि । कर्तारं सर्वस्य जगतः ईशं पुरुषं ब्रह्मयोनि ब्रह्म च तद्योनिश्चासौ ब्रह्मयोनिस्तं ब्रह्मयोनि, ब्रह्मणो वाऽपरस्य योनि स यदा चैवं पश्यति, तदा स विद्वान्पश्यः पुण्यपापे बंधनभूते कर्मणी समूले विधूय निरस्य दग्ध्वा निरंजनो निर्लेपो विगतक्लेशः परमं प्रकृष्टं निरतिशयं, साम्यं समतामद्वयलक्षणं, द्वैतविषयाणि साम्यान्यतोऽर्वाच्येव अतोऽद्वयलक्षणमेतत्परमं साम्यमुपैति प्रतिपद्यते ॥

प्राणो ह्येष यः सर्वभूतैर्विभाति
विजानन्विद्वान्भवते नातिवादी ।

आत्मक्रीड आत्मरतिः क्रियावा-
नेष ब्रह्मविदां वरिष्ठः ॥४॥

किंच, योऽयं प्राणस्य प्राणः पर ईश्वरो ह्येष प्रकृतः सर्वभूतैः सर्वैर्भूतैः ब्रह्मादिस्तंबपर्यंतैः। इत्थंभूतलक्षणे तृतीया। सर्वभूतस्थः सर्वात्मा सन्नित्यर्थः। विभाति विविधं दीप्यते। एवं सर्वभूतस्थं यः साक्षादात्मभावेनायमहमस्मीति विजानन्विद्वान्वाक्यार्थज्ञानमात्रेण न भवते न भवतीत्येतत्। किं? अतिवादी अतीत्य सर्वानन्यान्वादितुं शीलमस्येत्यतिवादी। यस्त्वेवं साक्षादात्मानं प्राणस्य प्राणं विद्वान सोऽतिवादी स न भवतीत्यर्थः। सर्वं यदात्मैव नान्यदस्तीति दृष्टं, तदा किं ह्यसावतीत्य वदेत। यस्य त्वपरं अन्यद्दृष्टमस्ति स तदतीत्य वदति। अयं तु विद्वानात्मनोऽन्यन्न पश्यति, नान्यच्छृणोति, नान्यद्विजानाति। अतो नातिवदति। किंच आत्मक्रीड आत्मन्येव क्रीडा क्रीडनं यस्य नान्यत्र पुत्रदारादिषु स आत्मक्रीडः। तथा आत्मरतिः आत्मन्येव च रतिः रमणं प्रीतिर्यस्य स आत्मरतिः। क्रीडा बाह्यसाधनसापेक्षा। रतिस्तु साधननिरपेक्षा बाह्यविषयप्रीतिमात्रमिति विशेषः। तथा क्रियावान्ज्ञानध्यानवैराग्यादिक्रिया यस्य सोऽयं क्रियावान। समासपाठे आत्मरतिरेव क्रियाऽस्य विद्यत इति बहुव्रीहिमतुबर्थयोरन्यतरोऽतिरिच्यते। केचित्तु अग्निहोत्रादिकर्मब्रह्मविद्ययोः समुच्चयार्थमिच्छन्ति। तच्चैष ब्रह्मविदां वरिष्ठ इत्येनेन मुख्यार्थवचनेन विरुध्यते। न हि बाह्यक्रियावान आत्मक्रीड आत्मरतिश्च भवितुं शक्तः। कथित्कचिद्बाह्यक्रियाविनिवृत्तो ह्यात्मक्रीडो भवति, बाह्यक्रियात्मक्रीडयोर्विरोधात्। नहि तमःप्रकाशयोर्युगपदेकत्र स्थितिः संभवति। तस्मादसत्प्रलपितमेवैतदनेन ज्ञानकर्मसमुच्चयप्रतिपादनम्। 'अन्या वाचो विमुंचथ' 'संन्यासयोगात्' इत्यादिश्रुतिभ्यश्च। तस्मादयमेवेह क्रियावान्यो ज्ञानध्यानादिक्रियावान्सोऽभिन्नार्थमर्यादः संन्यासी। य एवंलक्षणो नातिवाद्यात्मक्रीड आत्मरतिः क्रियावान्ब्रह्मनिष्ठ स ब्रह्मविदां सर्वेषां वरिष्ठः प्रधानः ॥

सत्येन लभ्यस्तपसा ह्येष आत्मा
सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्।
अंतःशरीरे ज्योतिर्मयो हि शुभ्रो
यं पश्यन्ति यतयः क्षीणदोषाः ॥५॥

अधुना सत्यादीनि भिक्षोः सम्यग्ज्ञानसहकारीणि साधनानि विधीयन्ते निवृत्तिप्रधानानि । सत्येन अनृतत्यागेन मृषावदनत्यागेन लभ्यः प्राप्तव्यः । किंच, तपसा ह्यिन्द्रियमनसएकाग्रतया । "मनसश्चेंद्रियाणां च ह्यैकाग्र्यं परमं तपः" इति स्मरणात । तद्धयनुकूलं आत्मदर्शनाभिमुखीभावात्परमं साधनं तपो नेतरच्चांद्रायणादि । एष आत्मा लभ्य इत्यनुषंगः सर्वत्र । सम्यग्ज्ञानेन यथाभूतात्मदर्शनेन ब्रह्मचर्येण मैथुनासमाचारेण । नित्यं सर्वदा, नित्यं सत्येन नित्यं तपसा नित्यं सम्यग्ज्ञाननेनेति सर्वत्र नित्यशब्दोऽन्तर्दीपिकान्यायेनानुषक्तव्यः । वक्ष्यति च—'न येषु जिह्ममनृतं न माया च' इति । क्व असावात्मा य एतैः साधनैर्लभ्य इत्युच्यते । अंतःशरीरेऽन्तर्मध्ये शरीरस्य पुंडरीकाकाशे ज्योतिर्मयो हि शुक्लवर्णः शुभ्र शुद्धो यमात्मानं पश्यन्युपलभन्ते यतयो यतनशीलाः संन्यासिनः क्षीणदोषाः क्षीणक्रोधादिचित्तमलाः स आत्मा नित्यं सत्यादिसाधनैः संन्यासिभिर्लभ्यत इत्यर्थः । न कादाचित्कैः सत्यादिभिर्लभ्यते । सत्यादिसाधनस्तुत्यर्थोऽयमर्थवादः ॥

सत्यमेव जयति नानृतं सत्येन पंथा विततो देवयानः ।
येनाक्रमन्त्यृषयो ह्याप्तकामा यत्र तत्सत्यस्य परमं निधानम् ॥६॥

सत्यमेव सत्यवानेव जयति नानृतं नानृतवादीत्यर्थः । नहि सत्यानृतयोः केवलयोः पुरुषानाश्रितयोर्जयः पराजयो वा संभवति । प्रसिद्धं लोके सत्यवादिनानृतवाद्यभिभूयते न विपर्ययः, अतः सिद्धं सत्यस्य बलवत्साधनत्वम् । किंच, शास्त्रतोऽप्यवगम्यते सत्यस्य साधनातिशयत्वम् । कथम्? सत्येन यथाभूतवादव्यवस्थया पंथा देवयानाख्यो विततो विस्तीर्णः सातत्येन प्रवृत्तः । येन पथा ह्याक्रमन्ति आक्रमन्ते ऋषयो दर्शनवन्तः कृहकमायाशाठ्याहंकारदंभानृतवर्जिता ह्याप्तकामा विगततृष्णाः सर्वतो यत्र यस्मिंस्तत्परमार्थतत्त्वं सत्यस्योत्तमसाधनस्य संबंधि साध्यं परमं प्रकृष्टं निधानं पुरुषार्थरूपेण निर्धीयत इति निधानं वर्तते । तत्र च येन पथा आक्रमन्ति स सत्येन वितत इति पूर्वेण संबंधः ॥

बृहच्च तद्दिव्यमचिंत्यरूपं
सूक्ष्माच्च तत्सूक्ष्मतरं विभाति ।
दूरात्सुदूरे तदिहांतिके च
पश्यत्स्वहैव निहितं गुहायाम् ॥७॥

किं तल्लिङ्गमकं च तदित्युच्यते— बृहन्महच्च तत्प्रकृतं ब्रह्म सत्यादिसाधनं सर्वतोव्याप्तत्वात् । दिव्यं स्वयंप्रभमनिंद्रियगोचरं अत एव न चिंतयितुं शक्यतेऽस्य रूपमित्यचिंत्यरूपम् । सूक्ष्मादाकाशादेरपि तत्सूक्ष्मतरं, निरतिशयं हि सौक्ष्म्यमस्य सर्वकारणत्वात् । विभाति विविधमादित्यचंद्राद्याकारेण भाति दीप्यते । किंच, दूराद्विप्रकृष्टदेशात्सुदूरे विप्रकृष्टतरे देशे वर्ततेऽविद्वषामत्यंतागम्यत्वात्तद्ब्रह्म । इह देहे अंतिके समीपे च विदुषामात्मत्वात् । सर्वान्तरत्वाच्चाकाशस्याप्यंतरश्रुतेः । इह पश्यत्सु चेतनावत्स्वित्येतन्निहितं स्थितं दर्शनादिक्रियावत्त्वेन योगिभिर्लक्ष्यमाणम् । क्व ? गुहाया बुद्धिलक्षणायाम् । तत्र हि निगूढं लक्ष्यते विद्वद्भिः । तथाप्यविद्यया संवृतं सन्न लक्ष्यते तत्रस्थमेवाविद्वद्भिः ॥

न चक्षुषा गृह्यते नापि वाचा
नान्यैर्देवैस्तपसा कर्मणा वा ।
ज्ञानप्रसादेन विशुद्धसत्त्व-
स्ततस्तु तं पश्यते निष्कलं ध्यायमानः ॥८॥

पुनरप्यसाधारणं तदुपलब्धिसाधनमुच्यते— यस्मान्न चक्षुषा गृह्यते केनचिदप्यरूपत्वान्नापि गृह्यते वाचाऽनभिधेयत्वान्न चान्यैर्देवैरितरेंद्रियैः । तपसः सर्वप्राप्तिसाधनत्वेऽपि न तपसा गृह्यते । तथा वैदिकेनाग्निहोत्रादिकर्मणा प्रसिद्धमहत्त्वेनापि न गृह्यते । किं पुनस्तस्य ग्रहणे साधनमित्याह— ज्ञानप्रसादेन आत्मावबोधनसमर्थमपि स्वभावेन सर्वप्राणिनां ज्ञानं बाह्यविषयरागादिदोषकलुषितं प्रसन्नमशुद्धं सन्नावबोधयति नित्यं संनिहितमप्यात्मतत्त्वं मलावनद्धमिव आदर्शम् । विलुलितमिव सलिलम् । तद्यदा इंद्रियविषयसंसर्गजनितरागादिमलकालुष्यापनयनात् आदर्शसलिलादिवत्प्रसादितं स्वच्छं शान्तमवतिष्ठते, तदा ज्ञानस्य प्रसादः स्यात् । तेन ज्ञानप्रसादेन विशुद्धसत्त्वो विशुद्धान्तःकरणो योग्यो ब्रह्म द्रष्टुं यस्मात् ततस्तस्मात्तु तमात्मानं पश्यते पश्यत्युपलभते निष्कलं सर्वावयवभेदवर्जितं ध्यायमानः सत्यादिसाधनवानुपसंहृतकरणः एकाग्रेण मनसा ध्यायमानश्चिंतयन ॥

एषोऽणुरात्मा चेतसा वेदितव्यो
यस्मिन्प्राणः पंचधा संविवेश ।

प्राणैश्चित्तं सर्वमोतं प्रजानां
यस्मिन्विशुद्धे विभवत्येष आत्मा ॥९॥

यमात्मानमेवं पश्यति, एषोऽणुः सूक्ष्म आत्मा चेतसा विशुद्धज्ञानेन केवलेन वेदितव्यः । कासौ ? यस्मिञ्छरीरे प्राणो वायुः पंचधा प्राणापानादिभेदेन संविवेश सम्यक्प्रविष्टः, तस्मिन्नेव शरीरे हृदये चेतसा ज्ञेय इत्यर्थः । कीदृशेन चेतसा वेदितव्य इत्याह—प्राणैः सहेन्द्रियैश्चित्तं सर्वमंतःकरणं प्रजानामोतं व्याप्तं येन क्षीरमिव स्नेहेन, काष्ठमिवाग्निना । सर्वं हि प्रजानामंतःकरणं चेतनावत्प्रसिद्धं लोके । यस्मिंश्च चित्ते क्लेशादिमलवियुक्ते शुद्धे विभवत्येष उक्त आत्मा विशेषेण स्वेनात्मना विभवति आत्मानं प्रकाशयतीत्यर्थः ॥

यं यं लोकं मनसा संविभाति
विशुद्धसत्त्वः कामयते यांश्च कामान् ।
तं तं लोकं जयते तांश्च कामां-
स्तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः ॥१०॥

इति तृतीयमुंडके प्रथमः खंडः ॥

य एवमुक्तलक्षणं सर्वात्मानमात्मत्वेन प्रतिपन्नस्तस्य सर्वात्मत्वादेव सर्वावाप्तिलक्षणं फलमाह— यं यं लोकं पित्र्यादिलक्षणं मनसा संविभाति संकल्पयति मह्यमन्यस्मै वा भवेदिति, विशुद्धसत्त्वःक्षीणक्लेश आत्मविन्निर्मलांतःकरणः कामयते यांश्च कामान्प्रार्थयते भोगांस्तं तं लोकं जयते प्राप्नोति तांश्च कामान्संकल्पितान्भोगान् । तस्माद्विदुषः सत्यसंकल्पत्वादात्मज्ञं आत्मज्ञानेन विशुद्धान्तःकरणं ह्यर्चयेत्पूजयेत्पादप्रक्षालनशुश्रूषानमस्कारादिभिः भूतिकामो विभूतिमिच्छुः । ततः पूजार्ह एवासौ ॥ इति तृतीयमुंडके प्रथमः खंडः॥

तृतीयमुंडके द्वितीयः खंडः ।

स वेदैतत्परमं ब्रह्म धाम
यत्र विश्वं निहितं भाति शुभ्रम् ।
उपासते पुरुषं ये ह्यकामा-
स्ते शुक्रमेतदतिवर्तन्ति धीराः ॥१॥

यस्मात्स वेद जानातीत्येतद्यथोक्तलक्षणं ब्रह्म परमं प्रकृष्टं धाम सर्वकामाणामाश्रयमास्पदं, यत्र यस्मिन्ब्रह्मणि धाम्नि विश्वं समस्तं जगन्निहितमर्पितं, यच्च स्वेन ज्योतिषा भाति शुभ्रं शुद्धम्। तमप्येवमात्मज्ञं पुरुषं ये ह्यकामा विभूतितृष्णावर्जिता मुमुक्षवः सन्त उपासते परमिव देवं, ते शुक्रं नृबीजं यदेतत्प्रसिद्धं शरीरोपादानकारणं अतिवर्तन्त्यतिगच्छन्ति धीरा धीमन्तो, न पुनर्योनिं प्रसर्पन्ति "न पुनः कचिद्गति करोति" इति श्रुतेः। अतस्तं पूजयेदित्यभिप्रायः ॥

कामान्यः कामयते मन्यमानः
स कामभिर्जायते तत्र तत्र ।
पर्याप्तकामस्य कृतात्मनस्तु
इहैव सर्वे प्रविलीयन्ति कामाः ॥२॥

मुमुक्षोः कामत्याग एव प्रधानं साधनमित्येतद्दर्शयति। कामान्यो दृष्टादृष्टेष्टविषयान्कामयते मन्यमानस्तद्गुणांश्चिंतयानः प्रार्थयते, स तैः कामभिः कामैर्धर्माधर्मप्रवृत्तिहेतुभिः विषयेच्छारूपैः सह जायते तत्र तत्र। यत्र यत्र विषयप्राप्तिनिमित्तं कामाः कर्मसु पुरुषं नियोजयन्ति तत्र तत्र तेषु तेषु विषयेषु तैरेव कामैः वेष्टितो जायते। यस्तु परमार्थतत्त्वविज्ञानात्पर्याप्तकामः आत्मकामत्वेन परिसमंतत आप्ताः कामा यस्य, तस्य पर्याप्तकामस्य कृतात्मनोऽविद्यालक्षणादपररूपादपनीय स्वेन परेण रूपेण कृत आत्मा विद्यया यस्य, तस्य कृतात्मनस्त्विहैव तिष्ठत्येव शरीरे सर्वे धर्माधर्मप्रवृत्तिहेतवः प्रविलीयन्ति प्रविलीयन्ते विलयमुपयान्ति नश्यन्तीत्यर्थः। कामाः तज्जन्महेतुविनाशान्न जायन्त इत्यभिप्रायः ॥

नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्य-
स्तस्यैष आत्मा विवृणुते तनुं स्वाम् ॥३॥

यद्येवं सर्वलाभात्परम आत्मलाभः तल्लाभाय प्रवचनादय उपाया बाहुल्येन कर्तव्या इति प्राप्ते इदमुच्यते। योऽयमात्मा व्याख्यातो, यस्य लाभः परः पुरुषार्थो, नासौ वेदशास्त्राध्ययनबाहुल्येन प्रवचनेन लभ्यः। तथा न मेधया ग्रंथार्थधारणशक्त्या। न बहुना श्रुतेन नापि भूयसा श्रवणेनेत्यर्थः। केन तर्हि लभ्य इत्युच्यते— यमेव परमात्मानमेवैष विद्वान्वृणुते प्राप्तुमिच्छति तेन वरणे-

नैष परमात्मा लभ्यो नान्येन साधनान्तरेण । नित्यलब्धस्वभावत्वात् । कीदृशोऽसौ विदुष आत्मलाभ इत्युच्यते— तस्यैष आत्मा अविद्यासंछन्नां स्वां परां तनुं स्वात्मतत्त्वं स्वरूपं विवृणुते प्रकाशयति, प्रकाश इव घटादिर्विद्यायां सत्यामाविर्भवतीत्यर्थः । तस्मादन्यत्यागेन आत्मलाभप्रार्थनैव आत्मलाभसाधनमित्यर्थः ॥

नायमात्मा बलहीनेन लभ्यो
न च प्रमादात्तपसो वाऽप्यलिंगात् ।
एतैरुपायैर्यतते यस्तु विद्वां-
स्तस्यैष आत्मा विशते ब्रह्म धाम ॥४॥

आत्मप्रार्थनासहायभूतान्येतानि च साधनानि बलाप्रमादतपांसि लिंगयुक्तानि संन्याससहितानि । यस्मादयमात्मा बलहीनेन बलप्रहीणेन आत्मनिष्ठाजनितवार्यहीनेन न लभ्यो, नापि लौकिकपुत्रपश्वादिविषयसंगनिमित्तप्रमादात् । तथा तपसो वाऽप्यलिंगाल्लिंगरहितात् । तपोऽत्र ज्ञानम् । लिंगं संन्यासः । संन्यासरहिताज्ज्ञानान्न लभ्यत इत्यर्थः । एतैरुपायैर्बलाप्रमादसंन्यासज्ञानैः यतते तत्परः सन्प्रयतते यस्तु विद्वान्विवेक्यात्मावित तस्य विदुष एष आत्मा विशते संप्रविशति ब्रह्म धाम ॥

संप्राप्यैनमृषयो ज्ञानतृप्ताः
कृतात्मानो वीतरागाः प्रशान्ताः ।
ते सर्वगं सर्वतः प्राप्य धीरा
युक्तात्मानः सर्वमेवाविशन्ति ॥५॥

कथं ब्रह्म विशत इत्युच्यते— संप्राप्य समवगम्यैनमात्मानं ऋषयो दर्शनवन्तस्तेनैव ज्ञानेन तृप्ता, न बाह्येन तृप्तिसाधनेन शरीरोपचयकारणेन । कृतात्मानः परमात्मस्वरूपेणैव निष्पन्नात्मानः सन्तः । वीतरागा विगतरागादिदोषाः । प्रशान्ता उपरतेन्द्रियाः । त एवंभूताः सर्वगं सर्वव्यापिनं आकाशवत्सर्वतः सर्वत्र प्राप्य, नोपाधिपरिच्छिन्नेनैकदेशेन । किं तर्हि, तद्ब्रह्मैवाद्वयं आत्मत्वेन प्रतिपद्य धीरा अत्यंतविवेकिनो युक्तात्मानो नित्यसमाहितस्वभावाः सर्वमेव समस्तं शरीरपातकालेऽप्याविशन्ति भिन्ने घटे घटाकाशवदविद्याकृतोपाधिपरिच्छेदं जहति । एवं ब्रह्मविदो ब्रह्म धाम प्राविशन्ति ॥

वेदान्तविज्ञानसुनिश्चितार्थाः
संन्यासयोगाद्यतयः शुद्धसत्त्वाः ।
ते ब्रह्मलोकेषु परान्तकाले
परामृताः परिमुच्यन्ति सर्वे ॥६॥

किंच वेदान्तजनितविज्ञानं वेदान्तविज्ञानं तस्यार्थः पर आत्मा विज्ञेयः, सोऽर्थः सुनिश्चितो येषां ते वेदान्तविज्ञानसुनिश्चितार्थाः । ते च संन्यासयोगात्सर्वकर्मपरित्यागलक्षणयोगात् केवलब्रह्मनिष्ठास्वरूपाद्योगात् यतयो यतनशीलाः, शुद्धसत्त्वाः शुद्धं सत्त्वं येषां संन्यासयोगात्ते शुद्धसत्त्वाः । ते ब्रह्मलोकेषु । संसारिणां ये मरणकालास्ते अपरांताः तानपेक्ष्य मुमुक्षूणां संसारावसाने देहपरित्यागकालः परांतकालः तस्मिन्परांतकाले साधकानां बहुत्वाद्बह्वीव लोकाः ब्रह्मलोक एकोऽप्यनेकवत् दृश्यते प्राप्यते च । अतो बहुवचनं ब्रह्मलोकेष्विति, ब्रह्मणोऽत्यर्थं । परामृताः परममृतममरणधर्मकं ब्रह्म आत्मभूतं येषां ते परामृता जीवन्त एव ब्रह्मभूताः, परामृताः सन्तः परिमुच्यन्ति परि समंतात्प्रदीपनिर्वाणवत् भिन्नघटाकाशवच्च निवृत्तिमुपयान्ति । परिमुच्यन्ते परि समंतान्मुच्यन्ते सर्वे न देशान्तरं गन्तव्यमपेक्षन्ते । "शकुनीनामिवाकाशे जले वारिचरस्य च । पदं यथा न दृश्येत तथा ज्ञानवतां गतिः ॥" "अनश्वगा अश्वसु पारयिष्णवः" इति श्रुतिस्मृतिभ्याम् । देशपरिच्छिन्ना हि गतिः संसारविषयैव । परिच्छिन्नसाधनसाध्यत्वात् । ब्रह्म तु समस्तत्वान्न देशपरिच्छेदेन गंतव्यम् । यदि हि देशपरिच्छिन्नं ब्रह्म स्यान्मूर्तद्रव्यवदाद्यंतवदन्याश्रितं सावयवमनित्यं कृतकं च स्यात् । न त्वेवंविधं ब्रह्म भवितुमर्हति । अतस्तत्प्राप्तिश्च नैव देशपरिच्छिन्ना भवितुं युक्ता । अपि चाविद्यादिसंसारबंधापनयमेव मोक्षमिच्छन्ति ब्रह्मविदो न तु कार्यभूतम् ॥

गताः कलाः पंचदश प्रतिष्ठा
देवाश्च सर्वे प्रति देवतासु ।
कर्माणि विज्ञानमयश्च आत्मा
परेऽव्यये सर्वे एकीभवन्ति ॥७॥

किंच मोक्षकाले या देहारंभिकाः कलाः प्राणाद्याः ताः स्वां स्वां प्रतिष्ठां गताः स्वं स्वं कारणं गता भवन्तीत्यर्थः । प्रतिष्ठा इति द्वितीयाबहुवचनम् ।

पंचदश पंचदशसंख्याका या अंत्यप्रश्नपरिपठिताः प्रसिद्धा, देवाश्च देहाश्रयाश्चक्षुरादिकरणस्थाः सर्वे प्रतिदेवतास्वादित्यादिषु गता भवन्तीत्यर्थः। यानि च मुमुक्षुणा कृतानि कर्माण्यप्रवृत्तफलानि प्रवृत्तफलानामुपभोगेनैव क्षीयमाणत्वात्। विज्ञानमयश्चात्मा अविद्याकृतबुद्ध्याद्युपाधिमात्मत्वेन मत्वा जलादिषु सूर्यादिप्रतिबिंबवदिह प्रविष्टो देहभेदेषु कर्मणां तत्फलार्थत्वात्सह तेनैव विज्ञानमयेनात्मना। अतो विज्ञानमयो विज्ञानप्रायः। त एते कर्माणि विज्ञानमयश्चात्मा उपाध्यपनये सति परेऽव्ययेऽनंतेऽक्षये ब्रह्मण्याकाशकल्पेऽजेऽजरेऽमृतेऽभयेऽपूर्वेऽनपरेऽनंतरेऽबाह्येऽद्वये शिवे शान्ते सर्वे एकीभवन्ति अविशेषतां गच्छन्त्येकत्वमापद्यन्ते जलाद्याधारापनय इव सूर्यादिप्रतिबिंबाः सूर्ये घटाद्यपनय इवाकाशे घटाद्याकाशाः।

यथा नद्यः स्यंदमानाः समुद्रेऽ-
स्तं गच्छन्ति नामरूपे विहाय।
तथा विद्वान्नामरूपाद्विमुक्तः
परात्परं पुरुषमुपैति दिव्यम् ॥८॥

किंच यथा नद्यो गंगाद्याः स्यंदमाना गच्छन्त्यः समुद्रे समुद्रं प्राप्यास्तं अदर्शनमविशेषात्मभावं गच्छन्ति प्राप्नुवन्ति, नाम च रूपं च नामरूपे विहाय हित्वा, तथा अविद्याकृतनामरूपाद्विमुक्तः सन्विद्वान्परादक्षरात्पूर्वोक्तात्परं दिव्यं पुरुषं यथोक्तलक्षणमुपैत्युपगच्छति ॥

स यो ह वै तत्परमं ब्रह्म वेद
ब्रह्मैव भवति नास्याब्रह्मवित्कुले भवति।
तरति शोकं तरति पाप्मानं
गुहाग्रंथिभ्यो विमुक्तोऽमृतो भवति ॥९॥

ननु श्रेयस्यनेके विघ्नाः प्रसिद्धाः। अतः क्लेशानामन्यतमेनान्येन वा देवादिना च विघ्नितो ब्रह्मविदप्यन्यां गतिं मृतो गच्छति न ब्रह्मैव। न। विद्ययैव सर्वप्रतिबंधस्यापनीतत्वात्। अविद्याप्रतिबंधमात्रो हि मोक्षो नान्यप्रतिबंधः। नित्यत्वादात्मभूतत्वाच्च। तस्मात्स यः कश्चिद्ध वै लोके तत्परमं ब्रह्म वेद साक्षादहमेवास्मीति जानाति स नान्यां गतिं गच्छति। देवैरपि तस्य ब्रह्मप्राप्तिं प्रति विघ्नो न शक्यते कर्तुम्। आत्मा ह्येषां स भवति। तस्माद्ब्रह्म विद्वान् ब्रह्मैव भवति। किंच नास्य विदुषोऽब्रह्मवित्कुले भवति। किंच तरति शोकं

अनेकैष्टवैकल्यानिमित्तं मानसं संतापं जीवन्नेवातिक्रान्तो भवति। तरति पाप्मानं धर्माधर्माख्यं गुहाग्रंथिभ्यो हृदयाविद्याग्रंथिभ्यो विमुक्तः सन्नमृतो भवतीत्युक्तमेव 'भिद्यते हृदयग्रंथिः' इत्यादि ॥

तदेतदृचाऽभ्युक्तम्—

क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठाः स्वयं जुह्वत एकर्षिं श्रद्धयन्तः।
तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम् ॥१०॥

अथेदानीं ब्रह्मविद्यासंप्रदानविध्युपप्रदर्शनेनोपसंहारः क्रियते। तदेतद्विद्यासंप्रदानविधानमृचा मंत्रेणाभ्युक्तमभिप्रकाशितम्। क्रियावन्तो यथोक्तकर्मानुष्ठानयुक्ताः। श्रोत्रिया ब्रह्मनिष्ठा अपरस्मिन्ब्रह्मण्यभियुक्ताः परब्रह्म बुभुत्सवः स्वयमेकर्षिं एकर्षिनामानमग्निं जुह्वते जुह्वति श्रद्धयन्तः श्रद्धधानाः सन्तो ये, तेषां एव संस्कृतात्मनां पात्रभूतानामेतां ब्रह्मविद्यां वदेत ब्रूयाच्छिरोव्रतं शिरस्यग्निधारणलक्षणम्। यथा अथर्वणानां वेदव्रतं प्रसिद्धम्। यैस्तु यैश्च तच्चीर्णं विधिवद्यथाविधानं तेषामेव वदेत ॥

तदेतत्सत्यमृषिरंगिराः पुरोवाच नैतदचीर्णव्रतोऽधीते।
नमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥११॥

इति तृतीयमुंडके द्वितीयः खंडः ॥

ॐ भद्रं कर्णेभिरिति शान्तिः।

इत्यथर्ववेदीया मुंडकोपनिषत्समाप्ता ॥

तदेतदक्षरं पुरुषं सत्यं ऋषिरंगिरा नाम पुरा पूर्वं शौनकाय विधिवदुपसन्नाय पृष्टवते उवाच। तद्वदन्योऽपि तथैव श्रेयोर्थिने मुमुक्षवे मोक्षार्थं विधिवदुपसन्नाय ब्रूयादित्यर्थः। नैतत् ग्रंथरूपं अचीर्णव्रतोऽचरितव्रतोऽप्यधीते न पठति। चीर्णव्रतस्य हि विद्या फलाय संस्कृता भवतीति। समाप्ता ब्रह्मविद्या। सा येभ्यो ब्रह्मादिभ्यः पारंपर्यक्रमेण संप्राप्ता तेभ्यो नमः परमऋषिभ्यः। परमं ब्रह्म साक्षात् दृष्टवन्तो ये ब्रह्मादयोऽवगतवन्तश्च ते परमर्षयः तेभ्यो भूयोऽपि नमः। द्विर्वचनमत्यादरार्थं मुंडकसमाप्त्यर्थं च ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य
श्रीशंकरभगवतः कृतौ अथर्वणमुंडकोपनिषद्भाष्यं समाप्तम् ॥

प्रतीकानुक्रमणिका ।

अग्निर्मूर्धा	मुं. २.१.४	अथ यां चतुर्थीं	छां. ५.२२
अग्निर्यथैको	क.५.९	अथ यां तृतीयां	छां. ५.२१
अग्निर्हिंकारो	छां. २.२०	अथ यां द्वितीयां	छां. ५.२०
अग्निष्टे पादं	छां ४.६	अथ यां पंचमीं	छां. ५.२३
अग्ने नय सुपथा	ई. १८	अथ येऽस्य दक्षिणा	छां. ३.२
अंगुष्ठमात्रः पुरुषो	क. ४.१२;४.१३	अथ येऽस्य प्रत्यंचो	छां. ३.३
अजा हिंकारो	छां. २.१८	अथ येऽस्योदंचो	छां. ३.४
अजीर्यतामृतानां	क. १.२८	अथ येऽस्योर्ध्वा	छां. ३.५
अणोरणीयान्म	क. २.२०	अथर्वणे यां	मुं. १.१.२
अतः समुद्रा	मुं. २.१.९	अथ वायुमब्रुवन्	के. ३.७
अत्रैष देवः स्वप्ने	प्र. ४.५	अथ सप्तविधस्य	छा. २.८
अथ कबंधी	प्र. १.३	अथ हेद्रोऽप्राप्यै	छा. ८.९
अथ खलु य उद्गीथः	छा. १.५.१	अथ हैनमन्वाहार्य	छां. ४.१२
अथ खल्वसुमा	छां. २.९	अथ हैनमाहवनीय	छां. ४.१३
अथ खल्वात्मसंमित	छां. २.१०	अथ हैनमृषभो	छां. ४.५
अथ तत ऊर्ध्वं	छां ३.११	अथ हैनं कौमल्य	प्र. ३.१
अथ य आत्मा	छां. ८.४	अथ हैनं गार्हपत्यो	छां. ४.११
अथ यच्चतुर्थ	छां. ३.९	अथ हैनं भार्गवो	प्र. २.१
अथ यत्तृतीयम	छां. ३.८	अथ हैनं यजमान	छां. १.११.
अथ यत्पंचम	छां. ३.१०	अथ हैनं शैब्यः	प्र. ५.१
अथ यदिदमस्मि	छां. ८.१	अथ हैनं सुकेशा	प्र. ६.१
अथ यदि द्विमात्रेण	प्र. ५.४	अथ हैनं सौर्यायणी	प्र. ४.१
अथ यद्द्वितीय	छां. ३.७	अथ होवाच जनं	छां. ५.१५
अथ यद्यज्ञ	छां. ८.५	अथ होवाच बुडिल	छां. ५.१६
अथ या एता	छां. ८.६	अथ होवाच सत्य	छां. ५.१३

अथ होवाचेन्द्र	छां. ५.१४	अभिमंथति	छां. २.१२
अथ होवाचोद्दालक	छां. ५.१७	अभ्राणि संप्लवन्ते	छां. २.१५
अथातः शौव उद्गीथः	छां. १.१२	अमात्रश्चतुर्थो	मां. १२
अथादित्य	प्र. १.६	अयं वाव लोको	छां. १.१३
अथाधिदैवतं	छां. १.३	अरण्योर्निहितो	क. ४.८
अथाध्यात्मं	छां. १.७	अरा इव रथनाभौ	प्र. ६ ६
अथाध्यात्मं यदेतत्	के. ४.५	अरा इव रथनाभौ	प्र. २.६
अथेद्रमब्रुवन्	के. ३.११	अरा इव रथनाभौ	मुं २.२.६
अथैकयोर्ध्व उदानः	प्र. ३.७	अविद्यायामंतरे	क. २.५
अथोत्तरेण तपसा	प्र. १.१०	अविद्यायामंतरे	मुं. १.२.८
अधीहि भगव इति	छां. ७.१	अविद्यायां बहुधा	मुं. १.२.९
अनुपश्य यथा पूर्वे	क. १.६	अव्यक्तात्तु परः	क. ६.८
अनेजदेकं मनसो	ई. ४	अशब्दमस्पर्श	क. ३.१५
अंतरिक्षोदरः कोशो	छां ३.१५	अशरीरं शरीरेषु	क. २.२२
अंधं तमः प्रविशन्ति	ई ९	असद्वा इदमग्र	तै. २.७
अंधं तमः प्रविशन्ति	ई. १२	असन्नेव स भवति	तै. २.६
अन्नं न निंद्यात्	तै. ३.७	असुर्या नाम ते लोका	ई. ३
अन्नं न परिचक्षीत	तै. ३.८	असौ वा आदित्यो	छां. ३.१
अन्नमशितं	छां. ६.५	असौ वाव लोको	छां. ५.४
अन्नं बहु कुर्वीत	तै. ३.९	अस्तीत्येवोपलब्धव्यः	क. ६.१३
अन्नं ब्रह्मेति	तै. ३.२	अस्य लोकस्य का	छां. १.९
अन्नं वाव	छां. ७.९	अस्य विस्रंसमानस्य०	क. ५.४
अन्नं वै प्रजापति	प्र. १.१४	अस्य सोम्य महतो	छां. ६.११
अन्नाद्वै प्रजाः	तै. २.२	अहं वृक्षस्य रेरिवा	तै. १.१०
अन्यच्छ्रेयोऽन्यदुतैव	क. २.१	अहोरात्रो वै प्रजापति०	प्र. १.१३
अन्यत्र धर्मादन्यत्रा	क. २.१४	आकाशो वाव	छां. ७.१२
अन्यदेवाहुर्विद्यया	ई. १०	आकाशो वै नाम	छां. ८.१४
अन्यदेवाहुः संभ	ई. १३	आत्मन एष प्राणो	प्र ३.३

आत्मानं रथिनं	क. ३.३	उद्यन्हिंकार	छां. २.१४
आत्मा वा इदमेक	ऐ. १.१	उपकोसलो ह	छां. ४.१०
आदित्यो ब्रह्म०	छां. ३.१९	उपनिषदं भो ब्रूहि	के. ४.७
आदित्यो ह वै	प्र. ३.८	उपमंत्रयते	छां. २.१३
आदित्यो ह वै प्राणो	प्र. १.५	उशन्ह वै वाजश्रवसः	क. १.१
आनंदो ब्रह्मेति	तै. ३.५	ऊर्ध्वमूलोऽवाक्शाख	क. ६.१
आपो वावा०	छां ७.१०	ऊर्ध्व प्राणमुन्न	क. ५.३
आविः संनिहितं	मुं. २.२.१	ऋग्भिरेतं यजु०	प्र ५.७
आशाप्रतीक्षे संगतं	क. १.८	ऋतं च स्वाध्याय०	तै. १.९
आशा वाव	छां. ७.१४	ऋतं पिबन्तौ	क. ३.१
आसीनो दूरं व्रजति	क २.२१	ऋतुषु पंचविधं	छां. २.५
इति तु पंचम्या०	छां. ५.९	एको वशी	क. ५.१२
इंद्रस्त्वं प्राण तेजसा	प्र. २.९	एतच्छ्रुत्वा संपरि०	क. २.१३
इंद्रियाणां पृथग्भावं	क. ६.६	एतत्तुल्यं यदि मन्यसे	क. १.२४
इंद्रियाणि हयानाहुः	क. ३.४	एतदालंबनं श्रेष्ठं	क. २.१७
इंद्रियेभ्यः परं	क. ६.७	एतद्ध्येवाक्षरं ब्रह्म	क. २.१६
इंद्रियेभ्यः परा ह्यर्था	क. ३ १०	एतद्वै सत्यकाम	प्र. ५.२
इमाः सोम्य नद्य·	छा. ६.१०	एतस्माज्जायते	मुं. २.१.३
इयमेवर्गग्निः	छां. १.६	एतेषु यश्चरते	मुं. १.२.५
इष्टापूर्तं मन्यमाना	मुं. १.२.१०	एष तु वा	छां. ७.१६
इहचेदवेदीदथ	के. २.५	एष तेऽग्निर्नचिकेतः	क. १.१९
इह चेदशकद्बोद्धुं	क. ६ ४	एष सर्वेश्वर	मा. ६
इहैवांत· शरीरे	प्र. ६.२	एष सर्वेषु भूतेषु	क. ३.१२
ईशा वास्यमिदं सर्वं	ई. १	एष ह वै यज्ञो	छां. ४.१६
उत्तिष्ठत जाग्रत	क. ३.१४	एष हि द्रष्टा स्प्रष्टा	प्र. ४.९
उत्पत्तिमायतिं	प्र. ३.१२	एषोऽग्निस्तपत्येष	प्र. २.५
उदशराव	छां. ८.८	एषोऽणुरात्मा	मुं. ३.१.९
उद्दालको हारुणिः	छां. ६.८	एह्येहीति	मुं. १.२.६

ओमिति ब्रह्म	तै. १.८
ओमित्येतदक्षर०	छां. १ १
ओमित्येतदक्षर०	छां. १.४
ओमित्येतदक्षरं	मां. १
औपमन्यव	छां. ५.१२
कामस्याप्ति जगतः	क २ ११
कामान्यः	मुं. ३ २.२
काली कराली च	मुं. १.२ ४
कुर्वन्नेवेह कर्माणि	ई. २
केनेषितं पतति	के. १.१
कोऽयमात्मेति	ऐ. ५ १
क्रियावन्तः श्रोत्रियाः	मुं. ३.२.१०
गताः कलाः	मु. ३.२.७
गायत्री वा इदं	छां. ३ १२
चित्तं वाव	छां. ७.५
जागरितस्थानो	मां. ३ ९
जानश्रुतिर्ह	छां. ४.१
जानाम्यहं शेवधि०	क. २.१०
त इमे सत्याः	छां ८ ३
तत्रापरा ऋग्वेदो	मु. १ १ ५
तदभ्यद्रवत्तम०	के. ३.४; ३ ८
तदु ह जानश्रुतिः	छां. ४.२
तदेजति तन्नैजति	ई. ५
तदेतत्सत्यं	मुं. १.२.१; २.१.१
तदेतत्सत्यं	मुं. ३.२.११
तदेतदिति	क. ५.१४
तद्ध तद्वनं नाम	के. ४.६
तद्धैतद्ब्रह्मा	छां. ८.१५
तद्धैषां विजज्ञौ	के ३.२
तद्य इत्थं विदुः	छा. ५.१०
तद्यत्प्रथममसृतं	छां. ३.६
तद्यत्रैतत्	छा. ८.११
तद्यद्धूक्तं	छां. ५.१९
तं दुर्दर्शं गूढ०	क. २.१२
तपसा चीयते ब्रह्म	मुं. १.१.८
तपःश्रद्धे ये	मुं. १.२.११
तमब्रवीत्प्रीयमाणो	क. १ १६
तस्माच्च देवा	मुं. २.१ ७
तस्मादग्निः समिधो	मुं. २.१.५
तस्मादृचः साम	मुं २ १.६
तस्माद्वा इंद्रोऽतितरां	के ४ ३
तस्माद्वा एते देवा	के ४.२
तस्मिंस्त्वयि किं	के. ३ ५· ३.९
तस्मै तृणं	के. ३ ६: ३.१०
तस्मै स विद्वान्	मुं १ २ १३
तस्मै स होवाच	प्र १ ४
तस्मै स होवाचाकाशो	प्र. २ २
तस्मै स होवाचाति०	प्र ३.३
तस्य ह वा एतस्य	छां. ३.१३
तस्य ह वा एतस्यै०	छा. ७.२६
तस्यै तपो दमः	के. ४.८
तस्यैष आदेशो	के. ४.४
तं ह कुमारं सन्तं	क. १.२
ता एता देवताः	ऐ २.१
तान्वरिष्ठः प्राण	प्र. २.३
तान्ह स ऋषिरुवाच	प्र १.२

तान्होवाचैतावदेवा०	प्र. ६.७	न कंचन वसतौ	तै. ३.१०
तान्होवाचैते	छां. ५.१८	न चक्षुषा गृह्यते	मुं. ३.१.८
तां योगमिति	क. ६.११	न जायते म्रियते	क. २.१८
तिस्रो मात्रा मृत्युमत्यः	प्र. ५.६	न तत्र चक्षुः	के. १.३
तिस्रो रात्रीर्यदवात्सी०	क. १.९	न तत्र सूर्यो	मुं. २.२.११
तेऽग्निमब्रुवन्	के ३.३	न तत्र सूर्यो भाति	क. ५.१५
तेजो वावाद्भ्यो०	छां. ७.११	न नरेणावरेण प्रोक्त	क. २.८
तेजो ह वा उदा०	प्र. ३.९	न प्राणेन नापानेन	क. ५.५
ते तमर्चयन्त०	प्र. ६.८	न वित्तेन तर्पणीयो	क. १.२७
तेऽश्रद्दधाना बभूवुः	प्र. २.४	न संदृशे तिष्ठति	क ६.९
तेषामसौ विरजो	प्र. १.१६	न सांपरायः प्रतिभाति	क. २.६
तेषां खल्वेषां	छां. ६.३	नाचिकेतमुपाख्यानं	क. ३.१६
ते होचुरुपको०	छां. ४.१४	नांतःप्रज्ञं	मां. ७
त्रयी विद्या हिंकार०	छां. २.२१	नायमात्मा	मुं. ३.२.३; ३.२.४
त्रयो धर्मस्कंधा	छां. २.२३	नायमात्मा प्रवचनेन	क. २.२३
त्रयो ह वाव ह्यैतस्मिन्नेव	छां. १.८	नाविरतो दुश्चरिता०	क. २.२४
त्रिणाचिकेतस्त्रय०	क. १.१८	नाहं मन्ये सुवेदेति	के. २.२
त्रिणाचिकेतस्त्रि०	क. १.१७	नित्योऽनित्यानां	क. ५.१३
दध्नः सोम्य	छां ६.६	नैव वाचा न मनसा	क. ६. १२
दिव्यो ह्यमूर्तः	मुं. २.१.२	नैषा तर्केण मतिः	क. २.९
दूरमेते विपरीते	के. २.४	न्यग्रोधफल०	छां. ६. १२
देवानामसि वह्नितमः	प्र. २.८	पंचपादं पितरं	प्र. १.११
देवासुरा ह वै	छां. १.२	परमेवाक्षरं	प्र. ४.१०
देवैरत्रापि	क. १.२१; १.२२	परीक्ष्य लोकान्	मुं. १.२.१२
द्वा सुपर्णा	मुं. ३.१.१	पर्जन्यो वाव	छां. ५.५
द्वे विद्ये वेदितव्ये	मुं. १.१.४	पशुषु पंचविधं	छां. २.६
धनुर्गृहीत्वौ०	मुं. २.२.३	पराचः कामाननु	क. ४.२
ध्यानं वाव	छां. ७.६	परांचि खानि	क. ४.१

पायूपस्थेऽपानं	प्र. ३.५	प्लवा ह्येते अदृढा	मुं. १.२.७
पीतोदका जग्धतृणा	क. १.३	बलं वाव	छां. ७.८
पुरमेकादशद्वार	क. ५.१	बहूनामेमि प्रथमो	क. १.५
पुरुष एवेदं	मुं. २.१.१०	बृहच्च तद्दिव्य	मुं. ३.१.७
पुरुषं सोम्योतोप	छां. ६.१५	ब्रह्मवादिनो वदन्ति	छां. २.२४
पुरुषं सोम्योत	छां. ६.१६	ब्रह्मविदाप्नोति परं	तै. २.१
पुरुषे ह वा	ऐ. ४.१	ब्रह्मविदिदमय	तै. २.१०
पुरुषो वाव	छां. ३.१६	ब्रह्म ह देवेभ्यो	के. ३.१
पुरुषो वाव	छां. ५.७	ब्रह्मा देवानां	मुं. १.१.१
पूषन्नेकर्षे यम	ई. १६	ब्रह्मैवेदममृतं	मुं. २.२.१२
पृथिवी च पृथिवीमात्रा	प्र. ४.८	भयादस्याग्नि	क. ६.३
पृथिवी वाव	छां. ५.६	भिद्यते हृदय	मुं. २.२.९
पृथिवी हिंकारो	छां. २.१७	भीषास्माद्वातः	तै. २.८
पृथिव्यंतरिक्षं	तै. १.७	भूर्भुवः सुव	तै. १.५
प्रजापतिर्लोका	छां. ४.१७	भृगुर्वै वारुणिः	तै. ३.१
प्रजापतिश्चरसि गर्भे	प्र. २.७	मघवन्मर्त्यं वा	छां. ८.१२
प्रणवो धनुः	मुं. २.२.४	मटचीहितेषु	छां. १.१०
प्रतिबोधविदितं	के. २.४	मद्रुग्रे पादं	छां. ४.८
प्र ते ब्रवीमि तदु मे	क. १.१४	मनसैवेदमाप्तव्यं	क. ४.११
प्राचीनशाल	छां ५.११	मनो ब्रह्मेति	तै. ३.४
प्राणं देवा अनु	तै. २.३	मनो ब्रह्मेत्युपासीते	छां ३. १८
प्राणस्येदं वशे	प्र. २.१३	मनो वाव वाचो	छां. ७.३
प्राणाग्नय एवैतस्मि	प्र. ४.३	मनो हिंकारो	छां. २.११
प्राणेषु पंचविधं	छां. २.७	महतः परमव्यक्तं	क. ३.११
प्राणो ब्रह्मेति	तै. ३.३	मासो वै प्रजापति	प्र. १.१२
प्राणो वा आशाया	छां. ७.१५	मृत्युप्रोक्तां नाचि	क. ६.१८
प्राणो ह्येष यः	मुं. ३.१.४	य आत्मापहतपाप्मा	छां. ८.७
प्राप हाचार्यकुलं	छां. ४.९	य इमं परमं गुह्यं	क. ३.१७

य इमं मध्वदं	क. ४.५	यदा त्वमभिवर्षस्य	प्र. २.१०
य एवं विद्वान्प्राणं	प्र. ३.११	यदा पंचावतिष्ठन्ते	क. ६.१०
य एष सुप्तेषु	क. ५.८	यदा पश्यः	मुं. ३.१.३
य एष स्वप्ने	छां ८.१०	यदा लेलायते	मुं. १.२.२
य एषोऽक्षिणि	छां. ४.१५	यदा वै करोत्यथ	छां. ७.२१
यच्चक्षुषा न पश्यति	के. १.६	यदा वै निस्तिष्ठ	छां. ७.२०
यच्छ्रोत्रेण न शृणोति	के. १ ७	यदा वै मनुते	छां. ७.१८
यच्चित्तस्तेनैष	प्र. ३.१०	यदा वै विजानात्य	छां. ७-१७
यच्छेद्वाङ्मनसी	क. ३.१३	यदा वै श्रद्दधा	छां. ७.१९
यतश्चोदेति	क. ४.९	यदा वै सुखं	छां. ७.२२
यतो वाचो निवर्तन्ते	तै. २.४	यदा सर्वे प्रभिद्यन्ते	क. ६.१५
यतो वाचो निवर्तन्ते	तै २.९	यदा सर्वे प्रमुच्यन्ते	क. ६.१४
यत्तदद्रेश्यमग्राह्य	मुं. १.१.६	यदिदं किच	क. ६.२
यत्प्राणेन न प्राणिति	के. १.८	यदि मन्यसे सुवेदेति	के. २.१
यत्र नान्यत्पश्य	छां. ७ २४	यदुच्छ्वासनिश्वासा	प्र. ४.४
यत्र सुप्तो न	मां. ५	यदेवेह तदमुत्र	क. ४.१०
यथा गार्ग्य मरीचयो	प्र. ४.२	यद्वाचानभ्युदितं	के. १.४
यथादर्शे तथात्मनि	क. ६.५	यन्मनसा न मनुते	के. १.५
यथा नद्यः	मुं. ३.२.८	यं यं लोकं	मुं. ३.१.१०
यथा पुरस्ताद्भविता	क. १.११	यश्छंदसामृ	तै. १.४
यथा सम्राडेवाधि	प्र. ३.४	यस्तु विज्ञानवान्	क. ३.६:३.८
यथा सोम्य पुरुषं	छां ६.१४	यस्तु सर्वाणि भूतानि	ई. ६
यथा सोम्य मधु	छां. ६.९	यस्त्वविज्ञानवान्	क. ३.५:३.७
यथोदकं दुर्गे वृष्टं	क. ४.१४	यस्मिन्द्यौः पृथिवी	मुं. २.२.५
यथोदकं शुद्धे शुद्ध	क. ४.१५	यस्मिन्निदं विचि	क. १.२९
यथोर्णनाभिः	मुं. १.१.७	यस्मिन्सर्वाणि भूतानि	ई. ७
यदग्ने रोहितं	छां. ६.४	यस्य ब्रह्म च क्षत्रं	क. २. २५
यदर्चिमद्यदणु	मुं. २.२.२	यस्याग्निहोत्रं	मुं १.२.३

यस्यामतं तस्य मतं	के २.३	विज्ञानात्मा सह	प्र. ४ ११
यः पुनरेतत्त्रिमात्रे	प्र. ५.५	विनार्दिसाम्नो	छां. २.२२
यः पूर्वं तपसो	क. ४.६	विद्यां चाविद्यां च	ई.११
यः सर्वज्ञः	मुं. १.१.९	विश्वरूपं हरिणं	प्र.१.८
यः सर्वज्ञ·	मुं. २.२ ७	वृष्टौ पंचविधं	छा.२.३
यः सेतुरीजानानां	क. ३.२	वेदमनूच्या०	तै. १.११
या ते तनूर्वाचि	प्र २ १२	वेदान्तविज्ञान०	मुं. ३.२.६
या प्राणेन संभवत्य	क. ४.७	वैश्वानरः प्राविशति	क. १.७
येन रूपं रसं	क. ४ ३	व्रात्यस्त्वं प्राणैक ०	प्र २ ११
येयं प्रेते विचिकित्सा	क. १.२०	शतं चैका च	क ६.१६
ये ये कामा दुर्लभा	क. १.२५	शतायुषः पुत्रपौत्रान्	क. १.२३
योनिमन्ये प्रपद्यन्ते	क. ५ ७	शं नो मित्रः	तै.१.१
यो वा एतामेवं	के. ४.९	शं नो मित्रः	तै. १ १२
यो वै भूमा	छां. ७ २३	शांतसंकल्पः सुमनाः	क. १ १०
योषा वाव	छां. ५.८	शीक्षां व्याख्यास्यामः	तै १.२
यो ह वै ज्येष्ठं	छां ५.१	शौनको ह वै	मुं. १ १.३
लवणमेतदुदके	छां. ६.१३	श्यामाच्छबलं	छां ८ १३
लोकादिमग्नि	क. १.१५	श्रवणायापि बहुभिः	क २ ७
लोकेषु पंचविधं	छां. २.२.१	श्रेयश्च प्रेयश्च	क. २.२
लोम हिकारः	छां २ १९	श्रोत्रस्य श्रोत्रं	के १.२
वसन्तो हिकारो	छां. २.१६	श्वेतकेतुर्हारुणेयः	छा. ५.३
वाग्वाव नाम्नो	छां. ७.२	श्वेतकेतुर्हारुणेय	छा. ६.१
वायुरनिलममृत	ई. १७	श्वोभावामर्त्यस्य	क. १.२६
वायुर्यथैको	क.५.१०	षोडशकल.	छा ६.७
वायुर्वाव संवर्गो	छां. ४.३	स ईक्षतेमे	ऐ. ३.१
विज्ञानं यज्ञं	तै. २ ५	स ईक्षांचक्रे	प्र.६.३
विज्ञानं वाव	छां ७.७	स एवाधस्ता०	छां. ७.२५
विज्ञानसारथि०	क. ३.९	स एष वैश्वानरो	प्र. १.७

संकल्पो वाव	छां.७.४	सर्व ह्येतद्ब्रह्म	मां. २
स तस्मिन्नेवाकाशे	के. ३.१२	सर्वास्वप्सु	छां. २.४
सत्यकामो ह जाबालो	छां. ४.४	सर्वे वेदा यत्पदं	क. २. १५
सत्यमेव जयति	मुं ३.१.६	संवत्सरो वै प्रजा	प्र. १.९
सत्येन लभ्यस्त	मुं. ३.१.५	स वेदैतत्परमं	मु. ३.२.१
स त्वमग्नि स्वर्ग्य	क १.१३	सह नौ यश	तै १.३
स त्वं प्रियान्प्रियरूपांश्च	क. २.३	स होवाच कि मेऽन्नं	छां. ५.२
सदेव सोम्येद	छा. ६ २	स होवाच पितरं	क. १.४
स पर्यगाच्छुक्र	ई. ८	स ब्रह्मेति होवाच	के ४.१
सप्त प्राणाः	मुं २.१.८	सुकेशा च भारद्वाजः	प्र १.१
स प्राणमसृजत	प्र ६ ४	सुषुप्तस्थान	मां. ११
समस्तस्य खलु साम्न	छां २ १	सूर्यो यथा	क ५.११
समाने वृक्षे	मुं ३.१.२	सोऽयमात्मा	मां. ८
संप्राप्यैनमृषयो	मुं ३.२.५	स्मरो वावा	छा. ७.१३
संभूति च विनाशं च	ई.१४	स्वप्नस्थान	मां. १०
स य इद	छां ५.२४	स्वप्नस्थानो	मां. ४
स य एषो	तै १.६	स्वप्नांतं जागरितांतं	क. ४.४
स यथा सोम्य	प्र ४.७	स्वर्गे लोके न भयं	क. १.१२
स यथेमा नद्य.	प्र ६.५	हंत त इदं	क ५.६
स यदाशिशिषति	छा ३.१७	हंता चेन्मन्यते	क २.१९
स यदा तेजसाभि	प्र. ४.६	हंसस्ते पादं	छां. ४.७
स यादे पितृलोक	छा. ८.२	हंसः शुचिषद्वसु	क. ५.२
स यद्येकमात्रमभिध्यायीत	प्र. ५ ३	हिरण्मयेन पात्रेण	ई. १५
स यो ह वै	मुं. ३.२.९	हिरण्मये परे	मुं. २.२.१०
सर्व खल्विदं ब्रह्म	छां. ३.१४	हृदि ह्येष आत्मा	प्र. ३.६

SOME OF OUR PUBLICATIONS

N B.—*Prices of the following books do not include postage.*

In Sanskrit—

1—4. Works of Shankaracharya.

COMPLETE IN 4 VOLS.

[These Vols can be purchased separately.]

I. **गीताभाष्यम्** । Bhagavadgita with Bhashya. Rs. 2

II. **दशोपनिषद्भाष्यम्** । Ten principal Upanishads with Bhashya. Rs. 10

III. **ब्रह्मसूत्रभाष्यम्** । Brahmasutras with Bhashya. Rs. 4

IV. **प्रकरणग्रंथाः** । Minor Works. Contains 30 minor works and Stotras, *e.g.*, अपरोक्षानुभूतिः, आत्मबोधः, वाक्यवृत्तिः, स्वात्मनिरूपणम्, अद्वैतानुभूतिः, योगतारावली, शतश्लोकी, सर्ववेदान्तसिद्धान्तसारसंग्रहः, विवेकचूडामणिः, उपदेशसाहस्री, विष्णुसहस्रनाम-भाष्यम्, सनत्सुजातीयभाष्यम्, आत्मानात्मविचारः, वेदान्तस्तोत्राणि, भक्ति-स्तोत्राणि, etc. Rs. 4

---

5. गीतासंग्रहः । Vol. I. A collection of 10 Gitas, भगवद्गीता, रामगीता, गणेशगीता, शिवगीता, देवीगीता, कपिलगीता, सूर्यगीता, etc. Rs. 2-8

6. गीतासंग्रहः । Vol. II. A collection of 10 more Gitas, अष्टावक्रगीता, अवधूतगीता, उत्तरगीता, रामगीता, ब्रह्मगीता, etc. Rs. 2–8

7. उपनिषदां समुच्चयः । A collection of 108 Upanishads including the principal ten. Rs. 5

In Sanskrit and English—

8. The Seven Upanishads.—With English translation (Isha, Kena, Katha, Prashna, Mundaka, Taittiriya and Aitareya). Rs. 2-8-0

9. Brihadaranyaka Upanishad.—With English translation. Rs. 3-0-0

10. The Bhagavadgita.—Text, word for word meaning in English, translation, critical and explanatory notes, also notes giving full explanation of the special interpretation put upon several verses by the late Lokamanya B. G. Tilak pointing out where and how he differed from Shankaracharya. Edited by H. R. Bhagavat. Rs. 3-8-0

11. Vedantasara of Sadananda.—With English translation and the Sanskrit commentary of Ramatirtha. Re. 1-8-0

12. Sarvavedantasiddhantasarasangraha of Shankaracharya.—With English translation. Rs. 3-0-0

13. The Sanskrit Dictionary.—Sanskrit-English and English-Sanskrit in one handy volume. By H. R. Bhagavat. Rs. 3-8-0

All Communications should be addressed—

ASHTEKAR & Co., POONA CITY

or

H. R. BHAGAVAT,

Secretary, Ashtekar & Co., Poona City.

THE MOST ANCIENT BOOK

RIGVEDA

English Translation and Notes

BY THE LATE

Prof. H. H. WILSON, M.A., F.R.S.

Library Edition.

Complete in 6 vols., Cloth, 2500 pages.

Rs. 30.

Ashtekar & Co., Poona.

RIGVEDA

SANSKRIT TEXT

in Devanagari Characters with Swaras and spaces between words.

Complete in 2 vols., Cloth, 1000 pages.

Rs. 10.

Ashtekar & Co., Poona.